BIBLIOTHECA I[ndica]

A

COLLECTION OF ORIENTAL [WORKS]

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGA[L].

NEW SERIES, No. 601.

वराहपुराणम् ।

THE VARÁHA PURÁṆA

EDITED BY

PAṆḌIT HṚISHÍKEŚA ŚÁSTRÍ

Professor, Sanskrit College, Calcutta.

FASCICULUS I.

CALCUTTA:

PRINTED BY HARIŚCHANDRA KAVIRATNA, AT THE GIRIŚA-VIDYÁRATNA PRESS,

24, GIRIŚA-VIDYÁRATNA'S LANE, UPPER CIRCULAR ROAD.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1887.

OKS FOR SALE

AT LIBRARY OF THE

OCIETY OF BENGAL

STREET, CALCUTTA.

AND OBTAINABLE FROM

TY'S LONDON AGENTS, MESSRS.

TRÜBNER & CO.

ND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

Sanskrit Series.

		Rs.	As.
...aui Upanishads, (Sanskrit) Fasc. I—V @ /6/ each	.. Rs.	1	14
...láyana Grihya Sútra, (Sans.) Fasc. II—IV @ /6/ each	..	1	2
...gni Purána, (Sans.) Fasc. I—XIV @ /6/ each	.. ..	5	4
Aitareya Aranyaka of the Rig Veda (Sans.) Fasc. I—V @ /6/ each		1	14
Aphorisms of Sándilya, (English) Fasc. I	.. .. ..	0	6
Aphorisms of the Vedánta, (Sans.) Fasc. III, V—XIII @ /6/ each	..	3	12
Asvavaidyaka, (Sans.) Fasc. I—III @ /6/ each	.. ..	1	2
Brahma Sútras, (English) Fasc. I	.. ..	0	12
...smatí, (Sans.) Fasc. I—VIII @ /6/ each	.. .. ..	3	0
...had Áranyaka Upanishad, (Sans.) Fasc. VI, VII & IX @ /6/ each		1	2
Ditto (English) Fasc. II—III @ /6/ each	.. ..	0	12
Brihat Samhitá. (Sans.) Fasc. II—III. V—VII @ /6/ each	..	1	14
Chaitanya-Chandrodaya Nátaka, (Sans.) Fasc. II—III @ /6/ each		0	12
Chaturvarga Chintámani, (Sans.) Vols. I, Fasc. 1—11 ; II, 1—25 ; III, 1—15, @ /6/ each Fasc.	.. ..	19	2
Chhándogya Upanishad, (English) Fasc. II	.. .. ..	0	6
Dasa Rúpa, (Sans.) Fasc. II—III @ /6/ each	.. .. ..	0	12
Gopatha Bráhmana (Sans. & Eng.) Fasc. I and II @ /6/ each	..	0	12
Gobhilíya Grihya Sútra, (Sans.) Fasc. I—XII @ /6/ each	..	4	8
Hindú Astronomy, (English) Fasc. I—III @ /6/ each	..	1	2
Kátantra, (Sans.) Fasc. I—VI @ /12/ each	.. .. ..	4	8
Kathá Sarit Ságara, (English) Fasc. I—XIII @ /12/ each	.. ..	9	12
Kála Mádhava, (Sans.) Fasc. I and II. @ /6/ each	.. ..	0	12
Kausítaki Bráhmanopanishads, Fasc. II	.. .. ..	0	6
Kúrma Purána, (Sans.) Fasc. I—III @ /6/ each	.. .. ..	1	2
Lalita Vistara, (Sans.) Fasc. II—VI @ /6/ each	.. ..	1	14
Ditto (English) Fasc. I—III @ /12/ each	.. ..	2	4
Manutíká Sangraha, Fasc. I—II @ /6/ each	.. ..	0	12
Mímámsá Darsana, (Sans.) Fasc. II—XVIII @ /6/ each	..	6	6
Márkandeya Purána, (Sans.) Fasc. IV—VII @ /6/ each	..	1	8
Nrisimha Tápaní, (Sans.) Fasc. I—III @ /6/ each	.. ..	1	2
Nirukta, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—6 ; Vol. III, Fasc. 1—6 ; Vol. IV, I & II @ /6/ each	.. .. ..	7	8
Nárada Pancharátra, (Sans.) Fasc. IV @ /6/ each	.. ..	0	6
Nárada Smriti (Sans.) Fasc. I & II	.. .. ..	0	12
Nyáya Darsana, (Sans.) Fasc. III @ /6/ each	.. ..	0	6
Nitisára, or, The Elements of Polity, By Kámandaki (Sans.) Fasc. II—V		1	8
Parisishtaparvan, (Sans.) Fasc. I—IV @ /6/ each	.. ..	1	8
Pingala Chhandah Sútra, (Sans.) Fasc. II—III @ /6/ each	..	0	12
Prithiráj Rásau, (Hindí) Fasc. I—VI @ /6/ each	.. ..	2	4
Ditto (English) Fasc. I	.. ..	0	12
Páli Grammar, (English) Fasc. I and II @ /6/ each	.. ..	0	12
Prákrita Lakshanam, (Sans.) Fasc. I	.. .. ..	1	8
Parásara Smriti (Sans.) Fasc. I—V @ /6/ each	.. Rs.	1	14

(Continued on the third page of cover.)

वराहपुराणम् ।

श्रीगणेशाय नमः ।

प्रथमोऽध्यायः ।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततोजयमुदीरयेत् ॥*

नमस्तस्मै वराहाय लीलयोद्धरते महीम् ।
खुरमध्यगतो यस्य मेरुः खणखणायते ॥ १ ।

दंष्ट्राग्रेणोऽद्धृता गौरुदधिपरिहृता पर्वतैर्निम्नगाभि.
साकं मृत्पिण्डवत्प्राग्बृहदुरुवपुषा†ऽनन्तरूपेण येन ।
सोऽयं कंसासुरारिर्मुरनरकदशास्यान्तकृत्‡ सर्वसंस्थः
कृष्णोविष्णुः सुरेशो नुदतु§ मम रिपूनादिदेवो वराहः ॥ २।¶

---

* (क) पुस्तके एष श्लोको नास्ति ।

† गुरुतरवपुषा इति (ख) ।

‡ मधुनरकदशास्यान्तकृदिति (ख) ।

§ (ग) पुस्तके नुदति मम रिपूनिति पाठो वर्त्तते ।

¶ (ख) (ग) पुस्तकयोः

"यः संसारार्णवे नौरिव मरणजराव्याधिनक्रोर्म्मिभीते
भक्तानां भीतिहर्त्ता सुरनरकदशास्यान्तकृत्लोकरूपी ।

सूत उवाच ।

यस्मिन्काले क्षितिः पूर्व्वं वराहवपुषा तु सा* ।
उद्धृता विभुना शक्त्या† पप्रच्छ परमेश्वरम् ॥ ३ ॥

धरण्युवाच । ‡

कल्पे कल्पे भवानेव मां समुद्धरति प्रभो§ ।
न चाहं वेद ते मूर्त्तिमादिसर्गे च¶ केशव ॥ ४ ॥
वेदेषु चैव नष्टेषु|| मत्स्योभूत्वा रसातलात्** ।
प्रविश्य तानथोत्सृज्य ब्रह्मणे दत्तवानसि ॥ ५ ॥
अन्यत्सुरासुरमिति†† त्वं समुद्रस्य मन्थने ।
धृतवानसि कौर्म्म्येण मन्दरं मधुसूदन ॥ ६ ॥
पुनश्च गां जगन्नाथ निमज्जन्तीं रसातलात्‡‡ ।

विष्णुः सर्व्वेश्वरोऽयं यमिह कृतधियो लीलया प्राप्नुवन्ति
व्यक्तात्मानो न पापं प्रभवमनुदिताऽरातिपक्षः क्षितीशः ॥

एष श्लोकोऽस्ति । (ख) पुस्तके अस्मात्परं सूत उवाच इति पाठो नास्ति ।

* (ख) पुस्तके कल्पवाराहरूपिणेति पाठः ।

† उद्धृता नमिता भक्त्या इति (ख) ।

‡ (ख) एष पाठः (क) (ख) पुस्तकयोर्नास्ति ।

§ कस्मिन् काले भवानेव मां समुद्धरते विभो इति (ग) । अत्र समुद्धरते इत्यात्मनेपदमार्षम् ।

¶ मादिसर्गेषु इति (ख) ।

|| विप्रनष्टेषु इति (ख) ।

** रसातले इति (घ) ।

†† देवासुरमिति इति (ख) । सुरासुरनयमिति (ग) ।

‡‡ पुनर्वराहरूपेण आगच्छन्तीं रसातलमिति (ख) ।

उज्जहारैकदंष्ट्रेण भगवन्वै महार्णवात्* ॥ ७ ।
अन्यश्चिरण्यकशिपुर्वरदानेन दर्पितः ।
आबाधमानः पृथिवीं स त्वया विनिपातितः ॥† ८ ।
पुनर्निःक्षत्रिया देव त्वया चापि पुरा कृता ।
जामदग्न्येन रामेण त्वया भूत्वा सकृत्प्रभो ॥ ९ ।
पुनश्च रावणो रक्षः क्षपितं चात्मतेजसा ।
बलिः प्रबद्धो भगवन्त्वया वामनरूपिणा‡ ॥ १० ।
न च जानाम्यहं देव तव किञ्चिद्विचेष्टितम् ।
उद्धृत्य मां कथं सृष्टिं सृजसे किञ्च कारणम्§ ॥ ११ ।
सकृद्धियेत कृत्वा च पाल्यते चापि केन वा ।
केन वा सुलभो देवो भवेस्त्वं सततं विभो ॥ १२ ।

---

* भवानेव रसातलादिति (ख) ।

† असावपि नृसिंहं तद्पुरास्थाय नाशित इति (ख) ।

‡ (ख) पुस्तके (९) (१०) श्लोकावेवं पठ्यते—

"बलिस्तु बद्धो भगवंस्त्वया वामनरूपिणा ।
पुनर्निःक्षत्रिया विप्र साऽहं कृत्वा त्वया कृता ॥
जामदग्न्येन रामेण त्वया भूत्वाऽसकृद्विभो ।
पुनश्च रावणोरक्षः क्षपितं स्वेन तेजसा ॥"

कोऽधिकः श्लोकश्च वर्त्तते यथा—

नन्दगोष्ठेऽवतीर्य्याऽसौ हतः कंसासुरस्त्वया ।
साम्प्रतं बुद्धरूपेण तिष्ठसे लोकमोहनः ॥

§ सृष्टेः किं मे प्रमाणञ्च त्वया दृष्टं विशेषतः इति (ख) ।

कथञ्च सृष्टेरादिः स्यादवसानं कथं भवेत्* ।
कथं युगस्य गणना संख्याऽस्यानु चतुर्युगम् ॥ १३ ।
को वा विशेषस्तेष्वस्मिन्का वा वाञ्छा महेश्वर ।
यज्वानः के च राजानः के च सिद्धिं पराङ्गताः ॥ १४ ।
एतत्सर्व्वं समासेन कथयस्व प्रसीद मे ।
इत्युक्तः क्रोड़रूपेण जहास परमेश्वरः ॥ १५ ।
हसतस्तस्य कुक्षौ तु जगद्धात्री ददर्श ह ।
रुद्रान्देवान्सवसवः† सिद्धसङ्घान्महर्षिभिः ॥ १६ ।
सचन्द्रसूर्य्यग्रहसप्तलोका-
नन्तस्थितांस्तत्र उपात्तधर्मान् ।
इतीदृशं पश्यति सा समस्तं
यावत् क्षितिर्वेपितसर्व्वगात्रा ॥ १७ ।
उन्मीलिताक्षस्तु यदा महात्मा
दृष्टो‡ धरण्याऽमलसर्व्वगात्रया ।
तावत्स्वरूपेण चतुर्भुजेन
महोदधौ सुप्तमथोऽन्वपश्यत् ॥ १८ ।
शेषपर्य्यङ्कशयने सुप्तं देवं जनार्द्दनम् ।
दृष्ट्वा तन्नाभिपङ्कोरुड़न्तस्थं तं चतुर्भुजम् ।

---

* कथं युगस्य निर्म्माणं किन्तु तथाच चतुर्युगमिति (ख)। युगं युगस्य गणनेति च क्वचित्पाठः ।

† सवसवः इति आर्षं, सवसूनिति साधु ।

‡ दृष्ट इति (ख) ।

कृताञ्जलिपुटा देवी स्तुतिं धात्री जगाद ह ॥ १९ ।

धरण्युवाच ।

नमः कमलपत्राक्ष नमस्ते पीतवाससे ।
नमः सुरारिविध्वंसकारिणे परमात्मने ॥ २० ।
शेषपर्य्यङ्कशयने धृतवक्षःस्थलश्रिये ।
नमस्ते सर्व्वदेवेश नमस्ते मोक्षकारिणे ॥ २१ ॥
नमः शार्ङ्गासिचक्राय जन्ममृत्युविवर्जिते* ।
नमो नाभ्युत्थितमहाकमलासनजन्मने ॥ २२ ।
नमो विद्रुमरक्तोष्ठपाणिपल्लवशोभिने ।
शरणं त्वां प्रपन्नास्मि त्राहि नारीमनागसम् ॥ २३ ।
पूर्णनीलाञ्जनाकारं† वाराहं ते जनार्द्दन ।
दृष्ट्वा भीताऽस्मि भूयोऽपि जगत्त्वद्देहगोचरे ।
इदानीं कुरु मे नाथ दयां त्राहि महाप्रभो ॥ २४ ।
केशवः पातु मे पादौ जंघे नारायणो मम ।
माधवो मे कटिं पातु गोविन्दो गुह्यमेव च ॥ २५ ।
नाभिं विष्णुस्तु मे पातु उदरं मधुसूदनः ।
उरस्त्रिविक्रमः पातु हृदयं पातु वामनः ॥ २६ ॥
श्रीधरः पातु मे कण्ठं हृषीकेशो मुखं मम ।
पद्मनाभस्तु नयने शिरो दामोदरो मम ॥ २८ ।

---

* जन्ममृत्युविवर्ज्जिते इति आर्षं, जन्ममृत्युविवर्ज्जिताय इति साधु ।

† पूर्णनीलोज्ज्वलाकारमिति (ग) ।

एवं न्यस्य हरेर्न्यासं नामानि जगती तदा ।
नमस्ते भगवन्विष्णो इत्युक्त्वा विरराम ह ॥ २८ ॥

इति वराहपुराणे सम्बन्धे प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

सूत उवाच ।

ततस्तुष्टो हरिर्भक्त्या धरण्यात्मशरीरगः ।
मायां प्रकाश्य तेनैव स्थितो वाराहमूर्त्तिना ॥ १ ।
जगाद किन्ते सुश्रोणि प्रश्नमेतं सुदुर्लभम् ।
कथयामि पुराणस्य विषयं सर्व्वशास्त्रतः ॥ २ ।
पुराणानां हि सर्व्वेषामयं साधारणः स्मृतः ।
श्लोकं धरणि निश्चित्य निःशेषं त्वमतः शृणु ॥ ३ ।

वराह उवाच ।

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥ ४ ।
आदिसर्गमहं तावत्कथयामि वरानने ।
यस्मादारभ्य देवानां राज्ञां चरितमेव च ॥ ५ ।
ज्ञायते चतुरंशश्च परमात्मा सनातनः ॥ ६ ।

आदावहं व्योम महत्ततोऽणु-
रेकैव मत्तः प्रबभूव बुद्धिः ।
त्रिधा तु सा सत्वरजस्तमोभिः
पृथक् पृथक् सत्त्वरूपैरुपेता ॥ ७ ।
तस्मिंस्त्रिकेऽहं तमसो महान्स
सदोच्यते सर्व्वविदां प्रधानः ।
तस्मादपि क्षेत्रविदूर्ज्जितो यो
बभूव बुद्धिस्तु ततो बभूव ॥ ८ ।
तस्मात्तु तेभ्यः श्रवणादिहेतव-
स्ततोऽक्षमाला जगतो व्यवस्थिता ।
भूतैर्गतैरेव च पिण्डमूर्त्ति-
र्मया भद्रे विहिता त्वात्मनैव ॥* ९ ।
शून्यं त्वासीत्तत्र शब्दस्तु खं च
तस्माद्वायुस्तत एवानु तेजः ।
तस्मादापस्तत एवानु देवि
मया सृष्टा भवती भूतधात्री ॥ १० ।
योगे पृथिव्यां जलवत्ततोऽपि
सबुद्बुदं कललं त्वंण्डमेव ।
तस्मिन्प्रवृद्धिं च गतेऽहमासी-†
दापोमयश्चात्मनात्मानमादौ ॥ ११ ।

---

* मया भद्रे विहिता त्वात्मनैव इत्यत्र छन्दोभङ्गः ।

† अहमासीदिति आर्षम्, अहमासमिति साधु ।

सृष्ट्वा नारस्ता अथो तत्र चाहं
येनैव स्यान्नाम नारायणेति ।
कल्पे कल्पे तत्र शयामि भूयः
सुप्तस्य मे नाभिजः स्याद्यथाद्य ॥ १२ ॥
एवम्भूतस्य मे देवि नाभिपद्मे चतुर्मुखः ।
उत्तस्थौ स मया प्रोक्तः प्रजाः सृज महामते ॥ १३ ।
एवमुक्त्वा तिरोभावं गतोऽहं सोऽपि चिन्तयन् ।
आस्ते यावज्जगद्धात्रि नाध्यगच्छत्तु किञ्चन* ॥ १४ ।
तावत्तस्य महारोषो ब्रह्मणोऽव्यक्तजन्मनः ।
सम्भूय तेन बालः स्यात्† द्देको रोषात्मसम्भवः ॥ १५ ।
यो रुदन्वारितस्तेन ब्रह्मणाव्यक्तमूर्त्तिना‡ ।
ब्रवीति नाम मे देहि तस्य रुद्रेति सो ददौ ॥ १६ ।
सोऽपि तेन सृजस्वेति प्रोक्तो लोकमिमं शुभे ।
अशक्तः सोऽथ सलिले ममज्ज तपसे धृतः§ ॥ १७ ।
तस्मिन्सलिलमग्ने तु पुनरन्यं प्रजापतिम् ।
ब्रह्मा ससर्ज्ज भूतेषु दक्षिणाङ्गुष्ठतः परम् ॥ १८ ।
वामे चैव तथाङ्गुष्ठे तस्य पत्नीमथासृजत् ॥ १९ ।
स तस्यां जनयामास मनुं स्वायम्भुवं प्रभुः ।

---

* नाधिगच्छति किञ्चन इति (क), (ग) ।

† स्यादिति आर्षनभूदिति साधु ।

‡ ब्रह्मणाव्यक्तरूपिणा इति (ख) ।

§ तपसे स्तत इति (ग) ।

तस्मात्सम्भाविता बुद्धिः प्रजानां ब्रह्मणा पुरा* ॥ २० ।

धरण्युवाच ।

विस्तरेण ममाचक्ष्व आदिसर्गं सुरेश्वर ।
ब्रह्मा नारायणाख्योऽयं कल्पादौ चाभवद्यथा ॥ २१ ।

श्रीभगवानुवाच ।

ससर्ज्ज सर्व्वभूतानि यथा नारायणात्मकः ।
कथ्यमानं मया देवि तदशेषं क्षिते शृणु ॥ २२ ।
गतकल्पावसाने तु निशि सुप्तः स्थितः शुभे ।
सत्वोद्रिक्तस्तथा ब्रह्मा शून्यं लोकमवैक्षत ॥ २३ ।
नारायणः परोऽचिन्त्यः पराणामपि पूर्व्वजः ।
ब्रह्मस्वरूपी भगवाननादिः सर्व्वसम्भवः ॥ २४ ।
इदं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ।
ब्रह्मस्वरूपिणं देवं जगतः प्रभवाव्ययम् ॥ २५ ।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥
अयनं तस्य ताः पूर्व्वं तेन नारायणः स्मृतः ॥ २६ ।
सृष्टिं चिन्तयतस्तस्य कल्पादिषु यथा पुरा ।
अबुद्धिपूर्व्वकस्तस्य प्रादुर्भूतस्तमोमयः ॥ २७ ।
तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः ।
अविद्या पञ्चपर्व्वैषा प्रादुर्भूता महात्मनः† ॥ २८ ।
पञ्चधावस्थितः सर्गो ध्यायतः प्रतिबोधवान् ।

* ब्रह्मणः पुरा इति (ग) ।

† एष श्लोकः (ग) पुस्तके नास्ति ।

स मुख्यसर्गो विज्ञेयः सर्गविद्भिर्व्विचक्षणैः ॥ २९ ।
पुनरन्यमभूत्तस्य ध्यायतः सर्गमुत्तमम् ।
तिर्य्यक्स्रोतस्तु वै यस्मात्तिर्य्यक्स्रतस्तु वै स्मृतः ॥ ३० ।
पश्वादयस्ते विख्याता उत्पथग्राहिणः क्वता:* ।
तमप्यसाधनं मत्वा तिर्य्यक्स्रोतश्चतुर्मुखः ॥ ३१ ।
ऊर्द्ध्वस्रोतस्त्रिधा यस्तु सात्विको धर्मवर्त्तिनः ।
ततोर्द्ध्वचारिणो देवाः† सर्व्वे गर्भसमुद्भवाः ॥ ३२ ।
तदा सृष्टान्यसर्गन्तु तदा दध्यौ प्रजापतिः ।
असाधकांस्तु तान्मत्वा मुख्यसर्गादिसम्भवान् ॥ ३३ ।
ततः सञ्चिन्तयामास अर्व्वाक्स्रोतस्तु स प्रभुः ।
अर्व्वाक्स्रोतसि चोत्पन्ना मनुष्याः साधका मताः ॥ ३४ ।
ते च प्रकाशबहुलास्तमोद्रिक्ता रजोऽधिकाः ।
तस्मात्ते दुःखबहुला भूयोभूयश्च कारिणः ॥ ३५ ।
इत्येते कथिताः सर्गाः षड़ेते सुभगे तव ।
प्रथमो महतः सर्गस्तन्मात्राख्यो द्वितीयकः ॥ ३६ ।
वैकारिकस्तृतीयस्तु सर्गश्चैन्द्रियकः स्मृतः ।
इत्येष प्राकृतः सर्गः संभूतो बुद्धिपूर्व्वकः ॥ ३७ ।
मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः ।
तिर्य्यक्स्रोतश्च यः प्रोक्तस्तैर्य्यक्स्रोतः स उच्यते ॥ ३८ ।

---

* उत्पत्त्यां ग्राहिणः क्वता इति (ग) ।

† ततोर्द्धचारिणः इति आर्ष, तत ऊर्द्धचारिणः इति साधु ।

ततोर्द्ध्वस्रोतसां* श्रेष्ठः सप्तमः स तु मानवः ।
अष्टमोऽनुग्रहः सर्गः सात्त्विकस्तामसश्च सः ॥ ३९ ।
पञ्चैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः† ।
प्राकृतो वैकृतश्चैव कौमारो नवमः स्मृतः ॥ ४० ।
इत्येते वै समाख्याता नव सर्गाः प्रजापतेः ।
प्राकृता वैकृताश्चैव जगतो मूलहेतवः ।
इत्येते कथिताः सर्गाः किमन्यच्छ्रोतुमिच्छसि‡ ॥ ४१ ।

धरण्युवाच ।

नवधा सृष्टिरुत्पन्ना ब्रह्मणोऽव्यक्तजन्मनः ।
कथं सा वबृधे देव एतन्मे कथयाच्युत ॥ ४२ ।

वराह उवाच ।

प्रथमं ब्रह्मणा सृष्टा रुद्राद्यास्तु तपोधनाः ।
सनकादयस्ततः सृष्टा§ मरीच्यादय एव च ॥ ४३ ।
मरीचिरत्रिश्च तथा अङ्गिराः पुलहः क्रतुः ।
पुलस्त्यश्च महातेजाः प्रचेता भृगुरेव च ।
नारदो दशमश्चैव वशिष्ठश्च महातपाः ॥ ४४ ।

---

* ततोर्द्ध्वस्रोतसामिति आर्षं, तत ऊर्द्ध्वस्रोतसामिति साधु ।

† प्राकृतास्ते तु संस्मृता इति (क) ।

‡ (ग) पुस्तकेऽन्यैवं पाठो वर्त्तते—
"इत्येते कथिताः सर्गाः प्राकृतास्तु त्रयः स्मृताः ।
प्राकृतोवैकृतश्चैव किमन्यच्छ्रोतुमिच्छसि ॥"

§ सनकादयस्ततः सृष्टा इत्यत्राचरमेकमधिकं वर्त्तते, सनकाद्यास्ततः सृष्टा इति तु न कश्चिद्दोषः, एवं ४५ श्लोकेऽपि ।

सनकाद्यो निवृत्त्याख्ये तेन धर्म्मे प्रयोजिताः ।
प्रवृत्त्याख्ये मरीच्याद्या मुक्त्वैकं नारदं मुनिम् ॥ ४५ ।
योऽसौ प्रजापतिस्त्वाद्यो दक्षिणाङ्गुष्ठसम्भवः ।
तस्यादौ तत्र वंशे तु जगदेतच्चराचरम् ॥ ४६ ।
देवाश्च दानवाश्चैव गन्धर्व्वोरगपक्षिणः ।
सर्व्वे दक्षस्य कन्यासु जाताः परमधार्म्मिकाः ॥ ४७ ।
योऽसौ रुद्रेति विख्यातः पुत्रः क्रोधसमुद्भवः ।
भ्रुकुटीकुटिलात्तस्य ललाटात्परमेष्ठिनः ॥ ४८ ।
अर्द्धनारीनरवपुः प्रचण्डोऽतिभयङ्करः ।
विभजात्मानमित्युक्त्वा ब्रह्मा चान्तर्दधे पुनः ॥ ४९ ।
तथोक्तोऽसौ द्विधा स्त्रीत्वं पुरुषत्वं चकार सः ।
बिभेद पुरुषत्वं च दशधा चैकधा च सः ॥ ५० ।
ततस्त्वेकादश ख्याता रुद्रा ब्रह्मसमुद्भवाः ॥ ५१ ।
अयमुद्देशतः प्रोक्तो रुद्रसर्गो मयाऽनघे ।
इदानीं युगमाहात्म्यं कथयामि समासतः ॥ ५२ ।
कृतं त्रेता द्वापरश्च कलिश्चेति चतुर्युगम् ॥ ५३ ।
एतस्मिन्ये महासत्त्वा राजानो भूरिदक्षिणाः ।
देवासुराश्च ये चक्रुर्धर्म्मकर्म्म च तच्छृणु ॥ ५४ ।
आसीत्प्रथमकल्पे तु मनुः स्वायम्भुवः पुरा ।
तस्य पुत्रद्वयं जज्ञे अतिमानुषचेष्टितम् ॥ ५५ ।
प्रियव्रतोत्तानपादनामानं* धर्म्मवत्सलम् ।

---

* नामानमित्यस्य क्लीवत्वमुचितं द्वयमित्यस्य विशेषणत्वात् ।

तत्र प्रियव्रतो राजा महायज्वा तपोबलः ॥ ५६ ।
स चेष्ट्वा विविधैर्य्यज्ञैर्विपुलैर्भूरिदक्षिणैः ।
सप्तद्वीपेषु संस्थाप्य भरतादीन् सुतान्निजान् ।
स्वयं विशालां वरदां गत्वा तेपे महत्तपः ॥ ५७ ।
तस्मिन् स्थितस्य तपसि राज्ञो वै चक्रवर्त्तिनः ।
उपेयान्नारदस्तत्र* दिदृक्षुर्द्धर्मचारिणम् ॥ ५८ ।
स दृष्ट्वा नारदं व्योम्नि ज्वलद्भास्करतेजसम् ।
अभ्युत्थानेन राजेन्द्र उत्तस्थौ हर्षितस्तदा ॥ ५९ ।
तस्यासनञ्च† पाद्यञ्च सम्यक् कृत्वा निवेद्य वै ।
स्वागतादिभिरालापैः परस्परमवोचताम् ॥ ६० ।
कथान्ते नारदं राजा पप्रच्छ ब्रह्मवादिनम् ॥ ६१ ।

प्रियव्रत उवाच ।

भगवन् किञ्चिदाश्चर्य्यमेतस्मिन् कृतसंज्ञिते ।
युगे दृष्टं श्रुतं चापि तन्मे कथय नारद ॥ ६२ ।

नारद उवाच ।

आश्चर्य्यमेकं दृष्टं मे तच्छृणुष्व प्रियव्रत ।
ह्यस्तनेऽहनि राजेन्द्र श्वेताख्यं गतवानहम् ॥ ६३ ।
द्वीपं तत्र सरो दृष्टं फुल्लपङ्कजमालिनम्‡ ।
सरसस्तस्य तीरे तु कुमारीं पृथुलोचनाम् ॥ ६४ ।

---

* उपेयादिति भूते लिङ् आर्षम् ।

† तस्यासने चेति (ग) ।

‡ फुल्लपङ्कजमाश्रितमिति (ख) ।

दृष्ट्वाहं विस्मयापन्नस्तां कन्यामायतेक्षणाम् ।
पृष्टवानस्मि राजेन्द्र तदा मधुरभाषिणीम् ॥ ६५ ।
कासि भद्रे कथं वासि किं वा कार्य्यमिह त्वया ।
कर्त्तव्यं चारुसर्व्वाङ्गि तन्ममाचक्ष्व शोभने ॥ ६६ ।
एवमुक्ता मया सा हि मां दृष्ट्वाऽनिमिषेक्षणा ।
स्मृत्वा तूष्णीं स्थिता यावत्तावन्मे ज्ञानमुत्तमम् ॥ ६७
विस्मृतं सर्व्ववेदाश्च सर्व्वशास्त्राणि चैव हि ।
योगशास्त्राणि शिक्षाश्च वेदानां स्मृतयस्तथा ॥ ६८ ।
सर्व्वं दृष्ट्वैव मे राजन् कुमार्य्याऽपहृतं क्षणात् ।
ततोऽहं विस्मयाविष्टश्चिन्ताशोकसमन्वितः ॥ ६९ ।
तामेव शरणं गत्वा यावत्पश्यामि पार्थिव ।
तावद्दिव्यः पुमांस्तस्याः शरीरे समदृश्यत ॥ ७० ।
तस्यापि पुंसो हृदये त्वपरस्तस्य चोरसि ।
अन्यो रक्तेक्षणः श्रीमान्द्वादशादित्यसन्निभः* ॥ ७१
एवं दृष्टाः पुमांसोऽत्र त्रयः कन्याशरीरगाः ।
क्षणेन तत्र कन्यैका न तान् पश्यामि सुव्रत ॥ ७२ ।
ततः पृष्टा मया देवी सा कुमारी कथं मम ।
वेदा नष्टा ममाचक्ष्व भद्रे तन्नाशकारणम् ॥ ७३ ।

कन्योवाच ।

माताहं सर्व्ववेदानां सावित्री नाम नामतः ।
मां न जानासि येन त्वं ततो वेदा हृतास्तव ॥ ७४ ।

---

* (ग) पुस्तके (७१) श्लोकस्य प्रथमः पादो नास्ति ।

एवमुक्ते तया राजन्विस्मयेन तपोधन ।
पृष्टा त एते पुरुषा एतत्कथय शोभने ॥ ७५ ।

कन्योवाच ।

य एष मच्छरीरस्थः सर्वाङ्गश्चारुशोभनः ।
एष ऋग्वेदनामा तु वेदो नारायणः स्वयम् ।
वह्निभूतो दहत्याशु पापान्युच्चारणादनु ॥ ७६ ।
एतस्य हृदये योऽयं दृष्ट आसीत्त्वयात्मजः ।
स यजुर्वेदरूपेण स्थितो ब्रह्मा महाबलः ॥ ७७ ।
तस्याऽप्युरसि संविष्टो य एष शुचिरुज्ज्वलः ।
स सामवेदनामा तु रुद्ररूपी व्यवस्थितः ॥ ७८ ।
एष आदित्यवत्पापान्याशु नाशयते स्मृतः* ॥ ७९ ।
एते त्रयो महावेदा ब्रह्मन्देवास्त्रयः स्मृताः ।
एते वर्णा अकाराद्याः सवनान्यत्र वै द्विज ॥ ८० ।
एतत्सर्व्वं समासेन कथितं ते द्विजोत्तम ।
गृहाण वेदाञ्छास्त्राणि सर्व्वज्ञत्वञ्च नारद ॥ ८१ ।
एतस्मिन्वेदसरसि स्नानं कुरु महाद्विज ।
कृते स्नानेऽन्यजन्मीयं येन स्मरसि सत्तम ॥ ८२ ।
एवमुक्त्वा तिरोभावं गता कन्या नराधिप ।
अहं तत्र कृतस्नानस्त्वद्दिदृक्षुरिहागतः ॥ ८३ ।

इति वराहपुराणे आदिभूतवृत्तान्ते द्वितीयोऽध्यायः ।

—०—

* एष आदित्यसम्भावत्पापान्दहति आशु वा इति (ग) ।

तृतीयोऽध्यायः ।

प्रियव्रत उवाच ।

अन्यस्मिन् भगवज्जन्मन्यासीद्यत्त्वद्विचेष्टितम् ।
सर्व्वं कथय देवर्षे महत्कौतूहलं हि मे ॥ १ ॥

नारद उवाच ।

स्नातस्य मम राजेन्द्र तस्मिन्वेदसरस्यथ ।
सावित्र्याश्च वचः श्रुत्वा तस्मिञ्जन्मसहस्त्रिकम् ।
स्मरणं तत्क्षणाज्जातं शृणु जन्मान्तरं मम ॥ २ ॥
अस्त्यवन्तीपुरं राजंस्तत्राहं प्राग्द्विजोत्तमः ।
नाम्ना सारस्वतः पूर्व्वं वेदवेदाङ्गपारगः ॥ ३ ॥
बहुभृत्यपरीवारो बहुधान्यश्च पार्थिव ।
अन्यस्मिन् कृतसंज्ञे तु युगे परमबुद्धिमान् ॥ ४ ॥
ततो ध्यातं मयैकान्ते किमनेन करोम्यहम् ।
द्वन्द्वेन सर्व्वमेतद्धि न्यस्त्वा* पुत्रेषु याम्यहम् ।
तपसे धृतसङ्कल्पः सरः सारस्वतं द्रुतम् ॥ ५ ॥
एवं चिन्त्य† मया दृष्टः कर्म्मकाण्डेन केशवः ।
श्राद्धैश्च पितरो देवा यज्ञैश्चान्ये तथा जनाः ॥ ६ ॥
ततोऽहं निर्गतो राजंस्तपसे धृतमानसः ।
सारस्वतं नाम सरो यदेतत्पुष्करं स्मृतम् ॥ ७ ॥

---

* न्यस्त्वा इत्यार्षं, न्यस्य इति साधु ।

† चिन्त्य इति आर्षं, विचिन्त्य चिन्तयित्वा वेति साधु ।

तत्र गत्वा मया विष्णुः पुराणः पुरुषः शिवः ।
आराधितो मया भक्त्या जपन्नारायणात्मकम् ॥ ८ ।
ब्रह्मपारमयं राजञ्जपता परमस्तवम् ।
ततो मे भगवांस्तुष्टः प्रत्यक्षत्वं जगाम ह ॥ ९ ।

प्रियव्रत उवाच ।

कीदृशं ब्रह्मपारन्तु श्रोतुमिच्छामि सत्तम ।
कथयस्व प्रसादेन देवर्षे सुप्रसन्नधीः ॥ १० ।

नारद उवाच ।

परं पराणाममृतं पुराणं
पारं परं विष्णुमनन्तवीर्य्यम् ।
नमामि नित्यं पुरुषं पुराणं
परायणं पारगतं पराणाम् ॥ ११ ।
पुरातनं त्वं प्रतिमं पुराणं
परापरं पारगमुग्रतेजसम् ।
गम्भीरगम्भीरधियां प्रधानं
नतोऽस्मि देवं हरिमीशितारम् ॥ १२ ।
परात्परं चापरमं प्रधानं
परास्पदं शुद्धपदं विशालम् ।
परात्परेशं पुरुषं पुराणं
नारायणं स्तौमि विशुद्धभावः ॥ १३ ।
पुरा पुरं शून्यमिदं ससर्ज्ज
तदा स्थितत्वात्पुरुषः प्रधानम् ।

जने प्रसिद्धः शरणं ममास्तु
नारायणो वीतमलः पुराणः ॥ १४ ।
पारं परं विष्णुमपाररूपं
पुरातनं नीतिमतां प्रधानम् ।
धृतक्षमं शान्तिधरं क्षितीशं
शुभं सदा स्तौमि महानुभावम् ॥ १५ ।
सहस्रमूर्द्धानमनन्तपाद-
मनन्तबाहुं शशिसूर्य्यनेत्रम् ।
तमक्षरं* क्षीरसमुद्रनिद्रं
नारायणं स्तौम्यमृतं परेशम् ॥ १६ ।
त्रिवेदगम्यं त्रिनवैकमूर्त्तिं
त्रिशुक्लसंस्थं त्रिहुताशभेदम् ।
त्रितत्त्वलक्ष्यं त्रियुगं त्रिनेत्रं
नमामि नारायणमप्रमेयम् ॥ १७ ।
कृते सितं रक्ततनुं तथा च
त्रेतायुगे पीततनुं पुराणम् ।
तथा हरिं द्वापरतः कलौ च
कृष्णीकृतात्मानमथो नमामि ॥ १८ ।
ससर्ज्ज यो वक्त्रत एव विप्रान्
भुजान्तरे क्षत्रमथोरुयुग्मे ।

---

*क्षरमिति (ख), (ग) ।

विप्रः पदाग्रेषु तथैव शूद्रान्
नमामि तं विश्वतनुं पुराणम् ॥ १९ ।
परात्परं पारगतं प्रमेयं
युधाम्पतिं कार्य्यत एव कृष्णम् ।
गदासिचर्म्मब्जमृतोत्थपाणिं
नमामि नारायणमप्रमेयम् ॥ २० ।
इति स्तुतो देववरः प्रसन्नो
जगाद मां नीरदतुल्यघोषः ।
वरं वृणीष्वेत्यसकृत्ततोऽहं
तस्यैव देहेलयमिष्टवांश्च ॥ २१ ।*
इति श्रुत्वा वचो मह्यं देवदेवः सनातनः ।
उवाच प्रकृतिं गच्छ विप्रैतत्तु प्रयोजनम्† ॥ २२ ।
नारं पानीयमित्युक्तं पितृणां तद्ददौ भवान् ।
तदाप्रभृति ते नाम नारदेति भविष्यति ॥‡ २३ ।
एवमुक्त्वा गतो देवः सद्योऽदर्शनमुच्चकैः ।
अहं कालेवरं त्यक्त्वा कालेन तपसा तदा ॥

---

* (ख) पुस्तके २१शः श्लोको नास्ति ।

† (ग) पुस्तके पाद एषोऽन्यथा पठ्यते यथा—
उवाच प्रकृतिं विप्र संसरस्वाचयामिमाम् ।

‡ (ग) पुस्तके एष श्लोक एवं पठ्यते—
नारं पानीयमित्युक्तं पितृणां तत्सदा भवान् ।
ददाति ते ततो नाम नारदेति भविष्यति ॥

ब्रह्मलोके लयं प्राप्तस्तदोत्पत्तिं च पार्थिव* ॥ २४।२५ ।
दिवसस्य पुनः सृष्टो दशभिस्तनयैः सह† ।
दिनादिर्यो हि देवस्य ब्रह्मणोऽव्यक्तजन्मनः ॥
स सृष्ट्यादिः समस्तानां देवादीनां न सशंयः ।
सर्व्वस्य जगतः सृष्टिरेषैव प्रभुधर्म्मतः ॥ २६।२७ ।
एतन्मे प्राकृतं जन्म यन्मां पृच्छसि पार्थिव ॥ २८ ।
यस्मान्नारायणं ध्यात्वा प्राप्तोऽस्मि गुरुतां नृप ।
तस्मात्त्वमपि राजेन्द्र भव विष्णुपरायणः ॥ २९ ।

इति वराहपुराणे आदिभूतवृत्तान्ते नारदजन्मो-
पाख्यानो नाम तृतीयोऽध्यायः ।

——०-०——

चतुर्थोऽध्यायः ।

धरण्युवाच ।

योऽसौ नारायणो देवः परमात्मा सनातनः ।
भगवान् सर्व्वभावेन उताहो नेति शंस मे* ॥ १ ।

---

* तवोत्पत्तिश्च पार्थिव इति (ग) ।
† दशभिर्मानसैः सह इति (ख) ।

* संशयः इति (ख) ।

वराह उवाच ।

मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश ॥ २ ।
इत्येताः कथितास्तस्य मूर्त्तयो भूतधारिणि* ।
दर्शनं प्राप्तुमिच्छूनां सोपानानि च शोभने ॥ ३ ।
यत्तस्य परमं रूपं तन्न पश्यन्ति देवताः ।
अस्मदादिस्वरूपेण पूरयन्ति ततो धृतिम् ॥ ४ ।
ब्रह्मा भगवती† मूर्त्तौ राजसस्तामसस्तथा ।
याभिः संस्थाप्यते विश्वं स्थितौ सञ्चाल्यते‡ च ह ॥ ५ ।
त्वमेका तस्य देवस्य मूर्त्तिराद्या धरा धरे§ ।
द्वितीया सलिलं मूर्त्तिस्तृतीया तैजसी स्मृता ॥ ६ ।
चतुर्थी वायुमूर्त्तिः स्यादाकाशाख्या तु¶ पञ्चमी ।
एतास्तु मूर्त्तयस्तस्य चेतन्नत्वं हि मद्धियाम्|| ॥
मूर्त्तित्रयं तथा तस्य इत्येताश्चाष्टमूर्त्तयः ॥** ७ ।
अभिव्याप्तमिदं सर्व्वं जगन्नारायणेन ह ।

---

* एता रतोऽधिकास्तत्र मूर्त्तयो लोकधारिणि इति (ख) ।

† ब्राह्मी भगवत इति (ख) ।

‡ संवर्द्धते इति (ख) ।

§ तस्य देवस्य यन्मूर्त्तिराधाय च धृतिर्हरे इति (ख) ।

¶ आकाशाख्याथ इति (ख) ।

|| मद्धिय इति (ग) ।

** (ख) पुस्तके श्लोकस्यास्य द्वितीयतृतीयपादौ न स्तः ।

इत्येतत्कथितं देवि किमन्यच्छ्रोतुमिच्छसि ॥ ८ ।

धरण्युवाच ।

नारदेनैवमुक्तस्तु तदा राजा प्रियव्रतः ।
कृतवान् किं ममाचक्ष्व* प्रसादात्परमेश्वर ॥ ९ ।

वराह उवाच ।

भवतीं सप्तधा कृत्वा पुत्राणां च प्रदाय सः ।
प्रियव्रतस्तपस्तेपे नारदाच्छ्रुतविस्मयः ॥ १० ।
नारायणात्मकं ब्रह्म परं जप्त्वा स्वयम्भुवः† ।
ततः स तद्गतमनाः परं निर्व्वाणमाप्तवान् ॥ ११ ।
शृणु चान्यद्वरारोहे यद्वृत्तं परमेष्ठिनः‡ ।
आराधनाय च यतः पुराकाले नृपस्य ह ॥ १२ ।
आसीदश्वशिरा नाम राजा परमधार्म्मिकः ।
सोऽश्वमेधेन यज्ञेन§ यष्ट्वा सुबहुदक्षिणः¶ ॥ १३ ।
स्नातश्चावभृथे सोऽथ‖ ब्राह्मणैः परिवारितः ।
यावदास्ते स राजर्षिस्तावद्योगिवरो मुनिः ।
आययौ कपिलः श्रीमाञ्जैगीषव्यश्च योगिराट् ॥ १४

---

* कृतवान्तन्ममाचक्ष्वेति (ख) ।

† समाराध्य स्वयम्भुवमिति (ख) ।

‡ यदुक्तं परमेष्ठिना इति (घ) ।

§ सोऽश्वमेधेन राजा वै इति (ग) ।

¶ इयाज बहुदक्षिण इति (ख) । यष्टेति आर्षम्, इष्टेति साधु ।

‖ स्नातश्चावभृथे सोऽथ इति (ग) ।

ततस्त्वरितमुत्थाय* स राजा स्वागतक्रियाम्† ।
चकार परया युक्तः स मुदा राजसत्तमः ॥ १५ ।
तावच्चिंतावासनगौ दृष्ट्वा देवौ महाबलः‡ ।
पप्रच्छ तौ तिग्मधियौ§ योगज्ञौ स्वेच्छयागतौ ॥ १६ ।
भवन्तौ संशयं विप्रौ पृच्छामि पुरुषोत्तमौ ।
कथमाराधयेद्देवं हरिं नारायणं परम् ॥ १७ ।

विप्रावूचतुः ।

क एष प्रोच्यते राजंस्त्वया नारायणो गुरुः ।
आवां नारायणौ द्वौ तु त्वत्प्रत्यक्षगतौ नृप ॥ १८ ।

अश्वशिरा उवाच ।

भवन्तौ ब्राह्मणौ सिद्धौ तपसा दग्धकिल्विषौ ।
कथं नारायणावावामिति वाक्यमथेरितम् ॥ १९ ।
शङ्खचक्रगदापाणिः पीतवासा जनार्द्दनः ।
गरुड़स्थो महादेवः कस्तस्य सदृशो भुवि ॥ २० ।
तस्य राज्ञो वचः श्रुत्वा तौ विप्रौ शंसितव्रतौ ।
जहसतुः पश्य¶ विष्णुं राजन्निति जजल्पतुः ॥ २१ ।

---

* तयोस्त्वरितमुत्थाय इति (ख) ।

† स राजाभ्यागतक्रियामिति (ग) ।

‡ दृष्ट्वा राजा महाबलः इति (ख) ।

§ तौ तदा विप्रौ इति (ख) ।

¶ जहसतुः पश्य तं विष्णुं राजन्निति जजल्पतुरिति (क) (ख) पुस्तकयोः पाठः, त्र तमित्यक्षरस्याधिक्याच्छन्दोभङ्गः ।

एवमुक्त्वा स कपिलः स्वयं विष्णुर्बभूव सः ।
जैगीषव्यश्च गरुड़स्तत्क्षणं समजायत ॥ २२ ।
ततोहाहाकृतं त्वासीत्तत्क्षणाद्राजमण्डलम्* ॥ २३ ।
दृष्ट्वा नारायणं देवं गरुड़स्थं सनातनम् ॥
कृताञ्जलिपुटो भूत्वा ततो राजा महायशाः† ॥ २४ ।
उवाच शाम्यतां विप्रौ नायं विष्णुरथेदृशः ।
यस्य ब्रह्मा समुत्पन्नो नाभिपङ्कजमध्यमः ।
तस्माच्च ब्रह्मणो रुद्रः स विष्णुः परमेश्वरः ॥ २५ ।
इति राजवचः श्रुत्वा तदा तौ मुनिपुंगवौ ।
चक्रतुः परमां मायां योगमायां विशेषतः‡ ॥ २६ ।
कपिलः पद्मनाभस्तु जैगीषव्यः प्रजापतिः ।
कमलस्थो बभौ ब्रह्मा तस्माद्रुद्रः प्रभास्करः§ ॥ २७ ।
ददर्श राजा रक्ताक्षं कालानलसमद्युतिम्¶ ।
नेच्छो भवति विश्वेशो मायैषा योगिनां सदा ॥ २८ ।
सर्व्वव्यापी हरिः श्रीमानिति राजा जगाद ह‖ ।
ततो वाक्यावसाने तु तस्य राज्ञोहि संसदि** ॥ २९ ।

---

* तदा तद्राजमण्डलमिति (ख) ।

† महाशय इति (ख) ।

‡ योगमायाविशारदौ इति (ख) ।

§ कमलस्थो बभौ कृष्णस्य वाङ्के प्रजापतिरिति (ग) ।

¶ कालाञ्जनसमद्युतिमिति (ग) ।

‖ इति राजा तमब्रवीदिति (ख) ।

** राज्ञोऽथ संसदि इति (ख) ।

मत्कुणा मशका यूका भ्रमराः* पक्षिणोरगाः । ३० ।
अश्वा गावो द्विपाः सिंहा व्याघ्रा†गोमायवो मृगाः ।
अन्येऽपि पशवः कीटा ग्राम्यारण्याश्च सर्व्वशः ।
दृश्यन्ते राजभवने कोटिशो भूतधारिणि‡ ॥ ३१ ।
तं दृष्ट्वा भूतसङ्घातं राजा विस्मितमानसः ।
यावच्चिन्तयते किं स्यादेतदित्यवगम्य च § ॥
जैगीषव्यस्य माहात्म्यं कपिलस्य च धीमतः ।
कृताञ्जलिपुटो भूत्वा स राजाश्वशिरास्तदा¶ ।
पप्रच्छ तावृषी भक्त्या किमिदं द्विजसत्तमौ ॥ ३२।३३ ।

द्विजावूचतुः ।

आवां पृष्टौ त्वया राजन् कथं विष्णुरिहेज्यते ।
प्राप्यते च‖ महाराज तेनेदं दर्शितं तव ॥ ३४ ।
सर्व्वज्ञस्य गुणा ह्येते ये राजंस्तव दर्शिताः ।
स च नारायणो देवः सर्व्वज्ञः कामरूपवान् ॥ ३५ ।

---

* भूमिजाः पन्नगोरगाः इति (ख) । पक्षिणोरगा इति आर्षं, पक्ष्युरगाः, अथवा पक्षिण उरगा इति साधु ।

† व्याला गोमायवो मृगा इति (ख) ।

‡ कोटिशो बहवापगा इति (ख), बहवापगा इति आर्षं, बह्व्य आपगा इति साधु ।

§ किंस्विदेवमित्यवगम्य च इति (ख) ।

¶ राजा अश्वशिरास्तदा इति (ख) ।

‖ प्राप्यते वै इति (ख) ।

सौम्यस्तु* संस्थितः क्वापि प्राप्यते मनुजैः† किल ।
आराधनं न चैतस्य परमार्थं भविष्यति ॥ ३६ ।
किन्तु सर्व्वशरीरस्थः परमात्मा जगत्पतिः ।
स्वदेहे दृश्यते भक्त्या नैकस्थानगतस्तु सः ॥
अतोऽर्थं‡ दर्शितं रूपं देवस्य परमात्मनः ।
आवयोस्तव राजेन्द्र प्रतीतिः स्याद्यथा तव ॥ ३७ ॥ ३८ ।
एवं सर्व्वगतो विष्णुस्तव देहे जनेश्वर ।
मन्त्रिणां भृत्यसङ्घस्य सुराद्या ये प्रदर्शिताः§ ॥ ३९ ।
पशवः कीटसङ्घाश्च तेऽपि विष्णुमया नृप ।
भावनान्तु दृढ़ां कुर्य्याद्यतः सर्व्वमयो हरिः¶ ॥ ४० ।
नान्यस्तत्सदृशं भूतमिति भावेन सेव्यताम् ।
एष ते ज्ञानसद्भावस्तव राजन् प्रकीर्त्तितः‖ ॥ ४१ ।
परिपूर्णेन भावेन स्मर नारायणं गुरुम्** ।

---

* सोऽन्यत्र संस्थितः इति (ख) ।

† पुरुषैरिति (ग) ।

‡ अतीव इति (क), (ख) ।

§ तदुपायं प्रदर्शितमिति (ख), स उपायः प्रदर्शित इति साधु ।

¶ सर्व्वगतोहरिरिति (ग) ।

‖ श्लोकोऽयं (ख) पुस्तके भिन्नरूपोऽस्ति । यथा—
नियन्ता सर्व्वभूतानामिति भावेन सिध्यति ।
एष वै ज्ञानसद्भावस्तव राजन् प्रदर्शितः ॥ इति ।
इति भावेन सेव्यते इति (ग) ।

** नरनारायणं गुरुमिति (ख) ।

पूजोपहारैर्धूपैश्च* ब्राह्मणानाञ्च तर्पणैः ।
ध्यानेन सुस्थितेनाशु सुप्राप्यः परमेश्वरः† ॥ ४२ ॥

इति वराहपुराणे आदिकृतवृत्तान्ते चतुर्थोऽध्यायः ।

—:—

पञ्चमोऽध्यायः ।

अश्वशिरा उवाच ।

भवन्तो मम सन्देहमेकं छेत्तुमिहार्हतः ।
येन च्छिन्नेन जायेत मम संसारविच्युतिः* ॥ १ ॥
एवमुक्तो नृपतिना तदा योगिवरो मुनिः ।
कपिलः प्राह धर्मात्मा राजानं यजतां वरम्† ॥ २ ॥

कपिल उवाच ।

कस्ते मनसि सन्देहो राजन् परमधार्म्मिक ।
छेदामि‡ येन तच्छ्रुत्वा ब्रूहि यत्तेऽभिवाञ्छितम् ॥ ३ ॥

---

* अर्घ्यैश्च इति (ख) । पूजोपहारधूपैश्चेति (ग) ।
† ध्यानेन स्तवनेनापि प्राप्यते परमेश्वरमिति (ख) ।

* संसारनिर्वृतिः इति (ख) ।
† यज्वानं यज्वनां वरमिति (ख) ।
‡ छेदामीति आर्षं, छिनद्मीति साधु । छिन्दामीति (ग), तदपि आर्षम् ।

राजोवाच* ।

कर्म्मणा प्राप्यते मोक्ष उताहो ज्ञानिना मुने† ।
एतन्मे संशयं छिन्धि यदि मेऽनुग्रहः कृतः ॥ ४ ।

कपिल उवाच ।

इमम्प्रश्नं महाराज‡ पुरा पृष्टो बृहस्पतिः ।
रैभ्येण ब्रह्मपुत्रेण राज्ञा च वसुना तथा§ ॥ ५ ।
वसुरासीन्नृपश्रेष्ठो विद्वान्दानपतिः पुरा ।
चाक्षुषस्य मनोः काले ब्रह्मणोऽन्वयवर्द्धनः ॥ ६ ।
वसुः स्म ब्रह्मणः सद्म गतवांस्तद्दिदृक्षया ।
पथि चैत्ररथं दृष्ट्वा विद्याधरवरं नृप ।
अपृच्छच्च वसुः प्रीत्या ब्रह्मणोऽवसरं प्रभो¶ ॥ ७ ।
सोऽब्रवीद्देवसमितिर्वर्त्तते ब्रह्मणो गृहे ।
एवं श्रुत्वा वसुस्तस्थौ द्वारि ब्रह्मौकसस्तदा ॥ ८ ।
तावत्तत्रैव रैभ्यस्तु आजगाम महातपाः ।
स राजा प्रीतिमानासीद्वसुः सम्पूर्णमानसः‖ ॥ ९ ।

---

* अश्वशिरा उवाच इति (ख) ।

† कर्म्मणा प्राप्यते मोक्ष उताहो ज्ञानतो मुने इति (ग)।

‡ महाबाहो इति (ख) ।

§ (ग) पुस्तके रैभ्येण ब्रह्मपुत्रेणेत्यतः परं गतवांस्तद्दिदृक्षयेति पाठो वर्त्तते । अत्र सार्द्धैकः श्लोको नास्तीति भावः ।

¶ (ख) पुस्तके पप्रच्छ क्व गतो रैभ्य इति विद्याधरं वसुरित्यधिकार्द्धं वर्त्तते ।

‖ वसुधाता च पूजित इति(ख)। स राजा प्रीतमनसा वसुः सम्पूर्णमानस इति(ग)।

उवाच पूजयित्वाग्रे क्व प्रयातोऽसि वै मुने ॥ १० ।

रैभ्य उवाच ।

अहं बृहस्पतेः पार्श्वादागतोऽस्मि* महानृप ।
किञ्चित्कार्यान्तरं प्रष्टुमगाद्देवपुरोहितम् ॥ ११ ।
एवं ब्रुवति† रैभ्ये तु ब्रह्मणस्तन्महत्सदः ।
उत्तस्थौ‡ स्थानि धिष्ण्यानि गता देवगणाः प्रभो ॥ १२ ।
तावद्बृहस्पतिस्तत्र रैभ्येण सह संविदम् ।
कृत्वा स्वधिष्ण्यमगमद्वसुना चानुपूजितः§ ॥ १३ ।
रैभ्य आङ्गिरसो राजा वसुश्चोपविवेश ह ।
उपविष्टेषु राजेन्द्र¶ तेषु त्रिष्वपि सोऽब्रवीत् ॥
बृहस्पतिर्देवगुरू रैभ्यं वचनमन्तिके ।
किं करोमि महाभाग वेदवेदाङ्गपारग‖ ॥ १४ ॥ १५ ।

रैभ्य उवाच ।

बृहस्पते कर्म्मिणा किं प्राप्यते ज्ञानिनाऽथवा ।
मोक्ष एतन्ममाचक्ष्व पृच्छतः संशयं प्रभो ॥ १६ ।

---

* आगतोऽत्र इति (ख) ।

† वदति इति (ख) ।

‡ उत्थाय इति (ख) ।

§ वसुना चापि पूजितः इति (ख) । वसुना चाग्र्य पूजित इति (ग) ।

¶ आसनेषूपविष्टेषु इति (ख) ।

‖ किन्ते करोमि विप्रेन्द्र कथ्यतां राजसत्तम इति (ख) ।

बृहस्पतिरुवाच ।

यत्किञ्चित्कुरुते कर्म्म पुरुषः साध्वसाधु वा ।
सर्व्वं नारायणे न्यस्य कुर्व्वन्नपि न लिप्यते ॥ १७ ।
श्रूयते च द्विजश्रेष्ठ संवादो विप्रलुब्धयोः ।
आत्रेयो ब्राह्मणः कश्चिद्वेदाभ्यासरतो मुनिः ॥ १८ ।
तपस्यभिरतः प्रातःस्नायी त्रिषवणे रतः ।
नाम्ना संयमनः पूर्व्वमेकस्मिन्दिवसे नदीम् ।
धर्म्मारण्ये गतः स्नातुं धन्यां भागीरथीं शुभाम्* ॥ १९ ।
तत्रासीनं महायूथं हरिणानां विचक्षणः ॥
लुब्धो निष्ठुरको नाम धनुःपाणिः कृतान्तवत् ।
आययौ तं जिघांसुः सन्सज्यं संयुज्य सायकम्† ॥ २० ।
ततः संयमनो विप्रो दृष्ट्वा तं मृगयारतम् ।
वारयामास मा भद्र जीवघातमिमङ्कुरु‡ ॥ २१ ।
एतच्छ्रुत्वा वचो व्याधः स्मितपूर्व्वमिदं वचः ।
उवाच नाहं हिंसामि पृथग्जीवान्द्विजोत्तम ॥ २२ ।
परमात्मा स्वयं भूतैः क्रीड़ते भगवान्स्वयम्§ ।
कृता मायावली¶ मन्त्रैस्तद्वदेतन्न संशयः ॥ २३ ।

---

* धर्म्मारण्येषु स स्नात्वा ययौ भागीरथीं शुभामिति (ख) ।

† आययौ तं जिघांसुः सन्धनुषा योज्य सायकानिति (ग) ।

‡ वारयामास तं विप्रो जीवनाशञ्च मा कुरु इति (ख) ।

§ एकवत् स्वयमिति (ख) ।

¶ कृत्वा मृदावलमिति (ख) ।

अहंभावः सदा ब्रह्मन विधेयो मुमुक्षुभिः ।
यावत्प्राणरतं सर्व्वं जगदेतद्विचेष्टितम् ।
तत्राहमिति यः शब्दः स साधुत्वं न गच्छति ॥ २४ ।
इत्याकर्ण्य स विप्रेन्द्रो द्विजः संयमनस्तदा ।
विस्मयेनाब्रवीद्वाक्यं लुब्धं निष्ठुरकं द्विजः ॥ २५ ।
किमेतदुच्यते भद्र प्रत्यक्षं हेतुमद्वचः ॥ २६ ।
ततः श्रुत्वा पुन*र्विप्रं लुब्धकः प्राह धर्म्मवित् ।
कृत्वा लोहमयं जालं तस्याधो ज्वलनं ददौ ॥ २७ ।
दत्तवह्निं द्विजं प्राह ज्वाल्यतां काष्ठसञ्चयम् ।
ततो विप्रो मुखेनाग्निं प्रज्वाल्य विरराम ह ॥ २८ ।
ज्वलिते तु पुनर्वह्नौ तं जालं लोहसम्भवम् ।
गवाक्षैर्निर्गतज्वालं बभौ कादम्बिगोलवत्† ॥ २९ ।
पृथक् पृथक् सहस्राणि निश्चेलुर्ज्वलनार्च्चिषः‡ ।
एकस्थानगतस्यापि वह्नेरायसजालकैः ॥ ३० ।
ततो लुब्धोऽब्रवीद्विप्रमेकां ज्वालां महामुने ।
गृहाण येन शेषाणां करिष्यामीह नाशनम् ॥ ३१ ।
एवमुक्त्वा हुताशे तु तोयपूर्णघटं द्रुतम् ।
चिक्षेप सहसा वह्निः प्रशशामाथ पूर्व्ववत्§ ॥ ३२ ।

---

* एतच्छ्रुत्वा पुनरिति (ख) । ततः श्रुत्वा मुनेर्वाक्यमिति (ग) ।

† एतदर्द्धं (ग) पुस्तके नास्ति ।

‡ पृथक् पृथक् सहस्राणि निर्येऽन्तर्जालकैर्द्विजेति (ग) ।

§ प्रशमार्थमसूसुचदिति (ख) ।

ततोऽब्रवील्लुब्धकस्तु* ब्राह्मणं तं तपोधनम् ।
भगवन्या त्वया ज्वाला गृहीतासीद्‌हुताशनात्† ।
प्रयच्छ येन मार्गेण मांसान्यानाय्य भक्षये ॥ ३३ ।
एवमुक्तस्तदा विप्रो यावदायसजालकम् ।
पश्यत्येव न‡ तत्राग्निर्मूलनाशे गतः क्षयम् ॥ ३४ ।
ततो विलक्ष्यभावेन ब्राह्मणः शंसितव्रतः ।
तूष्णीम्भूतः स्थितस्तावल्लुब्धको वाक्यमब्रवीत् ॥ ३५ ।
एतस्मिज्ज्वलितो वह्निर्बहुशाखश्च सत्तम§ ।
मूलनाशे भवेन्नाशस्तद्वदेतदपि द्विज ॥ ३६ ।
आत्मा स प्रकृतिस्थश्च भूतानां संश्रयो भवेत् ।
विकृताद्‌भवस्तस्य एषा वै जगतः स्थितिः¶ ॥ ३७ ।
पिण्डग्रहणधर्मेण यद्‌स्य विहितं व्रतम् ।
तत्तदात्मनि संयोज्य कुर्व्वाणो नावसीदति ॥ ३८ ।
एवमुक्ते तु व्याधेन ब्रह्मणा राजसत्तम ।
पुष्पवृष्टिरथाकाशात्तस्योपरि पपात ह ॥ ३९ ।
विमानानि च दिव्यानि कामगानि महान्ति च ।

---

* लुब्धको वै इति (ख) ।

† अगृहीता हुताशनादिति ।

‡ पश्यंस्तावन्न तत्राग्निः इति (क), (ख) ।

§ एतस्मिञ्ज्वलिते वह्नौ बहुशाखैर्द्विजोत्तम इति (ख) ।

¶ (ग) पुस्तके एतदर्द्धमेवं पठितम्—
"भूप एषा जगत्सृष्टिस्तथैव जगती भवेत् ।"

बहुरत्नानि मुख्यानि ददृशे* ब्राह्मणोत्तमः ॥ ४० ।
तेषु निष्ठुरकं लब्धं सर्व्वेषु समवस्थितम्† ।
ददृशे‡ ब्राह्मणस्तत्र कामरूपिणमुत्तमम् ॥ ४१ ।
अद्वैतवासनासिद्धं योगाद्बहुशरीरकम् ।
दृष्ट्वा विप्रो मुदा युक्तः प्रययौ निजमाश्रमम् ॥ ४२ ।§
एवं ज्ञानं भवेत्कर्म्म कुर्व्वतोऽपि स्वजातिकम् ।
भवेन्मुक्तिर्द्विजश्रेष्ठ रैभ्यराजवसोर्ध्रुवम् ॥ ४३ ।
एवं तौ संशयच्छेदं प्राप्तौ रैभ्यवसू नृप ।
बृहस्पतेस्ततो धिष्ण्याज्जग्मतुर्निजमाश्रमम् ॥ ४४ ।
तस्मात्त्वमपि राजेन्द्र देवं नारायणं प्रभुम् ।
अभेदेन स्वदेहे तु पश्य आराधयन् प्रभुम् ॥ ४५ ।
कपिलस्य वचः श्रुत्वा स राजाश्वशिरा विभुः ।
ज्येष्ठं पुत्रं समाहूय धन्यं स्थूलशिराह्वयम् ।
अभिषिच्य निजे राज्ये स राजा प्रययौ वनम् ॥
नैमिषाख्यं वरारोहे तत्र यज्ञतनुं हरिम् ।
तपसाराधयामास यज्ञमूर्त्तिस्तवेन च ॥ ४६।४७ ।

---

* ददृशे इत्यात्मनेपदमार्षं, ददर्शेति साधु ।

† तेषु निष्ठुरकं तुल्यमिति (ख) ।

‡ अत्रापि ददर्शेति साधु ।

§ (ग) पुस्तके अतः परं किमप्यधिकं श्लोकार्द्धं वर्त्तते यथा—
"एवं ज्ञानवतः कर्म्म कुतोविद्याः स्वयोनिजाः ।"

धरण्युवाच ।

कथं यज्ञतनोः स्तोत्रं राज्ञा नारायणस्य ह ।
स्तुतिः कृता महाभाग पुनरेतच्च शंस मे ॥ ४८ ।

वराह उवाच ।

नमामि नित्यं त्रिदशाधिपस्य
भवस्य सूर्यस्य हुताशनस्य ।
सोमस्य राज्ञो मरुतामनेक-
रूपं हरिं यज्ञतनुं नमस्ये* ॥ ४९ ।

सुभीमदंष्ट्रं शशिसूर्यनेत्रं
संवत्सरोहग्रापनयुग्मकुक्षिम् ।
दर्भाङ्गरोमाणमथोग्रशक्तिं†
सनातनं यज्ञनरं नमामि ॥ ५० ।

द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं शरीरेण दिशश्च सर्वाः ।
तमीड्यमीशं जगतां प्रसूतिं
जनार्दनं तं प्रणतोऽस्मि नित्यम् ॥ ५१ ।

सुरासुराणामजयो जयाय
युगे युगे यत्स्वशरीरमाद्यम् ।

---

* (क) पुस्तकेऽस्य श्लोकस्य तृतीयपादस्तु एवं पठ्यते "सर्व्वस्य विश्वस्य युतं सुसुद्ध"-मिति । तत्राऽतः परं चरणत्रयं नास्ति ।

† धर्म्माङ्गरोमाणमथोर्व्वसम्मितमिति (ग) ।

सृजत्यनादिः परमेश्वरो य-
स्तं यज्ञमूर्त्तिं प्रणतोऽस्मि नित्यम् ॥ ५२ ।
दधार मायामयमुग्रतेजा
जयाय चक्रं त्वमलं सुशुभ्रम् ।
सारङ्गशङ्खादिचतुर्भुजो य-*
स्तं यज्ञमूर्त्तिं प्रणतोऽस्मि नित्यम् ॥ ५३ ।
क्वचित्सहस्रं शिरसां दधानः
क्वचिन्महापर्वततुल्यकायः ।
क्वचित्स एव त्रसरेणुतुल्यो†
यस्तं सदा यज्ञनरं नमामि ॥ ५४ ।
चतुर्मुखो यः सृजति‡ समग्रं
रथाङ्गपाणिः प्रतिपालनाय ।
क्षयाय कालानलसन्निभो य-
स्तं यज्ञमूर्त्तिं प्रणतोऽस्मि नित्यम् ॥ ५५ ।
संसारचक्रक्रमणक्रियायै
य इज्यते सर्वगतः पुराणः ।
यो योगिनां ध्यानगतोऽप्रमेय-§
स्तं यज्ञमूर्त्तिं प्रणतोऽस्मि नित्यम् ॥ ५६ ।

---

* जयाय चक्रं समरेषु शुभ्रम् गदासिसारङ्गचतुर्भुजो य इति (ख) ।

† क्वचिन्नवेद्यं त्रसरेणुतुल्यमिति (ख) ।

‡ सृजते जगच्चेति (ख) । सृजत इति आर्षं सृजतीति साधु ।

§ यो योगिभिर्ध्यायते चाऽप्रमेय इति (ख), (ग) ।

सम्यङ्मनस्संर्पितवानहं ते
यदा सुदृश्यं स्वतनौ तु तत्त्वम्* ।
न चान्यदस्तीति मतिः स्थिरा मे
यतस्ततो याति विशुद्धभावम्† ॥ ५७ ॥
इतीरतस्तस्य हुताशनार्चिः-
प्रख्यन्तु‡ तेजः पुरतो बभूव ।
तस्मिन्स राजा प्रविवेश बुद्धिं
कृत्वा लयं प्राप्तवान्यज्ञमूर्त्तौ ॥ ५८ ॥

इति वराहपुराणे आदिकृतवृत्तान्ते पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

धरण्युवाच ।
सवसुः संशयच्छेदं प्राप्य रैभ्यश्च सत्तमः ।
उभौ किं चक्रतुर्देव श्रुत्वा चाङ्गिरसं वचः* ॥ १ ॥

---

* नभोमयं स्थापितवानहन्तु दृश्यं दृष्टा ते स्वतनुं तनौ ते इति (ख) पुस्तके पाठः ।
† यतस्तत आवह शुद्धभावमिति (ग) ।
‡ प्रेक्ष्यमिति (ख) ।

---

* एष श्लोकः (ख) पुस्तके नास्ति ।

षष्ठोऽध्यायः ।

वराह उवाच ।

स वसुः सर्वधर्मज्ञः स्वराज्यं प्रत्यपालयत् ।
अयजद्बहुभिर्यज्ञैर्महद्भिर्भूरिदक्षिणैः ॥ २ ।
कर्मकाण्डेन देवेशं हरिं नारायणं प्रभुम् ।
तोषयामास राजेन्द्रस्तमभेदेन चिन्तयन् ॥ ३ ।
ततः कालेन महता तस्य राज्ञो मतिः किल ।
निवृत्तराज्यभोगेच्छा* द्वन्द्वस्यान्तमुपेयुषः ॥ ४ ।
ततः पुत्रं विवस्वन्तं श्रेष्ठं भ्रातृशतस्य ह ।
अभिषिच्य स्वके राज्ये तपोवनमुपागतः† ॥ ५ ।
पुष्करं नाम तीर्थानां प्रवरं यत्र केशवः ।
पुण्डरीकाक्षनामा तु पूज्यते तत्परायणैः ॥ ६ ।
तत्र गत्वा स राजर्षिः काश्मीराधिपतिर्वसुः ।
अतितीव्रेण तपसा स्वशरीरमशोषयत्‡ ॥ ७ ।
पुण्डरीकाक्षपारन्तु स्तवं भक्त्या जपन् बुधः ।
आरिराधयिषुर्देवं नारायणमकल्मषम् ।
स्तोत्रान्ते तल्लयं प्राप्तः स राजा राजसत्तमः ॥ ८ ।

धरण्युवाच ।

पुण्डरीकाक्षपारन्तु स्तोत्रं देव कथं स्मृतम् ।

---

* निवृत्तराज्यभोगस्येति (ग) ।

† तपोवनमुपागमदिति (ख), (ग) ।

‡ स्वं शरीरमशोषयदिति (ख) ।

कीदृशं तन्ममाचक्ष्व परमेश्वर तत्त्वतः* ॥ ९ ।

वराह उवाच ।

नमस्ते पुण्डरीकाक्ष नमस्ते मधुसूदन ।
नमस्ते सर्व्वलोकेश नमस्ते तिग्मचक्रिणे ॥ १० ।
विश्वमूर्त्तिं महाबाहुं वरदं सर्व्वतेजसम् ।
नमामि पुण्डरीकाक्षं विद्याविद्यात्मकं विभुम्† ॥ ११ ।
आदिदेवं महादेवं वेदवेदाङ्गपारगम् ।
गभीरं सर्व्वदेवानां नमस्ये वारिजेक्षणम्‡ ॥ १२ ।
सहस्रशीर्षिणं देवं सहस्राक्षं महाभुजम् ।
जगत्संव्याप्य तिष्ठन्तन्नमस्ये परमेश्वरम्§ ॥ १३ ।
शरण्यं शरणं देवं¶ विष्णुञ्जिष्णुं सनातनम् ।
नीलमेघप्रतीकाशं नमस्ये चक्रपाणिनम् ॥ १४ ।
शुद्धं सर्व्वगतं नित्यं व्योमरूपं सनातनम् ।
भावाभावविनिर्मुक्तं नमस्ये सर्व्वगं हरिम् ॥ १५ ।
नान्यत्किञ्चित्प्रपश्यामि व्यतिरिक्तं त्वयाऽच्युत ।

---

* कीदृशं वा ममाचक्ष्व भक्त्या: परमेश्वर इति (ख) ।

† विद्याविद्यात्मकं मुने इति (ख) ।

‡ गम्भीरं सर्व्वदेवानां नमामि मधुसूदन इति (ग) ।

§ (ग) पुस्तके एष श्लोक एवं पठितः—

"विश्वमूर्त्तिर्महामूर्त्तिर्विद्यामूर्त्तिस्त्रिमूर्त्तिकम् ।
कवचं सर्व्वदेवानां नमस्ये वारिजेक्षणम् ॥"

¶ (ग) पुस्तके चरणमेतदन्यथा दृश्यते यथा—देवदेवं महादेवमिति ।

त्वन्मयञ्च प्रपश्यामि सर्व्वमेतच्चराचरम् ॥ १६ ।
एवन्तु वदतस्तस्य मूर्त्तिमान् पुरुषः किल ।
निर्गत्य देहान्नीलाभो घनचण्डो भयङ्करः ॥
रक्ताक्षो ह्रस्वकायस्तु दग्धस्थूणासमप्रभः ।
उवाच प्राञ्जलिर्भूत्वा किं करोमि नराधिप ॥ १७।१८ ।

राजोवाच ।

कोऽसि किं कार्य्यमिह ते कस्मादागतवानसि ।
एतन्मे कथय व्याध एतदिच्छामि वेदितुम् ॥ १९ ।

व्याध उवाच ।

पूर्व्वं कलियुगे राजन्त्वं राजा दक्षिणापथे* ।
पूर्णधर्म्मोद्भवः श्रीमान्† जनस्थाने विचक्षणः ॥ २० ।
स कदाचिद्भवान्वीर तुरगैः परिवारितः‡ ।
अरण्यमागतो हन्तुं श्वापदानि विशेषतः ॥ २१ ।
तत्र त्वया अकामेन मृगवेषधरो मुनिः ।
दण्डयुग्मेन दूरे तु§ पातितो धरणीतले ॥ २२ ।
सद्यो मृतश्च विप्रेन्द्रस्त्वञ्च राजन्मुदा युतः¶ ।
हरिणोऽयं हत इति यावत्पश्यसि पार्थिव ।

---

* दक्षिणामुखे इति (ख), (ग) ।

† सोमवंशोद्भवः श्रीमानिति (ख) ।

‡ स्वगणैः परिवारित इति (ख) ।

§ काण्डयुग्मेन दूरात्तु इति (ख) ।

¶ मुदाऽन्वित इति (ख) ।

तावन्मृगवपुर्विप्रो मृतः प्रस्रवणे गिरौ ॥ २३ ।
तं दृष्ट्वा त्वं महाराज क्षुभितेन्द्रियमानसः ।
गृहागतः* स्ततोऽन्यस्य कस्यचित्कथितं त्वया ॥ २४ ।
ततः कतिपयाहस्य त्वया रात्रौ नरेश्वर ।
ब्रह्महत्याभयाद्भीतचित्तेनैतद्विचिन्तितम्† ।
कृत्यं करोमि शान्त्यर्थं मुच्येयं येन पातकात्‡ ॥ २५ ।
ततस्त्वया महाराज सकृन्नारायणं प्रभुम् ।
सञ्चिन्त्य द्वादशी शुद्धा त्वया राजन्नुपोषिता ॥ २६ ।
नारायणो मे सुप्रीत इति प्रोक्ता शुभेऽहनि ।
गौर्दत्ता विधिना सद्यो मृतोऽस्युदरशूलतः§ ॥ २७ ।
अमुक्तो द्वादशीधर्म्मो यत्तत्रापि च कारणम्¶ ।
कथयामि भवत्पत्नी नाम्ना नारायणी शुभा ॥ २८ ।
सा कण्ठगेन प्राणेन व्याहृता तेन ते गतिः‖ ॥ २९ ।
कल्पमेकं महाराज जातो विष्णुपुरे तव** ।
अहञ्च तव देहस्थः सर्व्वं जानामि चाव्ययम् ॥ ३० ।

---

* गृहं गत इति (ग) ।

† ब्रह्महत्याभयाद्भीत्या युक्तमेतद्विचिन्तितम् । इति (ख) ।

‡ मुच्यते येन पातकादिति (ख). (ग) ।

§ (ख) पुस्तके श्लोकेऽस्मिन् प्रभूतः पाठभेदो वर्त्तते—यथा, नारायणोऽस्तु मे इति चोक्तं स्वके हृदि । गां ददद्विधिवत्सद्यो मृतोऽस्युदरशूलतः ॥ इति ।

¶ तत्रापि तव कारणमिति (ख) ।

‖ व्याहृता ते ततो गतिरिति (ख) ।

** जातो विष्णुपुरं तत्र इति (ख) ; (ग) पुस्तकेऽत. परं सार्द्धपञ्चश्लोका न सं

ब्रह्मग्रहो महाघोरः पीड़यामीति* मे मतिः ।
तावद्विष्णोस्तु पुरुषैः किङ्करैर्मुषलैरहम् ।
प्रहृतः सङ्क्षयं जातश्च्युतस्ते रोमकूपतः† ।
स्वर्गस्थस्यापि राजेन्द्र स्थितोऽहं स्वेन तेजसा ॥ २१।२२ ।
ततोऽहःकल्पे निर्वृत्ते रात्रिकल्पेन सत्तम ।
इदानीमादिसृष्टौ तु कृते नृपतिसत्तम ।
सम्भूतस्त्वं महाराज राज्ञः सुमनसो गृहे ।
काश्मीरदेशाधिपतेरहं चाङ्गरुहैस्तव ॥
यज्ञैरिष्टन्त्वयानेकैर्बहुभिश्चामदक्षिणैः‡ ॥ २३।२४ ।
न चाहन्तैरपहृतो§ विष्णुस्मरणवर्ज्जितैः¶ ।
इदानीं यत्त्वया स्तोत्रं पुण्डरीकाक्षपारगम् ।
पठितं तत्प्रभावेण विहायाङ्गरुहाण्यहम्‖ ।
एकीभूतः पुनर्जातो व्याधरूपी नृपोत्तम** ॥ २५।२६ ।

---

* ब्रह्महत्याग्रहे घोरपीड़यामीति (ख) ।

† स च्युतस्त्द्रोमकूपत इति (ख) ।

‡ काश्मीरदेशाधिपतिस्त्वाङ्गरुहतः सह ।
यज्ञैरिष्टं त्वयाऽनेकैर्दानैश्च विविधैस्तव ॥ इति (ख) ।

§ न चाहं तैरपगत इति (ख) ।

¶ जातिस्मरणवर्ज्जित इति (ग) पुस्तके पाठः ।

‖ (ग) पुस्तके श्लोकोऽयमेवं पठितः—
"इदानीं तत्त्वया प्रोक्तं पुण्डरीकाक्षपारकम् ।
पठितं तत्र भावेन गुहायां गुरुहाप्यहम् ॥"

** व्याधरूपी द्विजोत्तम इति (ख) ।

अहं भगवतः स्तोत्रं श्रुत्वा प्राक् पापमूर्त्तिना ।
मुक्तोऽस्मि धर्मबुद्धिर्मे वर्त्तते साम्प्रतं विभो ॥ ३७ ।*
एतच्छ्रुत्वा वचो राजा† परं विस्मयमागतः ।
वरेण छन्दयामास तं व्याधं राजसत्तमः ॥ ३८ ।

राजोवाच ।

स्मारितोऽस्मि यथा व्याध त्वया जन्मान्तरं गतम् ।
तथा त्वं मत्प्रभावेण‡ धर्मव्याधो भविष्यति ॥ ३९ ।
यश्चैतत्पुण्डरीकाक्षपारगं शृणुयात्परम् § ।
तस्य पुष्करयात्रायां विधिस्नानफलं भवेत् ॥ ४० ।

वराह उवाच ।

एवमुक्त्वा ततो राजा विमानवरमास्थितः ।
परेण तेजसा योगमवापाशेषधारिणि ॥ ४१ ।

इति वराहपुराणे आदिकृतवृत्तान्ते षष्ठोऽध्यायः ।

वसुचरितं समाप्तम् ।

---

* "अहं हि पारगं स्तोत्रं पुण्डरीकाक्षमूर्त्तितः ।
मुक्तोऽस्मि धर्म्मबुद्धिर्मे वर्त्तते साम्प्रतं विभो ॥" इति (ख) ।

† एतच्छ्रुत्वा ततो राजा इति (ख) ।

‡ मत्प्रसादेन इति (ख) ।

§ पारगं शृणुयात्पठेदिति (ख) ।

सप्तमोऽध्यायः ।

धरण्युवाच ।

रैभ्योऽसौ मुनिशार्दूलः श्रुत्वा सिद्धं वसुं तदा ।
स्वयं किमकरोद्देव संशयो मे महानयम्* ॥ १ ॥

वराह उवाच ।

स रैभ्योमुनिशार्दूलः श्रुत्वा सिद्धं वसुं तदा† ।
आजगाम गयां पुण्यां पितृतीर्थे तपोधनः ॥ २ ।
तत्र गत्वा पितॄन् भक्त्या पिण्डदानेन तर्पयन् ।
ततापं सुमहत्तीव्रं तपः परमदुश्चरम्‡ ॥ ३ ॥
चरतस्तस्य तत्तीव्रं तपो रैभ्यस्य धीमतः§ ।
आजगाम महायोगी विमानस्थोऽतिदीप्तिमान्¶
त्रसरेणुसमे शुद्धे ेि सकलच्चितीशः‖ ॥ १५ ।
परमाणुतारिति ब्राह्मणैः स प्रहृष्टा**
सोऽब्रवं
एवमुक्ता ि

रिति (ग) ।

* संशयो मे महानमिति (ख) ।

† स तु रैभ्यो मुनिः श्रु(ख) ।

‡ परमदुष्करमिति (ख)। तपस्ततापं इति आर्षं, तपस्तेपे इति साधु।

§ ततो रैभ्यस्य धीमत इति (ख) ।

¶ विमानस्थोऽपि दीप्तिमानिति (ख) ।

‖ (ख) पुस्तके (५) (६) श्लोकौ न स्तः ।

राजा विशालाधिपतिः प्रयत्नात् । *
आगत्य तेन प्रवरेण तीर्थे
मघासु भक्त्याथ कृतं पितॄणाम् ।
पिण्डप्रदानं विधिना प्रयत्ना-
त्तावद्दियत्युत्तममूर्त्तयस्त्रीन् ॥ †
पश्यन् स पुंसः सितपीतकृष्णा-
नुवाच राजा किमिदं भवद्भिः ।
उपेक्ष्यते‡ शंसत सर्व्वमेव
कौतूहलं मे मनसि प्रवृत्तम् ॥ १६।१७ ।

सित उवाच ।

अहं सितस्ते जनकोऽस्मि तात
नाम्ना च वृत्तेन कुलेन कर्मणा§ ।
अयञ्च मे जनको रक्तवर्णो
नृशंसकृद्ब्रह्महा पापकारी ॥ १८ ।
अधीश्वरो नाम परः पिताऽस्य

---

* (ख) पुस्तके अतः परं जगाम तीर्थप्रवरं द्विजोऽथ गयाऽभिधानं वचति श्लोकार्द्धं वर्त्तते ।

† (ख) पुस्तके श्लोकोऽयमेवं पठितः—

"आगत्य सोऽथ प्रवरं सुतीर्थं गयाशिरो यागपरः पितॄणाम् ।
पिण्डप्रदानं विधिवत्प्रयत्नात्तावद्दियत्युत्तममूर्त्तयस्त्रीन् ॥"
उत्तममूर्त्तय इति आर्षम्, उत्तममूर्त्तीनिति साधु ।

‡ आरभ्यते इति (ख) ।

§ अहं सितस्ते जनकः सितोऽस्मि नाम्ना च वृत्तेन च कर्म्मणा च इति (ख)

क्षणी हत्या कर्मणा चापि क्षणाः* ।
एतेन क्षणेन हताः पुरा वै
जन्मन्यनेके ऋषयः पुराणाः ॥ १९ ।
एतौ मृतौ द्वावपि पुत्र रौद्र-
मवीचिसंज्ञं नरकं प्रपन्नौ ।
अधीश्वरो मे जनकः परोऽस्य
क्षणः पिता द्वावपि दीर्घकालम् ॥ २० ।
अहञ्च शुद्धेन निजेन कर्मणा
शक्रासनं प्रापितो दुर्लभं तत्† ।
त्वया पुनर्मन्त्रविदा गयायां
पिण्डप्रदानेन बलादिमौ च ॥
मेलापितौ तीर्थपिण्डप्रदान-
प्रभातौ यौ नरकश्रितावपि‡ ॥ २१ ।
पितॄन् पितामहांस्तव तथैव प्रपितामहान् ।
प्रीणयामीति तत्तोयं त्वया दत्तमरिन्दम ॥ २२ ।
तेनास्मद्युगपद्योगो जातो वाक्येन सत्तम ।
तीर्थप्रभावाद्गच्छामि पितृलोकं न संशयः ॥ २३ ।
अत्र पिण्डप्रदानेन एतौ तव पितामहौ ।
दुर्गतावपि संसिद्धौ पापकृद्विकृतिङ्गतौ ॥ २४ ।

---

* क्षणी नाम्ना कर्मणा धर्मतश्च इति (ख) ।

† चरणेऽत्र छन्दोभङ्गः ।

‡ नरकश्रितावपीति (ख) । अत्र छन्दोभङ्गः ।

तीर्थप्रभाव एषोऽस्मिन्ब्रह्मघ्नस्यापि तत्सुतः ।
पितुः पिण्डप्रदानेन कुर्य्यादुद्धरणं पुनः ॥ २५ ।
एतस्मात्कारणात्पुत्र अहमेतौ विसृज्य वै ।
आगतोऽस्मि भवन्तं वै द्रष्टुं यास्यामि साम्प्रतम् ॥ २६ ।
एतस्मात्कारणाद्रैभ्य भवान्धन्यो मयोच्यते ।
सकृद्गयाभिगमनं सकृत्पिण्डप्रदापनम् ॥
दुर्लभं त्वं पुनर्नित्यमस्मिन्नेव व्यवस्थितः ।
किमनु प्रोच्यते रैभ्य तव पुण्यमिदं प्रभो ॥ २७।२८ ।
येन साक्षाद्गदापाणिर्दृष्टो नारायणः स्वयम् ।
ततो गदाधरः साक्षादस्मिन् क्षेत्रे व्यवस्थितः ।
अतोऽतिविख्याततमं तीर्थमेतद्द्विजोत्तम ॥ २९ ।

वराह उवाच ।

एवमुक्त्वा महायोगी तत्रैवान्तरधीयत ।
रैभ्योऽपि च गदापाणेर्हरेः स्तोत्रमथाकरोत् ॥ ३० ।

रैभ्य उवाच ।

गदाधरं विबुधजनैरभिष्टुतं
धृतक्षमं क्षुधितजनार्त्तिनाशनम् ।
शिवं विशालासुरसैन्यमर्द्दनं
नमाम्यहं हृतसकलाशुभं स्मृतौ ॥ ३१ ।
पुराणपूर्व्वं पुरुषं पुरुष्टुतं
पुरातनं विमलमलं नृणां गतिम् ।
त्रिविक्रमं हृतधरणिं बलोर्ज्जितं

गदाधरं रहसि नमामि केशवम् ॥ ३२ ।
विशुद्धभावं विभवैरुपावृतं
श्रिया वृतं विगतमलं विचक्षणम् ।
क्षितीश्वरैरपगतकिल्बिषैः स्तुतं
गदाधरं प्रणमति यः सुखं वसेत् ॥ ३३ ।
सुरासुरैरर्च्चितपादपङ्कजं
केयूरहाराङ्गदमौलिधारिणम् ।
अब्धौ शयानञ्च रथाङ्गपाणिनं
गदाधरं प्रणमति यः सुखं वसेत् ॥ ३४ ।
सितं कृते त्रेतयुगेऽरुणं विभुं
तथा तृतीये नीलवर्णमच्युतम्* ।
कलौ युगेऽलिप्रतिमं महेश्वरं
गदाधरं प्रणमति यः सुखं वसेत् ॥ ३५ ।
वीजोद्भवो यः सृजते† चतुर्मुखं
तथैव नारायणरूपतो जगत् ।
प्रपालयेद्रुद्रवपुस्तथान्तक-
द्गदाधरोजयतु षडर्द्धमूर्त्तिमान् ॥ ३६ ।
सत्त्वं रजश्चैव तमो गुणास्त्रय-
स्त्वेतेषु विश्वस्य समुद्भवः किल ।

---

* पीतवर्णमच्युतमिति (ग) ।
† सृजत इति, आर्षं सृजतीति साधु ।

स चैक एव त्रिविधो गदाधरो
दधातु धैर्य्यं मम धर्म्ममोक्षयोः ॥ ३७ ।
संसारतोयार्णवदुःखतन्तुभि-
र्व्वियोगनक्रक्रमणैः सुभीषणैः ।
मज्जन्तमुच्चैः सुतरां महाप्लवो
गदाधरो मामुदधौ तु योऽतरत् ॥ ३८ ।
स्वयं त्रिमूर्त्तिः स्वमिवात्मनात्मनि
स्वशक्तितश्चाण्डमिदं ससर्ज्ज ह ।
तस्मिञ्जलोत्थासनमाप तैजसं
ससर्ज्ज यस्तं प्रणतोऽस्मि भूधरम् ॥ ३९ ।
मत्स्यादिनामानि जगत्सु प्रश्रुते
सुरादिसंरक्षणतो वृषाकपिः ।
मखस्वरूपेण स सन्ततो विभु-
र्गदाधरो मे विदधातु सन्नतिम् ॥ ४० ।

वराह उवाच ।

एवं स्तुतस्तदा विष्णुर्भक्त्या रैभ्येण धीमता ।
प्रादुर्बभूव सहसा पीतवासा जनार्दनः ॥ ४१ ।
शङ्खचक्रगदापाणिर्गरुड़स्थो वियद्गतः ।
उवाच मेघगम्भीरधीरवाक् पुरुषोत्तमः ॥ ४२ ।
तुष्टोऽस्मि रैभ्य भक्त्या ते स्तुत्या चापि द्विजोत्तम* ।
तीर्थस्नानेन च विभो ब्रूहि यत्तेऽभिवाञ्छितम् ॥ ४३ ।

---

* स्तुत्या च द्विजसत्तम इति (ग) ।

रैभ्य उवाच ।

गतिं मे देहि देवेश यत्र ते सनकादयः ।
वसेयन्तत्र येनाहं त्वत्प्रसादाज्जनार्दन ॥ ४४ ।

देव उवाच ।

एवमस्त्विति ते ब्रह्मन्नित्युक्त्वाऽन्तरधीयत ।
भगवानपि रैभ्यस्तु दिव्यज्ञानसमन्वितः ॥
क्षणाद्बभूव देवेन परितुष्टेन चक्रिणा ।
जगाम यत्र ते सिद्धाः सनकाद्या महर्षयः ॥ ४५।४६ ।
एतच्च रैभ्यनिर्दिष्टं स्तोत्रं विष्णोर्गदाभृतः ।
यः पठेत्स गयां गत्वा पिण्डदानादिशिष्यति ॥ ४७ ॥

इति वराहपुराणे रैभ्यचरिते सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

वराह उवाच ।

योऽसौ वसोः शरीरे तु व्याधो भूत्वा ट्पस्य ह ।
स स्वहत्या स्थितः कालञ्चतुर्वर्षसहस्रकम्* ॥ १ ॥

---

* स तद्दत्वास्थितः कालमिति (ग) ।

एकैकं स्वकुटुम्बार्थे हत्वा वनचरं मृगम् ।
भृत्यातिथिहुताशानां प्रीणनं कुरुते सदा ॥ २ ।
मिथिलायां वरारोहे सदा पर्व्वणि पर्व्वणि ।
पितॄणां कुरुते श्राद्धं स्वाचारेण विचक्षणः ॥ ३ ।
अग्निं परिचरन्नित्यं वदन् सत्यं सुभाषितम् ।
प्राणयात्रानुसक्तस्तु योऽसौ जीवं न पातयेत्* ॥ ४ ।
एवन्तु वसतस्तस्य धर्म्मबुद्धिर्म्महातपाः ।
पुत्रस्त्वर्ज्जुनको नाम बभूव मुनिवद्वशी ॥ ५ ।
तस्य कालेन महता चारित्रेण च धीमतः ।
बभूवार्ज्जुनका नाम कन्या च वरवर्णिनी ॥ ६ ।
तस्या यौवनकाले तु चिन्तयामास धर्म्मवित् ।
कस्येयन्दीयते कन्या को वा योग्यश्च वै पुमान् ॥ ७ ।
इति चिन्तयतस्तस्य मतङ्गस्य सुतं प्रति ।
धर्म्मव्याधस्य सुव्यक्तं प्रसन्नाख्यं प्रतिब्रुवन् ॥ ८ ।
एवं सचिन्त्य मातङ्गं प्रसन्नम्प्रति सोद्यतः† ।
उवाच तस्य पितरम्प्रसन्नायार्ज्जुनीं भवान् ।
गृहाण तपतां श्रेष्ठ स्वयन्दत्तां महात्मने ॥ ९ ।

मतङ्ग उवाच ।

प्रसन्नोऽयं मम सुतः सर्व्वशास्त्रविशारदः ।
गृह्णाम्यर्ज्जुनकां कन्यान्त्वत्सुतां व्याधसत्तम ॥ १० ।

---

* योऽसौ जीवेन पातयेदिति (ग) ।

† सोद्यत इति आर्षं, स उद्यत इति साधु ।

एवमुक्ते तदा कन्यां धर्म्मव्याधो महातपाः।
मतङ्गपुत्राय ददौ प्रसन्नाय च धीमते ॥ ११ ।
धर्म्मव्याधस्तदा कन्यां दत्त्वा स्वगृहमीयिवान्।
सापि श्वशुरयोर्भर्त्तुः शुश्रूषणपराभवत् ॥ १२ ।
अथ कालेन महता सा कन्याऽर्ज्जुनकाऽशुभा।
उक्ता श्वश्र्वा सुता पुत्री जीवहन्तुस्त्वमीदृशी।
न जानासि तपश्चर्त्तुं भर्त्तुराराधनं तथा ॥ १३ ।
साऽपि स्वल्पाऽपराधेन भर्त्सिता तनुमध्यमा।
पितुर्वेश्मागता बाला रोदमाना* मुहुर्मुहुः ॥ १४ ।
पित्रा पृष्टा किमेतत्ते पुत्रि रोदनकारणम्।
एवमुक्ता तदा सा तु कथयामास भामिनी ॥ १५ ।
श्वश्र्वाऽहमुक्ता तीव्रेण कोपेन महता पितः।
जीवहर्त्तुः सुतेत्युच्चैरसकृद्दयाधजेति च ॥ १६ ।
एतच्छ्रुत्वा स धर्म्मात्मा धर्म्मव्याधो रुषाऽन्वितः।
मतङ्गस्य गृहं सोऽथ गत्वा जनपदैर्वृतम् ॥ १७ ।
तस्यागतस्य सम्बन्धी मतङ्गो जयतां वरः।
आसनाद्यर्घपाद्येन पूजयित्वेदमब्रवीत् ॥ १८ ।
किमागमनकृत्यं ते किं करोम्यागतक्रियाम् ॥ १९ ।

व्याध उवाच।

भोजनं किञ्चिदिच्छामि भोक्तुं चैतन्यवर्ज्जितम्।
कौतूहलेन येनाऽहमागतो भवतो गृहे ॥ २० ।

---

* रोदमानेति आर्षं, रुदतीति साधु।

मतङ्ग उवाच ।

गोधूमा व्रीहयश्चैव संस्कृता मम वेश्मनि ।
भुज्यतां धर्म्मविच्छ्रेष्ठ यथाकामं तपोधन ॥ २१ ।

व्याध उवाच ।

पश्यामि कीदृशास्ते हि गोधूमा व्रीहयो यवाः ।
स्वरूपेण च सन्त्येते येन वो वेद्मि सत्तमः ॥ २२ ।

वराह उवाच ।

एवमुक्ते मतङ्गेन शूर्पं गोधूमपूरितम् ।
अपरं तत्र व्रीहीणां धर्म्मव्याधाय दर्शितम् ॥ २३ ।
दृष्ट्वा व्रीहीन्स गोधूमान्धर्म्मव्याधो वरासनात् ।
उत्थाय गन्तुमारेभे मतङ्गेन निवारितः ॥ २४ ।
किमर्थं गन्तुमारब्धं त्वया वद महामते ।
अभुक्तेनैव संसिद्धं मद्गृहे चान्नमुत्तमम् ।
पाचयित्वा* स्वयञ्चैव कस्मात्त्वं नाद्य भुञ्जसे† ॥ २५ ।

व्याध उवाच ।

सहस्रशः कोटिशश्च जीवान्हंसि दिने दिने ।
अधिदृशस्य पापस्य कोऽन्नं भुञ्जति‡ सत्पुमान् ॥ २६ ।
अचैतन्यं यदि गृहे विद्यतेऽन्नं सुसंस्कृतम् ।
तदानीमस्मि संभोक्ता मत्वा तु स्वजनं तव ॥ २७ ।

---

* वाचयित्वेति बहुषु पुस्तकेषु पाठः ।

† भुञ्जसे इति आर्षं, भुङ्क्षे इति साधु । तत्पुमानिति (ग) ।

‡ भुञ्जतीति आर्षं, भुङ्क्ते इति साधु ।

अहमेकं कुटुम्बार्थं हन्म्यरण्ये पशुं दिने ।
तच्चेत्यितृभ्यः सत्कृत्य दत्वा भुञ्जामि* साऽनुगः ॥ २८ ।
त्वन्तु जीवान् बहून् हत्वा स्वकुटुम्बेन साऽनुगः† ।
भुञ्जसि‡ तेन सततमभोज्यं तन्मतं मम ॥ २९ ।
ब्रह्मणा तु पुरा सृष्टा ओषध्यः सर्व्ववीरुधः ।
यज्ञार्थं तत्तु भूतानां भक्ष्यमित्येव वै श्रुतिः ॥ ३० ।
दिव्यो भौमस्तथा पैत्री मानुषो ब्राह्म एव च ।
एते पञ्च महायज्ञा ब्रह्मणा निर्म्मिता पुरा ॥ ३१ ।
ब्राह्मणानां हितार्थाय इतरेषाञ्च तन्मुखाः ।
इतरेषान्तु वर्णानां ब्राह्मणैः कारिताः शुभाः ॥ ३२ ।
एवं कृत्वा नरो भुक्त्वा तस्माद्दान्नं विशुध्यति§ ।
अन्यथा व्रीहयोऽप्येते एकैके मृगपक्षिणः ¶ ।

---

* भुञ्जामीति आर्षं, भुञ्जे इति साधु ।

† चाऽनुग इति (ग) ।

‡ भुञ्जसे इति आर्षं, भुङ्क्षे इति साधु । भुञ्जतो तेनेति (ग)

§ तस्माद्वापि विशुध्यतीति (ग) ।

¶ (क) पुस्तके एतेषां श्लोकानां स्थाने अमी पठिताः—

अथ त्वया कृता निन्दा त्वं कस्मा जीवघातिनः ।
इति केनचिदाख्यातं श्रुतं व्याधेन धीमता ॥
ततोमतङ्गसदनं गत्वा क्रोधसमन्वितः ।
मातङ्गमब्रवीत्तच धर्म्मयुक्तं वचस्तदा ॥

धर्म्मव्याध उवाच ।

पुरा वराहेणाख्यातं धरणीं प्रति सत्तम ।

मन्तव्या दातृभोक्तृणां महामांसन्तु तत्स्मृतम् ॥ ३३ ।
मया ते दुहिता दत्ता पुत्रार्थे वरवर्णिनी ।
सा च त्वद्भार्य्यया प्रोक्ता दुहिता जन्तुघातिनः ।
अतोऽर्थमागतोऽहन्ते गृहं प्रतिसमीक्षितुम् ॥ ३४ ।
आचारं देवपूजाञ्च अतिथीनाञ्च तर्पणम् ।
एतेषामेकमप्यत्र कुर्व्वन्नपि न दृश्यसे ॥ ३५ ।*
तदहं गन्तुमिच्छामि† पितृणां श्राद्धकाम्यया ।
स्वगृहे नैव भुञ्जामि‡ पितृणां कार्य्यमित्युत ॥ ३६ ।
अहं व्याधोजीवघाती न तु त्वं लोकहिंसकः ॥ ३७ ।
मत्सुता जीवघातस्य यदोढा त्वत्सुतेन च ।
तन्महत्त्वञ्च सम्प्राप्तं प्रायश्चित्तं तपोधन ॥ ३८ ।
एवमुक्त्वा स चोत्थाय श्रुत्वा नारीं तदाम्बरे ।
मा स्नुषाभिः समं श्वश्र्वा विश्वासो भवतु क्वचित् ॥ ३९ ।
मा च स्नुषा कदाचित्स्याद्दा श्वश्रूं जीवती§मिषेत् ।
एवमुक्त्वा गतो व्याधः स्वगृहं प्रति भामिनि ॥ ४० ।

मांसाशी नरकं याति अदत्त्वा पितृदैवते ॥
दत्त्वा च पितृदेवेभ्यस्तस्माद्दावि विशुद्ध्यति ।
अन्यथा व्रीहयोऽप्येते एकैकमृगपक्षिणः ॥

* एष श्लोको (ग) पुस्तके नास्ति ।

† श्रोतुमिच्छामि नैगुण्यमिति (ग) ।

‡ भुञ्जामीति आर्षं, भुञ्जे इति साधु ।

§ जीवतीमिति आर्षं, जीवन्तीमिति साधु ।

ततो देवान् पितॄन् भक्त्या पूजयित्वा विचक्षणः ।
पुत्रञ्चार्ज्जुनकं स्थाप्य* स्वसन्तानं महातपाः ।
धर्म्मव्याधो जगामाशु तीर्थं त्रैलोक्यविश्रुतम् ॥ ४१ ।
पुरुषोत्तमाख्यञ्च परन्तत्र गत्वा समाहितः ।
तपश्चचार नियमात्पठन्स्तोत्रमिदं धरे ॥ ४२ ।

नमामि विष्णुं त्रिदशारिनाशनं
विशालवक्षःस्थलसंश्रितश्रियम् ।
सुशासनं नीतिमतां पराङ्गतिं
त्रिविक्रमं मन्दरधारिणं सदा ॥ ४३ ।
दामोदरं निर्जितभूतलं धिया
यशोऽंशुशुभ्रं भ्रमराङ्गसप्रभम् ।
भवे भवं दैत्यरिपुं पुरुष्टुतं
नमामि विष्णुं शरणं जनार्द्दनम् ॥ ४४ ।
त्रिधा स्थितं तिग्मरथाङ्गपाणिनं
नयस्थितं युक्तमनुत्तमैर्गुणैः ।
निःश्रेयसाख्यं क्षयितेतरं गुरुं
नमामि विष्णुं पुरुषोत्तमं त्वहम् ॥ ४५ ।
महावराहो हविषां भुजो जनो
जनार्द्दनो मे हितकृच्चतुर्मुखः ।
क्षितीधरो मामुदधिप्लवे महान्
स पातु विष्णुः शरणार्थिनं तु माम् ॥ ४६ ।

---

* स्थाप्य इति आर्षं, स्थापयित्वा इति साधु ।

मायाततं* येन जगत्त्रयं कृतं†
यथाग्निनैकेन ततं चराचरम्।
चराचरस्य स्वयमेव सर्व्वतः
स मेऽस्तु विष्णुः शरणं जगत्पतिः ॥ ४७।
भवे भवे यश्च ससर्ज्ज कं ततो
जगत्प्रसूतं सचराचरं त्विदम्।
ततश्च रुद्रात्मवति प्रलीयते
ततोहरिर्विष्णुहरस्तथोच्यते ॥ ४८।
रवीन्दुपृथ्वी‡पवनादिभास्कराः
जलञ्च यस्य प्रभवन्ति मूर्त्तयः।
स सर्व्वदा मे भगवान् सनातनो
ददातु शं विष्णुरचिन्त्यरूपधृक् ॥ ४९।
इतीरिते तस्य सनातनः स्वयं
पुरो बभूवाद्भुतरूपदर्शनः।
वरं वृणीष्वेति सनातनोऽब्रवी-
दनन्तपादोदरबाहुवक्त्रः§ ॥ ५०।
इतीरितो व्याधवरो जगाद
प्रदीयतामेष वरः सुतेष्वपि।

---

* मायामतमिति (ख)।

† जगत्त्रयं ततमिति (ख)।

‡ खात्मेन्दुपृथ्वीति (ग)।

§ अनन्तपादोदरबाहुविक्रम इति (ग)।

क्रियाकलापेन तथात्मविद्यया
कुलप्रसूतावपि तेऽनुगामिनः ॥ ५१ ।
ज्ञानोदयस्त्वऽस्य कुलस्य* सर्वदा
लयस्तथा ब्रह्मणि मे सनातन ।
इतीरिते तम्भगवानुवाच ह
प्रसन्नबुद्धिर्भवते मया त्वयम् ॥
वरो विसृष्टश्च कुलस्य ते मया
लयस्तथा ब्रह्मणि शाश्वते तव ।
इतीरिते देववरेण स क्षणात्
स्वदेहतस्तेज उदीर्णमैक्षत ॥
विसर्जयामास कविं सनातनं
लयञ्च तत्र प्रतिपेदिवानसौ ॥ ५२।५३ ।
इतीरितं स्तोत्रवरन्धरे नरः
पठिष्यते† यश्च शृणोति मानवः ।
हरिं समभ्यर्च्य सदा ह्युपोषितो
विशेषतो विष्णुदिने च मानवः ।
स याति यत्र स्वयमेव केशवो
वसेत‡ मन्वन्तरसप्ततिं सुखम् ॥ ५४ ।

इति वराहपुराणे आदिकृतवृत्तान्ते धर्म्मव्याधचरिते अष्टमोऽध्यायः ।

---

* ज्ञानोदयात् स्वस्य कुलस्य सर्व्वदा इति (क), (ख) ।

† पठिष्यते इति आर्षं, पठिष्यतीति साधु ।

‡ वसेत इति आर्षं, वसेदिति साधु ।

नवमोऽध्यायः ।

धरण्युवाच ।

आदौ कृतयुगे नाथ किं कृतं विश्वमूर्त्तिना ।
नारायणेन तत्सर्व्वं श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥

वराह उवाच ।

पूर्व्वन्नारायणस्त्वेको नासीत्किञ्चिद्वरे परम् ।
सैक* एव रतिं लेभे नैव स्वच्छन्दकर्मकृत् ॥ २ ॥
तस्य द्वितीयमिच्छन्त†श्चिन्ता बुद्ध्यात्मिका बभौ ।
अभावेत्येव संज्ञा या‡ चणभास्करसन्निभा ॥ ३ ॥
तस्या अपि द्विधा भूता चिन्ताभूद्ब्रह्मवादिनः ।
उमेति संज्ञया यत्तत्सदा मर्त्त्ये व्यवस्थिता ॥ ४ ॥
उमेत्येकाक्षरीभूता ससर्जेमां महीन्तदा ।
भूः ससर्ज भुवं सोऽपि ससर्ज च ततो महत् ॥ ५ ॥
ततश्च जन इत्येव ततश्चात्मा प्रलीयते ।
एतदोतन्तथा प्रोतं सूत्रे मणिगणा इव ॥ ६ ॥
जगत्प्राणवती भूतं शून्यमेतत्स्थितन्तदा ।
येयं मूर्त्तिर्भगवतः शङ्करः स स्वयं हरिः ॥ ७ ॥
शून्याल्लोकानिमान्सृष्ट्वा सिसृक्षुर्मूर्त्तिमुत्तमाम् ।

---

* सैक इति आर्षं, स एक इति साधु ।

† इच्छन्त इति आर्षम्, इच्छत इति साधु ।

‡ अभावेत्त्येवसंज्ञाया इति (क), (ख) ।

क्षोभयित्वा मनोधाम तत्राकारः स्वमान्ततः ।
स्थितस्तस्मिन्यदा क्षुब्धे ब्राह्माण्डमभवत्तदा ॥ ८ ।
तस्मिंस्तु शकलीभूते भूर्लोकञ्च व्यवस्थितम्* ।
अपरम्भुवनञ्चायात्मध्ये भास्करसन्निभम्† ॥ ९ ।
पुरा नष्टकसंस्थो यः पद्मकोशो व्यवस्थितः ।
स हि नारायणो देवः प्राजापत्येन तेजसा‡ ॥
अकाराद्यं स्वरन्ताभ्यां हलञ्च विससर्ज ह ।
अमूर्त्तस्तौ शास्त्राणि उद्गायत्तदाहि सः ॥ १०।११ ।
सृष्ट्वा पुनरमेयात्मा चिन्तयामास धारणम् ।
तस्य चिन्तयतो नेत्रात्तेजः समभवन्महत् ॥ १२ ।
दक्षिणं वह्निसङ्काशं वामन्तुहिनसन्निभम् ।
तद्दृष्ट्वा चन्द्रसूर्य्यौ तु कल्पितौ परमेष्ठिना ॥ १३ ।
ततः प्राणः§ समुत्तस्थौ वायुश्च परमेष्ठिनः ।
स एव वायुर्भगवान्योऽद्यापि हृदिगो विभुः ॥ १४ ।
तस्माद्वह्निः समुत्तस्थौ तस्मादग्नेर्जलं महत् ।
य एवाग्निः स वै तेजो ब्राह्मं परमकारणम् ॥ १५ ।
बाहुभ्यामप्यसौ तेजः क्षात्त्रन्तेजः ससर्ज ह ।
ऊरुभ्यामपि वैश्यांश्च पद्भ्यां शूद्रांस्तथा विभुः ॥ १६ ।

---

* भूर्लोकञ्च व्यवस्थितमिति आर्षं, भूर्लोकश्च व्यवस्थित इति साधु ।

† अपरम्भुवनञ्चैव प्राजापत्येन तेजसा इति (ख) ।

‡ अपरम्भुवनञ्चैव प्राजापत्येन तेजसा इति (ख) ।

§ प्राणशब्दो हि सर्व्वत्र बहुवचनान्तः प्रयुज्यते ।

ततस्तु ससृजे यज्ञान्नाक्षसांश्च तथा विभुः ।
चतुर्विधैस्तु भूर्लोकं भुवो लोकं वियच्चरैः ॥ १७ ।
भूतैः स्वर्मार्गगैरन्यैः स्वर्लोकं समपूरयत् ।
महर्लोकं तथा तैस्तैर्भूतैश्च सनकादिभिः ॥ १८ ।
जनलोकन्ततश्चैव वैराजैः समपूरयत् ।
तपोलोकं ततो देवैस्तपोनिष्ठैरपूरयत् ॥ १९ ।
अपुनर्मारकैः* देवैः सत्यलोकमपूरयत् ।
सृष्टिं सृष्ट्वा तथा देवो भगवान् भूतभावनः ।
कल्पसंज्ञान्तदामोघां जगन्ति परमेश्वरः ॥ २० ।
तस्मिञ्जगति भूर्लोको भुवोलोकश्च जायत† ।
स्वर्लोकश्च त्रयोऽप्येते‡ जायन्ते नात्र संशयः ॥ २१ ।
सुप्ते तु देवे कल्पान्ते तावती रात्रिरिष्यते ।
त्रैलोक्यमेतत्सुप्तं स्यात्तथोपप्लवताङ्गतम् ॥ २२ ।
ततो रात्र्यां व्यतीतायामुत्थितः§ कमलेक्षणः ।
चिन्तयामास तान्वेदान्मातरञ्च चतुर्ष्वपि ॥ २३ ।
चिन्तयानः स देवेशस्तान्वेदान्नाध्यगच्छत¶ ।
लोकमार्गस्थितिं कर्त्तुं निद्राज्ञानेन मोहितः ।

---

* अपुनर्भास्वरैरिति (ख) ।

† जायत इति आर्षम्, अजायत इति साधु ।

‡ त्रयोऽप्येते इति (क), (ख) ।

§ सुप्तित इति (ख) ।

¶ अध्यगच्छत इति आर्षम्, नाध्यगच्छदिति साधु ।

चिन्तयामास देवेशो नात्र देवो व्यवस्थितः ॥ २४ ।
ततः स्वमूर्त्तौ तोयाख्ये लीनान्दृष्ट्वा महेश्वरः ।
जिहृक्षुश्चिन्तयामास मत्स्यो भूत्वाऽविशज्जलम् ॥ २५ ।
एवं ध्यात्वा महामत्स्यस्तत्क्षणात्समजायत ।
विवेश च जलन्देवः समन्तात्क्षोभयन्निव ॥ २६ ।

तस्मिन् प्रविष्टे सहसा जलन्तु
महामहीध्रस्ववपुषि प्रकाशम् ।
मात्स्यं गते देववरे महोदधिं
हरिं स्तवैस्तुष्टुवुरुद्धृतक्षितिम् ॥ २७ ।
नमोऽस्तु वेदान्तरगाप्रतर्क्य
नमोऽस्तु नारायण मत्स्यरूप ।
नमोऽस्तु ते सुस्वर विश्वमूर्त्ते
नमोऽस्तु विद्याहयरूपधारिन् ॥ २८ ।
नमोस्तु चन्द्रार्कमनेकरूप
जलान्तविश्वस्थितचारुनेत्र ।
नमोस्तु विष्णोः शरणं व्रजामः
प्रपाहि नो मत्स्यतनुं विहाय ॥ २९ ।
त्वया ततं विश्वमनन्तमूर्त्तें
पृथङ्न ते किञ्चिदिहास्ति* देव ।
भवान्न चास्य व्यतिरिक्तमूर्त्ति-
स्त्वत्तो वयन्ते शरणं प्रपन्नाः ॥ ३० ।

---

* किञ्चिदिहास देव इति (ग) ।

खात्मेन्दुवह्निश्च मनश्च रूपं
पुराणमूर्त्तेस्तव चाञ्जनेत्र ।
क्षमस्व शम्भो यदि भक्तिहीनं
त्वयाजगद्भासति* देवदेव ॥ ३१ ।
विरुद्धमेतत्तव देवरूपं
सुभाषणं सुस्तनमद्रितुल्यम् ।
पुराण देवेश जगन्निवास
शमं प्रयाह्यच्युततीव्रभानो ॥ ३२ ।
नमामः सर्व्वे शरणं प्रपन्ना
भयाच्च ते रूपमिदं प्रपश्य† ।
लोके समस्तभ्भवता विनाऽद्य
न विद्यते देहगतं पुराणम् ॥ ३३ ।
एवं स्तुतस्तदा देवो जलस्थाञ्जगृहे च सः ।
वेदान् सोपनिषच्छास्त्राण्यतः स्वं रूपमास्थितः ॥ ३४ ।
यावत्स्वमूर्त्तिर्भगवान्तावदेव जगत्त्विदम् ।
कूटस्थे तल्लयं याति विकृतस्थे विवर्द्धते‡ ॥ ३५ ।

इति वराहपुराणे आदिकृतवृत्तान्ते सृष्टिवर्णने नवमोऽध्यायः ।

---

* भासतीति आर्षं, भासते इति साधु ।

† प्रपश्य इति आर्षं, प्रपश्य इति साधु ।

‡ विकृतस्थो विवर्द्धते इति (ग) ।

दशमोऽध्यायः ।

वराह उवाच ।

एवं सृष्ट्वा जगत्सर्व्वं भगवान् भूतभावनः ।
विरराम ततः सृष्टिर्व्यवर्द्धत धरे तदा ॥ १ ।
ब्रह्मायामथ सृष्टौ तु सर्व्वदेवाः पुरातनम् ।
नारायणाख्यं पुरुषं यजन्तो विविधैर्मखैः ॥
द्वीपेषु चैव सर्व्वेषु वर्षेषु च मखैर्हरिम् ।
देवाः सनैर्महद्भिस्ते यजन्तः श्रद्धयान्विताः ।
तोषयामासुरत्यर्थं स्वम्पूज्यं कर्त्तुमीप्सवः ॥ २।३ ।*
एवं तोषयतान्तेषां बहुवर्षसहस्रिकः ।
कालो देवस्तदा तुष्टः प्रत्यक्षत्वं जगाम ह ॥ ४ ।

अनेकबाहूदरवक्त्रनेत्रो
महागिरेः शृङ्गमिवोल्लिखंस्तदा ।
उवाच किं कार्य्यमथो सुरेशो
ब्रूत वरन्देववरा वरं वः ॥ ५ ।

देवा ऊचुः ।

जयस्व गोविन्द महानुभाव

---

* (ग) पुस्तके २य ३य श्लोकयोः स्थाने एवं श्लोकौ वर्त्तते—
ब्रह्मायामथ सृष्टौ तु सर्व्वे देवाः सवासवाः ।
सनैर्महद्भिः सर्व्वेऽत्र यजन्तः श्रद्धयाऽन्विताः ।
तोषयामासुरत्यर्थं स्वं पूज्यं कर्त्तुमीश्वरः ॥

त्वया वरं नाथवरेण देवाः ।
मनुष्यलोकेऽपि भवन्तमाद्यं
विहाय नास्मान्भवते* ह कश्चित् ॥ ६ ।
चन्द्रादित्यौ वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
सर्व्वे भवन्तं शरणागताः स्म
कुरुष्व पूज्यानिह विश्वमूर्त्ते ॥ ७ ।
एवमुक्तस्तदा तैस्तु महायोगीश्वरो हरिः ।
करोमि सर्व्वान्वः पूज्यानित्युक्त्वाऽन्तरधीयत ॥ ८ ।
देवा अपि निजौकांसि गतवन्तः सनातनाः ।
स्तुवन्तः परमेशोऽपि त्रिविधम्भावमास्थितः ॥ ९ ।
एवं त्रिधा जगद्धाता भूत्वा देवान्महेश्वरः ।
आराध्य सात्त्विकं राजस्तामसञ्च† त्रिधा स्थितम् ॥ १०
सात्त्विकेन पठेद्वेदान्यजन्यज्ञेन देवताः ।
आत्मनोऽवयवो भूत्वा राजसेनापि केशवः ॥ ११ ।
स कालरूपिणं रौद्रं प्रकृत्या शूलपाणिनम् ।
आत्मनो राजसीं मूर्त्तिं पूजयामास भक्तितः ॥ १२ ।
तामसेनापि भावेन असुरेषु व्यवस्थितः ॥ १३ ।
एवं त्रिधा जगद्धाता भूत्वा देवान्महेश्वरः ।
आराधयामास ततो लोकोऽपि त्रिविधोभवत् ॥ १४ ।

---

* भवते भावयति चिन्तयतीत्यर्थः ।

† राजः इति आर्षं, राजसमिति साधु ।

एवं विष्णुर्महेशानां नाम रुद्रान्वयवस्थितः ।
स च नारायणो देवः कृते युगवरे प्रभुः ॥ १५ ।
त्रेतायां रुद्ररूपस्तु द्वापरे यज्ञमूर्त्तिमान् ।
कलौ नारायणो देवो बहुरूपो व्यजायत ॥ १६ ।
तस्यादिकर्तृतो विष्णोश्चरितं भूरितेजसः ।
शृणुष्व सर्व्वं सुश्रोणि गदतो मम भामिनि ॥ १७ ।
आसीत्कृतयुगे राजा सुप्रतीको महाबलः ।
तस्य भार्याद्वयं चासीदतिशिष्टं मनोरमम् ॥ १८ ।
विद्युत्प्रभा कान्तिमती तयोरेते तु नामनी ।
तयोः पुत्रं समं राजा न लेभे बलवानपि ॥ १९ ।
यदा तदा मुनिश्रेष्ठमात्रेयं वीतकल्मषम् ।
तोषयामास विधिना चित्रकूटे नगोत्तमे ॥ २० ।
स ऋषिस्तोषितस्तेन दीर्घकालं वरार्थिना ।
वरन्दित्सुतया यावदब्रवीदत्रिजो मुनिः* ॥ २१ ।
तावदिन्द्रोऽपि करिणा गतः पार्श्वेन तस्य ह ।
देवसैन्यैः परिवृतस्तूष्णीमेव महाबलः ॥ २२ ।
तं दृष्ट्वा† तद्गतप्रीतिरप्रीतिं प्रीतवान्मुनिः‡ ।
चुकोप देवराजाय शापमुग्रं ससर्ज ह ॥ २३ ।

---

* वरं दिदित्सया यावदब्रवीदात्रेयो मुनिरिति (ख) । दिदित्सयेति आर्षं दित्सयेति साधु ।

† तं दृष्ट्वाऽन्तर्गतप्रीतिरिति (ग) ।

‡ प्रीतवान्मुनिरप्रीतिमिति (ख) ।

यस्मात्त्वया ममाऽवज्ञा कृता मूढ़ दिवस्पते ।
ततस्त्वं चालितो राज्यादन्यलोके वसिष्यसि* ॥ २४ ।
एवमुक्त्वाऽपि कोपेन सुप्रतीकञ्च भूपतिम् ।
उवाच राजन्पुत्रस्ते भविता दृढ़विक्रमः ॥ २५ ।
इन्द्ररूपोपमः श्रीमानुद्यच्छस्त्रः प्रतापवान् ।
विद्याप्रभावतत्त्वज्ञः क्रूरकर्म्मा भविष्यति ॥ २६ ।
दुर्जयोऽतिबली राजा एवमुक्त्वा गतो मुनिः ॥ २७ ।
सोऽपि राजा सुप्रतीको भार्य्यायां गर्भमावहत् ।
विद्युत्प्रभायां धर्मज्ञः साऽपि काले त्वसूयत ॥ २८ ।
तस्याः पुत्रः समभवद्दुर्जयाख्यो महाबलः ।
जातकर्मादिसंस्कारं तस्य चक्रे मुनिः स्वयम् ॥ २९ ।
तस्य चेष्टैर्बलेनासौ मुनेः सौम्यो बभूव ह ।
वेदशास्त्रार्थविद्यायां पारगो धर्मवान् शुचिः ॥ ३० ।
या द्वितीयाऽभवत्पत्नी तस्य राज्ञो महात्मनः ।
नाम्ना कान्तिमती धन्या† तस्याः पुत्रो बभूव ह ।
नाम्ना सुद्युम्न इत्येवं वेदवेदाङ्गपारगः ॥ ३१ ।
अथ कालेन महता स राजा राजसत्तमः ।
सुप्रतीकः सुतन्दृष्ट्वा दुर्जयं योग्यमन्तिके ॥ ३२ ।
आत्मनो वृद्धभावञ्च वाराणस्यधिपो बली ।
चिन्तयामास राज्यार्थं दुर्जयं प्रति भामिनि ॥ ३३ ।

---

* वसिष्यसीति आर्षं, वत्स्यसीति साधु ।

† कीर्त्तिमती धन्या इति (ग) ।

एवं सञ्चिन्त्य धर्मात्मा तस्य राज्यं ददौ नृपः ।
स्वयञ्च चित्रकूटाख्यं पर्व्वतं स जगाम ह ॥ ३४ ।
दुर्ज्जयोऽपि महद्राज्यं हस्त्यश्वरथवाजिभिः ।
संयोज्य चिन्तयामास राज्यवृद्धिं प्रति प्रभुः ॥ ३५ ।
एवं सञ्चिन्त्य मेधावी हस्त्यश्वरथपत्तिभिः ।
समेतां वाहिनीं कृत्वा उत्तरां दिशमाश्रितः ॥ ३६ ।
तस्य चोत्तरतो देशाः सर्वे सिद्धा महात्मनः ।
भारताख्यमिदं वर्षं साधयित्वा सुदुर्जयः ॥
ततः किंपुरुषं नाम वर्षं तेनाऽपि साधितम् ।
ततः परतरञ्चान्यद्धरिवर्षं जिगाय सः ॥ ३७।३८ ।
रम्यं रोमावतं वापि कुरुभद्राश्वमेव च ।
इलावृतं मेरुमध्यमेतत्सर्वं जिगाय सः ॥ ३९ ।
जित्वा जम्वाख्यमेतद्धि* द्वीपं यावदसौ नृपः ।
जगाम देवराजानं जेतुं सर्वं सुरान्वितम् ॥ ४० ।
मेरुपर्व्वतमारुह्य† देवगन्धर्व्वदानवान् ।
गुह्यकान् किन्नरान्दैत्यांस्ततो ब्रह्मसुतो मुनिः ।
नारदो दुर्ज्जयजयं देवराजाय शंसते‡ ॥ ४१ ।
तत इन्द्रस्त्वरायुक्तो लोकपालैः समन्वितः ।

---

* रम्यं हैमवतं चाऽपि इति (ग) ।

† मेरुं पर्व्वतमारुह्य इति (ग) ।

‡ देवराजाय शंसत इति (ग) । शंसत इति आर्षम्, अशंसदिति साधु ।

जगाम दुर्ज्जयं हन्तुं सोऽचिरेणास्त्रनिर्ज्जितम्* ॥ ४२ ।
विहाय पर्व्वतं मेरुं मर्त्यलोकमिहागतः ॥ ४३ ।
पूर्व्वदेशेन† च देवेन्द्रो लोकपालैः समं प्रभुः ।
स्थितवांस्तस्य सुमहच्चरितं सम्भविष्यति ॥ ४४ ।
दुर्ज्जयश्च सुराञ्जित्वा यावत्प्रतिनिवर्त्तते ।
गन्धमादनपृष्ठे तु स्कन्धावारनिवेशनम् ।
कृत्वाऽवस्थितसम्भारमागतौ तापसौ तु तम् ॥ ४५ ।
तावागतौ तथाऽभूतां‡ राजन्दुर्ज्जय लोकपाः ।
निवारितास्त्वया सर्वे लोकपालैर्विना जगत् ।
न प्रवर्त्तेत्ततो§ देहि तत्पदं सुखमुत्तमम् ॥ ४६ ।
एवमुक्ते ततस्तौ तु दुर्ज्जयः प्राह धर्म्मवित् ।
कौ भवन्ताविति ततस्तावूचतुररिन्दमौ ॥ ४७ ।
विद्युत्सुविद्युनामानावसुराविति नामतः ।
त्वया सम्प्रति चेच्छासौ धर्म्मं सत्तु सुसंस्कृतम् ॥ ४८ ।
लोकपानां सर्व्वमावाङ्कर्म्म कुर्व्वः सुदुर्ज्जय ।
एवमुक्ते दुर्ज्जयेन तौ स्वर्गे सन्निवेशितौ ॥ ४९ ।
लोकपालौ कृतौ सद्यस्ततोऽन्तर्द्धानमापतुः ।
तयोरपि महत्कर्म्म चरितञ्च धराधरे ॥

---

* सोऽचिरेणास्त्रनिर्गत इति (ग) ।

† पूर्व्वदेशश्च देवेन्द्र इति (ग) ।

‡ तथा भूतां तरं (च तं ?) राजन्दुर्ज्जयं लोकपालना इति (ग) ।

§ प्रवर्त्तदिति आर्षं, प्रवर्तेत इति साधु ।

भविष्यति महाराजो दुर्ज्जयो मन्दरोपरि ।
धनदस्य वनं दिव्यं दृष्ट्वा नन्दनसन्निभम् ॥
मुदा बभ्राम रम्येऽस्मिन्स यावद्राजसत्तमः* ।
तावत्सुवर्णवृक्षाधः कन्याद्वयमपश्यत† ॥ ५०।५१ ५२ ।
अतीवरूपसम्पन्नमतीवाद्भुतदर्शनम् ।
दृष्ट्वा तु विस्मयाविष्टः क इमे शुभलोचने ।
एवं सञ्चिन्त्य यावत्स क्षणमेकं व्यवस्थितः ।
तस्मिन्वने तावदुभौ तापसौ सोऽवलोकयत्‡ ॥ ५३।५४ ।
तौ दृष्ट्वा सहसा राजा ययौ प्रीत्या परां मुदम् ।
अवतीर्य्य द्विपात्तूर्णं नमश्चक्रे तयोः स्वयम् ॥ ५५ ।
उपविष्टः स ताभ्यान्तु कौश्ये दत्ते वरासने ।
पृष्टः कस्त्वं कुतश्चासि कस्य वा किमिह स्थितः ॥ ५६ ।
तौ प्रहस्याब्रवीद्राजा सुप्रतीकेति§ विश्रुतः ।
तस्य पुत्रः समुत्पन्नो दुर्जयो नाम नामतः ॥ ५७ ।
पृथिव्यां सर्व्वराजानो¶ जिगीषन्निह सत्तमौ ।
आगतोऽस्मि ध्रुवञ्चैव स्मर्त्तव्योऽहं तपोधनौ ।
भवन्तौ कौ समाख्यातं ममानुग्रहकाङ्क्षया ॥ ५८ ।

---

* मुदा बभ्राम रम्येण तद्यावद्राजसत्तम इति (ग) ।

† अपश्यत इति आर्षम्. अपश्यदिति साधु ।

‡ अवलोकयदिति आर्षम्, अवालोकयदिति साधु ।

§ सुप्रतीक इति साधु ।

¶ सर्व्वराजान इति आर्षं, सर्व्वराजानिति साधु ।

तापसावूचतुः ।

आवां हेतृप्रहेत्राख्यौ मनोः स्वायम्भुवः सुतौ ।
आवां देवविनाशाय गतौ स्वौ मेरुपर्व्वतम्* ॥ ५९ ।
तत्रावयोर्म्महासैन्यं गजाश्वरथसङ्कुलम् ।
जिगाय सर्व्वदेवानां शतशोऽथ सहस्रशः ॥ ६० ।
ते च देवा महत्सैन्यं दृष्ट्वा सैन्यं निपातितम् ।
असुरैरुज्झितप्राणं ततस्ते शरणं गताः ॥
क्षीराब्धौ यत्र देवेशो हरिः शेते स्वयं प्रभुः ।
तत्र विज्ञापयामासुः सर्व्वं† प्रणतिपूर्व्वकम् ॥ ६१।६२ ।
देव देव हरे सर्व्वं सैन्यं त्वसुरसत्तमैः ।
पराजितं परित्राहि भीतं विह्वललोचनम् ॥ ६३ ।
त्वया देवासुरे युद्धे पूर्व्वं त्राता स्म केशव ।
सहस्रबाहोः क्रूरस्य समरे कालनेमिनः ॥ ६४ ।
इदानीमपि देवेश असुरौ देवकण्टकौ ।
हेतृप्रहेतृनामानौ बहुसैन्यपरिच्छदौ ॥
तौ हत्वा‡ त्राहि नः सर्व्वान्देवदेव जगत्पते ॥ ६५ ।
एवमुक्तस्ततो देवो विष्णुर्नारायणः प्रभुः ।
अहं यास्यामि तौ हन्तुमित्युवाच जगत्पतिः ॥ ६६ ।
एवमुक्तास्ततो देवा मेरुपर्व्वतसन्निधौ ।

---

* मेरुपर्व्वते इति (ग) ।

† सर्व्वं प्रणतिपूर्व्वकमिति (ग) ।

‡ हत्वा तु त्राहि न इति (ग) ।

प्रतस्थुस्तेऽथ मनसा चिन्तयन्तो जनार्द्दनम्॥ ६७।
तैः सञ्चिन्तितमात्रस्तु देवश्चक्रगदाधरः।
आवयोः सैन्यमाविश्य एक एव महाबलः।
एकधा दशधात्मानं शतधा च सहस्रधा।
लक्षधा कोटिधा कृत्वा स्वभूत्या च जगत्पतिः* ॥ ६८।६९।
एवं स्थिते देववरेऽस्मत्सैन्ये महाबलः।†
यः कश्चिदसुरो राजन्नावयोर्बलमाश्रितः।
स हतः पतितो भूमौ दृश्यते गतचेतनः॥ ६०।
एवं तत्सहसा सैन्यं मायया विश्वमूर्त्तिना।
निहत्य मांसलकलम्पत्तिध्वजसमाकुलम्।
चतुरङ्गं बलं सर्व्वं हत्वा देवो रथाङ्गधृक्।
आवां शेषावथो दृष्ट्वा गतोऽन्तर्द्धानमीश्वरः॥ ६१।६२।
आवयोरीदृशं कर्म्म दृष्टं देवस्य शार्ङ्गिणः।
ततस्तमेव शरणं गतावाराधनाय वै‡ ॥ ६३।
त्वञ्चास्मन्मित्रतनयः सुप्रतीकात्मजो नृपः।
इमे च आवयोः कन्ये गृहाण मनुजेश्वर।
हेतृकन्या सुकेशी तु मिश्रकेशी प्रहेतृणः§ ॥ ६४।

---

* अत्र चचार इति क्रियापदमध्याहार्य्यम्।

† (ग) पुस्तके ६७ श्लोकः, ६८ श्लोकस्य पूर्व्वार्द्धञ्च न स्तः।

‡ गत्वा चाराधनाय वै इति बहुषु पुस्तकेषु पाठोदृश्यते। तत्र च सौषितौ, ञ्चितौ वेति क्रियान्तरस्यापेक्षा वर्त्तते।

§ प्रहेतृण इति आर्षं, प्रहेतुरिति साधु।

दुर्जयस्त्वेवमुक्तास्तु हेटणा* ते उभे शुभे ।
कन्ये जग्राह धर्म्मेण भार्य्यार्थं मनुजेश्वरः ॥ ६५ ।
ते लब्ध्वा सहसा राजा† मुदा परमया युतः ।
आजगाम स्वकं राष्ट्रं निजसैन्यसमावृतः ॥ ६६ ।
ततः कालेन महता तस्य पुत्रद्वयं बभौ ।
सुकेश्याः प्रभवः पुत्रो मिश्रकेश्याः सुदर्शनः ॥ ६७ ।
स राजा दुर्जयः श्रीमांल्लब्ध्वा पुत्रद्वयं शुभम् ।
स्वयं कालान्तरे श्रीमाञ्जगामारण्यमन्तिके ॥ ६८ ।
तत्रस्थो वनजाञ्जन्तून्बन्धयन्वै भयङ्करान्‡ ।
ददर्शारण्यमाश्रित्य मुनिं स्थितमकल्मषम् ।
तपस्यन्तं महाभागं नाम्ना गौरमुखं शुभम् ।
ऋषिवृन्दस्य गोप्तारं त्रातारं पापिनां स्वयम् ॥ ६९।७० ।

तस्याश्रमो विमलजलाविलोमरुत्
सुगन्धिवृक्षप्रवरो द्विजन्मनः ।
रराज जीमूत इवाम्बरान्महो-
मुपागतः प्रवरविमानवद्गृहः§ ॥ ७१ ।
ज्वलन्मुखाग्निप्रतिभासिताम्बरः
सुशुभ्रसंवासितवेश्मकुट्टकः ।

---

* अत्रापि हेत्वा इति साधु ।

† तेजसा सहसा राजा इति (ग) ।

‡ (ख) पुस्तके तत्रस्थो वनजातीर्हिं वर्द्धयन्वै भयङ्कर इति पाठोऽस्ति ।

§ श्लोकस्यास्य प्रथमपादोऽन्यविधेनैव छन्दसा विरचितः ।

शिष्यैः समुच्चारितसामनादकः
सुरूपयोषिद्दषिकन्यकायुतः ।
इतीदृशोऽस्यावसथो वराश्रमे
सुपुष्पिताशेषतरुप्रसूनः* ॥ ७२ ।

इति श्रीवराहपुराणे दुर्ज्जयचरिते दशमोऽध्यायः ।

—o—

एकादशोऽध्यायः ।

वराह उवाच ।

ततस्तमीदृशं दृष्ट्वा तदा गौरमुखाश्रमम् ।
दुर्ज्जयश्चिन्तयामास रम्यमाश्रममण्डलम् ॥ १ ।
प्रविशाम्यत्र पश्यामि ऋषीन् परमधार्म्मिकान् ।
चिन्तयित्वा तदा राजा प्रविवेश तमाश्रमम् ॥ २ ।
तस्य प्रविष्टस्य ततो राज्ञः परमहर्षितः ।
चकार पूजां धर्म्मात्मा तदा गौरमुखो मुनिः ॥ ३ ।
स्वागतादिक्रियाः कृत्वा कथान्ते तं महामुनिः ।
स्वशक्त्याहं नृपश्रेष्ठ सानुगस्य तु भोजनम् ।
करिष्यामि प्रमुच्यन्तां साधुवाहा इति द्विजः ॥ ४ ।
एवमुक्त्वा स्थितस्तूष्णीं स मुनिः शंसितव्रतः ।
राजापि तस्थौ तद्भक्त्या स्वसहायैः समन्वितः ॥ ५ ।

---

*कैलासस्य शिपवरणस्यैकान्वयन्यूनता दृश्यते ।

अक्षौहिण्यो बलस्यास्य पञ्चमात्रं तदा स्थिताः ।
अयञ्च तापसः किं मे दास्यते* भोजनं त्विह ॥ ६ ।
निमन्त्र्य दुर्ज्जयं विप्रस्तदा गौरमुखो नृपम् ।
चिन्तयामास किञ्चास्य† मया देयं तु भोजनम् ॥ ७ ।
एवं चिन्तयतस्तस्य महर्षेर्भावितात्मनः ।
स्थितो मनसि देवेशो हरिर्नारायणः प्रभुः ॥ ८ ।
ततः संस्मृत्य मनसा देवं नारायणं तदा ।
तोषयामास गङ्गायां प्रविश्य मुनिसत्तमः ॥ ९ ।

धरण्युवाच ।

कथं गौरमुखो विष्णुं तोषयामास भूधर ।
एतन्मे कौतुकं श्रोतुं सम्यगिच्छा प्रवर्त्तते ॥ १० ।

वराह उवाच ।

नमोऽस्तु विष्णवे नित्यं नमस्ते पीतवाससे ।
नमस्ते चाद्यरूपाय नमस्ते जलरूपिणे ॥ ११ ।
नमस्ते सर्व्वसंस्थाय नमस्ते जलशायिने ।
नमस्ते क्षितिरूपाय नमस्ते तैजसात्मने ॥ १२ ।
नमस्ते वायुरूपाय नमस्ते व्योमरूपिणे ।
त्वं देवः सर्व्वभूतानां प्रभुस्त्वमसि हृच्छयः ॥ १३ ।
त्वमोङ्कारो वषट्कारः सर्व्वत्रैव च संस्थितः‡ ।

---

* दास्यते इति आर्षं, दास्यतीति साधु ।

† किन्त्वस्य इति (ग) ।

‡ सर्व्वत्रैव च संश्रयः इति (ख) ।

त्वमादिः सर्व्वदेवानां तव चादिर्न विद्यते ॥ १४ ।
त्वं भूस्त्वञ्च भुवो देवस्त्वं जनस्त्वं महः स्मृतः ।
त्वं तपस्त्वञ्च सत्यञ्च त्वयि देव चराचरम् ॥ १५ ।
त्वत्तो भूतमिदं सर्व्वं विश्वं त्वत्त ऋगादयः* ।
त्वत्तः शास्त्राणि जातानि त्वत्तो यज्ञाः प्रतिष्ठिताः ॥ १६ ।
त्वत्तो वृक्षा वीरुधश्च त्वत्तः सर्व्ववनौषधी ।
पशवः पक्षिणः सर्पास्त्वत्त एव जनार्द्दन ॥ १७ ।
ममापि देवदेवेश राजा दुर्ज्जयसंज्ञितः ।
आगतोऽभ्यागतस्तस्य आतिथ्यं कर्त्तुमुत्सहे ॥ १८ ।
तस्य मे निर्धनस्याद्य देवदेव जगत्पते ।
भक्तिनम्रस्य देवेश कुरुष्वान्नाद्यसञ्चयम् ॥ १९ ।
यं यं स्पृशामि हस्तेन यञ्च पश्यामि चक्षुषा† ।
काष्ठं वा तृणकन्दं वा‡ तत्तदन्नं चतुर्व्विधम् ॥ २० ।
तथा त्वन्यतमं वापि यद्ध्यातं मनसा मया ।
तत्सर्व्वं सिद्ध्यतां मह्यं§ नमस्ते परमेश्वर ॥ २१ ।

वराह उवाच ।

इति स्तुत्या तु देवेशस्तुतोष जगतां पतिः ।
मुनेस्तस्य स्वकं रूपं दर्शयामास केशवः ॥ २२ ।

---

* त्वत्तोभूतमिदं विश्वं त्वद्भूता ऋगादय इति (ग) ।

† यं यं पश्यामि चक्षुषा इति (ख) ।

‡ फलं वा तृणकन्दं वा इति (ख) ।

§ सत्यमिति (ग) ।

उवाच सुप्रसन्नात्मा ब्रूहि विप्र वरं परम्।
एवं श्रुत्वाक्षिणी यावदुन्मीलयति वै मुनिः॥ २३।
तदा शङ्खगदापाणिः पीतवासा जनार्द्दनः।
गरुड़स्थोऽपि तेजस्वी द्वादशादित्यसुप्रभः॥ २४।
दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थितिः* ।
यदि भा सदृशी सा स्याद्भासस्तस्य महात्मनः† ॥ २५।
तत्रैकस्थञ्जगत्कृत्स्नं प्रविभक्तमनेकधा‡ ।
ददर्श स मुनिर्द्देवे विस्मयोत्फुल्ललोचनः॥ २६।
ननाम शिरसा§ देवं कृताञ्जलिरथाब्रवीत्।
यदि मे वरदो देवो भूयाद्भक्तस्य केशवः।
इदानीमेष नृपतिर्यथा सबलवाहनः।
ममाश्रमे कृताहारः श्वः प्रयाता स्वकं गृहम्¶ ॥ २७।२८।
इत्युक्तस्तस्य देवेशो वदतः संबभूव ह।
चित्तसिद्धिं ददौ तस्मै मणिञ्च सुमहाप्रभम्॥ २९।
तं दत्त्वान्तर्दधे देवः स च गौरमुखो मुनिः।
जगाम चाश्रमं पुण्यं नानाऋषिनिषेवितम्॥ ३०।
तत्र गत्वा स विप्रेन्द्रश्चिन्तयामास वै मुनिः।

---

* उच्छ्रितिः इति (ख)।

† भगवद्गीता (११।१२) दृश्यताम्।

‡ भगवद्गीता (११।१३) दृश्यताम्।

§ जगाम शिरसा देवमिति (ग)।

¶ स्वके गृहे इति (ग)।

हिमवच्छिखराकारं महाभ्रमिव चोन्नतम् ।
शशाङ्करश्मिसङ्काशं गृहं वै शतभूमिकम् ॥ ३१ ।
तादृशानां सहस्राणि लक्षकोट्यश्च सर्व्वशः ।
गृहाणि निर्ममे विप्रो विष्णोर्लब्धवरस्तदा ॥ ३२ ।
प्राकाराणि ततोपान्ते* तल्लग्नोद्यानकानि च ।
कोकिलाकुलघुष्टानि नानाद्विजवराणि च ॥ ३३ ।
चम्पकाशोकपुन्नागनागकेसरवल्लि च ।
नानाजात्यास्तथा वृक्षा गृहोद्यानेषु सर्व्वशः ॥ ३४ ।
हस्तिनां हस्तिशालाश्च तुरगाणाञ्च मन्दुराः ।
चकार सञ्चयान्विप्रो नानाभक्ष्याणि सर्व्वशः ॥ ३५ ।
भक्ष्यं भोज्यन्तथा लेह्यं चोष्यं बहुविधं तथा ।
चकारान्नाद्यविषयं हैमपात्राणि† सर्व्वतः ॥ ३६ ।
एवमुक्त्वा स विप्रस्तु राजानं भूरितेजसम् ।
उवाच सर्व्वसैन्यानि प्रविशन्तु गृहानिति ॥ ३७ ।
एवमुक्तस्ततो राजा तद्गृहं पर्व्वतोपमम् ।
प्रविवेशान्तरेष्वन्ये भृत्या विविशुराशु वै ॥ ३८ ।
ततस्तेषु प्रविष्टेषु तदा गौरमुखो मुनिः ।
प्रगृह्य तं मणिं दिव्यं राजानञ्चेदमब्रवीत् ॥ ३९ ।
मज्जनाभ्यवहारार्थं पथि प्रक्रामति‡ तथा ।

---

* ततोपान्ते इति आर्षं, तत उपान्ते इति साधु ।

† हैमपात्रञ्च सर्व्वत इति (ग) ।

‡ श्रमक्लमे तथा इति (ग) ।

विलासिनीस्तथा दासान्प्रेषयिष्यामि ते नृप ॥ ४० ।
एवमुक्त्वा स विप्रेन्द्रस्तं मणिं वैष्णवं तदा ।
एकान्ते स्थापयामास राज्ञस्तस्य प्रपश्यतः ॥ ४१ ।
तस्मिन्स्थापितमात्रे तु मणौ शुद्धसमप्रभे ।
निश्चेरुर्योषितस्तत्र दिव्यरूपाः सहस्रशः ॥ ४२ ।
सुकुमाराङ्गरागाढ्याः सुकुमारा वराङ्गनाः ।
सुकपोलाः सुचार्व्वङ्ग्यः सुकेशान्ताः सुलोचनाः ॥ ४३ ।
काश्चित्सौवर्ण्यपात्रीश्च गृहीत्वा सम्प्रतस्थिरे ।
एवं योषिद्गणास्तत्र नराः कर्म्मकरास्तथा ॥
निर्जग्मुस्तस्य नृपतेः सर्व्वे भृत्या नृपस्य ह ।
केवलं भोजनं पूर्व्वं परिधानञ्च सर्व्वशः ॥ ४४।४५ ।
ताः स्त्रियः सर्व्वभृत्यानां राजमार्गेण मज्जनम् ।
ददृशुस्ते नरास्तासां हस्तिनां चारुगामिनाम् ॥ ४६ ।
नानाविधानि तूर्याणि तत्र वाद्यन्त* सर्व्वशः ।
मज्जतो नृपतेस्तस्य ननृतुश्चान्ययोषितः ॥ ४७ ।
अपराश्च जगुस्तत्र शक्रस्येव प्रमज्जतः ॥ ४८ ।
एवं दिव्योपचारेण स्नात्वा राजा महामनाः ।
चिन्तयामास राजेन्द्रो विस्मयाविष्टचेतनः ।
किमिदम्मुनिसामर्थ्यात्तपसो वाथवा मणेः ॥ ४९ ।
एवं स्नात्वोत्तमे वस्त्रे परिधाय नृपस्तथा ।
विविधान्नन्तु विधिना बुभुजे स नृपोत्तमः ॥ ५० ।

---

* वाद्यन्त इति आर्षम्, अवाद्यन्त इति साधु ।

यथा च नृपतेः पूजा कृता तेन महर्षिणा ।
तद्भृत्यजनस्यापि चकार मुनिसत्तमः ॥ ५१ ।
यावत्स राजा बुभुजे सभृत्यबलवाहनः ।
तावदस्तगिरिं भानुर्जगामाऽरुणसप्रभः ॥ ५२ ।

ततस्तु रात्रिः समपद्यताऽधुना
शरच्छशाङ्कोज्ज्वललक्ष्ममण्डिता ।
करोति रागं स च रोहिणीधवः
सुसङ्गतं सौम्यगुणैर्युतोपि च ॥ ५३ ।
भृगूद्वहः कृष्णतरांशुभानुना
सहोद्यतो दैत्यगुरुः सुराधिपः ।
अथाऽन्यथापक्षगतो* न राजते
स्वभावयोगेन मतिस्तु देहिनाम् ॥ ५४ ।
सुरक्ततां भूमिसुतश्च मुञ्चते
राहुः शितं चन्द्रमसोऽंशवः सिताः ।
युक्तः स्वभावो जगतः सुरासुरै-
र्नतु स्वभावो बलवीर्य्यकृन्नृपः ॥ ५५ ।
शनैश्चराख्यापितरश्मिमण्डले
सूर्य्याग्रसिद्धान्तकथेव निर्म्मले ।
करोति केतुर्न परोमहत्तम-
स्तदा कुशीलेषु गतिश्च निर्म्मला ॥ ५६ ।

---

* अन्यथापक्षोदुष्टपक्षोऽसुरपक्ष इति यावत् ।

बुधोच्चबुद्धिर्जगतो* विभावय-
न्नराज राज्ञस्तनयः स्वकर्म्मभिः ।
भृतीच्छुकः कच्चविवाहितश्चिरा-
द्भवेदयं साधुषु सम्मितो ध्रुवम् ॥ ५७ ।
करोति केतुः कपिलं वियच्चिरं
राज्ञः सुराणां पथि संस्थितो भृशम् ।
न दुर्ज्जनः सज्जनसंसदि क्वचि-
त्करोति शुद्धं निजकर्म्मकौशलम् ॥ ५८ ।
शशाङ्करश्मिप्रतिभासिता अपि
प्रसादमीयुर्न रतीः पदे पदे ।
कुलंभुवाः सम्भवधर्म्मपत्नयो
महांशुयोगान्महतां समुन्नतिः ॥ ५९ ।
त्रिदोषसंक्रान्तिकृतोऽस्य सर्व्वशः
सुतेन राज्ञोवरुणस्य सूर्य्यजाः ।
चिरं जिता कौशिकसन्निवेशिता
न वेदकर्म्म क्वचिदन्यथा भवेत् ॥ ६० ।
इन्द्रः समेतामनयः शिशुः पुरा
हरिं य आराधितवान्नृपासनम् ।
लक्ष्म्यापि बुद्ध्या सुचिरं प्रकाशितं
ध्रुवेण विष्णुस्मरणेन दुर्लभम् ॥ ६१ ।
इतीव सा रात्रिरभून्मुनेः शुभे

* बुधोच्चबुद्धिरिति आर्षं, बुध उच्चबुद्धिरिति साधु ।

वराश्रमे दुर्ज्जयभूपतेः शुभा।
सभृत्यवर्गः सगजाश्वदन्तिनाम्*
सुभक्तवस्त्राभरणादिपूजया ॥ ६२ ।
इतीदृशो ये वररत्नचित्रिताः†
सुपट्टसंवीतवरान्विताः सदा।
गृहेषु पर्य्यङ्कवराः समास्थिताः
सुरूपयोषित्स्थितभङ्गभासुराः ॥ ६३ ।
स तत्र राजा विससर्ज भूभृतः
स्वयं सुभृत्यानपि सर्व्वतो गृहम्।
गतेषु सुष्वाप वरस्त्रिया वृतः
सुरेशवत्स्वर्गगतः प्रतापवान् ॥ ६४ ।

एवं सुमनसस्तस्य सभृत्यस्य महात्मनः।
ऋषेस्तस्य प्रभावेण हृष्टाः प्रसुषुपुस्तदा ॥ ६५ ।
ततो रात्र्यां व्यतीतायां स राजा ताः पुनः स्त्रियः।
अन्तर्द्धानं गतास्तत्र दृष्ट्वा तानि गृहाणि वा ॥
अदृश्यानि महार्हाणि वरासनगतानि च।
स राजा विस्मयाविष्टश्चिन्तयामास दुःखितः ॥ ६६।६७ ।
कथमेवं मणिर्मह्यं भवतीति पुनः पुनः।
चिन्तयन्नधिगम्याथ स राजा दुर्ज्जयस्तथा ॥ ६८ ।

---

* सगजाश्ववन्दिनामिति (ख)।

† याम्बरत्नप्रचित्रिता इति (ग)।

चिन्तामणिमिमञ्चास्य हरामीति विचिन्त्य च * ।
प्रयाणं नोदयामास स राजाश्रमवाह्यतः ॥ ६९ ।
आश्रमस्य वहिर्गत्वा नातिदूरे सवाहनः ।
ततो विरोचनाख्यं वै प्रेषयामास मन्त्रिणम् ॥ ७० ।
ऋषेर्गौरमुखस्यापि मणेर्याचनकर्म्मणि ।
ऋषिन्तञ्च समागत्य मणिं याचितुमुद्यतः ॥ ७१ ।
रत्नानां भाजनं राजा मणिं† तस्मै प्रदीयताम् ।
अमात्येनैवमुक्तस्तु क्रुद्धो गौरमुखोऽब्रवीत् ॥ ७२ ।
प्रतिग्राहीति विप्रस्तु‡ राजा चैव ददाति च ।
त्वञ्च राजा पुनर्भूत्वा याचसे दीनवत्कथम् ॥ ७३ ।
एवं ब्रूहि दुराचारं राजानं दुर्ज्जयं स्वयम् ।
गच्छ द्रुतं दुराचारं मा त्वां लोको§ऽत्यगादिति ॥ ७४
एवमुक्तस्तदा दूतो जगाम च नृपान्तिकम् ।
कथयामास तत्सर्व्वं यदुक्तं ब्राह्मणेन च ॥ ७५ ।
ततः क्रोधपरीतात्मा श्रुत्वा ब्राह्मणभाषितम् ।
दुर्ज्जयः प्राह नीलाख्यं सामन्तं गच्छ मा चिरम् ॥ ७६
ब्राह्मणस्य मणिं गृह्य¶ तूर्णमेहि यदृच्छया ॥ ७७ ।

---

* विचिन्त्य स इति (क), (ग) ।

† मणिं तस्मै प्रदीयतामिति आर्षं, मणिस्तस्मै प्रदीयतामिति साधु ।

‡ प्रतिग्राहीति वै विप्रो राजा चैव ददाति च इति (ख) ।

§ मा त्वां कोपोऽत्यगादिति (क) ।

¶ गृह्येति आर्षं, गृहीत्वेति साधु ।

एवमुक्तस्तदा नीलो बहुसेनापरिच्छदः ।
जगाम स च विप्रस्य वन्यमाश्रममण्डलम् ॥ ७८ ।
तत्राग्निहोत्रशालायां दृष्ट्वा तं मणिमाहितम् ।
उत्तीर्य्य स्यन्दनान्नीलः सोऽवारोहत* भूतले ॥ ७९ ।
अवतीर्णे ततस्तस्मिन्नीले परमदारुणे ।
क्रूरबुद्ध्या मणेस्तस्मान्निर्जग्मुः शस्त्रपाणयः ।
सरथाः सध्वजाः साश्वाः सवर्माः सासिचर्मिणः ।
सधनुष्काः सतूणीरा योधाः परमदुर्ज्जयाः ॥ ८०।८१ ।
निश्चेरुस्तं मणिम्भित्वा असङ्ख्यया महाबलाः ।
तत्र सज्जा महाशूरा दश पञ्च च सङ्ख्यया ॥ ८२ ।
नामभिस्तान्महाभागे कथयामि शृणुष्व तत् ॥
सुप्रभोदीप्रतेजाश्च सुरश्मिः शुभदर्शनः ।
सुकान्तिः† सुन्दरः सुन्दः प्रद्युम्नः सुमनाः शुभः ।
सुशीलः सुखदः शम्भुः सुदान्तः सोम एव च ।
एते पञ्चदश प्रोक्ता नायका उत्थिता मणेः ॥ ८३।८४ ।
ततो विरोचनं दृष्ट्वा बहुसैन्यपरिष्कृतम् ।
योधयामासुरव्यग्रा विविधायुधपाणयः ॥ ८५ ।
धनूंषि तेषां कनकप्रभाणि
शरान्सुजाम्बूनदपुंखनद्धान् ।
पतन्ति खङ्गानि विभीषणानि

---

* अवारोहत इति आर्षम्, अवारोहदिति साधु ।

† सुकीर्त्तिरिति (ख) ।

भुशुण्डिशूलाः परमप्रधानाः ॥ ८६ ।
रथो रथं सम्परिवार्य तस्थौ
गजोगजस्यापि हयो हयस्य ।
पदातिरत्युग्रपराक्रमश्च
पदातिमेव प्रससार चाग्रम् ॥ ८७ ।
द्वन्द्वान्यनेकानि तथैव युद्धे
द्रवन्ति शूराः* परिभर्त्सयन्तः ।
विभीषणं निर्गतसाधुमार्गं
बभूव रक्तप्रभवं सुघोरम् ॥ ८८ ।
तथा प्रवृत्ते तुमुले च युद्धे
हतः स राज्ञः सचिवो विसंज्ञः ।
सहानुगः सर्व्वबलैरुपेतो
जगाम वैवस्वतमन्दिराय ॥ ८९ ।
तस्मिन् हते दुर्ज्जयराजमन्त्रिणि
उपाययौ स्वेन बलेन राजा ।
स दुर्ज्जयः साश्वरथोऽतितीव्रः
प्रतापवांस्तैर्मणिजैर्युयोध ॥ ९० ।
ततस्तस्मिंस्तदा राज्ञो महत्कदनमाबभौ ॥ ९१ ।
ततो हेतप्रहेतभ्यां श्रुत्वा जामातरं रणे ।
युध्यमानं महाबाहुं ततश्चाययतुश्चमूम् ॥ ९२ ।

---

* शूद्रा इति (ख), परिभर्त्सयन्ति च इति (ग) ।

तस्मिन्बले ये दैतेयास्ताञ्छृणुष्व धरेरितान्* ।
प्रघसो विघसश्चैव सङ्घसोऽशनिसप्रभः† ।
विद्युत्प्रभः सुघोषश्च उन्मत्ताक्षो भयङ्करः ।
अग्निदत्तोऽग्नितेजाश्च वाहुः शक्रः प्रतर्द्दनः ।
विराधो भीमकर्म्मा च विप्रचित्तिस्तथैव च ।
एते पञ्चदश श्रेष्ठा असुराः परमायुधाः ॥ ९३।९४।९५ ।
अक्षौहिणीपरीवार एकैकोऽत्र पृथक् पृथक् ।
महामायास्तु समरे दुर्ज्जयस्य दुरात्मनः ।
युयुधुर्म्मणिजैः सार्द्धं महासैन्यपरिच्छदाः ॥ ९६ ।
तं सतेजास्त्रिभिर्वाणैर्विघसं समविध्यत‡ ।
सङ्घं सन्दशभिर्वाणैः सुरश्मिः प्रत्यविध्यत ॥ ९७ ।
अशनिप्रभं रणेऽविध्यत्पञ्चभिः शुभदर्शनः ।
विद्युत्प्रभं सुकान्तिस्तु सुघोषं सुन्दरस्तथा ॥ ९८ ।
उन्मत्ताक्षं तथाविध्यत्सुनन्दः पञ्चभिराशुगैः ।
चकर्त्त च धनुस्तस्य शितेन नतपर्वणा ॥ ९९ ।
सुमना अग्निदत्तन्तु सुवेदश्चाग्नितेजसम् ।
सुनलो वायुशक्रौ तु सुवेदस्तु प्रतर्द्दनम् ॥ १०० ।
परस्परं सुयुद्धेन योधयित्वास्त्रलाघवात् ।

---

* धरेरितानिति आर्षं, धरे ईरितानिति साधु ।

† सङ्घोऽशनिसमप्रभ इति (ग) ।

‡ समविध्यत इति आर्षं, समाविध्यदिति साधु । एवं परत्र प्रत्यविध्यत इत्यात्मनेपदमार्षम् ।

यथासंख्येन ते दैत्याः पुनर्मणिभवैर्हताः ॥ १०१ ।
यावत्स सङ्गरो घोरो महांस्तेषां व्यवर्द्धत ।
तावत्समित्कुशादीनि कृत्वा गौरमुखो मुनिः ।
आगतो महदाश्चर्यसंग्रामं भीमदर्शनम् ॥
बहुसैन्यपरीवारं स्थितं तत्रापि दुर्ज्जयम् ।
तं दृष्ट्वा स मुनिर्हारिं चिन्तापरम एव हि ॥ १०२।१०३ ।
उपविश्याधिगम्याथ मणिः कारणमेव ह ।
एवं कृत्वा मणिकृतं रौद्रं गाढ़ञ्च संयुगम् ।
चिन्तयामास देवेशं हरिङ्गौरमुखो मुनिः ॥ १०४ ।
स देवः पुरतस्तस्य पीतवासाः खगासनः ।
किमत्र ते मया कार्य्यमिति वाणीमुदीरयत्* ॥ १०५ ।
स ऋषिः प्राञ्जलिर्भूत्वा प्रोवाच पुरुषोत्तमम् ।
जहीमं दुर्ज्जयं पापं सैन्येन परिवारितम् ॥ १०६ ।
एवं मुक्तस्तदा तेन चक्रं ज्वलनसन्निभम् ।
तेन चक्रेण तत्सैन्यमसुरैर्दुर्जयं क्षणात् ॥
निमेषान्तरमात्रेण समग्रं भस्मसात्कृतम् ॥ १०७।१०८ ।
एवं कृत्वा ततो देवो मुनिं गौरमुखन्तदा ।
उवाच निमिषेणेदं निहतन्दानवङ्कुलम् ।
अरण्येऽस्मिंस्ततस्त्वेवं नैमिषारण्यसंज्ञितम् ।
भविष्यति यथार्थं वै ब्राह्मणानां निवेशनम् ॥ १०९।११० ।
अहञ्च यज्ञपुरुष एतस्मिन्वनगोचरे ।

---

* उदीरयदिति आर्षम्, उदैरयदिति साधु ।

नाम्ना याज्याः सदा चेमे दश पञ्च च नायकाः ॥ १११ ।
कृते युगे भविष्यन्ति राजानो मणिजा इमे ॥ ११२ ।
एवमुक्त्वा ततो देवो गतोऽन्तर्द्धानमीश्वरः ।
द्विजोऽपि स्वाश्रमं तस्थौ मुदा परमया युतः ॥ ११३ ।

इति वराहपुराणे प्रागितिहासे भगवच्छास्त्रे दुर्जयचरिते एकादशोऽध्यायः ।

द्वादशोऽध्यायः ।

वराह उवाच ।

ततस्तत्र रथाङ्गाग्नौ दग्धांश्कृत्वा नरोत्तमान् ।
महच्छोकपरीतात्मा चिन्तयामास पार्थिवः ॥ १ ।
तस्य चिन्तयतस्त्वेवन्तत्त्वबुद्धिरजायत* ।
चित्रकूटे गिरौ विष्णुः राघवस्य प्रकीर्त्यते† ॥ २ ।
ततोऽहं नामसंज्ञाभिर्हरिं स्तौमि जगत्पतिम् ।
इति सञ्चिन्त्य नृपतिर्जगाम गिरिमुत्तमम् ॥ ३ ।
चित्रकूटं महापुण्यं नृपः स्तोत्रमुदीरयत्‡ ॥ ४ ।

---

* तदा बुद्धिरजायत इति (ग) ।

† राघवः प्रतिकीर्त्यत इति (ग) ।

‡ मुदीरयदिति आर्षं, मुदैरयदिति साधु ।

दुर्ज्जय उवाच।

नमामि रामं नरनाथमच्युतं
कविं पुराणं त्रिदशाऽरिनाशनम्।
शिवस्वरूपं प्रभवं महेश्वरं
सदाप्रपन्नार्त्तिहरं धृतश्रियम्॥ ५॥
भवान् सदा देव समस्ततेजसां
करोषि तेजांसि समस्तरूपधृक्।
क्षितौ भवान् पञ्चगुणस्तथा जले
चतुःप्रकारस्त्रिविधोऽथ तेजसि॥ ६॥
द्विधाऽथ वायौ वियति प्रतिष्ठितो
भवान् हरिः शब्दचरः* पुमानसि।
भवाञ्छशी सूर्य्यहुताशनोऽसि
त्वयि प्रलीनं जगदेतदुच्यते॥ ७॥
भवत्प्रतिष्ठं रमते जगद्यतः
ततोऽसि† रामेति जगत्प्रतिष्ठितः।
भवार्णवे दुःखतरोर्म्मिसङ्कुले
तथाक्षमीनग्रहनक्रभीषणे॥
न मज्जति त्वत्स्मरणप्लवो नरः
स्मृतोऽसि रामेति तथा तपोवने।

---

* शब्दवर इति (ग)।

† स्मृतोऽसि रामेतीति (क), (ख)। रामेति आर्षं, राम इति साधु।

वेदेषु नष्टेषु भवांस्तथा हरे
करोषि मात्स्यं वपुरात्मनः सदा ॥ ८।९ ।
युगक्षये रञ्जितसर्व्वदिङ्मुखे
भवांस्तथाग्निर्बहुरूपधृग्विभो ।
कौर्म्मं तथा त्वं वपुरास्थितः सदा
युगे युगे माधव सिन्धुमन्थने ॥ १० ।
न चान्यदस्तीति भवत्समं क्वचि-
ज्जनार्द्दनाद्यप्रभूव चोत्तमम् ।
त्वया ततं विश्वमिदं महात्मन्
लोकाखिला* वेद दिशश्च सर्व्वाः ॥ ११ ।
कथं त्वमाद्यं† परमन्तु धाम
विहाय चान्यं शरणं व्रजामि ।
भवानेकः पूर्व्वमासीत्ततश्च
महानहं सलिलं वह्निरूपैः ॥
वायुस्तथा खञ्चमनोऽपि बुद्धि-
स्त्वत्तोगुणास्त्वप्रभवञ्च सर्व्वम्‡ ॥ १२ ।
त्वया ततं विश्वमिदं समस्तं
सनातनस्त्वं पुरुषो मतो मे§ ।

---

* लोकाखिला इति आर्षं, लोका अखिला इति साधु ।

† त्वमाद्यमिति आर्षं, त्वामाद्यमिति साधु छन्दोऽनुरोधाद्ध्रस्वः कृत. ।

‡ चेतोगुणास्त्वत्प्रभवञ्च सर्व्वमिति (ग)।

§ भगवद्गीता (११।१८) द्रष्टव्याम् ।

समस्तविश्वेश्वर विश्वमूर्त्ते
सहस्रबाहो जय देव देव
नमोऽस्तु रामाय महानुभाव ॥ १३ ।
इति स्तुतो देववरः प्रसन्नः
तदा तु राज्ञः सुप्रकतीस्य मूर्त्तिम्* ।
सन्दर्शयामास ततोऽभ्युवाच
वरं वृणीष्वेति च सुप्रतीक ॥ १४ ।
एवं श्रुत्वा वचनं तस्य राजा†
ससम्भ्रमं देववरं प्रणम्य ।
उवाच देवेश्वर मे प्रयच्छ
लयं यदास्ते परमं वपुस्ते ॥ १५ ।
इतीरिते राजवरः क्षणेन
लयं तथाऽगाद्सुरप्रमूर्त्तौ
ध्यानेन युक्तः पुरुषं गृणन्तं‡
स्थितस्तस्मिन्नात्मभूतो विमुक्तः
स भूमिपः कर्म्मकाण्डैरनेकैः ॥ १६ ।
वराह उवाच ।
इतीरितन्ते तु मया पुराणं
स्वयम्भुवे चादिकृतैकदेशम् ।

---

* एष पादोऽधिकाक्षरको वर्त्तते ।

† अत्र पादे छन्दोभङ्गः ।

‡ पुरुषं गृणन् गिरा इति (ख) ।

शक्यं न चास्यैर्बहुभिः सहस्रै-
रपीह केनापि सुखेन वक्तुम् ॥ १७ ।
उद्देशतः संस्मृतमात्रमेत-
न्मयाऽपि भद्रे कथितं पुराणम् ।
समुद्रतोयाल्परिमाणवर्षं
क्वचित्क्वचिद्दृत्तमघोह्यनर्घम् ॥ १८ ।
स्वयम्भुवा कथितं ब्रह्मणापि
नारायणेनापि कुतोभयेन ।
अशक्यमस्माभिरितीरितन्ते
न मूर्त्तमस्य स्मरणीयमाद्यम् ॥ १९ ।
समुद्रे बालुकासङ्ख्या विद्यते रजसः चितौ ।
न तु अस्य पुनः सङ्ख्या क्रीड़तः परमेष्ठिनः ॥ २० ।
एष नारायणस्यांशो मया प्रोक्तः शुचिस्मिते ।
कृते वृत्तान्त एषश्च किमन्यच्छ्रोतुमिच्छसि ॥ २१ ।

इति वराहपुराणे नारायणैश्वर्य्ये द्वादशोऽध्यायः ।

—०—

त्रयोदशोऽध्यायः ।

धरण्युवाच ।

एतन्मे महदाश्चर्य्यं दृष्ट्वा गौरमुखो मुनिः ।
ते चापि मणिजाः प्राप्ताः किं फलन्तु वरं गुरो* ॥ १ ।
कोऽसौ गौरमुखः श्रीमान्मुनिः परमधार्म्मिकः ।
किं चकार मुनेः कर्म्म दृष्ट्वासौ मुनिपुङ्गवः ॥ २ ।

वराह उवाच ।

निमिषेण कृतं कर्म्म† दृष्ट्वा भगवता मुनिः ।
आरिराधयिषुर्द्देवन्तमेव प्रययौ वनम् ॥ ३ ।
प्रभासं नाम सोमस्य तीर्थं परमदुर्लभम् ।
तत्र दैत्यान्तकृद्देवः प्रोच्यते तीर्थचिन्तकैः ॥ ४ ।
आराधयामास हरिन्दैत्यसूदनसंज्ञितम् ।
तस्याराधयतो देवं हरिन्नारायणं प्रभुम् ।
आजगाम महायोगी मार्कण्डेयो महामुनिः ॥ ५ ।
तं दृष्ट्वाभ्यागतन्दूरादर्घ्यपाद्येन सो‡ मुनिः ।
अर्चयामास तद्भक्त्या मुदा परमया युतः ॥ ६ ।
कौश्यां वृष्यां तदासीनं पप्रच्छेदं मुनिस्तदा ।
शाधि मां मुनिशार्द्दूल किं करोमि महाव्रत ॥ ७ ।

---

* वरं जगारिति (ग) ।

† निमेषेण कृतं तीर्थमिति (ग) ।

‡ सौ मुनिरिति आर्षं, स मुनिरिति साधु ।

एवमुक्तः स विप्रेन्द्रो मार्कण्डेयो महातपाः ।
उवाच श्लक्ष्णया वाचा मुनिर्गौरमुखन्तदा ॥ ८ ।

मार्कण्डेय उवाच ।

सर्व्वेषामेव देवानामाद्यो नारायणो गुरुः ।
तस्माद्ब्रह्मा समुत्पन्नः सोऽपि सप्ताऽसृजन्मुनीन् ॥ ९ ।
मां यजस्वेति तेनोक्तास्तदा ते परमेष्ठिना ।
आत्मनात्मानमेवाग्रे अयजन्त इति श्रुतिः ॥ १० ।
तेषां वै ब्रह्मजातानां महावैकारिकर्म्मणाम् ।
अशपद्व्यभिचारो हि महानेष कृतो यतः ।
प्रभ्रष्टज्ञानिनः सर्व्वे भविष्यन्ति न संशयः ॥ ११ ।
एवं शप्तास्ततस्ते वै ब्रह्मणात्मसमुद्भवाः ।
सद्यो वंशकरान्पुत्रानुत्पाद्य त्रिदिवं ययुः ॥ १२ ।
ततस्तेषु प्रयातेषु त्रिदिवं ब्रह्मवादिषु ।
तत्पुत्राः श्राद्धदानेन तर्पयामासुरञ्जसा ॥ १३ ।
ते च वैमानिकाः सर्व्वे ब्रह्मणः सप्त मानसाः ।
तत्पिण्डदानं मन्त्रोक्तं प्रपश्यन्तो व्यवस्थिताः ॥ १४ ।

गौरमुख उवाच ।

ये च ते पितरो ब्रह्मन्यं च कालं समासते ।
कियन्तो वै पितृगणास्तस्मिन् लोके व्यवस्थिताः* ॥ १५

---

* एतदर्द्धं (ग) पुस्तके नास्ति ।

मार्कण्डेय उवाच ।

प्रवर्त्तन्ते वराः केचिद्देवानां सोमवर्द्धनाः ।
ते मरीच्यादयः सप्त स्वर्गे ते पितरः स्मृताः ॥ १६ ।
चत्वारो मूर्त्तिमन्तो वै त्रयस्त्वन्ये ह्यमूर्त्तयः ।
तेषां लोकनिसर्गञ्च कीर्त्तयिष्यामि तच्छृणु ॥ १७ ।
लोकाः सन्तानका नाम यत्र तिष्ठन्ति भास्वराः ।
देवानां पितरस्ते हि तान्यजन्तीह देवताः ॥ १८ ।
एते वै लोकविभ्रष्टा लोकान् प्राप्य सनातनान् ।
पुनर्युगशतान्तेषु जायन्ते ब्रह्मवादिनः ॥ १९ ।
ते प्राप्य तां स्मृतिभूयः साङ्ख्ययोगमनुत्तमम् ।
चिन्त्य* योगगतिं शुद्धां पुनरावृत्तिदुर्लभाम् ॥ २० ।
एते स्म पितरः श्राद्धे योगिनां योगवर्द्धनाः ।
आप्यायितास्तु ते सर्व्वे योगियोगबलेन च† ॥ २१ ।
तस्माच्छ्राद्धानि देयानि योगिनां योगिसत्तम‡ ।
एष वै प्रथमः सर्गः सोमपानामनुत्तमः ॥ २२ ।
एते त एकतनवो वर्त्तन्ते द्विजसत्तमाः ।
भूर्लोकवासिनां याज्याः स्वर्गलोकनिवासिनः ॥ २३ ।
ब्रह्मपुत्रा मरीच्याद्यास्तेषां याज्या मरुद्गणाः ।
कल्पवासिकसंज्ञानां तेषामपि जनैर्वृताः ॥ २४ ।

---

* चिन्त्य इति आर्षं, विचिन्त्येति साधु ।

† आप्यायितास्तु ते पूर्व्वं योगियोगबले रताः इति (ग) ।

‡ योगसत्तम इति (ग) ।

Srauta Sútra of Ápastamba, (Sans.) Fasc I—XII @ /6/ each .. 4 8
Srauta Sútra of Ásvaláyana, (Sans.) Fasc. I—XI @ /6/ each .. 4 2
Ditto Látyáyana (Sans.) Fasc. I—IX @ /6/ each .. 3 6
Ditto Sánkhyáyana (Sans.) Fasc. I—III @ /6/ each .. 1 2
Sáma Veda Samhitá, (Sans.) Vols I, Fasc. 1—10 ; II, 1—6 ; III, 1—7 ; IV, 1—6 ; V, 1—8, @ /6/ each Fasc. 13 14
Sáhitya Darpana, (English) Fasc. I—IV @ /6/ each 1 8
Sánkhya Aphorisms of Kapila, (English) Fasc. I and II @ /6/ each 0 12
Súrya Siddhánta, (Sans.) Fasc. IV 0 6
Sarva Darśana Sangraha, (Sans.) Fasc. II 0 6
Sankara Vijaya, (Sans.) Fasc. II and III @ /6/ each 0 12
Sánkhya Pravachana Bháshya, (English preface only) Fasc. III .. 0 6
Sánkhya Sára, (Sans.) Fasc. I 0 6
Suśruta Samhitá, (Eng.) Fasc. I and II @ /12/ each 1 8
Taittiríya Áranya, (Sans.) Fasc. I—XI @ /6/ each 4 2
Ditto Bráhmana, (Sans.) Fasc. I—XXIV @ /6/ each 9 0
Ditto Samhitá, (Sans.) Fasc. I—XXXIII @ /6/ each .. 12 6
Ditto Prátiśákhya, (Sans.) Fasc I—III @/6/ each 1 2
Ditto and Aitareya Upanishads, (Sans.) Fasc. II and III @/6/ each 0 12
Tándya Bráhmana, (Sans.) Fasc. I—XIX @ /6/ each 7 2
Tattva Chintámani, (Sans.) Fasc. I—V @ /6/ each 1 14
Uttara Naishadha, (Sans.) Fasc. III—XII @ /6/ each 3 12
Uvás-agadasáo, Fasc. I & II @ /12/ each 1 8
Varáha Purána, (Sans.) Fasc. I 0 6
Váyu Purána, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—6, @ /6/ each Fasc. 4 8
Vishnu Smriti, (Sans.) Fasc. I—II @ /6/ each 0 12
Vivádaratnákara (Sans.) Fasc. I—V @ /6/ each 1 14
Vrihannáradíya Purána, (Sans.) Fasc. I—III @ /6/ each 1 2
Yoga Sútra of Patanjali, (Sans. & English) Fasc. I—V @ /14/ each 4 6
The same, bound in cloth 5 2

Arabic and Persian Series.

'Álamgírnámah, with Index, (Text) Fasc. I—XIII @ /6/ each .. 4 14
Áín-i-Akbarí, (Text) Fasc. I—XXII @ 1/ each 22 0
Ditto (English) Vol. I (Fasc. I—VII) 1/12 each 12 4
Akbarnámah, with Index, (Text) Fasc. I—XXXVI @ 1/ each .. 36 0
Bádsháhnámah, with Index, (Text) Fasc. I—XIX @ /6/ each .. 7 2
Beale's Oriental Biographical Dictionary, pp. 291, 4to., thick paper, @ 4/12 ; thin paper 4 8
Dictionary of Arabic Technical Terms and Appendix, Fasc. I—XXI @ 1/ each 21 0
[illegible] (Text), Fasc. I—XIV @ 1/ each 14 0
[illegible] Túsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each 3 0
Futúh-ul-Shám Wáqídí, (Text) Fasc. I—IX @ /6/ each .. 3 6
Ditto Azádí, (Text) Fasc. I—IV @ /6/ each 1 8
Haft Ásmán, History of the Persian Mansawi, (Text) Fasc. I .. 0 12
History of the Caliphs, (English) Fasc. I—VI @ /12/ each .. 4 8
Iqbálnámah-i Jahángírí, (Text) Fasc. I—III @ /6/ each .. 1 2
Isabáh, with Supplement, (Text) 42 Fasc. @ /12/ each 31 8
Maghází of Wáqidí, (Text) Fasc I—V @ /6/ each 1 14
Muntakhab-ul-Tawáríkh, (Text) Fasc. I—XV @ /6/ each .. 5 10
Muntakhab-ul Tawárikh, (English) Vol. II, Fasc. I—IV @/12/ each 3 0
Muntakhab-ul-Lubáb, (Text) Fasc. I—XIX @ /6/ each 7 2
Mu'ásir-'Álamgírí, (Text), Fasc. I—VI @ /6/ each 2 4
Nukhbat-ul-Fikr, (Text) Fasc. I .. .. 0 [illegible]
Nizámí's Khiradnámah-i-Iskandarí. (Text) Fasc. I and II @ /12/ each 1 [illegible]
Suyúty's Itqán, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. II—IV, VII—X @ 1/ each 7 0

(*Turn over*).

Tabaqát-i Násiri, (Text) Fasc. I—V @ /6/ each	1	14
Ditto (English) Fasc. I—XIV @ /12/ each	10	8
Táríkh-i-Fírúz Sháhi, (Text) Fasc. I—VII @ /6/ each	2	10
Táríkh-i-Baihaqí, (Text) Fasc I—IX @ /6/ each	3	6
Wís o Rámín, (Text) Fasc. I—V @ /6/ each	1	14
Zafarnámah, Fasc. I—VI @ /6/ each	2	4

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. VII, IX to XI; Vols XIII and XVII, and Vols XIX and XX @ /10/ each Rs. 80 0
   Ditto Index to Vols. I—XVIII 5 0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1865 (incl.)@/4/ per No.; and from 1870 to date @ /6/ per No
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1849 (12), 1850 (7), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non Subscribers; and for 1851 (7), 1857 (6), 1858 (5), 1861 (1) 1864 (5), 1865 (8), 1866 (7), 1867 (6), 1868 (6), 1869 (8) 1870 (8), 1871 (7) 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878, (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers.

N. B. The figures enclosed in brakets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784—1883.	3	0
General Cunningham's Archæological Survey Report for 1863-64 (Extra No J. A. S. B 1864)	1	8
Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868)	1	8
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No, J. A. S. B., 1875)	3	0
Sketch of the Turki Language as spoken in Eastern Turkestan, Part II, Vocabulary, by R B Shaw (Extra No., J. A. S. B. 1878)	3	0
A Grammar and Vocabulary of the Northern Balochí Language, by M. L. Dames (Extra No., J. A S B, 1880)	3	0
Introduction to the Maithilí Language of North Bihár, by G. A. Grierson, Part I, Grammar (Extra No, J. A. S. B, 1880) ..	1	8
Part II, Chrestomathy and Vocabulary (Extra No., J.A S.B.,1882)	3	0
5. Anis-ul-Musharrihi	3	0
6. Catalogue of Fossil Vertebrata	2	0
7 Catalogue of the Library of the Asiatic Society, Bengal ..	3	8
8. Examination and Analysis of the Mackenzie Manuscripts by the Rev. W. Taylor	2	0
9. Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis ..	1	8
10. Istiláhát-us-Súfiyah, edited by Dr. A Sprenger, 8vo. ..	1	0
11. Ináyah, a Commentary on the Hidáyah, Vols. II and IV, @16/ each	32	0
12. Jawámi-ul-'ilm ir-riyázi, 168 pages with 17 plates, 4to. Part I	2	0
13. Khizánat-ul-'ilm	4	0
14. Mahabhárata, Vols. III and IV, @ 20/ each	40	0
15. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—II, with 5 coloured Plates, 4to @ 6/ each ..	12	0
16. Purána Sangraha, I (Márkandeya Purána), Sanskrit ..	1	0
17. Sharaya-ool-Islám	4	0
18. Tibetan Dictionary	10	0
19. Ditto Grammar	8	0
20. Vuttodaya, edited by Lt.-Col. G E. Fryer	2	0
Notices of Sanskrit Manuscripts, Fasc. I—XXI @ 1/ each ..	21	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ..	5	0

N. B. All cheques, Money Orders &c. must be made payable to the "Treasury Asiatic Society" only.

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 631.

वराहपुराणम्।

THE VARÁHA PURÁṆA

EDITED BY

PAṆḌIT HṚISHÍKES'A S'ÁSTRÍ

Professor, Sanskrit College, Calcutta.

FASCICULUS II.

CALCUTTA:

PRINTED BY S'ASIBHÚSHAṆA BHAṬṬÁCHÁRYYA, AT THE GIRIS'A-VIDYÁRATNA PRESS,

24, GIRIS'A-VIDYÁRATNA'S LANE, UPPER CIRCULAR ROAD.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1887.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL

No. 57, PARK STREET, CALCUTTA.

AND OBTAINABLE FROM

THE SOCIETY'S LONDON AGENTS, MESSRS.

TRÜBNER & CO.

57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

Sanskrit Series.

Title	Rs.	
Átharvaṇa Upanishads, (Sanskrit) Fasc. I—V @ /6/ each ..	1	14
Áśvaláyana Gṛihya Sútra, (Sans.) Fasc. II—IV @ /6/ each ..	1	2
Agni Puráṇa, (Sans.) Fasc. I—XIV @ /6/ each	5	4
Aitareya Áraṇyaka of the Rig Veda (Sans.) Fasc. I—V @ /6/ each	1	14
Aphorisms of Śáṇḍilya, (English) Fasc. I	0	6
Aphorisms of the Vedánta, (Sans.) Fasc. III, V—XIII @ /6/ each ..	3	12
Ashṭasáhasriká Prajnápáramitá, Fasc. I—III @ /6/ each	1	2
Aśvavaidyaka, (Sans.) Fasc. I—III @ /6/ each	1	2
Brahma Sútras, (English) Fasc. I	0	12
Bhámatí, (Sans.) Fasc. I—VIII @ /6/ each	3	0
Bṛihad Áraṇyaka Upanishad, (Sans.) Fasc. VI, VII & IX @ /6/ each	1	2
Ditto (English) Fasc. II—III @ /6/ each	0	12
P[illegible] Fasc. II—III, V—VII @ /6/ each ..	1	14
[illegible] Náṭaka, (Sans.) Fasc. II—III @ /6/ each	0	12
Chaturvarga Chintámaṇi, (Sans.) Vols. I, Fasc. 1—11 ; II, I—25 ; III, 1—XVII @ /6/ each Fasc.	19	14
Chhándogya Upanishad, (English) Fasc. II	0	6
Daśa Rúpa, (Sans.) Fasc. II—III @ /6/ each	0	12
Gopatha Bráhmaṇa (Sans. & Eng.) Fasc. I and II @ /6/ each ..	0	12
Gobhilíya Gṛihya Sútra, (Sans.) Fasc. I—XII @ /6/ each ..	4	8
Hindú Astronomy, (English) Fasc. I—III @ /6/ each ..	1	2
Institutes of Paráśara	0	6
Kátantra, (Sans.) Fasc. I—VI @ /12/ each	4	8
Kathá Sarit Ságara, (English) Fasc. I—XIV @ /12/ each	10	2
Kála Mádhava, (Sans.) Fasc. I—III, @ /6/ each	1	2
Kauśítaki Bráhmaṇopanishads, Fasc. II	0	6
Kúrma Puráṇa, (Sans.) Fasc. I—IV @ /6/ each	1	8
Lalita Vistara, (Sans.) Fasc. II—VI @ /6/ each	1	14
Ditto (English) Fasc. I—III @ /12/ each	2	4
Manutíká Sangraha, Fasc. I—II @ /6/ each	0	12
Mímáṃsá Darśana, (Sans.) Fasc. II—XIX @ /6/ each	6	12
Márkaṇḍeya Puráṇa, (Sans.) Fasc. IV—VII @ /6/ each	1	8
Nyáyavártikam, Fasc. I	0	6
Nrisiṃha Tápaní, (Sans.) Fasc. I—III @ /6/ each	1	2
Nirukta, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—6 ; Vol. III, Fasc. I—6 ; Vol. IV, I—IV @ /6/ each	8	4
Nárada Pancharátra, (Sans.) Fasc. IV @ /6/ each	0	6
Nárada Smṛiti (Sans.) Fasc. I & II	0	12
Nyáya Darśana, (Sans.) Fasc. III @ /6/ each	0	6
Nítisára, or, The Elements of Polity, By Kámandaki (Sans.) Fasc. II—V	1	8
Pariśishṭaparvan, (Sans.) Fasc. I—IV @ /6/ each	1	8
Pingala Chhandaḥ Sútra, (Sans.) Fasc. II—III @ /6/ each ..	0	12
Prithiráj Rásau, (Hindí) Fasc. I—VI @ /6/ each	2	4
Ditto (English) Fasc. I	0	12
Páli Grammar, (English) Fasc. I and II @ /6/ each	0	12
Prákṛita Lakshaṇam, (Sans.) Fasc. I	1	8

(Continued on the third page of cover.)

सनकाद्यास्ततस्तेषां वैराजा तपसि स्थिताः ।
तेषां सप्त गणाः प्रोक्ता इत्येषा पितृसन्ततिः ॥ २५ ।
तेऽपि याज्याः पृथग्वर्णैर्न शूद्रेभ्यः पृथक्कृताः ।
वर्णत्रयाभ्यनुज्ञातः शूद्रः सर्वान्पितॄन्यजेत् ॥ २६ ।
ते तु तस्य पृथक् सन्ति पितरः शूद्रजातयः ।
मुक्ताश्चेतनका ब्रह्मन्न दृश्यन्ते पितृष्वपि ॥ २७ ।
विशेषशास्त्रदृष्ट्या तु पुराणानाञ्च दर्शनात् ।
एवं ऋषिस्तुतैः शास्त्रैर्ज्ञात्वा याज्यान् स्वसम्भवान् ।
स्वयं सृष्ट्यां स्मृतिर्लब्धा पुत्राणां ब्रह्मणा ततः ।
परं निर्वाणमापन्नास्तेऽपि ज्ञानेन एव च ॥ २८।२९ ।
वस्वादीनां कश्यपाद्या वर्णानां वसवादयः ।
अविशेषेण विज्ञेया गन्धर्वाद्या अपि ध्रुवम् ॥ ३० ।
एष ते पैतृकः सर्ग उद्देशेन महामुने ।
कथितो नान्त एवास्य वर्षकोट्या हि दृश्यते ॥ ३१ ।
श्राद्धस्य कालान्वक्ष्यामि तान्शृणुष्व द्विजोत्तम ॥ ३२ ।
श्राद्धार्हमागतन्द्रव्यं विशिष्टमथवा द्विजम् ।
श्राद्धं कुर्व्वीत विज्ञाय व्यतिपातेऽयने तथा ।
विषुवे चैव संप्राप्ते ग्रहणे शशिसूर्य्ययोः ।
समस्तेष्वेव विप्रेन्द्र राशिष्वर्केऽतिगच्छति* ॥ ३३।३४ ।
नक्षत्रग्रहपीड़ासु दुष्टस्वप्नावलोकने ।
इच्छाश्राद्धानि कुर्व्वीत नवशस्यागमे तथा ॥ ३५ ।

---

* अभिगच्छतीति (ग) ।

अमावस्या यदा आर्द्रा*विशाखास्वातियोगिनी ।
श्राद्धैः पितृगणस्तृप्तिं तदाप्नोत्यष्टवार्षिकीं ॥ ३६ ।
अमावस्या यदा पुष्ये रौद्रेऽर्क्षे च पुनर्वसौ ।
द्वादशाब्दं तथा तृप्तिं प्रयान्ति पितरोऽर्च्चिताः ॥ ३७ ।
वासवाजैकपादर्क्षे पितॄणां तृप्तिमिच्छताम् ।
वारुणे चाप्यमावास्या देवानामपि दुर्लभा ॥ ३८ ।
नवस्वर्क्षेष्वमावास्या यदा तेषु द्विजोत्तम ।
तदा श्राद्धानि देयानि अक्षय्यफलमिच्छताम् ।
अपि कोटिसहस्रेण पुण्यस्यान्तो न विद्यते ॥ ३९ ।

अथापरम्पितरः श्राद्धकालं
रहस्यमस्मात्प्रवदन्ति पुण्यम् ।
वैशाखमासस्य तु या तृतीया
नवम्यसौ कार्त्तिकशुक्लपक्षे ॥
नभस्यमासस्य तमिस्रपक्षे
त्रयोदशी पञ्चदशी च माघे ।
उपप्लवे चन्द्रमसो रवेश्च
चतसृष्वप्यष्टकास्वयनद्वये च ॥ ४०।४१ ।
पानीयमप्यत्र तिलैर्विमिश्रं
दद्यात्पितृभ्यः प्रयतो मनुष्यः ।
श्राद्धं कृतं तेन समासहस्रं
रहस्यमेतत्पितरो वदन्ति ॥ ४२ ।

* यदा मैत्र इति क्वचित्पाठः ।

माघासिते पञ्चदशी कदाचि-
दुपैति योगं यदि वारुणेन।
ऋक्षेण कालः परमः पितॄणां
न ह्यल्पपुण्यैर्द्विज लभ्यतेऽसौ॥ ४३।
काले धनिष्ठा यदि नाम तस्मिन्
लभ्येत विप्रेन्द्र यदा पितृभ्यः।
दत्तं जलान्नं प्रददाति तृप्तिं
वर्षायुतं तत्कुलजैर्मनुष्यैः॥ ४४।
तत्रैव चेद्भाद्रपदा तु पूर्व्वा
काले तदा यैः क्रियते पितृभ्यः।
श्राद्धं परान्तृप्तिमुपैत्यनेन
युगं समग्रं पितरः स्वपन्ति॥ ४५।
गङ्गां शतद्रुमथवा विपाशां
सरस्वतीं नैमिषगोमतीं वा।
ततो गवाद्यार्च्चनमादरेण
कृत्वा पितॄणामहितानि हन्ति॥ ४६।
गायन्ति चैतत्पितरः कदा तु
त्रयोदशीयुक्तमघासु भूयः।
वर्षासितान्ते शुभतीर्थतोयै-
र्यास्याम* तृप्तिं तनयादिदत्तैः॥ ४७।
चित्तञ्च वित्तञ्च नृणां विशुद्धं

---

* यास्याम तृप्तिमिति आर्षं, यास्यामस्तृप्तिमिति साधु।

अस्तश्च कालः कथितो विधिश्च* ।
पात्रं यथोक्तं परमा च भक्ति-
नृणां प्रयच्छन्त्यभिवाञ्छितानि ॥ ४८ ।
पितृगीतांस्तथैवात्र श्लोकांस्ताञ्छृणु सत्तम ।
श्रुत्वा तथैव भवता भाव्यन्तत्र विधात्मना ॥ ४९ ।
अपि धन्यः कुले जायादस्माकं मतिमान्नरः ।
अकुर्व्वन्वित्तशाठ्यं यः पिण्डान्नो निर्व्वपिष्यति ॥ ५० ।
रत्नवस्त्रमहायानं सर्व्वन्तोयादिकं वसु† ।
विभवे सति‡ विप्रेभ्यः अस्मानुद्दिश्य दास्यति ॥ ५१ ।
अन्नेन वा§ यथाशक्त्या कालेऽस्मिन् भक्तिनम्रधीः ।
भोजयिष्यति विप्राग्र्यांस्तन्मात्रविभवो नरः ॥ ५२ ।
असमर्थोऽन्नदानस्य वन्यशाकं स्वशक्तितः ।
प्रदास्यति द्विजाग्रेभ्यः स्वल्पां यो वापि दक्षिणाम् ॥ ५३
तत्राप्यसामर्थ्ययुतः करैर्गृह्याग¶सितांस्तिलान् ।
प्रणम्य द्विजमुख्याय कस्मैचिदपि दास्यति ॥ ५४ ।
तिलैः सप्ताष्टभिर्वापि समवेतज्जलाञ्जलिम् ।
भक्तिनम्रः समुद्दिश्य योऽस्माकं सम्प्रदास्यति ॥ ५५ ।

---

* विधाश्चेति (ग) ।

† सर्व्वतोयादिकमिति (ग) ।

‡ स तु इति (ग) ।

§ चेति (ग) ।

¶ गृह्येति आर्षं, गृहीत्वेति साधु ।

यतः कुतश्चित्सम्प्राप्य गोभ्यो वापि गवाह्निकम् ।
अभावे प्रीणयेत्तस्माद्भक्त्या युक्तः प्रदास्यति ॥ ५६ ।
सर्व्वाभावे वनं गत्वा कक्षमूलप्रदर्शकः ।
सूर्य्यादिलोकपालानामिदमुच्चैः पठिष्यति ॥ ५७ ।

न मेऽस्ति वित्तं न धनं न चान्य-*
च्छ्राद्धस्य योग्यं स्वपितॄन्नतोऽस्मि ।
तृप्यन्तु भक्त्या पितरो मयैतौ
भुजौ ततौ वर्त्मनि मारुतस्य ॥ ५८ ।

इत्येव पितृभिर्गीतं भावाभावप्रयोजनम् ।
कृतन्तेन भवेच्छ्राद्धं य एवं कुरुते द्विजः ॥ ५९ ।

इति वराहपुराणे श्राद्धकल्पे त्रयोदशोऽध्यायः ।

चतुर्द्दशोऽध्यायः ।

मार्कण्डेय उवाच ।

एतन्मे कथितं पूर्व्वं ब्रह्मपुत्रेण धीमता ।
सनकानुजेन विप्रर्षे ब्रह्मणा शृणु साम्प्रतम् ॥ १ ।
त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः षड़ङ्गवित् ।
ऋत्विजं भागिनेयञ्च दौहित्रं श्वशुरन्तथा ।

---

* न चास्तीति (ग) ।

जामातरं मातुलञ्च तपोनिष्ठञ्च ब्राह्मणम् ।
पञ्चाग्न्यभिरतञ्चैव शिष्यं सम्बन्धिनन्तथा ।
मातृपितृरतञ्चैव एताञ्छ्राद्धे नियोजयेत् ॥ २।३ ।
मित्रध्रुक्कुनखी चैव श्यावदन्तस्तथा द्विजः ।
कन्यादूषयिता वह्निवेदोज्झः* सोमविक्रयी ।
अभिशस्तस्तथा स्तेनः पिशुनो ग्रामयाजकः ।
भृतकाध्यापकश्चैव भृतकाध्यापकश्च यः ।
परपूर्व्वापतिश्चैव मातापित्रोस्तथोज्झकः ।
वृषलीसूतिपोष्यश्च वृषलीपतिरेव च ।
तथा देवलकश्चैव श्राद्धे नार्हन्ति केतनम् ॥ ४—६ ।
प्रथमे ह्नि बुधः कुर्य्याद्विप्राग्र्याणां निमन्त्रणम् ।
अनिमन्त्र्य द्विजान्पश्चादागतान्भोजयेद्यतीन् ॥ ७ ।
पादशौचादिना गेहमागतान्भोजयेद्द्विजान् ।
पवित्रपाणिराचान्तानासनेषूपवेशयेत् ॥ ८ ।
पितॄणामयुजोयुग्मान्देवानामपि योजयेत् ।
देवानामेकमपि वा† पितॄणाञ्च निवेदयेत् ॥ ९ ।
तथा मातामहश्राद्धं वैश्वदेवसमन्वितम् ।
कुर्व्वीत भक्तिसम्पन्नस्तन्त्रं वा वैश्वदेविकम्‡ ॥ १० ।
प्राङ्मुखं भोजयेद्विप्रं देवानामुभयात्मकम् ।

---

* चैव वह्निद इति (ग) ।

† देवानामेकमेकं वेति (ख), (ग) ।

‡ एतदर्द्धं (ग) पुस्तके नास्ति ।

पितृपैतामहानाञ्च भोजयेच्चाप्युदङ्मुखान् ॥ ११ ।
पृथक् तयोः* केचिदाहुः श्राद्धस्य करणं द्विजः ।
एकत्रैकेन पात्रेण वदन्त्यन्ये महर्षयः ॥ १२ ।
विष्टरार्थं कुशान्दत्त्वा सम्पूज्यार्घविधानतः ।
कुर्य्यादावाहनं प्राज्ञो देवानां तदनुज्ञया ॥ १३ ।
यवाम्बुना च देवानां दद्यादर्घं विधानवित्† ।
सुगन्धधूपदीपांश्च दत्त्वा तेभ्यो यथाविधि ॥ १४ ।
पितॄणामपसव्येन सर्व्वमेवोपकल्पयेत् ।
अनुज्ञाञ्च ततः प्राप्य दत्त्वा दर्भान्द्विधाकृतान् ॥ १५ ।
मन्त्रपूर्व्वं पितॄणान्तु कुर्य्यादावाहनम्बुधः ।
तिलाम्बुना चापसव्यं दद्यादर्घादिकं बुधः ॥ १६ ।
काले तत्रातिथिं प्राप्तमन्नकामं द्विजाध्वगम् ।
ब्राह्मणैरभ्यनुज्ञातः कामं तमपि पूजयेत् ॥ १७ ।
योगिनो विविधैरूपैर्नराणामुपकारिणः ।
भ्रमन्ति पृथिवीमेतामविज्ञातस्वरूपिणः ॥ १८ ।
तस्मादभ्यर्च्चयेत्प्राप्तं श्राद्धकालेऽतिथिं बुधः ।
श्राद्धक्रियाफलं हन्ति द्विजेन्द्रापूजितोऽतिथिः ॥ १९ ।
जुहुयाद्व्यञ्जनक्षारैर्वर्जमन्नन्ततोऽनले ।
अनुज्ञातो द्विजैस्तैस्तु त्रिः कृत्वा पुरुषर्षभ ॥ २० ।

---

* पृथक्कथयेति (ग) ।

† तिलाम्बुना चापसव्यं दद्यादर्घादिकं बुधः इति (ग) ; तत्र १४श श्लोकस्य पूर्व्वार्द्धं, १५श श्लोकः, १६श श्लोकस्य पूर्व्वार्द्धञ्च न सन्ति ।

अग्नये काव्यवाहनाय स्वाहेति प्रथमाहुतिः ।
सोमाय वै पितृमते दातव्या तदनन्तरम् ॥ २१ ।
वैवस्वताय चैवान्या तृतीया दीयते हुतिः ।
हुतावशिष्टमल्पाल्पं विप्रपात्रेषु निर्व्वपेत् ॥ २२ ।
ततोऽन्नं मृष्टमत्यर्थमभीष्टमभिसंस्कृतम् ।
दत्त्वा जुषस्वमिच्छातो वाच्यमेतदनिष्ठुरम् ॥ २३ ।
भोक्तव्यं तैश्च तद्विप्रै*र्मौनिभिः सुमुखैः स्थिरम् ।
अक्रुध्यताप्यनवता देयन्तेनापि भक्तितः ॥ २४ ।
रक्षोघ्नमन्त्रपठनं भूमेरास्तरणन्तिलैः ।
कृत्वाज्यपाश्च पितरस्त एव द्विजसत्तमाः ॥ २५ ।
पिता पितामहश्चैव तथैव प्रपितामहाः ।
मम तृप्तिं प्रयान्त्वद्य होमाप्यायितमूर्त्तयः† ॥ २६ ।
पिता पितामहश्चैव तथैव प्रपितामहाः ।
मम तृप्तिं प्रयान्त्वद्य विप्रदेहेषु संस्थिताः ॥ २७ ।
पिता पितामहश्चैव तथैव प्रपितामहाः ।
तृप्तिम्प्रयान्तु पिण्डेषु मया दत्तेषु भूतले ॥ २८ ।
पिता पितामहश्चैव तथैव प्रपितामहाः ।
तृप्तिम्प्रयान्तु मे भक्त्या यन्मयैतदुदाहृतम् ॥ २९ ।
मातामहस्तृप्तिमुपैतु तस्य
तथा पिता तृप्तिमुपैतु योऽन्यः ।

---

* तच्चित्तैरिति (ग) ।

† होमाप्यायितमूर्त्तय इति (ग) ।

विश्वेऽथ देवाः परमाप्नयान्तु
तृप्तिम्प्रणश्यन्तु च यातुधानाः ॥ ३० ।
यज्ञेश्वरो यज्ञसमस्तनेता
भोक्ता व्ययात्मा हरिरीश्वरोऽत्र ।
तत्सन्निधानादपयान्तु सद्यो
रक्षांस्यशेषाण्यसुराश्च सर्व्वे ॥ ३१ ।
तृप्तेष्वेतेषु विप्रेषु किरेदन्नं महीतले ।
दद्यादाचमनार्थाय तेभ्यो वारि सकृत्सकृत् ॥ ३२ ।
सुतृप्तैस्तैरनुज्ञातः सर्व्वेणान्नेन भूतले ।
सलिलेन ततः पिण्डान् सम्यग्गृह्य* समासतः ॥ ३३ ।
पितृतीर्थेन सलिलं तथैव सलिलाञ्जलिम् ।
मातामहेभ्यस्तेनैव पिण्डांस्तीर्थेषु निर्व्वपेत् ॥ ३४ ।
दक्षिणाग्रेषु दर्भेषु पुष्पधूपादिपूजितम् ।
स्वपित्रे प्रथमं पिण्डं दद्यादुच्छिष्टसन्निधौ ॥ ३५ ।
पितामहाय चैवान्यं तत्पित्रे च तथापरम् ।
दर्भमूले लेपभुजां लेपयेल्लेपघर्षणात् ॥ ३६ ।
पिण्डैर्मातामहांस्तद्वद्गन्धमाल्यादिसंयुतैः ।
पूजयित्वा द्विजाग्र्याणां दद्यादाचमनं बुधः ॥ ३७ ।
पितृभ्यः प्रथमं भक्त्या तन्मनस्को द्विजेश्वरः ।
स्वस्त्यादि वाचयित्वा तु दद्याच्छक्त्या च दक्षिणाम् ॥ ३८ ।
दत्त्वा च दक्षिणां तेभ्यो वाचयेद्वैश्वदेविकम् ।

* गृह्येति आर्षं, गृहीत्वेति साधु। एवं परत्रापि।

प्रीयन्तामिति ये विश्वेदेवास्ते स इतीरयेत् ॥ ३९ ।
तथेति चोक्ते तैर्विप्रैः प्रार्थनीयास्तथाशिषः ।
तथा विसर्ज्जयेद्देवान् पूर्व्वं पैत्र्यान्महामते ॥ ४० ।
मातामहानामप्येवं सह देवैः क्रमात्स्थितैः ।
भोजने च स्वशक्त्या च दाने तद्वद्विसर्ज्जने ।
आपादशौचनात्पूर्व्वं कुर्य्यादेवं द्विजन्मसु ॥ ४१ ।
ज्ञानिनं प्रथमं विप्रं त्रिषु मातामहादिषु ।
तथा विसर्ज्जयेत्प्राज्ञः सम्मान्याभ्यर्थिनस्ततः ॥ ४२ ।
निवर्त्तेताभ्यनुज्ञात आद्वारान्तमनुव्रजेत् ।
ततस्तु वैश्वदेवाख्यं कुर्य्यान्नित्यक्रियान्ततः ॥ ४३ ।
भुञ्जीयाच्च समं पूज्यभृत्यबन्धुभिरात्मना ॥ ४४ ।
एवं श्राद्धं बुधः कुर्य्यात्पित्र्यं मातामहन्तथा ।
श्राद्धैराप्यायिता दद्युः सर्व्वान् कामान्पितामहाः ॥ ४५
त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ।
रजतस्य तथा दानं तथा सन्दर्शनादिकम् ॥ ४६ ।
वर्ज्यन्तु कुर्वता श्राद्धं क्रोधोऽध्वगमनन्त्वरा ।
भोक्तुं रज्यति* विप्रेन्द्रे त्रयमेतन्न संशयः ॥ ४७ ।
विश्वेदेवाः सपितरस्तथा मातामहा द्विज ।
कुलञ्चाप्यायतं पुंसा सर्वं श्राद्धं प्रकुर्वता ॥ ४८ ।
सोमाधारः पितृगणो योगाधारस्तु चन्द्रमाः ।
श्राद्धं योगनियुक्तान्तु तस्माद्विप्रेन्द्र शस्यते ॥ ४९ ।

* अप्यनेति (ग) ।

सहस्रस्यापि विप्राणां योगी चेत्पुरतः स्थितः ।
सर्व्वान् भोक्तॄंस्तारयति यजमानन्तथा द्विज ॥ ५० ।
इयं सर्वपुराणेषु सामान्या पैतृकी क्रिया ।
एतत्क्रमात्कर्मकाण्डं ज्ञात्वा मुच्येत बन्धनात् ॥ ५१ ।
एतदाश्रित्य निर्व्वाणमृषयः शंसितव्रताः ।
प्राप्ता गौरमुखादाशु* त्वमप्येवंपरोभव ॥ ५२ ।
इति ते कथितं भक्त्या पृच्छतो द्विजसत्तम ।
पितॄन्यष्ट्वा हरिं ध्यायेद्यस्तस्य किमतः परम् ॥ ५३ ।
न† तस्मात्परतः पित्र्यं तत्त्वमस्तीति निश्चयः ॥ ५४ ।

इति वराहपुराणे श्राद्धकल्पः समाप्तः ।

पञ्चदशोऽध्यायः ।

धरण्युवाच ।

एवं श्राद्धविधिं श्रुत्वा मार्कण्डेयान्महामुनिः ।
तदा गौरमुखो देवः किमूर्द्ध्वं कृतवानसौ ॥ १ ।

वराह उवाच ।

एतच्छ्रुत्वा तदा धात्रि पितृतत्त्वं महामुनिः ।

---

* गौरमुखादीरितिति (क), (ख) ।

† नैतस्मादिति (ग) ।

तत्स्मारितो जन्मशतं* मार्कण्डेयेन धीमता ॥ २ ।

धरण्युवाच ।

भवन् गौरमुखः कोऽसावन्यजन्मनि कः स्मृतः ।
कथञ्च† स्मृतवान् स्मृत्वा किं चकार च सत्तमः ॥ ३ ।

वराह उवाच ।

भृगुरासीत्स्वयं साक्षादन्यस्मिन् ब्रह्मजन्मनि ।
तदन्वयात्मजस्त्वेष मार्कण्डेयो महामुनिः ॥ ४ ।
पुत्रैस्तु बोधिता यूयं सुगतिम्प्राप्स्यथेति यत् ।
प्रागुक्तं ब्रह्मणा तेन मार्कण्डेयेन बोधितः ॥ ५ ।
सस्मार‡ सर्वजन्मानि स्मृत्वा चैव तु यत्कृतम् ।
तच्छृणुष्व वरारोहे कथयामि समासतः ॥ ६ ।
एवं श्राद्धविधानेन द्वादशाब्दं ततः पितॄन् ।
इष्ट्वा पश्चाद्धरेः§ स्तोत्रं स मुनिस्तूपचक्रमे ॥ ७ ।
प्रभासं नाम यत्तीर्थं त्रिषु लोकेषु विश्रुतम् ।
तत्र दैत्यान्तकन्देवं स्तोतुङ्गौरमुखः स्थितः ॥ ८ ।

गौरमुख उवाच ।

स्तोष्ये महेन्द्रं रिपुदर्पहं शिवं

---

* स्मारितं जन्मशतकमिति (ग) ।

† कथं वेति (ग) ।

‡ संस्मरन्निति (क), (ख) ।

§ वरारोहे इति (ग) ।

नारायणं ब्रह्मविदां वरिष्ठम्।
आदित्यचन्द्राग्नियुगस्थमाद्यं*
पुरातनं दैत्यहरं सदा हरिम्॥ ९।
चकार मात्स्यं वपुरात्मनो यः
पुरातनं वेदविनाशकाले।
महामहीभृद्वपुरग्रपुच्छ-
च्छटाहताब्धिः सुरशत्रुहाद्यः॥ १०।
तथाब्धिमन्थानकृते गिरीन्द्रं
दधार यः कौर्म्मवपुः पुराणम्।
हितेच्छयाप्तः पुरुषः पुराणः
प्रपातु मां दैत्यहरः सुरेशः॥ ११।
महावराहः सततं पृथिव्या-
स्तलात्तलम्प्राविशद्यो महात्मा।
यज्ञाङ्गसंज्ञः सुरसिद्धसङ्घैः
स पातु मां दैत्यहरः पुराणः॥ १२।
नृसिंहरूपी च बभूव योऽसौ
युगे युगे योगिवरोग्रभीमः।
करालवक्त्रः कनकाग्रवर्चा-
वराशयोऽस्मानसुरान्तकोऽव्यात्॥ १३।
बलेर्मखध्वंसकृदप्रमेयो
योगात्मको योगवपुःस्वरूपः।

* आदित्यचन्द्राग्नियुगस्थमिति (ख)।

स दण्डकाष्ठाजिनलक्षणः पुनः
क्षितिं योऽसौ क्रान्तवान्नः* पुनातु ॥ १४ ।
त्रिःसप्तकृत्वो जगतीं जिगाय
कृत्वा ददौ काश्यपाय प्रचण्डः ।
स जामदग्न्योऽभिजनस्य गोप्ता
हिरण्यगर्भोऽसुरहा प्रपातु ॥ १५ ।
चतुःप्रकारञ्च वपुर्य आद्यं
हैरण्यगर्भप्रतिमानलक्ष्यम् ।
रामादिरूपैर्बहुरूपभेद-
ञ्चकार सोऽस्मानसुरान्तकोऽव्यात् ॥ १६ ।
चाणूरकंसासुरदर्पभीति-
भीतामराणामभयाय देवः ।
युगे युगे वासुदेवो बभूव
कल्पे भवत्यद्भुतरूपकारी† ॥ १७ ।
युगे युगे कल्किनाम्ना महात्मा
वर्णस्थितिं कर्त्तुमनेकरूपः ।
सनातनो ब्रह्ममयः पुरातनो
न यस्य रूपं सुरसिद्धदैत्याः ।
पश्यन्ति विज्ञानगतिं विहाय
अतो यमेनापि समर्च्चयन्ति ।

---

* क्रान्तवपुरिति (क), क्षितिं य आक्रान्तवपुरिति (ख) ।

† भवदद्भुतरूपकारीति (ख) ।

मत्स्यादिरूपाणि चराणि सोऽव्यात् ॥ १८।१९ ।
नमो नमस्ते पुरुषोत्तमाय
पुनश्च भूयोऽपि नमो नमस्ते ।
नयस्व मां मुक्तिपदं नमस्ते ॥ २० ।
एवं नमस्यतस्तस्य महर्षेर्भावितात्मनः ।
प्रत्यक्षतामगतो देवः स्वयञ्चक्रगदाधरः ॥ २१ ।
तन्दृष्ट्वा तस्य विज्ञानं निस्तरङ्गं स्वदेहतः ।
उत्तस्थौ सोऽपि तं लब्ध्वा तस्मिन् ब्रह्मणि शाश्वते ।
लयं जगाम देवात्मन्यपुनर्भवसंज्ञिते ॥ २२ ।

इति वराहपुराणे आदिकृतवृत्तान्ते पञ्चदशोऽध्यायः ।

षोड़शोऽध्यायः ।

धरण्युवाच ।

तदा दुर्वाससा शप्तो देवराजः शतक्रतुः ।
वसिष्यसि त्वं मर्त्त्येषु सुप्रतीकसुतेन तु ॥
उत्सादितो दिवो मूढ़ेत्येवमुक्तस्तु भूधरः ।
इन्द्रो मर्त्त्यमुपागम्य सर्वदेवसमन्वितः ॥
किञ्चकार च तस्मिंस्तु दुर्ज्जये च निपातिते ।
परमेष्ठिना भगवता तेन योगविदुत्तमौ ॥

स्वर्गे विद्युत्सुविद्युच्च तौ च किञ्चक्रतुस्तदा ।
एतन्मे संशयं देव कथयस्व प्रसादतः ॥ १।२।३।४ ।

वराह उवाच ।

दुर्ज्जयेन जितो धात्रि देवराजः शतक्रतुः ।
भारते हि तदा वर्षे वाराणस्यान्तु पूर्व्वतः ।
आश्रित्य संस्थितो देवैः सह यक्षमहोरगैः ॥ ५ ।
विद्युत्सुविद्युच्च तदा योगमास्थाय शोभने ।
दीर्घतापज्वरं वायुकर्म्मयोगेन संश्रितौ ।
लोकपालायतं कृत्स्नं चक्रतुर्योगमायया ॥ ६ ।
तं दुर्जयं श्रुतं श्रुत्वा समुद्रान्तं स्थितं सदा ।
आनीय चतुरङ्गन्तु देवान् प्रति विजग्मतुः ॥ ७ ।
आगत्य तौ तदा दैत्यौ महत्सैन्येन पर्व्वतम् ।
हिमवन्तं समाश्रित्य संस्थितौ तु बभूवतुः ॥ ८ ।
देवा अपि महत्सैन्यं संहृत्य कृतदंशिताः ।
मन्त्रयाञ्चक्रुरव्यग्रा ऐन्द्रं पदमभीप्सवः ॥ ९ ।
अब्रवीत्तत्र देवानां गुरुराङ्गिरसो मुनिः ।
गोमेधेन यजध्वं वै प्रथमं तदनन्तरम् ॥
यष्टव्यं क्रतुभिः सर्व्वैरेषा स्थितिरथामराः ।
उपदेशो मया दत्तः क्रियतां शीघ्र एष वै ॥ १०।११ ।
एवमुक्तास्तदा देवा गाः पशूंश्चानुकल्प्य ते ।
मुमुक्षुश्चरणार्थाय रक्षार्थं सरमान्ददुः ॥ १२ ।
ताश्च गावो देवशुन्या रक्ष्यमाणा धराधरे ।

तत्र जग्मुस्तदा गावश्चरन्त्यो यत्र तेऽसुराः ॥ १३ ।
ते च गावस्तु ता दृष्ट्वा शुक्रमूचुः पुरोहितम् ।
पश्य त्वन्देव गा वन्यांश्चाप्येन्ते रक्षमाणया* ।
देवशुन्या सरमया वद किं क्रियतेऽधुना ॥ १४ ।
एवमुक्तस्तदा शुक्रः प्रत्युवाचासुरांस्तदा ।
एता गा क्रियतां† शीघ्रमसुरा मा विलम्बथ ॥ १५ ।
एवमुक्तास्तदा दैत्या जह्रुस्ता गा यदृच्छया ॥ १६ ।
हृतासु तासु सरमा मार्गान्वेषणतत्परा ।
अपश्यत्सा दितेः पुत्रैर्नीता गावो धराधरे ।
दैत्यैरपि शुनी दृष्टा दृष्टमार्गा विशेषतः ॥ १७ ।
दृष्ट्वा ते ताश्च सान्त्वैव सामपूर्व्वमिदं वचः ।
आसाङ्गवान्तु दुग्ध्वैवक्षीरन्त्वं सरमे शुभे ।
पिवस्वैवमिति प्रोक्ता तस्यै तद्दुरञ्जसा ॥ १८ ।
दत्त्वा तु क्षीरपानन्तु तस्यै ते दैत्यनायकाः ।
मा भद्रे देवराजाय गास्त्विमा विनिवेदय ॥
एवमुक्त्वा ततो दैत्या मुमुचुस्तां शुनीं वने ।
तैर्मुक्ता सा सुरांस्तूर्णं जगाम खलु वेपती ॥ १९।२० ।
नमश्चक्रे च देवेन्द्रं सरमा सुरसत्तमम् ॥ २१ ।
तस्याश्च मरुतो देवा देवेन्द्रेण निरूपिताः ।
गूढ़ङ्गच्छत रक्षार्थं देवशुन्या महाबलाः ।

---

* रक्षमाणयेति आर्षं, रक्षन्त्येति साधु ।

† क्रियतामिति आर्षं, हरतेति साधु ।

इत्युक्तास्तेन सूक्ष्मेण वपुषा जग्मुरञ्जसा ॥ २२ ।
तेऽप्यागम्य सुरेन्द्राय नमश्चक्रुर्धराधरे ।
तान्देवराजः पप्रच्छ गावः किं सरमेऽभवन् ॥ २३ ।
एवमुक्ता तु सरमा न जानामीति चाब्रवीत् ॥ २४ ।
तत इन्द्रो रुषा युक्तो यज्ञार्थमुपकल्पिताः ।
गावः क्व चेति मरुतः प्रोवाचेदं शुनी कथम् ॥ २५ ।
एवमुक्तास्तु मरुतो देवेन्द्रेण धराधरे ।
कथयामासुरव्यग्राः कर्म्म तत्सरमाकृतम् ॥ २६ ।
तत इन्द्रः समुत्थाय पदा सन्ताडयच्छुनीम्* ।
क्रोधेन महताविष्टो देवेन्द्रः पाकशासनः ॥ २७ ।
क्षीरं पीतन्त्वया मूढे गावस्ताश्चासुरैर्हृताः ।
एवमुक्त्वा पदा तेन ताड़िता सरमा धरे ॥ २८ ।
तस्येन्द्रपादघातेन क्षीरं वक्त्रात्प्रसुस्रुवे† ।
स्रवता तेन पयसा सा शुनी यत्रगाभवत् ।
जगाम तत्र देवेन्द्रः सहसैन्यस्तदा धरे ॥ २९ ।
अपश्यत्तत्र देवेन्द्रस्ता गा दैत्यैरुपाहृताः ।
चक्रुर्यैं पालनं दैत्यास्ते दैत्या बलिनो भृशम् ॥ ३० ।
तैः सैन्यैर्निहताः सद्यस्तत्यजुर्गाः स्वमूर्त्तिभिः ।
सामन्तैश्च सुरेन्द्रोऽथ वृतः परमहर्षितैः ॥ ३१ ।
ताश्च लब्ध्वा महेन्द्रस्तु मुदा परमया युतः ।

---

* सन्ताडयदिति आर्षं, समताडयदिति साधु ।

† प्रसुस्रुवे इत्यात्मनेपदमार्षं, प्रसुस्रावेति साधु ।

चकार यज्ञान्विविधान्सहस्रानपि* स प्रभुः ॥ ३२ ।
क्रियमाणैस्ततो यज्ञैर्वव्रधेन्द्रस्य† तद्बलम् ।
वर्द्धितेन बलेनेन्द्रो देवसैन्यमुवाच ह ॥ ३३ ।
सन्नह्यतां सुराः शीघ्रं दैत्यानां बधकर्म्मणि ।
एवमुक्तास्तदा देवाः सन्नद्धास्तत्क्षणेऽभवन् ॥ ३४ ।
असुराणामभावाय जग्मुर्देवाः सवासवाः ।
गत्वा तु युयुधुस्तूर्णं विजिग्युस्त्वासुरीञ्चमूम् ॥ ३५ ।
जिताश्च देवैरसुरा हतशेषा धराधरे ।
ममज्जुः सागरजले भयत्रस्ता विचेतसः ॥ ३६ ।
देवराजोऽपि त्रिदिवं लोकपालैः समन्धरे ।
आरुह्य बुभुजे प्राग्वत्‡ सदेवो देवराड्विभुः ॥ ३७ ।
य एवं§ शृणुयान्नित्यं परमाख्यानमुत्तमम् ।
स गोमेधस्य यज्ञस्य फलम्प्राप्नोति मानवः ॥ ३८ ।
भ्रष्टराज्यश्च यो राजा शृणोतीदं समाहितः ।
स देवेन्द्र इव स्वर्गं राज्यं स्वं लभते नरः ॥ ३९ ।

इति वराहपुराणे सरमोपाख्याने षोड़शोऽध्यायः ।

---

* सहस्रानपीति आर्षं, सहस्राण्यपीति साधु ।

† वव्रधेन्द्रस्येति आर्षं, वव्रध इन्द्रस्येति साधु ।

‡ गश्वदिति (ग) ।

§ एनदिति (ग) ।

सप्तदशोऽध्यायः ।

धरण्युवाच ।

ये ते मणौ तदा देव उत्पन्ना नरपुङ्गवाः ।
तेषां वरो भगवता दत्तस्त्रेतायुगे किल ॥ १ ॥
राजानो भवितारो वै कथन्तेषां समुद्भवः ।
किञ्च चक्रुर्हि ते कर्म्म पृथङ्नामानि शंस मे ॥ २ ॥

वराह उवाच ।

सुप्रभो मणिजो यस्तु राजा नाम महामनाः ।
तस्योत्पत्तिं वरारोहे शृणु त्वम्भूतधारिणि ॥ ३ ॥
आसीद्राजा महाबाहुरादौ* कृतयुगे पुरा ।
श्रुतकीर्त्तिरिति ख्यातस्त्रैलोक्ये बलवत्तरः ॥ ४ ॥
तस्य पुत्रत्वमापेदे सुप्रभो मणिजो धरे ।
प्रजापालेति† वै नाम्ना श्रुतकीर्त्तिर्महाबलः ॥ ५ ॥
स एकस्मिन्दिने प्रायाद्गहनं श्वापदाकुलम् ।
तत्रापश्यद्दृषेर्द्दिव्यं महदाश्रममण्डलम् ॥ ६ ॥
तस्मिन्महातपा नाम ऋषिः परमधार्म्मिकः ।
तपस्तेपे निराहारो जपन्ब्रह्म सनातनम् ॥ ७ ॥
तत्रासौ पार्थिवः श्रीमान् प्रवेशाय मतिन्तदा ।
चकार चाविशद्राजा प्रजापालो महातपाः ॥ ८ ॥

---

* बाहुरादावभूदिति (ग) ।

† प्रजापालेति आर्षं, प्रजापाल इति साधु ।

तस्मिन्वराश्रमपदे वनवृत्तजात्या-
धराप्रसूतोर्जितमार्गजुष्टा* ।
लतागृहा इन्दुरिव प्रकाशिनो
नायासन्ना यत्र याता हि भृङ्गाः ॥ ९ ।
सुरक्तपद्मोदरकोमलाग्र-†
नखाङ्गुलीभिः प्रसृतैः सुरागाम् ।
वराङ्गनाभिः पदपंक्तिमुच्चे-
र्विहाय भूमिन्त्वपि वृत्तशत्रोः ॥ १० ।
क्वचित्समीपे तमतीव‡ हृष्टै-
र्नानाद्विजैः षट्चरणैश्च मत्तैः ।
वासद्भियुक्तैः§र्विविधप्रमाणाः
शाखाः सुपुष्पाः समयोगयुक्ताः ॥ ११ ।
कदम्बनीपार्ज्जुनशीलशाल-
भृता गृहस्थैर्मधुरस्वरेण ।
जुष्टा विहङ्गैः सुजनप्रयोगा
निराकुला कार्य्यधृति¶र्यथास्थैः ॥ १२ ।

---

* प्रशस्तोर्जितमार्गजुष्टा इति (ख) ।

† एवं पयोदारककोमलाङ्गा इति (ग) ।

‡ ताम्यन्तीवेति साधु ।

§ वासद्भियुक्तैरिति आर्ष, वसद्भिर्युक्ता इति साधु ।

¶ कार्य्यवृत्तिरिति (ग) ।

मखाग्निधूमैरुदिताग्निहोमै-
स्ततः समन्ताद्गृहमेधिभिर्द्विजैः ।
सिंहैरिवाधर्म्मकरी विदारितः
सतीक्ष्णदंष्ट्रैर्वरमत्तकेसरैः ॥ १३ ।
एवं स राजा विविधानुपाया-
न्वराश्रमे प्रेक्षमाणो* विवेश ।
तस्मिन् प्रविष्टे तु स तीव्रतेजा
महातपाः पुण्यकृताम्प्रधानः ।
दृष्टो यथा भानुरनन्तभानुः
कौश्यासने ब्रह्मविदाम्प्रधानः ॥ १४ ।
दृष्ट्वा स राजा विजये मृगाणां
मतिं विसस्मार मुनेः प्रसङ्गात् ।
चकार धर्म्मम्प्रति मानसं सः
अनुत्तमञ्चाप्रतिमम्मुनिः सः ॥ १५ ।
स मुनिस्तन्नृपं दृष्ट्वा प्रजापालमकल्मषम् ।
अभ्यागतक्रियाञ्चक्रे आसनस्वागतादिभिः ॥ १६ ।
ततः कृतासनो राजा प्रणम्य ऋषिपुङ्गवम् ।
पप्रच्छ वसुधे प्रश्नमिमम्परमदुर्लभम् ॥ १७ ।
भगवन्दुःखसंसारमग्नैः पुम्भिर्जिगीषुभिः ।
यत्कार्य्यन्तन्ममाचक्ष्व प्रणते शंसितव्रत ॥ १८ ।

---

* वीक्षमाण इति (ग) ।

महातपा उवाच ।

संसारार्णवमज्जमानमनुजैः पोतः स्थिरोऽतिध्रुवः
कार्य्यः पूजनहोमदानविविधैर्यज्ञैः समभ्यायनैः ।
कीलैः कीलितमोचभिः* सुरभटैरूर्द्धं महारज्जुभिः
प्राणाद्यैरधुना कुरुष्व नृपते पोतन्त्रिलोकेश्वरम् ॥ १९ ॥

नारायणं नरकहरं सुरेशं
भक्त्या नमस्कुर्व्वति† यो नृपेश ।
स वीतशोकः परमं विशोकं
प्राप्नोति विष्णोः पदमव्ययं यत्‡ ॥ २० ॥

नृप उवाच ।

भगवन् सर्व्वधर्म्मज्ञ कथं विष्णुः सनातनः ।
पूज्यते मोक्षमिच्छद्भिः पुरुषैर्व्वद तत्त्वतः ॥ २१ ॥

महातपा उवाच ।

शृणु राजन् महाप्राज्ञ यथा विष्णुः प्रसीदति ।
पुरुषाणां तथा स्त्रीणां सर्व्वयोगीश्वरो हरिः ॥ २२ ॥
सर्व्वे देवाः सपितरो ब्रह्माद्याश्चाण्डमध्यगाः ।
विष्णोः सकाशादुत्पन्ना इतीयं वैदिकी श्रुतिः ॥ २३ ॥
अग्निस्तथाश्विनौ गौरी गजवक्त्रभुजङ्गमाः ।
कार्त्तिकेयस्तथादित्या मातरो दुर्गया सह ॥ २४ ॥

---

* कीलितमोचभिरिति (ख), मोचभिरिति आर्षं, मोचैरिति साधु ।

† नमस्कुर्व्वतीति आर्षं, नमस्करोतीति साधु ।

‡ पदमव्ययं तदिति (ख) ।

द्दिशो धनपतिर्विष्णुर्यमो रुद्रः शशी तथा ।
पितरश्चेति सम्भूताः प्राधान्येन जगत्पतेः ॥ २५ ॥
हिरण्यगर्भस्य तनौ सर्व्वं एव समुद्भवाः ।
पृथक् पृथक्ततोगर्व्वं वहमानाः समन्ततः ॥ २६ ।
अहं योग्यस्त्वहं याज्य इति तेषां स्वनो महान् ।
श्रूयते देवसमितौ क्षुब्धसागरसन्निभः ॥ २७ ।
तेषां विवदमानानां वह्निरुत्थाय पार्थिवः ।
उवाच मां यजस्वेति ध्यायध्वं मामिति ब्रुवन् ॥ २८ ।
प्राजापत्यमिदं नूनं शरीरं मद्विना कृतम् ।
विनाशमुपपद्येत यतो नायं महानहम् ॥ २९ ।
एवमुक्ता शरीरन्तु त्यक्ता वह्निर्विनिर्ययौ ।
निर्गतेऽपि ततस्तस्मिंस्तच्छरीरं न शीर्य्यते ॥ ३० ।
ततोऽश्विनौ मूर्त्तिमन्तौ प्राणापानशरीरगौ ।
आवां प्रधानावित्येवमूचतुर्याज्यमुत्तरौ ॥ ३१ ।
एवमुक्ता शरीरन्तु विहाय क्वचिदास्थितौ ।
तयोरपि क्षयं कृत्वा क्षीणन्तत्पुरमास्थितम् ॥ ३२ ।
ततो वागब्रवीद्गौरी* प्राधान्यं मयि संस्थितम् ।
साप्येवमुक्ता देहात्तु निश्चक्राम वहिः शुभा ॥ ३३ ।
तया विनापि तद्देहं वागूनं व्यवतिष्ठत† ।
ततो गणपतिर्वाक्यमाकाशाख्योऽब्रवीत्तदा ॥ ३४ ।

---

* वाचमब्रवीद्गौरीति साधु ।

† व्यवतिष्ठत इति आर्षं, व्यवातिष्ठत इति साधु ।

न मया रहितङ्किञ्चिच्छरीरं स्थायि दूरतः ।
कालान्तरेत्येव*मुक्त्वा सोऽपि निष्क्रम्य देहतः ।
पृथग्भूतस्तथाप्येतच्छरीरं नाप्यनीनशत्† ॥ ३५ ।
विनाशाख्यञ्च तत्तेन तथापि न विशीर्य्यते ॥ ३६ ।
सुषिरैस्तु विहीनन्तु दृष्ट्वा चेत्रं व्यवस्थितम् ।
शरीरधातवः सर्व्वे ते ब्रूयुर्वाक्यमेव हि ॥ ३७ ।
अस्माभिर्व्यतिरिक्तस्य न शरीरस्य धारणम् ।
भवतीत्येवमुक्त्वा ते जहुः सर्व्वे शरीरिणः‡ ॥ ३८ ।
तैर्व्यपेतमपि चेत्रम्पुरुषेण प्रपाल्यते ।
तं दृष्ट्वा त्वब्रवीत्स्कन्दः सोऽहङ्कारः प्रकीर्त्तितः ॥ ३९
मया विना शरीरस्य सम्भूतिरपि नेष्यते ।
एवमुक्त्वा शरीरात्तु स व्यपेतः पृथक् स्थितः ॥ ४० ।
तेनाच्युतेन तत्चेत्रं विना मुक्तवदास्थितम् ।
तं दृष्ट्वा कुपितो भानुः स आदित्यः प्रकीर्त्तितः ॥ ४१
मया विना कथं चेत्रमिमं§ चणमपीष्यते ।
एवमुक्त्वाथ यातः स तच्छरीरं न शीर्य्यते ॥ ४२ ।

---

* कालान्तरेत्येवमिति आर्षं, कालान्तरं इत्येवमिति साधु ।

† नाप्यनीनशदिति (ग) ।

‡ (ख) पुस्तके ३७।३८ श्लोकयोः स्थले केवलमेक एव श्लोकः पठ्यते—
सुषिरैस्तु विरिक्तस्य न शरीरस्य धारणम् ।
भवतीत्येवमुक्त्वा ते जहुः सर्व्वे शरीरिणः (शरीरिणम् ?) ॥

§ इममिति आर्षं, इदमिति साधु ।

ततः कामादिरुत्थाय गणो मातृविसंज्ञितः ।
न मया व्यतिरिक्तस्य शरीरस्य व्यवस्थितिः* ।
एवमुक्त्वा स यातस्तु शरीरं तन्न शीर्य्यते ॥ ४३ ।
ततो मायाब्रवीत्कोपात्सा च दुर्गा प्रकीर्त्तिता ।
न मयास्य विना भूतिरित्युक्त्वान्तर्दधे पुनः ॥ ४४ ।
ततो दिशः समुत्तस्थुरूचुश्चेदं वचो महत् ।
नास्माभीरहितं कार्य्यंभवतीति न संशयः ॥ ४५ ।
चतस्र आगताः काष्ठास्ताः प्रयाताः क्षणात्तदा ।
ततो धनपतिर्वायुर्मध्यतस्त्यक्तसम्भवः† ।
शरीरस्येति सोऽप्येवमुक्त्वा मूर्द्धानगोऽभवत् ॥ ४६ ।
ततो विष्णोर्मनो ब्रूयान्नायन्देहो मया विना ।
क्षणमप्युत्सहेत्‡ स्थातुमित्युक्त्वान्तर्दधे पुनः ॥ ४७ ।
ततो धर्म्मोऽब्रवीत्सर्व्वमिदम्पालितवानहम् ।
इदानीम्मय्युपगते कथमेतद्भविष्यति ॥ ४८ ।
एवमुक्त्वा गतो धर्म्मस्तच्छरीरं न शीर्य्यते ॥ ४९ ।
ततोऽब्रवीन्महादेवः अव्यक्तो भूतभावनः ।
महत्संज्ञो मया हीनं शरीरन्नो भवेद्यथा ॥ ५० ।
एवमुक्त्वा गतः शम्भुस्तच्छरीरं न शीर्य्यते ॥ ५१ ।

---

* एतदर्द्धं (ख) पुस्तके नास्ति ।

† सक्तसम्भव इति (ग) ।

‡ उत्सहेदिति आर्षं, उत्सहेतेति साधु।

तद्दृष्ट्वा पितरश्चोचुस्तन्मात्रं यावदस्मभिः* ।
प्राणान्तरेभिः†रितश्च शरीरं शीर्य्यते ध्रुवम् ॥ ५२ ।
एवमुक्त्वा तु‡ तद्देहन्त्यक्त्वान्तर्द्धानमागताः ।
अग्निः प्राणः अपानौ च आकाशश्चैव धातवः ॥ ५३ ।
क्षेत्रन्तद्वदहङ्कारो भानुः कामादयो मयाः ।
काष्ठा वायुर्विष्णुधर्म्मौ शम्भुश्चैवेन्द्रियार्थकाः ॥
एतैर्मुक्तन्तु तत्क्षेत्रम्मुक्ताविव तु संस्थितम् ।
सोमेन पाल्यमानन्तु पुरुषेणेन्दुरूपिणा ॥ ५४।५५ ।
एवं व्यवस्थिते सोमे षोड़शात्मन्यथाचरे ।
प्राग्वत्तत्र गुणोपेतं क्षेत्रमुत्थाय बभ्रम§ ॥ ५६ ।
प्रागवस्थं शरीरन्तु दृष्ट्वा सर्व्वज्ञपालितम् ।
ताः क्षेत्रदेवताः सर्व्वा वैलक्षम्भावमास्थिताः ।
तमेवन्तुष्टुवुः सर्व्वास्तं देवम्परमेश्वरम् ॥ ५७ ।
स्वस्थानमाशिपुः सर्व्वास्तदा नृपतिसत्तम ।
त्वमग्निस्त्वन्तथा प्राणस्त्वमपानः सरस्वती ॥ ५८ ।
त्वमाकाशन्धनाध्यक्षः¶स्त्वं शरीरस्य धातवः ।

---

* अस्मभिरिति आर्षं, अस्माभिरिति साधु ।

† प्राणान्तरेभिरिति आर्षं, प्राणान्तरैरिति साधु ।

‡ तं देहमिति (क), (ख) ।

§ बभ्रम इति आर्षं, बभ्रामेति साधु । उत्थानबभ्रम इति (ग) ।

¶ त्वमध्यक्ष इति (ग) ।

अहङ्कारो भवान्देव* त्वमादित्योऽष्टको गणः ॥ ५८ ।
त्वं माया पृथिवी दुर्गा त्वं दिशस्त्वम्मरुत्पतिः ।
त्वं विष्णुस्त्वन्तथा धर्मस्त्वञ्जिष्णुस्त्वम्पराजितः ॥ ६० ।
अक्षरार्थस्वरूपेण परमेश्वरसंज्ञितः ।
अस्माभिरप्ययातैस्तु कथमेतद्भविष्यति ॥ ६१ ।
एवमत्र शरीरन्तु त्यक्तमस्माभिरेव च ।
न परम्भवतो देव तदत्र त्वञ्च पाल्यते† ॥ ६२ ।
स्थानभङ्गो न नः कार्यः स्वयं स्रष्टा प्रजापते ।
एवं स्तुतस्ततो देवस्तेषां तोषं परं ययौ ॥ ६३ ।
उवाच चैतान् क्रीड़ार्थं भवन्तोत्पादिता‡ मया ।
कृतकृत्यस्य चैकन्तु§ भवद्भिर्मे प्रयोजनम्¶ ॥ ६४ ।
तथा चेदप्रियं रूपे द्वे द्वे प्रत्येकशोऽधुना ।
भूतकार्य्येष्वमूर्त्तेन देवलोके तु मूर्त्तिना ।
तिष्ठध्वमपि कालान्ते लयं त्वाविशत द्रुतम् ॥ ६५ ।
शरीराणि पुनर्नैव कर्त्तव्योऽहमिति क्वचित् ।
मूर्त्तीनाञ्च‖ तथा तुभ्यमग्निनामानि वोऽधुना ॥ ६६ ।

---

* दोष इति (ग) ।

† त्वं प्रपाल्यत इति (क) ।

‡ भवन्त उत्पादिता इति साधु ।

§ मे किञ्चिदिति (ग) ।

¶ विप्रयोजनमिति (ग) ।

‖ (ग) पुस्तके मूर्त्तीनाञ्चेत्यस्मादारभ्य सुता तथेतिपर्य्यन्तः पाठो नास्ति ।

अग्नेर्वैश्वानरो नाम प्राणापानौ तथाश्विनौ ।
भविष्यति तथा गौरी हिमशैलसुता तथा ॥ ६७ ।
पृथिव्यादिगुणस्त्वेष गजवक्त्रो भविष्यति ।
शरीरधातवश्चेमे नानाभूतानि एव तु ॥ ६८ ।
अहङ्कारस्तथा स्कन्दः कार्त्तिकेयो भविष्यति ।
शरीरमाया* दुर्गैषा कारणान्ते भविष्यति ॥ ६९ ।
दश कन्या भविष्यन्ति काष्ठास्त्वितासु वारुणाः ।
अयं वायुर्धनेशस्तु कारणान्ते भविष्यति ॥ ७० ।
अयं मनो विष्णुनामा भविष्यति न संशयः† ।
धर्म्मोऽपि यमनामा च भविष्यति न संशयः ॥ ७१ ।
महत्तत्त्वञ्च भगवान्महादेवो भविष्यति‡ ।
इन्द्रियार्थाश्च पितरो भविष्यन्ति न संशयः ॥ ७२ ।
अयं सोमः पुरा भूत्वा थामिनं सर्व्वदामराः ।
एवं वेदान्तपुरुषः प्रोक्तो नारायणात्मकः ।
स्वस्थाने देवताः सर्व्वा देवस्तु विरराम ह ॥ ७३ ।
एवंप्रभावो देवोऽसौ वेदवेद्यो जनार्द्दनः ।
कथितो नृपते तुभ्यं किमन्यच्छ्रोतुमिच्छसि ॥ ७४ ।

इति वराहपुराणे महातपउपाख्याने सप्तदशोऽध्यायः ।

---

* शरीरमायेत्यादि श्लोकार्द्धं (ग) पुस्तके नास्ति ।

† नाम्ना च भविष्यत्येव नान्यथेति (ग) ।

‡ (ग) पुस्तके एतदर्द्धं नास्ति ।

अष्टादशोऽध्यायः ।

प्रजापाल उवाच ।

कथमग्नेः समुत्पत्तिरश्विनोर्वा महामुने ।
गौर्य्या गणपतेर्वाऽपि नागानां वा गुहस्य च ॥ १ ॥
आदित्यचन्द्रमातॄणां दुर्गाया वा दिशान्तथा ॥
धनदस्य च विष्णोर्वा धर्म्मस्य परमेष्ठिनः ॥ २ ॥
शम्भोर्वापि पितॄणाञ्च तथा चन्द्रमसो मुने ।
शरीरदेवताः सर्व्वाः कथं मूर्त्तित्वमागताः ॥ ३ ॥
किञ्च तासां मुने भोज्यं का वा संज्ञा तिथिश्च का ।
यस्यां दृष्ट्वा त्वमी पुंसां फलं यच्छन्त्यनामयम् ।
एतन्मे सरहस्यन्तु मुने त्वं वक्तुमर्हसि ॥ ४ ॥

महातपा उवाच ।

योगसाध्यस्वरूपेण आत्मा नारायणात्मकः ।
सर्व्वज्ञः क्रीड़तस्तस्य भोगेच्छा चात्मनात्मनि ॥ ५ ॥
क्षोभितेऽस्मिन्महाभूते एतत्सहैतदद्भुतम् ।
तमद्य प्रीतिमत्तोऽयं विकारं समरोचयत् ॥ ६ ॥
विकुर्व्वतस्तस्य तदा महानग्निः समुत्थितः ।
कोटिज्वालापरीवारः शब्दवान्दहनात्मकः ॥ ७ ॥
असावप्यतितेजस्वी विकारं समरोचयत् ।
विकुर्व्वतो बभौ वह्निर्वायुः परमदारुणः ॥ ८ ॥
तस्मादपि विकारस्थादाकाशं समपद्यत ।

तच्छब्दलक्षणं व्योम स च वायुः प्रतापवान् ॥ ९ ।
तच्च तेजोऽम्भसा युक्तं श्लिष्टमन्योन्यतस्तथा ।
तेजसा शोषितं तोयं वायुना उग्रगामिणा ॥ १० ।
बोधितेन तथा व्योममार्गे दत्ते तु तत्क्षणात् ।
पिण्डीभूतं तथा सर्व्वं काठिन्यं समपद्यत ॥ ११ ।
सेयं पृथ्वी महाभाग तेषां वृत्तितराभवत् ।
चतुर्णां योगकाठिन्यादेकैकं गुणवर्द्धितः ॥ १२ ।
पृथ्वी पञ्चगुणा ज्ञेया तेऽप्येतस्यां व्यवस्थिताः ।
स च काठिन्यकं कुर्व्वन् ब्रह्माण्डं समपद्यत ॥ १३ ।
तस्मिन्नारायणो देवश्चतुर्मूर्त्तिश्चतुर्भुजः ।
प्राजापत्येन रूपेण सिसृक्षुर्विविधाः प्रजाः ॥ १४ ।
चिन्तयन्नाधिगच्छेत सृष्टिं लोकपितामहः ।
ततोऽस्य सुमहान् कोपो जज्ञे परमदारुणः ॥ १५ ।
तस्मात्कोपात्सहस्रार्च्चिरुत्तस्थौ दहनात्मकः ।
स तं दिधक्षुर्ब्रह्माणं* ब्रह्मणोक्तस्तदा नृप ॥ १६ ।
हव्यं कव्यं वहस्वेति ततोऽसौ हव्यवाहनः ।
ब्रह्माणं क्षुधितं प्रायात्किङ्करोमि प्रशाधि माम् ।
स ब्रह्मा प्रत्युवाचैनं त्रिधा तृप्तिमवाप्स्यसि ॥ १७ ।
दत्तासु दक्षिणास्वादौ तृप्तिर्भूत्वा यतोऽमरान् ।
नयसे दक्षिणाभागन्दक्षिणाग्निस्ततोऽभवत् ॥ १८ ।
आसमन्ताद्धुतं किञ्चिद्यत्त्रिलोके विभावसो ।

---

* सर्व्वेति (ग)।

तद्वहस्व सुरार्थाय ततस्त्वं हव्यवाहनः ॥ १९ ॥
गृहं शरीरमित्युक्तं तत्पतिस्त्वं यतोऽधुना ।
अतो वै गार्हपत्यस्त्वं भव सर्व्वगतो विभो ॥ २० ॥
विश्वान्नरान् हुतो येन नयसे सद्गतिं प्रभो ।
अतो वैश्वानरो नाम तव वाक्यं भविष्यति ॥ २१ ॥
द्रविणं बलमित्युक्तं धनञ्च द्रविणं ततः ।
ददाति तद्भवानेव द्रविणोदास्ततोऽभवत्* ॥ २२ ॥
पापस्तिरोभवेन्नित्यं निःशब्दो निश्चयात्मकः ।
अतस्त्वं सर्वगत्वा च तेजोऽग्निस्ते भविष्यति ॥ २३ ॥
धाप्रपूरणशब्दो य इध्मानामपि कीर्त्त्यते ।
पूरितस्य गतिर्येन तेनेधस्त्वं भविष्यसि ॥ २४ ॥
याज्यान्येतानि नामानि तव पुत्र महामखे ।
यजन्तस्त्वां नराः कामैस्तर्पयिष्यन्त्यसंशयः ॥ २५ ॥

इति वराहपुराणे महातपउपाख्याने अग्न्युत्पत्तिर्नाम अष्टादशोऽध्यायः

ऊनविंशोऽध्यायः ।

महातपा उवाच ।

विष्णोर्विभूतिमाहात्म्यं कथितं ते प्रसङ्गतः ।
तिथीनां शृणु माहात्म्यं कथ्यमानं मया नृप ॥ १ ॥
इत्थम्भूतो महानग्निर्ब्रह्मक्रोधसमुद्भवः ।
उवाच देवं ब्रह्माणं तिथिर्मे दीयतां विभो ।
यस्यामहं समस्तस्य जगतः ख्यातिमाप्नुयाम् ॥ २ ॥

ब्रह्मोवाच ।

देवानामथ यक्षाणां गन्धर्वाणाञ्च सत्तम ।
आदौ प्रतिपदा येन त्वमुत्पन्नोऽसि पावक ॥ ३ ॥
त्वत्पदात्प्रातिपदिकं* सम्भविष्यन्ति देवताः ।
अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति ॥ ४ ॥
तस्यान्तिथौ हविष्येण प्राजापत्येन मूर्त्तिना† ।
होष्यन्ति तेषां प्रीताः स्युः पितरः सर्वदेवताः ॥ ५ ॥
चतुर्विधानि भूतानि मनुष्याः पशवोऽसुराः ।
देवाः सर्वे सगन्धर्वाः प्रीताः स्युस्तर्पितास्त्वयि ॥ ६ ॥
यश्चोपवासं कुर्वीत त्वद्भक्तः प्रतिपद्दिने ।
क्षीराशनो वा वर्त्तेत शृणु तस्य फलं महत् ।

---

* (प्रातिपदिकाः ?) ।

† मूर्त्तिना इत्यार्षं, मूर्त्त्या इति साधु ।

चतुर्युगानि षड्विंशं* स्वर्गलोके महीयते ॥ ७ ।
तेजस्वी रूपसम्पन्नो द्रव्यवाञ्जायते नरः ।
इह जन्मन्यसौ राजा प्रेत्य स्वर्गे महीयते† ॥ ८ ।
तूष्णीम्बभूव सोऽप्यग्निर्ब्रह्मदत्ताश्रमं ययौ ॥ ९ ।
य इदं शृणुयान्नित्यं प्रातरुत्थाय मानवः ।
अग्नेर्जन्म स पापेभ्यो मुच्यते नात्र संशयः ॥ १० ।

इति वराहपुराणे अग्न्युत्पत्तिर्नाम ऊनविंशोऽध्यायः ।

विंशोऽध्यायः ।

प्रजापाल उवाच ।

एवमग्नेः समुत्पत्तिर्जाता ब्रह्मन्महात्मनः* ।
प्राणापानौ कथं देवावश्विनौ सम्बभूवतुः ॥ १ ।

महातपा उवाच ।

मरीचिर्ब्रह्मणः पुत्रः स्वयं ब्रह्मा द्विसप्तभिः ।
रूपैर्व्यवस्थितस्तेषां मरीचिः श्रेष्ठतामगात् ॥ २ ।
तस्य पुत्रो महातेजा कश्यपो नाम वै मुनिः ।
स्वयं प्रजापतिः श्रीमान्देवतानां पिताभवत् ॥ ३ ।

---

* षड्विंशमित्यार्षं, षड्विंशतिमिति साधु ।

† (ग) पुस्तके एष श्लोको नास्ति ।

---

* ब्रह्मात्मनः पुरेति (ग) ।

तस्य पुत्रा बभूवुर्हि आदित्या द्वादश प्रभो ।
नारायणात्मकं तेजो द्वादश सुप्रकीर्त्तितम् ॥ ४ ।
ते ते* मासास्त आदित्याः स्वयं संवत्सरो हरिः ।
एवं ते द्वादशादित्या मार्त्तण्डश्च प्रतापवान् ॥ ५ ।
तस्य त्वष्टा ददौ कन्यां संज्ञां नाम महाप्रभाम् ।
तस्यापत्यद्वयञ्जज्ञे यमश्च यमुना तथा ॥ ६ ।
तस्य तेजोऽप्यसहती† बभूवाश्वी मनोजवा ।
स्वां छायां तत्र‡ संस्थाप्य सा जगामोत्तरान् कुरून् ॥ ७ ।
तद्रूपां तां सवर्णान्तु भेजे मार्त्तण्डभास्करः ।
तस्मादपि द्वयं जज्ञे शनिं तपतिमेव च ॥ ८ ।
यदा त्वसदृशं भेजे पुत्रान् प्रति नरोत्तम ।
संज्ञां प्रोवाच भगवान् क्रोधसंरक्तलोचनः ।
असमत्वं न कर्त्तव्यं स्वेष्वपत्येषु भामिनि ॥ ९ ।
एवमुक्ता यदा सा तु असमत्वं व्यरोचत ।
तदा यमः स्वपितरं प्रोवाच भृशदुःखितः ॥ १० ।
नेयं माता भवेत्तात अस्माकं शत्रुवत्सदा ।
सपत्नीव ह्यथाचारा स्वेष्वपत्येषु वत्सला§ ॥ ११ ।
एवं यमवचः श्रुत्वा सा च्छाया क्रोधमूर्च्छिता ।

---

* ये ते मासा इति (क), (ख) ।

† असहशीलार्थम्, असहमानेति साधु ।

‡ स्वां छायामत्रेति (ख) ।

§ भामिनीति (ग) ।

शशाप प्रेतराजस्त्वं भविष्यस्यचिरादिव ॥ १२ ।
एवं श्रुत्वाथ मार्त्तण्डस्तदा पुत्रहितेच्छया ।
उवाच मध्यवर्त्ती त्वं भविता धर्म्मपापयोः ।
लोकपालश्च भविता त्वं पुत्र दिवि शोभसे ॥ १३ ।
शनिं शशाप मार्त्तण्डश्छायाकोपप्रधर्षितः ।
त्वं क्रूरदृष्टिर्भविता मातृदोषेण पुत्रक ॥ १४ ।
एवमुक्त्वा समुत्थाय ययौ भानुर्दिदृक्षया ।
तामपश्यत्त्वसौ सोऽश्वामुत्तरेषु कुरुष्वथ ॥ १५ ।
ततोऽश्वरूपं कृत्वा स गत्वा तत्रोत्तरान् कुरून् ।
प्राजापत्येन मार्गेण युयोजात्मानमात्मना ॥ १६ ।
तस्यां त्वाष्ट्रामश्वरूप्यां मार्त्तण्डस्तीव्रतेजसा ।
वीजं* निर्वापयामास तज्ज्वलन्तं† द्विधापतत् ॥ १७
तत्र प्राणस्त्वपानश्च योनौ चात्मजितौ पुरा ।
वरदानेन च पुनर्मूर्त्तिमन्तौ वभूवतुः ॥ १८ ।
तौ त्वाष्ट्रामश्वरूपायां जातौ येन नरोत्तमौ ।
ततस्तावश्विनौ देवौ कीर्त्यैते रविनन्दनौ ॥ १९ ।
प्राजापत्यं स्वयं भानुस्त्वाष्ट्री शक्तिः परापरा ।
तस्याः प्रागवच्छरीरस्थावमूर्त्तौ‡ मूर्त्तिमाश्रितौ ॥ २०
ततस्तावश्विनौ देवौ मार्त्तण्डमुपतस्थतुः ।

---

* वसुमिति (ग) ।

† ज्वलन्तमित्यार्षं, ज्वलदिति साधु ।

‡ चतुर्मूर्त्तौ इति (ग) ।

ऋचतुः स्वरुचिन्तावत्किङ्कर्त्तव्यमथावयोः ॥ २१ ।

मार्त्तण्ड उवाच ।

पुत्रौ प्रजापतिं देवं भक्त्याराधयतां वरम् ।
नारायणं स वो* दाता वरं नूनं भविष्यति ॥ २२ ।
एवं तावश्विनौ प्रोक्तौ मार्त्तण्डेन महात्मना ।
तेपतुस्†तीव्रतपसौ तपः परमदुश्चरम् ।
ब्रह्मपारमयं स्तोत्रं जपन्तौ तु समाहितौ ॥ २३ ।
तयोः कालेन महता ब्रह्मा नारायणात्मकः ।
तुतोष परमप्रीत्या‡ वरञ्चैनन्ददौ तयोः ॥ २४ ।

प्रजापाल उवाच ।

अश्विभ्यामीरितं स्तोत्रं ब्रह्मणोऽव्यक्तजन्मनः ।
श्रोतुमिच्छाम्यहं ब्रह्मंस्त्वत्प्रसादान्महामुने ॥ २५ ।

महातपा उवाच ।

शृणु राजन्यथा स्तोत्रमश्विभ्यां ब्रह्मणः कृतम् ।
दृष्टश्च फलं प्राप्तं तयोः स्तोत्रस्य चानघ ॥ २६ ।

ओं नमस्ते निष्क्रिय निष्प्रपञ्च
निराश्रय निरपेक्ष निरालम्ब ।
निर्गुण निरालोक निराधार
निर्मम निरालम्ब ॥ २७ ।

---

* सर्व्वदातेति (ग) ।

† ते पुनरिति (ग) ।

‡ यत्तु सम्प्रीत्येति (ग) ।

ब्रह्म महाब्रह्म ब्राह्मणप्रिय
पुरुष महापुरुष पुरुषोत्तम ।
देव महादेव देवोत्तम
स्थाणो स्थितिस्थापक* ॥ २८ ।
भूत महाभूत भूताधिपते
यक्ष महायक्ष यक्षाधिपते ।
गुह्य महागुह्य गुह्याधिपते
सौम्य महासौम्य सौम्याधिपते ॥ २९ ।
पक्षि महापक्षिपते
दैत्य महादैत्याधिपते ।
रुद्र महारुद्राधिपते
विष्णो महाविष्णुपते ।
परमेश्वर नारायण
प्रजापतये नमः ॥ ३० ।

एवं स्तुतस्तदा ताभ्यामश्विभ्यां स प्रजापतिः† ।
तुतोष परमप्रीत्या वाक्यञ्चेदमुवाच ह ॥ ३१ ।
वरं वरयतां शीघ्रं देवैः परमदुर्लभम् ।
येन वो वरदानेन चरतस्त्रिदिवं सुखम् ॥ ३२ ।

अश्विनावूचतुः ।

आवयोर्दैवभागन्तु देहि देव प्रजापते ।

---

* स्थाणोत्तम स्थितिस्थापकसमेति (ग) ।

† एतदर्द्धं (ग) पुस्तके नास्ति ।

सोमपत्वञ्च देवानां सामान्यत्वञ्च शाश्वतम् ॥ ३३ ।

ब्रह्मोवाच ।

रूपं कान्तिरनौपम्यं भिषक्त्वं सर्व्ववस्तुषु ।
सोमपत्वञ्च लोकेषु सर्व्वमेतद्भविष्यति ॥ ३४ ।

महातपा उवाच ।

एतत्सर्व्वं द्वितीयायामश्विभ्यां ब्रह्मणा पुरा ।
दत्तं यस्मादतस्तेषां तिथीनामुत्तमा तिथिः ॥ ३५ ।
एतस्यां रूपकामस्तु पुष्पाहारो भवेन्नरः ।
संवत्सरं शुचिर्नित्यं सुस्वरूपी भवेन्नरः ॥ ३६ ।
अश्विभ्यां ये गुणाः प्रोक्तास्ते तस्यापि भवन्ति च ।
य इदं शृणुयान्नित्यमश्विनोर्जन्म चोत्तमम् ।
सर्व्वपापविनिर्मुक्तः पुत्रवाञ्जायते नरः ॥ ३७ ।

इति वराहपुराणे अश्व्युत्पत्तिर्नाम विंशोऽध्यायः ।

एकविंशोऽध्यायः ।

प्रजापाल उवाच ।

कथं गौरी महाप्राज्ञ संस्तुता वरदानतः ।
मूर्त्तिं लब्धवती पुंसः परस्य परमात्मनः ॥ १ ।

महातपा उवाच ।

पूर्व्वं प्रजापतिर्देवः सिसृक्षुर्विविधाः प्रजाः ।

चिन्तयामास धर्म्मात्मा यदान्तान्नाध्यगच्छत ॥
तदास्य कोपात्सञ्जज्ञे स च रुद्रः प्रतापवान् ।
रोदनात्तस्य रुद्रत्वं सञ्जातं परमेष्ठिनः ॥ २।३ ।
तस्य ब्रह्मा शुभां कन्यां भार्य्यार्थे मूर्त्तिसम्भवाम् ।
गौरीनाम्नीं स्वयं देवीं भारतीं तां ददौ पिता ।
रुद्रायामितदेहाय स्वयं ब्रह्मा प्रजापतिः ॥ ४ ।
स तां लब्ध्वा वरारोहां मुदा परमया युतः ।
सर्गकालेषु तं ब्रह्मा तपसा प्रत्युवाच ह ॥ ५ ।
रुद्र प्रजाः सृजस्वेति पौनःपुन्येन नोदितः ।
असमर्थ इति जले निमज्जत* महाबलः ॥ ६ ।
तपोऽर्थित्वं तपोहीनः स्रष्टुं शक्नोति न प्रजाः ।
एवं चिन्त्य† जले मग्नस्ततो रुद्रः प्रतापवान् ॥ ७ ।
तस्मिन्निमग्ने देवेशे तां ब्रह्मा कन्यकां पुनः ।
अन्तःशरीरगां कृत्वा गौरीम्परमशोभनाम् ॥
पुनः सिसृक्षुर्भगवानसृजत्सप्त मानसान् ।
दक्षञ्च तेषामारभ्य‡ प्रजाः सम्यग्विवर्धिताः ॥ ८।९ ।
तत्र दाक्षायणी पुत्राः सर्व्वे देवाः सवासवाः ।
वसवोऽष्टौ च रुद्राश्च आदित्या मरुतस्तथा ॥ १० ।
सापि दक्षाय सुश्रोणी गौरी दत्ताथ ब्रह्मणा ।

---

* निमज्जतेति आर्षं, न्यमज्जदिति साधु ।

† चिन्त्येति आर्षं, चिन्तयित्वेति साधु ।

‡ तेषामारभ्येति आर्षं, तेभ्य आरभ्येति साधु ।

दुहितृत्वे पुरा या हि रुद्रेणोढ़ा महात्मना* ॥ ११ ।
सा च दाक्षायणी देवी पुनर्भूत्वा नृपोत्तम ॥ १२ ।
ततो दक्षः प्रहृष्टात्मा दौहित्रांस्तान्समृद्धिकृत्† ।
दृष्ट्वा यज्ञमथारेभे प्रीणनाय प्रजापतेः ॥ १३ ।
तत्र ब्रह्मसुताः सर्व्वे मरीच्यादय एव च ।
चक्रुरार्त्विजकं कर्म्म स्वे स्वे मार्गे व्यवस्थिताः ॥ १४ ।
ब्रह्मा स्वयं मरीच्यस्तु बभूवाऽन्ये तथापरे ।
अत्रिस्तु यज्ञकर्म्मस्थ आग्नीध्रस्त्वङ्गिराभवत् ॥ १५ ।
होता पुलस्त्यस्त्वभवदुद्गाता पुलहोऽभवत् ।
क्रतौ क्रतुस्तु प्रस्तोता तदा यज्ञे महातपाः ॥ १६ ।
प्रतिहर्त्ता प्रचेतास्तु तस्मिन् क्रतुवरे बभौ ।
सुब्रह्मण्यो वशिष्ठस्तु सनकाद्याः सभासदः ॥ १७ ।
तत्र याज्यः स्वयं ब्रह्मा स च इज्यस्तु विश्वकृत्‡ ।
पूज्या दक्षस्य दौहित्रा रुद्रादित्योऽङ्गिरादयः ॥ १८ ।
प्रत्यक्षं पितरस्ते हि तैः प्रीतैः प्रीयते जगत् ।
तत्र भागार्थिनो देवा आदित्या वसवस्तथा ॥ १९ ।
विश्वेदेवाः सपितरो गन्धर्व्वाद्या मरुद्गणाः ।
जगृहुर्यज्ञभागांस्तान्यावन्तो हविषार्पिताः ॥ २० ।
तावत्कालं जलात्सद्य उत्तस्थौ ब्रह्मणः पुनः ।

---

* श्लोकोऽयं (ग) पुस्तके नास्ति ।

† ह्यधिकदिति (ग) ।

‡ पूज्यते इति (ख) ।

रुद्रः कोपोद्भवो यस्तु पूर्व्वमग्नो महाजले ॥ २१ ।
स सहस्रार्कसङ्काशो निश्चक्राम जलात्ततः ।
सर्व्वज्ञानमयो देवः सर्व्वदेवमयोऽमलः ॥ २२ ।
प्रत्यक्षदर्शी सर्व्वस्य जगतस्तपसा बभौ ।
तस्मिंस्तु काले पञ्चानाञ्जातः सर्गो नरोत्तम ॥ २३ ।
दिव्यानां पृथिवीस्थानां चतुर्णां मरजातिनाम्* ।
रौद्रसर्गस्य सम्भूतिस्तदा सद्योऽपि जायते ।
इदानीं रुद्रसर्गस्त्वं शृणु पार्थिवसत्तम ॥ २४ ।
दशवर्षसहस्राणि तपस्तप्ता महज्जले ।
प्रतिरुद्रो यदा रुद्रस्तदा चोर्व्वीं सकाननाम् ॥
दृष्ट्वा शस्यवतीं रम्यां मनुष्यपशुसङ्कुलाम् ।
शुश्राव च तदा शब्दानृत्विजां दक्षसद्मनि ।
आश्रमे यज्ञियानोच्चैर्योगस्थैरिति कीर्त्तितान् ॥ २५।२६ ।
ततः श्रुत्वा महातेजाः सर्व्वज्ञः परमेश्वरः ।
चुकोप सुभृशन्देवो वाक्यञ्चेदमुवाच ह ॥ २७ ।
अहं पूर्व्वन्तु कविना सृष्टः सर्व्वात्मना विभुः ।
प्रजाः सृजस्वेति तदा वाक्यमेतत्तथोक्तवान् ॥ २८ ।
इदानीं केन तत्कर्म्म कृतं सृष्ट्यादिवर्णनम् ।
एवमुक्तो भृशं कोपान्ननाद परमेश्वरः ॥ २९ ।
तस्यैव नदतो ज्वालाः श्रोत्रेभ्यो निर्ययुस्तदा ।
तत्र भूतानि वेताला उच्छुषा प्रेतपूतनाः ।

---

* जातीनामिति साधु ।

उत्तस्थुः कोटिशस्तत्र नानाप्रहरणावृताः ॥ ३० ।
तं दृष्ट्वा भूतसङ्घाता विविधायुधपाणयः ।
ससर्ज वेदविद्याङ्गरथं परमशोभनम् ॥ ३१ ।
तस्मिन्मृगद्वयं स्वश्वौ* त्रितत्त्वञ्च त्रिवेणुकम् ।
त्रिपूजकं त्रिषवणं धर्म्माक्षं मारुतध्वनिम् ।
अहोरात्रे पताके द्वे धर्म्माधर्मौ† तु दण्डकम् ।
शकटं सर्व्वविद्याश्च त्वयं ब्रह्मा हि सारथिः ॥ ३२।३३ ।
गायत्री च धनुस्तस्य ओङ्कारो गुण एव च ।
स्वराः सप्त शरास्तस्य देवदेवस्य सुव्रत ॥ ३४ ।
एवं कृत्वा स सामग्रीन्देवदेवः प्रतापवान् ।
जगाम दक्षयज्ञाय कोपाद्रुद्रः प्रतापवान् ॥ ३५ ।
गच्छतस्तस्य देवस्य अम्बराङ्गिरसन्नयत् ।
ऋत्विजां मन्त्रनिचयो नष्टो रुद्रागमे तदा ॥ ३६ ।
विपरीतमिदं दृष्ट्वा तदा सर्व्वेऽत्र ऋत्विजः ।
ऊचुः सन्नह्यतां देवा महद्वो भयमागतम् ॥ ३७ ।
कश्चिदायाति बलवानसुरो ब्रह्मनिर्म्मितः ।
यज्ञभागार्थमेतस्मिन् क्रतौ परमदुर्लभम् ॥ ३८ ।
एवमुक्तास्ततो देवा ऊचुर्मातामहं तदा ।
दक्ष तात किमत्रास्मत्कार्य्यं ब्रूहि विवक्षितम् ॥ ३९ ।

---

* शश्वदिति (क), (ख)।

† धर्म्माधर्म्मौ इति साधु।

दक्ष उवाच ।

जह्यन्तां द्रुतमस्त्राणि सङ्ग्रामोऽत्र विधीयताम् ॥ ४० ।
एवमुक्ते तदा देवैर्विविधायुधधारिभिः ।
रुद्रस्यानुचरैः सार्द्धं महद्युद्धं प्रवर्त्तितम् ॥ ४१ ।
तत्र वैतालभूतानि कूष्माण्डा ग्रहपूतनाः ।
युयुधुर्लोकपालैश्च नानायुधधराणि च ॥ ४२ ।
दिवौ रौद्राणि भूतानि निर्गच्छन्तो यमालयम् ।
चिक्षिपुः सायकान् घोरानसीप्रासपरश्वधान् ॥ ४३ ।
भूतान्यपि मृधे घोराण्युल्मुकैरस्थिभिः शरैः ।
जघ्नु*र्देवान्मृधे रोषाद्रुद्रस्य पुरतो बलात् ॥ ४४ ।
ततस्तस्मिन्महारौद्रे संग्रामे भीमरूपिणी ।
रुद्रो भगस्य नेत्रे तु विभेदैकेषुणा मृधे ॥ ४५ ।
रुद्रस्य शरपातेन नष्टनेत्रं भगं तदा ।
दृष्ट्वास्य क्रोधात्तेजस्वी पूषा रुद्रमयोधयत् ॥ ४६ ।
सृजन्तमिषुजालानि पूषणन्तु† महामृधे ।
दृष्ट्वा रुद्रोऽस्य दन्तांस्तु चकर्ष परवीरहा ॥ ४७ ।
तस्य दन्तांस्तदा दृष्ट्वा पूष्णो रुद्रेण पातितान् ।
दुद्रुवुः सर्व्वतो दिक्षु रुद्रास्त्वेकादश द्रुतम् ॥ ४८ ।
तां भग्नां सहसा दिक्षु दृष्ट्वा विष्णुः‡ प्रतापवान् ।

---

* जघ्नुरिति (ग) ।

† पूषाणमिति साधु ।

‡ रुद्र इति (ग) ।

आदित्यावरजो वाक्यमुवाच स्वबलं तदा ॥ ४९ ॥
क्व यात पौरुषन्त्यक्त्वा दर्पं माहात्म्यमेव च।
व्यवसायं कुलं भूतिं कथं न स्मर्य्यते द्रुतम् ॥ ५० ॥
परमेष्ठिगुणैर्युक्ता लब्धमायुर्यतः पुरा।
तं नमस्कुरुतामोघं पृथिव्यां पद्मजं* स्वयम् ॥ ५१ ॥
एवमुक्त्वा गरुत्मन्तमारुरोह हरिस्तदा।
शङ्खचक्रगदापाणिः पीतवासा जनार्द्दनः ॥ ५२ ॥
ततो हरिहरं युद्धमभवल्लोमहर्षणम्।
रुद्रः पाशुपतास्त्रेण विव्याध हरिमोजसा ॥ ५३ ॥
हरिर्नारायणास्त्रेण रुद्रं विव्याध कोपवान्।
नारायणं पाशुपतमुभेऽस्त्रे व्योम्नि रोषिते।
युयुधाते भृशं दिव्यं परस्परजिघांसया।
दिव्यं वर्षसहस्रन्तु तयोर्युद्धमभूत्तदा ॥ ५४।५५ ॥
तत्रैकं मुकुटोद्बद्धमन्यच्च जटजालकम्।
एकं प्रध्मापयच्छङ्खमन्यड्डमरुकं शुभम् ॥ ५६ ॥
एकं खड्गकरं तत्र तथान्यन्दण्डधारिणम्।
एकङ्कौस्तुभदीप्ताङ्गमन्यं भस्मविभूषितम् ॥ ५७ ॥
एकं गदां भ्रमयन्तं† द्वितीयं दण्डमेव च।
एकं शोभतिं‡ कण्ठस्थैर्मणिभिः स्वस्थिभिः परम् ॥ ५८ ॥

---

* यत्प्रजमिति (ग)।

† भ्रमयतीति (क), (ख)।

‡ शोभतीति आर्षं, शोभत इति साधु।

एकं पीताम्बरं तत्र द्वितीयं सर्पमेखलम् ।
एवं तौ स्पर्द्धिनावस्तौ* रौद्रनारायणात्मकौ ॥
अन्योऽन्यातिशयोपेतौ तदालोक्य पितामहः ।
उवाच शाम्यतामस्ते स्वस्वभावेन सुव्रते ॥ ५९।६० ।
एवं ते ब्रह्मणा प्रोक्ते शान्तभावं प्रजग्मतुः ।
अथ विष्णुहरौ ब्रह्मा वाक्यमेतदुवाच ह ॥ ६१ ।
उभौ हरिहरौ देवौ लोके ख्यातिं गमिष्यथः ।
अयञ्च यज्ञो विध्वस्तः सम्पूर्णत्वं गमिष्यति ॥ ६२ ।
दक्षस्य ख्यातिमाँल्लोके सन्तत्यायं भविष्यति ॥ ६३ ।
एवमुक्त्वा हरिहरौ तदा लोकपितामहः ।
ब्रह्मा लोकानुवाचेदं रुद्रभागोऽस्य दीयताम् ॥ ६४ ।
रुद्रभागो ज्येष्ठभाग इतीयं वैदिकी श्रुतिः ।
स्तुतिञ्च देवाः कुरुत रुद्रस्य परमेष्ठिनः ॥ ६५ ।
भगनेत्रहरं देवं पूष्णो दन्तविनाशनम् ।
स्तुतिं कुरुत वः† शीघ्रं गीतैरेतैस्तु नामभिः ॥
येनायं वः प्रसन्नात्मा वरदत्वं भजेत ह ॥ ६६ ।
एवमुक्तास्तु ते देवा स्तोत्रं शम्भोर्महात्मनः ।
चक्रुः परमया भक्त्या नमस्कृत्य स्वयम्भुवे ॥ ६७ ।

देवा ऊचुः ।

नमो विषमनेत्राय नमस्ते त्र्यम्बकाय च ।

---

* अत्रास्तशब्दस्य तद्विशेषणानाञ्च पुंस्त्वमार्षम् ।

† चेति (ग) ।

नमः सहस्रनेत्राय नमस्ते शूलपाणिने ।
नमः खट्वाङ्गहस्ताय नमस्ते दण्डधारिणे ॥ ६८ ।
त्वं देव हुतभुग्ज्वालाकोटिभानुसमप्रभः ।
अदर्शने वयं देव मूढ़विज्ञानतोऽधुना ॥ ६९ ।

नमस्त्रिनेत्रार्त्तिहराय शम्भो
त्रिशूलपाणे विकृतास्यरूप ।
समस्तदेवेश्वर शुद्धभाव
प्रसीद रुद्राच्युत सर्व्वभाव ॥ ७० ।
पूष्णोऽस्य दन्तान्तक भीमरूप
प्रलम्बभोगीन्द्रलुलन्तकण्ठ ।
विशालदेहाच्युत नीलकण्ठ
प्रसीद विश्वेश्वर विश्वमूर्त्ते ॥ ७१ ।
भगाक्षिसंस्फोटनदक्षकर्म्मा
गृहाण भागं मखतः प्रधानम् ।
प्रसीद देवेश्वर नीलकण्ठ
प्रपाहि नः सर्व्वगुणोपपन्न* ॥ ७२ ।
सिताङ्गरागाप्रतिपन्नमूर्त्ते
कपालधारिंस्त्रिपुरघ्न देव† ।
प्रपाहि नः सर्व्वभयेषु चैवं‡

---

* सर्व्वभयेषु चैव इति (क) ।

† एतदर्द्धं (ख) पुस्तके नास्ति ।

‡ चैवेति (क), (ख) ।

उमापते पुष्करनालजन्म ॥ ७३ ।
पश्यामि ते* देहगतान्सुरेश
सर्गादयो वेदवराननन्त ।
साङ्गान् सविद्यान् सपदक्रमांश्च
सर्व्वान्निलीनांस्त्वयि देवदेव ॥ ७४ ।
भव सर्व्व महादेव पिनाकिन्रुद्र ते हर ।
नताः स्म सर्व्वे विश्वेश त्राहि नः परमेश्वर ॥ ७५ ।
इत्थं स्तुतस्तदा देवैर्देवदेवो महेश्वरः ।
तुतोष सर्व्वदेवानां वाक्यञ्चेदमुवाच ह ॥ ७६ ।

रुद्र उवाच† ।

भगस्य नेत्रं भवतु पूष्णो दन्तास्तथा मुखे ।
दक्षस्याच्छिद्रतां यातु यज्ञश्चाप्यदितेः सुताः ॥ ७७ ।
पशुभावं तथा चापि अपनेष्यामि वः सुराः ।
मद्दर्शनेन यो जातः पशुभावो दिवौकसाम् ।
स मयापहृतः सद्यः पतित्वं वो भविष्यति‡ ॥ ७८ ।
अहञ्च सर्व्वविद्यानां पतिराद्यः सनातनः ।
अहं वै पतिभावेन पशुमध्ये§ व्यवस्थितः ।

---

* पश्याम्यहमिति (ग) ।

† एष पाठः (ग) पुस्तके नास्ति ।

‡ (७८) अङ्कितः पाठः (क) पुस्तके नास्ति । (ख) पुस्तके स मयापहृत इत्यस्मादनन्तरं सभामध्ये व्यवस्थित इति पाठो वर्त्तते ।

§ मध्यमिति (ग) ।

अतः पशुपतिर्नाम मम लोके भविष्यति* ॥ ७९ ।
ये मां यजन्ति तेषां स्याद्दीचा पाशुपती भवेत् ॥ ८० ।
एवमुक्ते तु रुद्रेण ब्रह्मा लोकपितामहः ।
उवाच रुद्रं सस्नेहं स्मितपूर्व्वमिदं वचः ॥ ८१ ।
ध्रुवं पशुपतिर्देव त्वं लोके ख्यातिमेष्यसि ।
अयञ्च देवस्तन्नाम्ना लोके ख्यातिं गमिष्यति ॥ ८२ ।†
आराध्यश्च समस्तानां लोकादीनां गमिष्यति ॥ ८३ ।
एवमुक्त्वा तदा ब्रह्मा दचं प्रोवाच बुद्धिमान् ।
गौरीं प्रयच्छ रुद्राय पूर्व्वमेवोपपादिताम् ॥ ८४ ।
एवमुक्त्वा तदा देवस्तां कन्यां दचसन्निधौ ।
ददौ रुद्राय महते गौरीं परमशोभनाम् ॥ ८५ ।
दचस्य च प्रियं कुर्व्वन् बहुमानपुरःसरम् ।
गृहीतायान्तु कन्यायां दाचायण्यां पितामहः ।
ददौ रुद्राय निलयं कैलासं सुरसन्निधौ ॥ ८६ ।
रुद्रोऽपि प्रययौ भूतैः समं कैलासपर्व्वतम् ।
देवाश्चापि यथास्थानं स्वं स्वं जग्मुर्मुदान्विताः ॥ ८७ ।
ब्रह्मापि दचसहितः प्राजापत्यं पुरं ययौ ॥ ८८ ।

इति वराहपुराणे गौर्य्युत्पत्तिर्नाम एकविंशोऽध्यायः ।

---

* श्लोकोऽयं (ख) पुस्तके अन्यथैव पठितः । यथा—

स मयाऽपगतः सद्वसभामध्ये व्यवस्थितः ।
अतः पशुपतिर्नाम मम लोके भविष्यति ॥

† ८२ श्लोकः (क), (ख) पुस्तकयोर्नास्ति ।

द्वाविंशोऽध्यायः ।

महातपा उवाच ।

तस्मिन्निवसतस्तस्य रुद्रस्य परमेष्ठिनः ।
चुकोप गौरी देवस्य पितुर्वैरमनुस्मरन्* ॥ १ ।
चिन्तयामास देवस्य अनेनापहृतं पुरम् ।
यज्ञो विधिध्वंसितो यस्मात्तस्माद्देहं त्यजाम्यहम् ॥ २ ।
आराध्य तपसा तस्य गृहे भूत्वा व्रजाम्यहम् ।
कथं गच्छामि पितरं दक्षं चयितबान्धवम् ॥ ३ ।
भवपत्नी च दुहिता एवं सञ्चिन्त्य सुन्दरी ।
जगाम तपसे देवी हिमवन्तं महागिरिम् ॥ ४ ।
तत्र कालेन महता क्षपयन्ती कलेवरम् ।
स्वशरीराग्निना दग्धा ततः शैलसुताभवत् ।
उमा नामेति महती कृष्णा चेत्यभिधानतः ॥ ५ ।
लब्ध्वा तु शोभनां मूर्त्तिं हिमवन्तगृहे शुभाम् ।
पुनस्तपश्चकारोग्रं देवं स्मृत्वा त्रिलोचनम् ॥ ६ ।
असावेव पतिर्मह्यमित्युक्त्वा तपसि स्थिता ॥ ७ ।
कुर्वन्त्या तत्तपश्चोग्रं हिमवन्ते महागिरौ ।
कालेन महता देवस्तपसाराधितस्तया ।
आजगामाश्रमन्तस्या विप्रो भूत्वा महेश्वरः ॥ ८ ।
वृद्धः शिथिलसर्व्वाङ्गः स्खलंश्चैव पदे पदे ।

---

* अनुस्मरन्तीति साधु । एवं परत्रापि ।

छद्मात्तस्याः समीपन्तु आगत्य द्विजसत्तमः।
बुभुक्षितोऽस्मि मे देहि भद्रे भोज्यं द्विजस्य तु। ९॥
एवमुक्ता तदा कन्या उमा शैलसुता शुभा।
उवाच ब्राह्मणं भोज्यं दद्मि विप्र फलादिकम्।
कुरु स्नानं द्रुतं विप्र भुञ्जस्वान्नं* यदृच्छया॥ १०।
एवमुक्तस्तदा विप्रस्तस्याः पार्श्वे महानदीम्।
गङ्गां जगाम स्नानार्थं स्नानं कर्त्तुमवातरत्॥ ११।
स्नानन्तु कुर्व्वता तेन रुद्रेण द्विजरूपिणा।
भूत्वा मायामयं भीमं मकरं भयदर्शनम्।
ग्राहितस्तु तदा विप्रस्तेन दुष्टेन मद्गुना॥ १२।
दृष्ट्वा धृतमथात्मानं मकरेण बलीयसा।
हृद्गमात्मानमन्यन्तां दर्शयन्वाक्यमब्रवीत्॥ १३।
अब्रह्मण्यङ्कृतं कन्ये त्रायस्व मामतो झषात्।
यावन्न याति विकृतिं तावन्मात्वातुमर्हसि॥ १४।
एवमुक्ता तदा कन्या चिन्तयामास पार्व्वती।
पितृभावेन शैलेन्द्रं भर्त्तृभावेन शङ्करम्।
स्पृशामि तपसा पूता कथं विप्रं स्पृशाम्यहम्॥ १५।
यद्येनन्नापकर्षामि करेण च जले धृतम्।
तदानीं ब्रह्मवध्या† मे भविष्यति न संशयः॥ १६।

---

* भुञ्जस्व इति आर्षं, भुङ्क्ष्वेति साधु।

† ब्रह्महत्येति साधु, एवं परत्रापि।

अन्यं व्यतिक्रमे धर्म्ममपनेतुञ्च शक्यते ।
ब्रह्मवध्या पुनर्नैवमेवमुक्ता गतात्वरत्* ॥ १७ ।
सा गत्वा त्वरितं भीरुर्गृहीत्वा पाणिना द्विजम् ।
चकर्षान्तर्जलात्तावत्स्वयम्भूतपतिर्हरः ॥ १८ ।
यमाराध्य तपश्चर्त्तुमारब्धं शैलपुत्रया† ।
स एव भगवान्रुद्रस्तस्याः पार्श्ववलम्बितः ॥ १९ ।
तं दृष्ट्वा लज्जिता देवी पूर्व्वत्यागमनुस्मरन् ।
न किञ्चिदुत्तरं सुभ्रूर्वदति स्म सुलज्जया ॥ २० ।
तूष्णीम्भूतान्तु तां दृष्ट्वा गौरीं रुद्रो हसन्निव ।
पाणौ गृहीत्वा मां भद्रे कथन्त्यक्तुमिहार्हसि ॥ २१ ।
मत्पाणि‡ग्रहणं भद्रे वृथा यदि करिष्यसि ।
तदानीं ब्रह्मणः पुत्रमामाहारार्थं ब्रवीम्यहम्§ ॥ २२ ।
न भवेत्परिहासोऽयमुक्तं देवी परम्परा ।
लज्जमाना तदा वाक्यं वदति स्मितपूर्व्वकम् ॥ २३ ।
देवदेव त्रिलोकेश त्वदर्थोऽयं समुद्यमः ।
प्राग्जन्माराधितो भर्त्ता भवान्देवो महेश्वरः ॥ २४ ।
इदानीं मे भवान्देवः पतिर्नान्यो भविष्यति ।
किन्तु स्वामी पिता मह्यं शैलेन्द्रो मे भजामि तम् ॥ २५ ।

---

* अत्वरदिति आर्षं, अत्वरतेति साधु ।

† पुत्रयेति आर्षं, पुत्र्येति साधु ।

‡ त्वत्पाणीति (ग) ।

§ तदानीं ब्रह्मणः पुत्रीं त्वां भार्य्यार्थं ब्रवीम्यहमिति क्वचित्पाठः ।

अनुज्ञाप्य विधानेन ततः पाणिङ्ग्रहीष्यसि* ॥ २६ ।
एवमुक्ता† तदा देवी पितरं प्रति भामिनी ।
कृताञ्जलिपुटा भूत्वा हिमवन्तमुवाच ह ॥ २७ ।
इतोऽन्यजन्मभर्त्ता मे रुद्रो दक्षमखान्तकः ।
इदानीं तपसा सैव ज्ञातोऽभूद्गतिभावनः ॥ २८ ।
स च विश्वपतिर्भूत्वा ब्राह्मणो मे तपोवनम् ।
आगत्य भोजनार्थं मां याचयामास शङ्करः ॥ २९ ।
मया स्नातुं व्रजस्वेति चोदितो जाह्नवीं गतः ।
तत्रासौ वृद्धभावेन द्विजरूपेण शङ्करः ।
मकरेण धृतः पूर्व्वमब्रह्मण्यमुवाच ह ॥ ३० ।
ब्रह्महत्याभयात्तात मया पाणौ धृतस्ततः ।
धृतमात्रः स्वकन्देहं दर्शयामास शङ्करः ॥ ३१ ।
ततो मामब्रवीद्देवः पाणिग्रहणमागतम् ।
भविता देवि‡ मा किञ्चिद्विचारय तपोधने ॥ ३२ ।
एवमुक्ता त्वहं तेन शङ्करेण महात्मना ।
तदनुज्ञाप्य देवेशं भवन्तं प्रष्टुमागता ॥ ३३ ।
इदानीं यत्क्षमं§ कार्य्यं तच्छीघ्रं संविधीयताम् ॥ ३४
एवं श्रुत्वा तदा वाक्यं शैलराजो मुदा युतः ।

---

* एष श्लोकः (ग) पुस्तके नास्ति ।

† शालेति (ग) ।

‡ भवती देवीति (ख) ।

§ यत्कर्मेति (ग) ।

ऊचे दुहितरं कन्यां* तस्मिन्काले वराननः ॥ ३५ ।
पुत्रि धन्योऽस्म्यहं लोके यस्य रुद्रः स्वयं हरः ।
जामाता भविता देवस्त्वयाऽपत्यवदस्म्यम्† ॥ ३६ ।
स्थापितो मूर्द्ध्नि देवानामपि पुत्रि त्वया ह्यहम् ।
स्थीयतां क्षणमेकन्तु यावदागमनं मम ॥ ३७ ।
एवमुक्त्वा गतो राजा शैलानां ब्रह्मणोऽन्तिकम् ।
तत्र दृष्ट्वा महात्मानं सर्व्वदेवपितामहम् ॥
उवाच प्रणतो भूत्वा ब्रह्माणं शैलराट् ततः‡ ।
देवीमा दुहिता मह्यं§ तां रुद्राय ददाम्यहम्¶ ॥ ३८।३
प्रयच्छेोवाच देवानां तदा लोकपितामहः ॥ ४० ।
एवमुक्तः शैलराजः स्ववेश्मागम्य सत्वरम् ।
तुम्बुरुर्नारदश्चैव हाहां हूहूस्तथैव च ।
स गत्वा किन्नरांश्चैव असुरान्राक्षसानपि‖ ॥ ४१ ।
पर्व्वताः सरितः शैला वृक्षा ओषधयस्तथा ।
आगता मूर्त्तिमन्तो वै पर्व्वताः सङ्गमोपलाः ।

---

* उवाच दुहितां कन्यामिति (क), तत्र दुहितामिति आर्षं दुहितरमिति स एवं सर्व्वत्र ।

† अपत्यवानिति साधु ।

‡ शैलराट् तथेति (ग) ।

§ मह्यमित्यत्र षष्ठीस्थाने चतुर्थी (आर्षमिदम्) ।

¶ देवीमा दुहिता मह्यमुद्विवदति तां शुभामिति (ग) ।

‖ धमापिकाक्रिया नास्ति । तथा परत्रापि (४२) श्लोके ।

हिमवद्दुहितान्द्रष्टुं विवाहं शङ्करेण ह ॥ ४२ ।
तत्र वेदी चितिश्चासीत्कलशाः सप्त सागराः ।
सूर्य्यो दीपस्तथा सोमः सरितो ववहुर्जलम्* ॥ ४३ ।
एवं विवाहसामग्रीं कृत्वा शैलनराधिपः ।
प्रेषयामास रुद्राय समीपं मन्दरं गिरिम् ॥ ४४ ।
स तदा शङ्करोक्तस्तु मन्दरो द्रुतमाययौ ।
विधिना सोमयां† पाणिं जग्राह परमेश्वरः ॥ ४५ ।
तत्रोत्सवे पर्व्वतनारदौ द्वौ
जगुश्च सिद्धा ननृतुर्वनस्पताः‡ ।
पुष्पाण्यनेकानि विचिक्षिपुः शुभा-
न्ननृतुरुच्चैः सुरयोषितो भृशम् ॥ ४६ ।
तस्मिन्विवाहे सलिलप्रवाहे
चतुर्मुखो लोकपरस्वसंस्थः ।
उवाच कन्यां तव पुत्रि लोके
नारी प्रभर्त्री तव चान्यपुंसाम् ॥ ४७ ।
इत्येवमुक्त्वा स उमां सरुद्रां
पितामहः स्वं पुरमाजगाम ॥ ४८ ।
स बभूव यथा प्रोक्तं प्रजापालाय पृच्छते ।

---

* ववहुरिति आर्षं, ऊहुरिति साधु। सरितो वै वहञ्जलमिति (ग), तत्राप्यवहन्निति साधु।

† स उमयेति साधु।

‡ वनस्पता इति आर्षं, वनस्पतय इति साधु।

ऋषिणा महता पूर्व्वं तपसा भावितात्मना ॥ ४९ ।
गौर्य्या उत्पत्तिरेषा वै कथिता परमर्षिणा ।
विवाहश्च यथा वृत्तस्तत्सर्व्वं कथितन्तव ॥ ५० ।
एतत्सर्व्वन्तु गौर्य्या वै सम्पन्नन्तु तृतीयया ।
तस्यान्तिथौ तृतीयायां लवणं वर्ज्जयेत्सदा ॥ ५१ ।
यश्चोपोष्यति* नारी वा सा सौभाग्यन्तु विन्दति ॥ ५२ ।
दुर्भगा या तु नारी स्यात्पुरुषश्चातिदुर्भगः ।
एतच्छ्रुत्वा तृतीयायां लवणन्तु विवर्ज्जयेत् ॥ ५३ ।
सर्व्वकामानवाप्नोति सौभाग्यं द्रव्यसम्पदः ।
आरोग्यञ्च सदा लोके कान्तिं पुष्टिञ्च विन्दति ॥ ५४ ।

इति वराहपुराणे गौर्य्युद्वाहो नाम द्वाविंशोऽध्यायः ।

त्रयोविंशोऽध्यायः ।

प्रजापाल उवाच ।

कथं गणपतेर्जन्म मूर्त्तिमत्तञ्च सत्तम ।
एतन्मे संशयच्छिन्धि हृदि कष्टं व्यवस्थितम् ॥ १ ।

---

* उपोष्यतीति आर्षं, उपवत्स्यतीति साधु ।

महातपा उवाच ।

पूर्व्वं देवगणाः सर्व्वे ऋषयश्च तपोधनाः ।
कार्य्यारम्भं तथा चक्रुः सिद्ध्यति च न संशयः ॥ २ ।
सन्मार्गवर्त्तिषु तथा सिद्ध्यन्ते विघ्नतः क्रियाः* ।
असत्कारिषु सर्व्वेषु तद्वदेवमविघ्नतः ॥ ३ ।
ततो देवाः सपितरश्चिन्तयामासुरोजसः ।
असत्कार्य्येषु विघ्नार्थं सर्व्व एवाभ्यमन्त्रयन् ॥ ४ ।
ततस्तेषां तदा मन्त्रं कुर्व्वतां त्रिदिवौकसाम् ।
बभूव बुद्धिर्गमने रुद्रं प्रति महामतिम् ॥ ५ ।
ते तत्र रुद्रमामन्त्र्य कैलासनिलयं गुरुम् ।
ऊचुः सविनयं सर्व्वे प्रणिपातपुरःसरम् ॥ ६ ।

देवा ऊचुः ।

देवदेव महादेव शूलपाणे त्रिलोचन ।
विघ्नार्थमविशिष्टानामुत्पादयितुमर्हसि ॥ ७ ।
एवमुक्तस्तदा देवैर्भवः परमया मुदा ।
उमां निरीक्षयामास चक्षुषा निमिषेण ह ॥ ८ ।
देवानां सन्निधौ तस्य पश्यतोमां† महात्मनः ।
चिन्ताभूद्व्योम्नि मूर्त्तिर्नो दृश्यते केन हेतुना ॥ ९ ।
पृथिव्यां विद्यते मूर्त्तिरपां मूर्त्तिस्तथैव च ।
तेजसः श्वसनस्यापि मूर्त्तिरेषा तु दृश्यते ॥ १० ।

---

* 'ख'पुस्तकेऽतःपरं पादचतुष्टयं नास्ति ।

† पश्यतोमामिति आर्षं, पश्यत उमामिति साधु ।

आकाशञ्च कथं नेति मत्वा देवो जहास च ।
ज्ञानशक्तिः पुमान्दृष्टा यद्दृष्टं व्योम्नि शम्भुना ॥ ११ ॥
यथोक्तं ब्रह्मणा पूर्व्वं शरीरन्तु शरीरिणाम् ।
यच्चापि हसितन्तेन देवेन परमेष्ठिना ॥
एतत्कार्य्यच्चतुष्केण पृथिव्यादिचतुर्ष्वपि ।
मूर्त्तिमानतितेजस्वी हसतः परमेष्ठिनः ॥
प्रदीप्तास्यो महादीप्तः कुमारो भासयन्दिशः ।
परमेष्ठिगुणैर्युक्तः साक्षाद्रुद्र इवापरः ॥
उत्पन्नमात्रो देवानां व्युषितः संप्रमोहयन् ।
कान्त्या दीप्त्या तथा मूर्त्त्या रूपेण च महात्मवान् ॥१२-१५॥
तं दृष्ट्वा परमं रूपं कुमारस्य महात्मनः ।
उमाऽनिमेषनेत्राभ्यां तमपश्यत* भामिनी ॥ १६ ॥
तं दृष्ट्वा कुपितो देवः स्त्रीभावञ्चञ्चलं तथा ।
मत्वा कुमाररूपन्तु शोभनं मोहनं दृशाम् ॥ १७ ॥
ततः शशाप तन्देवो गणेशम्परमेश्वरः ।
कुमार गजवक्त्रस्त्वं प्रलम्बजठरस्तथा ।
भविष्यसि तथा सर्पै†रुपवीतगतिर्ध्रुवम् ॥ १८ ॥
एवं शशाप तन्देवस्तीव्रकोपसमन्वितः ।
धुन्वन् शरीरमुत्थाय ततो देवो रुषान्वितः ॥ १९ ॥
यथा यथासौ स्वशरीरमाद्य-

---

* अपश्यत इति आर्षं, अपश्यदिति साधु ।

† सर्व्वैरिति (क), (ख) ।

स्तुनोति देवस्त्रिशिखास्तपोभिः।
तथा तथा चाङ्गरुहाच्चकासे
जलं चितौ संन्यपतत्तथान्ये॥
विनायकानेकविधा* गजास्या-
स्तमालनीलाञ्जनसन्निकाशाः।
उत्तस्थुरुच्चैर्विविधास्त्रहस्ता-
स्ततस्तु देवा मनसाकुलेन॥ २०।२१॥
किमेतदित्यद्भुतकर्म्मकारी
ह्येकः करोत्यप्रतिमं महच्च।
कार्य्यं सुराणां कृतमेतदिष्टं
भवेद्यथैनं धरितः कुतस्तत्॥ २२॥
दिवौकसाश्चिन्तयतां तथा तु
विनायकैः क्ष्मा चुभिता बभूव।
चतुर्मुखस्याप्रतिमं† विमान-
मारुह्य खे वाक्यमिदं जगाद॥ २३॥
धन्याः स्थ देवाः सुरनायकेन
त्रिलोचनेनाद्भुतरूपिणा च।
अनुगृहीताः परमेश्वरेण
सुरद्विषां विघ्नकृतान्ततौ च॥ २४॥
इत्येवमुक्त्वा प्रपितामहस्ता-

---

* विनायका अनेकविधा इति साधु।

† चतुर्मुखश्चाऽप्रतिम इति (ख)।

यश्चैतत्पठते स्तोत्रं यश्चैतच्छृणुयात्सदा ।
न तस्य विघ्ना जायन्ते न पापं सर्वथा नृप ॥ ३८ ।

इति वराहपुराणे विनायकोत्पत्तिर्नाम त्रयोविंशोऽध्यायः ।

चतुर्विंशोऽध्यायः ।

धरण्युवाच ।

कथन्ते गात्रसंस्पर्शान्मूर्त्तिमन्तो महाबलाः ।
नागा बभूवुर्दैवस्य कारणन्ते महीधर ॥ १ ।

वराह उवाच ।

श्रुत्वा गणपतेर्जन्म प्रजापालो नराधिपः ।
उवाच श्लक्ष्णया वाचा तं मुनिं शंसितव्रतम् ॥ २ ।

प्रजापाल उवाच ।

भगवंस्तार्त्त्वविषयाः कथं मूर्त्तिमुपागताः ।
नागा बभूवुः कुटिला एतदाख्यातुमर्हसि ॥ ३ ।

महातपा उवाच ।

सृजता ब्रह्मणा सृष्टिं मरीचिसूतिकारणम् ।
प्रथमं मनसा ध्यातस्तस्य पुत्रस्तु कश्यपः ॥ ४ ।

तस्य दाचायणी भार्य्या कद्रुर्नाम शुचिस्मिता ।
मारीचो जनयामास तस्यां पुत्रान्महाबलान् ॥ ५ ॥
अनन्तं वासुकिञ्चैव कम्बलञ्च महाबलम् ।
कर्कोटकञ्च राजेन्द्र पद्मञ्चान्यं सरीसृपम् ॥
महापद्मन्तथा शङ्खं कुलिकं पापराजितम् ।
एते कश्यपदायादाः प्रधानाः परिकीर्त्तिताः ॥ ६।७ ।
एतेषान्तु प्रसूत्या तु इदमापूरितं जगत् ॥ ८ ।
कुटिला हीनकर्म्माणस्तीक्ष्णास्योत्थविषोल्वणाः ।
दृष्ट्वा सन्दश्य मनुजान् भस्म कुर्य्युः क्षणाद्ध्रुवम् ॥ ९ ।
शब्दगामी यथा सर्पो मनुष्याणां नराधिप ।
अहन्यहनि जायेत क्षयः परमदारुणः ॥ १० ।
आत्मनस्तु क्षयं दृष्ट्वा प्रजाः सर्वाः समन्ततः ।
जग्मुः शरण्यं शरणं परन्तु परमेश्वरम् ॥ ११ ।
इममेवार्थमुद्दिश्य प्रजाः सर्व्वा महीपते ।
ऊचुः कमलजन्देवं पुराणं ब्रह्मसंज्ञितम् ॥ १२ ।
त्राहि नस्तीक्ष्णदंष्ट्रेभ्यो भुजङ्गेभ्यो महाबल ।
अहन्यहनि ये देव पश्येयुरुरगा दृशा ।
मनुष्यं मृगयूथं वा तत्सर्वं भस्मसाद्भवेत् ॥ १३ ।
त्वया सृष्टिः कृता देव लीयते सा भुजङ्गमैः ।
एतज्ज्ञात्वा तु दुर्वृत्तं तत्कुरुष्व महामते ॥ १४ ।

ब्रह्मोवाच ।

अहं रक्षां विधास्यामि भवतीनां न संशयः ।

व्रजध्वं स्वानि धिष्ण्यानि प्रजापाला: ससाध्वसा:* ॥ १५ ।
एवमुक्ताव्रजंस्तेन ब्रह्मणाव्यक्तमूर्त्तिना ।
आगतासु प्रजास्वाद्यस्तानाहूय भुजङ्गमान् ।
शशाप† परमक्रुद्धो वासुकिप्रमुखांस्तथा ॥ १६ ।

ब्रह्मोवाच ।

यतो मत्प्रभवान्नित्यं चयं नयत मानुषान् ।
भवान्तरे अथान्यस्मिन्मातु: शापात्सुदारुणात् ।
भवितातिच्चयो घोरो नूनं स्वायम्भुवेऽन्तरे‡ ॥ १७ ।
एवमुक्तास्तु वेपन्तो ब्रह्मणो भुजगोत्तमा: ।
निपत्य पादयोस्तस्य इदमूचुर्वचस्तदा ॥ १८ ।

नागा ऊचु: ।

भगवन्कुटिला जातिरस्माकं भवता कृता ।
विषोल्बणत्वं क्रूरत्वं दृक्शस्त्रत्वञ्च नो त्वया ।
सम्पादितं त्वया देव इदानीं शमयाच्युत ॥ १९ ।

ब्रह्मोवाच ।

यदि नाम मया सृष्टा भवन्त: कुटिलाशया: ।
तत: किं मनुजान्नित्यं भच्चयध्वं गतव्यथा: ॥ २० ।

नागा ऊचु: ।

मर्य्यादां कुरु देवेश स्थानञ्चैव पृथक् पृथक् ॥ २१ ।

---

* सशायका इति (ग) ।

† शमयामास इति साधु ।

‡ तस्य इदमूचुर्वचस्तदिति (ग), तत्र १८श: श्लोको नास्ति ।

नागानां वचनं श्रुत्वा [illegible] वचनमब्रवीत् ।
अयं करोमि वो नागाः समयं मनुजैः सह ॥ २२ ।
तदेकमनसः सर्व्वे शृणुध्वं मम शासनम् ॥ २३ ।
पातालं वितलञ्चैव सुतलाख्यं तृतीयकम् ।
दत्तं वै वस्तुकामानां गृहं तत्र गमिष्यथ ॥ २४ ।
तत्र भोगान्बहुविधान्भुञ्जाना मम शासनात् ।
तिष्ठध्वं सप्तमं यावद्रात्रयन्तं ते पुनः पुनः* ॥ २५ ।
ततो वैवस्वतस्यादौ काश्यपेया भविष्यथ ।
दायादाः सर्व्वदेवानां सुपर्णस्य च धीमतः† ॥ २६ ।
तदा प्रसूतिर्वः सर्व्वा भोच्यते चित्रभानुना ।
भवतान्नैव दोषोऽयं भविष्यति न संशयः ॥ २७ ।

ये वै क्रूरा भोगिनो दुर्विनीता-
स्तेषामन्तो भविता नान्यथैतत् ।
कालप्राप्तं भक्षयध्वं दशध्वं
तथाऽपकारे च कृते मनुष्यान् ॥ २८ ।
मन्त्रौषधैर्गारुड़मण्डलैश्च
बद्धैर्हृष्टैर्मानवा ये चरन्ति ।
तेषां भीतैर्वर्त्तितव्यं न चान्य-

---

* २४, २५ श्लोकौ (ग) पुस्तके न स्तः ।

† श्लोकोऽयं (ग) पुस्तक एवं पठितः—

दत्तं तत्र पुनस्तत्र ष्यादौ वैवस्वतान्वया ।

आयाताः सर्व्वदेवानां सुपर्णस्य च धीमतः ॥ इति

श्चिन्त्यं कार्य्यश्चान्यथा वो विनाशः ॥ २९ ।
इतीरिते ब्रह्मणि ते भुजङ्गा-
जग्मुः स्थानं क्ष्मातलाख्यं हि सर्व्वे ॥ ३० ।
एवं शापन्ते तु लब्ध्वा प्रसादञ्च चतुर्मुखात् ।
तस्थुः पातालनिलयं मुदितेनान्तरात्मना ॥ ३१ ।
एतत्सर्व्वञ्च पञ्चम्यां तेषाञ्जातं महात्मनाम् ।
अतः प्रियं* तिथिर्धन्या सर्व्वपापहरा शुभा ॥ ३२ ।
एतस्यां संयतो यस्तु अम्लन्तु† परिवर्ज्जयेत् ।
क्षीरेण स्नापयेन्नागांस्तस्य यास्यन्ति मित्रताम् ॥ ३३ ।

इति वराहपुराणे नागोत्पत्तिर्नाम चतुर्विंशोऽध्यायः ।

—०—

पञ्चविंशोऽध्यायः ।

प्रजापाल उवाच ।

अहङ्कारात्कथं जज्ञे कार्त्तिकेयो द्विजोत्तम ।
एतन्मे संशयञ्छिन्धि पृच्छतो वै महामुने ॥ १ ।

---

* अन्तरिक्षमिति (ग) ।

† अल्पमिति (ग) ।

महातपा उवाच।

सर्व्वेषामेव तत्त्वानां यः परः पुरुषः स्मृतः।
तस्माद्व्यक्तमुत्पन्नं तत्त्वादि त्रिविधन्तु तत्॥ २ ।
पुरुषाव्यक्तयोर्मध्ये महत्त्वं समपद्यत।
सचाहङ्कार इत्युक्तो यो महान्समुदाहृतः॥ ३ ।
पुरुषो विष्णुरित्युक्तः शिवो वा नामतः स्मृतः।
अव्यक्तन्तु उमा देवी श्रीर्वा पद्मनिभेक्षणा॥ ४ ।
तत्संयोगादहङ्कारः स च सेनापतिर्गुहः।
तस्योत्पत्तिम्प्रवक्ष्यामि शृणु राजन्महामते॥ ५ ।
आद्यो नारायणो देवस्तस्माद्ब्रह्मा ततोऽभवत्।
अतः स्वयम्भुवश्चान्ये मरीच्याद्यार्कसम्भवाः॥ ६ ।
तेभ्यारभ्य सुरा दैत्या गन्धर्व्वा मानुषाः खगाः।
पशवः सर्व्वभूतानि सृष्टिरेषा प्रकीर्त्तिता॥ ७ ।
सृष्टां विस्तारितायान्तु देवदैत्या महाबलाः।
सात्वतं भावमास्थाय युयुधुर्विजिगीषवः॥ ८ ।
दैत्यानाम्बलिनः सन्ति नायका युद्धदुर्मदाः।
हिरण्यकशिपुः पूर्व्वं हिरण्याक्षो महासुरः॥
विप्रचित्तिर्विचित्रस्तु भीमाक्षः क्रौञ्च एव च।
एतेऽतिबलिनः शूरा देवसैन्यं महामृधे।
अमरांश्चाशितैर्वाणैर्जयन्ते*ऽनुदिनं मृधे॥ ९।१० ।
तेषां पराजयं दृष्ट्वा देवानाञ्च बृहस्पतिः।

---

* जयन्ते इति आर्षं, जयन्तीति साधु।

उवाच हीनं वै सैन्यं* नायकेन विना सुराः ॥ ११ ।
एकेनेन्द्रेण दिव्यन्तु सैन्यम्पातुं न शक्यते ।
अतः सेनापतिं कञ्चिदन्वेषयत मा चिरम् ॥ १२ ।
एवमुक्तास्ततो देवा जग्मुर्लोकपितामहम् ।
सेनापतिञ्च नो देहि वाक्यमूचुः ससम्भ्रमम् ॥ १३ ।
ततो दध्यौ चतुर्वक्तः किमेषां क्रियते मया ।
ब्रह्मणश्चिन्त्यमानस्य रुद्रम्प्रति मनो गतम् ॥ १४ ।
ततो देवाः सगन्धर्वा ऋषयः सिद्धचारणाः ।
ब्रह्माणं पुरतः कृत्वा जग्मुः कैलासपर्व्वतम् ॥ १५ ।
तत्र दृष्ट्वा महादेवं शिवं पशुपतिं विभुम् ।
तुष्टुवुर्विविधैः स्तोत्रैः शक्राद्यास्त्रिदिवौकसः ॥ १६ ।

देवा ऊचुः ।

नमाम† सर्व्वे शरणार्थिनो वयं
महेश्वरन्त्र्यम्बकभूतभावनम् ।
उमापते विश्वपते मरुत्पते
जगत्पते शङ्कर पाहि नः स्वयम् ॥ १७ ।
जटाकलापाग्रशशाङ्कदीधिति-
प्रकाशिताशेषजगत्त्रयामल ।
त्रिशूलपाणे पुरुषोत्तमाच्युत

---

* (ग) पुस्तके एतेऽतिबलिनः शूरा इत्यतः परं हीनं वै सैन्यमित्यवधिकः पाठो नास्ति । तत्र १२श श्लोकस्य परार्द्धं, १३श श्लोकस्य पूर्व्वार्द्धञ्च नास्ति ।

† नमाम. सर्व्वे इति साधु ।

प्रपाहि नो दैत्यभयादुपस्थितात् ॥ १८ ।
त्वमादिदेवः पुरुषोत्तमो हरि-
र्भवो महेशस्त्रिपुरान्तको विभुः ।
भगाक्षहा दैत्यरिपुः पुरातनो
वृषध्वजः पाहि सुरोत्तमोत्तम* ॥ १९ ।
गिरीशजानाथ गिरिप्रियाप्रिय
प्रभुः समस्तामरलोकपूजितः ।
गणेश भूतेश शिवाक्षयाय
प्रपाहि नो दैत्यवरान्तकाच्युत ॥ २० ।
पृथ्व्यादितत्त्वेषु भवान्प्रतिष्ठितो
ध्वनिस्वरूपो गगने विशेषतः ।
लीनो द्विधा तेजसि स त्रिधा जले
चतुः क्षितौ पञ्च गुणप्रधानः ॥ २१ ।
अग्निस्वरूपोऽसि तरौ तथोपले
सत्त्वस्वरूपोऽसि तथानिलेष्वपि ।
तैलस्वरूपो भगवान्महेश्वरः
प्रपाहि नो दैत्यगणार्दितान्हर ॥ २२ ।
नासीद्यदा काण्डमिदन्त्रिलोचन
प्रभाकरेन्द्रेन्दुविनापि वा कुतः ।
तदा[†] भवानेव विरुद्धलोचन

१८श श्लोकस्य परार्द्धं (ग) पुस्तके नास्ति, २०श श्लोकस्य प्रथमपादश्च ।
सदेति (ग) ।

प्रमाणबाधादि*विवर्ज्जितः स्थितः ॥ २३ ।
कपालमालिन् शशिखण्डशेखर
श्मशानवासिन्सितभस्मगुण्ठितः ।
फणीन्द्रसंवीततनोऽन्तकाय
प्रपाहि नो दक्षधिया सुरेश्वर ॥ २४ ।
भवान्पुमान् शक्तिरियं गिरेः सुता-
सर्व्वाङ्गरूपा भगवंस्तथा त्वयि ।
त्रिशूलरूपेण जगद्भयङ्करे
स्थितं त्रिनेत्रेषु मखाग्नयस्त्रयः ॥ २५ ।
जटास्वरूपेण समस्तसागराः
कुलाचलाः सिन्धुवहाश्च सर्व्वशः ।
शरीरजं ज्ञानमिदन्त्ववस्थित-
न्तदेव पश्यन्ति कुदृष्टयो जनाः ॥ २६ ।
नारायणस्त्वं जगतां समुद्भव-
स्तथा भवानेव चतुर्मुखो महान् ।
सत्त्वाग्निभेदेन तथाग्निभेदतो
युगादिभेदेन च संस्थितस्त्रिधा ॥ २७ ।
भवन्तमेते सुरनायकाः प्रभो
भवार्थिनोऽन्यस्य वदन्ति तोषयन् ।
यतस्ततो नो भवभूतिभूषण
प्रपाहि विश्वेश्वर रुद्र ते नमः ॥ २८ ।

---

* वायुरीति (ग) ।

महातपा उवाच ।

एवं स्तुतस्तदा देवो रुद्रः पशुपतिः सुरैः ।
उवाच देवानव्यग्रः किं कार्य्यं ब्रूत मा चिरम् ॥ २९

देवा ऊचुः ।

सेनापतिञ्च देवेश देहि दैत्यवधाय वै ।
देवानां ब्रह्ममुख्यानामेतदेव हितम्भवेत् ॥ ३० ।

रुद्र उवाच ।

ददामि सेनानाथं वो देवा भवत विज्वराः ।
भविष्यमस्ति पौराणां योगादीनामचिन्तयत् ॥ ३१ ।
एवमुक्ता हरो देवान्विसर्ज्य* स्वाङ्गसंस्थिताम् ।
शक्तिं सङ्क्षोभयामास पुत्रहेतोः परन्तप ॥ ३२ ।
तस्य क्षोभयतः शक्तिं ज्वलनार्कसमप्रभः ।
कुमारः सहजां शक्तिं बिभ्रज्ज्ञानैकशालिनीम् ॥ ३३ ।
उत्पत्तिस्तस्य राजेन्द्र बहुरूपा व्यवस्थिता ।
मन्वन्तरेष्वनेकेषु देवसेनापतिः किल ॥ ३४ ।
योऽसौ शरीरगो देवः अहङ्कारेति† कीर्त्तितः ।
प्रयोजनवशाद्देवः सैव‡ सेनापतिर्बभौ ॥ ३५ ।
तस्मिन्जाते स्वयं ब्रह्मा सर्व्वदेवैः समन्वितः ।

---

* विसर्ज्येति आर्षं, विसृज्येति साधु ।

† अहङ्कार इति साधु ।

‡ स एवेति साधु ।

पूजयामास देवेशं शिवं पशुपतिन्तदा* ॥ ३६ ।
सर्व्वैश्च देवैर्ऋषिभिश्च सिद्धैः
सेनापतिर्दानवरेण तेन ।
आप्यायितः सोऽपि सुरानुवाच
सहायौ मे क्रीड़नकञ्च दध्वम् ॥ ३७ ।
श्रुत्वा वचस्तस्य महानुभावो
वाक्यं महादेव इदं जगाद ।
ददामि ते क्रीड़नकन्तु कुक्कुटं
तथानुगौ शाखविशाखसंज्ञौ ॥
कुमार भूतग्रहनायको भवान्
भवस्व देवेश्वर सेनायाः पतिः ॥ ३८ ।
एवमुक्ता ततो देवः सर्व्वदेवाश्च पार्थिव ।
तुष्टुवुर्वाग्भिरिष्टाभिः स्कन्दं सेनापतिन्तदा ॥ ३९ ।

देवा ऊचुः ।

भवस्व† देवसेनानीर्महेश्वरसुत प्रभो ।
षण्मुख स्कन्द विश्वेश कुक्कुटध्वज पावके ॥ ४० ।
कम्पितारे कुमारेश स्कन्द बालग्रहानुग ।
जितारे क्रौञ्चविध्वंस कृत्तिकाज शिवात्मज ॥ ४१ ।
भूतग्रहपतिश्रेष्ठ पावकप्रियदर्शन ।
महाभूतपतेः पुत्र त्रिलोचन नमोऽस्तु ते ॥ ४२ ।

---

* एतदर्द्धं (ग) पुस्तके नास्ति ।

† भवस्वेति आर्षं, भव इति साधु ।

एवं स्तुतस्तदा देवैर्विवर्द्धन्* भवनन्दनः।
द्वादशादित्यसङ्काशो बभूवातुलविक्रमः॥ ४३।
त्रैलोक्यन्तेजसा स्वेन तपयामास† पार्थिव॥ ४४।

प्रजापाल उवाच।

कथं त्वं कृत्तिकापुत्रमुक्तवान् शंस मे गुरो।
कथं वा पावकिरसौ कथं षण्मातृनन्दनः॥ ४५।‡

महातपा उवाच।

आदिमन्वन्तरे देवस्योत्पत्तिर्या मयोदिता।
परोक्षदर्शिभिर्देवैरेवमेव स्तुतः प्रभो॥ ४६।
कृत्तिका पावकस्तस्य मातरौ गिरिजा तथा।
द्वितीयजन्मनि गुहस्यैते उत्पत्तिहेतवः॥ ४७।
एवमेतत्तवाख्यातं पृच्छतो पार्थिवोत्तम।
आत्मविद्यामृतं गुह्यमहङ्कारस्य सम्भवः॥ ४८।
स्वयं स्कन्दो महादेवः सर्व्वपापप्रणाशनः।
तस्य षष्ठीं तिथिं प्रादादभिषेके पितामहः॥ ४९।
अस्यां फलाशनो यस्तु पूजे§न्नियतमानसः।

---

* विवर्द्धन्निति आर्षं, विवर्द्धमान इति साधु।

† तापयामासेति साधु।

‡ एष श्लोकः (ख) (ग) पुस्तकयोर्नास्ति।

§ पूजयेदिति साधु।

अपुत्त्रो लभते पुत्त्रमधनोऽपि* धनं लभेत्† ॥ ५० ॥
यं यमिच्छेत‡ मनसा तन्तं लभति मानवः ॥ ५१ ॥
यश्चैतत्पठति स्तोत्रं कार्त्तिकेयस्य मानवः ।
तस्य गेहे कुमाराणां क्षेमारोग्यं भविष्यति ॥ ५२ ॥

इति वराहपुराणे स्कन्दोत्पत्तिर्नाम पञ्चविंशोऽध्यायः ।

—•◎•—

षड्विंशोऽध्यायः ।

प्रजापाल उवाच ।

शरीरस्य कथं मूर्त्तिग्रहणं ज्योतिषो द्विज ।
एतन्मे संशयं छिन्धि प्रणतस्य द्विजोत्तम ॥ १ ॥

महातपा उवाच ।

योऽसावात्मा ज्ञानशक्तिरेक एव सनातनः ।
स द्वितीयं यदा चैच्छत्तदा तेजः समुत्थितम् ॥ २ ॥
तत्सूर्य्य इति भास्वांस्तु अन्योन्येन महात्मनः ।
लीनीभूतानि तेजांसि भासयन्ति जगत्त्रयम् ॥ ३ ॥

---

* पुत्त्रान्निर्द्धनोऽपीति (ग) ।

† लभेतेति साधु ।

‡ इच्छेत इति आर्षं, इच्छेदिति साधु । लभतीति आर्षं लभत इ। अपिच सामान्यार्थे नपुंसकमिति न्यायाद्यत्तत्तदित्युचितम् ।

तस्मिन् सर्वे सुराः सिद्धा गणाः सर्वैर्महर्षिभिः।
स्वयम्भूत इति विभो तस्मात्सूर्य्यस्तु सोऽभवत् ॥ ४ ।
लीनीभूतस्य तस्याशु तेजसोऽभूच्छरीरकम्।
पृथक्त्वेन रविः सोऽथ कीर्त्यते वेदवादिभिः ॥ ५ ।
भासयेत्सर्व्वलोकांस्तु यतोऽसावुत्थितो दिवि।
अतोऽसौ भास्करः प्रोक्तः प्रकर्षाच्च प्रभाकरः ॥ ६ ।
दिवा दिवस इत्युक्तस्तत्कारित्वाद्दिवाकरः।
सर्व्वस्य जगतस्त्वादिरादित्यस्तेन उच्यते ॥ ७ ।
एतस्य तेजसा जाता आदित्या द्वादश पृथक्।
प्रधान एक एवायं जगत्तु परिवर्त्तते ॥ ८ ।
तं दृष्ट्वा जगतो व्याप्तिं कुर्व्वाणं परमेश्वरम्।
तस्यैवान्तःस्थिता देवा विनिष्क्रम्य स्तुतिं जगुः ॥ ९ ।

देवा ऊचुः।

भवान् प्रसूतिर्जगतः पुराणः
प्रपासि विश्वं प्रलये च हंसि।
समुत्थितस्त्वं सततं प्रपासि
विश्वं सदा त्वां प्रणताः स्म नित्यम् ॥ १० ।
त्वया ततं सर्व्वत एव तेजः
प्रतापितं सूर्य्य यज्ञप्रवृत्तौ।
सप्ताश्वयुक्ते च रथे स्थितस्त्वं
कालाद्यमन्वन्तरवेगयुक्ते ॥ ११ ।
प्रभाकरस्त्वं रविरादिदेवः

आत्मा समस्तस्य चराचरस्य ।
पितामहस्त्वं वरुणो यमश्च
भूतम्भविष्यच्च वदन्ति सिद्धाः ॥ १२ ।
तेजोऽरिविध्वंसन वेदमूर्त्ते
प्रपाहि चास्मान् शरणागतान् सदा ।
वेदान्तवेद्योऽसि मखेषु देव
त्वं ह्रयसे विष्णुरिति प्रसन्न ॥ १३ ।
इति स्तुतस्तैः सुरनाथ भक्त्या
प्रपाहि शम्भो न इति प्रसह्य ॥ १४ ।
एवमुक्तस्तदा देवैः सौम्यां मूर्त्तिमथाकरोत् ।
प्रकाशत्वं जगामाशु देवतानां महाप्रभः ॥ १५ ।
एतत्सर्व्वसुराणान्तु दहनं शामितन्त्वया ।
सप्तम्यां खलु सूर्य्येण मूर्त्तिस्त्वं कृतवान् भुवि ॥ १७ ।
एतां यः पुरुषो भक्त्या उपास्ते सूर्य्यमर्च्चयेत् ।
भास्करश्चैव तस्यासौ फलमिष्टं प्रयच्छति ॥ १८ ।
एतत् ते कथितं राजन् सूर्य्याख्यानं पुरातनम् ।
आदिमन्वन्तरे वृत्तं मातरः* शृणु साम्प्रतम् ॥ १९ ।

इति वराहपुराणे आदित्योत्पत्तिर्नाम षड्विंशोऽध्यायः ।

---

* मातर इति आर्षं, मातृरिति साधु ।

सप्तविंशोऽध्यायः ।

महातपा उवाच ।

पूर्व्वमासीन्महादैत्यो बलवानन्धको भुवि ।
स देवान्वशमानिन्ये ब्रह्मणो वरदर्पितः ॥ १ ।
तेनात्मसात्सुराः कृत्वा त्याजिता मेरुपर्व्वतम् ।
ब्रह्माणं शरणं जग्मुरन्धकस्य भयार्द्दिताः ॥ २ ।
तानागतांस्तदा ब्रह्मा उवाच सुरसत्तमान् ।
किमागमनकृत्यं वो देवा ब्रूत किमास्थते ॥ ३ ।

देवा ऊचुः ।

अन्धकेनार्द्दिताः सर्व्वे वयं देवा जगत्पते ।
त्राहि सर्व्वांश्चतुर्वक्त्र पितामह नमोऽस्तु ते ॥ ४ ।

ब्रह्मोवाच ।

अन्धकान्नैव शक्तोऽहं त्रातुं वै सुरसत्तमाः ।
भवं शर्व्वं महादेवं व्रजामः शरणार्थिनः ॥ ५ ।
किन्तु पूर्व्वं मया दत्तो वरस्तस्य सुरोत्तमाः ।
अवध्यस्त्वं हि भविता न शरीरं स्पृशेन्महीम्* ॥ ६ ।
तस्यैवं बलिनस्त्वेको हन्ता रुद्रः परन्तप ।
तत्र गच्छामहे सर्व्वे कैलासनिलयं प्रभुम् ॥ ७ ।
एवमुक्त्वा ययौ ब्रह्मा सदेवो भवसन्निधौ ।
तस्य सन्दर्शनाद्रुद्रः प्रत्युत्थानादिकाः क्रियाः ।

---

* न शरीरं स्पृशास्यहमिति (ग) ।

कृत्वास्तुवाच देवेशो ब्रह्माणं भुवनेश्वरम् ॥ ८ ।

शम्भुरुवाच ।

किं कार्य्यन्देवताः सर्व्वा आगता मम सन्निधौ ।
येनाहं तत्करोम्याशु आज्ञा कार्य्या हि सत्वरम् ॥ ९ ।
रक्षस्व देव बलिनस्त्वन्धकाद्दुष्टचेतसः ॥ १० ।
यावदेव सुराः सर्व्वे शंसन्ति परमेष्ठिनः ।
तावत्सैन्येन महता तत्र* चान्धक आययौ ॥ ११ ।
बलेन चतुरङ्गेण हन्तुकामो भवं मृधे ।
तस्य भार्य्यां गिरिसुतां हन्तुमिच्छं†त्ससाधनः ॥ १२ ।
तं दृष्ट्वा सहसायातं देवो दैत्यं प्रहारिणम् ।
सन्नह्य सहसा देवा रुद्रस्यानुचराभवन्‡ ॥ १३ ।
रुद्रोऽपि वासुकिन्ध्यात्वा तक्षकञ्च धनञ्जयम् ।
वलयं कटिसूत्रञ्च चकार परमेश्वरः ॥ १४ ।
नीलनामा तु दैत्येन्द्रो हस्ती भूत्वा भवान्तिकम् ।
आगतस्त्वरितः शत्रुर्हस्तीवाद्भुतरूपवान् ॥ १५ ।
संज्ञातो नन्दिना दैत्यो वीरभद्राय दर्शितः ।
वीरभद्रोऽपि सिंहेन रूपेणाहत्य च द्रुतम् ॥
तस्य कृत्तिं विदार्य्याशु करिणस्त्वञ्जनप्रभाम् ।
रुद्रायार्पितवान्सोऽपि तमेवाम्बरमाकरोत् ॥ १६।१७ ।

---

* तत्रैवेति (ग) ।

† इच्छदिति आर्षं, ऐच्छदिति साधु ।

‡ अनुचरा अभवन्निति साधु ।

ततः प्रभृति रुद्रोऽपि गजचर्म्मपटोऽभवत् ॥ १८ ।
गजचर्म्मपटो भूत्वा भुजङ्गाभरणोज्ज्वलः ।
आदाय त्रिशिखं शूलं सगणोऽन्धकमन्वयात् ॥ १९ ।
ततः प्रववृते युद्धं देवदानवयोर्महत् ॥ २० ।
इन्द्राद्या लोकपालास्तु स्कन्दः सेनापतिस्तथा ।
सर्व्वे देवगणाश्चान्ये युयुधुः समरे तदा ॥ २१ ।
तद्दृष्ट्वा नारदस्तूर्णं ययौ नारायणं प्रति ।
शशंस च महद्युद्धं कैलासे दानवैः सह ॥ २२ ।
तच्छ्रुत्वा चक्रमादाय गरुड़स्थो जनार्द्दनः ।
तमेव देशमागत्य युयुधे दानवैः सह ॥ २३ ।
आगत्य च ततो देवा हरिणाप्यायिता रणे ।
विषस्सवदनाः सर्व्वे पलायनपराभवन्* ॥ २४ ।
तत्र भग्नेषु देवेषु स्वयं रुद्रोऽन्धकं ययौ ।
तत्र तेन महद्युद्धमभवल्लोमहर्षणम् ॥ २५ ।
तत्र देवोऽप्यसौ दैत्यं त्रिशूलेनाहनद्भृशम् ।
तस्याहतस्य यद्रक्तमपतद्भूतले किल ।
ततोऽन्धका असंख्याता बभूवुरपरे भृशम् ॥ २६ ।
तद्दृष्ट्वा महदाश्चर्य्यं रुद्रो शूलान्धकं मृधे ।
गृहीत्वा त्रिशिखाग्रेण ननर्त्त परमेश्वरः ॥ २७ ।
इतरेऽप्यन्धकाः सर्वे चक्रेण परमेष्ठिना ।
नारायणेन निहतास्तत्र येऽन्ये समुत्थिताः ॥ २८ ।

---

* पलायनपरा अभवन्निति साधु ।

असृक्धारातुषारैस्तु शूलप्रोतस्य चासकृत् ।
अनारतं समुत्तस्थौ ततो रुद्रो रुषान्वितः ॥ २९ ।
तस्य क्रोधेन महता मुखाज्ज्वाला विनिर्ययौ ।
तद्रूपधारिणी देवी या तां योगेश्वरीं विदुः ॥ ३० ।
स्वरूपधारिणी चान्या विष्णुनापि विनिर्म्मिता ।
ब्रह्मणा कार्त्तिकेयेन इन्द्रेण च यमेन च ॥ ३१ ।
वराहेण च देवेन विष्णुना परमेष्ठिना ।
पातालोद्धारणं रूपं तस्या देव्या विनिर्ममे ।
माहेश्वरी च माहेन्द्री इत्येता अष्ट मातरः* ॥ ३२ ।
कारणं यस्य यत्प्रोक्तं क्षेत्रज्ञेनावधारितम् ।
शरीरन्देवतानान्तु तदिदं कीर्त्तितं मया ॥ ३३ ।
कामः क्रोधस्तथा लोभो मदो मोहोऽथ पञ्चमः ।
मात्सर्य्यं षष्ठमित्याहुः पैशुन्यं सप्तमन्तथा ।
अनसूयाष्टमी ज्ञेया इत्येता अष्ट मातरः ॥ ३४ ।†
कामं योगीश्वरीं विद्धि क्रोधो माहेश्वरी तथा ।
लोभस्तु वैष्णवी प्रोक्ता ब्रह्माणी मद एव च ॥ ३५ ।
मोहः स्वयम्भूः कौमारी मात्सर्य्यञ्चेन्द्रजां विदुः ।
यमदण्डधरा देवी पैशुन्यं स्वयमेव च ॥ ३६ ।
अनसूया वराहाख्या इत्येताः परिकीर्त्तिताः ।
कामादिगण एषोऽयं शरीरम्परिकीर्त्तितम् ॥ ३७ ।

---

* माहेश्वरी च राजेन्द्र इत्येता अष्टमातरः इति (ख) ।

† (ख) पुस्तके ३३।३४ श्लोकौ न स्तः ।

जग्राह मूर्त्तिन्तु तथा यथा ते कीर्त्तितं मया ॥ ३८ ।
एताभिर्देवताभिश्च तस्य रक्तेऽतिशोषिते ।
क्षयं गतासुरी माया स च सिद्धोऽन्धकोऽभवत् ॥ ३९ ।
एतत्ते सर्वमाख्यातमात्मविद्यामृतं मया ॥ ४० ।
य एतच्छृणुयान्नित्यं मातॄणामुद्भवं शिवम् ।
तस्य ताः सर्वतो रक्षां कुर्वन्त्यनुदिनं नृप ॥ ४१ ।
यश्चैतत्पठते जन्म मातॄणां पुरुषोत्तम ।
स धन्यः सर्वथा लोके शिवलोकञ्च गच्छति ॥ ४२ ।
तासाञ्च ब्रह्मणा दत्ता अष्टमी तिथिरुत्तमा ।
एताः सम्पूजयेद्भक्त्या विल्वाहारो नरः सदा ।
तस्य ताः परितुष्टाः स्युः क्षेमारोग्यं ददन्ति च ॥ ४३ ।

इति वराहपुराणे कामादिमातृगणोत्पत्तिर्नाम सप्तविंशोऽध्यायः ।

अष्टाविंशोऽध्यायः ।

प्रजापाल उवाच ।

कथं माया समुत्पन्ना दुर्गा कात्यायनी शुभा ।
आदित्रिये स्थिता सूक्ष्मा पृथङ्मूर्त्त्या व्यजायत ॥ १ ।

महातपा उवाच ।

आसीद्राजा पुरा राजन् सिन्धुद्वीपः प्रतापवान् ।
वरुणांशो महाराज सोऽरण्ये तपसि स्थितः ॥ २ ।
पुत्रो मे शक्रनाशाय भवेदिति नराधिपः ।
एवं कृतमतिः सोऽथ महता तपसा स्वकम्* ।
कलेवरं स्थिरो† भूत्वा शोषयामास सुव्रत ॥ ३ ।

प्रजापाल उवाच ।

कथं तस्य द्विजश्रेष्ठ शक्रेणापकृतम्भवेत् ।
येनासौ तद्विनाशाय पुत्रमैच्छन् व्रते स्थितः ॥ ४ ।

महातपा उवाच ।

सोऽन्यजन्मनि पुत्रोऽभूत्त्वष्टुर्बलभृतां वरः‡ ।
अवध्यः सर्व्वशस्त्रौघैरपां फेनेन नाशितः ॥ ५ ।
जलफेनेन निहतस्तस्मिँल्लयमवाप्तवान्§ ।
पुनर्ब्रह्मान्वये जातः सिन्धुद्वीपः प्रतापवान् ॥ ६ ।
स तेपे परमं तीव्रं शक्रवैरमनुस्मरन् ॥ ७ ।
ततः कालेन महता नदी वेत्रवती शुभा ।
मानुषं रूपमास्थाय सालङ्कारं मनोरमम् ।
आजगाम यतो राजा तेपे परमकन्तपः ॥ ८ ।

---

* सदेति (ख) ।

† स्थित इति (ग) । त्वष्टुश्च वदतां वर इति (ग) ।

‡ बलवतां वर इति (ख) ।

§ ततो लयमवाप्तवानिति (ख) ।

तां दृष्ट्वा रूपसम्पन्नां स राजा क्षुब्धमानसः ।
उवाच कासि सुश्रोणि सत्यं कथय भामिनि ॥ ९ ।

नद्युवाच ।

अहं जलपतेः पत्नी वरुणस्य महात्मनः ।
नाम्ना वेत्रवती एषा त्वामिच्छन्तीहमागता ॥ १० ।
साभिलाषां परस्त्रीञ्च भजमानां विसर्ज्जयेत् ।
स पापः पुरुषो ज्ञेयो ब्रह्महत्याञ्च विन्दति ॥ ११ ।
एवं ज्ञात्वा महाराज भजमानां भजस्व माम् ।
एवमुक्तस्तया राजा साभिलाषोपभुक्तवान् ॥ १२ ।
तस्य सद्योऽभवत्पुत्रो द्वादशार्कसमप्रभः ।
वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत् ।
बलवानतितेजस्वी प्राग्ज्योतिषपतिर्भवत्* ॥ १३ ।
स कालेन युवा जातो बलवान्दृढ़विक्रमः† ।
महायोगेन संयुक्तो जिगायेमां वसुन्धराम् ॥
सप्तद्वीपवतीं पश्चान्मेरुपर्व्वतमारुहत् ।
तत्रेन्द्रं प्रथमं जिग्ये पश्चादग्निं यमं ततः ॥ १४।१५ ।
इन्द्रो भग्नो गतः सोऽग्निमग्निर्भग्नो यमं ययौ ।
यमो निर्ऋतिमागच्छन्निर्ऋतिर्वरुणं ययौ‡ ॥ १६ ।

---

* अभवदिति साधु ।

† बभूव दृढ़विक्रम इति (ख) ।

‡ (ग) पुस्तके यमोभग्नोगतः सोऽपि धर्म्मोनिर्ऋतिमारुहत् । तत्रेन्द्रश्च प्र निर्ऋतिर्वरुणं ययावित्यधिकः पाठो वर्त्तते ।

इन्द्रादिभिरुपेतस्तु वरुणो वायुमन्वगात् ।
वायुर्धनपतिं त्वागात्सर्व्वैरिन्द्रादिभिः सह ॥ १७ ।
धनदोऽपि स्वकं मित्रमीशं देवं समन्वितः ।
इयाय गदया सोऽपि दानवो बलगर्व्वितः ।
गदामादाय दुद्राव शिवलोकं प्रति प्रभो ॥ १८ ।
शिवोऽप्यवध्यन्तं मत्वा देवान्गृह्य* ययौ पुरीम् ।
ब्रह्मणः सुरसिद्धाद्यैर्वन्दितां पुण्यकारिभिः ॥ १९ ।
तत्र ब्रह्मा जगत्स्रष्टा विष्णुपादोद्भवे जले ।
नियमेन च संयुक्तोऽजपतान्तर्जले शुभे ॥
वेदज्ञमायां गायत्रीं ततो देवा विचुक्रुशुः ।
त्राहि प्रजापते सर्व्वान्देवानृषिवरानपि ।
असुराद्भयमापन्नांस्त्राहि त्राहीत्यचोदयत् ॥ २०।२१ ।
एवमुक्तस्तदा ब्रह्मा दृष्ट्वा देवांस्तदागतान् ।
चिन्तयामास देवस्य मायेयं विगतज्ज्गत् ।
नासुरा न च रक्षोऽत्र मायेयं कीदृशी मता ॥ २२ ।
एवं चिन्तयतस्तस्य प्रादुरासीदयोनिजा ।
शुक्लाम्बरधरा कन्या स्रक्किरीटोज्ज्वलानना ॥
अष्टभिर्बाहुभिर्युक्ता दिव्यप्रहरणोद्यता† ।
चक्रं शङ्खं गदां पाशं खड्गं घण्टां तथा धनुः ॥
धारयन्ती तथा चान्यान्बद्धतूणा जलाद्वहिः ।

---

* गृह्य इति आर्षं, गृहीत्वेति साधु ।

† प्रहरणोद्यतेति (ग) ।

निश्चक्राम महायोगि*सिंहवाहनवेगिता ॥ २३।२४।२५ ।
युयुधे चासुरान्सर्व्वानेकैव बहुधा स्थिता ।
दिव्यं वर्षसहस्रन्तु दिव्यैरस्त्रैर्महाबला ॥ २६ ।
युद्धा कालात्यये देव्या हतो वेत्रासुरो रणे† ।
ततः किलकिलाशब्दो देवसैन्येऽभवन्महान् ॥ २७ ।
हते वेत्रासुरे भीमे तदा सर्व्वे दिवौकसः ।
प्रणेमुर्जय युद्धेति स्वयमीशः स्तुतिं जगौ ॥ २८ ।

महेश्वरोवाच‡ ।

जयस्व देवि गायत्रे महामाये महाप्रभे ।
महादेवि महाभागे महासत्त्वे महोत्सवे ॥ २९ ।
दिव्यगन्धानुलिप्ताङ्गि दिव्यस्रग्दामभूषिते ।
वेदमातर्नमस्तुभ्य§मक्षरस्थे महेश्वरि ॥ ३० ।
त्रिलोकस्थे त्रितत्त्वस्थे त्रिवह्निस्थे त्रिशूलिनि ।
त्रिनेत्रे भीमवक्त्रे च भीमनेत्रे भयानके ॥ ३१ ।
कमलासनजे देवि सरस्वति नमोऽस्तु ते ।
नमः पङ्कजपत्राक्षि महामायेऽमृतस्रवे¶ ।
सर्व्वगे सर्वभूतेशि स्वाहाकारे स्वधेऽम्बिके ॥ ३२ ।

---

* महायोगीति (ग) ।

† स दैत्यो युद्धदुर्म्मद इति (ग) । तत्र परार्द्धं नास्ति ।

‡ महेश्वरोवाच इति आर्षं, महेश्वर उवाच इति साधु ।

§ देवमातर्नमस्तुभ्यमिति (ख) ।

¶ नमो महाऽमृतस्रवे इति (ग) ।

सम्पूर्णे पूर्णचन्द्राभे भास्वराङ्गे भवोद्भवे ।
महाविद्ये महावेद्ये महादैत्यविनाशिनि ॥ ३३ ।
महाबुद्ध्युद्भवे देवि वीतशोके किरातिनि ।
त्वं नीतिस्त्वं महाभागे गीस्त्वं* त्वं गौस्त्वमक्षरम् ॥ ३४ ।
त्वं धीस्त्वं श्रीस्त्वमोङ्कारस्तत्त्वे चापि परिस्थिता ।
सर्वसत्त्वहिते देवि नमस्ते परमेश्वरि ॥ ३५ ।
इत्येवं संस्तुता देवी भवेन परमेष्ठिना ।
देवैरपि जयेत्युच्चैरित्युक्ता परमेश्वरी ॥
यावदास्ते चतुर्वक्त्रस्तावदन्तर्जलाद्धरिः ।
निश्चक्राम ततो देवीं कृतकृत्यां ददर्श सः ॥ ३६।३७ ।
तां दृष्ट्वा देवकार्य्यञ्च सिद्धं मत्वा पितामहः ।
भविष्यं कार्य्यमुद्दिश्य ततो वचनमब्रवीत् ॥ ३८ ।

ब्रह्मोवाच ।

इयं देवी वरारोहा यातु शैलं हिमालयम् ।
तत्र यूयं सुराः सर्वे गत्वा नन्दत मा चिरम्† ॥ ३९ ।
नवम्याञ्च सदा पूज्या इयं देवी समाधिना ।
वरदा सर्वलोकानां भविष्यति न संशयः ॥ ४० ।
नवम्यां यस्तु पिष्टाशी भविष्यति हि मानवः ।
नारी वा तस्य सम्पन्नं भविष्यति मनोगतम् ॥ ४१ ।
यश्च स्वयं सदा प्रातरिदं स्तोत्रं पठिष्यति ।

---

* त्वं गौरिति (ग) ।

† नन्दितमानस इति (ग) ।

त्वयेरितं महादेव तस्य देव्या समं भवान् ।
वरदो देव सर्वासु आपत्स्वप्युद्धरेत्स्वयम् ॥ ४२ ।
एवमुक्त्वा भवं ब्रह्मा पुनर्देवीं स चाब्रवीत् ।
त्वया देवि महाकार्य्यं कर्त्तव्यञ्चान्यदस्ति नः ।
भविष्यं महिषाख्यस्य असुरस्य विनाशनम् ॥ ४३ ।
एवमुक्त्वा ततो ब्रह्मा सर्वैः देवाश्च पार्थिव ।
यथागतं ततो जग्मुर्देवीं स्थाप्य* हिमे गिरौ ॥ ४४ ।
संस्थाप्य नन्दिता यस्मात्तस्मान्नन्दाऽभवत्तु सा ।
यश्चेदं शृणुयाज्जन्म देव्या यश्च स्वयं पठेत् ।
सर्वपापविनिर्मुक्तः परं निर्वाणमृच्छति ॥ ४५ ।

इति वराहपुराणे देव्युत्पत्तिर्नाम अष्टाविंशोऽध्यायः ।

——०ः०——

ऊनविंशोऽध्यायः ।

महातपा उवाच ।

शृणु राजन्नवहितः प्रजापाल कथामिमाम् ।
यदा दिशः समुत्पन्नाः श्रोत्रेभ्यः पृथिवीपते ॥ १ ।
ब्रह्मणः सृजतः सृष्टिमादिसर्गे समुत्थिते ।

---

* स्थाप्य इति आर्षं, स्थापयित्वा इति साधु ।

चिन्ताभून्महती को मे प्रजाः स्रष्टा धरिष्यति ॥ २ ।
एवं चिन्तयतस्तस्य अवकाशं व्रजन्निह ।
प्रादुर्बभूवुः श्रोत्रेभ्यो दश कन्या महाप्रभाः ॥ ३ ।
पूर्वा च दक्षिणा चैव प्रतीची चोत्तरा तथा ।
ऊर्द्ध्वाधरा च षट् मुख्याः कन्या ह्यासंस्तदा नृप ॥ ४ ।
तासां मध्ये चतस्रस्तु कन्याः परमशोभनाः ।
रूपवन्त्यो महाभागा गाम्भीर्य्येण समन्विताः ॥ ५ ।
ता ऊचुः प्रणयाद्देवं प्रजापतिमकल्मषम् ।
अवकाशन्तु नो देहि देवदेव प्रजापते ॥ ६ ।
यत्र तिष्ठामहे सर्वा भर्त्तृभिः सहिताः सुखम् ।
पतयश्च महाभागा* देहि नोऽव्यक्तसम्भव ॥ ७ ।

ब्रह्मोवाच ।

ब्रह्माण्डमेतत्सुश्रोण्यः शतकोटिप्रविस्तरम् ।
तस्यान्ते स्वेच्छया तुष्टा उष्यतां मा विलम्बथ ॥ ८ ।
भर्त्तॄंश्च वः प्रयच्छामि स्रष्ट्वा रूपस्विनोऽनघाः ।
यथेष्टं गम्यतां देशो यस्या यो रोचतेऽधुना ॥ ९ ।
एवमुक्तास्तु ताः सर्वा यथेष्टं प्रययुस्तदा ।
ब्रह्मा ससर्ज तूर्णं ताँल्लोकपालान्महाबलान् ॥ १० ।
स्रष्ट्वा तु लोकपालांस्तांस्ताः कन्याः पुनराह्वयत् ।
विवाहं कारयामास ब्रह्मा लोकपितामहः ॥ ११ ।
एकामिन्द्राय स प्रादादग्नयेऽन्यां यमाय च ।

---

* पतयश्च महाभागा इति आर्षं, पतींश्चैव महाभागानिति साधु ।

निर्ऋताय च देवाय वरुणाय महात्मने ॥
वायवे धनदेशाय ईशानाय च सुव्रत।
ऊर्द्धां स्वयमधिष्ठाय शेषायाधोव्यवस्थिताम् ॥ १२।१३।
एवं दत्त्वा पुनर्ब्रह्मा तिथिं प्रादाद्दिशान्तथा।
दशमी च तिथिस्तासामतीव दयिताभवत् ॥ १४।
तस्यां दध्याशनो यस्तु सुव्रत भवते नरः।
तस्य पापक्षयन्तास्तु कुर्वन्त्यहरहर्नृप ॥ १५।
यश्चैतच्छृणुयाज्जन्म दिशान्नियतमानसः।
स प्रतिष्ठामवाप्नोति ब्रह्मलोके न संशयः ॥ १६।*

इति वराहपुराणे दिगुत्पत्तिर्नाम ऊनत्रिंशोऽध्यायः।

त्रिंशोऽध्यायः।

महातपा उवाच।

शृणु [illegible] पां वसुपतेरुत्पत्तिं पापनाशिनीम्।
यथा वायुशरीरस्थो ध[illegible] ॥ १।
आद्यं शरीरं यत्तत्[illegible] भवत्।
प्रयोजनान्मूर्त्तिमत्त्वमातिष्ठद्धनदेवता ॥ २।

---

* (ख) पुस्तके १५श्लोकस्य उत्तरार्द्धं, १६श्लोकस्य च पूर्व्वार्द्धं नास्ति।

तत्रमूर्त्तस्य वायोस्तु उत्पत्तिः कीर्त्तिता मया ।
तां शृणुष्व महाभाग कथ्यमानां मयानघ ॥ ३ ।
ब्रह्मणः सृष्टिकामस्य मुखाद्वायुर्विनिर्ययौ ।
प्रचण्डशर्करावर्षी तं ब्रह्मा प्रत्यषेधयत् ॥ ४ ।
मूर्त्तो भवस्व शान्तश्च तेनोक्तो मूर्त्तिमाग्भवत्* ।
सर्वेषाञ्चैव देवानां† यद्वित्तं फलमेव च ।
तत्सर्वं पाहि येनोक्तं तस्माद्धनपतिर्भवान् ॥ ५ ।
तस्य ब्रह्मा ददौ तुष्टस्तिथिमेकादशीं प्रभुः ।
तस्यामनग्निपक्काशी यो भवेन्नियतं शुचिः ।
तस्यापि धनदो देवस्तुष्टः सर्वं प्रयच्छति ॥ ६ ।
एषा धनपतेर्मूर्त्तिः सर्वकिल्बिषनाशनी ।
य एतां शृणुयाद्भक्त्या पुरुषः पठतेऽपि वा ।
सर्वकामानवाप्नोति स्वर्गलोकञ्च गच्छति ॥ ७ ।

इति वराहपुराणे धनदोत्पत्तिर्नाम त्रिंशोऽध्यायः ।

---

* अभवदिति साधु ।

† सर्व्वेषामेव देवानामिति (ख) ।

एकत्रिंशोऽध्यायः ।

महातपा उवाच ।

मनोर्नाम मनुत्वञ्च यदेतत्पठ्यते किल ।
प्रयोजनवशाद्विष्णुरसावेव तु मूर्त्तिमान् ॥ १ ॥
योऽसौ नारायणो देवः परात्परतरो नृप ।
तस्य चिन्ता समुत्पन्ना सृष्टिं प्रति नरोत्तम ॥ २ ॥
सृष्टा चेयं मया सृष्टिः पालनीया मयैव ह ।
कर्म्मकाण्डन्त्वमूर्त्तेन कर्त्तुं न वेह शक्यते ।
तस्मान्मूर्त्तिं सृजाम्येकां यया* पाल्यमिदं जगत् ॥ ३ ॥
एवं चिन्तयतस्तस्य सत्याभिध्यायिनो नृप ।
प्राक्सृष्टिजातं राजन्वै मूर्त्तिमत्तत्पुरो बभौ ॥ ४ ॥
पुरोभूतस्ततस्तस्मिन्देवो नारायणः स्वयम् ।
प्रविशन्तं ददर्शाथ त्रैलोक्यन्तस्य देहतः ॥ ५ ॥
ततः सस्मार भगवान्वरदानं पुरातनम् ।
वागादीनां ततस्तुष्टः प्रादात्तस्य पुनर्वरम् ।
सर्व्वज्ञः सर्व्वकर्त्ता त्वं सर्व्वलोकनमस्कृतः ॥ ६ ॥
त्रैलोक्यप्रतिपालाच्च भव विष्णुः सनातनः† ॥ ७ ॥
देवानां सर्व्वदा कार्य्यं कर्त्तव्यं ब्रह्मणः सदा ।
सर्व्वज्ञत्वञ्च भवतु तव देव न संशयः ॥ ८ ॥

---

* मयेति (ग) ।

† (ग) पुस्तके सर्व्वज्ञ इत्यारभ्य पद् पादा न सन्ति ।

एवमुक्का ततो देवः प्रकृतिस्थो बभूव ह ।
विष्णुरप्यधुना पूर्व्वां बुद्धिं सस्मार स प्रभुः ॥ ९ ।
तदा सञ्चिन्त्य भगवान्योगनिद्रां महातपाः ।
तस्यां संस्थाप्य भगवानिन्द्रियार्थोद्भवाः प्रजाः ॥ १० ।
ध्यात्वा परेण रूपेण ततः सुष्वाप वै प्रभुः ।
तस्य सुप्तस्य जठरान्महत्पद्मं विनिःसृतम् ॥ ११ ।
सप्तद्वीपवती पृथ्वी ससमुद्रा सकानना ।
तस्य रूपस्य विस्तारं पातालातलसंस्थितम् ।
कर्णिकायां तथा मेरुस्तन्मध्ये ब्रह्मणो भवः ॥ १२ ।
एवं दृष्ट्वा परन्तस्य शरीरस्य तु सम्भवम् ।
मुमुदे तच्छरीरस्थो वायुर्वायुं समसृजत् ॥ १३ ।
अविद्या विजयञ्चेमं शङ्खरूपेण धारय ।
अज्ञानच्छेदनार्थाय खड्गन्तेऽस्तु सदा करे ॥ १४ ।
कालचक्रमयं घोरं चक्रं तद्धारयाच्युत ।
अधर्म्मराजघातार्थं गदां धारय केशव ॥ १५ ।
मालेयं भूतमाता ते कण्ठे तिष्ठतु सर्व्वदा ।
श्रीवत्सकौस्तुभौ चेमौ चन्द्रादित्यच्छलेन ह ॥ १६ ।
मारुतस्ते गतिर्वीर गरुत्मान् स च कीर्त्तितः ।
त्रैलोक्यगामिनी देवी लक्ष्मीस्तेऽस्तु सदाश्रये ॥ १७ ।
द्वादशी च तिथिस्तेऽस्तु कामरूपी च जायते ।
घृताशनो भवेद्यस्तु द्वादश्यान्त्वत्परायणः ।
स स्वर्गवासी भवतु पुमान् स्त्री वाविशेषतः ॥ १८ ।

स च विष्णुस्तवाख्यातो* मूर्त्तयो देवदानवाः ॥ १९ ।
हन्ति पाति शरीराणि सृजत्यन्यानि चात्मनः ।
युगे युगे सर्व्वगोऽयं वेदान्तपुरुषो ह्यसौ ॥ २० ।
न हीनबुद्धा वक्तव्यो मनुष्योऽयं कदाचन ।
य एव शृणुयात्सर्गं वैष्णवं पापनाशनम् ।
स कीर्त्तिमिह सम्प्राप्य स्वर्गलोके महीयते ॥ २१ ।

इति वराहपुराणे परापरनिर्णयो नाम एकत्रिंशोऽध्यायः ।

द्वात्रिंशोऽध्यायः ।

महातपा उवाच ।

अथोत्पत्तिं प्रवक्ष्यामि धर्म्मस्य महतो नृप ।
माहात्म्यञ्च तिथिञ्चैव तन्निबोध नराधिप ॥ १ ।
पूर्व्वं ब्रह्माव्ययः शुद्धः परात्परसंज्ञितः ।
स सिसृक्षुः प्रजास्त्वादौ पालनञ्च विचिन्तयन् ॥ २ ।
तस्य चिन्तयतस्त्वङ्गाद्दक्षिणाच्छ्वेतकुण्डलः ।
प्रादुर्बभूव पुरुषः श्वेतमाल्यानुलेपनः ॥ ३ ।
तं दृष्ट्वोवाच भगवांश्चतुष्पादं वृषाकृतिम् ।

---

* एष विष्णुस्तथाख्यात इति (ग) (ख) ।

पालयेमाः प्रजाः साधो त्वं ज्येष्ठो जगतो भव ॥ ४ ।
इत्युक्तः समवस्थोऽसौ चतुष्पात्स्थाकृते युगे ।
त्रेतायां त्रिपदश्चासौ द्विपादो द्वापरेऽभवत् ॥ ५ ।
कलावेकेन पादेन प्रजाः पालयते प्रभुः ।
षड्भेदो ब्राह्मणानां स त्रिधा क्षत्रे व्यवस्थितः ।
द्विधा वैश्येकधा* शूद्रे स्थितः सर्व्वगतः प्रभुः ॥ ६ ।
रसातलेषु सर्वेषु द्वीपवर्षेष्वयम्प्रभुः ।
गुणद्रव्यक्रियाजातिचतुष्पादः प्रकीर्त्तितः ॥ ७ ।
त्रिशृङ्गोऽसौ स्मृतो वेदे ससंहितपदक्रमः ।
तथा आद्यन्त ओङ्कारद्विशिराः सप्तहस्तवान् ॥ ८ ।
उदात्तादित्रिभिर्बद्ध एवं धर्म्मो व्यवस्थितः ।
स धर्म्मः पीड़ितः पूर्वं सोमेनाद्भुतकर्म्मणा ॥ ९ ।
ताराञ्जिहीर्षुणा पत्नीं भ्रातुराङ्गिरसस्य च ।
सोऽपायाङ्क्षितस्तेन बलिना क्रूरकर्म्मणा ।
अरण्यं गहनं घोरमाविवेश तदा प्रभुः ॥ १० ।
तस्मिन् गते सुराः सर्वे असुराणान्तु पक्षयः ।
जिहीर्षन्तस्तदोकांसि बभ्रमुर्धर्म्मवञ्चिताः ।
असुरा अपि तद्वच्च सुरवेश्मनि बभ्रमुः ॥ ११ ।
निर्म्मर्य्यादे तथा जाते धर्म्मनाशे च पार्थिव ।
देवासुरा युयुधिरे सोमदोषेण कोपिताः ॥ १२ ।
स्त्रीहेतोश्च महाभाग विविधायुधपाणयः ।

---

* वैश्येकधेति आर्षं, वैश्य एकधेति साधु ।

तान्दृष्ट्वा युध्यतो देवानसुरैः सह कोपितान्।
नारदः प्राह सङ्गम्य पितरं प्रति हर्षितः॥ १३।
स हंसयानमारुह्य सर्व्वलोकपितामहः।
निवारयामास तदा कस्यार्थे युद्धमब्रवीत्॥ १४।
सर्व्वे शशंसुः सोमन्तु स तु बुद्ध्वा स्वकं सुतम्।
पीड़नादपयातन्तु गहनं वनमाश्रितम्॥ १५।
ततो ब्रह्मा ययौ तत्र देवासुरयुतस्त्वरन्*।
ददर्श च सुरैः सार्द्धं चतुष्पादं वृषाकृतिम्†।
चरन्तं शशिसङ्काशं दृष्ट्वा देवानुवाच ह॥ १६।
ब्रह्मोवाच।
अयं मे प्रथमः पुत्रः पीड़ितः शशिना भृशम्।
पत्नीं जिहीर्षुणा भ्रातुर्धर्म्मसंज्ञो महामुनिः॥ १७।
इदानीं तोषयध्वं वै सर्व्वे एव सुरासुराः‡।
येन स्थितिर्वै भवति समं देवासुरा इति॥ १८।
ततः सर्वे स्तुतिञ्चक्रुस्तस्य देवस्य हर्षिताः।
विदित्वा ब्रह्मणो वाक्यात्सम्पूर्णं शशिसन्निभम्§॥ १९
देवा ऊचुः।
नमोऽस्तु शशिसङ्काश नमस्ते जगतः पते।

---

* त्वरमाण इति साधु।
† वृषाकपिमिति (ख)।
‡ सर्व्वं एनं सुरासुराः इति (ख)।
§ सम्पूर्णशशिसन्निभमिति (ख)।

नमोऽस्तु देवरूपाय स्वर्गमार्गप्रदर्शक ॥ २० ।
कर्म्ममार्गस्वरूपाय सर्व्वगाय नमो नमः ।
त्वयैव पाल्यते पृथ्वी त्रैलोक्यञ्च त्वयैव हि ॥ २१ ।
जनस्तपस्तथा सत्यं त्वया सर्व्वन्तु पाल्यते ।
न त्वया रहितं किञ्चिज्जगत्स्थावरजङ्गमम् ।
विद्यते त्वद्विहीनन्तु सद्यो नश्यति वै जगत् ।
त्वमात्मा सर्व्वभूतानां* सतां सत्त्वस्वरूपवान् ॥ २२।२३
राजसीनां रजस्त्वञ्च तामसीनां तमोमयः ।
चतुष्पादो भवान्वेदश्चतुःशृङ्गस्त्रिलोचनः ॥ २४ ।
सप्तहस्तस्त्रिबन्धश्च वृषरूप नमोऽस्तु ते ।
त्वया हीना वयं देव सर्व्वे उन्मार्गवर्त्तिनः ।
तन्मार्गं यच्छ मूढ़ानां त्वं हि नः परमा गतिः ॥ २५ ।
एवं स्तुतस्तदा देवैर्वृषरूपी प्रजापतिः ।
तुष्टः प्रसन्नमनसा शान्तचक्षुरभाषत ॥ २६ ।
दृष्टमात्रास्तु ते देवाः स्वयं धर्म्मेण चक्षुषा ।
क्षणेन गतसम्मोहाः सम्यक्सद्धर्म्मसंहिताः ॥ २७ ।
असुरा अपि तद्वच्च ततो ब्रह्मा उवाच तम् ।
अद्यप्रभृति ते धर्म्म तिथिरस्तु त्रयोदशी ॥
यस्तामुपोष्य पुरुषो भवन्तं समुपार्ज्जयेत् ।
कृत्वा पापसमाचारं तस्मान्मुञ्चति मानवः ॥ २८ ।
यच्चारण्यमिदं धर्म्म त्वया व्याप्तं चिरम्प्रभो ।

* (ख) पुस्तकेऽतः परं दश पादा न सन्ति ।

	Rs.	
Paráśara Smriti (Sans.) Fasc. I—V @ /6/ each	1	14
Srauta Sútra of Ápastamba, (Sans.) Fasc. I—XII @ /6/ each	4	8
Srauta Sútra of Áśvaláyana, (Sans.) Fasc. I—XI @ /6/ each	4	2
Ditto Látyáyana (Sans.) Fasc. I—IX @ /6/ each	3	6
Ditto Sánkhyáyana (Sans.) Fasc. I—IV @ /6/ each	1	8
Sáma Veda Samhitá, (Sans.) Vols I, Fasc. 1—10 ; II, 1—6 ; III, 1—7 ; IV, 1—6 ; V, 1—8, @ /6/ each Fasc.	13	14
Sáhitya Darpana, (English) Fasc. I—IV @ /6/ each	1	8
Sánkhya Aphorisms of Kapila, (English) Fasc. I and II @ /6/ each	0	12
Súrya Siddhánta, (Sans.) Fasc. IV	0	6
Sarva Darśana Sangraha, (Sans.) Fasc. II	0	6
Sankara Vijaya, (Sans.) Fasc. II and III @ /6/ each	0	12
Sánkhya Pravachana Bháshya, (English preface only) Fasc. III	0	6
Sánkhya Sára, (Sans.) Fasc. I	0	6
Suśruta Samhitá, (Eng.) Fasc. I and II @ /12/ each	1	8
Taittiríya Áranya, (Sans.) Fasc. I—XI @ /6/ each	4	2
Ditto Bráhmana, (Sans.) Fasc. I—XXIV @ /6/ each	9	0
Ditto Samhitá, (Sans.) Fasc. I—XXXIV @ /6/ each	12	12
Ditto Prátiśákhya, (Sans.) Fasc. I—III @/6/ each	1	2
Ditto and Aitareya Upanishads, (Sans.) Fasc. II and III @/6/ each	0	12
Tándya Bráhmana, (Sans.) Fasc. I—XIX @ /6/ each	7	2
Tattva Chintámani, (Sans.) Fasc. I—VII @ /6/ each	2	10
Uttara Naishadha, (Sans.) Fasc. III—XII @ /6/ each	3	12
Uvás-agadasáo, Fasc. I—III @ /12/ each	2	4
Varáha Purána, (Sans.) Fasc. I—II @ /6/ each	0	12
Váyu Purána, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—6, @ /6/ each Fasc.	4	8
Vishnu Smriti, (Sans.) Fasc. I—II @ /6/ each	0	12
Vivádaratnákara (Sans.) Fasc. I—VII @ /6/ each	2	10
Vrihannáradíya Purána, (Sans.) Fasc. I—IV @ /6/ each	1	8
Yoga Sútra of Patanjali, (Sans. & English) Fasc. I—V @ /14/ each	4	6
The same, bound in cloth	5	2

Arabic and Persian Series.

'Álamgírnámah, with Index, (Text) Fasc. I—XIII @ /6/ each	4	14
Áín-i-Akbarí, (Text) Fasc. I—XXII @ 1/ each	22	0
Ditto (English) Vol. I (Fasc. I—VII) 1/12 each	12	4
Akbarnámah, with Index, (Text) Fasc. I—XXXVII @ 1/ each	37	0
Bádsháhnámah, with Index, (Text) Fasc. I—XIX @ /6/ each	7	2
Beale's Oriental Biographical Dictionary, pp. 291, 4to., thick paper, @ 4/12 ; thin paper	4	8
Dictionary of Arabic Technical Terms and Appendix, Fasc. I—XXI @ 1/ each	21	0
Farhang-i-Rashídí (Text), Fasc. I—XIV @ 1/ each	14	0
Fihrist-i-Túsí, or, Túsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each	3	0
Futúh-ul-Shám Wáqidí, (Text) Fasc. I—IX @ /6/ each	3	6
Ditto Ázádí, (Text) Fasc. I—IV @ /6/ each	1	8
Haft Ásmán, History of the Persian Mansawi, (Text) Fasc. I	0	12
History of the Caliphs, (English) Fasc. I—VI @ /12/ each	4	8
Iqbálnámah-i Jahángírí, (Text) Fasc. I—III @ /6/ each	1	2
Isabáh, with Supplement, (Text) 42 Fasc. @ /12/ each	31	8
Maásir-ul-Umara, Vol. I, Fasc. I—II @ /6/ each	0	12
Maghází of Wáqidí, (Text) Fasc. I—V @ /6/ each	1	14
Muntakhab-ul-Tawáríkh, (Text) Fasc. I—XV @ /6/ each	5	10
Muntakhab-ul-Tawáríkh, (English) Vol. II, Fasc. I—IV @/12/ each	3	0
Muntakhab-ul-Lubáb, (Text) Fasc. I—XIX @ /6/ each	7	2
Mu'ásir-'Álamgírí, (Text), Fasc. I—VI @ /6/ each	2	4
Nukhbat-ul-Fikr, (Text) Fasc. I	0	6
Nizámí's Khiradnámah-i-Iskandarí, (Text) Fasc. I and II @ /12/ each	1	8
Suyúty's Itqán, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. II—IV, VII—X @ 1/ each	7	0

(*Turn over.*)

Tabaqát-i-Násirí, (Text) Fasc. I—V @ /6/ each

Ditto (English) Fasc. I—XIV @ /12/ each 8

Táríkh-i-Fírúz Sháhi, (Text) Fasc. I—VII @ /6/ .. 2 10

Táríkh-i-Baihaqí, (Text) Fasc. I—IX @ /6/ each .. 3 6

Wís o Rámín, (Text) Fasc. I—V @ /6/ each 1 14

Zafarnámah, Fasc. I—IX ; Vol. II, Fasc. I @ /6/ each 3 12

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. VII. IX to XI ; Vols. XIII and XVII, and Vols. XIX and XX @ /10/ each Rs. 80 0

   Ditto Index to Vols. I—XVIII 5 0
2. Proceedings of the Asiatic Society from 1865 to 1865 (incl.) @ /4/ per No. ; and from 1870 to date @ /6/ per No.
3. Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1849 (12), 1850 (7), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers ; and for 1851 (7), 1857 (6), 1858 (5), 1861 (4). 1864 (5), 1865 (8), 1866 (7), 1867 (6), 1868 (6), 1869 (8). 1870 (8), 1871 (7). 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878, (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers.

N. B. The figures enclosed in brakets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784—1883 .. 3 0

   General Cunningham's Archæological Survey Report for 1863-64 (Extra No., J. A. S. B., 1864) 1 8

   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868) 1 8

   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., J. A. S. B., 1875) 3 0

   Sketch of the Turki Language as spoken in Eastern Turkestan, Part II, Vocabulary, by R. B. Shaw (Extra No., J. A. S. B., 1878) 3 0

   A Grammar and Vocabulary of the Northern Balochí Language, by M. L. Dames (Extra No., J. A S. B., 1880) 3 0

   Introduction to the Maithilí Language of North Bihár, by G. A. Grierson, Part I, Grammar (Extra No., J. A. S. B., 1880) .. 1 8

   Part II, Chrestomathy and Vocabulary (Extra No., J.A.S.B., 1882) 3 0
5. Anis-ul-Musharrihi 3 0
6. Catalogue of Fossil Vertebrata 2 0
7. Catalogue of the Library of the Asiatic Society, Bengal .. 3 8
8. Examination and Analysis of the Mackenzie Manuscripts by the Rev. W. Taylor 2 0
9. Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis .. 1 8
10. Istiláhát-us-Súfíyah, edited by Dr. A. Sprenger, 8vo. .. 1 0
11. Ináyah, a Commentary on the Hidáyah, Vols. II and IV, @ 16/ each 32 0
12. Jawámi-ul-'ilm ir-riyází, 168 pages with 17 plates, 4to. Part I 2 0
13. Khizánat-ul-'ilm 4 0
14. Mahábhárata, Vols. III and IV, @ 20/ each 40 0
15. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—II; with 5 coloured Plates, 4to. @ 6/ each .. 12 0
16. Puráṇa Sangraha, I (Márkaṇḍeya Puráṇa), Sanskrit .. 1 0
17. Sharaya-ool-Islám 4 0
18. Tibetan Dictionary 10 0
19. Ditto Grammar 8 0
20. Vuttodaya, edited by Lt.-Col. G. E. Fryer 2 0

    Notices of Sanskrit Manuscripts, Fasc. I—XXI @ 1/ each .. 21 0

    Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra .. 5 0

N. B. All cheques, Money Orders &c. must be made payable to the "Treasury Asiatic Society" only.

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 635.

वराहपुराणम् ।

THE VARÁHA PURÁṆA

EDITED BY

PAṆḌIT HṚISHÍKES'A S'ÁSTRÍ

Professor, Sanskrit College, Calcutta.

FASCICULUS III.

CALCUTTA:

PRINTED BY S'ASIBHÚSHAṆA BHAṬṬÁCHÁRYYA, AT THE GIRIS'A-VIDYÁRATNA PRESS,
24, GIRIS'A-VIDYÁRATNA'S LANE, UPPER CIRCULAR ROAD.

AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.

1887.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL

No. 57, PARK STREET, CALCUTTA.

AND OBTAINABLE FROM

THE SOCIETY'S LONDON AGENTS, MESSRS. TRÜBNER & CO.

57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	
Átharvana Upanishads, (Sanskrit) Fasc. I—V @ /6/ each ..	1	14
Áśvaláyana Grihya Sútra, (Sans.) Fasc. II—IV @ /6/ each ..	1	2
Agni Purána, (Sans.) Fasc. I—XIV @ /6/ each	5	4
Aitareya Áranyaka of the Rig Veda (Sans.) Fasc. I—V @ /6/ each	1	14
Aphorisms of Sándilya, (English) Fasc. I	0	6
Aphorisms of the Vedánta, (Sans.) Fasc. III, V—XIII @ /6/ each ..	3	12
Ashtasáhasriká Prajnápáramitá, Fasc. I—III @ /6/ each	1	2
Áśvavaidyaka, (Sans.) Fasc. I—III @ /6/ each	1	2
Brahma Sútras, (English) Fasc. I	0	12
Bhámatí, (Sans.) Fasc. I—VIII @ /6/ each	3	0
Brihad Áranyaka Upanishad, (Sans.) Fasc. VI, VII & IX @ /6/ each	1	2
Ditto (English) Fasc. II—III @ /6/ each	0	12
Brihat Samhitá, (Sans.) Fasc. II—III, V—VII @ /6/ each ..	1	14
Chaitanya-Chandrodaya Nátaka, (Sans.) Fasc. II—III @ /6/ each	0	12
Chaturvarga Chintámani, (Sans.) Vols. I, Fasc. 1—11; II, 1—25; III, 1—XVII @ /6/ each Fasc.	19	14
Chhándogya Upanishad, (English) Fasc. II	0	6
Daśa Rúpa, (Sans.) Fasc. II—III @ /6/ each	0	12
Gópatha Bráhmana (Sans. & Eng.) Fasc. I and II @ /6/ each ..	0	12
Gobhilíya Grihya Sútra, (Sans.) Fasc. I—XII @ /6/ each ..	4	8
Hindú Astronomy, (English) Fasc. I—III @ /6/ each ..	1	2
Institutes of Parásara	0	6
Kátantra, (Sans.) Fasc. I—VI @ /12/ each	4	8
Kathá Sarit Ságara, (English) Fasc. I—XIV @ /12/ each	10	2
Kála Mádhava, (Sans.) Fasc. I—III. @ /6/ each	1	2
Kauśítaki Bráhmanopanishads, Fasc. II	0	6
Kúrma Purána, (Sans.) Fasc. I—IV @ /6/ each	1	8
Lalita Vistara, (Sans.) Fasc. II—VI @ /6/ each	1	14
Ditto (English) Fasc. I—III @ /12/ each	2	4
Manutíká Sangraha, Fasc. I—II @ /6/ each	0	12
Mímámsá Darśana, (Sans.) Fasc. II—XIX @ /6/ each	6	12
Márkandeya Purána, (Sans.) Fasc. IV—VII @ /6/ each	1	8
Nyáyavártikam, Fasc. I	0	6
Nrisimha-Tápaní, (Sans.) Fasc. I—III @ /6/ each	1	2
Nirukta, (Sans.) Vol. I, Fasc. 1—6; Vol. II, Fasc. 1—6; Vol. III, Fasc. 1—6; Vol. IV, I—IV @ /6/ each	8	4
Nárada Pancharátra, (Sans.) Fasc. IV @ /6/ each	0	6
Nárada Smriti (Sans.) Fasc. I & II	0	12
Nyáya Darśana, (Sans.) Fasc. III @ /6/ each	0	6
Nitisára, or, The Elements of Polity, By Kámandaki (Sans.) Fasc. II—V	1	8
Pariśishtaparvan, (Sans.) Fasc. I—IV @ /6/ each	1	8
Pingala Chhandah Sútra, (Sans.) Fasc. II—III @ /6/ each ..	0	12
Prithiráj Rásau, (Hindí) Fasc. I—VI @ /6/ each	2	4
Ditto (English) Fasc. I	0	12
Páli Grammar, (English) Fasc. I and II @ /6/ each	0	12
Prákrita Lakshanam, (Sans.) Fasc. I	1	8

(Continued on the third page of cover.)

नाम्ना भविष्यति ह्येतद्धर्मारण्यमिति प्रभो ॥ २९ ।

चतुस्त्रिपाद्द्व्येकपाच्च प्रभो त्वं
कृतादिभिर्लक्ष्यसे येन लोकैः ।
तथा तथा कर्म्मभूमौ नभश्च
प्रायो युक्तः स्वगृहं पाहि विश्वम् ॥ ३० ।
इत्युक्तमात्रः प्रपितामहोऽधुना
सुरासुराणामथ पश्यतां नृप ।
अदृश्यतामगमत्स्वालयांश्च
जग्मुः सुराः सहसा वीतशोकाः ॥ ३१ ।
धर्म्मोत्पत्तिं य इमां श्रावयीत*
तदा श्राद्धेन तर्पयीत* पितॄंश्च ।
त्रयोदश्यां पायसेन स्वशक्त्या
स स्वर्गगामी तु सुरानुपेयात् ॥ ३२ ।

इति वराहपुराणे धर्म्मोत्पत्तिर्नाम द्वात्रिंशोऽध्यायः ।

---

* श्रावयीत, तर्पयीतेति आर्षप्रयोगौ, श्रावयेत्, तर्पयेदिति साधु ।

त्रयस्त्रिंशोऽध्यायः ।

महातपा उवाच ।

अथापरां रुद्रसम्भूतिमाद्यां
शृणुष्वेमां यत्नतः सोऽभ्युवाच ।
महातपाः पातिताधर्म्मपक्षः
क्षमास्त्रधारी ऋषिरुग्रतेजाः ॥ १ ॥

जातः प्रजानाम्पतिरुग्रतेजा
ज्ञानम्परन्तत्त्वभावं विदित्वा ।
सृष्टिं सिसृक्षुः क्षुभितोऽतिरोषा-
दवृद्धिकाले जगतः प्रकामम् ॥ २ ॥

तपस्यतोऽन्तः स्थिरकीर्त्तिपुण्यो
रजस्तमोध्वस्तगतिर्बभूव ।
वरो वरेण्यो वरदः प्रतापी
कृष्णारुणः पुरुषः पिङ्गनेत्रः ॥ ३ ॥

रुदन्नुक्तो ब्रह्मणा मा रुद त्वं
रुद्रस्ततोऽसावभवत्पुराणः ।
नयस्व सृष्टिं विततस्वरूपां
भवान् समर्थोऽसि महानुभाव ॥ ४ ॥

इत्युच्यमानः सलिले ममज्ज
मग्ने ससर्जात्मभवाय दक्षः ।
कस्थे तदा देववरेऽपि ते तु

सृष्टिश्चक्रुर्मानसा ब्रह्मजाताः ॥ ५ ।
तस्यान्ततायान्तु सुराधिपे तु
पैतामहं यज्ञवरम्प्रकामम् ।
मग्नः पुरा यत्सलिले स रुद्र
उत्सृज्य विश्वन्तु सुरान् सिसृक्षुः* ॥ ६ ।
सुस्राव यज्ञं सुरसिद्धयज्ञा-
नुपागतान् क्रोधवशं जगाम ।
कन्यां च दीप्तां परिभाव्य के न
सृष्टं जगन्मां व्यतिरिच्य मोहात् ॥ ७ ।
हा हेति चोक्ते ज्वलनार्चिषस्तु
निश्चेरुरास्यात्परिपिङ्गलस्य ।
तत्राभवन् क्षुद्रपिशाचसङ्घा
वेतालभूतानि च योगिसङ्घाः ॥ ८ ।
घनं यदा तैर्विततं वियच्च
भूमिश्च सर्व्वाश्च दिशश्च लोकाः ।
तदा स सर्व्वज्ञतया चकार
धनुश्चतुर्व्विंशतिहस्तमात्रम् ॥ ९ ।
गुणन्त्रिवृत्तञ्च चकार रोषा-
दादत्त दिव्ये इषुधी शरांश्च ।
ततश्च पूष्णो दशनानपातय-

* उत्सृज्य विश्वं स सुरान् सिसृक्षुरिति (ख) ।

भगस्य नेत्रे वृषणौ क्रतोश्च ॥ १० ।
स विद्धवीजो व्यपयात्क्रतुश्च
मार्गं वायुर्द्धारयन्यज्ञवाटात् ।
देवाश्च सर्व्वे पशुतामुपेयु-
र्जग्मुश्च सर्व्वे प्रणतिम्भवस्य ॥ ११ ।
आगम्य तत्रैव पितामहस्तु
भवम्प्रतीतः सम्परिष्वज्य देवान् ।
भक्त्योपेतानीक्षयन्देवदेवा-
न्विज्ञाय रुद्रेण कृतापकारान् ॥ १२ ।
रुद्रं दृष्ट्वा देवदेवो जगाद
मा तात कोपेन गतो हि यज्ञः ।
इति ब्रह्मवचः श्रुत्वा
रुद्रः प्रोवाच कोपवान् ॥ १३ ।
रुद्र उवाच ।
सृष्टः पूर्व्वं भवताहं तवेमे
कस्मान्न भागम्परिकल्पयन्ति ।
यज्ञोद्भवन्तेन रूपं मयेमे
वीतज्ञाना विकृता देवदेव ॥ १४ ।
ब्रह्मोवाच ।
देवाः शम्भुं स्तुतिभिर्ज्ञानहेतो-
र्यजध्वमुच्चैरसुराश्च सर्वे ।
येन रुद्रो भगवांस्तोषमेति

सर्व्वज्ञता तोषमात्रस्य च स्यात् ॥
इत्युक्तास्तेन ते देवाः स्तुतिञ्चक्रुर्महात्मनः ॥ १५ ।
देवा ऊचुः ।
नमो देवातिदेवाय त्रिनेत्राय महात्मने ।
रक्तपिङ्गलनेत्राय जटामुकुटधारिणे ॥ १६ ।
भूतवेतालजुष्टाय महाभोगोपवीतिने ।
भीमाट्टहासवक्ताय कपर्द्दिस्थाणवे नमः ॥ १७ ।
पूष्णो दन्तविनाशाय भगनेत्रहने नमः ।
भविष्यद्वृषचिह्नाय महाभूतपते नमः ॥ १८ ।
भविष्यत्त्रिपुरान्ताय तथान्धकविनाशिने ।
कैलासवरवासाय करिकृत्तिनिवासिने ॥ १९ ।
विकरालोर्द्धकेशाय भैरवाय नमो नमः ।
अग्निज्वालाकरालाय शशिमौलिकृते नमः ॥ २० ।
भविष्यत्कृतकापालिव्रताय परमेष्ठिने ।
तथा दारुवनध्वंसकारिणे तिग्मशूलिने ॥ २१ ।
कृतकङ्कणभोगीन्द्रनीलकण्ठत्रिशूलिने ।
प्रचण्डदण्डहस्ताय वड़वाग्निमुखाय च ॥ २२ ।
वेदान्तवेद्याय नमो यज्ञमूर्त्ते नमो नमः ।
दक्षयज्ञविनाशाय जगद्भयकराय च ॥ २३ ।
विश्वेश्वराय देवाय शिव शम्भो भवाय च* ।

---

* एतदर्द्धं (क) पुस्तके नास्ति ।

कपर्दिने करालाय महादेवाय ते नमः ॥ २४ ॥
एवं देवैः स्तुतः शम्भुरुग्रधन्वा सनातनः ।
उवाच देवदेवोऽहं यत्करोमि तदुच्यते ॥ २५ ।

देवा ऊचुः ।

वेदशास्त्राणि विज्ञानं देहि नो भव मा चिरम् ।
यज्ञश्च सरहस्यो भो यदि तुष्टोऽसि नः प्रभो ॥ २६

महादेव उवाच ।

भवन्तः पशवः सर्व्वे भवन्तु सहिता इति ।
अहं पतिश्च भवतां ततो मोक्षमवाप्स्यथ ॥ २७ ।
तथेति देवास्तं प्राहुस्ततः पशुपतिर्भवत्* ।
ब्रह्मा पशुपतिम्प्राह प्रसन्नेनान्तरात्मना ॥ २८ ।
चतुर्द्दशी ते देवेश तिथिरस्तु न संशयः ॥
तस्यान्तिथौ भवन्तं ये यजन्ति श्रद्धयान्विताः ।
उपोष्य भोजनीयास्तु गोधूमान्नेन वै द्विजाः ।
तेषान्त्वं तुष्टिमापन्नो नय स्थानमनुत्तमम् ॥ २६।३
एवमुक्तस्तथा रुद्रो ब्रह्मणाव्यक्तजन्मना ।
दन्तान्नेने फलम्प्रादाद्भगपूष्णोः क्रतोरपि ॥ ३१ ।
परिज्ञानञ्च सकलं स प्रादादमरेष्वपि ॥ ३२ ।
एवं रुद्रस्य सम्भूतिः सम्भूता ब्रह्मणः पुरा ।
अनेनैव प्रयोगेण देवानां पतिरुच्यते ॥ ३३ ।

---

* भवदित्यार्षं, अभवदिति साधु ।

यश्चैतच्छृणुयान्नित्यं प्रातरुत्थाय मानवः ।
सर्व्वपापविनिर्मुक्तो रुद्रलोकमवाप्नुयात् ॥ ३४ ।

इति वराहपुराणे रुद्रोत्पत्तिर्नाम त्रयस्त्रिंशोऽध्यायः ।

चतुस्त्रिंशोऽध्यायः ।

महातपा उवाच ।

पितॄणां सम्भवं राजन् कथ्यमानं निबोध मे ॥ १ ।
पूर्व्वं प्रजापतिर्ब्रह्मा सिसृक्षुर्विविधाः प्रजाः ।
एकाग्रमनसः सर्व्वांस्तन्मात्रा मनसा बहिः ।
कृत्वा परमकं ब्रह्म ध्यायन्सर्व्वेषु रूपकैः ॥ २ ।
तस्यात्मनि तदा योगं गतस्य परमेष्ठिनः ।
तन्मात्रा निर्ययुर्देहाद्धूमवर्णकृतत्विषः ॥ ३ ।
पिबाम इति भाषन्तः सुरान्सोममिति स्म ह ।
ऊर्द्धं जिगमिषन्तो वै वियत्संस्थास्तपस्विनः ॥ ४ ।
तान्दृष्ट्वा सहसा ब्रह्मा तिर्य्यक्संस्थास्ततोन्मुखान्* ।
भवन्तः पितरः सन्तु सर्व्वेषां गृहमेधिनाम् ॥ ५ ।
ऊर्द्ध्ववक्त्रास्तु ये तत्र ते नान्दीमुखसंज्ञिताः ।
इत्युक्त्वा तु तदा ब्रह्मा तेषां पन्थानमाकरोत् ॥ ६ ।

* तत उन्मुखानिति साधु ।

दक्षिणायनसंज्ञन्तु पितॄणाञ्च पितामहः ।
तूष्णीं ससर्ज भूतानि तामूचुः पितरस्ततः ।
वृत्तिं नो देहि भगवन् यया विन्दामहे सुखम् ॥ ७ ।

ब्रह्मोवाच ।

अमावास्यादिनं वोऽस्तु तस्यां कुशतिलोदकैः ।
तर्पिता मानुषैस्तृप्तिं पराङ्गच्छत नान्यथा ॥ ८ ।
तिला देया तथैतस्यामुपोष्य पितृभक्तितः ।
परमं तस्य सन्तुष्टा वरं यच्छत मा चिरम् ॥ ९ ।

इति वराहपुराणे पितृसर्गस्थितिवर्णनं नाम चतुस्त्रिंशोऽध्यायः ।

पञ्चत्रिंशोऽध्यायः ।

महातपा उवाच ।

ब्रह्मणो मानसः पुत्रः अत्रिर्नाम महायशाः ।
तस्य पुत्रोऽभवत्सोमो दक्षजामातृताङ्गतः ॥ १ ।
याः सप्तविंशतिः कन्या दाक्षायण्यः प्रकीर्त्तिताः ।
सोमपत्न्योऽतिमान्यास्तास्तासां श्रेष्ठा तु रोहिणी ॥ २
तामेव रमते सोमो नेतरास्विति शुश्रुम ।
इतराः प्रोचुरागत्य चन्द्रस्यासमतां पितुः ।
दक्षोऽप्यसकृदागत्य तमुवाच स नाकरोत् ॥ ३ ।

समतां सोऽपि तं दक्षः शशापान्तर्हितो भव ।
एवमुक्तः क्षयं सोम अगमद्दक्षशापतः ॥ ४ ।
देवा मनुष्याः पशवो नष्टे सोमे सवीरुधः ।
क्षीणाभवं*स्तदा सर्वा औषध्यश्च विशेषतः ॥ ५ ।
क्षयं गच्छद्भिरत्यर्थमोषधीभिः सुरर्षभाः ।
मूलेषु वीरुधां सोमः स्थित इत्यूचुरातुराः ॥ ६ ।
तेषाञ्चिन्ताभवत्तीव्रा विष्णुञ्च शरणं ययुः ।
भगवानाह तान् सर्वान् ब्रूत किं क्रियते मया ॥ ७ ।
ते चोचुर्देव दक्षेण शप्तः सोमो विनाशितः ।
तानुवाच तदा देवो मथ्यताङ्कलशोदधिः ।
औषध्यः† सर्व्वतो देवाः प्रक्षिप्याशु सुसंयतैः ॥ ८ ।
एवमुक्त्वा ततो देवान्दध्यौ रुद्रं हरिः स्वयम् ।
ब्रह्माणञ्च तथा दध्यौ वासुकिन्नेत्रकारणम् ॥ ९ ।
ते सर्वें तत्र सहिता ममन्थुर्वरुणालयम् ।
तस्मिन् सुमथिते जातः पुनः सोमो महीपते ॥ १० ।
योऽसौ क्षेत्रज्ञसंज्ञो वै देहेऽस्मिन् पुरुषः परः ।
स एव सोमो मन्तव्यो देहिनां जीवसंज्ञकः‡ ॥ ११ ।
परीक्षया§ स मूर्त्तिन्तु पृथक् सौम्यां प्रपेदिवान् ।

---

* क्षीणा अभवन्निति साधु ।

† औषधीरिति साधु ।

‡ जीवसंज्ञित इति (ग) ।

§ परेच्छयेति (ग) ।

तमेव देवमनुजाः षोड़शेमाश्च देवताः ॥
उपजीवन्ति वृक्षाश्च तथैवौषधयः प्रभुम् ।
रुद्रस्तमेव सकलं दधार शिरसा तदा ॥ १२।१३ ।
तदात्मिका भवन्त्यापो विश्वमूर्त्तिरसौ स्मृतः ।
तस्य ब्रह्मा ददौ प्रीतः पौर्णमासीन्तिथिं प्रभुः ॥ १४ ।
तस्यामुपोषयेद्राजंस्तमर्थम्प्रतिपादयेत् ।
स चानाहारश्च भवेत्तस्य ज्ञानम्प्रयच्छति ।
कान्तिम्पुष्टिञ्च राजेन्द्र धनं धान्यञ्च केवलम् ॥ १५ ।

इति वराहपुराणे सोमोत्पत्तिस्थितिरहस्यं नाम पञ्चत्रिंशोऽध्यायः ।

षट्त्रिंशोऽध्यायः ।

महातपा उवाच ।

आदित्रेतासु राजानो मणिजा ये प्रकीर्त्तिताः ।
कथयिष्यामि तान्राजन्यत्र जातोऽसि पार्थिव ॥ १ ।
योऽसौ सुप्रभनामासीत्स त्वं राजन्कृते युगे ।
जातोऽसि नाम्ना विख्यातः प्रजापालेति शोभनः ॥ २
शेषास्त्रेतायुगे राजन् भविष्यन्ति महाबलाः ।
यो दीप्ततेजा मणिजः स शान्त इति कीर्त्तितः ॥ ३ ।
सुरश्मिर्भविता राजा शशकर्णो महाबलः ।
शुभदर्शनः पाञ्चालो भविष्यति न संशयः ॥ ४ ।

सुशान्तिरङ्गवंशे वै सुन्दरोऽप्यङ्ग इत्युत ।
सुन्दश्च मुचुकुन्दोऽभूत्सुद्युम्नस्तुरुरेव च ॥ ५ ।
सुमनाः सोमदत्तस्तु शुभः संवरणोऽभवत् ।
सुशीलो वसुदानस्तु सुखदोऽसुपतिर्भवत्* ॥ ६ ।
शम्भुः सेनापतिरभूत्कान्तो दशरथः स्मृतः ।
सोमोऽभूज्जनको राजा एते त्रेतायुगे नृपाः ॥ ७ ।
सर्व्वे भूमिमिमां राजन् भुक्ता ते वसुधाधिपाः ।
इष्ट्वा च विविधैर्यज्ञैर्दिवं प्राप्स्यन्त्यसंशयम् ॥ ८ ।

वराह उवाच ।

एवं श्रुत्वा स राजर्षिर्ब्रह्मविद्यास्तृतम्प्रभुः† ।
आख्यानं परमप्रीतस्तपश्चर्त्तुंमगाद्वनम् ॥ ९ ।
ऋषिरध्यात्मयोगेन विहायेदं कलेवरम् ।
ब्रह्मभूतोऽभवद्धात्रि हरौ लयमवाप च ॥ १० ।
वृन्दावनञ्च राजासौ तपोऽर्थं‡ गतवान् प्रभुः ।
तत्र गोविन्दनामानं हरिं स्तोतुमथारभत्§ ॥ ११ ।

राजोवाच ।

नमामि देवं जगताञ्च मूर्त्तिं
गोपेन्द्रमिन्द्रानुजमप्रमेयम् ।

---

* अभवदिति साधु ।

† शुभमिति (ग) ।

‡ तपोऽर्थमिति (ग) ।

§ आरभदिति आर्षम्, आरभतेति साधु ।

संसारचक्रक्रमणैकदत्तं
पृथ्वीधरन्देववरं नमामि ॥ १२ ।
भवोदधौ दुःखशतोर्म्मिभीमे
जरावर्त्तं क्षणा पातालमूले ।
तदन्त एको ददते सुखं मे
नमोऽस्तु ते गोपतिरप्रमेय ॥ १३ ।
व्याध्यादियुक्तैः पुरुषैर्ग्रहैश्च
सङ्कट्टमानं पुनरेव देव ।
नमोऽस्तु ते युद्धरते महात्मन्
जनार्द्दनोपेन्द्र समस्तबन्धो ॥ १४ ।
त्वमुत्तमः सर्व्वविदां सुरेश
त्वया ततं विश्वमिदं समस्तम् ।
गोपेन्द्र मां पाहि महानुभाव
भवाद्भीतं तिग्मरथाङ्गपाणे* ॥ १५ ।
परोऽसि देवः प्रवरः सुराणां
पुराणरूपोऽसि शशिप्रकाशः ।
हुताशवक्त्राच्युत तीव्रभाव
गोपेन्द्र मां पाहि भवे पतन्तम्† ॥ १६ ।
संसारचक्रक्रमणान्यनेका-

---

* (ख) पुस्तके श्लोकस्यास्य शेषपादो नास्ति ।

† एष श्लोकः (ख) पुस्तके नास्ति ।

न्याविर्भवन्त्यच्युत देहिनां यत्* ।
त्वन्मायया मोहितानां सुरेश
कस्ते मायान्तरतेत्† द्वन्द्वधामा ॥ १७ ।
अगोत्रमस्पर्शमरूपगन्ध-
मनाममनिर्द्देशमजं वरेण्यम् ।
गोपेन्द्र ये त्वामुपासन्ति‡ धीरा-
स्ते मुक्तिभाजो भवधर्म्ममुक्ताः ॥ १८ ।
शब्दातिगं व्योमरूपं विमूर्त्तिं
विकर्म्मिणं शुभभावं वरेण्यम् ।
चक्राब्जपाणिन्तु तथोपचारा-
दुक्तं पुराणे सततन्नमामि ॥ १९ ।
त्रिविक्रमं क्रान्तजगत्त्रयञ्च
चतुर्मूर्त्तिं विश्वजगत्क्षितीशम् ।
शम्भुं विभुं भूतपतिं सुरेशं
नमाम्यहं विष्णुमनन्तमूर्त्तिम् ॥ २० ।
त्वं देव सर्व्वाणि चलाचराणि
सृजस्यथो संहरसे§ त्वमेव ।
मां मुक्तिकामनय देव शीघ्रं

---

* (ख)पुस्तकेऽत्र श्लोकपादोऽधिको वर्त्तते, यथा "परात्परं देवगुरो नमस्ते" इति ।

† तरतीति साधु ।

‡ उपासते इति साधु ।

§ संहरसीति साधु ।

यस्मिन् गता योगिनो नोपयान्ति ॥ २१ ।
जयस्व गोविन्द महानुभाव
जयस्व विष्णो जय पद्मनाभ ।
जयस्व सर्व्वज्ञ जयाप्रमेय
जयस्व विश्वेश्वर विश्वमूर्त्ते ॥ २२ ।

वराह उवाच ।

एवं स्तुत्वा तदा राजा निधाय स्वकलेवरम् ।
परमात्मनि गोविन्दे मोक्षमागाच्च शाश्वतम् ॥ २३ ।

इति वराहपुराणे आगितिहासे षट्त्रिंशोऽध्यायः ।

सप्तत्रिंशोऽध्यायः ।

धरण्युवाच ।

कथमाराध्यसे देव भक्तिमद्भिर्नरैर्विभो ।
स्त्रीभिर्वा सर्वमेतन्मे शंस त्वं भूतभावन ॥ १ ।

वराह उवाच ।

भावसाध्योऽस्म्यहन्देवि न वित्तैर्न जपैरहम् ।
साध्यस्तथापि भक्तानां कायक्लेशं वदामि ते ॥ २ ।
कर्म्मणा मनसा वाचा मच्चित्तो यो नरो भवेत् ।

तस्य व्रतानि वक्ष्येऽहं विविधानि निबोध मे ॥ ३ ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यम्प्रकीर्त्तितम् ।
एतानि मानसान्याहुर्व्रतानि तु धराधरे ॥ ४ ।
एकभक्तं तथा नक्तमुपवासादिकञ्च यत् ।
तत्सर्व्वं कायिकम्पुंसां व्रतम्भवति नान्यथा ॥ ५ ।
वेदस्याध्ययनं विष्णोः कीर्त्तनं सत्यभाषणम् ।
अपैशुन्यं हितं धर्म्मवाचिकं व्रतमुत्तमम्* ॥ ६ ।
अत्रापि श्रूयते चान्यदृषिरुग्रतपाः पुरा ।
ब्रह्मपुत्रः पुराकल्पे आरुणिर्नाम नामतः ॥ ७ ।
सोऽरण्यमगमत्किञ्चित्तपोऽर्थी द्विजसत्तमः ।
तपस्तेपे ततस्तस्मिन्नुपवासपरायणः ॥ ८ ।
देविकायास्तटे रम्ये सोऽवसद्ब्राह्मणः किल ।
कदाचिदभिषेकाय स जगाम महानदीम् ॥ ९ ।
तत्र स्नात्वा जपन्विप्रो ददर्शायान्तमग्रतः ।
व्याधं महाधनुःपाणिमुग्रनेत्रं विभीषणम् ॥ १० ।
तं द्विजं हन्तुमायात्स वल्कलानां जिघृक्षया ।
तं दृष्ट्वा क्षुभितो विप्रो ब्रह्मघ्नस्य भयादिति ॥ ११ ।
ध्यायन्नारायणं देवं तस्थौ तत्रैव स द्विजः ॥ १२ ।
तं दृष्ट्वान्तर्गतहरिं व्याधो भीत इवाग्रतः ।
विहाय सशरञ्चापं ततो वचनमब्रवीत् ॥ १३ ।

---

* एष श्लोकः (ख) पुस्तके नास्ति ।

व्याध उवाच ।

हन्तुमिच्छन्नहं ब्रह्मन् भवन्तमागमिहागतः ।
इदानीं दर्शनात्तुभ्यं सा मतिः क्वापि मे गता ॥ १४ ।
ब्राह्मणानां सहस्राणि सत्स्त्रीणामयुतानि च ।
निहतानि मया ब्रह्मन्सततं पापकारिणा ॥ १५ ।
काङ्गतिं प्रतिपत्स्यामि ब्रह्मघ्नोऽहं द्विजोत्तम ।
इदानीं तप्तुमिच्छामि तपोऽहन्त्वत्समीपतः ।
उपदेशप्रदानेन प्रसादङ्कर्त्तुमर्हसि ॥ १६ ।
एवमुक्तोऽप्यसौ विप्रो नोत्तरं प्रत्यपद्यत ।
ब्रह्महा पापकर्म्मेति* मत्वा ब्राह्मणपुङ्गवः ॥ १७ ।
अनुक्तोऽपि स धर्म्मेप्सुर्व्याधस्तत्रैव तस्थिवान् ।
स्नात्वा नद्यां द्विजः सोऽपि वृक्षमूलमुपाश्रितः ॥ १८ ।
कस्यचित्त्वथ कालस्य तां नदीमगमत्किल ।
व्याघ्रो बुभुक्षितः श्रान्तं तं विप्रं हन्तुमुद्यतः ॥ १९ ।
अन्तर्जलगतं विप्रं यावद्व्याघ्रो जिघृक्षति ।
तावद्व्याधेन व्याघ्रोऽसौ सद्यः प्राणैर्वियोजितः ॥ २० ।
तस्माद्व्याघ्रशरीरात्तु उत्थाय पुरुषः किल ।
विप्रश्चान्तर्जले मग्नः श्रुत्वा तं शब्दमाकुलम् ।
नमो नारायणायेति वाक्यमेतदुवाच ह ॥ २१ ।
व्याघ्रेणापि श्रुतो मन्त्रः प्राणैः कण्ठस्थितैस्ततः ।
श्रुतमात्रे जहौ प्राणान् पुरुषश्चाभवच्छुभः ॥ २२ ।

---

* पापकर्त्तेति (ख) (ग) पुस्तकयोः पाठः ।

सोऽब्रवीद्यामि तं देशं यत्र विष्णुः सनातनः ।
त्वत्प्रसादाद्द्विजश्रेष्ठ मुक्तपाप्मा निरामयः ॥ २३ ।
इत्युक्तो ब्राह्मणः प्राह कोऽसि त्वं पुरुषोत्तम ।
सोऽब्रवीत्तस्य राजेन्द्र यद्वृत्तं पूर्व्वजन्मनि ॥ २४ ।
दीर्घबाहुरिति ख्यातः सर्व्वधर्म्मविशारदः ।
अहं जानामि वेदांश्च अहं वेद्मि शुभाशुभम् ।
ब्राह्मणैर्नैव मे कार्य्यं किं वस्तु ब्राह्मणा इति ॥ २५ ।
तस्यैवंवादिनो विप्राः सर्व्वे क्रोधसमन्विताः ।
ऊचुः शापं दुराधर्षं क्रूरो व्याघ्रो भविष्यसि* ॥ २६ ।
अवमानात्तु विप्राणां नात्यर्थं स्मरणं त्वव ।
मृत्युकाले तु संमूढ़ केशवेति शृणुष्यसि* ॥ २७ ।
इत्युक्तोऽहं पुरा तैस्तु ब्राह्मणैर्वेदपारगैः ।
तदेव सर्व्वं सम्प्राप्तो ब्रह्मशापं सुपुष्कलम् ॥ २८ ।
ततस्ते ब्राह्मणाः सर्व्वे प्रणिपत्य मया मुने ।
उक्तानुग्रह†हेतोर्वै त ऊचुर्मामिदं पुरा ॥ २९ ।
षष्ठान्नकालिकस्याग्रे यस्ते स्थास्यति कश्चन ।
स भक्ष्यस्ते तु भविता कश्चित्कालन्नराधिप ॥ ३० ।
यदेषुघातं लब्ध्वा तु प्राणैः कण्ठगतैर्भवान् ।
श्रोष्यसे द्विजवक्त्रात्तु नमो नारायणेति च ।
तदा स्वर्गगतिस्तुभ्यं भविता नात्र संशयः ॥ ३१ ।

---

* श्रोष्यसीति साधु ।

† उक्ताः अनुग्रह इति साधु ।

परवक्त्रगतञ्चापि विष्णोर्नाम श्रुतं मया ।
कृतद्विषस्य विप्राणां प्रत्यक्षोऽभवदच्युतः ॥ ३२ ।
यः पुनर्ब्राह्मणान् पूज्य* स्ववक्त्रेण नमो हरिम् ।
वदन् प्राणैर्वियुज्येत मुक्तोऽसौ वीतकिल्बिषः ॥ ३३ ।
सत्यं सत्यं पुनः सत्यमुत्क्षिप्य भुजमुच्यते ।
जङ्गमाः ब्राह्मणा देवाः कूटस्थः पुरुषोत्तमः ॥ ३४ ।
एवमुक्त्वा गतः स्वर्गं स राजा वीतकल्मषः ।
ब्राह्मणोऽपि सदा मुक्तस्तं व्याधम्प्रत्यभाषत ॥ ३५ ।

ऋषिरुवाच ।

जिघृक्षोर्मृगराजस्य यत्त्वया रक्षितो ह्यहम् ।
तत्पुत्र तुष्टस्ते दद्मि वरं वरय सुव्रत ॥ ३६ ।

व्याध उवाच ।

एष एव वरो मह्यं यत्त्वं मां भाषसे द्विज ।
अतः परं वरेणाहं किङ्करोमि प्रशाधि माम् ॥ ३७ ।

ऋषिरुवाच ।

अहं त्वया पुरा व्याध प्रार्थितोऽस्मि तपोऽर्थिना ।
बहुपातकयुक्तेन घोररूपेण चानघ ॥ ३८ ।
इदानीं तव पापानि देविकाभिषवेण च ।
मद्दर्शनेन च चिरं विष्णुनामश्रुतेन च ।
नष्टानि शुद्धदेहोऽसि साम्प्रतन्नात्र संशयः ॥ ३९ ।

---

* पूजयित्वेति साधु ।

इदानीं वरमेकन्त्वं गृहाण मम सन्निधौ।
तपः कुरुष्व साधो त्वं चिरकालं यदिच्छसि॥ ४०।

व्याध उवाच।

य* एष भवता प्रोक्तो विष्णुर्नारायणः प्रभुः।
स कथं प्राप्यते मर्त्त्यैरेष एव वरो मम॥ ४१ ।†

ऋषिरुवाच।

तमुद्दिश्य व्रतं कुर्य्याद्यत्किञ्चित्पुरुषोऽच्युतम्।
स परन्तमवाप्नोति भक्त्या युक्तः पुमानिति॥ ४२।
एवं ज्ञात्वा भवान् पुत्र व्रतमेतत्समाचर।
न भक्षयेद्गणान्नन्तु न वदेदनृतं क्वचित्॥ ४३।
एतत्ते व्रतमादिष्टं मया व्याध वरं ध्रुवम्।
अत्रैव तपसा युक्तस्तिष्ठ त्वं यावदिच्छसि॥ ४४।

वराह उवाच।

एवञ्चिन्तान्वितं मत्वा वरदो ब्राह्मणोऽभवत्।
मोक्षार्थिनमथो‡ बुद्ध्वा वञ्चयित्वा गतो मुनिः॥ ४५।

इति वराहपुराणे प्रागितिहासे सप्तत्रिंशोऽध्यायः।

—०:०—

---

* स एष इति (ग)।

† एवमुक्त्वा तु तं व्याधं तस्मात्प्रायात्स्वये द्विजः।
इत्येवं सह पुत्रेभ्यो प्रागिति प्राह संक्षेपः॥
(ग) पुस्तके एषश्लोकोऽधिकोवर्त्तते।

‡ नामत इति (ग)।

अष्टात्रिंशोऽध्यायः ।

वराह उवाच ।

स शुभं शोभनं मार्गमास्थाय व्याधसत्तमः ।
तपस्तेपे निराहारस्तं गुरुं मनसा स्मरन् ॥ १ ।
भिक्षाकाले* तु सम्प्राप्ते शीर्णपर्णान्यभक्षयत् ॥ २ ।
स कदाचित्क्षुधाविष्टो वृक्षमूलं समाश्रितः ।
बुभुक्षितस्तरोः पर्णान्यैच्छद्भक्षितुमन्तिकात् ॥ ३ ।
इत्येवं कुर्व्वतो व्योम्नि वागुवाचाशरीरिणी ।
मा भक्षयस्व सकठमुच्चैरेवं प्रभाषिते ॥
ततोऽसौ तद्विहायान्यद्वार्क्षं पतितमग्रहीत् ।
तदप्येवं निषिद्धं स्यादन्यदेव तथैव च ॥ ४ । ५ ।
एवं स सकठं मत्वा व्याधः किञ्चिन्न भक्षयत्† ।
निराहारस्तपस्तेपे स्मरन् गुरुमतन्द्रितः ॥ ६ ।
एवन्तपस्यतस्तस्य काले ऋषिवरोऽभ्ययात् ।
दुर्वासाः शंसितात्मा वै प्राणयुक्तमपश्यत ।
व्याधन्तपोत्थ‡तेजोभिर्ज्वलमानं§ हविर्यथा ॥ ७ ।
सोऽपि व्याधस्तु तं नत्वा शिरसाऽथ महामुनिम् ।

---

* भक्ष्यकाल इति (ग) ।

† अभक्षयदिति साधु ।

‡ तप उत्थेति साधु ।

§ ज्वलन्तमिति साधु ।

उवाच तं कृतार्थोऽस्मि भगवन्दर्शनात्तव।
इदानीं श्राद्धकाले त्वं प्राप्तोऽसि मम दैवतम्।
शीर्णपर्णादिभिः कृत्वा प्रीणयामि द्विजोत्तमम्॥ ८।९।
दुर्वासा अपि तं शुद्धभावपूतं जितेन्द्रियम्।
जिज्ञासुस्तत्तपो वाक्यमिदमुच्चैरुवाच ह॥ १०।
यवगोधूमशालीनामन्नञ्चैव सुसंस्कृतम्।
दीयतां मे क्षुधार्त्ताय त्वामुद्दिश्यागताय च॥ ११।
इत्युक्ते नन्वसौ व्याधश्चिन्तां परमिकाङ्क्षतः।
क्व संभविष्यते* मद्यमिति चिन्तापरोऽभवत्॥ १२।
तस्य चिन्तयतः पात्रमाकाशात्पतितं शुभम्।
सौवर्णं सिद्धिसंयुक्तं तज्जग्राह करेण सः॥ १३।
तद्गृहीत्वा मुनिं प्राह दुर्वासाख्यं ससाध्वसः।
अत्रैव स्थीयतां ब्रह्मन्यावद्भिक्षाटनं त्वहम्।
करोमि मत्प्रसादोऽयं क्रियतां ब्रह्मवित्तम॥ १४।
एवमुक्त्वा ततो भिक्षां याचितुं व्याधसत्तमः।
नातिदूरेण नगरं वनघोषसमन्वितम्॥ १५।
तस्य तत्र प्रयातस्य अग्रतः सर्वशोभनाः।
वृक्षेभ्यो निर्ययुश्चान्या हेमपात्राग्रपाणयः॥ १६।
विविधान्नानि तस्याशु दत्त्वा पात्रम्प्रपूरितम्।
स च भूतार्थमात्मानं मत्वा पुनरथाश्रमम्।
आजगाम ततोऽपश्यत्तमृषिं जपतां वरम्॥ १७।

---

* संभविष्यतीति साधु।

तं दृष्ट्वा स्थाप्य* तां भिक्षां शुचौ देशे प्रसन्नधीः ।
प्रणम्य तमृषिं वाक्यमुवाच व्याधसत्तमः ॥ १८ ।
ब्रह्मन् क्षालय पादौ त्वमुपविश्यासने शुभे ।
यदि मेऽनुग्रहो देव तदेवं कर्त्तुमर्हसि ॥ १९ ।
एवमुक्तः स जिज्ञासुस्तपोवीर्य्यं शुभं मुनिः ।
नदीङ्गन्तुं न शक्नोमि जलपात्रं न चास्ति मे ।
कथं प्रक्षालनं व्याध पादयोर्मे भविष्यति ॥ २० ।
इत्येवं मुनिना प्रोक्तो व्याधश्चिन्तापरोऽभवत् ।
किङ्करोमि कथञ्चास्य भोजनं वै भविष्यति ॥ २१ ।
एवं सञ्चिन्त्य मनसा गुरुं स्मृत्वा विचक्षणः ।
जगाम शरणन्तान्तु सरितन्देविकां सुधीः ॥ २२ ।

व्याध उवाच ।

व्याधोऽस्मि पापकर्म्मास्मि ब्रह्महास्मि सरिद्वरे ।
तथापि संस्मृता देवी पाहि मां शरणागतम् ॥ २३ ।
देवतां नैव जानामि न मन्त्रं न तथार्च्चनम् ।
गुरुपादौ परन्ध्यात्वा पश्यामि सततं शुभम्॥ २४ ।
एवंविधस्य मे देवि दयां कुरु सरिद्वरे ।
ऋषेरासन्नतां याहि पादशौचार्थमापगे ॥ २५ ।
एवमुक्ता तु व्याधेन देविका पापनाशिनी ।
आजगाम यतस्तस्थौ दुर्वासा शंसितव्रतः ॥ २६ ।
तद्दृष्ट्वा महदाश्चर्य्यं दुर्वासा विस्मयं ययौ ।

---

* स्थापयित्वेति साधु ।

प्रचाल्य हस्तपादौ च तदन्नं श्रद्धयान्वितम् ।
बुभुजे परमप्रीतस्तथाचम्य विचक्षणः ॥ २७ ।
तमस्थिशेषं व्याधन्तु क्षुधा दुर्बलताङ्गतम् ।
उवाच वेदाः साङ्गास्ते सरहस्याः पदक्रमाः ।
ब्रह्मविद्या पुराणानि प्रत्यक्षाणि भवन्तु ते ॥ २८ ।
एवम्प्रदाद्वरन्तस्य दुर्वासा नाम चाकरोत् ।
भवान्सत्यतपा नाम ऋषिराद्यो भविष्यसि ॥ २९ ।
एवं दत्तवरो व्याधस्तमाह मुनिसत्तमम् ।
व्याधो भूत्वा कथं ब्रह्मन्वेदानध्यापयाम्यहम् ॥ ३० ।
ऋषिरुवाच ।
प्राक्शरीरङ्गतन्तेऽद्य निराहारस्य सत्तम ।
तपोमयं शरीरन्ते पृथग्भूतं न संशयः ॥ ३१ ।
प्राग्विज्ञानं गतन्नाशमिदानीं शुद्धमक्षरम् ।
उत्पन्नं शुद्धकायोऽसि सत्यमेतद्ब्रवीमि ते ।
तेन वेदाश्च शास्त्राणि प्रतिभास्यन्ति वै मुने ॥ ३२ ।

इति वराहपुराणे सत्यतप उपाख्याने अष्टात्रिंशोऽध्यायः ।

ऊनचत्वारिंशोऽध्यायः ।

सत्यतपा उवाच* ।

भगवन्द्वे शरीरे तु इति यत्परिकीर्त्तितम् ।
तन्मे कथय भेदं वै केन ब्रह्मविदां वर ॥ १ ।

दुर्वासा उवाच ।

न द्वे त्रीणि शरीराणि वाच्यं तद्विपरीतकम् ।
त्रिभोगायतनञ्चैव शरीराणीति देहिनाम् ॥ २ ।
प्रागवस्थमधर्म्माख्यं परिज्ञानविवर्ज्जितम् ।
अपरं सव्रतं तद्धि ज्ञेयमत्यन्तधार्म्मिकम् ॥ ३ ।
धर्म्माधर्म्मोपभोगाय यत्तृतीयमतीन्द्रियम् ।
तत्त्रिभेदं विनिर्द्दिष्टं ब्रह्मविद्भिर्विचक्षणैः ॥ ४ ।
यावता धर्म्मभोगश्च भुक्तिश्चेति त्रिभेदकम् ॥ ५ ।
यस्तु भावः पुरा ह्यासीत्प्राणिनो निघ्नतस्तव ।
तत्पापाख्यं शरीरन्ते† पापसंज्ञमतोऽभवत् ॥ ६ ।
इदानीं शुभवृत्तिन्तु कुर्व्वतस्तप आर्जवम् ।
अपरन्धर्मरूपन्तु शरीरन्ते व्यवस्थितम् ।
तेन‡ वेदपुराणानि ज्ञातुमर्हस्यसंशयम् ॥ ७ ।

यदाष्टके सम्परिवर्त्तते पुमां-

---

* व्याध उवाच इति (ख) ।

† शरीरन्तु इति (क) ।

‡ येनेति (ग) ।

स्तदान्यवृत्तो भवतीह निश्चितम् ।
गताष्टवर्षस्तु पुमान्यदा भवे-
त्तदान्यचेष्टो भवतीह मानवः ॥ ८ ।
एकं शरीरं हि पृथक् निर्दिष्टं ब्रह्मवादिभिः ।
अवस्थाभेदतश्चैवं तदेतत्कथितन्त्रिधा ।
अन्तरन्नास्ति चैतस्य यथा मृद्घटयोरिव ॥ ९ ।
कर्म्मकाण्डश्चतुर्भेदं ब्राह्मणादिषु कीर्त्तितम् ।
तत्र वेदोक्तकर्म्माणि त्रयः कुर्व्वन्ति नित्यशः ॥ १० ।
त्रिशुश्रूषामथैकस्तु एता वेदोदिताः क्रियाः ।
एतान्धर्म्मांस्तु विज्ञाय ब्राह्मणो यस्तपस्यति ।
तस्य मुक्तिर्भवेन्नूनं वेदवादरतस्य च ॥ ११ ।

सत्यतपा उवाच ।

यत्तदेतत्परं ब्रह्म त्वया प्रोक्तं महामुने ।
तस्य रूपं न जानन्ति योगिनोऽपि महात्मनः ॥ १२ ।
अनामगोत्ररहितममूर्त्तं मूर्त्तिवर्ज्जितम् ।
कथं तज्ज्ञायते ब्रह्म संज्ञानामविवर्ज्जितम् ॥ १३ ।
तत्तस्य संज्ञां कथय येन जानाम्यहं गुरो ॥ १४ ।

दुर्वासा उवाच ।

यदेतत्परमं ब्रह्म वेदे शास्त्रेषु पठ्यते ।
स वेदः पुण्डरीकाक्षः स्वयं नारायणो हरिः ॥ १५ ।
स यज्ञैर्विविधैरिष्टैर्दानैर्दत्तैश्च सत्तम ।
प्राप्यते परमो देवः स्वयं नारायणो हरिः ॥ १६ ।

सत्यतपा उवाच ।

भगवन् बहुवित्तेन ऋत्विग्भिर्वेदपारगैः ।
प्राप्यते पुण्यकृद्भिर्हि देवो नारायणो भृशम् ॥ १७ ।
अधनेन* कथन्देवः प्राप्यते तद्वदस्व मे ।
वित्तेन च विना दानं दातुं विप्र न शक्यते ॥ १८ ।
विद्यमानेऽपि न मतिः कुटुम्बासक्तचेतसः ।
तस्य नारायणो दूरे सर्व्वथा प्रतिभाति मे ॥ १९ ।
अत्यायासेन लभ्येत येन देवः सनातनः ।
तन्मे विशेषतो ब्रूहि सर्व्ववर्णैः कृतम्भवेत् ॥ २० ।

दुर्वासा उवाच ।

कथयामि परं गुह्यं रहस्यन्देवनिर्म्मितम् ।
धरण्या यत्कृतं पूर्व्वं मज्जन्त्या नु रसातले ॥ २१ ।
पृथिव्याः पार्थिवो भावः सलिलेनातिरेचितः ।
तस्मिन् सलिलमग्ने तु पृथ्वी प्रायाद्रसातलम् ॥ २२ ।
सा भूतधारिणी देवी रसातलगता शुभा ।
आराधयामास विभुं देवन्नारायणं विभुम् ॥ २३ ।
उपवासव्रतैर्देवी नियमैश्च पृथग्विधैः ।
कालेन महता तस्याः प्रसन्नो गरुड़ध्वजः ।
उज्जहार स्थितौ स्थित्यां स्थापयामास सोऽव्ययः ॥ २४

सत्यतपा उवाच ।

कोऽसौ धरण्या सञ्चीर्ण उपवासो महामुने ।

---

* अधनेनेति (क), (ख) ।

कानि व्रतानि च तथा एतन्मे वक्तुमर्हसि ॥ २५ ॥

दुर्वासा उवाच।

यदा मार्गशिरे* मासि दशम्यान्नियतात्मवान्।
कृत्वा देवार्चनन्धीमानग्निकार्य्यं यथाविधि॥
शुचिवासाः प्रसन्नात्मा हव्यमन्नं सुसंस्कृतम्।
भुक्त्वा पञ्चपदङ्गत्वा पुनः शौचन्तु पादयोः॥
कृत्वाष्टाङ्गुलमात्रन्तु क्षीरवृक्षसमुद्भवम्।
भक्षयेद्दन्तकाष्ठन्तु तत आचम्य यत्नतः ॥ २६।२७।२८ ।
स्पृष्ट्वा द्वाराणि सर्व्वाणि चिरन्ध्यात्वा जनार्द्दनम्।
शङ्खचक्रगदापाणिं पीताम्बरधरं विभुम्॥
प्रसन्नवदनं देवं सर्व्वलक्षणपूजितम्।
ध्यात्वा पुनर्जलं हस्ते गृह्य† भावेर्जनार्द्दनम्॥
दद्यादर्घ्यञ्च देवाय करतोयेन मानवः।
एवमुच्चारयन्वाचं तस्मिन् काले महामुने॥ २९।३०।३१ ।
एकादश्यान्निराहारः स्थित्वा चैवापरेऽहनि।
भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत ॥ ३२ ।
एवमुक्त्वा ततो रात्रौ देवदेवस्य सन्निधौ।
जपन्नारायणायेति स्वपेत्तत्र विधानतः ॥ ३३ ।
ततः प्रभाते विमले नदीङ्गत्वा समुद्रगाम्।
इतरां वा तड़ागं वा गृहे वा नियतात्मवान्॥

* मार्गशिर इति आर्षं, मार्गशिरसीति साधु।

† गृहीत्वेति साधु।

आनीय मृत्तिकां शुद्धां मन्त्रेणानेन मानवः* ।
धारणं पोषणन्त्वत्तो भूतानां देवि सर्व्वदा ॥
तेन सत्येन मे पापं यावन्मोचय सुव्रते ।
ब्रह्माण्डोदरतीर्थानि त्वया स्पृष्टानि देवते ॥
तेनेमां मृत्तिकान्त्वत्तो गृह्य† स्थास्येऽद्य मेदिनि ।
त्वयि सर्व्वे रसा नित्याः स्थिता वरुण सर्व्वदा ॥
तैरिमां मृत्तिकां प्लाव्य‡ पूतां कुरुहि§ मा चिरम् ।
एवं मृदं तथा तोयं प्रगृह्यात्मानमालभेत् ।
त्रिः कृत्वा शेषमृत्स्नात्वा सर्व्वाङ्गं लेपयेद्बुधः¶॥३४—३७।
वारुणैरेव मन्त्रैस्तु स्नानं कुर्य्याद्यथाविधि ।
स्नात्वा चावश्यकं कृत्वा पुनर्देवगृहं व्रजेत् ॥ ३८ ।
तत्राराध्य मया युक्तं देवं नारायणं प्रभुम् ।
केशवाय नमः पादौ कटिं दामोदराय च ॥ ३९ ।
ऊरुयुग्मं नृसिंहाय उरः श्रीवत्सधारिणे ।
कोष्ठं कौस्तुभवासाय वक्षः श्रीपतये तथा ॥ ४० ।
त्रैलोक्ये विजयायेति बाहू सर्व्वात्मने शिरः ।
रथाङ्गधारिणे चक्रं शङ्करायेति वारिजम् ॥ ४१ ।

---

* (ग) पुस्तके अधनेन कार्यं देव इत्यस्मात् जागरं तत्र कारयेदित्यन्तः सन्दर्भो नास्ति ।

† गृहीत्वेति साधु ।

‡ प्लावयित्वेति साधु ।

§ कुरुहीति आर्षं, कुरु इति साधु ।

¶ (ख) पुस्तके (३७) श्लोकस्य शेषचरणं तथाऽपरश्लोकस्य चरणत्रयं नास्ति ।

गम्भीरायेति च गदामम्भोजं शान्तिमूर्त्तये।
एवमभ्यर्च्य देवेशं देवं नारायणं प्रभुम्।
पुनस्तस्याग्रतः कुम्भान् चतुरः स्थापयेद्बुधः।
जलपूर्णान्समाल्यांश्च तिलपूर्णैः सकाञ्चनैः॥ ४२।४३।
चत्वारस्ते समुद्रास्तु कलशाः परिकीर्त्तिताः।
तेषां मध्ये शुभं पीठं स्थापयेद्वस्त्रगर्भितम्॥ ४४।
सौवर्णं राजतं पात्रं ताम्रं वा द्रवं तथा।
अलाभे सर्व्वपात्राणां पालाशं पत्रमिष्यते॥ ४५।
तोयपूर्णन्तु तत्कृत्वा तस्मिन्पात्रे ततो न्यसेत्।
सौवर्णं मत्स्यरूपेण कृत्वा देवं जनार्द्दनम्॥
सर्व्वावयवसंयुक्तं सर्व्वाभरणभूषितम्।
तत्रानेकविधैर्भक्ष्यैः फलैः पुष्पैश्च शोभितम्।
गन्धधूपैश्च वस्त्रैश्च अर्च्चयित्वा यथाविधि॥ ४६।४७।
रसातलगता वेदा यथा देव त्वया हृताः।
मत्स्यरूपेण तद्वन्मां भवानुद्धर केशव॥ ४८।
एवमुच्चार्य तस्याग्रे जागरं तत्र कारयेत्॥ ४९।
यथा विभवसारेण प्रभाते विमले तथा।
चतुर्णां ब्राह्मणानाञ्च चतुरो दापयेद्घटान्॥ ५०।
पूर्व्वन्तु बह्वृचे* दद्याच्छन्दोगे दक्षिणं तथा।
यजुःशाखान्विते दद्यात्पश्चिमं घटमुत्तमम्॥ ५१।
उत्तरङ्कामतो दद्यादेष एव विधिः स्मृतः।

* बह्वच इति (ग)।

ऋग्वेदः प्रीयतां पूर्व्वे सामवेदस्तु दक्षिणे ॥
यजुर्वेदः पश्चिमतो अथर्व्वश्चोत्तरेण तु ।
अनेन क्रमयोगेन प्रीयतामिति वाचयेत् ॥ ५२।५३ ।
सौवर्णं मत्स्यरूपन्तु आचार्य्याय निवेदयेत् ।
गन्धधूपादिवस्त्रैश्च सम्पूज्य विविधक्रमात् ॥ ५४ ।
यस्त्विमं सरहस्यञ्च मन्त्रञ्चैवोपपादयेत् ।
विधानं तस्य वै दत्त्वा फलं कोटिगुणोत्तरम् ॥ ५५ ।
प्रतिपद्य गुरुं यस्तु मोहाद्विप्रतिपद्यते ।
स कोटिजन्म नरके पच्यते पुरुषाधमः ॥ ५६ ।
विधानस्य प्रदातासौ गुरुरित्युच्यते बुधैः ।
एवं दत्त्वा विधानेन द्वादश्यां विष्णुमर्च्य च* ॥
विप्राणां भोजनं दद्याद्यथाशक्त्या सदक्षिणम् ॥ ५७ ।
सतिलं ताम्रपात्रञ्च स्थापितं कलशोपरि ।
तत्सर्व्वं जलपात्रस्थं ब्राह्मणाय कुटुम्बिने ।
देवं दद्यान्महाभागस्ततो विप्रांश्च भोजयेत् ॥ ५८ ।
भूरिणा परमान्नेन ततः पश्चात्स्वयन्नरः ।
भुञ्जीत सहितो बालैर्वाग्यतः संयतेन्द्रियः ॥ ५९ ।
अनेन विधिना यस्तु धरणीव्रतकृन्नरः ।
तस्य पुण्यफलञ्चाग्र्यं शृणु बुद्धिमतां वर ॥ ६० ।
यदि वक्त्रसहस्राणि भवन्ति मम सुव्रत ।
आयुश्च ब्रह्मणस्तुल्यं भवेद्यदि महाव्रत ।

* अर्च्य च इति आर्षम्, अर्चयित्वा इति साधु ।

तदानीमस्य धर्म्मस्य फलं कथयितुम्भवेत् ॥ ६१ ।
तथाप्युद्दिशतो ब्रह्मन्कथयिष्यामि तच्छृणु ।
दशसप्तदशाब्दे च अष्टौ चत्वार एव च ॥
लक्षायुतानि चत्वारि* एकस्यास्य चतुर्युगम् ।
तैरेकसप्ततियुगं भवेन्मन्वन्तरं मुने ॥ ६२।६३ ।
चतुर्द्दशाहोरात्रस्तु तावती रात्रिरिष्यते ।
एवं त्रिंशद्दिनो मासः ते द्वादश समाः स्मृताः ॥ ६४ ।
तेषां शतं ब्रह्मणस्तु आयुर्नास्त्यत्र संशयः ॥ ६५ ।
यः सकृद्द्वादशीमेतामनेन विधिना क्षिपेत् ।
स ब्रह्मलोकमाप्नोति तावत्कालञ्च तिष्ठति ॥ ६६ ।
ततो ब्रह्मोपसंहारं संहारे तल्लयेच्चिरम् ।
पुनः सृष्टौ भवेद्देवो राजा नाम महातपाः ॥ ६७ ।
ब्रह्महत्यादिपापानि इहलोककृतान्यपि ।
अकामः कामतो वापि तानि नश्यन्ति तत्क्षणात् ॥ ६८ ।
इह लोके दरिद्री यो भ्रष्टराज्योऽथवा नृपः ।
उपोष्यते विधानेन स राजा जायते ध्रुवम् ॥ ६९ ।
वन्ध्या नारी भवेद्या तु अनेन विधिना शुभा ।
उपोष्यति भवेत्तस्याः पुत्रः परमधार्म्मिकः ॥ ७० ।
अगम्यागमनं येन कृतं जानाति मानदः ।
स इमं विधिमासाद्य तस्मात्पापाद्विमुच्यते ॥ ७१ ।
ब्रह्मक्रियाया लोपेन वहुवर्षशतेन च ।

* पात्रीणीति (ग)।

उपोष्येमां सकृद्भक्त्या वेदसंस्कारमाप्नुयात् ॥ ७२ ।
किमत्र बहुनोक्तेन न तदस्ति महामुने ।
अप्राप्यं प्रापयति या अतः कार्य्या सदा नरैः ॥ ७३ ।
अनेन विधिना ब्रह्मन् स्वयमेव ह्युपोषिता ।
धरण्या मग्नया तात नात्र कार्य्या विचारणा ॥ ७४ ।
अदीक्षिताय नो देयं विधानं नास्तिकाय च ।
देवब्रह्मद्विषे वापि न श्राव्यन्तु कदाचन ॥ ७५ ।
गुरुभक्ताय दातव्यं सद्यः पापप्रणाशनम् ।
इह जन्मनि सौभाग्यं धनं धान्यं वरस्त्रियः ।
भवन्ति विविधास्तस्य य उपोष्यति मानवः ॥ ७६ ।
य इमं श्रावयेद्भक्त्या द्वादशीकल्पमुत्तमम् ।
शृणोति वा स पापैस्तु सर्व्वैरेव प्रमुच्यते ॥ ७७ ।

इति वराहपुराणे धरणीव्रते मत्स्यद्वादशीव्रतं नाम ऊनचत्वारिंशोऽध्यायः ।

चत्वारिंशोऽध्यायः ।

दुर्वासा उवाच ।

तथैव पौषमासे तु अमृतं मथितं सुरैः ।
तत्र कूर्म्मो भवेद्देवः स्वयमेव जनार्द्दनः ॥ १ ।
तस्येयन्तिथिरुद्दिष्टा महती कूर्म्मरूपिणः ।
पौषमासस्य या शुक्ला दशमीति निगद्यते ॥ २ ।

तस्यां प्रागेव सङ्कल्प्य प्राग्वत्स्नानादिकाः क्रियाः ।
निर्वर्त्त्याराधयेद्भक्त्या एकादश्यां जनार्द्दनम् ।
पृथङ्मन्त्रैर्मुनिश्रेष्ठ देवदेवं जनार्द्दनम् ॥ ३ ।

कूर्म्माय पादौ प्रथमं प्रपूज्य
नारायणायेति हरेः कटिञ्च ।
सङ्कर्षणायेत्युदरं विशोके-
त्युरोभवायेति तथैव कण्ठम् ॥ ४ ।
सुवाहवे चैव भुजौ शिरश्च
नमोविशालाय नमोऽस्तु देवः ।
स्वनाममन्त्रेण सुगन्धपुष्पै-
र्धूपादिनैवेद्यफलैर्विचित्रैः ॥ ५ ।
अभ्यर्च्य देवं कलशं तदग्रे
संस्थाप्य मालासितवस्त्रयुक्तम् ।
तं रत्नगर्भन्तु पुरेव कृत्वा
स्वशक्तितो हेममयञ्च देवम् ॥ ६ ।
समन्दरं कूर्म्मरूपेण कृत्वा
संस्थाप्य ताम्रे घृतपूर्णपात्रे ।
पूर्णं घटस्योपरि सन्निवेश्य
तद्ब्राह्मणं पूज्य* तथैव दद्यात् ॥ ७ ।
श्वो ब्राह्मणान्पूज्य च दक्षिणादिभि-
र्यथाशक्त्या प्रीणयेद्देवदेवम् ।

---

* पूजयित्वेति साधुः ।

नारायणं कूर्म्मरूपेण युक्तं
पश्चात्तु भुञ्जीत सभृत्यवर्गः* ॥ ८ ।
एवं कृते विप्र समस्तपापं
विनश्यति नात्र कुर्य्याद्विचारः ।
संसारचक्रं स विहाय शुद्धं
प्राप्नोति लोकञ्च हरेः पुराणम् ॥ ९ ।
प्रयान्ति पापानि विनाशमाशु
श्रीमांस्तथा जायते सत्यधर्म्मः ।
अनेकजन्मान्तरसञ्चितानि
नश्यन्ति पापानि नरस्य भक्त्या ॥ १० ।
प्रागुक्तरूपन्तु फलं लभेत
नारायणस्तुष्टिमायाति सद्यः ॥ ११ ।

इति वराहपुराणे कूर्म्मद्वादशीव्रतं नाम चत्वारिंशोऽध्यायः ।

एकचत्वारिंशोऽध्यायः ।

दुर्वासा उवाच ।

एवं माघे सिते पक्षे द्वादशी धरणीभृतः ।
वराहस्य शृणुष्वाद्यां मुने परमधार्म्मिक ॥ १ ।

---

* पश्चात् स्वयं भुञ्जीत भृत्यवर्गं इति (ख) ।

प्रागुक्तेन विधानेन सङ्कल्पस्थानमेव च ।
कृत्वा देवं समभ्यर्च्य एकादश्यां विचक्षणः ॥ २ ।
धूपनैवेद्यगन्धैश्च अर्च्चयित्वाच्युतन्नरः ।
पश्चात्तस्याग्रतः कुम्भं जलपूर्णन्तु विन्यसेत् ॥ ३ ।
वराहायेति पादौ तु माधवायेति वै कटिम् ।
क्षेत्रज्ञायेति जठरं विश्वरूपायेत्युरो हरेः* ॥ ४ ।
सर्व्वज्ञायेति कण्ठन्तु प्रजानां पतये शिरः ।
प्रद्युम्नायेति च भुजौ दिव्यास्त्राय सुदर्शनम् ॥ ५ ।
अमृतोद्भवाय शङ्खन्तु एष देवार्च्चने विधिः ।
एवमभ्यर्च्य मेधावी तस्मिन्कुम्भे तु विन्यसेत् ॥ ६ ।
सौवर्णं रौप्यताम्रे वा पात्रे विभवशक्तितः ।
सर्व्वबीजैस्तु सम्पूर्णं स्थापयित्वा विचक्षणः ॥ ७ ।
तत्र शक्त्या तु सौवर्णं वराहङ्कारयेद्बुधः† ।
दंष्ट्राग्रेणोद्धृतां भूमिं सपर्व्वतवनद्रुमाम् ।
माधवं मधुहन्तारं वराहरूपमास्थितम् ॥ ८ ।
सर्व्वबीजभृतं पात्रं रत्नगर्भं घटोपरि ।
स्थापयेत्परमं देवं जातरूपमयं‡ हरिम् ॥ ९ ।
सितवस्त्रयुगाच्छन्नं ताम्रपात्रे तु वै मुने ।

---

* अत्र छन्दोदोष आर्षः, एवमन्यत्रापि ।

† स्थापयित्वा विचक्षणः इति (ख) ।

‡ ज्ञानरूपमयमिति (क), (ख) ।

स्थाप्या*र्च्चयेद्गन्धपुष्पैर्नैवेद्यैर्विविधैः शुभैः ॥ १० ।
पुष्पमण्डलिकां कृत्वा जागरं तत्र कारयेत् ।
प्रादुर्भावाद्धरेस्तत्र वाचयेद्गावयेद्बुधः ॥ ११ ।
एवम्पूजां विधायाथ प्रभाते उदिते रवौ ।
शुचिः स्नात्वा हरिं पूज्य† ब्राह्मणाय निवेदयेत् ॥ १२ ।
वेदवेदाङ्गविदुषे साधुवृत्ताय धीमते ।
विष्णुभक्ताय शान्ताय‡ श्रोत्रियाय कुटुम्बिने ॥ १३ ।
एवं सकुम्भन्तं दत्त्वा हरिं वराहरूपिणम्§ ।
दत्त्वा चाथ लभेद्यत्तु फलं तन्मे निशामय ॥ १४ ।
इह जन्मनि सौभाग्यं श्रीः कान्तिस्तुष्टिरेव च ।
दरिद्रो वित्तवान्सद्य अपुत्रो लभते सुतम् ॥ १५ ।
अलक्ष्मीर्नश्यते सद्यो लक्ष्मीः संविशते बलात् ।
इह जन्मनि सौभाग्यं परलोके निशामय ॥ १६ ।
अस्मिन्नर्थे पुरा वृत्तमितिहासं पुरातनम् ।
प्रतिष्ठानेऽभवद्राजा वीरधन्वेति विश्रुतः ॥ १७ ।
स कदाचिद्वनम्भायान्मृगहेतोः परन्तपः ।
व्यापादयन्मृगगणान्तत्रर्षिवनमध्यगः ॥ १८ ।
जघान मृगरूपान्सोऽज्ञानतो ब्राह्मणान्नृपः ।

---

* स्थापयित्वेति साधु ।

† पूज्य इति आर्षं, पूजयित्वा इति साधु ।

‡ विदुष इति (ग) ।

§ आर्षत्वाद्द्वितीया ।

भ्रातरस्तत्र पञ्चासन्मृगरूपेण संस्थिताः।
संवर्त्तस्य सुताः ब्रह्मन्वेदाध्ययनतत्पराः॥ १९॥

सत्यतपा उवाच।

कारणं किं समाश्रित्य ते चक्रुर्मृगरूपताम्।
एतन्मे कौतुकं ब्रह्मन्प्रणतस्य प्रसीद मे॥ २०॥

दुर्वासा उवाच।

ते कदाचिद्वनं याता दृष्ट्वा हरिणपोतकान्।
जातमात्रान् स्वमात्रा तु विहीनान्नृपसत्तम॥ २१॥
एकैकं जगृहुस्ते हि ते मृताः कन्दरास्थिताः।
ततस्ते दुःखिताः सर्वे ययुः पितरमन्तिकम्॥ २२॥
ऊचुश्च वचनञ्चेदं मृगहिंसामृते मुने॥ २३॥

ऋषिपुत्रा ऊचुः।

जातमात्रा मृगाः पञ्च अस्माभिर्निहता मुने।
अकामतस्ततोऽस्माकं प्रायश्चित्तं विधीयताम्॥ २४॥

संवर्त्त उवाच।

मत्पिता हिंसकश्चासीद्हन्तस्माद्विशेषतः।
भवन्तः पापकर्म्माणः सञ्जाता मम पुत्रकाः॥ २५॥
इदानीं मृगचर्म्माणि परिधाय यतव्रताः।
चरध्वं पञ्च वर्षाणि ततः शुद्धा भविष्यथ॥ २६॥
एवमुक्तास्तु ते पुत्रा मृगचर्म्मोपवीतिनः।
वनं विविशुरव्यग्रा जपन्तो ब्रह्म शाश्वतम्॥ २७॥
तथा वर्षे व्यतिक्रान्ते वीरधन्वा महीपतिः।

तत्राजगाम यस्मिंस्ते चरन्ति मृगरूपिणः ॥ २८ ।
ते चाप्येकतरोर्मूले मृगचर्म्मोपवीतिनः ।
जपन्तः संस्थितास्ते हि राज्ञा दृष्टा मृगा इति ॥ २९ ।
मत्वा विद्धास्तु युगपन्मृतास्ते ब्रह्मवादिनः ॥ ३० ।
तान्दृष्ट्वा तु मृतान्राजा ब्राह्मणान्शंसितव्रतान् ।
भयेन वेपमानस्तु देवराताश्रमं ययौ ॥ ३१ ।
तत्रापृच्छद्ब्रह्महत्या मम जाता महामुने ।
आमूलात्तद्वधं वृत्तं कथयित्वा नराधिपः ॥ ३२ ।
भृशं शोकपरीतात्मा रुरोदातीव दुःखितः ।
स ऋषिर्देवरातस्तु रुदन्तं नृपसत्तमम् ॥
उवाच मा भैर्नृपते अपनेष्यामि पातकम् ।
पाताले सुतलाख्ये च यथा धात्री निमज्जती ।
उद्धृता देवदेवेन विष्णुना क्रोड़मूर्त्तिना ॥ ३३ ।
तस्माद्भवन्तं राजेन्द्र ब्रह्मवध्यापरिप्लुतम् ।
उद्धरिष्यति देवोऽसौ स्वयमेव जनार्द्दनः ॥ ३४ ।
एवमुक्तस्ततो राजा हर्षितो वाक्यमब्रवीत् ।
कतरेण प्रकारेण स मे देवः प्रसीदति ।
प्रसन्ने चाशुभं सर्व्वं येन नश्यति सत्तम ॥ ३५ ।

दुर्वासा उवाच ।

एवमुक्तो मुनिस्तेन देवरात इदं व्रतम् ।
आचख्यौ सोऽपि तत्कृत्वा भुक्त्वा भोगान्सुपुष्कलान्
मृत्युकाले मुनिश्रेष्ठ सौवर्णेन विराजता ।

विमानेनागमत्स्वर्गमिन्द्रलोकं स पार्थिवः॥ ३६।३७।
तस्येन्द्रस्त्वर्घमादाय प्रत्युत्थानेन निर्ययौ।
आयान्तमिन्द्रं दृष्ट्वा तु तमूचुर्विष्णुकिङ्कराः॥ ३८।
न द्रष्टव्यो देवराजस्त्वं हीनस्तपसा इति॥ ३९।
एवं सर्व्वे लोकपाला निर्ययुस्तस्य तेजसा।
प्रत्याख्याताश्च तैर्विष्णुकिङ्करैर्हीनकर्म्मणः*॥ ४०।
एवं स सत्यलोकान्तं गतो राजा महामुने।
अपुनर्मारके लोके दाहप्रलयवर्ज्जिते†॥
अद्यापि तिष्ठते देवैः स्तूयमानो महान्नृपः।
प्रसन्ने यज्ञपुरुषे किञ्चिन्नं येन तद्भवेत्॥ ४१।४२।
इह जन्मनि सौभाग्यमायुरारोग्यसम्पदः।
एकैका विधिनोपास्ता ददात्यमृतमुत्तमम्॥
किं पुनः सर्व्वसंपूर्णः‡ स ददाति स्वकम्पदम्।
नारायणश्चतुर्मूर्त्तिः परार्द्धश्च न संशयः॥ ४३।४४।
यथैवोद्धृतवान्वेदान्मत्स्यरूपेण केशवः।
क्षीराम्बुधौ मथ्यमाने मन्दरं धृतवान्प्रभुः॥ ४४।
तद्वच्च कूर्म्मरूपी स्याद्द्वितीया पश्य वैष्णवी।

---

* हीनकर्म्मण इति हेत्वर्थे पञ्चमी, लोकपालविशेषणत्वे हीनकर्म्माण इति भवितुमर्हति, तथा क्वतेऽत्र छन्दोभङ्गः।

† वर्ज्जित इति (क), (ख)।

‡ वर्षसम्पूर्णे इति बहुषु पाठः।

यथा रसातलात्क्ष्माञ्च धृतवान् पुरुषोत्तमः ।
वराहरूपी तद्वच्च तृतीया पश्य वैष्णवी ॥ ४६ ।

इति वराहपुराणे भरणीव्रते वराहद्वादशीव्रतं नाम एकचत्वारिंशोऽध्यायः

द्विचत्वारिंशोऽध्यायः ।

दुर्वासा उवाच ।

तद्वत्फाल्गुनमासे तु या शुक्लैकादशी भवेत् ।
तामुपोष्य विधानेन हरिमाराधयेत्सुधीः ॥ १ ।
नरसिंहाय पादौ तु गोविन्दायेत्युरू तथा ।
कटिं विश्वभुजे पूज्य* अनिरुद्धेत्युरस्तथा ॥ २ ।
कण्ठन्तु शितिकण्ठाय पिङ्गकेशाय वै शिरः ।
असुरध्वंसनायेति चक्रन्तोयात्मने तथा ॥ ३ ।
शङ्खमित्येव सम्पूज्य गन्धपुष्पफलैस्तथा ।
तदग्रे घटमादाय सितवस्त्रयुगान्वितम् ॥ ४ ।
तस्योपरि नृसिंहन्तु सौवर्णं ताम्रभाजने ।
यथाविभवतः कृत्वा दारुवंशमयेऽपि वा ॥ ५ ।
रत्नगर्भे घटे स्थाप्य तं सम्पूज्य च मानवः ।
द्वादश्यां वेदविदुषे ब्राह्मणाय निवेदयेत् ॥ ६ ।

---

* पूजयित्वेति साधुः ।

एवङ्कृते फलं प्राप्तं यत्पुरा पार्थिवेन तु।
तस्याहं सम्प्रवक्ष्यामि वत्सनाम्ना महामुने ॥ ७।
आसीत्किम्पुरुषे वर्षे राजा परमधार्म्मिकः।
भारतेति च विख्यातस्तस्य वत्सः सुतोऽभवत् ॥ ८।
स शत्रुभिर्जितः संख्ये हृतकोशो द्विपाद्वान्।
वनं प्रायात्सपत्नीको वशिष्ठस्याश्रमेऽवसत् ॥ ९।
कालेन महता* सोऽथ वशिष्ठेन महात्मना।
किङ्कार्य्यमिति स प्रोक्तो वसस्यस्मिन्महाश्रमे ॥ १०।

राजोवाच।

भगवन्हृतकोशोऽहं† हृतराज्योऽसहायवान्‡।
शत्रुभिर्हृत§सर्व्वस्वो भवन्तं शरणं गतः ॥ ११।
उपदेशप्रदानेन प्रसादं कर्त्तुमर्हसि ॥ १२।

दुर्वासा उवाच।¶

एवमुक्तो वशिष्ठस्तु तस्येमां द्वादशीं मुने।
आदिदेश विधानेन‖ सोऽपि सर्व्वमथाकरोत् ॥ १३।

---

* गच्छता सोऽसौ इति (ख)।

† हृतकोशोऽहमिति (ख)।

‡ हृतराज्यो विशेषत इति (ख), (ग)।

§ हृतसर्व्वस्व इति (ख), हृतसङ्कल्प इति (ग)।

¶ एष पाठः (ख) पुस्तके नास्ति।

‖ विधिना प्रत्युवाचाऽथ इति (ख)।

तस्य व्रतान्ते भगवान्* नरसिंहस्तुतोष ह ।
चक्रमादाच्च शत्रूणां विध्वंसनकरं नृपे† ॥ १४ ।
तेनास्त्रेण स्वकं राज्यं जितवान् स नृपोत्तमः ।
राज्ये स्थित्वाश्वमेधानां सहस्रमकरोत्प्रभुः‡ ।
अन्ते च विष्णुलोकाख्यं§ पदमागाच्च¶ सत्तमः ॥ १५ ।
एषा धन्या पापहरा द्वादशी भवता मुने ।
कथितेमां‖ प्रसन्नेन श्रुत्वा कुरु यथेप्सितम् ॥ १६ ।

इति वराहपुराणे नरसिंहद्वादशीव्रतं नाम द्वाचत्वारिंशोऽध्यायः

---

* व्रतान्ते तस्य भगवान् इति (ख) ।

† परमिति (ख), (ग) ।

‡ विभुरिति (ग) ।

§ ब्रह्मलोकाख्यमिति (क) ।

¶ पदमापच्च इति (ख), (ग) ।

‖ कथिता चेति (ग) ।

त्रयश्चत्वारिंशोऽध्यायः।

दुर्वासा उवाच।

एवमेव मुने मासि चैत्रे सङ्कल्प्य द्वादशीम्।
उपोष्याराधयेद्भक्त्या देवदेवं जनार्द्दनम्* ॥ १ ॥
वामनायेति पादौ तु विष्णवे कटिमर्च्चयेत्।
वासुदेवाय जठरमुरः सङ्कर्षणाय च† ॥ २ ॥
कण्ठं विश्वभृते‡ पूज्य§ शिरो वै व्योमरूपिणे।
बाहू विश्वजिते पूज्यौ¶ स्वनाम्ना शङ्खचक्रकौ ॥ ३ ॥
अनेन विधिनाभ्यर्च्य देवदेवं सनातनम्‖।
प्राग्वद्गलोदकं कुम्भं सम्भूतं पुरतो न्यसेत्** ॥ ४ ॥
प्रागुक्तपात्रे संस्थाप्य काञ्चनं वामनं बुधः।
यथाशक्त्या कृतं सर्व्वं सितयज्ञोपवीतिनम् ॥ ५ ॥
कुण्डिकां स्थापयेत्पार्श्वे छत्रिका पादुका तथा।

---

* (ख) (ग) पुस्तकयोः श्लोकोऽयमेवं पठितः—

एवं मुने मासि चैत्रे या शुक्लैकादशी भवेत्।
तामुपोष्य यजेत्पश्चाद्भक्त्या देवन्तु वामनम् ॥

† वासुदेवेति जठरमुरः सम्पूर्णकाय चेति (क)।

‡ विश्वहृते इति (ख), (ग)।

§ पूजयित्वेति साधु।

¶ पूज्येति (ग)।

‖ विधिना पूज्य देवदेवं जनार्द्दनमिति (ख), (ग)।

** प्राग्वद्रीतभं कुम्भं सवस्त्रं पुरतो न्यसेदिति (ख), (ग)।

अक्षमालाञ्च संस्थाप्य कुण्डिकाञ्च विशेषतः ॥ ६ ।
एतैरुपस्करैर्युक्तं प्रभाते ब्राह्मणाय च* ।
दापयेत्प्रीयतां विष्णुर्रूपीत्युदीरयेत्† ॥ ७ ।
मासनाम्ना तु संयुक्तं प्रादुर्भावाभिधानकम् ।
प्रीयतामिति सर्व्वत्र विधिरेष प्रकीर्त्तितः ॥ ८ ।
श्रूयते च पुरा राजा‡ हर्य्यश्वः पृथिवीपतिः ।
अपुत्रः स तपस्तेपे पुत्रमिच्छंस्तपोधन ॥ ९ ।
तस्यैवं कुर्व्वतस्त्विष्टिं पुत्रार्थे§ मुनिसत्तम ।
आजगाम हरिर्द्देवो¶ द्विजरूपं समाश्रितः ॥ १० ।
स उवाच नृपं राजन् किन्ते व्यवसितन्त्विति‖ ।
पुत्रार्थमिति सोवाच** तं विप्रः प्रत्युवाच ह ॥ ११ ।
इदमेव विधानन्तु कुरु राजन्प्रयत्नतः†† ।
एवमुक्त्वा तु राजानं क्षणादन्तर्हितः प्रभुः ॥ १२ ।
राजाऽपि तं चकाराशु मन्त्रवित्तं‡‡ द्विजातये ।

---

* सद्द्विजातये इति (ख), (ग) ।

† संपूज्य विधिवद्दद्यात् ब्राह्मणाय हि वामनमिति (ख), (ग) ।

‡ पुरा राजन् इति (ख) ।

§ व्युष्टिं पुत्रार्थे इति (ख), (ग) ।

¶ तूर्णमिति (ग) ।

‖ उवाच तपसा राजन् किन्ते व्यवसितं प्रभो इति (ख), (ग) ।

** पुत्रार्थमिति चोवाच इति (क), सोवाचेति चार्षं स उवाचेति साधु ।

†† कुरु राजन्नुवाच ह इति (ख), (ग) ।

‡‡ मन्त्रवत्तमिति (ग) ।

दरिद्राय तथा प्रादाज्ज्योतिर्गर्भाय धीमते* ॥ १३ ।
यथादितेरपुत्रायाः† स्वयं पुत्रत्वमागतः ।
भगवंस्तेन सत्येन ममाप्यस्तु सुतो वरः ॥ १४ ।
अनेन विधिनोक्तेन तस्य पुत्रोऽभवन्मुने‡ ।
उग्राश्व इति विख्यात§श्चक्रवर्त्ती महाबलः ॥ १५ ।
अपुत्रो लभते पुत्रं धनार्थी लभते धनम् ।
भ्रष्टराज्यो लभेद्राज्यं मृतो विष्णुपुरं व्रजेत् ॥ १६ ।
क्रीड़ित्वा सुचिरं तत्र इह मर्त्त्यमुपागतः¶ ।
चक्रवर्त्ती भवेद्धीमान् ययातिरिव नाहुषः ॥ १७ ।

इति वराहपुराणे वामनद्वादशीव्रतं नाम त्रयश्चत्वारिंशोऽध्यायः ।

चतुश्चत्वारिंशोऽध्यायः ।

दुर्वासा उवाच ।

वैशाखेऽप्येवमेवन्तु सङ्कल्प्य विधिना नरः ।
तद्वत्स्नानं मृदा कृत्वा ततो देवालयं व्रजेत् ॥ १ ।

---

* गर्गाचार्य्याय धीमते इति (ख), (ग) ।

† तथादितेरपुत्राया इति (ख) ।

‡ भवेन्मुने इति (ग) ।

§ कुवलयाश्वेति विख्यात इति (ख), (ग) ।

¶ तत्र स्थित्वा बहून् भोगान् भुक्ता मर्त्त्यमुपागत इति (ख) ।

तत्राराध्य हरिं भक्त्या एभिर्मन्त्रैर्विचक्षणः* ।
जामदग्न्याय पादौ तु उदरं सर्व्वधारिणे ॥ २ ।
मधुसूदनायेति कटिमूरू श्रीवत्सधारिणे ।
क्षत्रान्तकायेति भुजौ शितिकण्ठाय कूर्चकम् ।
स्वनाम्ना शङ्खचक्रौ तु शिरो ब्रह्माण्डधारिणे ॥ ३ ।†
एवमभ्यर्च्य मेधावी प्राग्वत्तस्याग्रतो घटम् ।
विन्यसेत्स्थापितं तद्वद्वस्त्रं युग्मं विशेषतः‡ ॥ ४ ।
वैणवेन तु पात्रेण तस्मिंस्तु स्थापयेद्धरिम् ।
जामदग्न्येन रूपेण कृत्वा सौवर्णमग्रतः ॥ ५ ।§
दक्षिणे परशुं हस्ते तस्य देवस्य कारयेत् ।
अर्घगन्धैस्तु सम्पूज्य पुष्पैर्नानाविधैस्तथा¶ ॥ ६ ।
ततस्तस्याग्रतः कृत्वा जागरं भक्तिभावितः‖ ।
प्रभाते विमले सूर्य्ये ब्राह्मणाय निवेदयेत् ॥ ७ ।
एवं नियमयुक्तस्य तत्फलन्तु निबोध** मे ॥ ८ ।

---

* देवमन्त्रैर्विचक्षण इति (क)।

† एष श्लोकः (ख) (ग) पुस्तकयोर्नास्ति ।

‡ तस्याप्योत्तमवस्त्रेण वेष्टयेत्पुष्पमण्डपमिति (ख), (ग) ।

§ (ख), (ग) पुस्तकयोः श्लोक एष एवं पठितः—

कृत्वा तु वैणवे पात्रे तस्मिन् संस्थापयेद्धरिम् ।
जामदग्न्येति विख्यातं नाम्ना क्लेशविनाशनम् ॥

¶ नानाविधैः शुभैरिति (ख), (ग) ।

‖ जागरं भक्तिमान्नर इति (ख), (ग) ।

** तन्निबोधेति (ग) ।

आसीद्राजा महाभागो वीरसेनो महाबलः।
अपुत्रः स पुरा तीव्रन्तपस्तेपे महामनाः* ॥ ९ ।
चरतस्तु तपो घोरं याज्ञवल्क्यो महामुनिः।
आजगाम महायोगी तन्द्रष्टुं नातिदूरतः ॥ १० ।
तमायान्तमथो दृष्ट्वा ऋषिम्परमवर्च्चसम्।
कृताञ्जलिपुटो भूत्वा राजाभ्युत्थानमाकरोत् ॥ ११ ।
स पूजितो मुनिः प्राह किमर्थं क्रियते तपः†।
राजन्कथय धर्म्मज्ञ किङ्कार्य्यं ते‡ विवक्षितम् ॥ १२ ।

राजोवाच।

अपुत्रोऽहं महाभाग नास्ति मे पुत्रसन्ततिः।
तेनेदन्तप आस्थाय क्षयिष्ये स्वतनूं द्विज§ ॥ १३ ।

याज्ञवल्क्य उवाच।

अलं ते तपसानेन महाक्लेशेन पार्थिव।
अल्पायासेन ते पुत्रो भविष्यति न संशयः ॥ १४ ।

राजोवाच।

कथं मे भविता पुत्रः स्वल्पायासेन वै द्विज¶।

---

* महाबल इति (क)।

† तप्यते तप इति (ख), (ग)।

‡ किन्ते कार्य्यमिति (ग)।

§ तेन मे तप आस्थाय क्लिश्यते स्वतनुर्द्विज इति (ख), (ग)।

¶ अल्पायासात्तु वै द्विज इति (ख)।

एतन्मे कथय प्रीत्या* भगवन् प्रणतस्य वै† ॥ १५ ॥

दुर्वासा उवाच ।

एवमुक्तो मुनिस्तेन पार्थिवेन यशस्विना ।
आचख्यौ द्वादशीञ्चेमां वैशाखे सितपक्षजाम् ॥ १६ ॥
स हि राजा विधानेन पुत्रकामो विशेषतः ।
उपोष्य लब्धवान् पुत्रं नलं परमधार्म्मिकम् ॥ १७ ॥
योऽद्यापि कीर्त्यते लोके पुण्यश्लोको नरोत्तमः ।
प्रासङ्गिकं फलं ह्येतद्व्रतस्यास्य महामुने ॥ १८ ॥
सुपुत्रो जायते तस्य‡ विद्या श्रीः कान्तिरुत्तमा§ ।
इह जन्मनि किञ्चित्तं परलोके शृणुष्व मे ॥ १९ ॥
कल्पमेकं ब्रह्मलोक उषित्वा¶प्सरसाङ्गणैः ।
क्रीड़न्ति ते पुनः सृष्टौ जायन्ते चक्रवर्त्तिनः‖ ॥ २० ॥
त्रिंशत्कल्पसहस्राणि जीवन्ते नात्र संशयः** ॥ २१ ॥

इति वराहपुराणे द्वादशीमाहात्म्ये नामदशद्वादशीव्रतं नाम चतुश्चत्वारिंशोऽध्यायः

---

* प्रीत इति (ग) ।

† प्रणतस्य हेति (ग) ।

‡ नित्यमिति (ग) ।

§ विद्यावान् कान्तिरुत्तमा इति (ख), (ग) ।

¶ वसित्वेति (ग), आर्षस्तत्र ।

‖ क्रीड़न्त्यन्ते पुनः सृष्टौ चक्रवर्त्ती भवेद्ध्रुवमिति (ख), (ग) ।

** त्रिंशद्वर्षसहस्राणि जीवते नाऽत्र संशय इति (ख), (ग) ; जीवन्ति, जीवते वा साधु ।

पञ्चचत्वारिंशोऽध्यायः ।

दुर्वासा उवाच ।

ज्यैष्ठमासेऽप्येवमेवं सङ्कल्प्य विधिना नरः ।
अर्चयेत्परमं देवं पुष्पैर्नानाविधैः शुभैः ॥ १ ।
नमो रामाभिरामाय पादौ पूर्व्वं समर्च्चयेत् ।
त्रिविक्रमायेति कटिं धृतविश्वाय चोदरम् ॥ २ ।
उरः संवत्सरायेति कण्ठं संवर्त्तकाय च ।
सर्व्वास्त्रधारिणे बाहू स्वनाम्नाब्जरथाङ्गके ॥ ३ ।
सहस्रशिरसेऽभ्यर्च्य शिरस्तस्य महात्मनः ।
एवमभ्यर्च्य विधिवत्प्राग्वत्कुम्भन्तु विन्यसेत् ॥ ४ ।
प्राग्वद्वस्त्रेण संच्छन्नं सौवर्णौ रामलक्ष्मणौ ।
अर्च्चयित्वा विधानेन प्रभाते ब्राह्मणाय तौ ।
दातव्यौ मनसा काममीहता पुरुषेण तु ॥ ५ ।
अपुत्रेण पुरा पृष्टो राज्ञा दशरथेन च ।
पुत्रकामपरः पश्चाद्वशिष्ठः परमार्च्चितः ।
इदमेव विधानन्तु कथयामास स द्विजः ॥ ६ ।
प्राग्रहस्यं विदित्वा तु स राजा कृतवानिदम् ।
तस्य पुत्रः स्वयं जज्ञे रामनामा महाबली ॥ ७ ।
चतुर्द्धा सोऽव्ययो विष्णुः परितुष्टो महामुने ।
एतदैहिकमाख्यानं पारत्रिकमथो शृणु ॥ ८ ।

तावद्भोगान् भुञ्जते स्वर्गलोके

यावदिन्द्रो देवसङ्घाश्च सर्व्वे ।
अतीतकाले पुनरेत्य मर्त्त्यं
भवेत्स राजा शतयज्ञयाजी ॥ ९ ।
निष्काम एवं व्रतमस्य चीर्त्वा*
नश्यन्ति पापानि च तस्य पुंसः ।
प्राप्नोति निर्व्वाणमलञ्च शाश्वतम् ॥ १० ।
इति वराहपुराणे रामद्वादशीव्रतं नाम पञ्चचत्वारिंशोऽध्यायः ।

——०:०——

षट्चत्वारिंशोऽध्यायः ।

दुर्व्वासा उवाच ।
आषाढ़ेऽप्येवमेव स्यात्सङ्कल्प्य विधिना नरः ।
चक्रपाणयेति भुजौ कण्ठं भूपतये तथा ॥ १ ।
स्वनाम्ना शङ्खचक्रौ तु पुरुषायेति वै शिरः ।
एवमभ्यर्च्य मेधावी प्राग्वत्तस्याग्रतो घटम् ॥ २ ।
विन्यस्य वस्त्रसंयुक्तं तस्योपरि ततो न्यसेत् ।
काञ्चनं वासुदेवन्तु चतुर्व्यूहं सनातनम् ॥ ३ ।
तमभ्यर्च्य विधानेन गन्धपुष्पादिभिः क्रमात् ।
प्राग्वत्तं ब्राह्मणे दद्याद्वेदवादरते तथा ॥ ४ ।

* एतच्चरणद्वयं (ग) पुस्तके नास्ति ।

एवं नियमयुक्तस्य यत्पुण्यं तच्छृणुष्व मे।
वसुदेवोऽभवच्छ्रेष्ठो यदुवंशविवर्द्धनः॥ ५॥
देवकी तस्य भार्य्या तु समानव्रतधारिणी।
सा त्वपुत्राभवत्साध्वी पतिधर्म्मपरायणा॥ ६॥
तस्य कालेन महता नारदोऽभ्यगमद्गृहम्।
पूजितो वसुदेवेन भक्त्यासौ वाक्यमब्रवीत्॥ ७॥
वसुदेव शृणुष्वेदं देवकार्य्यं ममानघ।
श्रुत्वैताञ्च कथां शीघ्रमागतोऽस्मि तवान्तिकम्॥ ८॥
पृथिवी देवसमितिं मया दृष्टा यदूत्तम।
गत्वा च जल्पती भारं न शक्ता ऊहितुं* सुराः।
पीड़यन्ति समेता मां तान्हनध्वं† सुरोत्तमाः‡॥ ९॥
एवमुक्ताः पृथिव्या ते देवा नारायणं गताः।
मनसा ध्यातमात्रः स देवः प्रत्यक्षतां ययौ॥ १०॥
उवाच च सुरश्रेष्ठः स्वयं कार्य्यमिदं सुराः।
साधयामि न सन्देहो मर्त्यङ्गत्वा मनुष्यवत्॥ ११॥
किन्त्वाषाढ़े शुक्लपक्षे या नारी सह भर्त्तृणा।
उपोष्यति मनुष्येषु तस्या गर्भे भवाम्यहम्॥ १२॥
एवमुक्त्वा गता देवाः स्वयञ्चाहमिहागतः।
उपदिष्टन्तु भवतः अपुत्रस्य विशेषतः॥ १३॥

---

* न शक्ता ऊहितुरिति (ग) पुस्तके पाठः। वोढुं वोढुर्वेति साधु।

† हनध्वमिति आर्षं, हतेति साधु।

‡ सुरोत्तम इति (ग)।

एताञ्च द्वादशीङ्कृत्वा वसुदेवो महायशाः ।
पुत्रं लेभे स कृष्णाख्यं* महतीञ्च श्रियं तथा ॥ १४ ।
भुक्त्वा प्राज्यश्रियं सोऽथ गतिम्परमिकां ययौ ।
एष ते विधिरुद्दिष्ट आषाढ़े मासि वै मुने ॥ १५ ।

इति वराहपुराणे कृष्णद्वादशीव्रतं षट्चत्वारिंशोऽध्यायः ।

सप्तचत्वारिंशोऽध्यायः ।

दुर्वासा उवाच ।

श्रावणे मासि शुक्लायामेकादश्याञ्चरेद्व्रतम् ।
अर्च्चयेत्पूर्व्वविधिना गन्धपुष्पैर्जनार्द्दनम् ॥ १ ।
दामोदराय पादौ तु हृषीकेशाय वै कटिम् ।
सनातनेति जठरमुरः श्रीवत्सधारिणे ॥ २ ।
चक्रपाणयेति भुजौ कण्ठञ्च हरये तथा* ।
मुञ्जकेशायेति शिरो भद्राय च शिखां तथा† ॥ ३

---

* पुत्राख्यमिति (ग) ।

---

* कण्ठं भूपतये तथा इति (ख) ।

† खनाम्ना शङ्खचक्रौ तु पुरुषायेति वै शिरः इति (ख) ।

एवं सम्पूज्य संस्थाप्य कुम्भं पूर्व्ववदेव तु ।
संवेष्ट्य वस्त्रयुग्मेन तस्योपरि ततो न्यसेत्* ॥ ४ ।
काञ्चनं देवदेवन्तु† दामोदरसनामकम् ।
तमभ्यर्च्य विधानेन गन्धपुष्पादिभिः क्रमात् ॥ ५ ।
प्राग्वत्तं ब्राह्मणे दद्याद्वेदवेदाङ्गपारगे ।
एवं नियमयुक्तस्य प्रभावं तच्छृणुष्व मे ॥ ६ ।
एष वै विधिरुद्दिष्टः श्रावणे मासि वै मुने ।
एतस्याश्च प्रभावं यच्छृणु पापप्रणाशनम् ॥ ७ ।
पुरा कृतयुगे राजा नृगो नाम महाबलः ।
बभ्राम स वनं घोरं मृगयासक्तमानसः ॥ ८ ।
स कदाचित्तुरङ्गेण गतो दूरं महद्वनम् ।
व्याघ्रसिंहगजाकीर्णं दस्युसर्पनिषेवितम् ॥ ९ ।
एकाकी तत्र राजा तु अश्वं मुच्य‡ तरोरधः ।
स्वयं कुशमथास्तीर्य्य सुप्तो दुःखसमन्वितः ॥ १० ।
तावत्तत्रैव लुब्धानां सहस्राणि चतुर्द्दश ।
आगतानि मृगान्हन्तुं रात्रौ राज्ञः समन्ततः ॥ ११ ।
तत्रापश्यन्ततः सुप्तं हेमरत्नविभूषितम् ।

---

* (ख) पुस्तके श्लोक एष एवं पठितः—

एवमभ्यर्च्य मेधावी प्राग्वत्तस्याग्रतो घटम् ।
विन्यस्य वस्त्रसंयुक्तं तस्योपरि ततोन्यसेत् ॥

† काञ्चनं वासुदेवन्तु इति (ख) ।

‡ मुच्येति आर्षं, मुक्तेति साधु ।

नृगं राजानमत्युग्रं श्रिया परमया युतम् ॥ १२ ।
ते गत्वा त्वरितं व्याधाः स्वभर्त्रे सन्न्यवेदयन् ।
सोऽपि रत्नसुवर्णार्थं राजानं हन्तुमुद्यतः ॥ १३ ।
तुरगस्य च हेतोस्तु निस्त्रिंशान्वनचारिणः ।
राजानं सुप्तमासाद्य निगृहीतुं* प्रचक्रमुः ॥ १४ ।
तावद्राज्ञः शरीरात्तु श्वेताभरणभूषिता ।
नारी काचित्समुत्तस्थौ स्रक्चन्दनविभूषिता ॥ १५ ।
उत्थाय चक्रमादाय ते म्लेच्छा विनिपातिताः ॥ १६ ।
दस्यून्निहत्य सा देवी तस्य राज्ञस्तनुं पुनः ।
प्रविशन्त्याशु राजापि प्रतिबुद्धः प्रदृष्टवान् ॥ १७ ।
म्लेच्छांस्तु निहतान्दृष्ट्वा तां स्वमूर्त्तौ लयङ्गताम् ।
अश्वमारुह्य स पुनर्वामदेवाश्रमं ययौ ॥ १८ ।
तत्रापृच्छदृषिं भक्त्या का स्त्री के ते निपातिताः ।
एतत्कार्य्यं ऋषे मह्यं प्रसीद कथयस्व मे ॥ १९ ।

वामदेव उवाच ।

त्वमासीच्छूद्रजातीयः अन्यजन्मनि पार्थिवः ।
तत्र त्वया ब्राह्मणेभ्यः श्रुता चेयं कृता पुरा ॥ २० ।
श्रावणस्य तु मासस्य शुक्लपक्षेषु द्वादशी ।
सा विधानात्त्वया राजन् भक्त्या च समुपोषिता ॥ २१ ।
उपोषितायां तस्यान्तु राज्यं लब्धं त्वयाऽनघ ।

---

* निग्रहीतुमिति साधु ।

सर्व्वापत्सु च सा देवी भवन्तं परिरचति ॥ २२ ।
यया विनिहताः क्रूरा म्लेच्छाः पापसमन्विताः ।
भवांश्च रचितो राजन् श्रावणद्वादशीति सा ॥ २३ ।
एकैव पाति चापत्सु राज्यमेकैव यच्छति ।
किं पुनर्द्वादशैतास्तु याभ्य ऐन्द्रञ्च गच्छति ॥ २४ ।

इति वराहपुराणे बुद्धद्वादशीव्रतं नाम सप्तचत्वारिंशोऽध्यायः ।

अष्टचत्वारिंशोऽध्यायः ।

दुर्वासा उवाच ।

तद्वद्भाद्रपदस्यापि या शुक्लैकादशी भवेत् ।
तस्यां सङ्कल्प्य विधिना देवदेवं समर्च्चयेत् ॥ १ ।
नमोऽस्तु कल्किने पादौ हृषीकेशाय वै कटिम् ।
म्लेच्छविध्वंसनायेति जगन्मूर्त्ते तथोदरम् ॥ २ ।
शितिकण्ठाय कण्ठन्तु खड्गपाणिति* वै भुजौ ।
चतुर्भुजायेति हस्तौ विश्वमूर्त्तें† तथा शिरः ॥ ३ ।
एवमभ्यर्च्च मेधावी प्राग्वत्तस्याग्रतो घटम् ।

---

* खड्गपाणये इति साधु ।

† विश्वमूर्त्तये इति साधु । एवमन्यत्र ।

विन्ध्यसेल्काल्किनं देवं सौवर्णं तत्र कारयेत् ॥ ४ ।
सितवस्त्रेण संयुक्तं गन्धपुष्पोपशोभितम् ।
कृत्वा प्रभाते विप्राय प्रदेयं शास्त्रवित्तमे* ॥ ५ ।
एवं कृते भवेद्यत्तु तन्निबोध महामुने ।
पूर्व्वं राजा विशालोऽभूत्काशिपुर्य्यां महाबलः ।
गोत्रजैर्हृतराज्योऽसौ गन्धमादनमाविशत् ॥ ६ ।
तस्य द्रोण्यां महाराज वदरीं प्राप शोभनाम् ।
हृतराज्यो विशेषेण गतश्रीको नरोत्तमः ॥ ७ ।
कदाचिदागतौ तत्र पुराणावृषिसत्तमौ ।
नरनारायणौ देवौ सर्व्वदेवनमस्कृतौ ॥ ८ ।
तौ दृष्ट्वा तत्र राजानं पूर्व्वागतमरिन्दमौ ।
ध्यायन्तं परमं ब्रह्म विष्णाख्यं परमं पदम् ॥ ९ ।
तौ प्रीतावूचतुश्चैवं राजानं क्षीणकल्मषम् ।
वरं वृणीष्व राजेन्द्र वरदौ स्वस्त्वागतौ ॥ १० ।

राज्ञोवाच ।

भवन्तौ कौ न जानामि कस्य गृह्णाम्यहं वरम् ।
आराधयामि यं तस्मादहमिच्छामि शोभनम् ॥ ११ ।
एवमुक्तौ तु तौ प्रोचुः† कमाराधयसे प्रभो ।
कं वा वरं वृणोषि त्वं कथयस्व कुतूहलात् ॥ १२ ।

---

* शास्त्रवित्तमायति साधु ।

† प्रोचतुरिति साधु ।

एवमुक्तस्ततो राजा विष्णुमाराधयाम्यहम् ।
कथयित्वा स्थितस्तूष्णीं ततस्तावूचतुः पुनः ॥ १३ ।
राजंस्तस्यैव देवस्य प्रसादादावयोर्वरः ।
दातव्यस्ते वरं ब्रूहि कस्ते मनसि वर्त्तते ॥ १४ ।

राजोवाच ।

यथा यज्ञेश्वरं देवं यज्ञैर्विविधदक्षिणैः ।
यष्टुं समर्थता मे स्यात्तथा मे ददतां* वरम् ॥ १५ ।
स्वयं नारायणो देवो लोकमार्गप्रदर्शकः ।
मया सह तपः कुर्व्वन्वदर्य्यां लोकभावनः ॥ १६ ।
अयं मत्स्योऽभवत्पूर्व्वं पुनः कूर्म्मः सुरूपवान् ।
वराहश्चाभवद्देवो नरसिंहस्ततोऽभवत् ॥ १७ ।
वामनस्तु ततो जातो जामदग्न्यो महाबलः ।
पुनर्द्दाशरथीभूत्वा मोहयामास पार्थिवः ॥ १८ ।
स कलान्दस्यवो† म्लेच्छान् घातयित्वा महीमिमाम् ।
प्रकृतिस्थां चकारायं‡ स एष भगवान्हरिः ॥ १९ ।
नारसिंहेण रूपेण तद्वत्पापभयान्नरैः ।
वामनं मोहनाशाय वित्तार्थी जमदग्निजम् ॥ २० ।
क्रूरशत्रुविनाशाय यजेद्दाशरथिं बुधः ।
बलकृष्णौ यजेद्धीमान् पुत्रकामो न संशयः ॥ २१ ।

---

* दत्तामिति साधु ।

† दस्यव इति आर्षं, दस्यूनिति साधु ।

‡ चकाराय इति (ग) ।

रूपकामो यजेद्बुद्धं शत्रुघाताय कल्किनम् ।
एवमुक्त्वा नरस्तस्य इमामेवाब्रवीन्मुनिः ॥ २२ ।
द्वादशीं कृतवान्सोऽपि चक्रवर्त्ती बभूव ह ।
तस्यैव नाम्ना वदरी विशालाख्याभवन्मुने ॥ २३ ।
इहजन्मनि राजासौ राज्यं कृत्वा इयाहनम्* ।
यज्ञैश्च विविधैरिष्ट्वा परं निर्वाणमाप्तवान् ॥ २४ ।

इति वराहपुराणे कल्किद्वादशीव्रतं नाम अष्टचत्वारिंशोऽध्यायः ।

ऊनपञ्चाशोऽध्यायः ।

दुर्वासा उवाच ।

तद्वदश्वयुजे मासि द्वादशी शुक्लपक्षजा ।
तस्यामभ्यर्च्चयेद्देवं पद्मनाभं सनातनम् ॥ १ ।
पद्मनाभाय पादौ तु कटिं वै पद्मयोनये ।
उदरं सर्व्वदेवाय पुष्कराक्षाय वै उरः ।
अव्ययाय तथा पाणिं प्राग्वदस्त्राणि पूजयेत् ॥ २ ।
प्रभवाय शिरः पूज्य प्राग्वदग्रे घटं न्यसेत् ॥ ३ ।
तस्मिन् सौवर्णकं देवं पद्मनाभन्तु विन्यसेत् ।
तमेव देवं संपूज्य गन्धपुष्पादिभिः क्रमात् ।

* इयादिति आर्षं, इयायेति साधु ।

प्रभातायान्तु शर्व्वर्य्यां ब्राह्मणाय निवेदयेत्॥ ४।
एवं कृते तु यत्पुण्यं तन्निबोध महामते॥ ५।
आसीत्कृतयुगे राजा भद्राश्वो नाम वीर्य्यवान्।
यस्य नाम्नाभवद्वर्षं भद्राश्वं नाम नामतः॥ ६।
तस्यागस्त्यः कदाचित्तु गृहमागत्य सत्तम।
उवाच सप्तरात्रन्तु वसामि भवतो गृहे।
तं राजा शिरसा नत्वा स्थीयतामित्यभाषत॥ ७।
तस्य कान्तिमती नाम भार्य्या परमशोभना।
तस्यास्तेजः समभवद्द्वादशादित्यसन्निभम्॥ ८।
शतानि पञ्च तस्यासन्सपत्नीनां यतव्रताः।
ता दास्य इव कर्म्माणि कुर्व्वन्त्यहरहः शुभाः॥ ९।
कान्तिमती महाभागा भार्य्या तस्य विशेषतः।
तामगस्त्यस्तथा दृष्ट्वा रूपतेजोऽन्वितां शुभाम्॥ १०।
सपत्न्यश्च भयात्तस्याः कुर्व्वन्त्यः कर्म्म शोभनाः।
राजा तु तस्या मुदितं मुखमेवान्वलोकयत्॥ ११।
एवम्भूतामथो दृष्ट्वा राज्ञीं परमशोभनाम्।
साधु साधु जगन्नाथेत्याहागस्त्यः प्रहर्षितः॥ १२।
द्वितीये दिवसेऽप्येवं राज्ञीं दृष्ट्वा महाप्रभाम्।
अहो मुष्टमहो मुष्टं जगदेतच्चराचरम्॥ १३।
इत्यगस्त्यो द्वितीयेऽह्नि राज्ञीं दृष्ट्वाभ्युवाच ह।
तृतीयेऽहनि तां दृष्ट्वा पुनरेवमुवाच ह*॥ १४।

---

* पुनरेवाभ्युवाच च इति (ख), (ग)।

अहो मूढ़ा न जानन्ति गोविन्दं परमेश्वरम् ।
य एकेन दिनेनैव राज्ञस्तुष्टः प्रदत्तवान् ॥ १५ ।
चतुर्थे दिवसे हस्तावुत्क्षिप्य पुनरब्रवीत् ।
साधु साधु जगन्नाथ स्त्रीशूद्राः साधु साध्विति ॥ १६ ।
द्विजाः साधु नृपाः साधु वैश्याः साधु पुनः पुनः ।
साधु भद्राश्व साधु त्वं साधु भोऽगस्त्य साधु ते ॥ १७ ।
साधु प्रह्लाद साधुस्ते ध्रुव साधो महाव्रत ।
एवमुक्त्वा ननर्त्तोच्चैरगस्त्यो राजसन्निधौ ॥ १८ ।
एवम्भूतञ्च तं दृष्ट्वा सपत्नीको नृपोत्तमः ।
किं हर्षकारणं ब्रह्मन्येनैत्थन्नृत्यते* भवान् ॥ १९ ।

अगस्त्य उवाच ।

अहो मूर्खः कुराजा त्वं अहो मूर्खाऽनुगास्त्वमी ।
अहो पुरोहिता मूर्खा ये न जानन्ति मे मतम्† ॥ २० ।
एवमुक्ते ततो राजा कृताञ्जलिरभाषत ।
न जानीमो वयं ब्रह्मन् प्रश्नमेतत्त्वयेरितम् ।
कथयस्व महाभाग यद्यनुग्रहकृद्भवान् ॥ २१ ।

अगस्त्य उवाच ।

इयं राज्ञी पुरा चाभूद्दासी वैश्यस्य वै गृहे ।
नगरे हरिदत्तस्य त्वमस्याः पतिरेव च ।
तस्यैव कर्म्मकारोऽभूः शूद्रः सेवनतत्परः ॥ २२ ।

---

* नृत्यतीति साधु ।

† मतिमिति (ख), (ग) ।

स वैश्योऽश्वयुजे मासि द्वादश्यां नियतः स्थितः।
स्वयं विष्णालयं गत्वा पुष्पधूपादिभिर्हरिम्।
अभ्यर्च्य स्वगृहं प्रायाद्भवन्तौ रक्षपालकौ।
स्थाप्य द्वावपि दीपानां ज्वलनार्थं महामते॥ २३।२४।
गते वैश्ये भवन्तौ तौ दीपान् प्रज्वाल्य संस्थितौ।
यावत्प्रभाता रजनी निशामेकां नरोत्तम॥ २५।
ततः काले मृतौ तौ तु उभौ द्वावपि दम्पती॥ २६।
तेन पुण्येन ते जन्म प्रियव्रतगृहेऽभवत्।
इयं पत्नी तु ते जाता पुरा वैश्यस्य दासिका॥ २७।
पारक्यस्यापि दीपस्य ज्वालितस्य हरेर्गृहे।
यः पुनः स्वेन वित्तेन विष्णोरग्रे प्रदीपकम्।
ज्वालयेत्तस्य यत्पुण्यं तत्संख्यातुं न शक्यते।
तेन साधो हरेः साधु इत्युक्तं वचनं मया॥ २८।२९।
पूर्णे संवत्सरे भक्तिं हरेः कृत्वा विचक्षणः।
संवत्सरार्द्धे त्रेतायां सममेतन्न संशयः॥ ३०।
त्रिमासे द्वापरे भक्त्या पूजयँल्लभते फलम्।
नमो नारायणेत्युक्त्वा कलौ तु लभते फलम्॥ ३१।
तेन सृष्टं जगत्सर्व्वं भक्तिमात्रं मयेरितम्।
पारक्यदीपस्योत्कर्षाद्देवाग्रे फलमीदृशम्॥ ३२।
भो राजन्यत्त्वया प्राप्तं फलमेतन्मयेरितम्।
अहो मूढा न जानन्ति हरेर्दीपक्रियाफलम्॥ ३३।
एवंविधा द्विजाग्र्ये च राजानो ये च भक्तितः।

यजन्ते विविधैर्यज्ञैस्तेन ते साधवः स्मृताः ॥ ३४ ।
अहन्तमेव मुक्तान्यं न पश्यामि महीतले ।
तेन साधो अगस्त्येति मया चात्मा प्रशंसितः ॥ ३५ ।
सा स्त्री धन्या स शूद्रस्तु तथा धन्यतरो मतः ।
भर्त्तुः शुश्रूषणङ्कृत्वा तत्परोक्ते हरेरिति ॥ ३६ ।
सा स्त्री धन्या तथा शूद्रो द्विजशुश्रूषणे रतः ।
तदाज्ञया हरेर्भक्तिः स्त्रीशूद्रौ तेन साध्विति ॥ ३७ ।
आसुरं भावमाश्रित्य प्रह्लादः पुरुषोत्तमम् ।
मुक्त्वा चान्यं न जानाति तेनासौ साधुरुच्यते ॥ ३८ ।
प्रजापतिकुले भूत्वा बाल एव वनं गतः ।
आराध्य विष्णुं प्राप्तश्च स्थानं परमशोभनम् ॥ ३९ ।
तेन साधो ध्रुवेत्येवं मयोक्तं राजसत्तम ॥ ४० ।
इति राजा वचः श्रुत्वा अगस्त्यस्य महात्मनः ।
अल्पोपदेशं राजासौ पप्रच्छ मुनिपुङ्गवम् ।
अगस्त्यश्च महाभागः कार्त्तिक्यां पुष्करं व्रजत्* ॥ ४१ ।
गतेऽगस्त्ये प्रगच्छन्वै भद्राश्वस्य निवेशनम् ।
पृष्टश्च राज्ञा तामेव द्वादशीं मुनिसत्तमः ॥ ४२ ।

दुर्वासा उवाच ।

इदमेव मया तुभ्यं कथितं ते तपोधन ।
कथयित्वा पुनर्वाक्यमगस्त्यो नृपसत्तमम् ॥ ४३ ।

---

* अव्रजदिति साधु । व्रजन्निति (ग) इत्यपि शतृप्रत्ययान्तस्य विशेषणत्वादन्या समापकक्रिया काङ्क्षिता भवति ।

उवाच पुष्करं यामि सपुत्रश्चास्तु ते गृहम् ।*
एवमुक्का जगामाशु सद्योऽदर्शनतां मुनिः ॥ ४४ ।
द्वादशीं पद्मनाभस्य राजा स विधिना ततः ।
उपोष्य परमङ्कामसिह जन्मनि चाप्तवान् ॥ ४५ ।
पुत्रपौत्रैः परिवृतो भुक्वा भोगानथोत्तमान् ।
पद्मनाभप्रसादेन वैष्णवं स्थानमाप सः ॥ ४६ ।

इति वराहपुराणे पद्मनाभद्वादशीव्रतं नाम ऊनपञ्चाशोऽध्यायः ।

पञ्चाशोऽध्यायः ।

दुर्वासा उवाच ।

गत्वा तु पुष्करन्तीर्थमगस्त्यो मुनिपुङ्गवः ।
कार्त्तिक्यामाजगामाशु पुनर्भद्राश्वमन्दिरम् ॥ १ ।
तमागतं मुनिं प्रेक्ष्य राजा परमधार्म्मिकः ।
अर्घपाद्यादिभिः पूज्य कृतासनपरिग्रहम् ।
उवाच हृषितो* राजा तमृषिं शंसितव्रतम् ॥ २ ।

राजोवाच ।

भगवन् कथितं पूर्व्वं त्वया ऋषिवरोत्तम ।

---

* एतदर्द्धं (ख) (ग) पुस्तकयोर्नास्ति ।

---

* हर्षित इति (ख), (ग) ।

आश्विने मासि द्वादश्यां विधानन्तत्कृतं मया ।
इदानीं कार्त्तिके मासि यत्स्यात्पुण्यं वदस्व मे ॥ ३ ।

अगस्त्य उवाच ।

कार्त्तिकी द्वादशी राजन्नुक्ता परमपावनी ।
उपोष्य विधिना येन यच्चास्याः प्राप्यते फलम् ।
तदहं संप्रवक्ष्यामि शृणोत्ववहितो भवान् ॥ ४ ।
पूर्व्वोक्तविधिना सम्यक् सङ्कल्प्य स्नानमाचरेत् ॥ ५ ।
तमेव पूजयेद्देवं नारायणमकल्मषम् ।
नमः सहस्रशिरसे शिरः सम्पूजयेद्धरेः* ॥ ६ ।
पुरुषायेति च भुजौ कण्ठं वै विश्वरूपिणे ।
ज्ञानास्त्रायेति चास्त्राणि श्रीवत्साय तथा उरः ॥ ७ ।
जगद्ग्रसिष्णवे तुभ्यं† उदरं दिव्यमूर्त्तये ।
कटिं सहस्रपादाय पादौ देवस्य पूजयेत् ॥ ८ ।
अनुलोमेन देवेशं पूजयित्वा विचक्षणः ।
नमो दामोदरायेति सर्व्वाङ्गं पूजयेद्धरेः ॥ ९ ।
एवं सम्पूज्य विधिना तस्याग्रे चतुरो घटान्‡ ।
स्थापयेद्रत्नगर्भांस्तु सितचन्दनचर्च्चितान् ॥ १० ।
स्रग्दामबद्धग्रीवांस्तु सितवस्त्रावगुण्ठितान् ।

---

* (ग) पुस्तके एतस्मादनन्तरं एवं सम्पूज्य विधिना तस्याग्रे चतुरो घटानित्यधिकः पाठो वर्त्तते ।

† पूज्यमिति (ख) ।

‡ एवं संपूज्य यत्नेन तदग्रे चतुरो घटानिति (ख), (ग) ।

स्थापितांस्ताम्रपात्रैस्तु तिलपूर्णैः सकाञ्चनैः ॥ ११ ।
चत्वारः सागराश्चैव कल्पयेद्राजसत्तम ।
तन्मध्ये प्राग्विधानेन सौवर्णं स्थापयेद्धरिम् ॥ १२ ।
योगीश्वरं योगिगम्यं पीताम्बरधरं विभुम् ।
एवं सम्पूज्य विधिवज्जागरन्तत्र* कारयेत् ॥ १३ ।
कुर्य्याच्च वैष्णवं यज्ञं यजेद्योगीश्वरं हरिम् ।
षोड़शारे तथा चक्रे योगिभिर्वहुभिः कृते ॥ १४ ।
एवं कृत्वा प्रभातेषु ब्राह्मणाय निवेदयेत् ।
चत्वारः सागरा देयाश्चतुर्णां पञ्चमस्य च ॥ १५ ।
योगीश्वरन्तु देवेशन्दद्यात्प्रयतमानसः ।
वेदार्थं† तु समन्दत्तं द्विगुणं तद्विदे तथा‡ ॥ १६ ।
आचार्य्ये पञ्चरात्राणां सहस्रगुणितं भवेत् ।
यस्त्विमं सरहस्यन्तु समन्त्रञ्चोपपादयेत् ॥ १७ ।
विधानं तस्य वै दत्तं कोटिकोटिगुणोत्तरम् ।
गुरौ सति तु यश्चान्यमाश्रयेत्पूजयेत्§कुधीः ॥ १८ ।
स दुर्गतिमवाप्नोति दत्तमस्य च निष्फलम् ।
प्रयत्नेन गुरौ पूर्व्वं पश्चादन्यस्य दापयेत् ॥ १९ ।
अविद्यो वा सविद्यो वा गुरुरेव जनार्द्दनः ।

---

* एवं सम्पूज्यश्चेद्धरेर्जागरमिति (ख) ।

† वेदाग्रे (ग) ।

‡ तद्दत्तं द्विगुणं तथा इति (ग) ।

§ पूजयन्निति (ग) ।

मार्गस्थो वाप्यमार्गस्थो गुरुरेव परा गतिः ॥ २० ।
प्रतिपद्य गुरुं यस्तु मोहाद्विप्रतिपद्यते ।
युगकोटिं स नरके पच्यते पुरुषाधमः ॥ २१ ।
एवं दत्त्वा विधानेन द्वादश्यां विष्णुमर्च्य च ।
विप्राणां भोजनं दद्याद्यथाशक्त्या सदक्षिणम् ॥ २२ ।
धरणीव्रतमेतद्धि पुरा कृत्वा प्रजापतिः ।
प्राजापत्यं तथा लेभे मुक्तिं ब्रह्म च शाश्वतम् ॥ २३ ।
तथा च हैहयो राजा कृतवीर्यो नराधिपः ।
कार्त्तवीर्य्यं सुतं लेभे परं ब्रह्म च शाश्वतम् ॥ २४ ।
शकुन्तलाप्येवमेव व्रतं कृत्वा महामते ।
लेभे च भरतं पुत्रं दौष्यन्तं चक्रवर्त्तिनम् ॥ २५ ।
तथातीताश्च राजानो वेदोक्ताश्चक्रवर्त्तिनः ।
अनेन विधिना प्राप्ताश्चक्रवर्त्तित्वमुत्तमम् ॥ २६ ।
धरण्या अपि पाताले मग्नया* च पुरा कृतम् ।
व्रतमेतत्ततो नाम्ना धरणीव्रतमुत्तमम् ॥ २७ ।
समाप्तेऽस्मिन्धरा देवी हरिणा क्रोड़मूर्त्तिना ।
उद्धृता चापि तुष्टेन स्थापिता नौरिवाम्भसि ॥ २८ ।
धरणीव्रतमेतद्धि कीर्त्तितं ते मया मुने ।
य इदं शृणुयाद्भक्त्या यश्च कुर्य्यान्नरोत्तमः ।
सर्व्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥ २९ ।

इति वराहपुराणे धरणीव्रतं नाम पञ्चाशोऽध्यायः ।

---

* पातालं मग्नयेति (ख), (ग) ।

एकपञ्चाशोऽध्यायः ।

वराह उवाच ।

श्रुत्वा दुर्वाससो वाक्यं धरणीव्रतमुत्तमम् ।
ययौ सत्यतपाः सद्यो हिमवत्पार्श्वमुत्तमम् ॥ १ ।
पुष्पभद्रा नदी यत्र शिला चित्रशिला तथा ।
वटो भद्रवटो यत्र तत्र तस्याश्रमो बभौ ।
तत्रोपरि महत्तस्य चरितं सम्भविष्यति ॥ २ ।

धरण्युवाच ।

बहुकल्पसहस्राणि व्रतस्यास्य सनातन ।
मया कृतस्य तपसस्तन्मया विस्मृतं प्रभो ॥ ३ ।
इदानीन्त्वत्प्रसादेन प्राक्तनं स्मरतीं मम ।
जातं जातिस्मरत्वञ्च विशोका परमेश्वर ॥ ४ ।
यदि नाम परन्देव कौतुकं हृदि वर्त्तते ।
अगस्त्यः पुनरागत्य भद्राश्वस्य निवेशनम् ।
यच्चकार स राजा तु तन्ममाचक्ष्व भूधर ॥ ५ ।

वराह उवाच ।

प्रत्यागतमृषिं दृष्ट्वा भद्राश्वः श्वेतवाहनः ।
वीरासनगतं दृष्ट्वा कृत्वा पूजां विशेषतः* ।
अपृच्छन्मोक्षधर्म्माख्यं प्रश्नं सकलधारिणि ॥ ६ ।

---

* एतदर्द्धं (ग) पुस्तके नास्ति ।

भद्राश्व उवाच ।

भगवन् कर्मणा केन छिद्यते भवसंस्तृतिः ।
किं वा ज्ञात्वा न शोचन्ति मूर्त्ता मूर्त्तोपपत्तिषु ॥ ७ ।

अगस्त्य उवाच ।

शृणु राजन्कथान्दिव्यां दूरासन्नव्यवस्थिताम् ।
दृश्यादृश्यविभागोत्थां समाहितमना नृप: ॥ ८ ।

नाहोन रात्रिर्न दृशो दिशश्च
न द्यौर्न देवा न दिनं न सूर्य्यः ।
तस्मिन्काले पशुपालेति राजा
स पालयामास पशूननेकान् ॥ ९ ।
तान् पालयन्* स कदाचिद्दिदृक्षुः
पूर्व्वं समुद्रञ्च जगाम तूर्णम् ।
अनन्तपारस्य महोदधेस्तु
तीरे वनं तत्र वसन्ति सर्पाः ॥ १० ।
अष्टौ द्रुमाः कामवहा नदी च
तिर्यक् चोर्द्धं बभ्रमुस्तत्र चान्ये ।
पञ्च प्रधानाः पुरुषास्तथैकः
स्त्रियं बिभ्रते तेजसा दीप्यमानाम् ॥ ११ ।
सापि स्त्री स्वे वचसि धारयन्ती
सहस्रसूर्य्यप्रतिमं विशालम् ।

---

* तामाथपन्निति (ग) ।

तस्याधरस्त्रिविकारस्त्रिवर्ण-
स्तं राजानं पश्य* परिभ्रमन्तम् ॥ १२ ।
तूष्णीभूता मृतकल्पा इवासन्†
नृपोऽप्यसौ तद्वनं संविवेश ।
तस्मिन् प्रविष्टे सर्व्वे एते विविशु-
र्भयादैक्यं गतवन्तः क्षणेन ॥ १३ ।
तैः सर्वैः स नृपो दुर्विनीतैः
संवेष्टितो दस्युभिश्चिन्तयानः ।
कथं चैते न भविष्यन्ति येन
कथं चैते संमृताः सम्भवेयुः ॥ १४ ।
एवं राज्ञश्चिन्तयतस्त्रिवर्णः पुरुषोऽपरः ।
श्वेतं रक्तं तथा पीतं त्रिवर्णं धारयन्नरः ॥ १५ ।
स संज्ञां कृतवान्मह्यं‡मपरोऽथ क्व यास्यसि ।
एवं तस्य ब्रुवाणस्य महन्नाम व्यजायत ॥ १६ ।
तेनापि राजा संवीतः स बुध्यस्वेति चाब्रवीत् ।
एवमुक्ते ततः स्त्री तु तं राजानं रुरोध ह ॥ १७ ।
मायाततं मा भैष्ट तं§ ततोऽन्यः पुरुषो नृपम् ।
संवेष्ट्यास्थितवान्वीरस्ततः सर्व्वैश्वरेश्वरः ॥ १८ ।

---

* 'दृष्टा' स्थाने पश्येति आर्षम् ।

† आसीदिति स्थाने आसन्निति आर्षम् ।

‡ मत्तः इत्यस्य स्थाने मह्यमिति आर्षम् ।

§ तं माभैष्टेति (ग) ।

ततोऽन्ये पञ्च पुरुषा आगत्य नृपसत्तमम् ।
संवेष्ट्य संस्थिताः सर्वे ततो राजावरोधितः* ॥ १९ ।
रुध्यं† राजन्निताः सर्वे एकीभूतास्तु दस्यवः ।
मथितं शस्त्रमादाय लीनान्योऽन्यं ततो भयात् ॥ २० ।
तैर्लीनैर्नृपतेर्वेश्म बभौ परमशोभनम् ।
अन्येषामपि पापानां कोटिः साग्राभवन्नृप ॥ २१ ।
गृहे भूः सलिलं वह्निः सुखशीतश्च मारुतः ।
सावकाशानि शुभ्राणि पञ्चैक्येन गुणानि च ॥ २२ ।
एकैवं तेषां सुचिरं संवेष्ट्यासज्य संस्थितम् ।
एवं स पशुपालोऽसौ कृतवानञ्जसा नृप ॥ २३ ।
तस्य तल्लाघवं दृष्ट्वा रूपञ्च नृपतेर्मृधे ।
त्रिवर्णः पुरुषो राजन्नब्रवीद्राजसत्तमम् ॥ २४ ।
त्वत्पुत्रोऽस्मि महाराज ब्रूहि किङ्करवाणि ते ।
अस्माभिर्बन्धुमिच्छद्भिर्भवन्तं निश्चयः कृतः ॥ २५ ।
यदि नाम कृताः सर्वे वयन्देव पराजिताः ।
एवमेव शरीरेषु लीनास्तिष्ठाम‡ पार्थिव । २६ ॥
मय्येके§ तव पुत्रत्वङ्गते सर्व्वेषु सम्भवः ।
एवमुक्तस्ततो राजा तन्नरं पुनरब्रवीत् ॥ २७ ।

---

* राजनिरोधने इति (ख), विरोधित इति (ग) ।

† रुध्येति आर्षं, रुद्ध्वा इति साधु ।

‡ अत्र विसर्गलोप आर्षः ।

§ एकस्मिन्निति साधु ।

पुत्रो भवति मे कर्त्ता अन्येषामपि सत्तम।
पृथक्सुखैर्नरैर्भावैर्नाहं लिप्ये कदाचन ॥ २८ ।
एवमुक्त्वा स नृपतिस्तमात्मजमथाकरोत्।
तैर्विमुक्तः स्वयन्तेषां मध्ये स विरराम ह ॥ २९ ।

इति वराहपुराणे अगस्तिगीतासु एकपञ्चाशोऽध्यायः।

द्वापञ्चाशोऽध्यायः।

अगस्त्य उवाच।

स त्रिवर्णो नृपः सृष्टः स्वतन्त्रत्वाच्च पार्थिवः।
अहंनामानमसृजत्पुत्रं पुनस्त्रिवर्णकः ॥ १ ।
तस्यापि चाभवत्कन्या अवबोधस्वरूपिणी।
सा तु विज्ञानदं पुत्रं मनोज्ञं विससर्ज ह ॥ २ ।
तस्यापि सर्व्वरूपाः स्युस्तनयाः पञ्च भोगिनः।
यथासङ्क्येन पुत्रास्तु तेषामच्चाभिधानकाः ॥ ३ ।
एते पूर्व्वं दस्यवस्तु ततो राज्ञा वशीकृताः।
अमूर्त्ता इव ते सर्व्वे चक्रुरायतनं शुभम् ॥ ४ ।
नवद्वारं पुरं तस्य एकस्तम्भं चतुष्पथम्।
नदीसहस्रसङ्कीर्णं जलकृत्यसमाश्रितम् ॥ ५ ।

तत्पुरं ते प्रविविशुरेकीभूतास्ततो नव ।
पुरुषो मूर्त्तिमान्राजा पशुपालोऽभवत् क्षणात् ॥ ६ ।
ततस्तत्पुरसंस्थस्तु पशुपालो महान्नृपः ।
संसृज्य वाचकान् शब्दान्वेदान्सस्मार तत्पुरे ॥ ७ ।
आत्मस्वरूपिणो नित्यांस्तदुक्तानि व्रतानि च ।
नियमान् क्रतवश्चैव* सर्व्वान्राजा चकार ह ॥ ८ ।
स कदाचिन्नृपः खिन्नः कर्म्मकाण्डमरोचयत् ।
सर्व्वज्ञो योगनिद्रायां स्थित्वा पुत्रं ससर्ज्ज ह ।
चतुर्व्वक्त्रं चतुर्ब्बाहुं चतुर्व्वेदं चतुःपथम् ॥ ९ ।
तस्मादारभ्य नृपतेर्विषयः स्वपदास्थितः ।
तस्मिन् समुद्रे स नृपो वने तस्मिंस्तथैव च ॥ १० ।
तृणादिषु नृपश्चैव हस्त्यादिषु तथैव च ।
समोऽभवत्कर्म्मकाण्डादनुजानन्महामते ॥ ११ ।

इति वराहपुराणे अगस्त्यगीतासु द्वापञ्चाशोऽध्यायः ।

---

* क्रतूनिति साधु ।

त्रिपञ्चाशोऽध्यायः ।

भद्राश्व उवाच ।

मत्प्रश्नविषये ब्रह्मन् कथेयं कथिता त्वया ।
तस्याविर्भूतिरभवत्कस्य केन कृतेन ह ॥ १ ।

अगस्त्य उवाच ।

आगतेयं कथा चित्रा सर्व्वस्य विषये स्थिता ।
त्वद्देहे मम देहे च सर्व्वजन्तुषु सा समा ॥ २ ।
तस्याः सम्भूतिमिच्छन्यस्तस्योपायं स्वयम्परम् ।
पशुपालात्समुत्पन्नो यश्चतुष्पाच्चतुर्मुखः ॥ ३ ।
स गुरुः स कथायास्तु तस्याश्चैव प्रवर्त्तकः ।
तस्य पुत्रः स्वरो नाम सत्यमूर्त्तिरसौ स्मृतः ॥ ४ ।
तेन प्रोक्तन्तु यत्किञ्चिच्चतुर्णां स धनन्नृप ।
ऋगर्थाना*च्चतुर्भिस्ते तद्भक्त्याराध्यतां ययुः ॥ ५ ।
चतुर्णां प्रथमो यस्तु चतुःशृङ्गः समास्थितः ।
वृषद्वितीयस्तत्प्रोक्तमार्गेणैव तृतीयकः ।
चतुर्थस्तत्प्रणीतस्तां पूज्य भक्त्याशु तं व्रजेत् ॥ ६ ।
सप्तमूर्त्तेस्तु चरितं शुश्रुवुः प्रथमन्नृपः ।
ब्रह्मचर्य्येण वर्त्तेत द्वितीयोऽस्य सनातनः ॥ ७ ।
ततो भृत्यादिभरणं वृषस्यारोहणं नृषु ।
वनवासश्च निर्द्दिष्ट आत्मस्थे वृषभे सति ॥ ८ ।

---

* क्रियार्थानामिति (ग)।

अहमस्मिन्वदत्यन्यश्चतुर्द्धा एकधा द्विधा ।
भेदभिन्नसहोत्पन्नास्तस्यापत्यानि जज्ञिरे ॥ ९ ।
नित्यानित्यस्वरूपाणि दृष्ट्वा पूर्व्वञ्चतुर्मुखः ।
चिन्तयामास जनकं* कथं पश्याम्यहं नृप ॥ १०
मदीयस्य पितुर्ये हि गुणा ह्यासन्महात्मनः ।
न ते सम्प्रति दृश्यन्ते स्वरापत्येषु केषुचित् ॥ ११ ।
पितुः पुत्रस्य यः पुत्रः स पितामहनाम यत् ।
एवं श्रुतिः स्थिता चेयं स्वरापत्येषु नान्यथा ॥ १२
क्वापि सम्पत्स्यते भावी द्रष्टव्यश्चापि ते पिता ।
एवं नीतेऽपि किङ्कार्य्यमिति चिन्तापरोऽभवत् ॥ १
तस्य चिन्तयतः शस्तं पितृकं† स्फुरतो बभौ ।
तेन पुत्रेण तं रोषान्ममन्थ स्वरमन्तिके ॥ १४ ।
तस्मिन्मथितमात्रे तु शिरस्तस्यातिदुर्ग्रहम् ।
नारिकेलफलाकारं चतुर्वक्त्रोऽन्वपश्यत ॥ १५ ।
तच्चाहतं प्रधानेन दृश्यधा संवृतो बभौ ।
चतुष्पादेन शस्त्रेण चिच्छेद तिलकाण्डवत्‡ ॥ १
प्रकामन्तिलशश्छिन्ने तदमूलो न मे बभौ ।
अहं त्वहं वदन् भूतन्तमप्येवमथाच्छिनत् ॥ १७
तस्मिन् भागे दृश्यङ्कृत्वा कृत्स्नमन्यमवेचत ।

---

* जननमिति (ख) ।

† पैतृकमिति साधु ।

‡ (ख) पुस्तके श्लोकस्यास्य सार्द्धैकः पादो नास्ति ।

अहं भूतादि वः पञ्च वदन्तं भूतिमन्तिकात् ॥ १८ ।
तमप्येवमथो छित्वा पञ्चासून्यानमीक्षत* ।
कृत्वावकाशन्ते सर्व्वे ज्वलन्त इदमन्तिकात् ॥ १९ ।
तमप्यसङ्गशस्त्रेण चिच्छेद तिलकाण्डवत् ।
तस्मिंश्छिन्ने दशांशेन कृत्स्नमन्यमपश्यत† ॥ २० ।
पुरुषं रूपशस्त्रेण तच्छित्त्वान्यमपश्यत ।
तद्वद्रसं सितं सौम्यं तमप्येवं तदाकरोत् ॥ २१ ।
एवङ्कृते शरीरन्तु ददर्श स पुनः प्रभुः ।
स्वकीयमेव तस्यान्तः पितरं नृपसत्तम ॥ २२ ।
त्रसरेणुसमं मूर्त्त्या अव्यक्तं सर्व्वजन्तुषु ।
स मे दृष्ट्वा परं हर्षमुभौ हि स स्वरोऽभवत्‡ ॥ २३ ।
एवंविधोऽसौ पुरुषः स्वरनामा महातपाः ।
मूर्त्तिस्तस्य प्रवृत्ताख्यं निवृत्ताख्यं शिरो महत् ॥ २४ ।
एतस्माद्दिव तस्याशु कथया राजसत्तम ।
सम्भूतिरभवद्राजा विवृतस्त्वेष एव तु ॥ २५ ।
एषेतिहासः§ प्रथमः सर्व्वस्य जगतो भृगम् ।
य इमं वेत्ति तत्त्वेन साक्षात्कर्म्मपरो भवेत् ॥ २६ ।

इति वराहपुराणे अगस्तिगीतासु पशुपालोपाख्यानं नाम त्रिपञ्चाशोऽध्यायः ।

---

* ईक्षत इति आर्षं, ऐक्षत इति साधु ।

† अपश्यत्त इति साधु, एवं परत्रापि ।

‡ विसस्वरार्णवदिति (ग) ।

§ एषेतिहास इति सन्धिरार्षप्रयोगः सैषदाशरथीराम इतिवत्पादपूरणार्थम् ।

चतुःपञ्चाशोऽध्यायः ।

भद्राश्व उवाच ।

विज्ञानोत्पत्तिकामस्य क आराध्यो भवेद्द्विज ।
कथञ्चाराध्यते सो हि* एतदाख्याहि† भो द्विज ॥ १ ।

अगस्त्य उवाच ।

विष्णुरेव सदाराध्यः सर्व्वदेवैरपि प्रभुः ।
तस्योपायं प्रवक्ष्यामि येनासौ वरदो भवेत् ॥ २ ।
रहस्यं सर्व्ववेदानां मुनीनां मनुजां‡ तथा ।
नारायणः परो देवस्तं प्रणम्य न सीदति ॥ ३ ।
श्रूयते च पुरा राजन्नारदेन महात्मना ।
कथितन्तुष्टिदं विष्णोर्व्रतमप्सरसान्तथा ॥ ४ ।

अप्सरस ऊचुः ।

भगवन् ब्रह्मतनय भर्तृकामा वयं द्विज ।
नारायणश्च भर्त्ता नो यथा स्यात्तत्प्रचक्ष्व नः ॥ ५ ।

नारद उवाच ।

प्रणामपूर्व्वकः§ प्रश्नः सर्व्वत्र विहितः शुभाः ।
स च मे न कृतो गर्व्वाद्युष्माभिर्यौवनस्मयात् ॥ ६ ।

---

* सोहीति आर्षं, सहीति साधु ।

† तन्ममाचक्ष्व भो द्विज इति (ख) ।

‡ मनुजानामिति साधु । मनुजानां तथा प्रभु इति (ख) ।

§ प्रेरणापूर्व्वकः इति (ख) ।

तथापि देवदेवस्य विष्णोर्यन्नाम कीर्त्तितम्।
भवतीभिस्तथा भर्त्ता भवत्विति वरः कृतः।
तन्नामोच्चारणादेव कृतं सर्व्वं न संशयः॥ ७।
इदानीं कथयाम्याशु व्रतं येन हरिः स्वयम्।
वरदत्वमवाप्नोति भर्त्तृत्वञ्च नियच्छति॥ ८।

नारद उवाच।

वसन्ते शुक्लपक्षस्य द्वादशी या भवेच्छुभा।
तस्यामुपोष्य विधिवन्निशायां हरिमर्च्चयेत्॥ ९।
तस्योपरि रक्तपुष्पैर्मण्डलङ्कारयेद्बुधः।
नृत्यवादित्रगीतैश्च जागरन्तत्र कारयेत्॥ १०।
नमो भवायेति शिरः अनङ्गायेति वै कटिम्।
कामाय बाहुमूले तु सुशास्त्रायेति चोदरम्॥ ११।
मन्मथायेति पादौ तु हरयेति* च सर्व्वतः।
चक्षुर्हित्तु स्मरं तस्य प्रणतस्य ततो नृप॥ १२।
एवङ्कृत्वा प्रभाते तु दापयेद्ब्राह्मणाय च।
वेदवेदाङ्गयुक्ताय सम्पूर्णाङ्गाय धीमते॥ १३।
ब्राह्मणांश्च तथा पूज्य व्रतमेतत्समापयेत्।
एवङ्कृते तथा विष्णुर्भर्त्ता वो भविता ध्रुवम्॥ १४।
पश्चात्तु रसमादाय इक्षुकाण्डात्सुशोभनात्।
पुष्पैः सम्पूज्य देवेशं मल्लिकाजातिसिम्भवा॥ १५।

---

* हरयेति आर्षं, हराय इति साधु।

अकृत्वा मन्त्रणामन्तु पृष्टो गर्व्वेण शोभनाः ।
अवमानस्य तस्यायं विपाको वो भविष्यति ॥ १६ ।
एतस्मिन्नेव सरसि अष्टावक्रो महामुनिः ।
तस्योपहासङ्कृत्वा तु शापं लप्स्यथ शोभनाः ॥ १७ ।
व्रतेनानेन देवेशं पतिं लब्ध्वाभिमानतः ।
अवमानेन हरणं गोपालैर्वोभविष्यति ।
पुरा हर्त्ता च कन्यानां देवो भर्त्ता भविष्यति ॥ १८ ।

अगस्त्य उवाच ।

एवमुक्त्वा स देवर्षिः प्रययौ नारदः क्षणात् ।
ता अप्येतद्व्रतञ्चक्रुस्तुष्टश्चासां स्वयं हरिः ॥ १९ ।

इति वराहपुराणे उत्तमभर्त्तृप्राप्तिव्रतं नाम चतुःपञ्चाशोऽध्यायः ।

पञ्चपञ्चाशोऽध्यायः ।

अगस्त्य उवाच ।

शृणु राजन्महाभाग व्रतानामुत्तमं व्रतम्* ।
येन सम्प्राप्यते विष्णुः शुभेनैव न संशयः ॥ १ ।
मार्गशीर्षस्य मासे तु प्रथमेऽह्नि समारभेत् ।

---

* (ख) पुस्तकेऽतः परं सार्द्धषट्श्लोका न सन्ति ।

सिते पक्षे दशम्यान्तु एकभक्तं समाचरेत्॥ २।
ततो दशम्यां स्नात्वा तु मध्याह्ने विष्णुमर्च्चयेत्।
भुक्त्वा सङ्कल्पयेत्प्राग्वद्द्वादशीमक्षतां नृप॥ ३।
विप्रेभ्यश्च यवान्दद्यात्तामुपोष्य विधानतः।
सर्व्वदा च हरिर्व्वाच्यो दाने होमे तथार्च्चने॥ ४।
चातुर्मास्यमथैवन्तु क्षपित्वा राजसत्तम।
चैत्रादिषु पुनस्तद्वदुपोष्य प्रयतः सुधीः॥ ५।
सक्तुपात्राणि दद्यात्तु विप्रेभ्यः प्रीतिपूर्व्वकम्।
श्रावणादिषु मासेषु शालीर्दद्यात्प्रयत्नतः॥ ६।
त्रिषु मासेषु यावच्च कार्त्तिकस्यादिरागतः।
तमप्येवं क्षपित्वा तु दशम्यां प्रयतः शुचिः॥ ७।
अर्च्चयित्वा हरिं भक्त्या मासनाम्ना विचक्षणः।
सङ्कल्प्य पूर्व्ववद्भक्त्या द्वादश्यां संयतेन्द्रियः॥ ८।
एकादश्यां यथाशक्त्या कारयेत्पृथिवीं नृप।
काञ्चनाङ्गाञ्च पाताल कुलपर्व्वतसंयुताम्॥ ९।
भूमिन्यासविधानेन स्थापयेत्तां हरेः पुरः*।
सितवस्त्रयुगच्छन्नां सर्व्वबीजसमन्विताम्॥ १०।
सम्पूज्य प्रियदत्तेति पञ्चरत्नैर्व्विचक्षणः।
जागरं तत्र कुर्व्वीत प्रभाते तु पुनर्द्विजान्॥ ११।
आमन्त्र्य संख्यया राजंश्चतुर्व्विंशतिं† यत्नतः।

---

* पुनरिति (ख)।

† चतुर्व्विंशतिमिति युक्तम्।

एकैकाय च गान्दद्यादनड्वाहं सदक्षिणम् ॥ १२ ।
एकैकं वस्त्रयुग्मञ्च अङ्गुलीयकमेव च ।
कटकानि च सौवर्णकर्णाभरणकानि च ॥ १३ ।
एकैकङ्ग्राममेतेषां राजा राजन् प्रदापयेत् ।
स्वशक्त्या भरणञ्चैव दरिद्रस्य स्वशक्तितः ॥ १४ ।
यथाशक्त्या महीं कृत्वा काञ्चनीङ्गोयुगं तथा ।
वस्त्रयुग्मञ्च दातव्यं यथाविभवशक्तितः ॥ १५ ।
सर्व्वाभरणसंयुक्ताङ्गाञ्च दद्याद्विशेषतः ।
एवङ्कृते सकृद्राजन्तुष्टिमायाति वै विभुः ॥ १६ ।
रौप्यां वा पृथिवीङ्कृत्वा यथाविभवशक्तितः ।
दद्यात्तां ब्राह्मणेभ्यश्च यथाशक्त्या हरिं स्मरन् ॥ १७ ।
तथा भोजनमेतेषामुपानच्छत्रिकां तथा ।
पादुके च तथा दद्यात्कृष्णो दामोदरो मम ॥ १८ ।
प्रीयतां सर्व्वदो देवो विश्वरूपो हरिर्मम ।
दानं सुभोजनं दत्त्वा सकृद्यत्फलमाप्यते ॥ १९ ।
वर्षाणाञ्च सहस्रेण कीर्त्तितुन्नैव शक्यते ।
तथाप्युद्देशतः किञ्चित्फलं वक्ष्यामि तेऽनघ ॥ २० ।
व्रतेनानेन यद्वृत्तं शुभं यस्य शृणुष्व तत् ।
आसीदादियुगे राजा ब्रह्मवादी दृढव्रतः ॥ २१ ।
स पुत्रकामः पप्रच्छ ब्रह्माणं परमेश्वरम् ।
तस्येदं व्रतमाचख्यौ ब्रह्मा स कृतवान् पुरा ॥ २२ ।
तस्य व्रतान्ते विश्वात्मा स्वयं प्रत्यक्षतां गतः ।

दृष्ट्वा चोवाच भो राजन्वरो मे व्रियतां वरः ॥ २३ ।

राजोवाच ।

पुत्रं मे देहि देवेश वेदमन्त्रविशारदम् ।
याजकं यजनासक्तं कीर्त्त्या युक्तं चिरायुषम् ॥ २४ ।
असंख्यातगुणञ्चैव ब्रह्मभूतमकल्मषम् ।
एवमुक्त्वा ततो राजा पुनर्वचनमब्रवीत् ॥ २५ ।
ममाप्येतच्छुभं स्थानं प्रयच्छ परमेश्वर ।
यत्तन्मुनिपदं नाम यत्र गत्वा न शोचति ॥ २६ ।
एवमस्त्विति तं देवः प्रोक्त्वा चादर्शनं गतः ।
तस्यापि राज्ञः पुत्रोऽभूद्वत्सश्रीर्नाम नामतः ॥ २७ ।
वेदवेदाङ्गसम्पन्नो यज्ञयाजी बहुश्रुतः ।
तस्य कीर्त्तिर्महाराज विस्तृता धरणीतले ॥ २८ ।
राजापि तं सुतं लब्ध्वा विष्णुदत्तं प्रतापिनम् ।
जगाम तपसे युक्तः सर्व्वद्वन्द्वसहः प्रभुः ॥ २९ ।
आराधयामास हरिं निराहारो जितेन्द्रियः ।
हिमवत्पर्व्वते रम्ये स्तुतिञ्चापि सदापठत् ॥ ३० ।

भद्राश्व उवाच ।

कीदृशी सा स्तुतिर्ब्रह्मन् यां चकार स पार्थिवः ।
किञ्च तस्याभवद्देवं स्तुन्वतः पुरुषोत्तमम् ॥ ३१ ।

दुर्वासा उवाच ।

हिमवन्तं समाश्रित्य राजा तद्गतमानसः ।
स्तुतिञ्चकार देवस्य विष्णोरद्भुतकर्म्मणः ॥ ३२ ।

राजोवाच ।

चराचरं क्षीरसमुद्रशायिनं
पृथ्वीधरं मूर्त्तिमतां परम्पदम् ।
अतीन्द्रियं विश्वभुजां पुरःकृतं
नीराकृतिं स्तौमि जनार्द्दनं प्रभुम् ॥ ३३ ।
त्वमादितस्त्वं परमार्थरूपी
विभुः पुराणः पुरुषोत्तमश्च ।
अतीन्द्रियो वेदविदां प्रधानः
प्रपाहि मां शङ्खगदास्त्रपाणे ॥ ३४ ।
कृतन्त्वया देव सुरासुराणां
सङ्कीर्त्त्यमानेन अनन्तमूर्त्तें ।
सृष्ट्यर्थमेतत्तव देव विष्णो
सञ्चेष्टितं कूटगतस्य तत्स्यात्* ॥ ३५ ।
तथापि कूर्म्मत्वमृगत्वमुच्चै-
स्त्वया कृतं रूपमनेकरूप ।
सर्व्वज्ञभावादसतश्च जन्म
सङ्कीर्त्त्यते तेऽच्युत नैतदस्ति ॥ ३६ ।
नृसिंह वामन नमो जमदग्निनाम
दशास्यगोत्रान्तक वासुदेव ।

---

* ते स्यादिति (ग) ।

नमोऽस्तु ते बुद्ध कल्किन्वरेश*
शम्भो नमस्ते विबुधारिनाशन ॥ ३७ ।
नमोऽस्तु नारायण पद्मनाभ
नमो नमस्ते पुरुषोत्तमाय ।
नमः समस्तामरसङ्घपूज्य
नमोऽस्तु ते सर्व्वविदां प्रधान ॥ ३८ ।
नमः करालास्य नृसिंहमूर्त्ते
नमो विशालाद्रिसमान कूर्म्म ।
नमः समुद्रप्रतिमान मत्स्य
नमामि त्वां क्रोड़रूपिन्ननन्त ॥ ३९ ।
सृष्ट्यर्थमेतत्तव देव चेष्टितं
न मुख्यपचे तव मूर्त्तिता विभो ।
अजानता ध्यानमिदं प्रकाशितं
न लच्यसे त्वं पुरुषः पुराणः ॥ ४० ।
आद्यो मखस्त्वं स्वयमेव विष्णो
मखाङ्गभूतोऽसि हविस्त्वमेव ।
पशुर्भवान् ऋत्विगाज्यन्त्वमेव
त्वां देवसङ्घा मुनयो यजन्ति† ॥ ४१ ।
चलाचलं जगदेतच्च यस्मिन्
सुरादिकालानलसंस्थमुत्तमम् ।

---

* सुरेश इति (ख) ।

† यजन्ते इति साधु ।

न त्वं विभक्तोऽसि जनार्दनेश
प्रयच्छ सिद्धिं हृदयेप्सितां मे ॥ ४२ ।
नमः कमलपत्राक्ष मूर्त्तामूर्त्त नमो हरे ।
शरणन्त्वां प्रपन्नोऽस्मि संसारान्मां समुद्धर ॥ ४३ ।
एवं स्तुतस्ततो देवस्तेन राज्ञा महात्मना ।
विशालास्त्रतलस्थेन तुतोष परमेश्वरः ॥ ४४ ।
कुब्जरूपस्ततो भूत्वा आजगाम हरिः स्वयम् ।
तस्मिन्नागतमात्रे तु सोऽप्यास्त्रः* कुब्जकोऽभवत् ॥ ४५ ।
तद्दृष्ट्वा महदाश्चर्य्यं स राजा शंसितव्रतः ।
विशालस्य कथं कौब्जमिति चिन्तापरोऽभवत् ॥ ४६ ।
तस्य चिन्तयतो बुद्धिर्जातेयं ब्राह्मणम्प्रति ।
अनेनागतमात्रेण कृतमेतन्न संशयः ॥ ४७ ।
एतस्मादेव भविता भगवान्पुरुषोत्तमः ।
एवमुक्त्वा नमश्चक्रे तं विप्रं स नृपोत्तमः ॥ ४८ ।
अनुग्रहाय भगवन्नूनं त्वं पुरुषोत्तमः ।
आगतोऽसि स्वरूपं मे दर्शयस्वाधुना हरे ॥ ४९ ।
एवमुक्तस्तदा देवः शङ्खचक्रगदाधरः ।
बभौ तत्पुरतः सौम्यो वाक्यञ्चेदमुवाच ह ॥ ५० ।
वरं वृणीष्व राजेन्द्र यत्ते मनसि वर्त्तते ।
मयि प्रसन्ने त्रैलोक्यं तिलमात्रमिति प्रभो ॥ ५१ ।

---

* सोऽप्याम्र इति (ग) ।

एवमुक्तस्ततो राजा हर्षोत्फुल्लितलोचनः।
मोक्षं प्रयच्छ देवेशेत्युक्ता नोवाच किञ्चन ॥ ५२।
एवमुक्तः स भगवान् पुनर्वाक्यमुवाच ह ॥ ५३।
मय्यागते विशालोऽयमाम्रः कुब्जत्वमागतः।
यस्मात्तस्मात्तीर्थमिदं कुब्जकाम्रं भविष्यति ॥ ५४।
तिर्य्यग्योन्यादयोऽप्यस्मिन् ब्राह्मणा वा यदि स्वकम्।
कलेवरं त्यजिष्यन्ति* तेषां पञ्च शतानि च।
विमानानि भविष्यन्ति योगिनो मुक्तिरेव च ॥ ५५।
एवमुक्ता नृपं देवः शङ्खाग्रेण जनार्द्दनः।
स्पृश्य* संस्पृष्टमात्रोऽसौ† परं निर्वाणमाप्तवान् ॥ ५६।
तस्मात्त्वमपि राजेन्द्र तं देवं शरणं व्रज।
येन भूयः पुनः शोच्यपदवीं नो प्रयास्यसि ॥ ५७।
य इदं शृणुयान्नित्यं प्रातरुत्थाय मानवः।
पठेद्यश्चरितन्ताभ्यां मोक्षधर्मार्थदो भवेत् ॥ ५८।
शुभव्रतमिदं पुण्यं यश्च कुर्य्याज्जनेश्वर।
स सर्व्वसम्पदश्चेह भुक्तान्ते तल्लयं व्रजेत् ॥ ५९।

इति वराहपुराणे शुभव्रतं नाम पञ्चपञ्चाशोऽध्यायः।

---

* त्यक्ष्यन्तीति साधु।

† स्पृष्टवान् इति स्थाने स्पृश्येति पाठ आर्षः।

षट्पञ्चाशोऽध्यायः ।

अगस्त्य उवाच ।

अतः परं प्रवक्ष्यामि धन्यव्रतमनुत्तमम् ।
येन सद्यो भवेद्धन्यः अधनोऽपि हि यो भवेत् ॥ १ ।
मार्गशीर्षे सिते पक्षे प्रतिपद्या तिथिर्भवेत् ।
तस्यां नक्तं प्रकुर्व्वीत विष्णुमग्निं प्रपूजयेत् ॥ २ ।
वैश्वानराय पादौ तु अग्नयेत्युदरं तथा ।
हविर्भुजाय च उरौ द्रविणोदेति वै भुजौ ॥ ३ ।
संवर्त्तायेति च शिरो ज्वलनायेति सर्वतः ।
अभ्यर्च्यैवं विधानेन देवदेवं जनार्द्दनम् ॥ ४ ।
तस्यैव पुरतः कुण्डं कारयित्वा विधानतः ।
होमं तत्र प्रकुर्वीत एभिर्मन्त्रैर्विचक्षणः ॥ ५ ।
ततः सयावकश्चान्नं भुञ्जीयाद्घृतसंयुतम् ।
कृष्णपक्षेऽप्येवमेव चातुर्मास्यन्तु यावता ॥ ६ ।
चैत्रादिषु च भुञ्जीत पायसं सघृतं बुधः ।
श्रावणादिषु सक्तूंश्च ततश्चैतत्समाप्यते ॥ ७ ।
समाप्ते तु व्रते वह्निं काञ्चनं कारयेद्बुधः ।
रक्तवस्त्रयुगच्छन्नं रक्तपुष्पानुलेपनम् ॥ ८ ।
कुङ्कुमेन तथालिप्य* ब्राह्मणं सत्त्वमेव च ।

---

* अत्र तथा, आलिप्य इति पदच्छेदः कर्त्तव्यः, अन्यथा लिप्तेति साधु ।

सर्व्वावयवसम्पूर्णं ब्राह्मणं प्रियदर्शनम् ।
पूजयित्वा विधानेन रक्तवस्त्रयुगेन च ।
दद्यात्पश्चाच्च तं तस्य मन्त्रेणानेन बुद्धिमान् ॥ ८।१० ।
धन्योऽस्मि धन्यकर्म्मास्मि धन्यचेष्टोऽस्मि धन्यवान् ।
धन्येनानेन चीर्णेन व्रतेन स्यां सदा सुखी ॥ ११ ।
एवमुच्चार्य्य तं विप्रे* न्यस्य कोशं महात्मने ।
सद्यो धन्यत्वमाप्नोति योऽपि स्याद्भोगवर्ज्जितः† ॥ १२ ।
इह जन्मनि सौभाग्यं धनं धान्यञ्च पुष्कलम् ।
अनेन कृतमात्रेण जायते नात्र संशयः ॥ १३ ।
प्राग्जन्मजनितं यावदग्निर्दहति पातकम्‡ ।
दग्धे पापे विमुक्तात्मा इह जन्मन्यसौ भवेत् ॥ १४
योऽपीदं शृणुयान्नित्यं यश्च भक्त्या पठेद्द्विजः§ ।
उभौ ताविह लोकौ तु धन्यौ सद्यो भविष्यतः ॥ १५ ।
श्रूयते च व्रतञ्चैतच्चीर्णमासीन्महात्मना ।
धनदेन पुरा कल्पे शूद्रायोनौ स्थितेन हि ॥ १६ ।

इति वराहपुराणे धन्यव्रतं नाम षट्पञ्चाशोऽध्यायः ।

---

* विप्राय इति साधु ।

† भगवर्ज्जित इति (ग) ।

‡ पापकमिति (क), (ख) ।

§ पठेन्नर इति (ख) ।

सप्तपञ्चाशोऽध्यायः ।

अगस्त्य उवाच ।

अतःपरं प्रवक्ष्यामि कान्तिव्रतमनुत्तमम् ।
यत्कृत्वा तु पुरा सोमः कान्तिमानभवत्पुनः ॥ १
यक्ष्मणा दक्षशापेन पुरा क्रान्तो निशाचरः ।
एतच्चीर्त्त्वा व्रतं सद्यः कान्तिमानभवत्किल ॥ २ ।
द्वितीयायान्तु राजेन्द्र कार्त्तिकस्य सितन्दिनम् ।
नक्तं कुर्व्वीत यत्नेन अर्च्चयन् बलकेशवम् ॥ ३ ।
बलदेवाय पादौ तु केशवाय शिरोऽर्च्चयेत् ।
एवमभ्यर्च्य मेधावी वैष्णवं रूपमुत्तमम् ॥ ४ ।
परन्तु रूपं सोमाख्यं द्विकलं तद्दिने हि यत् ।
तस्य देवस्य चार्घ्यन्तु दद्यान्मन्त्रेण सुव्रत* ॥ ५ ।
नमोऽस्त्वमृतरूपाय स वै विधिवराय च ।
यज्ञलोकाधिपतये सोमाय परमात्मने† ॥ ६ ।
रात्रौ स विप्रो भुञ्जीत यवान्नं सघृतन्नरः ॥ ७ ।
फाल्गुनादिचतुष्कान्तु पायसम्भक्षयेच्छुचिः ।
शालिहोमं प्रकुर्व्वीत कार्त्तिके तु यवैस्तथा ॥ ८
आषाढ़ादिचतुष्के तु तिलहोमन्तु कारयेत् ।

---

* (ख) पुस्तकेऽतःपरं षट्पादा न सन्ति ।

† एष पादः (ग) पुस्तके नास्ति ।

तद्दत्तिलान्नं भुञ्जीत एष एव विधिः स्मृतः ॥ ९ ।
ततः संवत्सरे पूर्णे काञ्चनं शशिनं व्रती ।
सितवस्त्रयुगच्छन्नं सितपुष्पानुलेपनम् ॥ १० ।
दद्याद्द्विजाय सम्पूज्य काञ्चनं शशिनं तथा* ।
अथ संवत्सरे पूर्णे कृत्वा सोमन्तु राजतम् ॥ ११ ।
सितवस्त्रयुगच्छन्नं सितपुष्पानुलेपनम् ।
एवमेव द्विजं पूज्य ततस्तं प्रतिपादयेत्† ॥ १२ ।
कान्तिमानपि लोकेऽस्मिन् सर्व्वज्ञः प्रियदर्शनः ।
त्वत्प्रसादात्सोमरूपिन्नारायण नमोऽस्तु ते ॥ १३ ।
अनेन किल मन्त्रेण दत्त्वा विप्राय वाग्यतः ।
दत्तमात्रे ततस्तस्मिन् कान्तिमाञ्जायते नरः ॥ १४ ।
आत्रेयेणापि सोमेन कृतमेतत्पुरा नृप ।
तस्य व्रतान्ते सन्तुष्टः स्वयमेव जनार्द्दनः ॥ १५ ।
यक्ष्माणमपनीयाशु अमृताख्यां कलां ददौ ।
तां कलां सोमराजासौ तपसा लब्धवान्निधि ॥ १६ ।
सोमत्वञ्चागमत्सोमो द्विजराजत्वमेव च ।
द्वितीयामश्विनौ सोमभुजौ कीर्त्त्यौ तु तद्दिने ॥ १७ ।
तौ शेषविष्णुविख्यातौ‡ शुक्लपक्षौ न संशयः ।

---

* अतःपरं षट्पादाः (ख) पुस्तके न सन्ति ।

† एष पाठः (ग) पुस्तके नास्ति ।

‡ नृप तौ शेषविख्यातौ इति (ग), शुक्लपक्षौ इति (क), (ख) ।

न विष्णोर्व्यतिरिक्तः स्याद्दैवतं नृपसत्तम ।
नामभेदेन सर्व्वत्र संस्थितः पुरुषोत्तमः ॥ १८ ॥

इति वराहपुराणे कान्तिव्रतं नाम सप्तपञ्चाशोऽध्यायः ।

—o—

अष्टपञ्चाशोऽध्यायः ।

अगस्त्य उवाच ।

अतःपरं महाराज सौभाग्यकरणं व्रतम् ।
शृणु येनाशु सौभाग्यं स्त्रीपुंसोरुपजायते ॥ १ ॥
फाल्गुनस्य तु मासस्य तृतीया शुक्लपक्षगा ।
उपासितव्या नक्तेन शुचिना सत्यवादिना ॥ २ ॥
सस्त्रीकञ्च हरिं पूज्य रुद्रं वा चोमया सह ।
या श्रीः सा गिरिजा प्रोक्ता यो हरिः स त्रिलोच
एवं सर्व्वेषु शास्त्रेषु पुराणेषु च गद्यते ।
एतस्मादन्यथा यस्तु ब्रूते शास्त्रं पृथक्तया ॥ ४ ॥
रुद्रो जनानां मर्त्यानां काव्यं शास्त्रं न तद्भवेत् ।
विष्णुं रुद्रकृतं ब्रूयाच्छ्रीगौरीति निगद्यते ॥ ५ ॥
एतयोरन्तरं* यश्च सोऽधमेत्युच्यते जनैः ।

---

* एतयोरन्तरं ब्रूयादिति (क)। (ख) पुस्तके अन्तरेति ।

† अधमेत्युच्यते इत्यार्षम्, अधम इत्युच्यते इति साधु ।

तं नास्तिकं विजानीयात्सर्व्वधर्म्मवहिष्कृतम् ॥ ६ ।
एवं ज्ञात्वा सलक्ष्मीकं हरिं सम्पूज्य यत्नतः ।
मन्त्रेणानेन राजेन्द्र ततस्तं परमेश्वरम् ॥ ७ ।
गम्भीरायेति पादौ तु सुभगायेति वै कटिम् ।
उदरं देवदेवाय त्रिनेत्रायेति वै मुखम् ॥ ८ ।
शिरश्च वाचस्पतये रुद्रायेति च सर्वतः ।
एवमभ्यर्च्य मेधावी विष्णुं लक्ष्म्या समन्वितम् ॥ ९ ।
हरं वा गौरीसंयुक्तं गन्धपुष्पादिभिः क्रमात् ।
ततस्तस्याग्रतो होमं कारयेन्मधुसर्पिषा ।
तिलैः सह महाराज सौभाग्यपतयेति* च ॥ १० ।
ततस्त्वक्षारविरसं निस्नेहं धरणीतले ।
गोधूमान्नन्तु भुञ्जीत कृष्णेऽप्येवं विधिः स्मृतः ॥ ११ ।
आषाढ़ादिद्वितीयां† तु पारणां तत्र कल्पयेत् ।
यवान्नेन ततः पश्चात्कार्त्तिकादिषु पार्थिव ॥ १२ ।
श्यामाकं तत्र भुञ्जीत त्रीन्मासान्नियतः शुचिः ॥ १३ ।
ततो माघसिते पक्षे तृतीयायां नराधिप ।
सौवर्णं कारयेद्गौरीं रुद्रञ्चैकत्र बुद्धिमान् ।
सलक्ष्मीकं हरिं वापि यथाशक्तया‡ प्रसन्नधीः ॥ १४ ।

---

* पतयेति इत्यार्षं पतय इति साधु ।

† द्वितीये तु इति (क), (ख) ।

‡ यथाशक्तीति साधु ।

ततस्तान् ब्राह्मणे* दद्यात्मात्रभूते विचक्षणे ॥
अन्नेन हीने वेदानां पारगे साधुवर्त्तिनि ।
सदाचारेऽथ वा दद्याद्विष्णुभक्ते विशेषतः ॥ १५।१६ ।
षड्भिः पात्रैरुपेतन्तु ब्राह्मणाय निवेदयेत् ।
एकं मधुमयं पात्रं द्वितीयं घृतपूरितम् ॥
तृतीयं तिलतैलस्य चतुर्थं गुड़संयुतम् ।
पञ्चमं लवणैः पूर्णं षष्ठं गोक्षीरसंयुतम् ॥ १७।१८ ।
एतानि दत्त्वा पात्राणि सप्तजन्मान्तरे भवेत् ।
सुभगो दर्शनीयश्च नारी वा पुरुषोऽपि वा ॥ १९ ।

इति वराहपुराणे सौभाग्यव्रतं नाम अष्टपञ्चाशोऽध्यायः ।

ऊनषष्टितमोऽध्यायः ।

अगस्त्य उवाच ।

अथ विघ्नहरं राजन् कथयामि शृणुष्व मे ।
सम्यक्कृतेन येनाशु न विघ्नैः परिभूयते ॥ १ ।
चतुर्थ्यां फाल्गुने मासि ग्रहीतव्यं व्रतन्त्विदम् ।
नक्ताहारेण राजेन्द्र तिलान्नं पारणं स्मृतम् ॥ २ ।

---

* ब्राह्मणायेति साधु, एवमन्यत्र ।

षष्टितमोऽध्यायः।

अगस्त्य उवाच।

शान्तिव्रतं प्रवक्ष्यामि तव राजन् शृणुष्व तत्।
येन चीर्णेन शान्तिः स्यात्सर्वदा गृहमेधिनाम्॥ १।
पञ्चम्यां शुक्लपक्षस्य कार्त्तिके मासि सुव्रत।
आरभ्य वर्षमेकन्तु भुञ्जीयादुष्णवर्ज्जितम्॥ २।
नक्तं देवन्तु सम्पूज्य हरिं शेषोपरि स्थितम्।
अनन्तायेति पादौ तु कटिं वासुकिने नमः॥ ३।
तक्षकायेति जठरमुरः कर्कोटकाय च।
पद्माय कण्ठं सम्पूज्य महापद्माय दोर्युगम्॥ ४।
शङ्खपालाय वक्त्रन्तु कुटिलायेति वै शिरः।
एवं विष्णुगतं पूज्य* पृथगेव च पूजयेत्॥ ५।
क्षीरेण स्नपनं कुर्य्यात्तानुद्दिश्य हरेः पुनः।
तदग्रे होमयेत् क्षीरं तिलैः सह विचक्षणः॥ ६।
एवं संवत्सरस्यान्ते ब्राह्मणान् भोजयेत्ततः।
नागन्तु काञ्चनं कुर्य्याद्ब्राह्मणाय निवेदयेत्॥ ७।
एवं यः कुरुते भक्त्या व्रतमेतन्नराधिप।
तस्य शान्तिर्भवेन्नूनं नागेभ्यो न भयं तथा॥ ८।

इति वराहपुराणे शान्तिव्रतं नाम षष्टितमोऽध्यायः।

---

* पूज्यमिति (ग), पूजयित्वेति साधु।

एकषष्टितमोऽध्यायः ।

अगस्त्य उवाच ।

काममव्रतं महाराज शृणु मे गदतोऽधुना ।
येन कामाः समृद्ध्यन्ति मनसा चिन्तिता अपि ॥ १ ।
षष्ठ्यां फलाशनो यस्तु वर्षमेकं व्रतं चरेत् ।
पौषमासे सिते पक्षे पञ्चम्यां कृतभोजनः ॥ २ ॥
षष्ठ्यान्तु प्राशयेद्धीमान्प्रथमन्तु फलं नृप ।
ततो भुञ्जीत यत्नेन वाग्यतः शुद्धमोदनम् ॥ ३ ।
ब्राह्मणैः सह राजेन्द्र अथवा केवलैः फलैः ।
तमेकं दिवसं स्थित्वा सप्तम्यां पारयेन्नृप ॥ ४ ।
अग्निकार्य्यन्तु कुर्व्वीत गुहरूपेण* केशवम् ।
पूजयित्वा विधानेन वर्षमेकं व्रतं चरेत् ॥ ५ ।
षड्वक्त्रः कार्त्तिकेयश्च सेनानीः कृत्तिकासुतः ।
कुमारः स्कन्द इत्येवं पूज्यो विष्णुः स्वनामभिः ॥ ६ ।
समाप्तौ तु व्रतस्यास्य कुर्य्याद्ब्राह्मणभोजनम् ।
षण्मुखं मूर्त्तसौवर्णं† ब्राह्मणाय निवेदयेत् ॥ ७ ।
सर्वे कामाः समृद्ध्यन्तां मम देव कुमारक ।
त्वत्प्रसादादिमं भक्त्या गृह्यतां विप्र मा चिरम् ॥ ८ ।
अनेन दत्तमात्रेण ब्राह्मणाय सवस्त्रकम् ।

---

* गृहरूपेणेति (ग) ।

† सर्व्वसौवर्णमिति (ग) ।

ततः कामाः समृद्धयन्ति सर्वे वै इह जन्मनि ॥ ९ ।
अपुत्रो लभते पुत्रं धनार्थी* लभते धनम् ।
भ्रष्टराज्यो लभेद्राज्यं नात्र कार्य्या विचारणा ॥ १० ।
एतद्व्रतं पुरा चीर्णं नलेन नृपसत्तम ।
ऋतुपर्णस्य विषये वसता व्रतचर्य्यया ॥ ११ ।
तथा राज्यच्युतैरन्यैर्बहुभिर्नृपसत्तमैः ।
पौराणिकैर्व्रतञ्चैव सिद्धार्थं नृपसत्तम ॥ १२ ।

इति वराहपुराणे कामव्रतं नाम एकषष्टितमोऽध्यायः ।

द्विषष्टितमोऽध्यायः ।

अगस्त्य उवाच ।

अथापरं महाराज व्रतमारोग्यसंज्ञितम्* ।
कथयामि परं पुण्यं सर्व्वपापप्रणाशनम् ॥ १ ।
आदित्य भास्कर रवे भानो सूर्य्य दिवाकर ।
प्रभाकरेति सम्पूज्य† एवं व्रतमुपाचरेत् ॥ २ ।

---

* अधन इति (ग) ।

---

* अथाऽपरं प्रवक्ष्यामि व्रतमारोग्यसंज्ञितमिति (क) ।

† कण्ठे सम्पूज्य इति (ख) ।

	Rs.	
Parâśara Smriti (Sans.) Fasc. I—V @ /6/ each	1	
Srauta Sútra of Ápastamba, (Sans.) Fasc I—XII @ /6/ each	4	
Srauta Sútra of Âśvaláyana, (Sans.) Fasc. I—XI @ /6/ each	4	2
Ditto, Látyáyana (Sans.) Fasc. I—IX @ /6/ each	3	6
Ditto, Sánkhyáyana (Sans.) Fasc. I—IV @ /6/ each	1	8
Sáma Veda Samhitá, (Sans.) Vols I, Fasc. 1—10; II, 1—6; III, 1—7; IV, 1—6; V, 1—8, @ /6/ each Fasc.	13	14
Sáhitya Darpana, (English) Fasc. I—IV @ /6/ each	1	8
Sánkhya Aphorisms of Kapila, (English) Fasc. I and II @ /6/ each	0	12
Súrya Siddhánta, (Sans.) Fasc. IV	0	6
Sarva Darśana Sangraha, (Sans.) Fasc. II	0	6
Sankara Vijaya, (Sans.) Fasc. II and III @ /6/ each	0	12
Sánkhya Pravachana Bháshya, (English preface only) Fasc. III	0	6
Sánkhya Sára, (Sans.) Fasc. I	0	6
Suśruta Samhitá, (Eng.) Fasc. I and II @ /12/ each	1	8
Taittiríya Áranya, (Sans.) Fasc. I—XI @ /6/ each	4	2
Ditto Bráhmana, (Sans.) Fasc. I—XXIV @ /6/ each	9	0
Ditto Samhitá, (Sans.) Fasc. I—XXXIV @ /6/ each	12	12
Ditto Prátiśákhya, (Sans.) Fasc I—III @/6/ each	1	2
Ditto and Aitareya Upanishads, (Sans.) Fasc. II and III @/6/ each	0	12
Tándya Bráhmana, (Sans.) Fasc. I—XIX @ /6/ each	7	2
Tattva Chintámani, (Sans.) Fasc. I—VII @ /6/ each	2	10
Uttara Naishadha, (Sans.) Fasc. III—XII @ /6/ each	3	12
Uvás-agadasáo, Fasc. I—III @ /12/ each	2	4
Varáha Purána, (Sans.) Fasc. I—III @ /6/ each	1	2
Váyu Purána, (Sans.) Vol. I, Fasc. 1—6; Vol. II, Fasc. 1—6, @ /6/ each Fasc.	4	8
Vishnu Smriti, (Sans.) Fasc. I—II @ /6/ each	0	12
Vivádaratnákara (Sans.) Fasc. I—VII @ /6/ each	2	10
Vrihannáradíya Purána, (Sans.) Fasc. I—IV @ /6/ each	1	8
Yoga Sútra of Patanjali, (Sans. & English) Fasc. I—V @ /14/ each	4	6
The same, bound in cloth	5	2

Arabic and Persian Series.

'Álamgírnámah, with Index, (Text) Fasc. I—XIII @ /6/ each	4	14
Áín-i-Akbarí, (Text) Fasc. I—XXII @ 1/ each	22	0
Ditto (English) Vol. I (Fasc. I—VII) 1/12 each	12	4
Akbarnámah, with Index, (Text) Fasc. I—XXXVII @ 1/ each	37	0
Bádsháhnámah, with Index, (Text) Fasc. I—XIX @ /6/ each	7	2
Beale's Oriental Biographical Dictionary, pp. 291, 4to., thick paper, @ 4/12; thin paper	4	8
Dictionary of Arabic Technical Terms and Appendix, Fasc. I—XXI @ 1/ each	21	0
Farhang-i-Rashídí (Text), Fasc. I—XIV @ 1/ each	14	0
Fihrist-i-Túsí, or, Túsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each	3	0
Futúh-ul-Shám Wáqidí, (Text) Fasc. I—IX @ /6/ each	3	6
Ditto Ázádí, (Text) Fasc. I—IV @ /6/ each	1	8
Haft Ásmán, History of the Persian Mansawi, (Text) Fasc. I	0	12
History of the Caliphs, (English) Fasc. I—VI @ /12/ each	4	8
Iqbálnámah-i Jahángírí, (Text) Fasc. I—III @ /6/ each	1	2
Isabáh, with Supplement, (Text) 42 Fasc. @ /12/ each	31	8
Maásir-ul-Umara, Vol. I, Fasc. I—III @ /6/ each	1	2
Maghází of Wáqidí, (Text) Fasc I—V @ /6/ each	1	14
Muntakhab-ul-Tawáríkh, (Text) Fasc. I—XV @ /6/ each	5	10
Muntakhab-ul Tawáríkh, (English) Vol. II, Fasc. I—IV @/12/ each	3	0
Muntakhab-ul-Lubáb, (Text) Fasc. I—XIX @ /6/ each	7	2
Mu'ásir-'Álamgírí, (Text), Fasc I—VI @ /6/ each	2	4
Nukhbat-ul-Fikr, (Text) Fasc. I	0	6
Nizámi's Khiradnámah-i-Iskandarí, (Text) Fasc. I and II @ /12/ each	1	8
Suyúty's Itqán, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. II—IV, VII—X @ 1/ each	7	0

(*Turn over.*)

abaqát-i Náṣirí, (Text) Fasc. I—V @ /6/ each 1 14
Ditto (English) Fasc. I—XIV @ /12/ each 10 8
Táríkh-i-Fírúz Sháhi, (Text) Fasc. I—VII @ /6/ each 2 10
Táríkh-i-Baihaqí, (Text) Fasc. I—IX @ /6/ each 3 6
Wís o Rámín, (Text) Fasc. I—V @ /6/ each 1 14
Zafarnámah, Fasc. I—IX ; Vol. II, Fasc III @ /6/ each 4 8

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. VII, IX to XI ; Vols. XIII and XVII, and Vols. XIX and XX @ /10/ each Rs. 80 0
   Ditto Index to Vols. I—XVIII 5 0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1865 (incl.) @ /4/ per No. ; and from 1870 to date @ /6/ per No.
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1849 (12), 1850 (7), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non Subscribers; and for 1851 (7), 1857 (6), 1858 (5), 1861 (4) 1864 (5), 1865 (8), 1866 (7), 1867 (6), 1868 (6), 1869 (8). 1870 (8), 1871 (7) 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878, (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers.

N. B. The figures enclosed in brakets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784—1883 .. 3 0
   General Conningham's Archæological Survey Report for 1863-64 (Extra No. J. A. S. B 1864) 1 8
   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868) 1 8
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., J. A. S. B., 1875) 3 0
   Sketch of the Turki Language as spoken in Eastern Turkestan, Part II, Vocabulary, by R. B. Shaw (Extra No., J. A. S. B., 1878) 3 0
   A Grammar and Vocabulary of the Northern Balochí Language, by M. L. Dames (Extra No., J. A. S. B, 1880) 3 0
   Introduction to the Maithilí Language of North Bihár, by G. A. Grierson, Part I, Grammar (Extra No., J. A. S. B., 1880) .. 1 8
   Part II, Chrestomathy and Vocabulary (Extra No., J.A.S.B., 1882) 3 0
5. Anis-ul-Musharrihi 3 0
6. Catalogue of Fossil Vertebrata 2 0
7. Catalogue of the Library of the Asiatic Society, Bengal .. 3 8
8. Examination and Analysis of the Mackenzie Manuscripts by the Rev. W. Taylor 2 0
9. Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis .. 1 8
10. Iṣṭiláḥát-uṣ-Ṣúfíyah, edited by Dr. A Sprenger, 8vo. .. 1 0
11. Ináyah, a Commentary on the Hidáyah, Vols. II and IV, @ 16/ each 32 0
12. Jawámi-ul-'ilm ir-riyáẓí, 168 pages with 17 plates, 4to. Part I 2 0
13. Khizánat-ul-'ilm 4 0
14. Mahábhárata, Vols. III and IV, @ 20/ each 40 0
15. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—II, with 5 coloured Plates, 4to @ 6/ each .. 12 0
16. Puráṇa Sangraha, I (Márkaṇḍeya Puráṇa), Sanskrit .. 1 0
17. Sharaya-ool-Islám 4 0
18. Tibetan Dictionary 10 0
19. Ditto Grammar 8 0
20. Vuttodaya, edited by Lt.-Col. G. E. Fryer 2 0
    Notices of Sanskrit Manuscripts, Fasc. I—XXI @ 1/ each .. 21 0
    Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra .. 5 0

N. B. All cheques, Money Orders, &c.

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 640.

वराहपुराणम् ।

THE VARÁHA PURÁṆA

EDITED BY

PAṆḌIT HṚISHÍKESA S'ÁSTRÍ

Professor, Sanskrit College, Calcutta.

FASCICULUS IV.

CALCUTTA:

PRINTED BY S'ASIBHÚSHAṆA BHAṬṬÁCHÁRYYA, AT THE GIRIS'A-VIDYÁRATNA PRESS,

24, GIRIS'A-VIDYÁRATNA'S LANE, UPPER CIRCULAR ROAD.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1887.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL

No. 57, PARK STREET, CALCUTTA.

AND OBTAINABLE FROM

THE SOCIETY'S LONDON AGENTS, MESSRS. TRÜBNER & CO.

57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	
Átharvana Upanishads, (Sanskrit) Fasc. I—V @ /6/ each ..	1	14
Ásvaláyana Grihya Sútra, (Sans.) Fasc. II—IV @ /6/ each ..	1	2
Agni Purána, (Sans.) Fasc. I—XIV @ /6/ each	5	4
Aitareya Áranyaka of the Rig Veda (Sans.) Fasc. I—V @ /6/ each	1	14
Aphorisms of Sándilya, (English) Fasc. I	0	6
Aphorisms of the Vedánta, (Sans.) Fasc. III, V—XIII @ /6/ each ..	3	12
Ashtasáhasriká Prajnápáramitá, Fasc. I—III @ /6/ each	1	2
Ásvavaidyaka, (Sans.) Fasc. I—III @ /6/ each	1	2
Brahma Sútras, (English) Fasc. I	0	12
Bhámatí, (Sans.) Fasc. I—VIII @ /6/ each	3	0
Brihad Áranyaka Upanishad, (Sans.) Fasc. VI, VII & IX @ /6/ each	1	2
Ditto (English) Fasc. II—III @ /6/ each	0	12
Brihat Samhitá, (Sans.) Fasc. II—III, V—VII @ /6/ each ..	1	14
Chaitanya-Chandrodaya Nátaka, (Sans.) Fasc. II—III @ /6/ each	0	12
Chaturvarga Chintámani, (Sans.) Vols. I, Fasc. 1—11 ; II, I—25 ; III, 1—XVII @ /6/ each Fasc.	19	14
Chhándogya Upanishad, (English) Fasc. II	0	6
Dasa Rúpa, (Sans.) Fasc. II—III @ /6/ each	0	12
Gopatha Bráhmana (Sans. & Eng.) Fasc. I and II @ /6/ each ..	0	12
Gobhilíya Grihya Sútra, (Sans.) Fasc. I—XII @ /6/ each ..	4	8
Hindú Astronomy, (English) Fasc. I—III @ /6/ each ..	1	2
Institutes of Parásara	0	6
Kátantra, (Sans.) Fasc. I—VI @ /12/ each	4	8
Kathá Sarit Ságara, (English) Fasc. I—XIV @ /12/ each	10	2
Kála Mádhava, (Sans.) Fasc. I—III, @ /6/ each	1	2
Kausítaki Bráhmanopanishads, Fasc. II	0	6
Kúrma Purána, (Sans.) Fasc. I—IV @ /6/ each	1	8
Lalita Vistara, (Sans.) Fasc. II—VI @ /6/ each	1	14
Ditto (English) Fasc. I—III @ /12/ each	2	4
Madana Párijáta, (Sans.) Fasc. I. @ /6/	0	6
Manutíká Sangraha, Fasc. I—II @ /6/each	0	12
Mimámsá Darsana, (Sans.) Fasc. II—XIX @ /6/ each	6	12
Márkandeya Purána, (Sans.) Fasc. IV—VII @ /6/ each	1	8
Nyáyavártikam, Fasc. I	0	6
Nrisimha Tápani, (Sans.) Fasc. I—III @ /6/ each	1	2
Nirukta, (Sans.) Vol I, Fasc. 1—6 ; Vol. II, Fasc. 1—6 ; Vol. III, Fasc. 1—6 ; Vol. IV, I—IV @ /6/ each	8	4
Nárada Pancharátra, (Sans.) Fasc. IV @ /6/ each	0	6
Nárada Smriti (Sans.) Fasc. I & II @ /6/ each	0	12
Ditto Darsana, (Sans) Fasc. III @ /6/ each	0	6
Nítisára, or, The Elements of Polity, By Kámandaki (Sans.) Fasc. II—V	1	8
Parisishtaparvan, (Sans.) Fasc. I—IV @ /6/ each	1	8
Pingala Chhandah Sútra, (Sans.) Fasc. II—III @ /6/ each ..	0	12
Prithiráj Rásau, (Hindi) Fasc. I—VI @ /6/ each	2	4
Ditto (English) Fasc. I	0	12
Páli Grammar, (English) Fasc. I and II @ /6/ each	0	12
Prákrita Lakshanam, (Sans.) Fasc. I	1	8

(Continued on the third page of cover.)

षष्ठ्याञ्चैव कृताहारः सप्तम्यां भानुमर्चयेत् ।
अष्टम्याञ्चैव भुञ्जीत एष एव विधिक्रमः ॥ ३ ।
अनेन वत्सरं पूर्णं विधिना योऽर्चयेद्रविम् ।
तस्यारोग्यं धनं धान्यमिह जन्मनि जायते ॥ ४ ।
परत्र च शुभं स्थानं यद्गत्वा न निवर्त्तते ।
सार्वभौमः पुरा राजा अनरण्यो महाबलः ॥ ५ ।
तेनायमर्चितो देवो व्रतेनानेन पार्थिव ।
यस्य तुष्टोऽभवद्देवः* प्रादादारोग्यमुत्तमम् ॥ ६ ।

भद्राश्व उवाच ।

किमसौ रोगवान्राजा येनारोग्यमवाप्तवान् ।
सार्व्वभौमस्य च कथं व्रह्मन्रोगस्य सम्भवः ॥ ७ ।

अगस्त्य उवाच ।

स राजा सार्व्वभौमोऽभूद्यशस्वी च सुरूपवान् ।
स कदाचिन्महाराज नृपश्रेष्ठो महाबलः ॥ ८ ।
गतवान्मानसं दिव्यं सरो देवगणान्वितम् ।
तत्रापश्यद्बृहत्पद्मं सरोमध्यगतं सितम् ॥ ९ ।
तत्र चाङ्गुष्ठमात्रन्तु स्थितं पुरुषसत्तमम् ।
रक्तवासोभिराच्छन्नं द्विभुजन्तिग्मतेजसम् ॥ १० ।
तं दृष्ट्वा सारथिम्प्राह पद्ममेतन्ममानय ।
इदन्तु शिरसा बिभ्रत्सर्व्वलोकस्य सन्निधौ ॥ ११ ।
श्लाघनीयो भविष्यामि तस्मादानय मा चिरम् ।

* 'वरं देव इति (ख) ।

एवमुक्तस्तदा तेन सारथिः प्रविवेश ह ॥ १२ ।
गृहीतुमुपचक्राम तत्पद्मं नृपसत्तम ।
स्पृष्टमात्रे ततः पद्मे हुङ्कारः समजायत ॥ १३ ।
तेन शब्देन वित्रस्तः स पपात ममार च ।
राजा च तत्क्षणादेव शब्देन समपद्यत ॥ १४ ।
कुष्ठी विगतवर्णश्च बलवीर्य्यविवर्ज्जितः ।
तथागतमथात्मानं दृष्ट्वा स पुरुषर्षभः ॥ १५ ।
तस्थौ तत्रैव शोकार्त्तः किमेतदिति चिन्तयन् ।
तस्य चिन्तयतो धीमानाजगाम महातपाः ॥ १६ ।
वसिष्ठो ब्रह्मपुत्रोऽथ स तं पप्रच्छ पार्थिवम् ।
कथन्ते राजशार्दूल इह देहस्य शासनम् ॥ १७ ।
इदानीं मे च किङ्कार्य्यं तन्ममाचक्ष्व पृच्छतः ।
एवमुक्तस्ततो राजा वसिष्ठेन महात्मना ॥ १८ ।
सर्व्वं पद्मस्य वृत्तान्तं कथयामास च प्रभुः ।
तं श्रुत्वा स मुनिस्तत्र साधु राजन्तथाब्रवीत् ॥ १९ ।
असाधुरथ चातिष्ठस्तस्मात्कुष्ठित्वमागतः ।
एवमुक्तस्तदा राजा वेपमानः कृताञ्जलिः ॥ २० ।
पप्रच्छ साध्वहं विप्र कथं वासाध्वहं मुने ।
कथं मे कुष्ठं सञ्जातमेतन्मे वक्तुमर्हसि ॥ २१ ।

वसिष्ठ उवाच ।

एतद्ब्रह्मोद्भवं नाम पद्मं त्रैलोक्यविश्रुतम् ।
दृष्टमात्रेण चानेन दृष्टाः स्युः सर्व्वदेवताः ॥ २२ ।

एतस्मिन्दृश्यते चैतत् षण्मासं क्वापि पार्थिव।
एतस्मिन्दृष्टमात्रे तु यो जलं विशते नरः॥ २३॥
सर्वपापविनिर्मुक्तः परं निर्वाणमर्हति।
ब्रह्मणः प्रागवस्थायां मूर्त्तिरप्सु व्यवस्थिता॥ २४॥
एतां दृष्ट्वा जले मग्नः संसाराद्धि प्रमुच्यते।
इमञ्च दृष्ट्वा ते सूतो जले मग्नो नरोत्तम॥ २५॥
प्रविष्टश्च पुनरिमं हन्तुमिच्छन्नराधिप।
प्राप्तवानसि दुर्बुद्धे कुष्ठित्वं पापपूरुष॥ २६॥
दृष्टमेतत्त्वया यस्मात्त्वं साध्विति ततः प्रभो।
मयोक्तो मोहमापन्नस्तेनासाधुरितीरितः॥ २७॥
ब्रह्मपुत्रो वदन्नेवं नृपमन्तर्हितोऽभवत्।
स तद्वचनमाकर्ण्य राजापि परमेश्वरम्॥ २८॥
अहन्यहनि चागच्छत्तं पुनर्दृष्टवानपि।
देवा अपि वदन्त्येते पद्मं काञ्चनमुत्तमम्॥ २९॥
मानसे ब्रह्मपद्मन्तु दृष्ट्वा चात्रगतं हरिम्।
प्राप्स्यामस्तत्परं ब्रह्म यद्गत्वा न पुनर्भवेत्॥ ३०॥
इदञ्च कारणं चान्यत्कुष्ठस्य शृणु पार्थिव।
आदित्यः पद्मगर्भेऽस्मिन्स्वयमेव व्यवस्थितः॥ ३१॥
तं दृष्ट्वा तत्त्वतो भावः परमात्मैष शाश्वतः।
धारयामि शिरस्येनं ततः ख्यातिर्भविष्यति॥ ३२॥
इतीमं भावमास्थाय सूतोऽयं प्रेषितस्त्वया।
तत्क्षणादेव स मृतः त्वञ्च कुष्ठित्वमागतः॥ ३३॥

तस्मात्त्वमपि राजेन्द्र व्रतमेतत्समाचर।
व्रतस्यास्य प्रभावेण कुष्ठरोगात्प्रमुच्यसे ॥ ३४ ।

इति वराहपुराणे आरोग्यव्रतं नाम द्विषष्टितमोऽध्यायः ।

त्रयःषष्टितमोऽध्यायः ।

अगस्त्य उवाच ।

अथापरं महाराज पुत्रप्राप्तिव्रतं शुभम् ।
कथयामि समासेन तन्मे निगदतः शृणु ॥ १ ।
मासे भाद्रपदे या तु कृष्णपक्षे नरेश्वर ।
अष्टम्यामुपवासेन पुत्रप्राप्तिव्रतं हि तत् ॥ २ ।
सप्तम्याञ्चैव सङ्कल्प्य अष्टम्यामर्च्चयेद्धरिम्* ।
देवक्युत्सङ्गगं विष्णुं मातृभिः परिवेष्टितम् ॥ ३ ।
प्रभाते विमलेऽष्टम्यामर्च्चयेत्प्रयतो हरिम् ।
प्राग्विधानेन गोविन्दमर्च्चयित्वा विधानतः ॥ ४ ।
ततो यवैः कृष्णतिलैः सघृतैर्होमयेद्दधि ।
ब्राह्मणान्भोजयेद्भक्त्या यथाशक्त्या सदक्षिणम् ॥ ५

---

* षष्ठ्याञ्चैव तु संकल्प्य सप्तम्यां पूजयेद्धरिमिति (क), (ग)।

ततः स्वयन्तु भुञ्जीत प्रथमं विल्वमुत्तमम्।
पश्चाद्यथेष्टं भुञ्जीत स्नेहैः सर्व्वरसैर्युतम् ॥ ६ ।
प्रतिमासमनेनैव विधिनोपोष्य मानवः।
कृष्णाष्टम्यां व्रतं कृत्वा अपुत्रः पुत्रवान्भवेत् ॥ ७ ।
श्रूयते च पुरा राजा शूरसेनः प्रतापवान् ।
अपुत्रः स तपस्तेपे पर्व्वते च हिमालये ॥ ८ ।
तस्यैवं कुर्व्वतो देवो व्रतमेतज्जगाद ह ।
सोऽप्येतत्कृतवान्राजा पुत्रञ्चैवोपलब्धवान् ॥ ९ ।
वसुदेवं महाभागमनेकव्रतयाजिनम् ।
तं लब्ध्वा सोऽपि राजर्षिः परं निर्व्वाणमाप्तवान् ॥ १० ।
एवं कृष्णाष्टमी राजन्मया ते परिकीर्त्तिता ।
संवत्सरान्ते दातव्यं गोयुग्मन्तु द्विजातये ॥ ११ ।
एतत्पुत्रव्रतं नाम मया ते परिकीर्त्तितम् ।
एतत्कृत्वा नरः पापैः सर्व्वैरेव प्रमुच्यते ॥ १२ ।

इति वराहपुराणे पुत्रप्राप्तिव्रतं नाम त्रयःषष्टितमोऽध्यायः।

———•———

चतुःषष्टितमोऽध्यायः ।

अगस्त्य उवाच ।

अथापरं प्रवक्ष्यामि शौर्य्यव्रतमनुत्तमम् ।
येन भीरोरपि महच्छौर्य्यं भवति तत्क्षणात् ॥ १ ॥
मासि चाश्वयुजे शुद्धां नवमीं समुपोषयेत् ।
सप्तम्यां कृतसङ्कल्पः स्थित्वाष्टम्यां निरोदनः ।
नवम्यां प्राशयेत्पिष्टं प्रथमं भक्तितो नृप ॥ २ ॥
ब्राह्मणान्भोजयेद्भक्त्या देवीञ्चैव तु पूजयेत् ।
दुर्गां देवीं महाभागां महामायां महाप्रभाम् ॥ ३ ॥
एवं संवत्सरं यावदुपोष्येति विधानतः ।
व्रतान्ते भोजयेद्धीमान्यथाशक्त्या* कुमारिकाः ॥ ४ ॥
हेमवस्त्रादिभिस्तासु भूषयित्वा तु शक्तितः ।
पश्चात्क्षमापयेत्तान्तु देवी मे प्रीयतामितिं† ॥ ५ ॥
एवं कृते भ्रष्टराज्यो लभेत्‡ राज्यं न संशयः ।
अविद्यो लभते विद्यां भीतः शौर्य्यञ्च विन्दति ॥ ६ ॥

इति वराहपुराणे शौर्य्यव्रतं नाम चतुःषष्टितमोऽध्यायः ।

---

* यथाशक्तीति साधु ।

† भूषयित्वा स्वशक्तित इति (ग) ।

‡ लभेतेति साधु ।

पञ्चषष्टितमोऽध्यायः ।

अगस्त्य उवाच ।

सार्व्वभौमव्रतञ्चान्यत्कथयामि समासतः ।
येन सम्यक्कृतेनाशु सार्व्वभौमो नृपो भवेत् ॥ १ ।
कार्त्तिकस्य तु मासस्य दशमी* शुक्लपक्षगा ।
तस्यां नक्ताशनो भूत्वा दिक्षु शुद्धबलिं हरेत् ॥ २ ।
विचित्रैः कुसुमैर्भक्त्या पूजयित्वा द्विजोत्तमान् ।
दिशान्तु प्रार्थनां कुर्य्यान्मन्त्रेणानेन सुव्रतः ॥ ३ ।
सर्व्वा भवत्यः सिध्यन्तु मम जन्मनि जन्मनि ।
एवमुक्त्वा बलिन्ताभ्यो दत्त्वा शुद्धेन चेतसा ॥ ४ ।
ततो रात्रौ स भुञ्जीत दध्यन्नन्तु सुसंस्कृतम् ।
पूर्व्वं पश्चाद्यथेष्टन्तु एवं संवत्सरन्नृप ॥ ५ ।
यः करोति नरो नित्यं तस्य दिग्विजयो भवेत् ।
एकादश्यां निराहारो नरः कुर्य्याद्यथाविधि ॥ ६ ।
मार्गशीर्षे शुक्लपक्षादारभ्याब्दं विचक्षणः ।
तद्व्रतं धनदस्येष्टं कृतं वित्तं प्रयच्छति ॥ ७ ।
एकादश्यां निराहारो यो भुङ्क्ते द्वादशीदिने ।
शुक्ले वाप्यथवा कृष्णे तद्व्रतं वैष्णवं महत् ॥ ८ ।
एवञ्चीर्णं सुघोराणि हन्ति पापानि पार्थिव ।

---

* अष्टमीति (ग) ।

त्रयोदश्यान्तु नक्तेन धर्म्मव्रतमथोच्यते ॥ ९ ।
शुक्लपक्षे फाल्गुनस्य तथारभ्य विचक्षणः ।
रौद्रव्रतं चतुर्द्दश्यां कृष्णपक्षे विशेषतः ॥ १० ।
माघमासात्तथारभ्य* पूर्णं संवत्सरं नृप ।
इदं व्रतन्तु पञ्चम्यां† शुक्लायां नक्तभोजनम् ।
पितृव्रतममायां स्यादिति राजन्तथेरितम् ॥ ११ ।
दश पञ्च च वर्षाणि य एवं कुरुते नृप ।
तिथिव्रतादिकं तस्य फलं स्यात्तत्प्रमाणतः‡ ॥ १२ ।
अश्वमेधसहस्राणि राजसूयशतानि च ।
यष्टानि तेन राजेन्द्र कल्पोक्तव्रतकारिणा ॥ १३ ।
एकमेव कृतं हन्ति व्रतं पापानि नित्यशः ॥ १४ ।
यः पुनः§ सर्व्वमेतद्धि कुर्य्यान्नरवरात्मजः ।
स शुद्धो विरजाँल्लोकानाप्नोति सकलान्नृप ॥ १५ ।

इति वराहपुराणे भगवच्छास्त्रे अगस्तिगीतासु सार्व्वभौमव्रतं नाम पञ्चषष्टितमोऽध्यायः ।

---

* माघमासादथारभ्येति (ग) ।

† पञ्चदश्यामिति (ग) ।

‡ (ग) पुस्तके ११श श्लोकस्य परार्द्धं १२श श्लोकस्य यथास्थाने न स्तः ।

§ यत्पुनरिति (ख) ।

षट्षष्टितमोऽध्यायः।

भद्राश्व उवाच।

आश्चर्यं यदि ते किञ्चिद्विदितं दृष्टमेव च*।
तन्मे कथय धर्म्मज्ञ परं कौतूहलं महत्॥ १॥

अगस्त्य उवाच।

आश्चर्य्यरूपो भगवानेष एव जनार्द्दनः।
तस्याश्चर्य्याणि दृष्टानि बहूनि विविधानि वै॥ २॥
श्वेतद्वीपगतः पूर्वं नारदः किल पार्थिव।
सोऽपश्यच्छङ्खचक्राब्जान्पुरुषांस्तिग्मतेजसः॥ ३॥
अयं विष्णुरयं विष्णुरेष विष्णुः सनातनः।
चिन्ताऽभूत्तस्य तान्दृष्ट्वा कोऽस्मिन्विष्णुरिति प्रभुः॥ ४॥
एवं चिन्तयतस्तस्य चिन्ता कृष्णं प्रति प्रभोः†।
आराधयामि च कथं शङ्खचक्रगदाधरम्॥ ५॥
येन वेद्मि परं देवं कृष्णं नारायणं प्रभुम्।
एवं सञ्चिन्त्य दध्यौ स तं देवं परमेश्वरम्॥ ६॥
दिव्यं वर्षसहस्रन्तु साग्रं ब्रह्मसुतस्तदा।
ध्यायतस्तस्य देवोऽसौ परितोषं जगाम ह॥ ७॥
उवाच स‡ प्रसन्नात्मा प्रत्यक्षत्वङ्गतः प्रभुः।

---

* वेति (ग)।

† कृष्णमिति प्रभो इति (ख); वभौ इति (ग)।

‡ उवाच चेति (ग)।

वरं ब्रह्मसुत ब्रूहि किन्ते दद्मि महामुने ॥ ८ ।

नारद उवाच ।

सहस्रमेकं वर्षाणां ध्यातस्त्वं भुवनेश्वर ।
त्वत्प्राप्तिर्येन तद्ब्रूहि यदि तुष्टोऽसि मेऽच्युत ॥ ९ ।

देवदेव उवाच ।

पौरुषं सूक्तमास्थाय ये यजन्ति* द्विजाश्च माम् ।
ते मां प्राप्स्यन्ति सततं संहिताध्ययनेन च ॥ १० ।
अलाभे वेदशास्त्राणां† पञ्चरात्रोदितेन हि ।
मार्गेण मां यजन्ते ये ते मां प्राप्स्यन्ति मानवाः ।
ब्राह्मणक्षत्रियविशां पञ्चरात्रं विधीयते ॥ ११ ।
शूद्रादीनान्तु मेऽ‡ क्षेत्रपदवीगमनं द्विज ।
मन्नाम विहितन्तेषां नान्यत्पूजादिकं चरेत् ॥ १२ ।
एवं मयोक्तं विप्रेन्द्र पुराकल्पे पुरातनम् ।
पञ्चरात्रं सहस्राणां यदि कश्चिद्ग्रहीष्यति ॥ १३ ।
कर्मक्षये च मां कश्चिद्यदि भक्तो भविष्यति ।
तस्य चेदं पञ्चरात्रं नित्यं हृदि वसिष्यति ॥ १४ ।
इतरे राजसैर्भावैस्तामसैश्च समावृताः ।
भविष्यन्ति द्विजश्रेष्ठ मच्छासनपराङ्मुखाः§ ॥ १५ ।

---

* यजन्ते इति साधु ।

† अलाभे देवशास्त्राणामिति (ख) ।

‡ मत्क्षेत्रमिति (ग) ।

§ मच्छासनपराङ्मुखा इति (ग) ।

कृतं त्रेता द्वापरञ्च युगानि त्रीणि नारद।
सत्त्वस्था मां समेष्यन्ति कलौ रजस्तमोऽधिकाः॥ १६॥
अन्यच्च ते वरं दद्मि शृणु नारद साम्प्रतम्।
यदिदं पञ्चरात्रं मे शास्त्रं परमदुर्लभम्।
तद्भवान्वेत्स्यति* सर्व्वं मत्प्रसादान्न संशयः॥ १७॥
वेदेन पञ्चरात्रेण भक्त्या यज्ञेन च द्विज।
प्राप्योऽहं नान्यथा वत्स वर्षकोट्ययुतैरपि॥ १८॥
एवमुक्त्वा स भगवान्नारदं परमेश्वरः।
जगामादर्शनं सद्यो नारदोऽपि दिवं ययौ॥ १९॥

इति वराहपुराणे भगवद्गीतासु नारदपुराणसूचनं नाम षट्षष्टितमोऽध्यायः।

सप्तषष्टितमोऽध्यायः।

भद्राश्व उवाच।

भगवन्सितकृष्णे द्वे ये ते जगति सत्तम।
स्त्रियौ बभूवतुः के द्वे सिता कृष्णा च का शुभा॥ १॥
कश्चासौ पुरुषो ब्रह्मन्पावकः सप्तधाऽभवत्।
कोऽसौ द्वादशधा विप्र द्विदेहः षट्शिराः प्रभुः॥ २॥

---

* वेत्स्यतीति साधु।

दम्पत्यञ्च द्विजश्रेष्ठ क्रतसूर्य्योदयादलम्।
कस्मादेतज्जगदिदं विततं द्विजसत्तम ॥ ३ ॥

अगस्त्य उवाच।

सितकृष्णे स्त्रियौ येऽ*ते ते भगिन्यौ प्रकीर्त्तिते।
सितासिता† द्विवर्णा च नारी रात्रिरुदाहृता ॥ ४ ॥
यः पुमान्सप्तधा जात एको भूत्वा नरेश्वर।
स समुद्रस्तु विज्ञेयः सप्त चैको व्यवस्थितः ॥ ५ ॥
योऽसौ द्वादशधा राजन्द्विदेहः षट्शिराः प्रभुः।
संवत्सरः स विज्ञेयः शरीरे द्वे गती स्मृते।
ऋतवः षट् च वक्राणि एष संवत्सरः स्मृतः ॥ ६ ॥
दम्पत्यं तदहोरात्रं सूर्य्याचन्द्रमसौ यतः।
ततो जगत्समुत्तस्थौ देवादस्माच्च सत्तम ॥ ७ ॥
स विष्णुः परमो देवो विज्ञेयो नृपसत्तम।
न च वेदक्रियाहीनः पश्यति‡ परमेश्वरम् ॥ ८ ॥

इति वराहपुराणे अगस्तिगीतासु विष्ण्वाख्यं नाम सप्तषष्टितमोऽध्यायः।

—o:o—

---

* ये एते इति साधु।

† सत्यासत्या इति (क), (ख)।

‡ पश्यतीति साधु।

अष्टषष्टितमोऽध्यायः ।

भद्राश्व उवाच ।

योऽसौ सर्व्वगतो देवः परमात्मा व्यवस्थितः ।*
चतुर्युगे त्वसौ कीदृग्विज्ञेयः परमेश्वरः ॥ १ ।
युगे युगे क आचारो वर्णानां भविता मुने ।
कथञ्च शुद्धिर्विप्राणामन्यस्त्रीसङ्करे मुने ॥ २ ।

अगस्त्य उवाच ।

कृते युगे मही देवैर्युज्यते वेदकर्म्मणा ।
यजद्भिश्च† सुरांस्त्रेता तद्वद्वैश्च सत्तम ॥ ३ ।
द्वापरे सत्त्वरजसोर्बहुले नृपसत्तम ।
यावद्धर्म्मसुतो राजा भविष्यति महामते ।
ततस्तमः प्रभविता कलिरूपो नरेश्वर ॥ ४ ।
तस्मिन् कलौ वर्त्तमाने स्वमार्गोच्चरविता द्विजाः ।
राजानो वैश्यशूद्राश्च प्रायशो हीनजातयः ॥ ५ ।
भविष्यन्ति नृपश्रेष्ठ सत्यशौचविवर्ज्जिताः ।
ततो विनश्यते लोको वर्णधर्म्मश्च नश्यति ॥ ६ ।

भद्राश्व उवाच ।

अगस्त्यागमनं कृत्वा ब्राह्मणः क्षत्रियोऽपि वा ।

---

* (ख) पुस्तकेऽतः परं चरणषट्कं नास्ति ।

† यजमानैरिति साधु ।

शूद्रोऽपि शुध्यते* केन किं वागम्यन्तु शस्यते† ॥ ७ ।

अगस्त्य उवाच ।

चतुर्गामी भवेद्विप्रस्त्रिगामी क्षत्रियः स्मृतः ।
द्विगामी तु भवेद्वैश्यः शूद्र एकगमः स्मृतः ॥ ८ ।
अगम्यां ब्राह्मणीं प्राहुः क्षत्रियस्य नरेश्वरः ।
क्षत्रिया चापि वैश्यस्य शूद्रस्य सा च पार्थिव ॥ ९ ।
अधमस्योत्तमा नारी अगम्या मनुरब्रवीत् ।
माता मातृष्वसा श्वश्रूर्भ्रातृपत्नी च पार्थिव ॥ १० ।
अधमस्योत्तमा नारी यत्नेन परिवर्ज्जयेत् ।
स्नुषां दुहितरञ्चैव मित्रपत्नीञ्च सर्व्वदा ।
जाया स्वमातृजा चैव अगम्याख्याः सुतस्त्रियः ॥ ११ ।
रजक्यादिषु चान्याश्च स्त्रियोऽगम्याः प्रकीर्त्तिताः ।
अगम्यागमनञ्चैतत्कृतं पापाय जायते ॥ १२ ।
वियोनिगमनाद्राशु ब्राह्मणाय भवत्यलम् ।
शेषस्याशुद्धिरेषैवं प्राणायामशतं भवेत् ॥ १३ ।
बहुनापि हि कालेन यत्पापं समुपार्ज्जितम् ।
वर्णसङ्करसङ्गत्या ब्राह्मणेन नरर्षभ ॥ १४ ।
दशप्रणवगायत्रीप्राणायामशतैस्त्रिभिः ।
मुच्यते ब्रह्महत्यायाः किम्पुनः शेषपातकैः ॥ १५ ।
अथवा पररूपं यो देवं ब्राह्मणपुङ्गवः ।

---

* अत्रात्मनेपदमार्षम् ।

† (ख), (ग), आर्षः वर्त्तमानप्रयोगश्च ।

वेत्ति ध्यानादिभिः पूजां न स पापैर्हि लिप्यते ॥ १६ ।
वेदाध्यायी पापशतैः कृतैरपि न लिप्यते ।
स्मरन्विष्णुं पठन्वेदं ददन्दानं यजन्हरिम् ॥ १७ ।
ब्राह्मणः शुद्ध एवास्ते विरुद्धमपि तारयेत् ।
एतत्ते सर्व्वमाख्यातं यत्पृष्टोऽहं त्वया नृप ॥ १८ ।
मन्वादिभिर्विस्तरशः कथितं यच्च पार्थिव* ।
समासतस्तच्च मया कथितं नृपसत्तम ॥ १९ ।

इति वराहपुराणे प्रागितिहासे अष्टषष्टितमोऽध्यायः ।

ऊनसप्ततितमोऽध्यायः ।

भद्राश्व उवाच ।

भगवंस्त्वच्छरीरे तु यद्वृत्तं द्विजसत्तम ।
चिरजीवी भवांस्तन्मे वक्तुमर्हसि सत्तम ॥ १ ।

अगस्त्य उवाच ।

मच्छरीरमिदं राजन् बहुकौतूहलान्वितम् ।
अनेककल्पसंस्थायि वेदविद्याविशोधितम् ॥ २ ।
अटन्नहं महीं सर्वां गतवानस्मि पार्थिव ।

---

* (ग) पुस्तके मन्वादिभिर्विस्तरशः कथितं ते नृपोत्तम इत्येतदर्द्धनाधिकमस्ति ।

इलावृतं महावर्षं मेरोः पार्श्वे व्यवस्थितम् ॥ ३ ।
तत्र रम्यं सरो दृष्टं तस्य तीरे महाकुटी ।
तत्रोपवासशिथिलं दृष्टवानस्मि तापसम् ॥ ४ ।
अस्थिचर्म्मावशेषन्तु चीरवल्कलधारिणम् ।
तं दृष्ट्वाहं नृपश्रेष्ठ क एषस्तापसोत्तमः ॥ ५ ।
विश्वस्य प्रतिपत्त्यर्थं मयोक्तः स द्विजोत्तमः ।
ब्रह्मन्मे दीयतां किञ्चिदागतोऽहं तवान्तिके ।
इति मां स मुनिः प्राह स्वागतन्ते द्विजोत्तम ॥ ६ ।
स्थीयतां स्थीयतां ब्रह्मन्नातिथ्यं करवाणि ते ।
एतच्छ्रुत्वा वचस्तस्य प्रविष्टोऽहं कुटीं तु ताम् ॥ ७ ।
तावत्पश्याम्यहं विप्रं ज्वलन्तमिव तेजसा ।
भूमौ स्थितन्तु मां दृष्ट्वा हुङ्कारमकरोद्द्विजः ॥ ८ ।
तद्धुङ्काराच्च पातालं भित्त्वा पञ्च हि कन्यकाः ।
निर्ययुः काञ्चनं पीठमेका तासान्तु गृह्य* वै ॥ ९ ।
सा मां प्रादात्तदा कन्या सलिलं करसंस्थितम् ।
गृहीत्वान्या तु मे पादौ क्षालितुञ्चोपचक्रमे ॥ १० ।
अन्ये द्वे व्यजनं गृह्य* मत्पक्षाभ्यां व्यवस्थिते ।
ततो हुङ्कारमकरोत्पुनरेव महातपाः ॥ ११ ।
तच्छब्दानन्तरं हैमद्रोणीं योजनविस्तृताम् ।
गृह्याजगाम अकरोत्प्लावं सरसि पार्थिव ॥ १२ ।
तस्यान्तु कन्याः शतशो हैमकुम्भकराः शुभाः ।

---

* गृहीत्वेति साधु ।

आययुस्ता अथोद्दृष्टा स मुनिः प्राह मां नृप ॥ १३ ।
स्नानार्थं कल्पितं ब्रह्मन्निदं ते सर्व्वमेव तु ।
द्रोणीं प्रविश्य चेमां त्वं स्नातुमर्हसि सत्तम ॥ १४ ।
ततोऽहं तस्य वचनात्तस्यां द्रोण्यां नराधिप ।
विशामि ताव*त्सरसि सा द्रोणी प्रत्यमज्जत ॥ १५ ।
द्रोण्यां जले निमग्नोऽहं तमृषिं तच्च वै पुरम् ।
तावन्मेरुगिरेर्मूर्द्ध्नि पश्याम्यात्मानमात्मना ॥ १६ ।
समुद्रान् सप्त पश्यामि तथैव कुलपर्व्वतान् ।
सप्तद्वीपवतीं पृथ्वीं दृष्टवानस्मि पार्थिव ॥ १७ ।
अद्यापि तं लोकवरं ध्यायन्तिष्ठामि सुव्रत ।
कदा प्राप्स्येऽथ तं लोकमिति चिन्तापरोऽभवम् ॥ १८ ।
एवं ते कौतुकं राजन् कथितं परमेष्ठिनः ।
यद्वृत्तं मम देहे तु किमन्यच्छ्रोतुमिच्छसि ॥ १९ ।

इति वराहपुराणे नारायणाश्चर्य्यकथने ऊनसप्ततितमोऽध्यायः ।

सप्ततितमोऽध्यायः ।

भद्राश्व उवाच ।

भगवन् किं कृतं लोकं त्वया तमनुपश्यता ।
व्रतं तपो वा धर्म्मो वा प्राप्त्यर्थं तस्य वै मुने ॥ १ ।

---

* यावदिति (ग) ।

अगस्त्य उवाच ।

अनाराध्य हरिं भक्त्या न लोकान् कामयेद्बुधः* ।
आराधिते हरौ लोकाः सर्व्वे करतलेऽभवन्† ॥ २ ।
एवं सञ्चिन्त्य राजेन्द्र मया विष्णुः सनातनः ।
आराधितो वर्षशतं क्रतुभिर्भूरिदक्षिणैः ॥ ३ ।
ततः कदाचिद्बहुना कालेन नृपनन्दन ।
यजतो मम देवेशं यज्ञमूर्त्तिं जनार्द्दनम् ॥ ४ ।
आहूता आगता देवाः सममेव सवासवाः ।
स्वे स्वे स्थाने स्थिता आसन्यावद्देवाः सवासवाः ॥ ५ ।
तावत् तत्रैव भगवानागतो वृषभध्वजः ।
महादेवो विरूपाक्षस्त्र्यम्बको नीललोहितः ॥ ६ ।
सोऽपि रौद्रे स्थितः स्थाने बभूव परमेश्वरः ।
तान्सर्व्वानागतान्दृष्ट्वा देवानृषिमहोरगान् ॥ ७ ।
सनत्कुमारो भगवानाजगामाब्जसम्भवः ।
त्रसरेणुप्रमाणेन विमाने सूर्य्यसन्निभे ॥
अवस्थितो महायोगी भूतभव्यभविष्यवित् ।
आगम्य शिरसा रुद्रं स ववन्दे महामुनिः ॥ ८ । ९ ।
तानहं संस्थितान्देवान्नारदादीनृषींस्तथा ।
सनत्कुमाररुद्रौ च दृष्ट्वाहमिदमब्रवम् ॥ १० ।

---

* लोकान् कान् कामयेदबुध इति (ग) ।

† भवेयुरित्यर्थे अभवन्निति आर्षम् ।

क एषां भवतां याज्यो वरिष्ठश्च नृपोत्तम।
एवमुक्ते तदोवाच रुद्रो मां सुरसन्निधौ॥ ११।

रुद्र उवाच।

शृण्वन्तु विबुधाः सर्व्वे तथा देवर्षयोऽमलाः।
ब्रह्मर्षयश्च विख्याताः सर्व्वे शृण्वन्तु मे वचः।
त्वञ्चागस्त्य महाबुद्धे शृणु मे गदतो वचः* ॥ १२।
यो यज्ञैरिज्यते देवो यस्मात्सर्वमिदं जगत्।
उत्पन्नं सर्वदा यस्मिँल्लीनं भवति सामरम्।
नारायणः परो देवः सर्वरूपो जनार्दनः॥ १३।१४।
त्रिधात्मानं स भगवान्ससर्ज परमेश्वरः।
रजस्तमोभ्यां युक्तोऽभूत् रजःसत्त्वाधिकं विभुः॥ १५।
ससर्ज नाभिकमलाद्ब्रह्माणं कमलासनम्।
रजसा तमसा युक्तः सोऽपि मामसृजद्विभुः॥ १६।
यत्सत्त्वं स हरिर्देवो यो हरिस्तत्परं पदम्।
ये सत्त्वरजसी सोऽपि ब्रह्मा कमलसम्भवः॥ १७।
यो ब्रह्मा सैव देवस्तु यो देवः स चतुर्मुखः।
यद्रजस्तमसोपेतं सोऽहं नास्त्यत्र संशयः॥ १८।
सत्त्वं रजस्तमश्चैव त्रितयं चैतदुच्यते।
सत्त्वेन मुच्यते जन्तुः सत्त्वं नारायणात्मकम्॥ १९।
रजसा सत्त्वयुक्तेन भवेत्सृष्टी रजोऽधिका।

---

* एतदर्द्धं (ख) पुस्तके नास्ति।

आराध्य स्वर्गतिं यान्ति क्रमान्मुक्ता व्रजन्ति हि।
एवं मुक्तिपदे व्याप्ते* सर्व्वलोकैस्तथैव च।
मुक्तिभाजस्ततो देवास्तं दध्युः प्रयता हरिम्।
सोऽपि सर्व्वगतत्वाच्च प्रादुर्भूतः सनातनः॥ ३०।३१।
उवाच ब्रूत किङ्कार्य्यं सर्व्वे योगिवराः सुराः।
ते तं प्रणम्य देवेशमूचुश्च परमेश्वरम्॥ ३२।
देवदेव जनः सर्व्वो मुक्तिमार्गे व्यवस्थितः†।
कथं सृष्टिश्च भविता नरकेषु च को वसेत्॥ ३३।
एवमुक्तस्ततो देवैस्तानुवाच जनार्द्दनः।
युगानि त्रीणि बहवो मामुपेष्यन्ति मानवाः॥ ३४।
अन्त्ये युगे प्रविरला भविष्यन्ति मदाश्रयाः।
एष मोहं सृजाम्याशु यो जनं मोहयिष्यति॥ ३५।
त्वञ्च रुद्र महाबाहो मोहशास्त्राणि कारय।
अल्पायासं दर्शयित्वा मोहयाशु महेश्वरः॥ ३६।
एवमुक्त्वा तदा तेन देवेन परमेष्ठिना।
आत्मा तु गोपितः सद्यः प्रकाशोऽहङ्कृतस्तदा॥ ३७।
तस्मादारभ्य कालात्तु मत्प्रणीतेषु सत्तम‡।
शास्त्रेष्वभिरतो लोको बाहुल्येन भवेदतः॥ ३८।

---

* एवं मुक्तिपदे प्राप्ते इति (ख)।

† देवा ऋषिगणाः सर्व्वे मुक्तिमार्गे व्यवस्थिता इति (ख)।

‡ (ग) पुस्तकेऽतः परमष्टौ पादा न सन्ति।

एकसप्ततितमोऽध्यायः ।

अगस्त्य उवाच ।

एवमुक्तास्ततो देवा ऋषयश्च पिनाकिना ।
अहञ्च नृपते तस्य देवस्य प्रणतोऽभवम् ॥ १ ।
प्रणम्य शिरसा देवं यावत्पश्यामि हे नृप ।
तावत्तस्यैव रुद्रस्य देहस्थं कमलासनम् ॥ २ ।
नारायणञ्च हृदये त्रसरेणुसुसूक्ष्मकम् ।
ज्वलद्भास्करवर्णाभं पश्यामि भवदेहतः* ॥ ३ ।
तं दृष्ट्वा विस्मिताः सर्व्वे याजका ऋषयोऽभवन् ।
जयशब्दरवांश्चक्रुः सामऋग्यजुषां स्वनम् ॥ ४ ।
कृत्वोचुस्तं तदा देवं किमिदं परमेश्वरम् ।
एकस्यामेव मूर्त्तौ ते लक्ष्यन्ते त्रिमूर्त्तयः ॥ ५ ।

रुद्र उवाच ।

यज्ञेऽस्मिन्यद्धुतं हव्यं मामुद्दिश्य महर्षयः ।
ते त्रयोऽपि वयं भागं गृह्णीमः कविसत्तमाः ॥ ६ ।
नास्माकं विविधो भावो वर्त्तते मुनिसत्तमाः ।
सम्यग्दृशः प्रपश्यन्ति विपरीतेष्वनेकशः ॥ ७ ।
एवमुक्ते तु रुद्रेण सर्व्वे ते मुनयो नृप ।
पप्रच्छुः शङ्करं देवं मोहशास्त्रप्रयोजनम् ॥ ८ ।

---

* भवदेहतत्र इति (ख) ।

वेदानुवर्त्तिनं मार्गं देवं नारायणन्तथा ।
एकीभावञ्च पश्यन्तोमुक्ताश्चैव भवन्ति ते ॥ ३९ ।
मां विष्णोर्व्यतिरिक्तं ये ब्रह्माणञ्च द्विजोत्तम ।
भजन्ते पापकर्म्माणस्ते* यान्ति नरकं नराः ॥ ४० ।
ये वेदमार्गनिर्मुक्तास्तेषां मोहार्थमेव च ।
नयसिद्धान्तसंज्ञाभिर्मया शास्त्रन्तु दर्शितम् ॥ ४१ ।
पाशोऽयं पशुभावस्तु स यदा पतितो भवेत् ।
तदा पाशुपतं शास्त्रं जायते† वेदसंज्ञितम् ॥ ४२ ।
वेदमूर्त्तिरहं विप्र नान्यशास्त्रार्थवादिभिः ।
ज्ञायते मत्स्वरूपन्तु मुक्त्वा देवमनादिवत् ॥ ४३ ।
वेदवेद्योऽस्मि विप्रर्षे ब्राह्मणैश्च विशेषतः ।
युगानि त्रीण्यहं विप्र ब्रह्मा विष्णुस्तथैव च ॥ ४४ ।
त्रयोऽपि सत्त्वादिगुणास्त्रयो वेदास्त्रयोऽग्नयः ।
त्रयो लोकास्त्रयः सन्ध्यास्त्रयो वर्णास्तथैव च‡ ॥ ४५
सवनानि तु तावन्ति त्रिधा बद्धमिदं जगत् ।
य एवं वेत्ति विप्रर्षे परं नारायणं तथा ॥ ४६ ।
अपरं पद्मयोनिन्तु ब्रह्माणं त्वपरन्तु माम् ।
गुणतो मुख्यतस्त्वेक एवाहं मोह इत्युभे ॥ ४७ ।

इति वराहपुराणे रुद्रगीतासु सप्ततितमोऽध्यायः ।

---

* भजन्ते मोहशास्त्रं ये इति (ग) ।

† ज्ञायतेत्यर्थः 'जायते' इति चार्षम् ।

‡ एष श्लोकः (ग) पुस्तके नास्ति ।

एकसप्ततितमोऽध्यायः ।

अगस्त्य उवाच ।

एवमुक्तास्ततो देवा ऋषयश्च पिनाकिना ।
अहञ्च नृपते तस्य देवस्य प्रणतोऽभवम् ॥ १ ॥
प्रणम्य शिरसा देवं यावत्पश्यामि हे नृप ।
तावत्तस्यैव रुद्रस्य देहस्थं कमलासनम् ॥ २ ॥
नारायणञ्च हृदये त्रसरेणुसुसूक्ष्मकम् ।
ज्वलद्भास्करवर्णाभं पश्यामि भवदेहतः* ॥ ३ ॥
तं दृष्ट्वा विस्मिताः सर्व्वे याजका ऋषयोऽभवन् ।
जयशब्दरवांश्चक्रुः सामऋग्यजुषां स्वनम् ॥ ४ ॥
कृत्वोचुस्तं तदा देवं किमिदं परमेश्वरम् ।
एकस्यामेव मूर्त्तौ ते लक्ष्यन्ते चित्तमूर्त्तयः ॥ ५ ॥

रुद्र उवाच ।

यज्ञेऽस्मिन्यद्धुतं हव्यं मामुद्दिश्य महर्षयः ।
ते त्रयोऽपि वयं भागं गृह्णीमः कविसत्तमाः ॥ ६
नास्माकं विविधो भावो वर्त्तते मुनिसत्तमाः ।
सम्यग्दृशः प्रपश्यन्ति विपरीतेष्वनेकशः ॥ ७ ॥
एवमुक्ते तु रुद्रेण सर्व्वे ते मुनयो नृप ।
पप्रच्छुः शङ्करं देवं मोहशास्त्रप्रयोजनम् ॥ ८ ॥

---

* भवदेहतव इति (ख) ।

ऋषय ऊचुः ।

मोहनार्थन्तु लोकानां त्वया शास्त्रं पृथक्कृतम् ।
तत्त्वया हेतुना केन कृतं देव वदस्व नः ॥ ९ ।

रुद्र उवाच ।

अस्त्येके भारते वर्षे वनं दण्डकसंज्ञितम् ।
तत्र तीव्रन्तपो घोरं गौतमो नाम वै द्विजः ॥ १० ।
चकार तस्य ब्रह्मा तु परितोषं गतः प्रभुः ।
उवाच तं मुनिं ब्रह्मा वरं ब्रूहि तपोधन ॥ ११ ।
एवमुक्तस्तदा तेन ब्रह्मणा लोककर्त्तृणा ।
उवाच शस्यपंक्तिर्मे धान्यानां देहि सङ्गता ।
एवमुक्तो ददौ तस्य तमेवार्थं पितामहः ॥ १२ ।
लब्ध्वा तु तं वरं विप्रः शतशृङ्गे महाश्रमम् ।
चकार तस्योषसि च पाकान्ते शालयो द्विजः ॥
लूयन्ते तेन मुनिना मध्याह्ने पच्यते* तथा ।
सर्व्वातिथ्यमसौ विप्रो ब्राह्मणेभ्यो ददात्यलम् ॥ १३
कस्यचित्त्वथ कालस्य महती द्वादशाब्दिका ।
अनावृष्टिर्द्विजवर अभवल्लोमहर्षिणी ॥ १५ ।
तां दृष्ट्वा मुनयः सर्व्वे अनावृष्टिं वनेचराः ।
क्षुधया पीड्यमानाश्च प्रययुर्गौतमं तदा ॥ १६ ।
अथ तानागतान्दृष्ट्वा गौतमः शिरसा नतः ।

---

* पच्यन्ते इति युक्तम् ।

उवाच स्थीयतां मह्यं गृहे मुनिवरात्मजाः॥ १७।
एवमुक्तास्तु ते तेन तस्थुर्विविधभोजनम्।
भुञ्जमानामनावृष्टिर्यावत्सा निवृत्ताऽभवत्॥ १८।
निवृत्तायाञ्च ते तस्यामनावृष्ट्यान्तु ते द्विजाः।
तीर्थयात्रानिमित्तन्तु प्रयातमनसोऽभवन्॥ १९।
तत्र शाण्डिल्यनामानं* तापसं मुनिसत्तमम्।
प्रत्युवाचेति सञ्चिन्त्य मारीचः परमो मुनिः॥ २०।

मारीच उवाच।

शाण्डिल्य शोभनं वच्मि पिता ते गौतमो मुनिः।
तमनुक्त्वा न गच्छामस्तपश्चर्तुं तपोवनम्॥ २१।
एवमुक्तेऽथ जहसुः सर्व्वे ते मुनयस्तथा।
किमस्माभिः स्वको देहो विक्रीतोऽस्यान्नभक्षणात्॥ २२।
एवमुक्त्वा पुनश्चोचुः सोपाधिं गमनम्प्रति।
कृत्वा मायामयीङ्गान्तु तच्छालायां व्यसर्ज्जयन्॥ २३।
तां चरन्तीं ततो दृष्ट्वा शालायां गौतमो मुनिः।
गृहीत्वा सलिलं पाणौ प्राणिरुद्धेत्यभाषत।
ततो मायामयी सा गौः पपात जलविन्दुवत्॥ २४।
निहतां तां ततो दृष्ट्वा मुनिं जिगमिषूंस्तथा।
उवाच गौतमो धीमांस्तान्मुनीन्प्रणतः स्थितः॥ २५।

---

* शाण्डिल्यमासीनं इति (क)।

किमर्थं गम्यते विप्राः साधु शंसत मा चिरम् ।
मां विहाय सदा भक्तं प्रणतञ्च विशेषतः ॥ २६ ।

ऋषय ऊचुः ।

गोवध्येयमिह ब्रह्मन्यावत्तव शरीरगा ।
तावदत्र न भुञ्जामो भवतोऽन्नं महामुने ॥ २७ ।
एवमुक्तो गौतमस्तु तान्मुनीन्प्राह धर्म्मवित् ।
प्रायश्चित्तं गोवध्याया* दीयतां मे तपोधनाः ॥ २८

ऋषय ऊचुः ।

इयं गौरमृता ब्रह्मन्मूर्च्छितेव व्यवस्थिता ।
गङ्गाजलप्लुता चेयमुत्थास्यति न संशयः ॥ २९ ।
प्रायश्चित्तं मृतायाः स्यादमृतायाः कृतन्त्विदम् ।
व्रतं वा मा कृथाः कोपमित्युक्त्वा प्रययुस्तु ते ॥ ३० ।
गतैस्तैर्गौतमो धीमान् हिमवन्तं महागिरिम् ।
मामाराधयिषुः प्रायात्तप्तुञ्चाशु महातपः ॥ ३१ ।
शतमेकन्तु वर्षाणामहमाराधितोऽभवम् ।
तुष्टेन च मया प्रोक्तो वरं वरय सुव्रत ॥ ३२ ।
सोऽब्रवीन्मां जटासंस्थां देहि गङ्गां तपस्विनीम् ।
मया सार्द्धं प्रयात्वेषा पुण्या भागीरथी नदी ॥ ३३ ।
एवमुक्ते जटाखण्डमेकं स प्रददौ शिवः ।

---

* वध्येति पाठे, हत्येति साधु ।

तां गृह्य* गतवान् सोऽपि यत्रास्ते सा तु गौर्मृता ॥ ३४ ।
तज्जलप्लाविता सा गौर्गता चोत्थाय भामिनी ।
नदी च महती जाता पुण्यतोया शुचिप्रदा ॥ ३५ ।
तं दृष्ट्वा महदाश्चर्य्यं तत्र सप्तर्षयोऽमलाः ।
आजग्मुश्च विमानस्थाः साधु साध्विति वादिनः ॥ ३६ ।
साधु गौतम साधूनां कोऽस्ति वा सदृशं तव ।
यदेवं जाह्नवी देवी दण्डके चावतारिता ॥ ३७ ।
एवमुक्तस्तदा तैस्तु गौतमः किमिदं त्विति ।
गोवध्याकारणं मह्यं† तावत्पश्यति गौतमः ॥ ३८ ।
ऋषीणां मायया सर्व्वमिदं जातं विचिन्त्य वै ।
शशाप ताञ्जटाभस्ममिथ्याव्रतधरांस्तथा ।
भविष्यथ त्रयीबाह्या वेदकर्म्मबहिष्कृताः ॥ ३९ ।
तच्छ्रुत्वा क्रूरवचनं गौतमस्य महामुनेः ।
ऊचुः सप्तर्षयो मैवं सर्वकालं द्विजोत्तम ॥ ४० ।
एवन्तु‡ किन्तु ते वाक्यं मोघं नास्त्यत्र संशयः ।
यदि नाम कलौ सर्व्वे भविष्यन्ति द्विजोत्तमाः ॥ ४१ ।
उपकारिणि एते हि अपकर्त्तार एव तु ।

---

* गृहीत्वेति साधु ।

† मम इत्यस्य स्थाने मह्यमिति आर्षम् ।

‡ भवत्विति (ग) ।

इत्थम्भूता अपि कलौ भक्तिभाजो भवन्तु ते* ॥ ४२ ॥
त्वद्वाक्यवह्निनिर्दग्धाः सदा कलियुगे द्विजाः ।
भविष्यन्ति क्रियाहीना वेदकर्म्मबहिष्कृताः ॥ ४३ ॥
अस्याश्च गौणं नामेह नदी गोदावरीति च ।
एतां प्राप्य कलौ ब्रह्मन् गान्ददन्ति† जनाश्च ये ।
यथाशक्त्या‡ तु दानानि मोदन्ते त्रिदशैः सह ॥ ४४ ॥
सिंहस्थे च गुरौ तत्र यो गच्छति समाहितः ।
स्नात्वा च विधिना तत्र पितॄंस्तर्पयते तथा ॥ ४५ ॥
स्वर्गं गच्छन्ति पितरो निरये पतिता अपि ।
स्वर्गस्थाः पितरस्तस्य मुक्तिभाजो न संशयः ।
त्वं ख्यातिं महतीं प्राप्य मुक्तिं यास्यसि शाश्वतीम् ॥ ४६ ॥
एवमुक्त्वाथ मुनयो ययुः कैलासपर्व्वतम् ।
यत्राहसुमया सार्द्धं सदा तिष्ठामि सत्तमाः ॥ ४७ ॥
ऊचुर्मान्ति च मुनयो भवितारो द्विजोत्तमाः ।
कलौ त्वद्रूपिणः सर्व्वे जटामुकुटधारिणः ॥ ४८ ॥
स्वेच्छया प्रेतवेषाश्च मिथ्यालिङ्गधराः प्रभो ।
तेषामनुग्रहार्थाय किञ्चिच्छास्त्रं प्रदीयताम् ।
ये चास्मद्वंशजाः सर्व्वे वर्त्तेयुः§ कलिपीड़िताः ॥ ॥ ४९ ॥

---

* एष श्लोकः (ख) पुस्तके नास्ति ।

† ददन्तीति आर्षं, ददतीति साधु ।

‡ यथाशक्तीति साधु ।

§ वर्त्तेयुः इति आर्षं, वर्त्तेरन्निति साधु ।

एवमभ्यर्थितस्तैस्तु पुराहं द्विजसत्तम।
वेदक्रियासमायुक्तां कृतवानस्मि संहिताम् ॥ ५०॥
निःश्वासाख्यां ततस्तस्यां लीना बाभ्रव्यशाण्डिलाः।
अल्पापराधं श्रुत्वैव गतास्ते दाम्भिकाभवन्* ॥ ५१॥
मयैव मोहितास्ते तु भविष्यज्जानता† द्विजाः।
लौल्यार्थिनः स्वशास्त्राणि करिष्यन्ति कलौ नराः ॥ ५२॥
निश्वाससंहितायां हि लक्षमात्रं प्रमाणतः।
सैव पाशुपती दीक्षा योगः पशुपतेस्तथा ॥ ५३॥
एतस्माद्वेदमार्गाद्धि यदन्यदिह जायते।
तत्क्षुद्रकर्म्म विज्ञेयं रौद्रं शौचविवर्ज्जितम् ॥ ५४॥
ये रुद्रमुपजीवन्ति कलौ वैदान्तिका नराः।
लौल्यार्थिनः स्वशास्त्राणि करिष्यन्ति कलौ नराः।
उच्छुष्मरुद्रास्ते ज्ञेया नाहन्तेषु व्यवस्थितः ॥ ५५॥
भैरवेण स्वरूपेण देवकार्य्ये यदा पुरा।
नर्त्तितन्तु मया सोऽयं‡ सम्बन्धः क्रूरकर्म्मणाम् ॥ ५६॥
क्षयं निनीषता दैत्यान्सोऽट्टहासो मया कृतः।
यः पुरा तत्र ये मह्यां§ पतिता अश्रुबिन्दवः।

---

* दाम्भिका अभवन्निति साधु।

† भविष्यं जानता इति (ग)।

‡ मया सोऽपि इति (ख)।

§ मर्त्त्ये इति (ख), मह्यांतिवि (ग) तदर्थन्तु मम।

असंख्यातास्तु ते रौद्रा भवितारो महीतले ॥ ५७ ।
उच्छुष्मनिरता रौद्राः सुरामांसप्रियाः सदा* ।
स्त्रीलोलाः पापकर्म्माणः सम्भूता भूतलेषु ते ।
तेषां गौतमशापाद्धि भविष्यन्त्यन्वये द्विजाः ॥ ५८ ।
तेषां मच्छासनरताः सदाचाराश्च ये द्विजाः ।
स्वर्गञ्चैवापवर्गञ्च इत्युक्त्वा संश्रयात्पुरा ।
वेदान्तिकाऽधो यास्यन्ति मम सन्ततिदूषकाः ॥ ५९ ।
प्राग्गौतमोऽग्निना दग्धाः पुनर्मद्वचनाद्द्विजाः ।
नरकन्तु गमिष्यन्ति नात्र कार्य्या विचारणा ॥ ६० ।

रुद्र† उवाच ।

एवं मया ब्रह्मसुताः प्रोक्ता जग्मुर्यथागतम् ।
गौतमोऽपि स्वकं गेहं जगामाशु परन्तपाः ॥ ६१ ।
एतद्वः कथितं विप्रा मया धर्म्मस्य लक्षणम् ।
एतस्माद्विपरीतो यः स पाषण्डरतोऽभवत् ॥ ६२ ।

इति वराहपुराणे रुद्रगीतासु एकसप्ततितमोऽध्यायः ।

---

* भवितारो महीतले इति (ग) ।

† रुद्रस्य वचने 'रुद्र उवाच' इति पुनरुक्तः पाठः ।

द्विसप्ततितमोऽध्यायः ।

वराह उवाच ।

सर्व्वज्ञं सर्व्वकर्त्तारं भवं रुद्रं पुरातनम् ।
प्रणम्य प्रयतोऽगस्त्यः प्रपच्छ परमेश्वरम् ॥ १ ।

अगस्त्य उवाच ।

भवान् ब्रह्मा च विष्णुश्च त्रयमेतत्त्रयी स्मृता ।
दीपोऽग्निर्दीपसंयोगैः सर्व्वशास्त्रेषु सर्व्वगः ॥ २ ।
कस्मिन् प्रधानो भगवान् काले कस्मिन्नधच्चजः ।
ब्रह्मा वा एतदाचक्ष्व मम देव त्रिलोचन ॥ ३ ।

रुद्र उवाच ।

विष्णुरेव परं ब्रह्म त्रिभेदमिह पठ्यते ।
वेदसिद्धान्तमार्गेषु तन्न जानन्ति मोहिताः ॥ ४ ।
विश प्रवेशने धातुस्तत्र स्नुप्रत्ययादनु ।
विष्णुर्यः सर्व्वदेवेषु परमात्मा सनातनः ॥ ५ ।
योऽयं विष्णुस्तु दशधा कीर्त्त्यते चैकधा द्विजाः ।
स आदित्यो महाभाग योगैश्वर्य्यसमन्वितः ॥ ६ ।
यो देवकार्य्याणि सदा कुरुते परमेश्वरः ।
मनुष्यभावमाश्रित्य स मां स्तौति युगे युगे ॥ ७ ।
लोकमार्गप्रवृत्त्यर्थं देवकार्य्यार्थसिद्धये ।
अहञ्च तौ सदा स्तौमि श्वेतद्वीपे कृते युगे ॥ ८ ।
सृष्टिकाले चतुर्वक्त्रं स्तौमि कालो भवामि च ।

ब्रह्मा देवासुराः स्तौति मां सदा तु कृते युगे* ॥ ९ ॥
लिङ्गमूर्त्तिञ्च मां देवा यजन्ते भोगकाङ्क्षिणः ।
सहस्रशीर्षकं देवं मनसा तु मुमुक्षवः ।
यजन्ते यं स विश्वात्मा देवो नारायणः स्वयम् ॥ १० ॥
ब्रह्मयज्ञेन ये नित्यं यजन्ते द्विजसत्तम ।
ते ब्रह्माणं प्रीणयन्ति वेदो ब्रह्मा प्रकीर्त्तितः ॥ ११ ॥
नारायणः शिवो विष्णुः शङ्करः पुरुषोत्तमः ।
एतेषु नामभिर्ब्रह्म परं प्रोक्तं सनातनम् ॥ १२ ॥
कार्म्मवेदयुजां विप्र ब्रह्मा विष्णुर्महेश्वरः ।
वयं त्रयोऽपि मन्त्राद्या† नात्र कार्य्या विचारणा ॥ १३ ॥
अहं विष्णुस्तथा वेदा ब्रह्मकर्म्माणि चाप्युत ।
एतत्त्रयन्त्वेकमेव न पृथग्भावयेत्सुधीः ॥ १४ ॥
योऽन्यथा भावयेदेतत्पक्षपातेन सुव्रत ।
स याति नरकं घोरं तेनैवं पापपूरुषः ॥ १५ ॥
अहं ब्रह्मा च विष्णुश्च ऋग्यजुः साम एव च ।
तेनास्मिन् भेदमप्यस्ति सर्व्वेषां द्विजसत्तमाः ॥ १६ ॥

इति वराहपुराणे प्रकृतिपुरुषनिर्णये द्विसप्ततितमोऽध्यायः ।

---

* एष श्लोकः (ग) पुस्तके नास्ति ।

† मन्त्राद्यामिति (ख) ।

त्रयःसप्ततितमोऽध्यायः ।

रुद्र उवाच ।

शृणु चान्यद्द्विजश्रेष्ठ कौतूहलसमन्वितम् ।
अपूर्वभूतं सलिले मग्नेन मुनिपुङ्गव ॥ १ ।
ब्रह्मणाहं पुरा सृष्टः प्रोक्तश्च सृज वै प्रजाः ।
अविज्ञानसमर्थोऽहं निमग्नः सलिले द्विज ॥ २
तत्र यावत्क्षणञ्चैकं तिष्ठामि परमेश्वरम् ।
अङ्गुष्ठमात्रपुरुषं ध्यायन् प्रयतमानसः ॥ ३ ।
तावज्जलात्समुत्तस्थुः प्रभयाग्निसमप्रभाः ।
पुरुषा दश चैकश्च तापयन्तोंऽशुभिर्जलम् ॥ ४ ।
मया पृष्टाः के भवन्तो जलादुत्तीर्य्य तेजसा ।
तापयन्तो जलञ्चेदं क्व वा यास्यथ शंसत ॥ ५ ।
एवमुक्ता मया ते तु नोचुः किञ्चन सत्तमाः ।
एवमेव गतास्तूष्णीन्ते नरा द्विजपुङ्गवाः ॥ ६ ।
ततस्तेषामनु महापुरुषोऽतीव शोभनः ।
स तस्मिन्मेघसङ्काशः पुण्डरीकनिभेक्षणः ॥ ७ ।
तमहं पृष्टवान् कस्त्वं के चेमे पुरुषा गताः ।
किं वा प्रयोजनमिह कथ्यतां पुरुषर्षभ ॥ ८ ।

पुरुष उवाच ।

य एते वै गताः पूर्वं पुरुषा दीप्ततेजसः ।
आदित्यास्ते त्वरन्यान्ति ध्याता वै ब्रह्मणाभवन् ॥ ९ ।

सृष्टिं सृजति वै ब्रह्मा तदर्थं यान्त्यमी नराः ।
प्रतिपालनाय तस्यास्तु सृष्टेर्देव न संशयः ॥ १० ।

शम्भुरुवाच ।

जानीयां भगवन्कथं महापुरुषसत्तमम् ।
भवेति* नाम्ना तत्सर्वं कथयस्व परोह्यहम् ॥ ११ ।
एवमुक्तस्तु रुद्रेण स पुमान् प्रत्यभाषत ।
अहं नारायणो देवो जलशायी सनातनः ॥ १२ ।
दिव्यं चक्षुर्भवति वै तव मां पश्य यत्नतः ।
एवमुक्तस्तदा तेन यावत्पश्याम्यहन्तु तम् ॥
तावदङ्गुष्ठमात्रन्तु ज्वलद्भास्करतेजसम् ।
तमेवाहं प्रपश्यामि तस्य नाभौ तु पङ्कजम् ।
ब्रह्माणं तत्र पश्यामि आत्मानञ्च तदन्तकः ॥ १३।१४ ।
एवं दृष्ट्वा महात्मानं ततो हर्षमुपागतः ।
तं स्तोतुं द्विजशार्दूल मतिर्मे समजायत ॥ १५ ।
तस्यां मतौ तु जातायां स्तोत्रेणानेन सुव्रत ।
स्तुतो मया स विश्वात्मा तपसा स्मृतकर्म्मणा ॥ १६ ।

रुद्र उवाच ।†

नमोऽस्त्वनन्ताय विशुद्धचेतसे
सरूपरूपाय सहस्रबाहवे ।

---

* भवेदिति स्थाने भवेतीति आर्षम् ।

† एषोऽपि पुनरुक्तः पाठः ।

अथ:सप्ततितमोऽध्यायः ।

सहस्ररश्मिप्रवराय वेधसे
विशालदेहाय विशुद्धकर्म्मणे* ॥ १७ ।
समस्तविश्वार्त्तिहराय शम्भवे
सहस्रसूर्य्यानिलतिग्मतेजसे ।
समस्तविद्याविधृताय† चक्रिणे
समस्तगीर्वाणनुते सदा नमः ॥ १८ ।
अनादिदेवाच्युत शेषशेखर
प्रभो विभो भूतपते महेश्वर ।
मरुत्पते सर्व्वपते जगत्पते
भुवः पते भुवनपते‡ सदा नमः ॥ १९ ।
जलेश नारायण विश्वशङ्कर
क्षितीश विश्वेश्वर विश्वलोचन ।
शशाङ्क सूर्य्याच्युत वीर विश्वग
प्रतर्क्यमूर्त्तेऽमृतमूर्त्तिरव्यय ॥ २० ।
ज्वलद्धुताशार्च्चिविरुद्धमण्डल
प्रपाहि नारायण विश्वतोमुख ।
नमोऽस्तु देवार्त्तिहरामृताव्यय
प्रपाहि मां शरणागतं सदाच्युत§ ॥ २१ ।

---

* विशुद्धमूर्त्तये इति (ख) ।

† समस्तविद्याविहतायेति (ख) ।

‡ (ख) पुस्तके भूपतये सदा नम इति च पाठो वर्त्तते ।

§ प्रपाहि मां त्वं शरणागतं सदेति क्वचित्पाठः ।

वक्त्राण्यनेकानि विभो तवाहं
पश्यामि मध्यस्थगतं पुराणम्* ।
ब्रह्माणमीशं जगतां प्रसूतिं
नमोऽस्तु मह्यन्तु† पितामहाय ॥ २२ ॥
संसारचक्रभ्रमणैरनेकैः
क्वचिद्भवान्देववरादिदेव ।
सन्मार्गिभिर्ज्ञानविशुद्धसत्त्वै-
रुपास्यसे किम्प्रणमाम्यहं त्वाम् ॥ २३ ॥
एकं भवन्तं प्रकृतेः परस्ता-
द्यो वेत्ति स सर्व्वविदादिदेव ।
गुणा न तेषु प्रसभं विभेद्या
विशालमूर्त्तिर्हि सुसूक्ष्मरूपः ॥ २४ ॥
वाग्योनिमन्तो‡ विगतेन्द्रियोऽसि
विकर्म्मा भवान्नो विगतैककर्म्मा ।
संसारवांस्त्वं हि न तादृशोऽसि
परं वपुर्देव विशुद्धभावैः ॥ २५ ॥
संसारविच्छित्तिकरैर्यजद्भि-
रतोऽवसीयेत चतुर्भुजस्त्वम् ।

---

* एतदर्द्धं (ग) पुस्तके नास्ति ।

† अत्रापि ममस्थाने मह्यम् ।

‡ वाग्योनिमान् भो इति (ग) ।

परं न जानाति यतो वपुस्ते
देवादयोऽप्यद्भुतकारणं तत् ॥ २६ ।
अतोऽवतारोक्ततनुं पुराण-
माधारयेयुः कमलासनाद्याः ।
न ते वपुर्विश्वसृगब्जयोनि-
रेकान्ततो वेद महानुभावः ॥ २७ ।
परन्त्वहं वेद्मि कविं पुराणं
भवन्तमाद्यन्तपसा विशुद्धः ।
पद्मासनो मे जनकः प्रसिद्ध-
श्चेतः प्रसूतावसकृत्पुराणैः ॥ २८ ।
सम्बुध्यते नाथ न मद्विधाऽपि*
विदुर्भवन्तं तपसा विहीनाः ।
ब्रह्मादिभिस्तत्प्रवरैरबोध्यं
त्वां देवरूपाः† समनन्त नत्वा ॥ २९ ।
प्रबोधमिच्छन्ति न तेषु बुद्धे-
रुदारकीर्त्तिष्वपि वेदहीनाः ।
जन्मान्तरैर्वेदविदां विवेके-
र्बुद्धिर्भवेन्नाथ तव प्रसादात् ॥ ३० ।
त्वल्लब्धलाभस्य‡ न मानुषत्वं

---

* मद्विधा अपीति साधु ।

† त्वां देवमूर्त्त्या इति (ख) ।

‡ नाथस्येति (ग) ।

न देवगन्धर्व्वगतिः शिवं स्यात् ।
त्वं विश्वरूपोऽसि भवान्सुसूक्ष्म
स्थूलोऽसि चेदं* कृतकृत्यताय ॥ ३१ ।
स्थूलः सुसूक्ष्मः सुलभोऽसि देव
त्वद्वाह्यवृत्त्या नरके पतन्ति ।
किमुच्यते वा भवति स्थितेऽस्मि-
न्नाथे तु वस्त्वर्कमरुन्महीभिः ॥ ३२ ।
सत्त्वैः सतोयैः समरूपधारि-
ण्यात्मस्वरूपे विततस्वभावे ।
इति स्तुतोमे भगवाननन्त
जुषस्व भक्तस्य विशेषतश्च ॥ ३३ ।
सृष्टिं सृजस्वेति तवोदितस्य
सर्व्वज्ञतां देहि नमोऽस्तु विष्णो ।
चतुर्मुखोवा यदि कोटिवक्त्रो
भवेन्नरः कोऽपि विशुद्धचेताः ।
समे गुणानामयुतैरनेकै-
र्वदेत्तदा देववर प्रसीद ॥ ३४ ।
समो वियुक्तस्य विशुद्धभाव-
स्तद्भावभावैकमनोऽनुगस्य ।
सदा हृदिस्थोऽसि भवान्नमस्ते

---

* चेयमित्यथ चेदमिति पाठः ।

न सर्व्वगस्यास्ति पृथग्व्यवस्था: ॥ ३५ ।
इति प्रकाशङ्कृतमेतदीश
स्तवं मया सर्व्वगतं विबुद्धा ।
संसारचक्रक्रममाणयुक्त्या
भीतं पुनीह्यच्युत केवलत्वम् ॥ ३६ ।

वराह उवाच ।

इति स्तुतस्तदा देवो रुद्रेणामिततेजसा ।
उवाच वाक्यं सन्तुष्टो मेघगम्भीरनिस्वन: ॥ ३७ ।

विष्णुरुवाच ।

वरं वरय भद्रोऽस्तु देवदेव उमापते ।
न भेदश्चावयोर्देव एकावावामुभावपि ॥ ३८ ।

रुद्र उवाच ।

ब्रह्मणाहं नियुक्तस्तु प्रजा: सृज इति प्रभो ।
तत्र ज्ञानं प्रयच्छस्व त्रिविधं भूतभावन: ॥ ३९ ।

विष्णुरुवाच ।

सर्व्वज्ञस्त्वन्न सन्देहो ज्ञानराशिः सदातन: ।
देवानाञ्च परं पूज्य: सर्व्वथा त्वं भविष्यसि ॥ ४० ।
एवमुक्त: पुनर्वाक्यमुवाचोमापतिस्तदा ।
अन्यं देहि वरं देव प्रसिद्धं सर्व्वजन्तुषु ॥ ४१ ।
मूर्त्तो भूत्वा भवानेव मामाराधय केशव ।
मां वहस्व स देवेश वरं मत्तो गृहाण च ।
येन त्वं सर्व्वदेवानां पूज्यात्पूज्यतरो भव ॥ ४२ ।

विष्णुरुवाच ।

देवकार्य्यावतारेषु मानुषत्वमुपागतः ।
त्वामेवाराधयिष्यामि त्वञ्च मे वरदो भव ॥ ४३ ।
यत्त्वयोक्तं वहस्वेति देवदेव उमापते ।
सोऽहं वहामि देव त्वां मेघो भूत्वा शतं समाः ॥ ४४ ।
एवमुक्त्वा हरिर्मेघः स्वयं भूत्वा महेश्वरम् ।
उज्जहार जलात्तस्माद्वाक्यं देवमुवाच ह ॥ ४५ ।
य एते दश चैकश्च पुरुषाः प्राकृताः प्रभो ।
ते वैराजा महीं याता आदित्या इति संज्ञिताः ॥ ४६ ।
मदंशो द्वादशो यस्तु विष्णुनामा महीतले ।
अवतीर्णो भवन्तन्तु आराधयति शङ्कर ॥ ४७ ।
एवमुक्त्वा स्वकादंशात्सृष्टादित्यं घनं तथा ।
नारायणः शब्दवच्च न विद्मः क्व लयं गतः ॥ ४८ ।

रुद्र उवाच ।

एवमेष हरिर्देवः सर्व्वगः सर्व्वभावनः ।
वरदोऽभूत्पुरा मह्यं तेनाहं दैवतैर्वरः ।
नारायणात्परो देवो न भूतो न भविष्यति ॥ ४९ ।
एतद्रहस्यं वेदानां पुराणानाञ्च सत्तम ।
मया वः कीर्त्तितं सर्व्वं यथा विष्णुरिहेज्यते ॥ ५० ।

इति वराहपुराणे रुद्रगीतासु त्रयःसप्ततितमोऽध्यायः ।

—

चतुःसप्ततितमोऽध्यायः ।

वराह उवाच ।

पुनस्ते ऋषयः सर्व्वे तं पप्रच्छुः सनातनम् ।
रुद्रं पुराणपुरुषं शाश्वतं क्रतुमव्ययम् ।
विश्वरूपमजं शम्भुं त्रिनेत्रं शूलपाणिनम् ॥ १ ।

ऋषय ऊचुः ।

त्वं परः सर्व्वदेवानामस्माकञ्च सुरेश्वर ।
पृच्छामस्तेन* त्वां प्रश्नमेकं तद्वक्तुमर्हसि ॥ २ ।
भूमिप्रमाणं संस्थानं पर्व्वतानाञ्च विस्तरम् ।
अस्माकं ब्रूहि कृपया देवदेव उमापते ॥ ३ ।

रुद्र उवाच ।

सर्व्वेष्विव पुराणेषु भूर्लोकः परिकीर्त्त्यते ।
इदानीञ्च प्रवक्ष्यामि समासाद्वः क्षमातलम् ।
तन्निबोधत धर्म्मज्ञा गदतो मम सत्तमाः ॥ ४ ।

योऽसौ सकलविद्यावबोधितपरमात्मरूपी विगतकल्मषः परमाणुरचिन्त्यात्मा नारायणः सकललोकालोकव्यापी पीताम्बरोरुवक्षःक्षितिधरो गुणतः† सूच्येत् तमस्त्वप्रपञ्चमदीर्घमस्वमकृशमलोहितमित्येवमाद्योपलक्षित‡विज्ञानमात्ररूपः स

---

* अत्र नकारस्य संयोगात्पूर्व्वगुरुत्वमपीति ज्ञेयम् ।

† गुणित इति (ग) ।

‡ उपलक्षितेति (ग) ।

भगवांस्त्वप्रकारः सत्त्वरजस्तमोद्रिक्तः सलिलं ससर्ज्ज। तत्सृष्ट्वा आदिपुरुषः परमेश्वरो नारायणः सकलजगन्मयः सर्व्वमयो देवमयो यज्ञमय आपोमय आपोमूर्त्तिर्योगनिद्रया सुप्तस्य तस्य नाभौ तदब्जं निःससार। तस्मिन् सकलवेदनिधिरचिन्त्यात्मा परमेश्वरो ब्रह्मा प्रजापतिरभवत्। स च सनकसनन्दनसनातनसनत्कुमारादीन् ज्ञानधर्म्मिणः पूर्व्वमुत्पाद्य पश्चान्मनुं स्वायम्भुवं मरीच्यादीन्दक्षान्त्यान् ससर्ज्ज। यः स्वायम्भुवो मनुर्भगवता सृष्टस्तस्मादारभ्य भुवनस्यातिविस्तरोवर्ण्यते। तस्य च मनोर्द्वौ पुत्रौ बभूवतुः प्रियव्रतोत्तानपादौ।

प्रियव्रतस्य दश पुत्राः बभूवुः*, अग्नीध्रोऽग्निबाहुर्मेधी मेधातिथिर्ध्रुवो ज्योतिष्मान्द्युतिमान्हव्योवपुष्मान् सवनान्ताः। द्वितीयः स च प्रियव्रतः सप्तद्वीपेषु सप्तपुत्रान्† स्थापयामास। तत्र चाग्नीध्रं जम्बूद्वीपेश्वरं चक्रे शाकद्वीपेश्वरं मेधातिथिं ज्योतिष्मन्तं क्रौञ्चे द्युतिमन्तं शाल्मलौ गोमेदस्येश्वरं हव्यं वपुष्मन्तं प्लक्षद्वीपेश्वरं पुष्कराधिपतिं सवनमिति। पुष्करेशस्यापि सवनस्य द्वौ पुत्रौ महावीतिधातकौ भवेताम्‡। तयोर्नाम्ना तौ देशौ व्यवस्थितौ धातके धातकीखण्डं कुमुदस्य च कौमुदम्। शाल्मलाधिपतेरपि ज्योतिष्मतस्त्रयः पुत्राः स्युः कुशवैद्युत-

* (ख) पुस्तके अग्नीध्र इत्यारभ्य सप्तपुत्रानित्यन्तः सन्दर्भो नास्ति।

† (ग) पुस्तके सवनान्ता इत्यनन्तरं सप्तद्वीपेषु सप्तद्वीपान् स्थापयामास इति पाठो वर्त्तते।

‡ बभूवतुः, बभूतां, अभवतां वा साधु।

जीमूतवाहनास्तेषां नाम्ना ते देशा जाताः। तथा च द्युतिमतः सप्त पुत्राः कुशलो* मनुगव्यौ स्तः† पीवरोऽप्रान्धकारकमुनि-दुन्दुभिश्चेति तन्नाम्ना क्रौञ्चे सप्त महादेशनामानि। कुशद्वीपे-श्वरस्यापि ज्योतिष्मतः सप्त पुत्राः। उद्भिदो वेणुमांश्चैव रथो-पलं मनो धृतिः प्रभाकरः कपिल इति तत्तन्नामानि वर्षाणि द्रष्टव्यानि। शाकाधिपस्यापि मेधातिथेः सप्त पुत्रा नाभि-‡शान्तभयशिशिरसुखोदमन§न्दशिवक्षेमकध्रुवा इति। तन्ना-मान्येव वर्षाणि नाभेर्हैमवन्तं हेमकूटं किम्पुरुषं नैषधं हरि-वर्षं मेरुमध्यमिलावृतं नीलं रम्यकं श्वेतं हिरण्मयमुत्तरञ्च शृङ्गवतः कुरवो माल्यवन्तं भद्राश्वं गन्धमादनम्। केतुमाले तु एवं स्वायम्भुवेऽन्तरे भुवनप्रतिष्ठा कल्पे कल्पे चैवमेव सप्तसप्त-पार्थिवैः क्रियते भूमेः पालनव्यवस्था च एष स्वभावः कल्पस्य सदा भवतीति। अत्र नाभेः सर्गं कथयामि, नाभिर्मेरुदेव्यां पुत्रमजनयदृषभनामानं, तस्य भरतो जज्ञे पुत्रश्च तावदग्रजः, तस्य भरतस्य पिता ऋषभः हेमाद्रेर्दक्षिणं वर्षं महद्भारतं नाम शशास। भरतस्य पुत्रः सुमतिस्तस्य राज्यं दत्त्वा सोऽपि वनं ययौ। सुमतेस्तेजस्तत्पुत्रः सत्सुतस्तस्याऽपीन्द्र-

---

* कुशरमीति (ग)।

† गव्यौश इति (ग)।

‡ नाभीति (ग) पुस्तके नास्ति।

§ दयनेति (क)।

द्युम्नस्तस्यापि परमेष्ठी तस्य प्रतिहर्त्ता, तस्य निखातः, निखातस्य उन्नेता,* उन्नेतुरप्यभावस्तस्योद्गाता, तस्य प्रस्तोता, प्रस्तोतुर्विभुर्विभोः पृथुः पृथोरनन्तः, अनन्तस्य गयः, गयस्य नयस्तस्य विराट्, तस्य महावीर्य्यस्य सुधीमान् ।

तस्य पुत्रशतं जज्ञे तेनेमा वर्द्धिता प्रजाः ।
तैरिदं भारतं वर्षं सप्तद्वीपं समाङ्कितम् ॥ १ ।
तेषां वंशप्रसूत्या तु भुक्तेयं भूमिरुत्तमा ।
कृतत्रेतादियुक्त्या तु युगाख्या ह्येकसप्ततिः ॥ २ ।
भुवनस्य प्रसङ्गेन मन्वन्तरमिदं शुभम् ।
स्वायम्भुवञ्च कथितमपरं यन्निबोधत ॥ ३ ।

इति वराहपुराणे रुद्रगीतासु भुवनकोशे चतुःसप्ततितमोऽध्यायः ।

पञ्चसप्ततितमोऽध्यायः ।

रुद्र उवाच ।

अत ऊर्द्धं प्रवक्ष्यामि जम्बूद्वीपं यथातथम् ।
संख्या चापि समुद्राणां द्वीपानाञ्चैव विस्तरम् ॥ १ ।
यावन्ति चैव वर्षाणि तेषु नद्यश्च याः स्मृताः ।
महाभूतप्रमाणञ्च गतिश्चन्द्रार्कयोः पृथक् ॥ २ ।

---

* तस्य उन्नेता इति (ग) ।

द्वीपभेदसहस्राणि सप्तस्वन्तर्गतानि च।
न शक्यन्ते क्रमेणेह वक्तुं यैर्वितंतं जगत्॥ ३।
सप्त द्वीपान् प्रवक्ष्यामि चन्द्रादित्यग्रहैः सह।
येषां मनुष्यास्तर्केण प्रमाणानि प्रचक्षते॥ ४।
अचिन्त्याः खलु ये भावा न तांस्तर्केण साधयेत्।
प्रकृतेश्च परं यत्तु तदचिन्त्यं विभाव्यते॥ ५।
नववर्षं प्रवक्ष्यामि जम्बूद्वीपं यथातथम्।
विस्तारं मण्डलञ्चैव* योजनैस्तन्निबोधत॥ ६।
शतमेकं सहस्राणां योजनानां समन्ततः।
नानाजनपदाकीर्णं योजनैर्विविधैः शुभैः॥ ७।
सिद्धचारणसङ्कीर्णं पर्व्वतैरुपशोभितम्।
सर्व्वधातुविबद्धैश्च शिलाजालसमुद्भवैः॥ ८।
पर्व्वतप्रभवाभिश्च नदीभिः सर्व्वतश्चितम्।
जम्बूद्वीपं पृथु श्रीमत्सर्व्वतः परिमण्डलम्॥ ९।
नवभिश्चावृतं श्रीमान्यत्रास्ते भूतभावनः।
लवणेन समुद्रेण सर्व्वतः परिवारितः॥ १०।
जम्बूद्वीपस्य विस्तारात्समेन तु समन्ततः।
तस्य प्रागायता दीर्घाः षड़ेते वर्षपर्व्वताः।
उभयत्रावगाहाश्च समुद्रौ पूर्व्वपश्चिमौ॥ ११।
हिमप्रायश्च हिमवान्हेमकूटश्च हेमवान्।

---

* मण्डलाच्चैवेति (ग)।

सर्व्वत्र सुसुखश्चापि निषधः पर्व्वतो महान् ॥ १२ ।
चतुर्व्वर्णः ससौवर्णो मेरुश्चोक्तो मया गिरिः ।
वृत्ताकृतिप्रमाणश्च चतुरस्रः समुत्थितः* ॥ १३ ।
नानावर्णः सुपार्श्वेषु प्रजापतिगुणान्वितः ।
नाभिमण्डलसम्भूतो ब्रह्मणः परमेष्ठिनः ॥ १४ ।
पूर्व्वतः श्वेतवर्णस्तु ब्राह्मण्यं तेन तस्य तत् ।
पीतश्च दक्षिणेनासौ तेन वैश्यत्वमिष्यते ॥ १५ ।
भृङ्गपत्रनिभश्चासौ पश्चिमेण यतोऽथ सः ।
तेनास्य शूद्रता प्रोक्ता मेरोर्नामार्थकर्म्मणः ॥ १६ ।
पार्श्वमुत्तरतस्तस्य रक्तवर्णं विभाव्यते ।
तेनास्य चत्रभावः स्यादिति वर्णाः प्रकीर्त्तिताः ॥ १७ ।
वृत्तः स्वभावतः प्रोक्तो वर्णतः परिमाणतः ।
नीलश्च वैदूर्य्यमयः श्वेतशुक्लो हिरण्मयः ।
मयूरवर्हिवर्णस्तु शातकौम्भस्य शृङ्गवान् ॥ १८ ।
एते पर्व्वतराजानः सिद्धचारणसेविताः ।
तेषामन्तरविष्कम्भो नवसाहस्र उच्यते ॥ १९ ।
मध्ये त्विलावृतं नाम महामेरोस्तु सम्भवः ।
तेनैव तु सहस्राणि† विस्तीर्णः सर्व्वतश्च सः ॥ २० ।
मध्यं तस्य महामेरुर्व्विधूम इव पावकः ।

---

* समुच्छ्रित इति (ग) ।

† तेनैव शतसहस्राणीति (क), (ख) । अत्राधिकाक्षरत्वाच्छन्दोदोषः ।

वेद्यर्द्धं दक्षिणं मेरोरुत्तरार्द्धं तथोत्तरम् ॥ २१ ।
वर्षाणि यानि षड्त्र* तेषान्ते वर्षपर्वताः ।
योजनाग्रन्तु वर्षाणां सर्व्वेषां तद्विधीयते ॥ २२ ।
द्वे द्वे वर्षे सहस्राणां राजन्यानां समुच्छ्रयः ।
जम्बूद्वीपस्य विस्तारस्तेषामायाम उच्यते ॥ २३ ।
योजनानां सहस्राणां शते द्वे चापि† तौ गिरी ।
नीलश्च निषधश्चैव ताभ्यां हीनाश्च ये परे ।
श्वेतश्च हेमकूटश्च हिमवाञ्छृङ्गवांश्च यः ॥ २४ ।
जम्बूद्वीपप्रमाणेन निषधः परिकीर्त्तितः ।
तस्माद्द्वादशभागेन हेमकूटः प्रहीयते ।
हिमवान्विंशभागेन हेमकूटात्प्रहीयते ॥ २५ ।
अष्टांशाद्धिमवाञ्छैल आयतः पूर्व्वपश्चिमे ।
द्वीपस्य मण्डलीभावाद्ध्रासवृद्धी प्रकीर्त्त्यते ॥ २६ ।
वर्षाणां पर्व्वतानाञ्च यथा चेमे तथोत्तरम् ।
तेषां मध्ये जनपदास्तानि वर्षाणि चैव तत् ॥ २७ ।
प्रपातविषमैस्तैस्तु पर्व्वतैरावृतानि तु ।
सन्ततानि नदीभेदैरगम्यानि परस्परम् ॥ २८ ।
वसन्ति तेषु सत्त्वानि नानाजातीनि सर्व्वशः ।
एतद्धैमवतं वर्षं भारती यत्र सन्ततिः ॥ २९ ।

---

* षट् तत्रेति (ग) ।

† चापेति (ग) ।

हेमकूटे परं यत्र नाम्ना किम्पुरुषोत्तमः ।
हेमकूटात्तु निषधं हरिवर्षन्तदुच्यते ॥ ३० ।
हरिवर्षात्परश्चैव हेमपार्श्वे इलावृतम् ।
इलावृतात्परं नीलं रम्यकं नाम विश्रुतम् ॥ ३१ ।
रम्यकाच्च परं श्वेतं विश्रुतं तद्धिरण्मयम् ।
हिरण्मयात्परश्चैव शृङ्गवन्तं कुरु स्मृतम् ॥ ३२ ।
धनुःसंस्थे तु द्वे वर्षे विज्ञेये दक्षिणोत्तरे ।
द्वीपानां खलु चत्वारि चतुरस्रमिलावृतम् ॥ ३३ ।
अर्वाक् च निषधस्याथ वेद्यर्द्धं दक्षिणं स्मृतम् ।
परं शृङ्गवती यच्च वेद्यर्द्धं हि तदुत्तरम् ॥ ३४ ।
वेद्यर्द्धदक्षिणे त्रीणि वर्षाणि त्रीणि चोत्तरे ।
तयोर्मध्ये तु विज्ञेयो यत्र मेरुस्त्विलावृतः ॥ ३५ ।
आयामतश्चतुस्त्रिंशत्सहस्राणि प्रकीर्त्तितः ।
तस्य प्रतीच्यां विज्ञेयः पर्व्वतो गन्धमादनः ॥ ३६ ।
आयामोच्छ्रायविस्तारात्तुल्यो माल्यवता तु सः ।
परिमण्डलस्तयोर्मध्ये मेरुः कनकपर्व्वतः ।
चतुर्वर्णः स सौवर्णश्चतुरस्रः समुत्थितः ॥ ३७ ।
अव्यक्तधातवः सर्व्वे समुत्पन्ना जनादयः ।
अव्यक्तापृथिवी पद्मं मेरुस्तस्य च कर्णिका ॥ ३८ ।
चतुष्पत्रं समुत्पन्नं व्यक्तं पञ्चगुणं महत् ।
ततः सर्व्वाः समुत्पन्ना वितता हि प्रवृत्तयः ॥ ३९ ।
अनेककल्पजीवद्भिः पुरुषैः पुण्यकारिभिः ।

कृतात्मभिर्महात्मभिः प्राप्यते पुरुषोत्तमः ॥ ४० ।
महायोगी महादेवो जगद्धेयो जनार्द्दनः ।
सर्व्वलोकगतोऽनन्तो व्यापको मूर्त्तिरव्ययः ॥ ४१ ।
न तस्य प्राकृता मूर्त्तिर्मांसमेदोऽस्थिसम्भवा ।
योगित्वाच्चेश्वरत्वाच्च सर्व्वरूपधरो विभुः ॥ ४२ ।
तन्निमित्तं समुत्पन्नं लोके पद्मं सनातनम् ।
कल्पशेषस्य तस्यासौ कालस्य गतिरीदृशी ॥ ४३ ।
तस्मिन् पद्मे समुत्पन्नो देवदेवश्चतुर्मुखः ।
प्रजापतिपतिर्देव ईशानो जगतः प्रभुः ॥ ४४ ।
तस्य वीजनिसर्गं* हि पुष्करस्य यथार्थवत् ।
कृत्स्नं प्रजानिसर्गेण विस्तरेणैव वर्ण्यते ॥ ४५ ।
तदम्बु वैष्णवः कायो यतो रत्नविभूषितः ।
पद्माकारा समुत्पन्ना पृथिवी सवनद्रुमा ॥ ४६ ।
तत्तस्य लोकपद्मस्य विस्तरं सिद्धभाषितम् ।
वर्ण्यमानं विभागेन क्रमशः शृणुत द्विजाः ॥ ४७ ।
महावर्षाणि ख्यातानि चत्वार्यत्र च संस्थिताः† ।
तत्र पर्व्वतसंस्थानो मेरुर्नाम महाबलः ॥ ४८ ।
नानावर्णः स पार्श्वेषु पूर्व्वतः श्वेत उच्यते ।
पीतञ्च दक्षिणे तस्य भृङ्गवर्णन्तु पश्चिमम् ।
उत्तरं रक्तवर्णन्तु तस्य पार्श्वं महात्मनः ॥ ४९ ।

---

* निसर्गमित्यत्र क्लीवत्वमार्षं निसर्ग इति साधु ।

† संस्थिता इत्यत्र संस्थितानीति चेत्संगतिर्भवेत् ।

मेरुस्तु शोभते शुक्लो राजवंशेष्वधिष्ठितः ।
तरुणादित्यसङ्काशो विधूम इव पावकः ॥ ५० ॥
योजनानां सहस्राणि चतुरशीतिमुच्छ्रितः ।
प्रविष्टः षोड़शाधस्ताद्विस्तृतः षोड़शैव तु ॥ ५१ ॥
शरावसंस्थितत्वाच्च द्वात्रिंशन्मूर्द्ध्नि विस्तृतः ।
विस्तारस्त्रिगुणश्चास्य परिणाहः समन्ततः ॥ ५२ ॥
मण्डलेन प्रमाणेन व्यस्यमानन्तदिष्यते* ।
नवतिश्च सहस्राणि योजनानां समन्ततः ॥ ५३ ॥
ततः षट्काधिकानाञ्च व्यस्यमानं प्रकीर्त्तितम् ।
चतुरस्रेण मानेन परिणाहः समन्ततः ॥ ५४ ॥
स पर्व्वतो महादिव्यो दिव्यौषधिसमन्वितः ।
भवनैरावृतः सर्वैर्जातरूपमयैः शुभैः ॥ ५५ ॥
तत्र देवगणाः सर्व्वे गन्धर्व्वोरगराक्षसाः ।
शैलराजे प्रमोदन्ते तथैवाप्सरसां गणाः ॥ ५६ ॥
स तु मेरुः परिवृतो भवनैर्भूतभावनैः ।
चत्वारो यस्य देशास्तु नानापार्श्वेष्वधिष्ठिताः ॥ ५७ ॥
भद्राश्वो भारतश्चैव केतुमालश्च पश्चिमे ।
उत्तरे कुरवश्चैव कृतपुण्यप्रतिश्रयाः ॥ ५८ ॥
कर्णिका तस्य पद्मस्य समन्तात्परिमण्डलम् ।
योजनानां सहस्राणि योजनानां प्रमाणतः ॥ ५९ ॥
तस्य केसरजालानि नव षट् च प्रकीर्त्तिताः ।

---

* प्रकीर्त्तितमिति (ग), तत्र एतच्छ्लोकस्योत्तरार्द्धं परश्लोकस्य पूर्व्वार्द्धञ्च नास्ति ।

चतुरशीतिरुत्सेधो विवरान्तरगोचराः ॥ ६० ।
त्रिंशच्चापि सहस्राणि योजनानां प्रमाणतः ।
तस्य केसरजालानि विकीर्णानि समन्ततः ॥ ६१ ।
शतसाहस्र आयामः अशीतिः पृथुलानि च ।
चत्वारि तत्र पर्व्वाणि योजनानां चतुर्द्दश ॥ ६२ ।
तत्र या सा मया तुभ्यं कर्णिकेत्यभिविश्रुता ।
तां वर्ण्यमानामेकाग्रात्समासेन निबोधत ॥ ६३ ।
मणिपर्णशतैश्चित्रां नानावर्णप्रभासिताम् ।
अनेकपर्णनिचयं सौवर्णमरुणप्रभम् ॥ ६४ ।
कान्तं सहस्रपर्व्वाणं सहस्रोदरकन्दरम् ।
सहस्रशतपत्रञ्च वृतमेकं नगोत्तमम् ।
मणिरत्नार्पितैः श्वभ्रैर्मणिचित्रिततोरणैः ॥ ६५ ।
तत्र ब्रह्मसभा रम्या ब्रह्मर्षिजनसङ्कुला ।
नाम्ना मनोवती सा तु सर्व्वलोकेषु विश्रुता ॥ ६६ ।
तत्रेशानस्य देवस्य सहस्रादित्यवर्च्चसः ।
महाविमानसंस्थस्य महिमा वर्त्तते सदा ॥ ६७ ।
तत्र सर्व्वे देवगणाश्चतुर्वक्त्रं स्वयं प्रभुम् ।
दृष्ट्वा पूज्या नमस्कारैरर्च्चनीयमुपस्थिताः ॥ ६८ ।
यैस्तदा जितसङ्कल्पैर्ब्रह्मचर्य्यं महात्मभिः ।
चीर्णं चारुमनोभिश्च सदाचारपरिस्थितैः ॥ ६९ ।
सम्यग्भक्त्या सुतुष्ट्या च पितृदेवार्च्चने रताः ।
गृहाश्रमपरास्तत्र विनीता अतिथिप्रियाः ॥ ७० ।

गृहिणः शुक्लकर्म्मस्था विरक्ताः कारणात्मकाः ।
यमैर्नियमदानैश्च दृढनिर्द्दग्धकिल्बिषाः ॥ ७१ ।
तेषां निवासः शुक्ले च ब्रह्मलोके अनिन्दिते ।
उपर्य्युपरि सर्व्वासां गतीनां परमा गतिः ॥ ७२ ।
चतुर्द्दशसहस्राणि योजनानान्तु कीर्त्तितम् ।
ततोऽर्द्धरुचिरे क्षेत्रे तरुणादित्यवर्च्चसि ॥ ७३ ।
महागिरौ ततो रम्ये रत्नधातुविचित्रिते ।
नैकरत्नसमावासे मणितोरणमन्दिरे ।
मेरुः सर्व्वेषु पार्श्वेषु समन्तात्परिमण्डले ॥ ७४ ।
त्रिंशद्योजनसाहस्रं चक्रपादो नगोत्तमः ।
दशयोजनविस्तीर्णा चक्रपादोपनिर्गता ॥ ७५ ।
सा तूर्द्ध्ववाहिनी* चापि नदी भूमौ प्रतिष्ठिता ।
सा पुर्य्याममरावत्यां† क्रममाणेन्दुसप्रभा ॥ ७६ ।
तया तिरस्कृता वापि सूर्य्येन्दुज्योतिषां गणाः ।
उदयास्तमिते सन्ध्ये ये सेवन्ते द्विजोत्तमाः ॥ ७७ ।
तान्पश्यन्ते द्विजाः सर्व्वानष्टावप्यचलोत्तमान् ।
परिभ्रमज्ज्योतिषां या सा रुद्रेन्द्रमता शुभा ॥ ७८

इति वराहपुराणे रुद्रगीतासु भुवनकोशे पञ्चसप्ततितमोऽध्यायः ।

---

* मूर्द्धवाहिनीति (ग) ।

† सा पुनर्याममरावत्यामिति (ग) ।

षट्सप्ततितमोऽध्यायः ।

रुद्र उवाच ।

तस्यैव मरोः पूर्व्वे तु देशे परमवर्च्चसे ।
चक्रपादपरिच्छिन्ने नानाधातुविराजिते ।
तत्र सर्व्वामरपुरं चक्रपादसमुद्भृतम् ॥ १ ।
दुर्द्धर्षबलदृप्तानां देवदानवरक्षसाम् ।
तत्र जाम्बूनदमयः सुप्राकारः सुतोरणः ॥ २ ।
तस्याप्युत्तरपूर्व्वे तु देशे परमवर्च्चसे ।
अलोकजनसम्पूर्णा विमानशतसङ्कुला ॥ ३ ।
महावापीसमायुक्ता नित्यं प्रमुदिता शुभा ।
शोभिता पुष्पशबलैः पताकाध्वजमालिनी ॥ ४
देवैर्यक्षोऽप्सरोभिश्च ऋषिभिश्च सुशोभिता ।
पुरन्दरपुरी रम्या समृद्धा त्वमरावती ॥ ५ ।
तस्या मध्येऽमरावत्या वज्रवैदूर्य्यवेदिका ।
त्रैलोक्यगुणविख्याता सुधर्मा नाम वै सभा ॥ ६ ।
तत्रास्ते श्रीपतिः श्रीमान्सहस्राक्षः शचीपतिः ।
सिद्धादिभिः परिवृतः सर्व्वाभिर्द्देवयोनिभिः ॥ ७ ।
तत्र चैव तु वंशः स्याद्भास्करस्य महात्मनः ।
साक्षात्तत्र सुराध्यक्षः सर्व्वदेवनमस्कृतः ॥ ८ ।
तस्याश्च दिक्षु विस्तीर्णा तत्तद्गुणसमन्विता ।
तेजोवती नाम पुरी हुताशस्य महात्मनः ॥ ९ ।

तद्वद्गुणवती रम्या* पुरी वैवस्वतस्य च ।
नाम्ना संयमनी नाम पुरी त्रैलोक्यविश्रुता ॥ १० ।
तथा चतुर्थे दिग्भागे नैर्ऋताधिपतेः श्रुता ।
नाम्ना कृष्णवती† नाम विरूपाक्षस्य धीमतः ॥ ११ ।
पञ्चमे ह्युत्तरपुटे नाम्ना शुद्धवती पुरी ।
उदकाधिपतेः ख्याता वरुणस्य महात्मनः ॥ १२ ।
तथा पश्चोत्तरे देवस्यास्योत्तरपुटे पुरी ।
वायोर्गन्धवती नाम ख्याता सर्व्वगुणोत्तरा ॥ १३ ।
तस्योत्तरपुटे रम्या‡ गुह्यकाधिपतेः पुरी ।
नाम्ना महोदया नाम शुभा वैदूर्य्यवेदिका ॥ १४ ।
तथाष्टमेऽन्तरपुटे ईशानस्य महात्मनः ।
पुरी मनोहरा नाम भूतैर्नानाविधैर्युता ॥ १५ ।
पुष्पैर्धन्यैश्च विविधैर्वनैराश्रमसंस्थितैः ।
प्रार्थ्यते देवलोको यं स स्वर्ग इति कीर्त्तितः ॥ १६ ।

इति वराहपुराणे रुद्रगीतासु भुवनकोशे षट्सप्ततितमोऽध्यायः ।

---

* ताभ्यां गुणवती रम्या इति (ख) ।

† कृष्णावतीति (ग) ।

‡ तस्योत्तरपुरे रम्या इति (ख) ।

सप्तसप्ततितमोऽध्यायः ।

रुद्र उवाच ।

यदेतत्कर्णिकामूलं मेरोर्मध्यं प्रकीर्त्तितम् ।
तद्योजनसहस्राणि संख्यया मानतः स्मृतम् ॥ १ ।
चत्वारिंशत्तथा चाष्टौ सहस्राणि तु मण्डलैः ।
शैलराजस्य तत्तत्र मेरुमूलमिति स्मृतम् ॥ २ ।
तेषां गिरिसहस्राणामनेकानां महोच्छ्रयः ।
दिगष्टौ च पुनस्तस्य मर्य्यादापर्व्वताः शुभाः ॥ ३ ।
जठरो देवकूटश्च पूर्व्वस्यां दिशि पर्व्वतौ ।
मर्य्यादापर्व्वतानेतानष्टावाहुर्मनीषिणः ॥ ४ ।
योऽसौ मेरुर्द्विजश्रेष्ठाः प्रोक्तः कनकपर्व्वतः ।
दिगस्यास्य तु वक्ष्यामि शृणुध्वञ्च दतस्ततः ॥ ५ ।
मर्य्यादायास्तु चत्वारो शिरोरग्रं चतुर्द्दश ।
येनाचचाल विष्टब्धा सप्तद्वीपवती मही ॥ ६ ।
दशयोजनसाहस्रं व्यायामस्तेषु शङ्करे* ।
तिर्य्यगूर्द्ध्वञ्च रचिता हरितालतलैर्वृता ॥ ७ ।
मनःशिलादरीभिश्च सुवर्णमणिचित्रिता ।
अनेकसिद्धभवनैः क्रीड़ास्थानैश्च सप्रभा ॥ ८ ।
पूर्व्वेण मन्दरस्तस्य दक्षिणे गन्धमादनः ।

---

* सन्ततेति (ग) ।

ब्रह्मणो मानसाः सप्त तेषामन्ये तपोधनाः ॥ ४२ ।
तेषामन्ये ततस्त्वन्ये चतुर्द्धा भूतसंग्रहः ।
सस्थाणुजङ्गमानाञ्च सृष्टिः सर्व्वत्र संस्थिता ॥ ४३ ।
यत्किञ्चिद्दाङ्मयं लोके जगत्स्थावरजङ्गमम् ।
तत्सर्व्वं स्थापितं सृष्ट्या भूतं भव्यञ्च सर्व्वदा ॥ ४४ ।

इति वराहपुराणे सृष्टिविभागे नवतितमोऽध्यायः ।

एकनवतितमोऽध्यायः ।

वराह उवाच ।

शृणु चान्यं वरारोहे तस्या देव्या महाविधिम् ।
या सा त्रिशक्तिरुद्दिष्टा शिवेन परमेष्ठिना ॥ १ ।
तत्र सृष्टिः पुरा प्रोक्ता* श्वेतवर्णा सुरूपिणी ।
एकाक्षरेति विख्याता सर्व्वाक्षरमयी शुभा ॥ २ ।
वागीशेति समाख्याता क्वचिद्देवी सरस्वती ।
सैव विद्येश्वरी देवी सैव क्वाप्यमिताक्षरा ।
सैव ज्ञाननिधिः क्वापि सैव देवी विभावरी ॥ ३ ।
यानि सौम्यानि नामानि यानि ज्ञानोद्भवानि च† ।

---

* पुरा प्रोक्तान्यमेद्देवीति (ग) ।

† ज्ञानोद्भवकराणि च इति (ग) ।

तानि तस्या विशालाक्षि द्रष्टव्यानि वरानने ॥ ४ ।
या वैष्णवी विशालाक्षी रक्तवर्णा सुरूपिणी ।
अपरा सा समाख्याता रौद्री चैव परायणा ॥ ५ ।
एतास्त्रयो*ऽपि सिध्यन्ति यो रुद्रं वेत्ति तत्त्वतः ।
सर्व्वा सेयं वरारोहे एकैव त्रिविधा स्मृता ॥ ६ ।
एषा सृष्टिर्वरारोहे कथिता ते पुरातनी ।
तया सर्व्वमिदं व्याप्तं जगत्स्थावरजङ्गमम् ॥ ७ ।
या सादौ वर्द्धिता सृष्टिर्ब्रह्मणोऽव्यक्तजन्मनः ।
तया तुल्यां स्तुतिं चक्रे तस्या देव्याः पितामहः ॥ ८ ।

ब्रह्मोवाच ।

जयस्व† सत्यसम्भूते ध्रुवे देवि धरेऽचरे‡ ।
सर्व्वगे सर्व्वजननि सर्व्वभूतमहेश्वरि ॥ ९ ।
सर्व्वज्ञा त्वं वरारोहे सर्व्वसिद्धिप्रदायिनी ।
सिद्धिबुद्धिकरे§ देवि प्रसूतिः परमेश्वरी ॥ १० ।
त्वं स्वाहा त्वं स्वधा देवि त्वमुत्पत्तिर्वरानने ।
त्वमोङ्कारस्थिता देवि वेदोत्पत्तिस्त्वमेव च ॥ ११ ।
देवानां दानवानाञ्च यक्षगन्धर्व्वरक्षसाम् ।

---

* त्रय इति आर्षं, तिस्र इति साधु ।

† जयस्वेति आर्षं, जयतात्, जय वेति साधु ।

‡ वरे धर्मे इति (ग) ।

§ बुद्धिकरीति (ग) ।

पशूनां वीरुधाञ्चापि त्वमुत्पत्तिर्वरानने ॥ १२ ।
विद्या विद्येश्वरी सिद्धा प्रसिद्धाहं सुरेश्वरी ।
सर्व्वज्ञा त्वं वरारोहे सर्व्वसिद्धिविधायिनी* ॥ १३ ।
सर्व्वगा गतसन्देहा सर्व्वशत्रुनिवर्हिणी ।
सर्व्वविद्येश्वरी देवी नमस्ते स्वस्तिकारिणि ॥ १४ ।
ऋतुस्नातां स्त्रियं गच्छेद्यस्त्वां स्मृत्वा वरानने ।
तस्यावश्यं भवेत्सृष्टिस्त्वत्प्रसादात्प्रजेश्वरि ।
स्वरूपा विजया भद्रे सर्व्वशत्रुविनाशिनि ॥ १५ ।

इति वराहपुराणे सृष्टिस्तुतिर्नाम एकनवतितमोऽध्यायः ।

द्विनवतितमोऽध्यायः ।

वराह उवाच* ।

या मन्दरगता देवी तपः कर्त्तुन्तु वैष्णवी ।
राजसी परमा शक्तिः कौमारव्रतधारिणी ॥ १ ।

---

* प्रदायिनीति (ग) ।

---

* एष पाठः (ख) पुस्तके नास्ति ।

सैकाकिनी तपस्तेपे विशालायान्तु शोभना।
तस्यास्तपन्त्याः कालेन महता क्षुभितं मनः॥ २॥
तस्मात्क्षोभात्समुत्तस्थुः कुमार्य्यः सौम्यलोचनाः।
नीलकुञ्चितकेशान्ता बिम्बोष्ठ्यायतलोचनाः।
नितम्बरसनोद्दाम*नूपुराढ्याः सुवर्च्चसः॥ ३।
एवंविधाः स्त्रियो देव्याः क्षोभिते मनसि द्रुतम्।
उत्तस्थुः शतसाहस्राः कोटिशो विविधाः प्रजाः॥ ४।
दृष्ट्वा कुमार्य्यः† सा देवी तस्मिन्नेव गिरौ शुभाः‡।
तपसा निर्ममे देवि पुरं हर्म्यशताकुलम्॥ ५।
विशालरथ्यं सौवर्णप्रासादैरुपशोभितम्।
अन्तर्ज्जलानि वेश्मानि मणिसोपानवन्ति च।
रत्नजालगवाक्षाणि आसन्नोपवनानि च॥ ६।
असंख्यातानि हर्म्याणि तथा कन्या धराधरे§।
प्राधान्येन प्रवक्ष्यामि कन्यानामानि शोभने॥ ७।
विद्युत्प्रभा चन्द्रकान्तिः सूर्य्यकान्तिस्तथापरा।
गम्भीरा चारुकेशी च सुजाता मुञ्जकेशिनी॥ ८।
घृताची चोर्व्वशी चान्या शशिनी शीलमण्डिता।

---

* रसनादाम इति (ख)।

† कुमार्य्य इति आर्षं, कुमारीरिति साधु।

‡ शुभे इति (ग)।

§ धरावरे इति (ख)।

चारुकन्या* विशालाक्षी धन्या पीनपयोधरा ॥ ९ ॥
चन्द्रप्रभा गिरिसुता तथा सूर्य्यप्रभाम्हता ।
स्वयम्प्रभा चारुमुखी शिवदूती विभावरी ।
जया च विजया चैव जयन्ती चापराजिता ॥ १० ॥
एताश्चान्याश्च शतशः कन्यास्तस्मिन्पुरोत्तमे ।
देव्या अनुचराः सर्व्वाः पाशाङ्कुशधराः शुभाः ॥ ११ ॥
ताभिः परिवृता देवी सिंहासनगता शुभा ।
सुसितैश्चामरैः स्त्रीभिर्वीज्यमाना विलासिनी ॥ १२ ॥
कौमारं व्रतमास्थाय तपः कर्त्तुं समुद्यता ।
पूज्यमाना वरस्त्रीभिः कुमारीभिः समन्ततः ॥ १३ ॥
सर्व्वाङ्गशोभिनी देवी यावदास्ते तपोऽन्विता ।
तावदागतवांस्तत्र नारदो ब्रह्मणः सुतः ॥ १४ ॥
तं दृष्ट्वा सहसा देवी ब्रह्मपुत्रं तपोधनम् ।
विद्युत्प्रभामुवाचेदमासनन्दीयतामिति ।
पाद्यमाचमनीयञ्च क्षिप्रमस्मै प्रदीयताम् ॥ १५ ॥
एवमुक्ता तदा देव्या कन्या विद्युत्प्रभा शुभा ।
आसनं पाद्यमर्घ्यञ्च नारदाय न्यवेदयत् ॥ १६ ॥
ततः कृतासनन्दृष्ट्वा प्रणतन्नारदं मुनिम् ।
उवाच देवी वचनं हर्षेण महतान्विता ॥ १७ ॥
स्वागतञ्चो मुनिश्रेष्ठ कस्माल्लोकादिहागतः ।

---

* धारुकर्मेति (ग) ।

किङ्कार्य्यं वद ते क्षत्वं मा ते कालात्ययो भवेत् ॥ १८ ।
एवमुक्तस्तदा देव्या नारदः प्राह लोकवित् ।
ब्रह्मलोकादिन्द्रलोकं तस्माद्रौद्रमथाचलम् ।
ततस्त्वामिह देवेशि द्रष्टुमभ्यागतः शुभे ॥ १९ ।
एवमुक्ता मुनिः श्रीमांस्तां देवीमन्ववेक्षयत्* ।
दृष्ट्वा मुहूर्त्तं देवेशि विस्मितो नारदोऽभवत् ॥ २० ।
अहो रूपमहो कान्तिरहो धैर्य्यमहो वयः ।
अहो निष्कामता देव्या इति खेदमुपाययौ ॥ २१ ।
देवगन्धर्व्वसिद्धानां यक्षकिन्नररक्षसाम् ।
न रूपमीदृशं क्वापि स्त्रीष्वन्यासु प्रदृश्यते ॥ २२ ।
एवं सञ्चिन्त्य मनसा नारदो विस्मयान्वितः ।
प्रणम्य देवीं सहसा उत्पपात नभस्तलम् ॥ २३ ।
गतश्च त्वरया युक्तः पुरीन्दैत्येन्द्रपालिताम् ।
महिषाख्येन भूतेशि समुद्रान्तस्थितां पुरीम् ॥ २४
तत्राससाद भगवानसुरं महिषाकृतिम् ।
दृष्ट्वा लब्धवरं वीरं देवसैन्यान्तकं महत् ॥ २५ ।
स तेन पूजितो भक्त्या तदा लोकचरो मुनिः ।
प्रीतात्मा नारदस्तस्मै देव्या रूपमनुत्तमम् ।
आचचक्षे यथान्यायं यद्वृत्तं देवतापुरे ॥ २६ ।

नारद उवाच ।

असुरेन्द्र शृणुष्वेकं कन्यारत्नं समाहितः ।

---

* अन्ववेक्षत इति (ख), (ग) ।

त्रैलोक्यं वरदानेन स्वाधीनन्ते चराचरम् ॥ २७ ।
ब्रह्मलोकादहं दैत्य मन्दराद्रिमुपागतः ।
तत्र देवीपुरं दृष्टं कुमारीशतसङ्कुलम् ॥ २८ ।
तत्र प्रधाना या कन्या तापसी व्रतचारिणी* ।
सा देवदैत्ययक्षाणां मध्ये काचिन्न दृश्यते ॥ ९२ ।
यादृशी सा मया दृष्टा तादृशी काण्डमध्यतः ।
भ्रमता चेदृशी दृष्टा न कदाचिन्मया सती ॥ ३०
तस्याश्च देवगन्धर्व्वा ऋषयः सिद्धचारणाः ।
उपासाञ्चक्रिरे सर्व्वे येऽप्यन्ये दैत्यनायकाः ॥ ३१
तां दृष्ट्वा वरदां देवीमहं तूर्णमिहागतः ।
अजित्वा देवगन्धर्व्वान्न तां जयति कश्चन ॥ ३२ ।
एवमुक्त्वा क्षणं स्थित्वा तमनुज्ञाप्य नारदः ।
यथागतं ययौ धीमानन्तर्द्धानेन तत्क्षणात् ॥ ३३ ।

इति वराहपुराणे प्रागितिहासे द्विनवतितमोऽध्यायः ।

त्रयोनवतितमोऽध्यायः ।

वराह उवाच ।

गते तु नारदे दैत्यश्चिन्तयामास तां शुभाम् ।
कथितां नारदमुखाच्छ्रुत्वा विस्मितमानसः ॥ १ ।

---

* व्रतधारिणीति (ग) ।

	Rs.	
Paráśara Smriti (Sans.) Fasc. I—V @ /6/ each ..	1	14
Śrauta Sútra of Ápastamba, (Sans.) Fasc. I—XII @ /6/ each ...	4	8
Śrauta Sútra of Áśvaláyana, (Sans.) Fasc. I—XI @ /6/ each ..	4	2
Ditto Látyáyana (Sans.) Fasc. I—IX @ /6/ each ..	3	6
Ditto Sánkhyáyana (Sans.) Fasc. I—IV @ /6/ each ..	1	8
Sáma Veda Samhitá, (Sans.) Vols. I, Fasc. 1—10 ; II, 1—6 ; III, 1—7 ; IV, 1—6 ; V, 1—8, @ /6/ each Fasc.	13	14
Sáhitya D[illegible] (English) Fasc. I—IV @ /6/ each	1	8
Sánkhya [illegible] (English) Fasc. I and II @ /6/ each	0	12
Súrya Siddhánta, (Sans.) Fasc. IV	0	6
Sarva Darśana Sangraha, (Sans.) Fasc. II	0	6
Sankara Vijaya, (Sans.) Fasc. II and III @ /6/ each	0	12
Sánkhya Pravachana Bháshya, (English preface only) Fasc. III ..	0	6
Sánkhya Sára, (Sans.) Fasc. I	0	6
Suśruta Samhitá, (Eng.) Fasc. I and II @ /12/ each	1	8
Taittiríya Áranya, (Sans.) Fasc. I—XI @ /6/ each	4	2
Ditto Bráhmana, (Sans.) Fasc. I—XXIV @ /6/ each	9	0
Ditto Samhitá, (Sans.) Fasc. I—XXXIV @ /6/ each ..	12	12
Ditto Prátiśákhya, (Sans.) Fasc. I—III @/6/ each	1	2
Ditto and Aitareya Upanishads, (Sans.) Fasc. II and III @/6/ each	0	12
Tándya Bráhmana, (Sans.) Fasc. I—XIX @ /6/ each	7	2
Tattva Chintámani, (Sans.) Fasc. I—VII @ /6/ each	2	10
Uttara Naishadha, (Sans.) Fasc. III—XII @ /6/ each	3	12
Uvás-agadasáo, Fasc. I—III @ /12/ each	2	4
Varáha Purána, (Sans.) Fasc. I—IV @ /6/ each	1	8
Váyu Purána, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—6, @ /6/ each Fasc.	4	8
Vishnu Smriti, (Sans.) Fasc. I—II @ /6/ each	0	12
Vivádaratnákara (Sans.) Fasc. I—VII @ /6/ each	2	10
Vrihannáradíya Purána, (Sans.) Fasc. I—IV @ /6/ each	1	8
Yoga Sútra of Patanjali, (Sans. & English) Fasc. I—V @ /14/ each	4	6
The same, bound in cloth	5	2
Arabic and Persian Series.		
'Álamgírnámah, with Index, (Text) Fasc. I—XIII @ /6/ each ..	4	14
Áín-i-Akbarí, (Text) Fasc. I—XXII @ 1/ each	22	0
Ditto (English) Vol. I (Fasc. I—VII) 1/12 each	12	4
Akbarnámah, with Index, (Text) Fasc. I—XXXVII @ 1/ each ..	37	0
Bádshahnámah, with Index, (Text) Fasc. I—XIX @ /6/ each ..	7	2
Beale's Oriental Biographical Dictionary, pp. 291, 4to., thick paper, @ 4/12 ; thin paper	4	8
Dictionary of Arabic Technical Terms and Appendix, Fasc. I—XXI @ 1/ each	21	0
Farhang-i-Rashídí (Text), Fasc. I—XIV @ 1/ each	14	0
Fihrist-i-Túsí, or, Túsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each	3	0
Futúh-ul-Shám Wáqidí, (Text) Fasc. I—IX @ /6/ each ..	3	6
Ditto Ázádí, (Text) Fasc. I—IV @ /6/ each	1	8
Haft Ásmán, History of the Persian Mansawi, (Text) Fasc. I ..	0	12
History of the Caliphs, (English) Fasc. I—VI @ /12/ each ..	4	8
Iqbálnámah-i Jahángírí, (Text) Fasc. I—III @ /6/ each ..	1	2
Isabáh, with Supplement, (Text) 42 Fasc. @ /12/ each	31	8
Maásir-ul-Umara, Vol. I, Fasc. I—III @ /6/ each	1	2
Maghází of Wáqidí, (Text) Fasc. I—V @ /6/ each	1	14
Muntakhab-ul-Tawáríkh, (Text) Fasc. I—XV @ /6/ each ..	5	10
Muntakhab-ul Tawáríkh, (English) Vol. II, Fasc. I—IV @/12/ each	3	0
Muntakhab-ul-Lubáb, (Text) Fasc. I—XIX @ /6/ each	7	2
Mu'ásir-'Álamgírí, (Text), Fasc. I—VI @ /6/ each	2	4
Nukhbat-ul-Fikr, (Text) Fasc. I	0	6
Nizámí's Khiradnámah-i-Iskandarí, (Text) Fasc. I and II @ /12/ each	1	8
uyúty's Itqán, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. II—IV, VII—X @ 1/ each	7	0

(*Turn over.*)

Tabaqát-i Násirí, (Text) Fasc. I—V @ /6/ each 1 14
Ditto (English) Fasc. I—XIV @ /12/ each 10 8
Táríkh-i-Fírúz Sháhi, (Text) Fasc. I—VII @ /6/ each 2 10
Táríkh-i-Baihaqí, (Text) Fasc. I—IX @ /6/ each 3 6
Wís o Rámín, (Text) Fasc. I—V @ /6/ each 1 14
Zafarnámah, Fasc. I—IX ; Vol. II, Fasc. III @ /6/ each 4 8

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. VII, IX to XI ; Vols. XIII and XVII, and Vols. XIX and XX @ /10/ each Rs. 80 0
   Ditto Index to Vols. I—XVIII 5 0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1865 (incl.) @ /4/ per No. ; and from 1870 to date @ /6/ per No.
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1849 (12), 1850 (7), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers; and for 1851 (7), 1857 (6), 1858 (5), 1861 (4) 1864 (5), 1865 (8), 1866 (7), 1867 (6), 1868 (6), 1869 (8). 1870 (8), 1871 (7) 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878, (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers.

N. B. The figures enclosed in brakets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784—1883 .. 3 0
   General Cunningham's Archæological Survey Report for 1863-64 (Extra No. J. A. S. B., 1864) 1 8
   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868) 1 8
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., J. A. S. B., 1875) 3 0
   Sketch of the Turki Language as spoken in Eastern Turkestan, Part II, Vocabulary, by R. B. Shaw (Extra No., J. A. S. B., 1878) 3 0
   A Grammar and Vocabulary of the Northern Balochí Language, by M. L. Dames (Extra No., J. A. S. B., 1880) 3 0
   Introduction to the Maithilí Language of North Bihár, by G. A. Grierson, Part I, Grammar (Extra No., J. A. S. B., 1880) .. 1 8
   Part II, Chrestomathy and Vocabulary (Extra No., J.A.S.B., 1882) 3 0
5. Anis-ul-Musharrihi 3 0
6. Catalogue of Fossil Vertebrata 2 0
7. Catalogue of the Library of the Asiatic Society, Bengal .. 3 8
8. Examination and Analysis of the Mackenzie Manuscripts by the Rev. W. Taylor 2 0
9. Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis .. 1 8
10. Istiláhát-us-Súfíyah, edited by Dr. A. Sprenger, 8vo. .. 1 0
11. Ináyah, a Commentary on the Hidáyah, Vols. II and IV, @16/ each 32 0
12. Jawámi-ul-'ilm ir-riyází, 168 pages with 17 plates, 4to. Part I 2 0
13. Khizánat-ul-'ilm 4 0
14. Mahábhárata, Vols. III and IV, @ 20/ each 40 0
15. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—II, with 5 coloured Plates, 4to. @ 6/ each .. 12 0
16. Purána Sangraha, I (Márkaṇḍeya Puráṇa), Sanskrit .. 1 0
17. Sharaya-ool-Islám 4 0
18. Tibetan Dictionary 4 0
19. Ditto Grammar 10 0
20. Vuttodaya, edited by Lt.-Col. G. E. Fryer 8 0
    Notices of Sanskrit Manuscripts, Fasc. I—XXI @ 1/ each .. 21 0
    Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra .. 5 0

N. B. All cheques, Money Orders &c. must be made payable to the "Treasury Asiatic Society" only.

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 647.

वराहपुराणम् ।

THE VARÁHA PURÁṆA

EDITED BY

PAṆḌIT HṚISHÍKEŚA ŚÁSTRÍ

Professor, Sanskrit College, Calcutta.

FASCICULUS V.

CALCUTTA:

PRINTED BY ŚAŚIBHÚSHAṆA BHAṬṬÁCHÁRYYA, AT THE GIRIŚA-VIDYÁRATNA PRESS,
24, GIRIŚA-VIDYÁRATNA'S LANE, UPPER CIRCULAR ROAD.

AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.

1887.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL

No. 57, PARK STREET, CALCUTTA.

AND OBTAINABLE FROM

THE SOCIETY'S LONDON AGENTS, MESSRS.

TRÜBNER & CO.

57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

Sanskrit Series.

Title		Rs.	As.
Átharvana Upanishads, (Sanskrit) Fasc. I—V @ /6/ each ..	Rs.	1	14
Áśvaláyana Grihya Sútra, (Sans.) Fasc. II—IV @ /6/ each ..		1	2
Agni Purána. (Sans.) Fasc. I—XIV @ /6/ each		5	4
Aitareya Áranyaka of the Rig Veda. (Sans.) Fasc. I—V @ /6/ each		1	14
Aphorisms of Sándilya, (English) Fasc. I		0	6
Aphorisms of the Vedánta, (Sans.) Fasc. III, V—XIII @ /6/ each ..		3	12
Ashtasáhasriká Prajnápáramitá. Fasc. I—IV @ /6/ each		1	8
Áśvavaidyaka, (Sans.) Fasc. I—III @ /6/ each		1	2
Brahma Sútras, (English) Fasc. I		0	12
Bhámati, (Sans.) Fasc. I—VIII @ /6/ each		3	0
Brihad Áranyaka Upanishad, (Sans.) Fasc. VI, VII & IX @ /6/ each		1	2
Ditto (English) Fasc. II—III @ /6/ each		0	12
Brihat Samhitá. (Sans.) Fasc. II—III, V—VII @ /6/ each ..		1	14
Chaitanya-Chandrodaya Nátaka, (Sans.) Fasc. II—III @ /6/ each		0	12
Chaturvarga Chintámani. (Sans.) Vols. I, Fasc. 1—11 ; II, 1—25 ; III. 1—XVII @ /6/ each Fasc.		19	14
Chhándogya Upanishad, (English) Fasc. II		0	6
Daśa Rúpa, (Sans.) Fasc. II—III @ /6/ each		0	12
Gopatha Bráhmana (Sans. & Eng.) Fasc. I and II @ /6/ each ..		0	12
Gobhilíya Grihya Sútra, (Sans.) Fasc. I—XII @ /6/ each ..		4	8
Hindú Astronomy, (English) Fasc. I—III @ /6/ each ..		1	2
Institutes of Paráśara		0	6
Kátantra, (Sans.) Fasc. I—VI @ /12/ each		4	8
Kathá Sarit Ságara, (English) Fasc. I—XIV @ /12/ each		10	2
Kála Mádhava, (Sans.) Fasc. I—III. @ /6/ each		1	2
Kauśítaki Bráhmanopanishads, Fasc. II		0	6
Kúrma Purána, (Sans.) Fasc. I—V @ /6/ each		1	14
Lalita Vistara, (Sans.) Fasc. II—VI @ /6/ each		1	14
Ditto (English) Fasc. I—III @ /12/ each		2	4
Madana Párijáta, (Sans.) Fasc. I. @ /6/		0	6
Manutíká Sangraha, Fasc. I—II @ /6/ each		0	12
Mímánsá Darśana, (Sans.) Fasc. II—XIX @ /6/ each		6	12
Márkandeya Purána, (Sans.) Fasc. IV—VII @ /6/ each		1	8
Nyáyavártikam, Fasc. I		0	6
Nrisimha Tápaní. (Sans.) Fasc. I—III @ /6/ each		1	2
Nirukta, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—6 ; Vol. III, Fasc. 1—6 ; Vol. IV, I—IV @ /6/ each		8	4
Nárada Pancharátra, (Sans.) Fasc. IV @ /6/ each		0	6
Nárada Smriti (Sans.) Fasc. I & II @ /6/ each		0	12
Nyáya Darśana, (Sans.) Fasc. III @ /6/ each		0	6
Nítisára, or, The Elements of Polity, By Kámandaki (Sans.) Fasc. II—V		1	8
Pariśishtaparvan, (Sans.) Fasc. I—IV @ /6/ each		1	8
Pingala Chhandah Sútra, (Sans.) Fasc. II—III @ /6/ each ..		0	12
Prithiráj Rásau, (Hindi) Fasc. I—VI @ /6/ each		2	4
Ditto (English) Fasc. I		0	12
Páli Grammar, (English) Fasc. I and II @ /6/ each		0	12
Prákrita Lakshanam, (Sans.) Fasc. I		1	8

(Continued on the third page of cover.)

तामेव चिन्तयन्शर्म्मं न लेभे दैत्यसत्तमः ।
मन्त्रिणश्चानयामास अलंशर्म्माणमुत्तमम् ॥ २ ।
तस्याष्टौ मन्त्रिणः शूरा नीतिमन्तोबहुश्रुताः ।
प्रघसो विघसश्चैव शङ्कुकर्णो विभावसुः ।
विद्युन्माली सुमाली च पर्ज्जन्यः क्रूर एव च ॥ ३ ।
एते मन्त्रिवरास्तस्य प्राधान्येन प्रकीर्त्तिताः ।
ते दानवेन्द्रमासीनमूचुः कार्य्यं विधीयताम् ॥ ४ ।
तेषां तद्वचनं श्रुत्वा दानवेन्द्रो महाबलः ।
उवाच कन्यालाभार्थं नारदावाप्तनिश्चयः ॥ ५ ।

महिष उवाच ।

मह्यन्तु कथिता बाला नारदेन महर्षिणा ।
सा चाजित्य सुराध्यक्षं न लभ्येत वराङ्गना ॥ ६ ।
एतदर्थं भवन्तो वै कथयन्तु विमृश्य मे ।
कथं सा लभ्यते बाला कथं देवाश्च निर्ज्जिताः ।
भवेयुरिति तत्सर्व्वं कथयन्तु द्रुतं मम ॥ ७ ।
एवमुक्तास्ततः सर्व्वं कथयामासुरञ्जसा ।
एवमुक्तस्तथोवाच प्रघसो दानवेश्वरम् ॥ ८ ।
या सा ते कथिता दैत्य नारदेन महासती ।
सा शक्तिः परमा देवी वैष्णवी रूपधारिणी ॥ ९ ।
गुरुपत्नी राजपत्नी तथा सामन्तयोषितः ।
जिघृक्षन्नश्यते* राजा तथागम्यागमेन च ॥ १० ।

---

* नश्यतीति साधु ।

प्रघसेनैवमुक्तस्तु विघसो वाक्यमब्रवीत् ।
सम्यगुक्तं प्रघसेन* तान्देवीं प्रति पार्थिव ।
यदि नाम मतैक्यन्तु बुद्धिः स्मरणमागता ॥ ११ ।
वरणीया कुमारी तु सर्व्वदा विजिगीषुभिः ।
न स्वतन्त्रेण कन्यायाः कार्य्यं क्वापि प्रकर्षणम् ॥ १२ ।
यदि वो रोचते वाक्यं मदीयं मन्त्रिसत्तमाः ।
तदानीं तां शुभां देवीं गत्वा याचन्तु† मन्त्रिणः ।
यो महात्मा भवेत्तस्या बन्धुस्तं याचयामहे ॥ १३ ।
साम्नैवादौ ततः पश्चात्करिष्यामः प्रदानकम् ।
ततो भेदं करिष्यामस्ततो दण्डं क्रमेण च ॥ १४ ।
अनेन क्रमयोगेन यदि सा नैव लभ्यते ।
ततः सन्नह्य गच्छामो बलाद्गृह्णीम‡ तां शुभाम् ॥ १५ ।
विघसेनैवमुक्तस्तु शेषास्तु मन्त्रिणो वचः ।
शुभमूचुः प्रशंसन्तः सर्व्वे हर्षितमानसाः§ ॥ १६ ।
साधूक्तं विघसेनेदं यत्तां प्रति वराननाम् ।
तदेव क्रियतां शीघ्रं दूतस्तत्र विसर्ज्ज्यताम्¶ ॥ १७ ।
यः सर्व्वशास्त्रनीतिज्ञः शुचिः शौर्य्यसमन्वितः ।

---

* अत्र पञ्चाक्षरगुरुत्वाभावाच्छन्दोदोषः ।

† याचन्तु इति आर्षं, याचन्तामिति साधु ।

‡ गृह्णीमस्तामिति साधु । तथात्वे छन्दोदोषः ।

§ हृष्टमानसा इति सम्यक् ।

¶ विसृज्यतामिति साधु ।

तस्माज्ज्ञात्वा तु तान्देवीं वर्णतो रूपतो गुणैः॥ १८।
पराक्रमेण शौर्य्येण शौण्डीर्य्येण बलेन च।
बन्धुवर्गेण सामग्र्यावास्थानकरणेन च।
एवं ज्ञात्वा तु तान्देवीं ततः कार्य्यं विधीयताम्* ॥ १९।
ततः सपदि दैत्यस्य तद्वचः साधु साध्विति।
प्रशशंसुर्वरारोहे विघसं मन्त्रिसत्तमम्।
प्रशस्य सर्व्वे तं दूतं सन्देष्टुमुपचक्रमुः॥ २०।
विद्युत्प्रभं महाभागं बहुमायाविदं शुभम्।
विसर्जयित्वा† तन्दूतं विघसो वाक्यमब्रवीत्॥ २१।
क्रियतां विजयस्तावद्देवसैन्यं प्रति प्रभो॥ २१।
सन्नह्यतां दानवेन्द्राश्चतुरङ्गबलेन ह।
असुरेन्द्र सुरैर्भग्नैस्त्वत्पराक्रमभीषितैः।
सा कन्या वशतामेति त्वयि शक्रे समागते॥ २२।
लोकपालैर्जितैः सर्व्वैस्तथैव मरुतां गणैः।
नागैर्विद्याधरैः सिद्धैर्गन्धर्वैः सर्पभोजनैः।
रुद्रैर्वसुभिरादित्यैस्त्वमेवेन्द्रो भविष्यसि॥ २३।
इन्द्रस्य ते शतं कन्या देवगन्धर्वयोषितः।
वशमायान्ति सापि स्यात्सर्वथा वशमागता॥ २४।
एवमुक्तस्तदा दैत्यः सेनापतिमुवाच ह।
विरूपाक्षं महामेघवर्णं नीलाञ्जनप्रभम्॥ २५।

---

* (ग) पुस्तके एवं ज्ञात्वेत्यनन्तरं षट्पादा न सन्ति।

† विसृज्येति सम्यक्।

आनीयतां द्रुतं सैन्यं हस्त्यश्वरथपत्तिनाम् ।
येन देवान्सगन्धर्वान् जयामि युधि दुर्जयान् ॥ २६ ।
एवमुक्ते विरूपाक्षे तदा सेनापतिर्द्रुतम् ।
आनिनाय महत्सैन्यमनन्तमपराजितम् ॥ २७ ।
एकैकोदानवस्तत्र वज्रहस्तसमो युधि ।
एकैकं स्पर्द्धते देवं जेतुं स्वेन बलेन ह* ॥ २८ ।
तेषां प्रधानभूतानामर्वुदं नवकोटयः ।
एकस्य येषां†मनुपाति तावद्बलमथोर्ज्जितम् ॥ २९ ।
तेषां नैकसहस्राणि दैत्यानान्तु महात्मनाम् ।
समितिं‡चक्रुरव्यग्रास्तदा दैत्याः प्रहारिणः ।
प्रयाणङ्कारयामासुर्देवसैन्यजिघांसया ॥ ३० ॥
विचित्रयाना विविधध्वजाग्रा
विचित्रशस्त्रा विविधोग्ररूपाः ।
दैत्याः सुराञ्जेतुमिच्छन्त उच्चै-
र्ननर्त्तुरात्तायुधयुक्तहस्ताः ॥ ३१ ।

इति वराहपुराणे नारदमहियासुरयोः परस्परसंवादो नाम
त्रयोनवतितमोऽध्यायः ।

---

* बलेन हीति (ख) ।

† तेषामिति (ख) ।

‡ समितिमिति (ग) ।

चतुर्नवतितमोऽध्यायः ।

वराह उवाच ।

ततो महिषदैत्यस्तु कामरूपी महाबलः ।
मत्तहस्तिनमारुह्य यियासुर्मेरुपर्व्वतम् ॥ १ ।
तत्रेन्द्रपुरमासाद्य देवैः सह शतक्रतुम् ।
अभिदुद्राव दैत्येन्द्रो देवान्क्रोधसमन्वितः ॥ २ ।
आदाय स्वानि शस्त्राणि वाहनानि विशेषतः ।
अधिष्ठाय सुरानाजौ दुद्रुवुर्मुदिता भृशम् ॥ ३ ।
तेषां प्रवहृते* युद्धन्तुमुलं लोमहर्षणम् ।
घोरं प्रचण्डयोधानामन्योन्यमभिगर्ज्जताम् ॥ ४ ।
तत्राञ्जनो नीलकुक्षिर्मेघवर्णोबलाहकः ।
उदाराक्षोललाटाक्षः सुभीमोभीमविक्रमः ।
स्वर्भानुश्चेति दैत्याष्टौ वसून्दुद्रुवुराहवे ॥ ५ ।
यथासंख्येन तद्वच्च दैत्या द्वादश चापरे ।
आदित्यान्दैत्यवर्य्यांस्तु तेषां प्राधान्यतः शृणु ॥ ६ ।
भीमोध्वांक्षोध्वस्तकर्णः शङ्कुकर्णस्तथैव च ।
वज्रको ज्योतिवीर्य्यश्च† विद्युन्माली तथैव च ।
रक्ताक्षो भीमदंष्ट्रस्तु विद्युज्जिह्वस्तथैव च‡ ॥ ७ ।

---

* प्रावर्त्तत इति (क) ।

† ज्योतिर्वीर्य्यश्चेति साधु, तथा कृते छन्दोदोषः ।

‡ (ग) पुस्तके एतदर्द्धं नास्ति ।

अतिकायोमहाकायोदीर्घबाहुः कृतान्तकः ।
एते द्वादश दैत्येन्द्रा आदित्यान्युधि दुद्रुवुः ॥ ८ ।
स्वकं सैन्यमुपादाय तद्वदन्येऽपि दानवाः ।
रुद्रान्दुद्रुवुरव्यग्रा यथासंख्येन कोपिताः ॥ ९ ।
कालः कृतान्तो रक्ताक्षो हरणोमित्रहा नलः ।
यज्ञहा ब्रह्महा गोघ्नः स्त्रीघ्नः संवर्त्तकस्तथा ॥ १० ।
इत्येते दश चैकश्च दैत्येन्द्रा युद्धदुर्मदाः ।
यथासंख्येन रुद्रांस्तु दुद्रुवुर्भीमविक्रमाः ॥ ११ ।
शेषान्देवान्शेषदैत्या यथायोगमुपाद्रवन् ।
स्वयं महिषदैत्यस्तु इन्द्रन्दुद्राव वेगतः ॥ १२ ।
स चापि बलवान्दैत्योब्रह्मणोवरदर्पितः ।
अवध्यः पुरुषेणाजौ यद्यपि स्यात्पिनाकधृक् ॥ १३ ।
आदित्यैर्वसुभिः सार्द्धं रुद्रैश्च निहता भृशम् ।
असुरा यातुधानाश्च संख्यापूरणकेवलाः ।
देवानामपि सैन्यानि निहतान्यसुरैर्युधि ॥ १४ ।
एवम्भूते तदा भग्ने देवेन्द्रे विद्रुताः सुराः ।
अर्द्दिता विविधैः शस्त्रैः शूलपट्टिशमुद्गरैः ॥ १५ ।
गतवन्तो ब्रह्मलोकमसुरैरर्द्दिताः सुराः ॥ १६ ।

इति वराहपुराणे त्रिशक्तिमाहात्म्ये महिषासुरवधे
चतुर्नवतितमोऽध्यायः ।

—०:०—

पञ्चनवतितमोऽध्यायः ।

वराह उवाच ।

अथ विद्युत्प्रभो दैत्यस्तथा दूतो विसर्ज्जितः ।
प्रणम्य प्रयतोभूत्वा कुमारीशतसङ्कुलाम् ।
अस्थाने विजयापन्नस्ततो वचनमब्रवीत् ॥ १ ।

विद्युत्प्रभ उवाच ।

देवि पूर्व्वमृषिस्त्वासीदादिसर्गैकसम्भवः ।
सखा सारस्वतो जातः सुपार्श्वो नाम वै विभुः ॥ २ ।
तस्याभवन्महातेजाः सिन्धुद्वीपः प्रतापवान् ।
स हि तीव्रन्तपस्तेपे माहिष्मत्यां पुरोत्तमे ॥ ३ ।
कुर्व्वतस्तु तपो घोरं निराहारस्य शोभने ।
आद्या तु विप्रचित्तेः सा सुता परमशोभना ।
माहिष्मतीति विख्याता रूपेणासदृशीभुवि* ॥ ४ ।
सा सखीभिः परिवृता विहरन्ती यदृच्छया ।
आगता मन्दरद्रोणीं तत्रापश्यत्तपोवनम् ॥ ५ ।
मुनेरश्वरसंज्ञस्य विविधद्रुमसाञ्चितम् ।
लताढ्यैस्तु विविधैर्वकुलैर्लकुचैस्तथा ।
चन्दनैः स्पन्दनैः शालैः सरलैरुपशोभितम्† ॥ ६ ।

---

* रूपेणाप्रतिमा भुवीति (क), (ख) ।

† शोभितैरिति (ख) ।

विचित्रवनखण्डैश्च भूषितन्तु महात्मनः ।
दृष्ट्वाश्रमपदं रम्यं साऽसुरी कन्यका शुभम् ।
माहीषती वरारोहा चिन्तयामास भामिनी ॥ ७ ।
भीपयित्वाऽहमेनन्तु तापसन्त्वाश्रमे स्वयम् ।
तिष्ठामि क्रीड़ती सार्द्धं सखीभिः परमार्च्चिता ॥ ८ ।
एवं सञ्चिन्त्य सा देवी महिषी सम्बभूव ह* ।
सखीभिः सह विभ्रेम्रि तीक्ष्णशृङ्गाग्रधारिणी ॥ ९ ।
तमृषिं भीषितुं† ताभिः सह गत्वा वरानना ।
असौ विभीषितस्ताभिस्तां ज्ञात्वा ज्ञानचक्षुषा ।
आसुरीं क्रोधसम्पन्नः शशाप शुभलोचनाम् ॥ १० ।
यस्माद्भीषयसे मान्त्वं महिषीरूपधारिणी ।
अतो भव महिष्येव पापकर्म्मे शतं समाः ॥ ११ ।
एवमुक्ता ततः सा तु सखीभिः सह वेपती‡ ।
पादयोर्न्यपतत्तस्य शापान्तं कुरु जल्पती§ ॥ १२ ।
तस्यास्तद्वचनं श्रुत्वा स मुनिः करुणान्वितः ।
शापान्तमकरोत्तस्या वाक्यञ्चेदमुवाच ह ॥ १३ ।
अनेनैव स्वरूपेण पुत्रमेकं प्रसूय वै ।
शापान्तो भविता भद्रे मद्वाक्यं न मृषा भवेत् ॥ १४ ।

---

* सम्बभूव लिति (ग) ।

† भीपयितुमिति साधु ।

‡ वेपमानेति साधु ।

§ जल्पन्तीति साधु ।

एवमुक्त्वा गता सा तु नर्म्मदातीरमुत्तमम् ।
यत्र तेपे तपो घोरं सिन्धुद्वीपो महातपाः ॥ १५ ।
तत्र चेन्दुमती नाम दैत्यकन्यातिरूपिणी ।
सा दृष्टा तेन मुनिना विवस्त्रा मज्जती जले ।
चस्कन्द स मुनिः शुक्रं शिलाद्रोण्यां महातपाः ॥ १६ ।
तच्च माहिष्मती दृष्ट्वा दिव्यगन्धि सुगन्धि च ।
ततः सखीरुवाचेदं पिवामीदं जलं शुभम् ॥ १७ ।
एवमुक्त्वा तु सा पीत्वा तच्छुक्रं मुनिसम्भवम् ।
प्राप्ता गर्भं मुनेर्वीर्य्यात्सुषुवे च तदा सती ॥ १८ ।
तस्याः पुत्रोऽभवद्भीमान्महाबलपराक्रमः ।
महिषेति* स्मृतो नाम्ना ब्रह्मवंशविवर्द्धनः ॥ १९ ।
स त्वां वरयते देवि देवसैन्यविमर्द्दनः ।
स सुरानपि जित्वाजौ त्रैलोक्यञ्च तवानघे ।
दास्यते देवि सुप्रीतस्तव सर्व्वं महासुरः ।
तस्यात्मोपप्रदानेन कुरु देवि महत्कृतम् ॥ २० ।
एवमुक्त्वा तदा देवी तेन दूतेन शोभना ।
जहास परमा देवी वाक्यं नोवाच किञ्चन ॥ २१ ।
तस्या हसन्त्या दूतोऽसौ त्रैलोक्यं सचराचरम् ।
ददर्श कुक्षौ सम्भ्रान्तस्तत्क्षणात्समजायत† ॥ २२ ।

---

* महिष इति साधु ।

† समपद्यतेति (ग) ।

ततो देव्याः प्रतीहारी जयाख्या अतितेजना ।
देव्या हृदि स्थितं वाक्यमुवाच तनुमध्यमा ॥ २३ ।

जया उवाच ।

कन्यार्थी वदते* यत्तु तत्त्वया समुदीरितम् ।
यदि नाम व्रतञ्चास्याः कौमारं सर्व्वकालिकम् ॥ २४ ।
अपि चान्याः कुमार्य्योऽत्र सन्ति देव्याः पदानुगाः ।
तासामेकापि नो लभ्या किमु देवी स्वयं शुभा ।
याहि दूत त्वरं† मा ते किञ्चिदन्यद्भविष्यति ॥ २५ ।
एवमुक्तो गतो दूतस्तावद्व्योम्नि महामुनिः ।
आयातो नारदस्तूर्णं रणन्नुच्चैः‡र्महातपाः ॥ २६ ।
दिष्ट्या दिष्ट्येति चागत्य तां कन्यां प्रणिपत्य च§ ।
उपविष्टो जगादाथ आसने परमेऽर्च्चितः ।
प्रणम्य देवीः सर्व्वास्ताः¶ उवाच च महातपाः ॥ २७ ।
देवि देवैरहं प्रीतः प्रेषितोऽस्मि तवान्तिकम् ।
महिषाख्येन दैत्येन युधि देवा विनिर्ज्जिताः‖ ॥ २८ ।

---

* वदतीति साधु ।

† त्वरमित्यार्षं, त्वरया, सत्वरं वेति साधु ।

‡ नृत्यन्नुच्चैरिति (ग) ।

§ दिष्ट्यादिष्ट्येति वदतस्तां देवीं शुभलोचनामिति (ग) ।

¶ देवीं सर्व्वशोभामिति (ग) ।

‖ विजिता देवि दैत्येन महिषाख्येन निर्ज्जिताः इति (ग) । अत्र विजितैर्निर्जितैरिति कृते तु सङ्गतिः स्यात् ।

त्वाङ्गृहीतुं प्रयत्नं स कृतवान्देवि दैत्यराट् ।
एवमुक्तोऽस्मि* देवैस्त्वां बोधयामि वरानने ॥ २९ ॥
स्थिरीभूता महादेवी तं दैत्यम्प्रतिघातय ।
उक्त्वैवान्तर्हितः सद्यो नारदः स्वेच्छया ययौ ।
देवी च कन्यास्ताः सर्व्वाः सन्नह्यन्तामुवाच ह ॥ ३० ॥
ततः कन्या महाभागाः सर्व्वास्ता देवीशासनात् ।
बभूवुर्घोररूपिण्यः खड्गचर्म्मधनुर्धराः ।
सङ्ग्रामहेतोः सन्तस्थु†र्दैत्यविध्वंसनाय ताः ॥ ३१ ॥
तावद्दैत्यबलं सर्व्वं मुक्त्वा देवचमून्द्रुतम् ।
आययौ यत्र तद्देव्याः सन्नद्धं स्त्रीबलं महत् ॥ ३२ ॥
ततस्ता युयुधुः कन्या दानवैः सह दर्पिताः ।
क्षणेन तद्बलन्ताभिश्चतुरङ्गं निपातितम् ॥ ३३ ॥
शिरांसि तत्र केषाञ्चिच्छिन्नानि पतितानि च ।
अपरेषां विदार्य्योरः क्रव्यादाः पान्ति शोणितम् ॥ ३४ ॥
अन्ये कबन्धभूतास्तु नन्टतुर्दैत्यनायकाः ।
एवं क्षणेन ते सर्व्वे विद्रुताः पापचेतसः ॥ ३५ ॥
अपरे विद्रुताः सर्व्वे यत्रासौ महिषासुरः ।
ततो हाहाकृतं सर्व्वं तथा दैत्यबलं महत् ॥ ३६ ॥
एवं तदाकुलं दृष्ट्वा महिषो वाक्यमब्रवीत् ।

---

* उक्तोऽयेति (ग) ।

† सन्तस्थुरिति आर्षं, सन्तस्थिरे इति साधु ।

सेनापते किमेतद्धि बलं भग्नं ममाग्रतः ॥ ३७ ।
ततो यज्ञहनुर्नामा दैत्यो हस्तिस्वरूपवान् ।
उवाच भग्नमेतद्धि कुमारीभिः समन्ततः ॥ ३८ ।
ततो दुद्राव महिषस्ताः कन्या शुभलोचनाः ।
गदामादाय तरसा घातितुन्तास्ततोऽसुरः* ॥ ३९ ।
यत्र तिष्ठति सा देवी देवगन्धर्व्वपूजिता ।
तत्रैव सोऽसुरः प्रायायत्र देवी व्यवस्थिता ॥ ४० ।
सा च दृष्ट्वा तमायान्तं विंशद्धस्ता† बभूव ह ।
धनुः खड्गं तथा शक्तिं‡ शरान् शूलं गदान्तथा ॥ ४१
मुसलञ्च§ तथा चक्रं भिन्दिपालं तथैव च ।
दण्डं पाशं ध्वजञ्चैव पद्मञ्चेति च विंशतिः ॥ ४२ ।
भूत्वा विंशद्भुजा देवी सिंहमास्थाय दंशिता ।
सस्मार रुद्रं देवेशं रौद्रं संहारकारणम् ॥ ४३ ।
ततोवृषध्वजः साक्षाद्भूतन्तत्रैव आययौ ।
तया प्रणम्य विज्ञप्तः सर्व्वान्दैत्यान्जयाम्यहम् ।
त्वयि सन्निधिमात्रे तु देवदेव सनातन ॥ ४४ ।
एवमुक्त्वाऽसुरान्सर्व्वाञ्जिगाय परमेश्वरी ।
मुक्त्वा तमेकं महिषं शेषं हत्वा तमध्ययात् ।

---

* कन्या दुद्राव वेगवानिति (ग) ।

† विंशद्धस्तेति आर्षं, विंशतिहस्तेति साधु । एवं परत्र विंशद्भुजेति ।

‡ धनुः शक्तिं तथा खड्गमिति (ख) ।

§ मुशलमिति (ग) ।

यावद्देवी ततः सापि तां दृष्ट्वा सोऽपि दुद्रुवे ॥ ४५ ।
क्वचिद्युध्यति* दैत्येन्द्रः क्वचिच्चैव पलायति ।
क्वचित्पुनर्मृधञ्चक्रे क्वचित्पुनरुपारमत् ॥ ४६ ।
एवं वर्षसहस्राणि दश तस्य तया सह ।
दिव्यानि विगतानि सु†युध्यतश्चैव‡ शोभने ॥ ४७ ।
बभ्राम सकलन्त्वाजौ ब्रह्माण्डं भीतमानसम् ।
ततः कालेन महता शतशृङ्गे महागिरौ ।
पद्भ्यामाक्रम्य शूलेन निहतो दैत्यनायकः§ ॥ ४८ ।
शिरश्चिच्छेद खड्गेन तत्र चान्तःस्थितः¶ पुमान् ।
निर्गत्य विगतः स्वर्गं देव्याः शस्त्रनिपातनात् ॥ ४९ ।
ततो देवगणाः सर्व्वे महिषं वीक्ष्य निर्ज्जितम् ।
सब्रह्मकाः स्तुतिञ्चक्रुर्देव्यास्तुष्टेन चेतसा ॥ ५० ।

देवा ऊचुः ।

नमो देवि महाभागे गम्भीरे भीमदर्शने ।
जयस्थे स्थितिसिद्धान्ते त्रिनेत्रे विश्वतोमुखि ॥ ५१ ।
विद्याविद्ये जपे जाप्ये महिषासुरमर्द्दिनि ।

---

* द्रुह्यतीति (क), (ख) ।

† बभूवुरित्यर्थे सुरित्यार्षम् ।

‡ युध्यतस्तस्य शोभन इति (ग) ।

§ दैत्यसत्तम इति (ग) ।

¶ अन्ते स्थित इति (ग) ।

सर्व्वंगे सर्व्वदेवेशि विश्वरूपिणि वैष्णवि ॥ ५२ ।
वीतशोके ध्रुवे देवि पद्मपत्रशुभेक्षणे ।
शुद्धसत्त्वव्रतस्थे च चण्डरूपे विभावरि ॥ ५३ ।
ऋद्धिसिद्धिप्रदे देवि विद्येऽविद्येऽमृते शिवे ।
शाङ्करी वैष्णवी ब्राह्मी सर्व्वदेवनमस्कृते ॥ ५४ ।
घण्टाहस्ते त्रिशूलास्त्रे महामहिषमर्द्दिनि ।
उग्ररूपे विरूपाक्षि महामायेऽमृतस्रवे ॥ ५५ ।
सर्व्वसत्त्वहिते देवि सर्व्वसत्त्वमये ध्रुवे ।
विद्यापुराणशिल्पानां जननी भूतधारिणि ॥ ५६ ।
सर्व्ववेदरहस्यानां सर्व्वसत्त्ववतां* शुभे ।
त्वमेव शरणं देवि विद्येऽविद्ये श्रियेऽम्बिके ॥ ५७ ।
विरूपाक्षि तथा क्षान्तिः क्षोभितान्तर्जलेऽमले† ।
नमोऽस्तु ते महादेवि नमस्ते परमेश्वरि‡ ॥ ५८ ।
शरणं त्वां प्रपद्यन्ते ये देवि परमेश्वरि ।
न तेषाञ्जायते किञ्चिदशुभं रणसङ्कटे ॥ ५९ ।
यश्च व्याघ्रभये घोरे चौरराजभये तथा ।
स्तवमेनं सदा देवि पठिष्यति यतात्मवान् ॥ ६० ।
निगड़स्थोऽपि यो देवि त्वां स्मरिष्यति मानवः ।

---

* सत्त्वमतामिति (ग) ।

† जलं विलेति (ग) ।

‡ (ग) पुस्तके नमस्ते सर्व्वदेवानां भावनित्ये क्षयक्षये इत्यधिकार्द्धं वर्त्तते ।

सोऽपि बन्धैर्विनिर्मुक्तः* सुसुखं वसते सुखी ॥ ६१ ।

वराह उवाच ।

एवं स्तुता तदा देवी देवैः प्रणतिपूर्व्वकम् ।
उवाच देवान् सुश्रोणि वृणुध्वं† वरमुत्तमम् ॥ ६२ ।

देवा ऊचुः ।

देवि स्तोत्रमिदं ये हि पठिष्यन्ति तवानघे ।
सर्व्वकामसमापन्नान् कुरु देवि स नो वरः‡ ॥ ६३ ।
एवमस्त्विति तान्देवानुक्ता देवी परापरा ।
विससर्ज ततो देवान् स्वयं तत्रैव संस्थिता ॥ ६४ ।
एतद्द्वितीयं यो जन्म वेद देव्या धराधरे ।
स वीतशोको विरजाः पदं गच्छत्यनामयम् ॥ ६५ ।

इति वराहपुराणे त्रिशक्तिमाहात्म्ये महिषासुरवधो नाम
पञ्चनवतितमोऽध्यायः ।

---

* विमुक्तस्त्विति (ग) ।

† शृणुध्वमिति (ख), वृणुध्वेति (ग) ।

‡ स्तुता वर इति ।

पञ्चवतितमोऽध्यायः ।

वराह उवाच ।

या सा नीलगिरिं याता तपसे धृतमानसा ।
रौद्री तमोद्भवा शक्तिस्तस्याः शृणु धरे व्रतम् ॥ १ ।
तपः कृत्वा चिरं कालं पालयाम्यखिलं* जगत् ।
एवमुद्दिश्य पञ्चाग्निं साधयामास भामिनी ॥ २ ।
तस्याः कालान्तरे देव्यास्तपन्त्यास्तपः† उत्तमम् ।
रुरुर्नाम महातेजाः ब्रह्मदत्तवरोऽसुरः ॥ ३ ।
समुद्रमध्ये रत्नाढ्यं पुरमस्ति महावनम्‡ ।
तत्र राजा स दैत्येन्द्रः सर्व्वदेवभयङ्करः ॥ ४ ।
अनेकशतसाहस्रकोटिकोटिशतोत्तरैः ।
असुरैरन्वितः श्रीमान्द्वितीयो नमुचिर्यथा ॥ ५ ।
कालेन महता चासौ§ लोकपालपुराण्यथ ।
जिगीषुः सैन्यसंवीतो देवैर्युद्धमरोचयत् ॥ ६ ।
उत्तिष्ठतस्तस्य महासुरस्य
समुद्रतोयं ववृधेऽतिमात्रम् ।

---

* स्थिरं जगदिति (ग) ।

† तप्यमानायास्तप इति साधु ।

‡ महापुरमिति (ग) ।

§ वीर्ये इति (ग) ।

अनेकनक्रग्रहमीनजुष्ट-*
माप्लावयत्पर्व्वतसानुदेशान्† ॥ ७ ॥
अन्तःस्थितानेकसुरारिसङ्घा-
द्विचित्रवर्म्मायुधचित्रशोभम् ।
भीमं बलं वर्म्मितचारुयोधं
विनिर्ययौ सिन्धुजलाद्विशालात्‡ ॥ ८ ॥
तत्र द्विपा दैत्यवरैरुपेताः
समानघण्टायुतकिङ्किणीकाः ।
विनिर्ययुः स्वाकृतिभीषणाश्च
समत्वमुच्चैः खलु दर्शयन्तः ॥ ९ ॥
अश्वास्तथा काञ्चनपीठनद्धा
रोहैस्तु युक्ताः सितचामरैश्च§ ।
व्यवस्थितास्ते सममेव तूर्णं
विनिर्ययुर्लक्षशः कोटिशश्च ॥ १० ॥
रथा रविस्यन्दनतुल्यवेगाः
सुचक्रदण्डाक्षत्रिवेणुयुक्ताः¶ ।

---

* ग्रहजालजुष्टमिति (ग) ।

† आपातयत्सर्व्वतशारदेशानिति (क), (ख) ।

‡ विशालमिति (ग) ।

§ रोहितमत्तैः समभा जलान्तरिति (ग) ।

¶ नियवेणयुक्ता इति (ख) ।

सुशस्त्रयन्त्राः परि*पीड़िताङ्गा-
श्चलन्त्यनन्ताः† त्वरितं विशक्ताः ॥ ११ ।
तथैव योधाः स्वगितेतरेतरा-
स्तितीर्षवो ये वरतूणपाणयः ।
पदे पदे लब्धजयाः प्रहारिणो
विरेजुरुच्चैरसुरानुगा भृशम् ॥ १२ ।
देवेषु चैव भग्नेषु विनिर्गत्य जलात्ततः ।
चतुरङ्गबलोपेतः प्रायादिन्द्रपुरं प्रति ॥ १३ ।
युयोध च सुरैः सार्द्धं रुरुर्दैत्यपतिस्तथा ।
मुद्गरैर्मुशलैर्घोरैः‡ शरैर्दण्डायुधैस्तथा ।
जघ्नुर्दैत्याः§ सुरान् संख्ये सुराश्चैव तथासुरान् ॥ १४
एवं क्षणमथो युद्धा तदा देवाः सवासवाः ।
असुरैर्निर्ज्जिताः सद्यो दुद्रुवुर्विमुखा भृशम् ॥ १५ ।
देवेषु चैवभ्भग्नेषु विद्रुतेषु विशेषतः ।
असुरः सर्व्वदेवानामन्वधावत वीर्य्यवान् ॥ १६ ।
ततोदेवगणाः सर्व्वे द्रवन्तो भयविह्वलाः ।
नीलं गिरिवरं जग्मुर्यत्र देवी व्यवस्थिता ॥ १७ ।

---

* सुशस्त्रपणीपरीति (ग) ।

† चलत्पताका इति (ख), (ग) ।

‡ शूलैरिति (ग) ।

§ यघुर्दैत्या इति (ग) ।

रौद्री तपोरता देवी तामसी शक्तिरुत्तमा ।
संहारकारिणी देवी कालरात्रीति तां विदुः ॥ १८ ॥
सा दृष्ट्वा तांस्तदा देवान् भयत्रस्तान्विचेतसः ।
मा भैष्टेत्युच्चकैर्देवी तानुवाच सुरोत्तमान् ॥ १९ ॥

देव्युवाच ।

किमियं व्याकुला देवा गतिर्व उपलक्ष्यते ।
कथयध्वं द्रुतन्देवाः सर्व्वथा भयकारणम्* ॥ २० ॥

देवा ऊचुः ।

अयमायाति दैत्येन्द्रो रुरुर्भीमपराक्रमः ।
एतस्य† भीतान्नक्ष त्वं देवान् परमेश्वरि ॥ २१ ॥
एवमुक्ता तदा देवैर्देवी भीमपराक्रमा ।
जहास परया प्रीत्या देवानां पुरतः शुभा ॥ २२ ॥
तस्यां हसन्त्या वक्त्रात्तु बह्व्योदेव्योविनिर्ययुः ।
याभिर्विश्वमिदं व्याप्तं विकृताभिरनेकशः ॥ २३ ॥
पाशाङ्कुशधराः सर्व्वाः सर्व्वाः पीनपयोधराः ।
सर्व्वाः शूलधरा भीमाः सर्व्वाश्चापधराः शुभाः ॥ २४ ॥
ताः सर्व्वाः कोटिशो देव्यस्तां देवीं वेष्ठ्य‡ संस्थिताः ।
युयुधुर्दानवैः सार्द्धं वज्रतूणा महाबलाः ॥ २५ ॥

---

* भयकारिणमिति (ख) ।

† एतस्येति विवक्षायां षष्ठी, एतस्मादिति साधु ।

‡ वेष्ठ्येति आर्षं, वेष्टित्वेति साधु ।

क्षणेन दानवबलं तत्सर्व्वं निहतन्तु तैः ।
देवाश्च सर्व्वे सम्पन्ना युयुधुर्दानवं बलम् ॥ २६ ।
कालरात्र्या बलञ्चैव यच्च देवबलं महत् ।
तत्सर्व्वन्दानवबलमनयद्यमसादनम् ॥ २७ ।
एक एव महादैत्यो रुरुस्तस्थौ महामृधे ।
स च* मायां महारौद्रीं रौरवीं विससर्ज्ज ह ॥ २८ ।
सा माया ववृधे भीमा सर्व्वदेवप्रमोहिनी ।
तया विमोहिता देवाः सर्व्वे निद्रान्तु लेभिरे† ॥ २९ ।
देवी च त्रिशिखेनाजौ तं दैत्यं समताड़यत् ॥ ३० ।
तया तु ताड़ितस्यास्य दैत्यस्य शुभलोचने ।
चर्म्ममुण्डे उभे सम्यक् पृथग्भूते बभुवतुः ॥ ३१ ।
रुरोस्तु दानवेन्द्रस्य चर्म्ममुण्डे क्षणाद्यतः ।
अपहृत्याहरद्देवी चामुण्डा तेन साऽभवत् ॥ ३२ ।
सर्व्वभूतमहारौद्री या देवी परमेश्वरी ।
संहारिणी तु या चैव कालरात्रिः प्रकीर्त्तिता ॥ ३३ ।
तस्या ह्यनुचरा देव्यो बाह्यसंख्यातकोटयः ।
तास्तान्देवीं महाभागां परिवार्य्य व्यवस्थिताः ।
याचयामासुरव्यग्रास्तास्तान्देवीं बुभुक्षिताः ॥ ३४ ।
वयं देवि क्षुधार्त्ताः स्मो देहि नो भोजनं शुभे ।

---

* स्राचेति (ग) ।

† सर्वे निद्रान्तु भेजिरे इति (ग) ।

एवमुक्ता तदा देवी दध्यौ तासान्तु भोजनम् ॥ ३५ ।
न चाध्यगच्छच्च* यदा तासां भोजनमन्तिकात् ।
ततो दध्यौ महादेवं रुद्रं पशुपतिं विभुम् ॥ ३६ ।
सोऽपि ध्यानात्समुत्तस्थौ परमात्मा त्रिलोचनः ।
उवाच च द्रुतं देवीं किन्ते कार्यं विवक्षितम् ।
ब्रूहि देवि वरारोहे यत्ते मनसि वर्त्तते ॥ ३७ ।

देव्युवाच ।

भक्ष्यार्थमासां देवेश किञ्चिद्दातुमिहार्हसि ।
बलात्कुर्व्वन्ति मामेता भक्षार्थिन्यो महाबलाः ।
अन्यथा मामपि बलाद्भक्षयिष्यन्ति ताः प्रभो ॥ ३८ ।

रुद्र उवाच ।

एतासां शृणु देवेशि भक्ष्यमेकं मयोदितम् ।
कथ्यमानं वरारोहे कालरात्रे† महाप्रभे ॥ ३९ ।
या स्त्री सगर्भा देवेशि अन्यस्त्रीपरिधानकम् ।
परिधत्ते स्पृशेच्चापि‡ पुरुषस्य विशेषतः ।
स भागोऽस्तु महाभागे कासाञ्चित्पृथिवीतले ॥ ४० ।
अन्यास्छिद्रेषु वाऽज्ञानां§ गृहीत्वा तत्र वै बलिम् ।

---

* नाध्यगच्छद्यदेति (ग)।

† कालरात्रीति (ग)।

‡ स्पृशेद्वापीति (ग)।

§ बालानीति (क), (ख), अत्राऽपत्यानीत्यूह्यं, सामान्यार्थे नपुंसकम्।

लब्ध्वा भवन्तु सुप्रीता अपि वर्षशतान्यपि ॥ ४१ ।
अन्याः सूतिगृहे च्छिद्रं गृह्णीयुस्तत्र पूजिताः ।
निवसिष्यन्ति* देवेशि† तथान्या जातहारिकाः ॥ ४२ ।
गृहे चैत्रे तड़ागेषु वाप्युद्यानेषु चैव हि ।
अन्यचित्ताः‡ रुदन्त्यो याः स्त्रियस्तिष्ठन्ति नित्यशः ।
तासां शरीराण्याविश्य काश्चि§त्तृप्तिमवाप्स्यथ ॥ ४३ ।
एवमुक्त्वा तदा देवीं स्वयं रुद्रः प्रतापवान् ।
दृष्ट्वा रुरुञ्च सबलमसुरेन्द्रं निपातितम् ।
स्तुतिञ्चकार भगवान् स्वयं देवस्त्रिलोचनः ॥ ४४ ।

रुद्र उवाच ।

जयस्व देवि चामुण्डे जय भूतापहारिणि ।
जय सर्व्वगते देवि कालरात्रि¶ नमोऽस्तु ते‖ ॥ ४५ ।
विश्वमूर्त्ते शुभे शुद्धे विरूपाक्षि त्रिलोचने ।
भीमरूपे शिवे वेद्ये महामाये महोदये ॥ ४६ ।
मनोजवे** जये जृम्भे भीमाक्षि क्षुभितक्षये ।

---

* निवसिष्यन्तीति आर्षं, निवत्स्यन्तीति साधु ।

† देवेशे चेति (ख) ।

‡ अन्यचिन्ता इति (ख) ।

§ काश्चिदिति (ग)

¶ कालरात्रीति (ग) ।

‖ मार्कण्डेये देवीमाहात्म्येऽपि श्लोकोऽयं दृश्यते ।

** महाजये इति (ग) ।

महामारि विचित्राङ्गि जय नृत्यप्रिये शुभे ॥ ४७ ।
विकराले* महाकालि कालिके पापहारिणि ।
पाशहस्ते दण्डहस्ते भीमरूपे भयानके ॥ ४८ ।
चामुण्डे ज्वलमानास्ये तीक्ष्णदंष्ट्रे महाबले† ।
शवयानस्थिते देवि प्रेतासनगते शिवे ॥ ४९ ।
भीमाक्षि भीषणे देवि सर्व्वभूतभयङ्करि ।
कराले विकराले च महाकाले करालिनि ।
काली कराली विक्रान्ता कालरात्रि नमोऽस्तु ते ॥ ५० ।
इति स्तुता तदा देवी रुद्रेण परमेष्ठिना ।
तुतोष परमा देवी वाक्यञ्चेदमुवाच ह ।
वरं वृणीष्व देवेश यत्ते मनसि वर्त्तते ॥ ५१ ।

रुद्र उवाच ।

स्तोत्रेणानेन ये देवि त्वां स्तुवन्ति वरानने ।
तेषान्त्वं वरदा देवि भव सर्व्वगता सती ॥ ५२ ।
यश्चेमन्त्रिःप्रकारन्तु देवि भक्त्या समन्वितः ।
स पुत्रपौत्रपशुमान् समृद्धिमुपगच्छति ॥ ५३ ।
यश्चेमं शृणुयाद्भक्त्या त्रिशक्त्यास्तु समुद्भवम् ।
सर्व्वपापविनिर्मुक्तो पदङ्गच्छत्यनामयम् ॥ ५४ ।

---

* विकरालीति (ग) ।

† महाबले इति (क) ।

एवं स्तुत्वा भवो* देवीं चामुण्डाञ्च सुरेश्वरीम्† ।
क्षणादन्तर्हितो देवस्ते च देवा दिवं ययुः ॥ ५५ ॥
य एतां वेद वै देव्या उत्पत्तिं त्रिविधां वराम्‡ ।
स कर्म्मपाशनिर्मुक्तः§ परं निर्व्वाणमृच्छति ॥ ५६ ॥
भ्रष्टराज्यो यदा राजा नवम्यान्नियतः शुचिः ।
अष्टम्याञ्च चतुर्द्दश्यामुपवासी नरोत्तमः ।
संवत्सरेण लभते राज्यं निष्कण्टकं नृपः ॥ ५७ ॥
एषा त्रिशक्तिरुद्दिष्टा नयसिद्धान्तगामिनी ।
एषा श्वेता¶परा सृष्टिः सात्त्विकी ब्रह्मसंस्थिता ॥ ५८ ॥
एषैव रक्ता रजसि वैष्णवी परिकीर्त्तिता ।
एषैव कृष्णा तमसि रौद्री देवी प्रकीर्त्तिता ॥ ५९ ॥
परमात्मा यथा देव एक एव त्रिधा स्थितः ।
प्रयोजनवशाच्छक्तिरेकैव त्रिविधाऽभवत् ॥ ६० ॥
य एतं शृणुयात्सर्गं त्रिशक्त्याः परमं शिवम् ।
सर्व्वपापविनिर्मुक्तः परन्निर्व्वाणमाप्नुयात् ॥ ६१ ॥
यश्चेमं शृणुयान्नित्यं नवम्यां नियतः स्थितः ।

---

* तत इति (क), (ख) ।

† परमेश्वरीमिति (ख) ।

‡ परे इति (ग) ।

§ सर्व्वपापविनिर्मुक्त इति (ख) ।

¶ एषा सितेति (ग) ।

स राज्यमतुलं लेभे* भयेभ्यश्च प्रमुच्यते ॥ ६२ ।
यस्येदं लिखितं गेहे सदा तिष्ठति धारितम्† ।
न तस्याग्निभयं घोरं सर्पचौरादिजं भवेत् ॥ ६३ ।
यश्चेमं पूजयेद्भक्त्या पुस्तकेऽपि स्थितं बुधः ।
तेन यष्टं‡ भवेत्सर्व्वं त्रैलोक्यं सचराचरम् ॥ ६४ ।
जायन्ते पशवः पुत्रा धनं धान्यं वराः स्त्रियः ।
रत्नान्यश्वास्तथा गावो दासा दास्यो भवन्ति हि§ ।
यस्येदं तिष्ठते¶ गेहे तस्य सम्पद्भवेद्ध्रुवम् ॥ ६५ ।

वराह उवाच ।

एतदेव|| रहस्यन्ते कीर्त्तितं भूतधारिणि ।
रुद्रस्य खलु माहात्म्यं सकलं कीर्त्तितं मया ॥ ६६ ।
नवकोट्यस्तु चामुण्डा भेदभिन्ना व्यवस्थिताः ।
या रौद्री तामसी शक्तिः सा चामुण्डा प्रकीर्त्तिता ॥ ६७ ।
अष्टादश तथा कोट्योवैष्णव्या भेद उच्यते ।
या विष्णो** राजसी शक्तिः पालनी चैव वैष्णवी ।

---

* लेभे इत्यार्षं, लभेतेति साधु ।

† धारिणीति (ग) ।

‡ इष्टमिति साधु ।

§ भवन्त्यपीति (ख) । रत्नान्यश्वगवा भृत्या यानान्याशु भवन्त्यत इति (ग) ।

¶ तिष्ठतीति साधु ।

|| एतद्देवीति (ग) ।

** या सात्त्विति (ग) ।

या ब्रह्मशक्तिः सत्त्वस्था सा अनन्ता प्रकीर्त्तिता* ॥ ६८ ।
एतासां सर्व्वभेदेषु पृथगेकैकशो धरे† ।
सर्व्वासां भगवान्रुद्रः सर्व्वगश्च पतिर्भवेत् ॥ ६९ ।
यावन्त्यस्या महाशक्त्यास्तावद्रूपाणि शङ्करः ।
कृतवांस्ताश्च‡ भजते पतिरूपेण सर्व्वदा ॥ ७० ।
यश्चाराधयते तस्य रुद्रस्तुष्टो भविष्यति§ ।
सिध्यन्ति तस्य कामाश्च मनसा चिन्तिता अपि¶ ॥ ७१ ।

इति वराहपुराणे त्रिशक्तिमाहात्म्यं नाम षण्णवतितमोऽध्यायः ।

सप्तनवतितमोऽध्यायः ।

वराह उवाच ।

अथ रुद्रव्रतोत्पत्तिं शृणु देवि वरानने ।
येन व्रातेन पापेभ्यो* मुच्यते नात्र संशयः ॥ १ ।

---

* अनन्तास्तु प्रकीर्त्तिताः इति (ग) ।

† साधने इति (ख) ।

‡ कृत्तिवाससाश्चेति (ग) ।

§ यश्चाराधयेत्तास्तु तस्य रुद्रोभविष्यतीति (ग) ।

¶ सिध्यन्ति तास्तदा देव्यो मन्त्रयोगाश्च संशय इति (ग) ।

---

* पापानामिति (ग) ।

ब्रह्मणा तु यदा सृष्टः पूर्व्वं रुद्रो* वरानने।
तृतीये जन्मनि विभुः पिङ्गाक्षो नीललोहितः॥ २॥
तदा कौतूहलाद्ब्रह्मा स्कन्धे तं जगृहे प्रभुः।
स्कन्धारूढस्तदा रुद्रो ब्रह्मणोऽव्यक्तजन्मनः॥ ३॥
जन्मतश्च शिरो यच्चि पञ्चमन्तज्जगाद ह।
मन्त्रमाथर्व्वणं रुद्रो† येन सद्यः प्रमुच्यते॥ ४॥
कपालिन् रुद्र बभ्रोऽथ भव कैरात सुव्रत।
पाहि विश्वं विशालाक्ष कुमार वरविक्रम॥ ५॥
एवमुक्तस्तदा रुद्रो भविष्यैर्नामभिर्भवः।
कपालशब्दात्कुपितस्तच्छिरो विचकर्त्त ह॥ ६॥
वामाङ्गुष्ठनखेनाद्यं प्राजापत्यं विचक्षणः।
तन्निकृत्तं शिरो धात्रि हस्तलग्नं बभूव ह॥ ७॥
तस्मिन्निकृत्ते‡ शिरसि प्राजापत्यं त्रिलोचनः।
ब्रह्माणं प्रयतोभूत्वा रुद्रो वचनमब्रवीत्॥ ८॥

रुद्र उवाच।

कथं कपालं मे देव करात्पतति सुव्रत।
नश्यते§ च कथं पापं ममैतद्वद सुव्रत॥ ९॥

---

* ब्रह्मणा तु यदा रुद्रः पूर्व्वं सृष्ट इति (ग)।

† धात्रीति (ग)।

‡ तस्मिन् छिन्नेऽथेति (ग)।

§ नश्यतीति साधु।

ब्रह्मोवाच ।

इदमेव व्रतं देव चर कापालिकं विभो ।
समयाचारसंयुक्तं कृत्वा स्वेनैव तेजसा ॥ १० ॥
एवमुक्तस्तदा रुद्रो ब्रह्मणाऽव्यक्तमूर्त्तिना ।
आजगाम गिरिश्रेष्ठं माहेन्द्रं पापनाशनम् ॥ ११ ॥
तत्र स्थित्वा महादेवस्तच्छिरो विभिदे त्रिधा ।
तस्मिन् भिन्ने पृथक्केशान् गृहीत्वा भगवान् भवः ॥ १२ ॥
यज्ञोपवीतं केशन्तु महास्थाच्चमणींस्तथा* ।
कपालशकलञ्चैकमसृक्पूर्णं करे स्थितम् ॥ १३ ॥
अपरं खण्डशः कृत्वा जटाजूटे न्यवेशयत् ।
एवं कृत्वा महादेवो बभ्रामेमां वसुन्धराम् ॥ १४ ॥
सप्तद्वीपवतीं पुण्यां मज्जंस्तीर्थेषु नित्यशः ।
समुद्रे प्रथमं स्नात्वा ततो गङ्गां व्यगाहत ॥ १५ ॥
सरस्वतीं ततो गत्वा यमुनासङ्गमन्ततः ।
शतद्रुञ्च ततो गत्वा देविकाञ्च महानदीम् ॥ १६ ॥
वितस्तां चन्द्रभागाञ्च† गोमतीं सिन्धुमेव च ।
तुङ्गभद्रां तथा गोदामुत्तरे गण्डकीं तथा‡ ॥ १७ ॥

---

* महदस्थिमणींस्तथेति (क), (ख) ।

† (ख) पुस्तकेऽतः परं सार्द्धश्लोकद्वयं नास्ति ।

‡ एतदर्द्धं (ग) पुस्तके नास्ति ।

नेपालञ्च* ततो गत्वा ततो† रुद्रमहालयम् ।
ततोदारुवनं गत्वा केदारगमनम्मुनः ॥ १८ ।
भद्रेश्वरं‡ ततो गत्वा गयां पुण्यमथाऽगमत् ।
तत्र फल्गु§कृतस्नानः पितॄन् सन्तर्प्य यत्नतः ॥ १९ ।
एवं¶ वेगेन सकलं ब्रह्माण्डं भूतधारिणि ।
बभ्राम सर्व्वदेवेशः षष्ठेऽब्दे तस्य चापतत् ।
परिधानन्तु कौपीनं नग्नः कापालिकोऽभवत्‖ ॥ २० ।
पुनरब्दद्वयम्भ्रान्तस्तीर्थे तीर्थे हरः स्वयम् ।
कपालन्त्यक्तुकामः सन्तप्तस्तात्तत्तु नापतत्** ॥ २१ ।

---

* कलुंगञ्चेति (ग) ।

† यत इति (ग) ।

‡ मह परमिति (ग) ।

§ गयां चेति (ग) ।

¶ पश्चादि त (ग) ।

‖ नग्नः कौपीऽभवत्तदेति (ख) ।

भ्रमतः परिधानन्तु कौपीनं रसनागतम् ।
तस्मिंस्तु पतिते देवि नग्नः कापालिकोऽभवदिति ॥ (ग)

** पुनरब्दद्वयं भ्रान्तो ब्रह्माण्डं तीर्थकारणात् ।
तीर्थे तीर्थे हरः स्नात्वा कपालं त्यक्तुमिच्छति ।
त्यक्तोऽपि न तद्धस्तात्पतति भूतधारिणीति (ग) ॥

ततोऽब्दमेकं बभ्राम हिमवत्पर्व्वते शुभे* ।
गत्वा हरिहरक्षेत्रं स्नात्वा देवाङ्गदे तथा ।
सोमेश्वरं समभ्यर्च्य गतोऽसौ चक्रतीर्थकम् ॥ २२ ।
तत्र स्नात्वा तथा नत्वा त्रिजलेश्वरसंज्ञितम् ।
अयोध्यायां तथा गत्वा वाराणस्यां ततोऽगमत् ॥ २३ ।
द्वादशाब्दैर्गतव्रतः सीमाचारिगणैस्तथा ।
बलात्कारेण तद्धस्तात्कपालं पातितं भुवि ।
कपालमोचनं तीर्थं ततो जातमघापहम् ॥ २४ ।
गङ्गाम्भसि ततः स्नाप्य† विश्वेशम्पूज्य भक्तितः ।
रुद्रो विशुद्धिमापन्नो मुक्तः स ब्रह्महत्यया ॥ २५ ।
कपालमोचनं नाम तीर्थं त्रैलोक्यविश्रुतम् ।

---

* इतः षड्विंशश्लोकपर्य्यन्तं (ग) पुस्तकेऽन्यथैव पाठः । यथा—
ततोऽन्यद्वर्षमेकन्तु वर्त्तते हिमवद्गिरौ ।
भ्रमतो विभ्रमो जातस्त्रिनेत्रस्य महात्मनः ॥
पुनरब्दद्वयञ्चान्यत्परमेष्ठी वृषाकपिः ।
बभ्राम रुद्रतीर्थानि पुराणानि समन्ततः ॥
कस्यचित्त्वथ कालस्य द्वादशेऽब्दे धराधरे ।
वाराणसीं गतो देवस्तत्र स्नानमथारभत् ॥
गङ्गायां देवदेवेशो यावन्मज्जति भामिनि ।
भवेत्कपालं पतितं हस्ताग्राद्ब्रह्मणः पुरा ॥
कपालमोचनं नाम तत्तीर्थमनुत्तमम् ।
पृथिव्यां ख्यातिमगमद्वाराणस्यां धराधरे ॥

† स्नापयित्वेति साधु ।

यत्राप्लुतो नरो भक्त्या ब्रह्महा तु विशुध्यति ॥ २६ ।
कपालं पतितं दृष्ट्वा रुद्रहस्ताच्चतुर्मुखः ।
आगतो देवसहितो वाक्यञ्चेदमुवाच ह ॥ २७ ।

ब्रह्मोवाच ।

भव रुद्र विरूपाक्ष लोकमार्गव्यवस्थित:* ।
व्रतानि कुरुते देव त्वत्कृतानि हि पुत्रक ।
स त्वत्प्रसादाद्देवेश ब्रह्महापि विशुध्यति ॥ २८ ।
यद्व्रतं नग्नकापालं यद्वाभ्रव्यन्त्वया कृतम् ।
यत्कृतं शुद्धशैवञ्च तत्तन्नाम्ना भविष्यति ॥ २९ ।
मां पुरस्कृत्य देवस्त्वं पूज्यसे यैर्विधानतः ।
तेषां शास्त्राणि सर्व्वाणि शास्त्रं पाशुपतं तथा ।

---

* इतोऽपि त्रिंशच्छ्लोकपर्य्यन्तं (ग) पुस्तकेऽन्यथा पाठो दृश्यते । यथा—
रुद्र भव विरूपाक्ष लोकमार्गे व्यवस्थितः ।
व्रतानि कुरुते देव त्वच्चीर्णानि महाप्रभ ॥
कपालं गृह्य यद्भ्रान्तं कपालव्यग्रपाणिना ।
तद्व्रतं नग्नकापालं भविष्यति नृणां भुवि ॥
यच्च ते बभ्रुता जाता हिमवत्यचलोत्तमे ।
भ्रमतस्तद्व्रतं देव वाभ्रव्यन्तद्भविष्यति ॥
यच्चेदानीं विशुद्धस्य तीर्थेऽस्मिन् देवशुद्धता ।
तच्छुद्धशैवं भवतु व्रतं ते पापनाशनम् ॥
ये पुरस्कृत्य देवास्त्वां पूज्यन्ते विविधान्विताः ।
शास्त्राणि तानि सर्व्वेषां कथयिष्यामि नान्यथा ॥

कथयस्व महादेव संविधानं समासतः ॥ ३० ।
एवमुक्तस्ततोरुद्रो ब्रह्मणाऽव्यक्तमूर्त्तिना ।
देवैर्ज्जयेति सन्तुष्टः कैलासनिलयं ययौ ॥ ३१ ।
ब्रह्मा अपि सुरैः सार्द्धं गतः स्वर्लोकमुत्तमम् ।
देवा अपि ययुः स्वञ्च स्वस्थानं स्वं यथागतम् ॥ ३२
एतद्रुद्रस्य माहात्म्यं मया ते परिकीर्त्तितम् ।
चरितं यच्च देवस्य वित्तं समभवद्भुवि ॥ ३३ ।

इति वराहपुराणे रुद्रमाहात्म्यं नाम सप्तनवतितमोऽध्यायः ।

अष्टनवतितमोऽध्यायः ।

धरण्युवाच ।

योऽसौ सत्यतपा नाम लुब्धो भूत्वा द्विजो बभौ* ।
येनारुणिर्व्याघ्रभयाद्रचितो यः स्वशक्तितः ॥ १ ।
दुर्वासाः संश्रुतार्थश्च हिमवन्तं नगं ययौ ।
तस्योपरि महच्चित्रं भवतीति त्वयेरितम् ।
कीदृशं तन्ममाचक्ष्व महत्कौतूहलं विभो ॥ २ ।

---

* बभूवार्थे बभाविति प्रयोगः । द्विजो सुवौति क्वचित् पाठः ।

वराह उवाच ।

स हि सत्यतपाः पूर्व्वं भृगुवंशोद्भवोद्विजः ।
दस्युसंसर्गसम्भूतो दस्युवत्समजायत ॥ ३ ।
ततः कालेन महता ऋषिसङ्गात्पुनर्द्विजः ।
बभौ दुर्व्वाससा सम्यग्बोधितश्च विशेषतः ॥ ४ ।
हिमाद्रेरुत्तरे पादे पुष्पभद्रा नदी शुभा ।
तस्यास्तीरे शिला दिव्या नाम्ना चित्रशिला धरे ॥ ५ ।
न्यग्रोधश्च महांस्तत्र नाम्ना भद्रो महावटः ।
तत्र सत्यतपाः स्थित्वा तपः कुर्वन्महातपाः ॥ ६ ।
स कदाचित्कुठारेण चकर्त्त समिधः किल ।
चिच्छेद अङ्गुलीमेकां वामतर्जनिकां मुनिः ॥ ७ ।
छिन्नायामङ्गुलौ तस्य भस्मचूर्णं भवत्किल* ।
न लोहितं न मांसन्तु न मज्जा तत्र दृश्यते ॥ ८ ।
अङ्गुली सन्धिता तेन† पूर्व्ववच्चाभवत्कृते ॥ ९ ।
तस्मिन् भद्रवटे चैकं मिथुनं किन्नरं स्थितम् ।
रात्रौ सुप्तस्यपेस्तस्य दृष्ट्वा तन्महदद्भुतम् ।
प्रभाते विमले प्राप्तमिन्द्रलोकमिति स्मृतिः ॥ १० ।
अथेन्द्रेण सुराः सर्व्वे यक्षगन्धर्वकिन्नरैः‡ ।

---

* (ग) पुस्तके श्लोकस्यास्य परार्द्धं परश्लोकस्य पूर्व्वार्द्धञ्च न स्तः ।

† अङ्गुलीसंविधानेनेति (ग) ।

‡ सहार्थे तृतीया । किन्नरा इति (ग) ।

पृष्टाः किञ्चिदिहाश्चर्यमपूर्व्वं कथ्यतामिति ॥ ११ ।
तत्र रुद्रसरस्तीरे यदेतन्मिथुनं शुभम् ।
स्थितं किन्नरयोस्तच्च वाक्यञ्चेदमुवाच ह ॥ १२ ।
दृष्टन्तु महदाश्चर्य्यं पुष्पभद्रातटे शुभे ।
यदेतत्सत्यतपसः समवोचत्ततः शुभे* ॥ १३ ।
स्रवणं भञ्जनश्चैव श्रुतं सर्व्वं शशंस ह ।
तच्छ्रुत्वा सहसा शक्रो विस्मितो विष्णुमब्रवीत् ॥ १४ ।
आगच्छ विष्णो गच्छामो हिमवत्पार्श्वमुत्तमम् ।
तत्राश्चर्य्यमपूर्व्वं मे कथितं किन्नरेण ह ॥ १५ ।
एवमुक्तस्ततो विष्णुर्वाराहं रूपमग्रहीत् ।
मृगयुश्च तथैवेन्द्रो जग्मतुस्तमृषिं प्रति ॥ १६ ।
विष्णुर्वाराहरूपेण ऋषिदृष्टिपथे स्थितः ।
भूत्वा दृश्योऽप्यदृश्योऽभूत्पुनरेव च दृश्यते ॥ १७ ।
तावदिन्द्रो धनुष्पाणिस्तीक्ष्णसायकधृग्वने† ।
आगत्य सत्यतपसमृषिमेनमुवाच ह ॥ १८ ।
भगवन्निह दृष्टस्ते वराहः पृथुलो महान् ।
येन तं हन्मि भृत्यानां पोषणाय महामुने ॥ १९ ।

---

* दृष्टं किञ्चिदिहाश्चर्य्यं दृष्टिस्तु हिमवद्गिरौ ।
पुष्पभद्रानदीतीरे महदाश्चर्यमुत्तमम् ।
यदेतत्सत्यतपसः समवोचत्ततः शुभे ॥ इति (ग)

† स्वयमिति (ग) ।

एवमुक्तोमुनिस्तेन चिन्तयामास तत्क्षणात् ।
यदि तं दर्शयाम्यस्मै वराहं हन्यते तदा ।
नो चेत्कुटुम्बः क्षुधया सीदत्यस्य न संशयः ॥ २० ।
जायापुत्रसमायुक्तो लुब्धकोऽयं क्षुधान्वितः ।
सशल्यश्च वराहोऽयं ममाश्रममुपागतः ॥ २१ ।
एवं गते तु किं कार्य्यमथासौ चिन्तयन् प्रभुः* ।
नाध्यगच्छत बुद्धिश्च क्षणात्तस्य व्यजायत ॥ २२ ।

दृष्टं चक्षुर्निहितं जङ्गमेषु
जिह्वा वक्तुं मृगयो तद्विसृष्टम् ।
द्रष्टुं चक्षुर्नास्ति जिह्वेह वक्तुं
जिह्वायाः स्यात्तत्त्वतोऽस्तीह चक्षुः ॥ २३ ।
एवं श्रुत्वा द्वावपि तस्य तुष्टौ
इन्द्राविष्णू दर्शयन्तौ स्वमूर्त्तिम् ।
वाक्यं चेदमूचतुर्ब्रूहि नौ तें
तुष्टौ धन्यं वरमेकं वदस्व
तच्छ्रुत्वाऽसौ सत्यतपा उवाच ॥ २४ ।
न चातिरिक्तोऽस्ति वरः पृथिव्याम् ।
यद्दृष्टौ मे पुरतो देवदेवा-
वलं वरेणापि कृतार्थतासीत् ॥ २५ ।
तथापीदं ये सदा पर्व्वकाले

---

* मुनिरिति (ग) ।

विप्रा विप्रांश्चार्चयन्तीह भक्त्या ।
तेषां पापं नश्यतां* मासमेकं
यत्सञ्चितं त्वेष एको वरोऽस्तु ॥ २६ ।
मुक्तिञ्चाहं व्रजामीति द्वितीयोऽस्तु वरो मम ॥ २७ ।
तथेत्युक्त्वा तु तौ देवौ दत्त्वा तस्य वरं शुभम् ।
अदर्शनं गतौ देवौ सोऽपि तत्र व्यवस्थितः ।
लब्ध्वा वरं सत्यतपा ब्रह्मभूतोऽभवद्‌धृदि ॥ २८ ।
यावदास्ते शुभे देशे कृतकृत्यो महामुनिः ।
तावत्तस्य गुरुस्तत्र आरुणिः समदृश्यत ।
पृथ्वीं प्रदक्षिणीकृत्य तीर्थहेतोर्विचक्षणः ॥ २९ ।
तेन चासौ महाभक्त्या पूजितो मुनिपुङ्गवः ।
पाद्याचमनगोदानैः कृतासनपरिग्रहः ॥ ३० ।
ज्ञात्वा स शिष्यं सिद्धन्तु तपसा दग्धकिल्बिषम् ।
उवाच विनयापन्नं प्राञ्जलिं पुरतः स्थितम् ॥ ३१ ।
आरुणिरुवाच ।
पुत्र सिद्धोऽसि तपसा ब्रह्मभूतोऽसि सुव्रत ।
इदानीमात्मना सार्द्धं मुक्तिकालो मतोऽस्ति ते ॥ ३
उत्तिष्ठ गम्यतां पुत्र मया सार्द्धं परं पदम् ।
यद्गत्वा न पुनर्जन्म भवतीति न संशयः ॥ ३३ ।
एवमुक्त्वा तु तौ सिद्धौ उभौ सत्यतपारुणी ।

---

* नश्यतामित्यार्षं, नश्यत्विति साधु ।

ध्यात्वा नारायणं देवं तद्देहे तौ लयं गतौ* ॥ ३४ ॥
यश्चापि शृणुयात्पादं पर्व्वाध्यायं सविस्तरम् ।
श्रावयेद्वापि स नरो गतिमिष्टामवाप्नुयात् ॥ ३५ ॥

इति वराहपुराणे पर्व्वाध्यायो नाम अष्टनवतितमोऽध्यायः ।

नवनवतितमोऽध्यायः ।

धरण्युवाच ।

या सा माया शरीरात्तु ब्रह्मणोऽव्यक्तजन्मनः ।
गायत्र्यष्टभुजा भूत्वा चैत्रासुर*मयोधयत् ॥ १ ॥
सैव नन्दाभवद्देवी देवकार्य्यचिकीर्षया ।
महिषाख्यासुरवधं कुर्व्वती ब्रह्मणेरिता† ।
वैष्णव्याख्या ततो देव कथमेतद्धि शंस मे ॥ २ ॥

वराह उवाच ।

इयं जगद्धिता देवी गङ्गा शङ्करसुप्रिया ।

---

* तदहस्तौ दिवं गताविति (ग) ।

---

* वेत्रासुर इति (ग) ।

† ब्रह्मणेरितमिति (ग) ।

क्वचित्किञ्चिन्नवेदृत्तं स्वपदं वेद सर्व्ववित् ॥ ३ ।
स्वायम्भुवे हतोदैत्यो वैष्णव्या मन्दरे गिरौ ।
महिषाख्यः परः पश्चात्स वै चैत्रासुरो हतः* ।
नन्दया निहतो विन्ध्ये महाबलपराक्रमः ॥ ४ ।
अथवा ज्ञानशक्तिः सा महिषोऽज्ञानमूर्त्तिमान् ।
अज्ञानं ज्ञानसाध्यन्तु भवतीति न संशयः ॥ ५ ।
मूर्त्तिपचे चेतिहासममूर्त्तौ चैकवद्बुद्धि ।
ख्याप्यते† वेदवाक्यैश्च इह सा वेदवादिभिः ॥ ६ ।
इदानीं शृणु मे देवि पञ्चपातकनाशनम् ।
यजनन्देवदेवस्य विष्णोः पुत्रवसुप्रदम् ॥ ७ ।
इहजन्मनि दारिद्र्य‡व्याधिकुष्ठादिपीड़ितः ।
अलक्ष्मीवानपुत्रस्तु§ योभवेत्पुरुषो भुवि ॥ ८ ।
तस्य सद्यो भवेल्लक्ष्मीरायुर्वित्तं सुतः सुखम् ।
दृष्ट्वा तु मण्डलगतं देवं देव्या समन्वितम् ॥ ९ ।
नारायणं परन्देवं यः पश्यति विधानतः ।
आचार्य्यदर्शितं देवि मन्त्रमूर्त्तिमयोनिजम् ॥ १० ।
कार्त्तिके मासि शुक्लायां द्वादश्यान्तु विशेषतः ।

---

* वृत्रासुरः पुनरिति (ग) ।
† ख्यायत इति (क), (ख) ।
‡ द्रव्यादीति (ख) ।
§ नैव देवीति (क) ।

सर्व्वासु वा यजेद्देवं द्वादशीषु विधानतः ॥ ११ ।
संक्रान्त्यां वा महाभागं चन्द्रसूर्य्यग्रहे तथा* ।
यः पश्यति हरिं देवि पूजितं गुरुणा शुभे ।
तस्य सद्योभवेत्तुष्टिः पापध्वंसश्च जायते ।
सामान्यदेवतानाञ्च भवतीति न संशयः ॥ १२ । १३ ।
ब्राह्मणक्षत्रियविशां भक्तानान्तु परीक्षणम् ।
संवत्सरं गुरुः कुर्य्याज्जातिशौचक्रियादिभिः ।
उपासन्न†न्ततोज्ञात्वा हृदयेनावधारयेत् ॥ १४ ।
तेऽपि भक्तिमतो‡ ज्ञात्वा आत्मानं परमेश्वरम्§ ।
संवत्सरं गुरोर्भक्तिं कुर्य्युर्विष्णोरिवाचलाम् ॥ १५ ।
संवत्सरे ततः पूर्णे गुरुञ्चैव प्रसादयेत् ।
भगवंस्त्वत्प्रसादेन संसारार्णवतारणम् ।
इच्छामस्त्वैहिकीं लक्ष्मीं विशेषेण तपोधन ॥ १६ ।
एवमभ्यर्च्य मेधावी¶ गुरुं विष्णुमिवाग्रतः ।
अभ्यर्च्चितस्तैः सोऽप्याशु दशम्यां कार्त्तिकस्य तु ॥ १७ ।
क्षीरवृक्षसमुद्भूतं दन्तकाष्ठं समन्त्रकम्‖ ।

---

* ग्रहेऽपि वेति (ग) ।

† उपसन्नमिति (ग) ।

‡ भक्तिमन्त इति साधु ।

§ परमेश्वरे इति (ग) ।

¶ विद्यावानिति (ग) ।

‖ मन्त्रितं परमेष्ठिन इति (ग) ।

भचयित्वा स्वपेयुर्हि देवदेवस्य सन्निधौ ॥ १८ ।
स्वप्नान्दृष्ट्वा गुरोरग्रे श्रावयेत* विचक्षणः ।
ततः शुभाशुभं तत्र लक्षयेत्परमोगुरुः ॥ १९ ।
एकादश्यामुपोष्यैवं स्नात्वा देवालयं व्रजेत् ।
गुरुश्च मण्डलं भूमौ कल्पितायान्तु वर्त्तयेत् ॥ २० ।
लक्षणैर्विविधैर्भूमिं लक्षयित्वा विधानतः ।
षोड़शारं लिखेच्चक्रं सर्व्वतोभद्रमेव च† ॥ २१ ।
अथवा अष्टपत्रञ्च‡ लिखित्वा दर्शयेद्बुधः ।
नेत्रबन्धन्तु कुर्व्वीत सितवस्त्रेण यत्नतः ॥
वर्णानुक्रमतः शिष्यान् पुष्पहस्तान् प्रवेशयेत् ॥ २२ ।
नवनाभं यदा कुर्य्यान्मण्डलं वर्णकैर्बुधः ।
तदानीं पूर्व्वतो देवमिन्द्रपूर्व्वन्तु§ पूजयेत् ॥ २३ ।
लोकपालैः समं पूज्य¶ अग्निं सम्पूजयेच्छुभे ।
स्वदिक्षु तद्वद्याम्यायां नैर्ऋत्यान्निर्ऋतिं न्यसेत् ॥ २४
वरुणं वारुणायाञ्च वायुं वायव्यतो न्यसेत् ।
धनदञ्चोत्तरे न्यस्य रुद्रमीशानगोचरे ॥ २५ ।

---

* श्रावयेदिति साधु ।

† एववेति (ख), नवनाभमथापि वेति (ग) ।

‡ अष्टपत्रमथोवापीति (ग) ।

§ ऐन्द्राग्न्विति (ग) ।

¶ तद्वदिति (ग), पूज्येति पाठे पूजयित्वेति साधु ।

पूज्यैव तु विधानेन दिक्पत्रेषु व्यवस्थितान् ।
पद्ममध्ये तथा विष्णुमर्च्चयेत्परमेश्वरम् ॥ २६ ।
पूर्व्वपत्रे बलं पूज्य* प्रद्युम्नं दक्षिणे तथा ।
अनिरुद्धं तथा पूज्य† पश्चिमे चोत्तरे तथा ।
पूजयेद्वासुदेवन्तु सर्व्वपातकशान्तिदम् ॥ २७ ।
ऐशान्यां विन्यसेच्छङ्खमाग्नेय्याञ्चक्रमेव तु‡ ।
याम्यायान्तु गदां पूज्य वायव्यां पद्ममेव च ॥ २८ ।
ऐशान्यां मुसल§म्पूज्य दक्षिणे गरुड़ं न्यसेत् ।
वामतो विन्यसेल्लक्ष्मीं देवदेवस्य बुद्धिमान् ॥ २९ ।
धनुश्चैव तु खड्गन्तु देवस्य पुरतो न्यसेत् ।
श्रीवत्सं कौस्तुभञ्चैव नवमन्तत्र कल्पयेत्¶ ॥ ३० ।
एवं पूज्य यथान्यायं देवदेवं जनार्द्दनम् ।
दिक्षु दलेषु‖ विन्यस्य अष्टौ कुम्भान्विधानतः ।
वैष्णवं कलसञ्चैवं नवमं तत्र कल्पयेत् ॥ ३१ ।
स्नापयेन्मुक्तिकामन्तु वैष्णवेन घटेन ह ।

---

* पूर्व्वमिति (ख) ।

† पूज्यमिति (ग) ।

‡ च इति (ख) ।

§ मुशलमिति (ख), (ग) ।

¶ देवस्य पुरतो न्यसेदिति (ख), (ग) ।

‖ दिक्ष्वष्टदलेष्विति (ग) ।

श्रीकामं स्नापयेत्तद्वदैन्द्रेण तु घटेन ह* ॥ ३३ ।
प्राज्यप्रतापकामञ्च आग्नेयेन तु स्नापयेत् ।
मृत्युञ्जयविधानाय याम्येन स्नपनन्तथा† ।
दुष्टप्रध्वंसनायालं निर्ऋतेन विधीयते ।
शान्तये वारुणेनाशु पापनाशाय वायवे‡ ॥ ३४ ।
द्रव्यसम्पत्तिकामस्य कौवेरेण विधीयते ।
रौद्रेण ज्ञानहेतोश्च§ लोकपालपदाप्तये¶ ॥ ३५ ।
एकैकेन नरः स्नातः सर्व्वपापविवर्ज्जितः ।
भवेदव्याहतं ज्ञानं श्रीमान्विप्रो विचक्षणः ॥ ३६ ।
किं पुनर्नवभिः स्नातो नरः पातकवर्ज्जितः ।
जायते विष्णुसदृशः सद्योराजाथ वा भवेत्‖ ॥ ३७ ।
अथवा दिक्षु सर्व्वासु यथासंख्येन लोकपान् ।
पूजयीत स्वशास्त्रोक्तविधानेन विधानवित् ॥ ३८ ।
एवं सम्पूज्य देवांश्च** लोकपालान् प्रसन्नधीः ।
पश्चात्प्रदक्षिणान् शिष्यान् बद्धनेत्रान् प्रवेशयेत् ॥ ३९ ।

---

* (ग) पुस्तके ३३श्लोकस्तत्परवर्त्तिपादद्वयञ्च न स्तः ।

† स्नापयेत्तथेति (ख) ।

‡ वायवेनेति साधु ।

§ हेतोस्त्विति (ग) ।

¶ क्रमेण त्विति (ग) ।

‖ पुनरिति (ग) ।

** तु इति (ख) ।

आग्नेयी वारुणी दग्धा वायुना विधिना ततः।
सौमेनाप्यायिता पश्चाच्छ्रावयेत्समयान् बुधः॥ ४०॥
अनिन्द्या ब्राह्मणा वेदा विष्णुर्ब्राह्मण एव च।
रुद्रमादित्यमग्निञ्च लोकपालग्रहांस्ततः॥ ४१॥
गुरूंश्च* वैष्णवांश्चा†पि पुरुषः पूर्व्वदीक्षितः।
एवन्तु समयं ख्याप्य‡ पश्चाद्धोमन्तु§ कारयेत्॥ ४२॥
ओँ नमो भगवते सर्व्वरूपिणे हुँ फट् स्वाहा¶।
षोड़शाक्षरमन्त्रेण होमयेज्ज्वलिताग्नये॥ ४३॥
गर्भाधानादिकाश्चैव क्रियाः समवधारयेत्।
त्रिभिराहुतिभिश्चापि‖ देवदेवस्य सन्निधौ॥ ४४॥
होमान्ते दीक्षितः पश्चाद्दद्याच्च गुरुदक्षिणाम्।
हस्त्यश्वकटकादीनि हेमग्रामादिकन्नृपः**।
दद्याच्च गुरवे प्राज्ञो मध्यमे मध्यमन्तथा॥ ४५॥
एवं कृते तु यत्पुण्यं माहात्म्यञ्जायते धरे।
तन्न शक्यन्तु गदितुमपि वर्षशतैरपि॥ ४६॥

---

* वा इति (ख)।
† वा इति (ख)।
‡ समये स्थाप्य इति (ख)।
§ च इति (ख)।
¶ विष्णवे स्वाहेति (ग)।
‖ त्रिभिस्त्रिभियाहुतिभिरिति (ग)।
** नर इति (क), (ख)।

दीक्षितात्मा पुन*र्भूत्वा वराहं शृणुयाद्यदि ।
तेन वेदपुराणानि सर्व्वे मन्त्राः ससंग्रहाः ॥ ४७
जप्ताः स्युः पुष्करे तीर्थे प्रयागे सिन्धुसङ्गमे ।
देवागारे कुरुक्षेत्रे वाराणस्यां विशेषतः ॥ ४८ ।
ग्रहणे विषुवे चैव यत्फलं जपतां भवेत् ।
तत्फलं द्विगुणं तस्य दीक्षितो यः शृणोति च ॥ ४९ ।
देवा अपि तपः कृत्वा ध्यायन्ते† च वदन्ति च ।
कदा नो भारते वर्षे जन्म स्याद्भूतधारिणि ॥ ५० ।
दीक्षिताश्च भविष्यामो वराहं शृणुमः कथम् ।
वराहं षोड़शात्मानन्त्यक्त्वा देहं कदा वयम् ॥
यास्यामः परमं स्थानं यद्गत्वा न पुनर्भवेत् ।
एवं जल्पन्ति विबुधा मनसा चिन्तयन्ति च ॥ ५१ । ५२ ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
वसिष्ठस्य च संवादं श्वेतस्य च महात्मनः ॥ ५३ ।
स्वर्गवासे स्थितोह्यासीच्छ्वेतो राजा महायशाः ।
आसीदिलावृते वर्षे श्वेतोराजा वृहत्तपाः‡ ॥ ५१
स महीं सकलान्देवि§ सपल्लववनद्रुमाम् ।

---

* पुरेति (ख) ।

† ध्यायन्तीति साधु ।

‡ नाम महामना इति (ग) ।

§ देवीमिति (ग) ।

दातुमिच्छन्स चोवाच वसिष्ठं तपसान्निधिम् ॥ ५५ ।
भगवन्दातुमिच्छामि ब्राह्मणेभ्यो वसुन्धराम् ।
देह्यनुज्ञां स चोवाच वसिष्ठो राजसत्तमम् ॥ ५६ ।
अन्नं देहि सदा राजन् सर्व्वकालसुखावहम् ।
अन्नेन चैव दत्तेन किन्न दत्तं महीतले* ॥ ५७ ।
सर्व्वेषामेव दानानामन्नदानं विशिष्यते† ।
अन्नाद्भवन्ति भूतानि अन्नेनैव च वर्द्धते‡ ।
तस्मात्सर्व्वप्रयत्नेन अन्नन्दानं ददस्व भोः§ ॥ ५८ ।
वसिष्ठस्य वचः श्रुत्वा स राजा न तथाकरोत् ॥ ५९ ।
रत्नवस्त्रमलङ्कारान् श्रीमन्ति नगराणि च ।
यत्किञ्चित्कोषजातं स द्विजानाहूय तद्ददौ¶ ॥ ६० ।
स कदाचिन्नृपः पृथ्वीं जित्वा परमधर्म्मवित् ।
पुरोहितमुवाचेदं वसिष्ठं जपतां वरम् ॥ ६१ ।
भगवन्नश्वमेधानां सहस्रं कर्त्तुमुत्सहे ।
सुवर्णरौप्यताम्राणि यागङ्कृत्वा द्विजातिषु‖ ॥
दत्तानि तेन राज्ञा वै नान्नं दत्तं तथा जलम् ।

---

* (ख) पुस्तके एतदर्द्धं परश्लोकस्य च पूर्व्वार्द्धं न स्तः ।

† विशिष्यते इति सार्व्वत्रिकः पाठः, स च लिपिकरप्रमादज इति परित्यक्तः ।

‡ विवर्द्धते इति (ग) ।

§ अन्नं ददस्व भूपते इति (ग) ।

¶ प्रदत्तं ब्राह्मणस्याथ कुञ्जरानजिनानि चेति (ग) ।

‖ द्विजातिष्विति विवचायां सप्तमी, द्विजातिभ्यः इति साधु ।

स्वल्पं वस्तु इति ज्ञात्वा सोऽन्नन्तु नाददत्प्रभुः ॥ ६२।६३ ।
एवं विभवयुक्तस्य तस्य राज्ञो महात्मनः ।
कालधर्मवशाद्देवि मृत्युः समभवत्तदा ॥ ६४ ।
परलोके वर्त्तमानः स च राजा महामनाः ।
क्षुधया पीड़ितोह्यासीत्तृषया च विशेषतः ॥ ६५ ।
आनिनायाप्सरोभागङ्गत्वा श्वेताख्यपर्व्वतम् ।
तत्र प्राग्जन्ममूर्त्तिश्च पुरा दग्धा महात्मनः ॥
तत्रास्थीनि स संगृह्य लिहनास्ते स पार्थिवः ।
पुनर्विमानमारुह्य दिवमाचक्रमे नृपः ॥ ६६।६७ ।
अथ कालेन महता स राजा शंसितव्रतः ।
तान्यस्थीनि लिहन्दृष्टो वसिष्ठेन महात्मना ॥ ६८ ।
उक्तश्च तेन किन्त्वं स्वास्थिं भुङ्क्षे नराधिप ।
एवमुक्तस्तदा राजा वसिष्ठेन महात्मना ।
उवाच वचनञ्चेदं श्वेतोराजा मुनिन्तदा ॥ ६९ ।
भगवन्क्षुधितश्चास्मि अन्नपानं पुरा मया ।
न दत्तं मुनिशार्द्दूल तेन मां बाधते क्षुधा* ॥ ७० ।
एवमुक्तस्ततो राज्ञा वसिष्ठो मुनिपुङ्गवः ।
उवाच च मुनिर्भूयः श्वेतं वाक्यं महानृपम् ।
किन्ते करोमि राजेन्द्र क्षुधितस्य विशेषतः ।
अदत्तं नोपतिष्ठेत कस्यचित्किञ्चिदुत्तमम् ॥ ७१ ।

---

* मे दारुणा क्षुधेति (ग) ।

रत्नहेमप्रदानेन भोगवाञ्जायते नरः।
अन्नपान*प्रदानेन सर्व्वकामैस्तु तर्पितः।
तन्न दत्तं त्वया राजन्स्तोकं मत्वा नराधिप॥ ७२।

श्वेत उवाच।

अदत्तस्य च सम्प्राप्तिस्तन्ममाचक्ष्व पृच्छतः।
शिरसा भक्तियुक्तेन याचितोऽसि महामुने॥ ७३।

वसिष्ठ उवाच।

अस्त्येकं कारणं येन जायते तन्न संशयः।
तच्छृणुष्व† नरव्याघ्र कथ्यमानं मयाऽनघ॥ ७४।
आसीद्राजा पुराकल्पे विनीताश्वेतिः‡ विश्रुतः।
स सर्व्वमेधमारेभे स्वयं क्रतुवरन्नृपः॥ ७५।
यजताऽ§नेन विप्रेभ्यो दत्ता गावो द्विपा वसु।
नान्नन्तेन तदा दत्तं स्वल्पं मत्वा यथा त्वया॥ ७६।
ततः कालेन महता मृतोऽसौ जाह्नवीजले।
कृत्वा पुण्यं विनीताश्वः सार्व्वभौमो नृपोत्तमः¶॥ ७७।
स्वर्गञ्च गतवान्सोऽपि यथा राजन्भवान् प्रभो।
असावपि क्षुधाविष्ट एवमेव गतो नृपः॥ ७८।

---

* अन्नदानेति (ग)।

† शृणुष्वेति आर्षं, शृणु इति साधु।

‡ विनीताश्व इति साधु।

§ यजमानेनेति साधु।

¶ नृपोमहदिति (ग)।

मर्त्त्यलोके नदीतीरे गङ्गायां नीलपर्व्वतम्* ।
विमानेनार्कवर्णेन भास्वता देववन्नृपः ॥ ७९ ।
ददर्श च तदा राजा क्षुधितः स्वं कलेवरम् ।
पुरोहितन्ददर्शाथ होतारं जाह्नवीतटे ॥ ८० ।
तद्दृष्ट्वाऽसावपि नृपः पप्रच्छ मुनिसत्तमम् ।
क्षुधायाः कारणं किं मे स होता तमुवाच ह ॥ ८१ ।
तिलधेनुम्भवान्राजञ्जलधेनुञ्च सत्तम ।
घृतधेनुञ्च धेनुञ्च रसधेनुञ्च पार्थिव ।
देहि शीघ्रं येन भवान् क्षुधया वर्ज्जितोभवेत् ॥ ८२ ।
तपते† यावदादित्यस्तपते वापि चन्द्रमाः ।
एवमुक्तस्ततो राजा तं पुनः पृष्टवानिदम् ॥ ८३ ।

विनीताश्व उवाच ।

कथं सा दीयते ब्रह्मंस्तिलधेनुर्जिगीषुभिः ।
भुङ्क्ते स्वर्गञ्च विप्रेन्द्र तन्ममाचक्ष्व पृच्छतः ॥ ८४ ।

होतोवाच ।

विधानन्तिलधेनोश्च‡ त्वं शृणुष्व§ नराधिप ।
चतुर्भिः कुड़वैश्चैव¶ प्रस्थ एकः प्रकीर्त्तितः ॥ ८५ ।

---

* नीलपर्व्वते इति (ग) ।

† तपतीति साधु । एवं परत्रापि ।

‡ धेनोस्त्विति (ग) ।

§ शृणु इति साधु ।

¶ चतुर्विंशतिकाभिश्चेति (ग) ।

सा तु षोड़शभिः कार्य्या चतुर्भिर्वत्सकोभवेत्* ॥ ८६ ।
नासा† गन्धमयी तस्या जिह्वा गुड़मयी शुभा ।
पुच्छे प्रकल्पनीया सा घण्टाभरणभूषिता ॥ ८७ ।
ईदृशीं कलयित्वा तु स्वर्णशृङ्गीन्तु कारयेत् ।
कांस्यदोहां रौप्यखुरां पूर्व्वधेनुविधानतः ॥ ८८ ।
कृत्वा तां ब्राह्मणायाशु दद्याच्चैव नराधिपः ।
कृष्णाजिनं धेनुवासो नन्दितां कल्पितां शुभाम् ॥ ८९ ।
सूत्रेण सूचिताङ्कृत्वा सर्व्वरत्नसमन्विताम् ।
सर्व्वौषधिसमायुक्तां मन्त्रपूतान्तु दापयेत्‡ ॥ ९० ।
अन्नं मे जायतामन्य§त्पानं सर्व्वरसास्तथा ।
सर्व्वं सम्पादयास्माकं तिलधेनो द्विजार्पिता ॥ ९१ ।
गृह्णामि देवि त्वां भक्त्या कुटुम्बार्थं विशेषतः ।
भजस्व¶ कामान्मां देवि तिलधेनो नमोऽस्तु ते ॥ ९२ ।
एवंविधान्ततो दद्यात्तिलधेनुं नृपोत्तम ।
सर्व्वकामसमावाप्तिं कुरुते नात्र संशयः ॥ ९३ ।

---

* तैः षोड़शैर्भवेत्सा च चतुर्भिर्वत्सको भवेदिति (ग) ।

† नासेति (ग) ।

‡ मन्त्रपूतां सुदापयेदिति (ग) ।

§ सद्य इति (ग) ।

¶ देहीत्यर्थः ।

यश्चेदं शृणुयाद्भक्त्या कुर्य्यात्कारयतेऽपि वा ।
सर्व्वपापविनिर्मुक्तो विष्णुलोकञ्च गच्छति* ॥ ८४ ॥

इति वराहपुराणे श्वेतविनीताश्वोपाख्याने† तिलधेनुमाहात्म्यं
नाम नवनवतितमोऽध्यायः ।

शततमोऽध्यायः ।

होतोवाच ।

जलधेनुं प्रवक्ष्यामि पुण्येऽह्नि विधिपूर्व्वकम् ।
गोचर्म्ममात्रं भूभागं गोमयेनोपलेपयेत्* ॥ १ ॥
तत्र मध्ये तु† राजेन्द्र पूर्णं कुम्भञ्च विन्यसेत् ।
जलपूर्णं सुगन्धाढ्यं कर्पूरागुरुचन्दनैः ।
वासितं गन्धतोयेन तां धेनुं परिकल्पयेत् ॥ २ ॥
वत्सं तथापरं कल्प्य‡ जलेन§ परिपूरितम् ।

* स गच्छतीति (ख) ।
† श्वेतक्रौयोपाख्याने इति (ग) ।

* गोमये मण्डले कृत्वा गोचर्म्मतदनन्तरमिति (ग) ।
† मध्ये चेति (ग) ।
‡ कल्प्य इति आर्षं, कल्पयित्वा इति साधु ।
§ घृतेनेति (ग) ।

वर्द्धनीकं* महाराज यन्त्रपुष्पैः समन्वितम्।
दूर्व्वाङ्कुरैरुपस्तीर्य्य स्रग्भिश्चैव विभूषितम्॥ ३॥
पञ्चरत्नानि निक्षिप्य† तस्मिन् कुम्भे नराधिप।
मांसीमुषीरं कुष्ठञ्च तथा शैलेयवालुकम्॥ ४॥
धात्रीफलं सर्षपाश्च‡ सर्व्वधान्यानि पार्थिव।
चतुर्द्दिक्ष्वपि पात्राणि चत्वार्य्येव प्रकल्पयेत्॥ ५॥
एकं घृतमयं पात्रं द्वितीयं दधिपूरितम्।
तृतीयं मधुनश्चैव चतुर्थं शर्कराहृतम्॥ ६॥
सुवर्णमुखचञ्चूंषि शृङ्गं कृष्णाङ्गरेषु च।
प्रशस्तपत्रश्रवणां मुक्ताफलमयेक्षणाम्॥ ७॥
ताम्रपृष्ठां§ कांस्यदेहां दर्भरोमसमन्विताम्।
पुच्छं सूत्रमयङ्कृत्वा कृष्णाभरणघण्टिकाम्॥ ८॥
कम्बले पुष्पमालाञ्च गुडास्यां शुक्तिदन्तिकाम्।
जिह्वां शर्करया कृत्वा नवनीतेन च स्तनान्॥ ९॥
इक्षुपादान्तु राजेन्द्र गन्धपुष्पोपशोभिताम्।
कृष्णाजिनोपरि स्थाप्य¶ वस्त्रेणाच्छादितान्तु ताम्।

---

* (ग) पुस्तके वर्द्धनीकामिति पाठः, ततश्च तद्विशेषणानि स्त्रीलिङ्गे पठितानि।

† संक्षिप्य इति (ख)।

‡ आमला सर्षपाः श्वेता इति (ग)।

§ ताम्रपृष्ठीमिति (ग)।

¶ स्थापयित्वेति साधु।

गन्धपुष्पैः समभ्यर्च्य विप्राय विनिवेदयेत् ॥ १० ।
एवं धेनुन्तदा दत्त्वा ब्राह्मणे वेदपारगे* ।
साधुविप्राय राजेन्द्र श्रोत्रियायाहिताग्नये ।
तपोवृद्धाय पात्राय दातव्या च कुटुम्बिने ॥ ११ ।
यो ददाति नरो राजन्यः पश्यति शृणोति च ।
प्रतिगृह्णाति यो विप्रः सर्व्वे मुच्यन्ति† पातकात् ॥ १२
ब्रह्महा पितृहा गोघ्नः सुरापो गुरुतल्पगः ।
विमुक्ताः सर्व्वपापैस्तु गन्तारो विष्णुमन्दिरे‡ ॥ १३ ।
योऽश्वमेधेन यजते समाप्तवरदक्षिणः ।
जलधेनुञ्च यो दद्यात्सममेतन्नराधिप ॥ १४ ।
जलाहारस्त्वेकदिनं तिष्ठेच्च जलधेनुदः ।
ग्राहकोऽपि त्रिरात्रं वै तिष्ठेदेवं न संशयः ॥ १५ ।
यत्र क्षीरवहा नद्यो मधुपायसकर्द्दमः ।
यत्र चाप्सरसाङ्गीतं तत्र यान्ति जलप्रदाः ॥ १६ ।
दाता च दापकश्चैव प्रतिग्राही च यो द्विजः§ ।
सर्व्वपापविनिर्मुक्ता विष्णुसायुज्यमाप्नुयुः¶ ॥ १७ ।

---

* अत्र विवक्षावशात्सप्तमी ।

† मुच्यन्ते इति साधु । सर्व्वे तरति दुष्कृतमिति (ग) ।

‡ विमुक्तः सर्व्वपापैस्तु विष्णुलोकं स गच्छतीति (ग) ।

§ (ख) पुस्तकेऽतः परं चत्वारः पादा न सन्ति ।

¶ विष्णुमेति न संशय इति (ग) ।

जलधेनु*विधानं यः शृणुयात्कीर्त्तयेत्पि वा ।
सर्व्वपापविनिर्मुक्तः स्वर्गमेति जितेन्द्रियः ॥ १८ ॥

इति वराहपुराणे जलधेनुविधिर्नाम शततमोऽध्यायः ।

एकाधिकशततमोऽध्यायः ।

होतोवाच ।

रसधेनुविधानन्ते कथयामि समासतः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशास्तरे* ॥ १ ॥
रसस्य तु घटं राजन् सम्पूर्णं स्वैच्चवस्य तु† ।
तद्वत्कल्पयेत्प्राज्ञश्चतुर्थांशेन वत्सकम्‡ ॥ २ ॥
इचुदण्डमयाः पादा रजतस्य खुरैर्युताः§ ।
सुवर्णशृङ्गाभरणा वस्त्रपुच्छा घृतस्तनी¶ ॥ ३ ॥

---

* रसधेनुमिति (क), (ख) ।

---

* कुशोत्तरे इति (ग) ।

† स्थापयेत्तत इति (ग) ।

‡ तुरीयांशेन वत्सन्तु तत्पार्श्वे स्थापयेत् सुधीरिति (ग) ।

§ एवं कार्य्यारसधेनुरिचुपादसमन्वितेति (ग) ।

¶ क्षतस्तना इति (ख) ।

पुष्पकम्बलसंयुक्ता शर्करामुखजिह्वका* ।
दन्ताः फलमयास्तस्याः पृष्ठन्ताम्रमयं शुभम् ॥ ४ ।
पुष्परोमान्तु राजेन्द्र मुक्ताफलकृतेक्षणाम् ।
सप्तव्रीहिसमायुक्तां चतुर्दिक्षु च दीपिताम् ॥ ५ ।
सर्व्वोपस्करसंयुक्तां सर्व्वगन्धादिवासिताम् ।
चत्वारि तिलपात्राणि चतुर्दिक्षु निवेशयेत् ॥ ६ ।
सर्व्वलक्षणयुक्ताय श्रोत्रियाय कुटुम्बिने ।
रसधेनुः प्रदातव्या स्वर्गकामेन नित्यदा ॥ ७ ।
दाता स्वर्गमवाप्नोति सर्व्वपापविवर्ज्जितः ।
दाता च ग्राहकश्चैव एककालमभोजनः ॥ ८ ।
सोमपानफलं तस्य सर्व्वत्र तु फलं भवेत् ।
दीयमानान्तु पश्यन्ते† ते च यान्ति परां‡ गतिम् ॥ ९
धेनुञ्च पूजयित्वाग्रे गन्धधूपस्रगादिभिः ।
पूर्व्वोक्तैरेव मन्त्रैस्तु ततस्तां प्रार्थयेत्सुधीः ॥ १० ।
प्रार्थनापूर्व्वकं भक्त्या द्विजाग्रयाय निवेदयेत् ।
दशपूर्वान् परांश्चैव आत्मानञ्चैकविंशकम् ।
प्रापयेत्परमं स्थानं स्वर्गान्नावर्त्तते पुनः ॥ ११ ।
एषा ते कथिता राजन्रसधेनुरनुत्तमा ।

---

* जिह्विकेति (ग) ।

† पश्यन्ते इति आर्षं, पश्यन्तीति साधु ।

‡ परमामिति (ग) ।

ददस्व च महाराज परं स्थानमवाप्नुहि ॥ १२ ।
य इदं पठते नित्यं शृणुयादथ भक्तितः ।
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥ १३ ।

इति वराहपुराणे श्वेतोपाख्याने रसधेनुमाहात्म्यं
नाम एकाधिकशततमोऽध्यायः ।

——०:०——

द्व्यधिकशततमोऽध्यायः ।

होतोवाच ।
गुड़धेनुं प्रवक्ष्यामि सर्व्वकामार्थसाधिनीम् ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशास्तृते ॥ १ ।
तस्योपरिकृतं वस्त्रं गुड़मानीय पुष्कलम् ।
कृत्वा गुड़मयीं धेनुं सवत्साङ्गांस्यदेहिनीम् ॥ २ ।
सौवर्णे मुखशृङ्गे च दन्ताश्च मणिमौक्तिकैः ।
ग्रीवा रत्नमयी त्वस्या घ्राणं गन्धमयन्तथा ॥ ३ ।
शृङ्गे त्वगुरुकाष्ठेन पृष्ठं ताम्रमयं तथा* ।

* पृष्ठीं ताम्रमयीन्तथेति (ग) ।

पुच्छं चौममयन्तस्याः सर्व्वाभरणभूषिताम्* ॥ ४ ।
इक्षुपादां रौप्यखुरां कम्बलं पट्टसूत्रकम् ।
आच्छाद्य पट्टवस्त्रेण† घण्टाचामरशोभिताम्‡ ॥ ५ ।
प्रशस्तपत्रश्रवणां नवनीतस्तनीं बुधः ।
फलैर्नानाविधैस्तस्या उपशोभाम्प्रकल्पयेत् ॥ ६ ।
उत्तमा गुड़धेनुः स्यात्सदा धारचतुष्टयम् ।
भागार्द्धेन तु तौल्येन चतुर्थांशेन वत्सकम् ॥ ७ ।
मध्यमा च तदर्द्धेन भारेणैकेन चाधमा ।
वित्तहीनो यथाशक्त्या शतैरष्टाभिरेव च ॥ ८ ।
अत ऊर्द्धन्तु कर्त्तव्या§ गृहवित्तानुसारतः ।
गन्धपुष्पादिभिः पूज्य ब्राह्मणाय निवेदयेत्¶ ॥ ९ ।
श्रोत्रियाय‖ प्रदातव्या सहस्रकनकेन तु ।
तदर्द्धेन महाराज तस्याप्यर्द्धेन वा पुनः ॥ १० ।
शतेन वा शतार्द्धेन यथाशक्त्या** निवेदयेत्†† ।

---

* कांस्यपाददयन्तस्याः पुच्छं चीरमयन्तथेति (ग) ।

† पट्टयुग्मेनेति (ग) ।

‡ भूषितामिति (ग) ।

§ एवमेव तु कर्त्तव्यमिति (ग) ।

¶ गन्धपुष्पादिभिः कृत्वा धूपनैवेद्यदीपकान् ।
एवं कृत्वा द्विजेन्द्राय आहिताग्नेर्विशेषतः ॥ इति (ग) ।

‖ ईदृशायेति (ग) ।

** यथाशक्तीति साधु ।

†† यथाशक्त्या तु दापयेदिति (ग) ।

गन्धपुष्पादिभिः पूज्य* मुद्रिकाकर्णभूषणैः† ।
छत्रिकापादुके दत्त्वा इमं मन्त्रमुदीरयेत् ॥ ११ ॥
गुड़धेनो महावीर्य्ये सर्व्वसम्पत्प्रदे शुभे ।
दानादस्माच्च भो देवि भक्ष्यभोज्यं प्रयच्छ मे‡ ।
प्राङ्मुखोवापि दाता च ब्राह्मणाय निवेदयेत् ॥ १२ ॥
वाचा कृतं कर्म्मकृतं मनसा यद्विचिन्तितम् ।
मानकूटं तुलाकूटं कन्यागोऽर्थे उदाहृतम्§ ॥ १३ ॥
अनृतं नाशमायातु¶ गुड़धेनो द्विजार्पिता ।
दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम् ॥ १४ ॥
यत्र क्षीरवहा नद्यो घृतपायसकर्द्दमाः ।
ऋषयो मुनयः सिद्धास्तत्र गच्छन्ति धेनुदाः ॥ १५ ॥
दश पूर्व्वान्दश परानात्मानञ्चैकविंशतिम्‖ ।
विष्णुलोकं नयत्याशु गुड़धेनोः प्रसादतः ॥ १६ ॥
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये** ।

---

* पूजयित्वेति साधु ।

† कृत्वा मुद्रिकाकर्णपत्रकैरिति (ग) ।

‡ (ग) पुस्तके चरणद्वयमात्रं वर्त्तते तच्च भिन्नरूपमेव । यथा—
याज्ञियादीनि मन्त्राणि पूर्व्वोक्तानि स्मरेद्बुध इति ।

§ कन्यानृतगवाकृतमिति (ग) ।

¶ आयातीति (क) । तत्सर्व्वं नाशयेद्वा चेति (ग) ।

‖ तारयेद्गुड़धेनुद इति (ग) ।

** एतदेव विधानं स्यादिति चोपस्कराः स्मृताः ।
मन्त्रावाहनसंयोगः सदा पर्व्वणि पर्व्वणि ॥ इति (ग) ।

सर्व्वदैव* प्रदातव्या पात्रं दृष्ट्वा महामते ॥ १७ ।
श्रद्धान्वितेन दातव्या भुक्तिमुक्तिफलप्रदा ।
सर्व्वकामप्रदा नित्यं सर्व्वपापहरा स्मृता† ॥ १८ ।
गुड़धेनोः प्रसादात्तु सौभाग्यमखिलं भवेत्‡ ।
वैष्णवं पदमाप्नोति दौर्गत्यन्तस्य नश्यति§ ॥ १९ ।

इति वराहपुराणे श्वेतोपाख्याने गुड़धेनुमाहात्म्यं
नाम द्व्यधिकशततमोऽध्यायः ।

---

* तस्माद्देवेति (ग) ।

† शुभेति (ग) ।

‡ इह सौभाग्यमतुलमायुरारोग्यसम्पदः इति (ग) ।

§ मरणे स्मरणं हरेरिति (ग) । ततः परं (ग) पुस्तके द्वौ श्लोकौ चाधि वर्त्तेते । यथा—

दशद्वादशसाहस्रा दश चाष्टौ च जन्मनि ।
न शोकदुःखदौर्गत्यं तस्य सञ्जायते क्वचित् ।
इति पठति शृणोति चेह सम्यक् मतिमपि ददाति धीजनानाम् ।
स इह विभवैश्चिरं वसित्वा वसति चिरं दिवि देवतादिपूज्यः ॥ इति वसित्वेति चार्षम्, उषित्वेति साधु ।

त्र्यधिकशततमोऽध्यायः ।

होतोवाच ।

तद्दच्च* शर्करावेनुं शृणु राजन्यथार्थतः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशास्तरे† ॥ १ ॥
धेनुं शर्करया राजन्कृत्वा भारचतुष्टयम् ।
उत्तमा कथ्यते सद्भिश्चतुर्थांशेन वत्सकम् ॥ २ ॥
तदर्द्धं मध्यमा प्रोक्ता कनिष्ठा भारकेण तु ।
तद्वद्वत्सं प्रकुर्व्वीत चतुर्थांशेन तत्त्वतः ॥ ३ ॥
अथ कुर्य्यादष्टशतैरूर्द्धं नृपतिसत्तम ।
स्वशक्त्या कारयेद्धेनुं तथात्मानं न पीड़येत् ॥ ४ ॥
सर्व्वबीजानि संस्थाप्य चतुर्द्दिक्षु समन्ततः ।
सुवर्णस्य मुखं शृङ्गे मौक्तिकैर्नयने तथा‡ ॥ ५ ॥
गुड़ेन तु मुखं कार्य्यं जिह्वा पिष्टमयी तथा ।
कम्बलं पट्टसूत्रेण कण्ठाभरणभूषिताम् ॥ ६ ॥
इक्षुपादां रौप्यखुरां नवनीतस्तनीं तथा ।
प्रशस्तपत्रश्रवणां सितचामरभूषिताम् ॥ ७ ॥

---

* वत्सेति इति (ग) ।

† कुशोत्तरे इति (ग) ।

‡ सौवर्णमुखशृङ्गाणि मौक्तिकानयनानि चेति (ग) ।

पञ्चरत्नसमायुक्तां वस्त्रैराच्छादितां तथा* ।
गन्धपुष्पैरलङ्कृत्य ब्राह्मणाय निवेदयेत्† ॥ ८ ।
श्रोत्रियाय दरिद्राय साधुवृत्ताय धीमते ।
वेदवेदाङ्गविदुषे साग्निकाय कुटुम्बिने‡ ।
अदुष्टाय प्रदातव्या न तु मत्सरिणे द्विजे§ ॥ ९ ।
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ।
एषु पुण्येषु कालेषु यथाविभवशक्तितः¶ ॥ १० ।
सत्पात्रञ्च द्विजं दृष्ट्वा आगतं श्रोत्रियं गृहे ।
आगताय‖ प्रदातव्या पुच्छदेशे विसृष्य** च ॥ ११ ।
पूर्व्वाभिमुखमास्थाय†† अथवा स उदङ्मुखः ।
गां‡‡ पूर्व्वाभिमुखीं कृत्वा वत्समुत्तरतो न्यसेत् ॥ १२
दानकाले तु ये मन्त्रास्तान्पठित्वा समर्पयेत् ।
सम्पूज्य विधिवद्विप्रं मुद्रिकाकर्णभूषणैः ॥ १३ ।
स्वशक्त्या दक्षिणा देया वित्तशाठ्यविवर्ज्जितः ।

---

* आच्छादितोपरीति (ग) ।
† कुटुम्बिने इति (ग) ।
‡ आहिताग्निर्विशेषत इति (ग) ।
§ द्विजायेति साधु ।
¶ यदृच्छा वा मुदापयेदिति (ग) ।
‖ तादृशायेति (ग) ।
** उपविश्येति (ग) ।
†† पूर्व्वामुखः स्थितोदातेति (ग) ।
‡‡ धेनुमिति (ग) ।

हस्ते तु दक्षिणां दत्त्वा गन्धपुष्पसचन्दनाम्।
धेनुं समर्पयेत्तस्य मुखञ्च न विलोकयेत्॥ १४।
एकाहं शर्कराहारो ब्राह्मणस्त्रिदिनं वसेत्।
सर्व्वपापहरा धेनुः सर्व्वकामप्रदायिनी॥ १५।
सर्व्वकामसमृद्धस्तु जायते नात्र संशयः।
दीयमानं प्रपश्यन्ति ते यान्ति परमां गतिम्॥ १६।
य इदं शृणुयाद्भक्त्या पठते वापि मानवः।
मुच्यते सर्व्वपापेभ्यो विष्णुलोकं स गच्छति॥ १७।

इति वराहपुराणे शर्कराधेनुमाहात्म्यं नाम त्र्यधिकशततमोऽध्यायः।

चतुरधिकशततमोऽध्यायः।

होतोवाच।

मधुधेनुं प्रवक्ष्यामि सर्व्वपातकनाशिनीम्।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे॥ १।
धेनुं मधुमयीं कृत्वा सम्पूर्णघटषोड़शाम्।
चतुर्थेन तथांशेन वत्सकं परिकल्पयेत्॥ २।
सौवर्णन्तु मुखं कृत्वा शृङ्गाण्यगुरुचन्दनैः*।

---

* चन्दनमिति (ग)।

पृष्ठं ताम्रमयं कृत्वा सास्नां पटमयीं तथा ॥ ३ ।
पादानिक्षुमयान्कृत्वा सितकम्बलकम्बलम्* ।
मुखं गुड़मयं कृत्वा जिह्वां शर्करया तथा ॥ ४ ।
ओष्ठौ पुष्पमयौ तस्या दन्ताः फलमयाः स्मृताः ।
दर्भरोममयीं† देवी खुरैरौप्यैश्च भूषिता‡ ॥ ५ ।
प्रशस्तपत्रश्रवणा प्रमाणात्परितस्तता ।
सर्व्वलक्षणसंयुक्ता सप्तधान्यान्विता तथा§ ॥ ६ ।
चत्वारि तिलपात्राणि चतुर्द्दिक्षु प्रकल्पयेत्¶ ।
छादिता वस्त्रयुग्मेन कण्ठाभरणभूषिता ।
कांस्योपदोहिनीं कृत्वा गन्धपुष्पैस्तु पूजिताम्‖ ॥ ७
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ।
संक्रान्त्यामुपरागे च सर्व्वकाले यदृच्छया ॥ ८ ।
द्रव्यब्राह्मणसम्पत्तिं दृष्ट्वा तां प्रतिपादयेत् ।
ब्राह्मणाय दरिद्राय श्रोत्रियायाहिताग्नये** ।

---

* कम्बलेति (ग) ।

† रोमधरेति (ग) ।

‡ रौप्यखुरनिभूषितेति (ग) ।

§ धान्यानि दापयेदिति (ग) ।

¶ दिक्ष्वपि दापयेदिति (ग) ।

‖ धूपितामिति (क), (ख) ।

** गुणयुक्ताय पाठके (क), (ख) ; (ग) पुस्तकेऽतः परं 'आर्य्यावर्त्ते समुत्पन्ने वेदाङ्गपारगे' इत्यधिकपाठो वर्त्तते, तत्र विवक्षायां सप्तमी ।

ताद्दशाय प्रदातव्या मधुधेनुर्नरोत्तमे ॥ ९ ॥
पुच्छदेशे विसृश्याथ जलपूर्णां सदक्षिणाम् ।
दद्याद्विप्राय धेनुन्तां मन्त्रपूर्व्वां विचक्षणः* ॥ १० ॥
रसज्ञा सर्व्वदेवानां सर्व्वभूतहिते रता ।
प्रीयन्तां पितरो देवा मधुधेनो† नमोऽस्तु ते ।
एवमुच्चार्य्य तान्धेनुं ब्राह्मणाय निवेदयेत् ॥ ११ ॥
अहं गृह्णामि त्वां देवि कुटुम्बार्थे विशेषतः ।
कामं कामदुघे कामान्मधुधेनो नमोऽस्तु ते ॥ १२ ॥
मधुवातेति मन्त्रेण दद्यादाशुचिकेन तु ।
दत्त्वा धेनुं महाराज छत्रिकोपानहौ तथा ॥ १३ ॥
एवं यः कुरुते भक्त्या मधुधेनुं नराधिप ।
दत्त्वा दानं पायसेन मधुना च दिनं नयेत् ॥ १४ ॥
ब्राह्मणश्च‡ त्रिरात्रन्तु मधुपायससंयुतम् ।
एवं कृते तु यत्पुण्यं तन्निबोध नराधिप ॥ १५ ॥
यत्र नद्यो मधुवहा यत्र पायसकर्द्दमाः ।

---

* (ग) पुस्तकेऽन्यथैव पाठो दृश्यते । यथा—
पुच्छदेशोपविष्टन्तु गन्धधूपादिपूजिता ।
आच्छाद्य वस्त्रयुग्मेन मुद्रिकावर्णमानकैः ॥
स्वशक्त्या दक्षिणां दत्त्वा वित्तशाठ्यविवर्ज्जितः ।
जलपूर्व्वन्तु कर्त्तव्यं पश्चाद्दानं समर्पयेत् ॥ इति ।

† मम धेनो इति (क), (ख) ।

‡ ब्राह्मणोऽपीति (ग) ।

ऋषयो मुनयः सिद्धास्तत्र गच्छन्ति धेनुदाः ।
तत्र भोगानथो भुङ्क्ते ब्रह्मलोकं* स गच्छति† ॥ १६ ।
दश पूर्व्वान्दश परानात्मानञ्चैकविंशकम् ।
नयते विष्णुसायुज्यं मधुधेनुप्रसादतः ॥ १७ ।
य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः ।
सर्व्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ १८ ।

इति वराहपुराणे मधुधेनुमाहात्म्यं नाम चतुरधिकशततमोऽध्यायः ।

पञ्चाधिकशततमोऽध्यायः ।

होतोवाच ।

क्षीरधेनुं प्रवक्ष्यामि तां निबोध नराधिप ।
अनुलिप्ते महीपृष्ठे गोमयेन नृपोत्तम ॥ १ ।
गोचर्म्ममात्रमानेन कुशानास्तीर्य्य सर्व्वतः ।
तस्योपरि* महाराज न्यसेत्कृष्णाजिनं बुधः ॥ २ ।

---

* विष्णोर्लोकमिति (ख) ।

† (ग) पुस्तकेऽतः परं

क्रीड़ित्वा सुचिरं कालं पुनर्मर्त्त्यमुपागतः ।
स भुक्त्वा विपुलान् भोगान् विष्णुलोकं स गच्छतीति ॥

---

* तस्योपरीति (ग) ।

तत्र कृत्वा* कुण्डलिकां गोमयेन सुविस्तृताम्† ।
क्षीरकुम्भं ततः स्थाप्य‡ चतुर्थांशेन वत्सकम् ॥ ३ ।
सुवर्णमुखशृङ्गाणि चन्दनागुरुकाणि च ।
प्रशस्तपत्रश्रवणां तिलपात्रोपरि न्यसेत् ॥ ४ ।
मुखङ्गुडमयं तस्या जिह्वां शर्करया तथा ।
फलप्रशस्तदशनां§ मुक्ताफलमयेक्षणाम् ॥ ५ ।
इक्षुपादां दर्भरोमां सितकम्बलकम्बलाम् ।
ताम्रपृष्ठां कांस्यदोहां पट्टसूत्रमयीं शुभाम्¶ ॥ ६ ।
पुच्छञ्च नृपशार्दूल नवनीतमयस्तनीम् ।
स्वर्णशृङ्गीं रौप्यखुरां पञ्चरत्नसमन्विताम् ॥ ७ ।
चत्वारि तिलपात्राणि चतुर्दिक्ष्वपि विन्यसेत्‖ ।
सप्तधान्ययुतं पात्रं दिक्षु दिक्षु च विन्यसेत्** ॥ ८ ।
एवं लक्षणसंयुक्तां क्षीरधेनुं प्रकल्पयेत् ।
आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैः समर्चयेत् ॥ ९ ।

---

* तत्रोपरीति (ग) ।

† कृतामपीति (ग) ।

‡ स्थापयित्वेति साधु ।

§ फलप्रशस्तपत्राणामिति (ख) ।

¶ तथेति (ग) ।

‖ स्थापयेदिति (ग) ।

** सप्तव्रीहिमयीयुक्तां दिक्षु सर्व्वासु स्थापयेदिति (ग) ।

धूपदीपादिकं कृत्वा ब्राह्मणाय निवेदयेत् ।
वस्त्रादिभिरलङ्कृत्य* मुद्रिकाकर्णकुण्डलैः† ।
पादुकोपानहौ छत्रं दत्त्वा दानं समर्पयेत् ॥ १० ।
दद्यादनेन मन्त्रेण चीरधेनुं प्रयत्नतः‡ ।
आप्यायस्वेति मन्त्रेण वेदोक्तेन विधानतः§ ।
प्रतिग्राही पठेन्मन्त्रमेवम्¶ दानविधिः स्मृतः‖ ॥ ११ ।
दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम् ।
एतां हेमसहस्रेण शतेनाथ स्वशक्तितः ।
दत्त्वा धेनुं महाराज शृणु तस्यापि यत्फलम् ॥ १२ ।
षष्टिवर्षसहस्रन्तु इन्द्रलोके महीयते ।
पित्रादिभिश्च सहितो** ब्रह्मणो भवनं व्रजेत् ॥ १३ ।
दिव्यं विमानमारूढो दिव्यस्रगनुलेपनः ।
क्रीड़ित्वा†† सुचिरं कालं विष्णुलोकं स गच्छति ॥ १४

---

* आच्छाद्यालङ्कृतां कृत्वेति (ग) ।

† मानकैरिति (ग) ।

‡ अनेनैव तु मन्त्रेण चीरधेनुं प्रदापयेदिति (ग) ।

§ आश्रयः सर्व्वभूतानामित्यादि नरपुङ्गव ।
आप्यायस्वेति मन्त्रेण चीरधेनुं प्रसादयेदिति (ग) ।

¶ एवमिति (ख) ।

‖ गृह्णीति च पठेन्मन्त्रं ग्राहकोराजसत्तम इति (ग) ।

** पितृपितामहैः सार्द्धमिति (ग) ।

†† क्रीड़यित्वेति (ख) ।

द्वादशादित्यसङ्काशे विमानवरमण्डिते ।
गीतवादित्रनिर्घोषैरप्सरोगणसेविते ।
ततोप्य* विष्णोर्भवने विष्णुसायुज्यमाप्नुयात्† ॥ १५ ॥
य इमं शृणुयाद्राजन् पठेद्वा भक्तिभावतः‡ ।
सर्व्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ १६ ॥

इति वराहपुराणे क्षीरधेनुविधिर्नाम पञ्चाधिकशततमोऽध्यायः ।

—•◎•—

षड़धिकशततमोऽध्यायः ।

होतोवाच ।

दधिधेनोर्महाराज विधानं शृणु साम्प्रतम् ।
अनुलिप्ते महाभागे* गोमयेन नराधिप ॥ १ ॥

---

* उप्य इति आर्षम्, उषित्वेति साधु ।

† सायुज्यतां व्रजेदिति (ग) ।

‡ भावित इति (ग) ।

---

* अनुलिप्ते महाभाग इत्यारभ्य पादसप्तकं (ख) पुस्तके नास्ति ।

गोचर्ममात्रन्तु पुनः पुष्पप्रकरशोभिते ।
कुशैरास्तीर्य्य वसुधां कृष्णाजिनकुशोत्तरीम् ॥ २ ।
दधिकुम्भन्तु संस्थाप्य सप्तधान्यचयोपरि* ।
चतुर्थांशेन वत्सन्तु सौवर्णमुखमण्डितम्† ॥ ३ ।
आच्छाद्य वस्त्रयुग्मेन पुष्पगन्धैस्तु पूजिताम् ।
ब्राह्मणाय कुलीनाय साधुवृत्ताय धीमते ।
क्षमादिगुणयुक्ताय‡ दद्यात्तां दधिधेनुकाम् ॥ ४ ।
पुच्छदेशोपविष्टस्तु मुद्रिकाकर्णभूषणैः§ ।
पादुकोपानहौ छत्रं दत्त्वा मन्त्रमिमं पठेत्¶ ।
दधिक्राव्णेति मन्त्रेण दद्याद्धेनुं सुपूजिताम्‖ ॥ ५ ।
एवं दधिमयीं धेनुं दत्त्वा राजर्षिसत्तम ।
एकाहारी** दिनं तिष्ठेद्दध्ना च नृपनन्दन ॥ ६ ।
यजमानोवसेद्राजंस्त्रिरात्रञ्च द्विजोत्तमः ।
दीयमानाम्प्रपश्यन्ति ते यान्ति परमं पदम् ॥ ७ ।

---

* धान्यस्य चोपरीति (ग) ।

† संयुक्तमिति (ग) ।

‡ क्षमाद्यगुणयुक्तायेति (ख) । क्षमादमशमोपेतायेदृशाय प्रदापयेदिति (ग) ।

§ मात्रकैरिति (ग) ।

¶ अनुस्मरेदिति (ग) ।

‖ दधिधेनुं प्रदापयेदिति (ग) ।

** दध्याहारीति (ग) ।

य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानव:।
सोऽश्वमेधफलं प्राप्य विष्णुलोकञ्च* गच्छति ॥ ८ ।

इति वराहपुराणे दधिधेनुमाहात्म्यं नाम षड़धिकशततमोऽध्याय:।

सप्ताधिकशततमोऽध्याय:।

होतोवाच ।

नवनीतमयीं धेनुं शृणु राजन्प्रयत्नत:।
यां श्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशय: ॥ १ ।
गोमयेनानुलिप्तायां भूमौ गोचर्म्ममानत:।
चर्म्म कृष्णमृगस्यैव तस्योपरि च धारयेत्* ॥ २ ।
कुम्भन्तु नवनीतस्य प्रस्थमानस्य धारयेत्।
वत्सं चतुर्थभागस्य तस्यानुत्तरतो न्यसेत् ॥ ३ ।
कृत्वा विधानेन च राजसिंह
सुवर्णशृङ्गी सुमुखा च कार्य्या।

---

* स इति (ग)।

---

* तस्योपरि कृष्णमृगस्य च चर्म्मप्रसारितमिति (ग)।

नेत्रे च तस्या मणिमौक्तिकैस्तु
कृत्वा तथान्यच्च गुड़ेन जिह्वाम्* ।
ओष्ठौ च पुष्पैश्च फलैश्च दन्ताः
प्रकल्प्य सास्नाञ्च सितैश्च सूत्रैः† ॥ ४ ।
नवनीतस्तनीं राजन्निक्षुपादां‡ प्रकल्पयेत् ।
ताम्रपृष्ठां रौप्यखुरां§ दर्भरोमकृतच्छविम् ॥ ५ ।
चतुर्भिस्तिलपात्रैश्च संवृतां¶ सर्व्वतो दिशि ।
आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैरलङ्कृताम् ॥ ६ ।
दीपांश्च दिक्षु‖ प्रज्वाल्य ब्राह्मणाय निवेदयेत् ।
मन्त्रास्त एव जप्तव्याः सर्वधेनुषु ये स्मृताः ॥ ७ ।
पुरा देवासुरैः सर्वैः सागरस्य तु मन्थने ।
उत्पन्नं दिव्यममृतं नवनीतमिदं शुभम् ।
आप्यायनन्तु** भूतानां नवनीत नमोऽस्तु ते ॥ ८ ।

---

* तस्या इति (ग) ।

† जिह्वां तथा शर्करया प्रकल्प्य फलानि दन्ताः कम्बलं पट्टसूत्रमिति (ग) ।

‡ तिलपादामिति (ग) ।

§ सूत्रपुच्छामिति (ग), तत्रातः परं स्वर्णशृङ्गां रौप्यखुरां पञ्चरत्नसमन्विता-
धिकः पाठो वर्त्तते ।

¶ तां संयुतामिति (ग) ।

‖ दिग्भागेदीपांश्चेति (ग), तत्रातः परं वेदवेदाङ्गविदुषे चाहिताग्नि हिमाल-
मित्यधिकः पाठो वर्त्तते ।

** चेति (ग) ।

एवमुच्चार्य तां दद्याद्ब्राह्मणाय कुटुम्बिने।
धेनुञ्च दत्त्वा सुदुघां सोपधानां नयेद्गृहम्* ॥ ९ ॥
हविरेवं रसञ्चैव विप्रवर्य्यस्य भूपते।
भुक्ता तिष्ठेद्दिनं राजन्धेनुदस्त्रीणि वै द्विजः ॥ १० ॥
यः प्रपश्यति तान्धेनुं दीयमानां नरोत्तम।
सर्व्वपापविनिर्मुक्तः शिवसायुज्यतां व्रजेत् ॥ ११ ॥
पितृभिः पूर्व्वजैः सार्द्धं भविष्यद्भिश्च मानवः।
विष्णुलोकं व्रजत्याशु यावदाभूतसंप्लवम्† ॥ १२ ॥
य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः‡।
सर्व्वपापविशुद्धात्मा विष्णुलोके महीयते ॥ १३ ॥

इति वराहपुराणे नवनीतधेनुमाहात्म्यं नाम सप्ताधिकशततमोऽध्यायः।

---

* गृहे इति (ख)।

† यावदाहूतसंप्लवमिति (ख), (ग)।

‡ मानवैरिति (ग)।

अष्टाधिकशततमोऽध्यायः ।

होतोवाच ।

लवणधेनुं प्रवक्ष्यामि तान्निबोध नृपोत्तम* ।
षोड़शप्रस्थसंयुक्तां धेनुं कृत्वा तु मानवः† ॥ १ ।
वत्सं चतुर्भी राजेन्द्र इक्षुपादांश्च‡ कारयेत् ।
सुवर्ण§मुखशृङ्गाणि खुरा रौप्यमया¶स्तथा ॥ २ ।
मुखं गुड़मयन्तस्या दन्ताः फलमया नृप ।
जिह्वां शर्करया राजन् घ्राणं गन्धमयन्तथा ॥ ३ ।
नेत्रे रत्नमये कुर्य्यात्कर्णौ पत्नमयौ तथा ।
श्रीखण्डमयकोष्ठौ च‖ नवनीतमयाः स्तनाः ॥ ४ ।
सूत्रपुच्छान्ताम्रपृष्ठान्दर्भरोमां पयस्विनीम् ।
कांस्योपदोहां राजेन्द्र घण्टाभरणभूषिताम् ॥ ५ ।
सुगन्धपुष्पधूपैश्च पूजयित्वा विधानतः ।

---

* महीपते इति (ग) ।

† अनुलिप्ते महीपृष्ठे कृताजिनकुशोत्तरे, धेनुं लवणमयीं कृत्वा षोड़शप्रस्थसंयुता-मिति (ग) ।

‡ तु इति (ग) ।

§ सौवर्णेति (ग) ।

¶ रौप्यमयीरिति (ग) ।

‖ श्रीखण्डशृङ्गकोष्ठौ चेति (ग) ।

आच्छाद्य वस्त्रयुग्मेन ब्राह्मणाय निवेदयेत्* ॥
ग्रहणे वाथ संक्रान्तौ व्यतीपाते तथायने।
द्विजाय साधुवृत्ताय वेदवेदाङ्गपारगे† ॥ ६।७।
ब्राह्मणम्पूज्य‡ विधिवत्पूर्व्वोक्तविधिना नृप।
सदक्षिणञ्च गोपुच्छं दत्त्वा ब्राह्मणहस्तके।
इमं मन्त्रं समुच्चार्य्य ततस्तां प्रतिपादयेत् ॥ ८।
इमां गृहाण भो विप्र रुद्ररूपां नमोऽस्तु ते।
रसज्ञा सर्व्वभूतानां सर्व्वदेवनमस्कृता।
कामं पूरय मे देवि रुद्ररूपे नमोऽस्तु ते§ ॥ ९।
दत्त्वा धेनुं लवणेन एकाहञ्चैव तिष्ठति।
स्वयं त्रिरात्रं विप्रेण तथैव लवणाग्निना ॥ १०।
सहस्रेण शतेनाथ स्वशक्त्या कनकेन तु।

---

* अतः परं (ग) पुस्तके—
नक्षत्रग्रहपीड़ासु सर्व्वकालं प्रदापयेदित्यधिकः पाठो वर्त्तते।

† (ग) पुस्तके द्विजाय साधुवृत्ताय कुलीनाय च धीमते।
वेदवेदाङ्गविदुषे श्रोत्रियायाहिताग्नये।
ईदृशाय प्रदातव्या तथाऽमत्सरिणे नृप ॥
यथाभिवस्य मन्त्रन्तु पुच्छदेशोपविश्य च।
छत्रकोपानहौ देये मुद्रिकाकर्णमात्रकैः ॥
आच्छाद्य वस्त्रयुग्मेन दक्षिणां कम्बलं वदेत्।
पूर्व्वोक्तेन विधानेन स्वशक्त्या कनकेन तु ॥ इत्यधिकः पाठो वर्त्तते।

‡ पूजयित्वेति साधु।

§ कामं कामदुघे कामं लवणधेनो नमोऽस्तु ते इति (ग)।

दत्त्वेमां स्वर्गमाप्नोति यत्र देवो वृषध्वजः ॥ ११ ।
य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः ।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकञ्च गच्छति ॥ १२ ।

इति वराहपुराणे लवणधेनुमाहात्म्यं नाम अष्टाधिकशततमोऽध्यायः ।

नवाधिकशततमोऽध्यायः ।

होतोवाच ।

अथातः सम्प्रवक्ष्यामि धेनुं कार्पासकीं* नृप ।
यत्प्रदानान्नरो याति ऐन्द्रलोकमनुत्तमम् ॥ १ ।
विषुवे त्वयने पुण्ये युगादिग्रहणे तथा ।
ग्रहपीड़ासु चोग्रासु दुःस्वप्ने रिष्टदर्शने† ॥ २ ।
पुण्येष्वायतने‡ राजंच्छुचिदेशे गवां गणे ।
गोमयेनोपलिप्तायां दर्भानास्तीर्य्य वै तिलान् ॥ ३ ।
तन्मध्ये स्थापयेद्धेनुं वस्त्रमाल्यानुलेपनाम्§ ।

---

* कार्पासमयीमिति (ग) ।

† तथाच ग्रहपीड़ासु दुःस्वप्नाद्भुतदर्शने इति (ग) ।

‡ पुण्येऽप्यायतने इति (ग) ।

§ लेपनैरिति (ग) ।

धूपदीपादिनैवेद्यैः पूजयेच्च विमत्सरः ॥ ४ ।
उत्तमा च चतुर्भारैरर्द्धेनैव* तु मध्यमा ।
भारेण चाधमा प्रोक्ता वित्तशाठ्यं विवर्ज्जयेत् ॥ ५ ।
चतुर्थांशेन वत्सन्तु कल्पयित्वा विधानतः† ।
कर्त्तव्या रुक्मशृङ्गी तु रजतस्य खुरान्विता ।
नानाफलमया दन्ता रत्नगर्भसमन्विताः ॥ ६ ।
इत्येवं सर्व्वं सम्पूर्णां कृत्वा श्रद्धासमन्वितः ।
आवाहयेत्तां कार्पासधेनुं मन्त्रैर्द्विजातये ।
दद्याद्धेनुं चर्म्मपाणिः प्रयतः श्रद्धयाऽन्वितः ॥ ७ ।
पूर्व्वोक्तस्तु विधिः कार्य्यो दानमन्त्रपुरःसरः ॥ ८ ।
यथा देवगणः सर्व्वस्त्वया हीनो न वर्त्तते ।
तथा उद्धर मां देवि पाहि संसारसागरात् ॥ ९ ।

इति वराहपुराणे कार्पासधेनुमाहात्म्यं नाम नवाधिकशततमोऽध्यायः ।

---

* तदर्द्धेन त्विति (ग) ।

† कृत्वा वै वत्सन्तु परिकल्पयेदिति (ग) ।

दशाधिकशततमोऽध्यायः ।

होतोवाच ।

शृणु राजन्प्रवक्ष्यामि धान्यधेनुमनुत्तमाम्* ।
यस्याः† सङ्कीर्त्तनादेव सा तुष्येत्पार्व्वती स्वयम् ॥ १ ॥
विषुवे चायने वापि कार्त्तिक्यान्तु विशेषतः ।
यां दत्त्वा मुच्यते पापाच्छशाङ्क इव राहुणा‡ ॥ २ ॥
दशधेनुप्रदानेन यत्फलं राजसत्तम ।
तत्सर्व्वमेव प्राप्नोति व्रीहिधेनुप्रदानतः§ ॥ ३ ॥
कृष्णाजिनं ततः कृत्वा प्राग्वत्सं स्थापयेद्बुधः¶ ।
गोमयेनानुलिप्तायां भूमौ तां परिपूजयेत्‖ ॥ ४ ॥
उत्तमा तु भवेद्धेनु**र्द्रोणैश्चापि चतुष्टयैः ।
मध्यमा च तदर्द्धेन वित्तशाठ्यं न कारयेत् ॥ ५ ॥

---

* दानमाहात्म्यमुत्तममिति (ग) ।

† यस्येति (ग) ।

‡ तदिदानीं प्रवक्ष्यामि धान्यधेनुविधिं परमिति (ग), तत्रातः परं यां दत्त्वेत्व वर्त्तते ।

§ व्रीहिधेनुप्रदो नर इति (ग) ।

¶ कृष्णाजिनं समीचीनं प्राचीनं विन्यसेद्बुध इति (ग) ।

‖ गोमयेनानुलिप्तायां शोभनां वस्त्रसंयुताम् ।
पूजयेद्वेदिमध्ये तु वेदनिर्घोषमङ्गलैः ॥ इति (ग) ।

** सा च धेनुः स्यादिति (ग) ।

चतुर्थांशेन वत्सन्तु कल्पयित्वा विधानतः* ।
अङ्गन्तु पूर्व्ववत्कार्य्यं मुखं चौद्रमयं शुभम् ॥ ६ ।
पूर्व्ववदर्च्चयित्वा† तां कृत्वा दीपार्च्चनादिकम् ।
पुण्यकालञ्च सम्प्राप्य स्नातः शुक्लाम्बरो गृही ।
त्रिः प्रदक्षिणमावृत्य दण्डवत्प्रणमेच्च ताम्‡ ॥ ७ ।
त्वं हि विप्र महाभाग वेदवेदाङ्गपारग ।
मया दत्ताञ्च गृह्णीष्व§ प्रसीद¶ त्वं द्विजोत्तम ।
प्रीयतां मम देवेशो भगवान्मधुसूदनः ॥ ८ ।
या च लक्ष्मीस्तु गोविन्दे स्वाहा या च विभावसौ ।
शक्रे शचीति विख्याता शिवे गौरी च संस्थिता ॥ ९ ।

---

* चतुर्थांशेन धेनोर्वै वत्सन्तु परिकल्पयेत् ।
कर्त्तव्यौ रुक्मशृङ्गौ तु राजतखुरसंयुतौ ।
गौर्मेधा कुर्व्वीत घ्राणं अगुरुं चन्दनन्तथा ॥
मुक्ताफलमया दन्ता घृतचौद्रमयं मुखम् ।
प्रशस्तपत्रश्रवणं कांस्यदोहनकारिताम् ॥
इक्षुपृष्टिमयाः पादाः चौम्यपुच्छसमन्विताम् ।
नानाफलसमुपेतां रत्नगर्भसमन्विताम् ।
पादुकोपानहच्छत्रभाजनं तर्पणं तथा ॥
इत्यधिकः पाठः (ग) पुस्तके दृश्यते ।

† इत्येवं रक्षयित्वेति (ग) ।

‡ मन्त्राणामनुकीर्त्तयेदिति (ग) ।

§ गृहाणेति साधु ।

¶ प्रदत्ताञ्चोपकाराय गृह्णीष्वेति (ग) ।

गायत्री ब्रह्मण: प्रोक्ता ज्योत्स्ना चन्द्रे रवेः प्रभा ।
बुद्धिर्वृहस्पतेः ख्याता मेधा मुनिषु सत्तमा ॥ १० ।
तस्मात्सर्व्वमयी देवी धान्यरूपेण संस्थिता ।
एवमुच्चार्य्य तां धेनुं ब्राह्मणाय निवेदयेत् ।
दत्त्वा प्रदक्षिणं कृत्वा तं क्षमाप्य द्विजोत्तमम् ॥ ११ ।
यावच्च पृथिवी सर्व्वा वसुरत्नानि भूपते ।
तावत्पुण्यं समधिकं व्रीहिधेनोश्च तत्फलम् ॥ १२ ।
तस्मान्नरेन्द्र* दातव्या भुक्तिमुक्तिफलप्रदा ।
इहलोके च सौभाग्यमायुरारोग्यवर्द्धनम् ॥ १३ ।
विमानेनार्कवर्णेन किङ्किणीजालमालिना† ।
स्तूयमानोऽप्सरोभिश्च स याति शिवमन्दिरम्‡ ॥ १४
यावच्च स्मरते जन्म तावत्स्वर्गे महीयते ।
ततः स्वर्गात्परिभ्रष्टो जम्बूद्वीपपतिर्भवेत् ॥ १५ ।
एवं हरेण चोद्गीर्णं श्रुत्वा वाक्यं नरोत्तमः ।
सर्व्वपापविशुद्धात्मा रुद्रलोके महीयते ॥ १६ ।

इति वराहपुराणे धान्यधेनुमाहात्म्यं नाम दशाधिकशततमोऽध्यायः ।

---

* नरेशेति (ख), राजेन्द्रेति (ग) ।

† शालिनेति (ग) ।

‡ शिवमन्दिरे इति (ग) ।

एकादशाधिकशततमोऽध्यायः ।

होतोवाच ।

अथातः सम्प्रवक्ष्यामि कपिलां धेनुमुत्तमाम् ।
यत्प्रदानान्नरो याति विष्णुलोकमनुत्तमम् ॥ १ ।
पूर्व्वोक्तेन विधानेन दद्याद्धेनुं सवत्सकाम् ।
सर्व्वालङ्कारसंयुक्तां सर्व्वरत्नसमन्विताम् ॥ २ ।
शिरो ग्रीवा कपिलायाः सर्व्वतीर्थानि भामिनि ।
पितामहनियोगाच्च निवसन्ति हि निश्चयः* ॥ ३ ।
प्रातरुत्थाय यो मर्त्यः कपिलागलमस्तकात् ।
च्युतन्तु भक्त्या पानीयं शिरसा वन्दते शुचिः ॥ ४ ।
स तेन पुण्यतो येन तत्क्षणाद्दग्धकिल्बिषः ।
त्रिंशद्वर्षकृतं पापं दहत्यग्निरिवेन्धनम् ॥ ५ ।
कल्यमुत्थाय यो मर्त्यः कुर्य्यात्तासां प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन पृथिवी स्याद्वसुन्धरे ॥ ६ ।
प्रदक्षिणेन चैकेन श्रद्धायुक्तेन तत्क्षणात् ।
दशजन्मकृतं पापं तस्य नश्यत्यसंशयम् ॥ ७ ।
कपिलायास्तु मूत्रेण स्नायाच्चैव शुचिव्रतः ।
स गङ्गादिषु तीर्थेषु स्नातो भवति मानवः ॥ ८ ।
तेन स्नानेन चैकेन भावयुक्तेन वै नरः ।

---

* नित्यश इति (ग) ।

यावज्जीवकृतात्पापान्मुच्यते नात्र संशयः ॥ ९ ।
गोसहस्रञ्च यो दद्यादेकां वा कपिलां नरः ।
सममेतत्पुरा प्राह ब्रह्मा लोकपितामहः ॥ १० ।
गवामस्थि ततोऽप्येतन्मृतगन्धेन दूषयेत् ।
यावज्जिघ्रति तं गन्धं तावत्पुण्यैस्तु पूज्यते ॥ ११ ।
गवां कण्डूयनं श्रेष्ठं तथा च परिपालनम् ।
तुल्यं गोशतदानस्य भयरोगादिपालने ॥ १२ ।
तृणोदकानि यो दद्यात्क्षुधितेन गवाह्निकम् ।
गोमेधस्य फलं दिव्यं लभते मानवोत्तमः ॥ १३ ।
विमानैर्विविधैर्दिव्यैः कन्याभिरभितोऽर्पितैः* ।
सेव्यमानः सुगन्धैर्वै दीप्यमान इवाग्नयः† ॥ १४
सुवर्णकपिला पूर्व्वं द्वितीया गौरपिङ्गला ।
तृतीया चैव रक्ताक्षी चतुर्थी गुड़पिङ्गला ॥ १५ ।
पञ्चमी बहुवर्णा स्यात्षष्ठी च श्वेतपिङ्गला ।
सप्तमी श्वेतपिङ्गाक्षी अष्टमी कृष्णपिङ्गला ॥ १६ ।
नवमी पाटला ज्ञेया दशमी पुच्छपिङ्गला‡ ।
एकादशी खुरश्वेता एतासां सर्व्वलक्षणाः ॥ १७ ।
सर्व्वलक्षणसंयुक्ता सर्व्वालङ्कृतसुन्दरी ।

---

* अर्चितैरिति (ग) ।

† यथाग्नय इति (ग) ।

‡ श्वेतपिङ्गलेति (ग) ।

ब्राह्मणाय प्रदातव्या सर्व्वमुक्तिप्रदायिनी।
भुक्तिमुक्तिप्रदा तेषां विष्णुमार्गप्रदायिनी॥ १८।

इति वराहपुराणे कपिलामाहात्म्यं नाम एकादशाधिकशततमोऽध्यायः।

द्वादशाधिकशततमोऽध्यायः।

होतोवाच।

अतः परं महाराज शृणूभयमुखीं ततः*।
विधानं तद्वरारोहे धरण्या कथितं पुरा।
तदहं सम्प्रवक्ष्यामि तव पुण्यफलं महत्†॥ १।

धरण्युवाच।

या त्वया कपिला प्रोक्ता‡ पूर्व्वमुत्पादिता प्रभो।
होमधेनुः सदा पुण्या सा ज्ञेया कतिलक्षणा॥ २।
कियत्यः कपिलाः प्रोक्ताः स्वयमेव स्वयम्भुवा।
प्रसूयमाना दानेन किं पुण्यं स्याच्च माधव।
एतदिच्छाम्यहं श्रोतुं विस्तरेण जगद्गुरो॥ ३।

---

* महाराजोभयमुख्याः समासत इति (ग)।

† तावत्पुण्यफलञ्चयेदिति (ग)।

‡ नामेति (ग)।

वराह उवाच ।

शृणुष्व देवि* तत्त्वेन पवित्रं पापनाशनम् ।
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ॥ ४ ।
कपिला ह्यग्निहोत्रार्थं यज्ञार्थं च वरानने ।
उद्धृत्य† सर्व्वतेजोभिर्ब्रह्मणा निर्म्मिता पुरा ॥ ५ ।
पवित्राणां पवित्रञ्च मङ्गलानाञ्च मङ्गलम् ।
पुण्यानां परमं पुण्यं कपिला च वसुन्धरे ॥ ६ ।
तपसस्तप एवाग्र्यं व्रतानां व्रतमुत्तमम् ।
दानानामुत्तमन्दानं निधीनां ह्येतदक्षयम् ॥ ७ ।
पृथिव्यां यानि तीर्थानि गुह्यान्यायतनानि च ।
पवित्राणि च पुण्यानि सर्व्वलोकेषु सुन्दरि ॥ ८ ।
होतव्यान्यग्निहोत्राणि सायं प्रातर्द्विजातिभिः ।
कपिलाया घृतेनेह दध्ना क्षीरेण वा पुनः ॥ ९ ।
जुह्वते‡ ह्यग्निहोत्राणि मन्त्रैश्च विविधैः सदा ।
पूजयन्नतिथींश्चैव परां भक्तिमुपागताः ॥ १० ।
ते यान्त्यादित्यवर्णैश्च विमानैर्द्विजसत्तमाः ।
सूर्य्यमण्डलमध्यात्तु§ ब्रह्मणा निर्म्मिता पुरा¶ ॥ ११ ।

---

* भद्रे इति (ग) ।

† उद्धृतेति (ग) ।

‡ जुह्वतीति साधु ।

§ सूर्य्यमण्डलमध्येनेति (ग) ।

¶ तु चेति (ग) ।

कपिला या पिङ्गलाक्षी* सर्व्वसौख्यप्रदायिनी।
सिद्धिबुद्धिप्रदा धेनुः कपिलानन्तरूपिणी॥ १२।
पूर्व्वोक्ता यास्तु कपिलाः† सर्व्वलक्षणलक्षिताः।
सर्व्वा ह्येता महाभागास्तारयन्ति न संशयः॥ १३।
सङ्गमेषु प्रशस्ताश्च सर्व्वपापविनाशनाः‡।
अग्निपुच्छा अग्निमुखी अग्निलोमानलप्रभा।
तथाग्नायी तथा देवी सुवर्णाख्या प्रवर्त्तते॥ १४।
गृहीत्वा कपिलां शूद्रान् कामतः सदृशीं पिबेत्।
पतितः स हि विज्ञेयश्चाण्डालसदृशोऽधमः॥ १५।
तस्मान्न प्रतिगृह्णीयाच्छूद्राद्विप्रः प्रतिग्रहम्।
दूरात्ते परिहर्त्तव्याः श्वभिस्तुल्या इवाध्वरे॥ १६।
पर्व्वकाले§ हि सर्व्वे वै¶ वर्ज्जिताः पितृदैवतैः
असम्भाष्याप्रतिग्राह्याः शूद्रास्ते पापकर्मणः॥ १७।
पिबन्ति यावत्कपिलां यावत्तेषां पितामहाः।
भूमेर्मलं समश्नन्ति जायन्ते विड्भुजश्चिरम्॥ १८।
तासां क्षीरं घृतं वापि नवनीतमथापि वा।
उपजीवन्ति ये शूद्रास्तेषाङ्गतिमतः शृणु॥ १९।

---

* पिङ्गलाक्षीति (ग)।

† कपिला तत्र इति (ख)। एतादृशी समाख्याता कपिला से वरानने इति (ग)।

‡ प्रणाशनाः इति (ख)।

§ सर्व्वकाले इति (क), (ख)।

¶ ते सर्व्वे इति (ग)।

कपिलाजीविनः* शूद्राः क्रूरा गच्छन्ति रौरवम् ।
रौरवे तु महारौद्रे† वर्षकोटिशतन्धरे ॥ २० ॥
ततोविमुक्ताः कालेन शुनोयोनिं व्रजन्ति हि‡ ।
शुनोयोन्या विमुक्तास्तु विष्ठाभुक्कृमयस्ततः§ ॥ २१ ॥
विष्ठास्थानेषु पापिष्ठः सुदुर्गन्धिषु नित्यशः ।
भूयोभूयोजायमानस्ततोत्तारं न विन्दति ॥ २२ ॥
ब्राह्मणश्चैव यो विद्वान् कुर्य्यात्तेषां प्रतिग्रहम् ।
ततः प्रभृत्यमेध्यान्तः पितरस्तस्य शेरते ॥ २३ ॥
न तं विप्रन्तु सम्भाषेन्न¶ चैवैकासनं विशेत् ।
स नित्यं वर्ज्जनीयो हि दूरात्तु ब्राह्मणैर्धरे‖ ॥ २४ ॥
यस्तेन सह सम्भाषेत्तथा चैकासनं व्रजेत् ।
प्राजापत्यञ्चरेत्कृस्नं तेन शुध्यति स द्विजः ॥ २५ ॥
एकस्य गोप्रदानस्य सहस्रांशेन पूर्यते ।
किमन्यैर्बहुभिर्दानैः कोटिसंख्यानविस्तरैः ॥ २६ ॥
श्रोत्रियाय दरिद्राय सुवृत्तायाहिताग्नये ।
आसन्नप्रसवाम्धेनुन्दानार्थं प्रतिपालयेत् ।

---

* कपिलोपजीविन इति बहुषु पाठस्तत्र छन्दोदोषः ।

† रौरवेषु च पच्यन्त इति (ग) ।

‡ त इति (ग) ।

§ विष्ठायां जायते क्रमिरिति (ग) ।

¶ सम्भाषेतेति शुद्धम् । एवं परत्रापि ।

‖ ब्राह्मणोऽध्वरे इति (ग) ।

कपिलाईप्रसूता वै दातव्या च द्विजन्मने ॥ २७ ।
जायमानस्य वत्सस्य मुखं योन्यां प्रदृश्यते ।
तावत्सा पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥ २८ ।
धेन्वा यावन्ति रोमाणि सवत्साया वसुन्धरे ।
तावत्योवर्षकोट्यस्तु ब्रह्मवादिभिरर्च्चिताः ॥ २९ ।
वसन्ति ब्रह्मलोके वै ये नित्यं कपिलाप्रदाः* ॥ ३० ।
सुवर्णशृङ्गीं यः कृत्वा रौप्ययुक्तखुरां तथा ।
ब्राह्मणस्य करे दत्त्वा सुवर्णं रौप्यमेव च ।
कपिलायास्तदा पुच्छं ब्राह्मणस्य करे न्यसेत् ॥ ३१ ।
उदकञ्च करे दत्त्वा वाचयेच्छुद्धया गिरा† ।
ससमुद्रवना तेन सशैलवनकानना ।
रत्नपूर्णा भवेद्दत्ता पृथिवी नात्र संशयः ॥ ३२ ।
पृथिवीदानतुल्येन दानेनैतेन वै नरः ।
नन्दितो याति पितृभिर्विष्णाख्यं परमम्पदम् ॥ ३३ ।
ब्रह्मस्वहारी वा गोघ्नो भ्रूणहा पापदेहकः‡ ।
महापातकयुक्तोऽपि वञ्चको ब्रह्मदूषकः ॥ ३४ ।
निन्दको ब्राह्मणानाञ्च तथा कर्म्मविदूषकः§ ।

---

* ब्रह्मलोके निवसन्ति ये च वै कपिलाप्रदा इति (ग) ।

† दिने इति (ग) ।

‡ ब्रह्मस्वहारिणो ये वै, ब्रह्महत्यावदूषक इति (ग) ।

§ उपदूषक इति (ग) ।

महापातकयुक्तोऽपि गेवां दानेन शुध्यति ॥ ३५ ।
यश्चोभयमुखीं दद्यात्प्रभूतकनकान्विताम् ।
तद्दिनं पायसाहारं पयसा वापि वा भवेत्* ॥ ३६ ।
सुवर्णस्य सहस्रेण तदर्द्धेनापि भामिनि ।
तस्याप्यर्द्ध†शतेनाथ पञ्चाशच्च ततोऽर्द्धकम्‡ ।
यथाशक्त्या प्रदातव्या वित्तशाठ्यं विवर्ज्जयेत् ॥ ३७ ।
इमां गृह्णो§भयमुखीमुभयत्र शमोऽस्तु वै ।
ददे वंशविवृद्ध्यर्थं सदा स्वस्तिकरी भव ॥ ३८ ।
प्रतिगृह्णामि त्वां धेनो¶ कुटुम्बार्थं विशेषतः ।
शुभं भवतु मे नित्यं देवधात्रि नमोऽस्तु ते‖ ॥ ३९ ।
श्रीं द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु** ।
क इदं कस्मा अदादिति जपित्वा वै वसुन्धरे ।
विसृज्य ब्राह्मणं देवि तां धेनुं तद्गृहं नयेत् ॥ ४० ।
एवं प्रसूयमानां यो गान्ददाति वसुन्धरे ।
पृथिवी तेन दत्ता स्यात्सप्तद्वीपा न संशयः ॥ ४१ ।

---

* पयसा वाऽपि निर्वपेदिति (ग) ।

† यस्याप्यर्द्ध इति (ख) ।

‡ तदर्द्धत इति (ग) ।

§ गृहाणेति साधु ।

¶ प्रतिगृह्णाति तां धेनुमिति (ग) ।

‖ स्वस्ति भवतु मे नित्यं रुद्राङ्गेति नमोनम इति (ग) ।

** द्यौस्त्वाददात्विति मन्त्रेण कपिलां प्रतिगृह्णाति इति (ग) ।

वदन्ति तां चन्द्रसमानवक्त्रां
प्रतप्तजाम्बूनदतुल्यवर्णाम् ।
महासितत्वां तनुवृत्तमध्यां
। सेवन्त्यजस्रं कुलितां हि देवाः ॥ ४२ ।
प्रातरुत्थाय यो मर्त्यः कल्पञ्चेदं समाहितः ।
जितेन्द्रियः शुचिर्भूत्वा पठेद्भक्त्या समन्वितः ॥ ४३ ।
त्रिः सदावर्त्तनं कृत्वा पापं वर्षकृतञ्च यत् ।
नश्यते तत्क्षणादेव वायुना पांशवो यथा ॥ ४४ ।
श्राद्धकाले पठेद्यस्तु इदं पावनमुत्तमम् ।
तस्यान्नं संस्कृतन्त्वद्धि पितरोऽश्नन्ति धीमतः ॥ ४५ ।
अमायां वाथ यः कश्चिद्द्विजानामग्रतः पठेत् ।
पितरस्तस्य तृप्यन्ति वर्षाणां शतमेव च ॥ ४६ ।
यश्चैतच्छृणुयान्नित्यं तद्गतेनान्तरात्मना ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥ ४७ ।

होतोवाच ।

इदं रहस्यं राजेन्द्र वराहेण पुरातनम् ।
धरण्यै कथितं राजन्धेनुमाहात्म्यमुत्तमम् ।
मया ते कथितं सर्व्वं सर्व्वपापप्रणाशनम् ॥ ४८ ।
द्वादस्यां माघमासस्य शुक्लायां तिलधेनुदः ।
सर्व्वकामसमृद्धार्थी वैष्णवं पदमाप्नुयात् ॥ ४९ ।
द्वादश्यां श्रावणे मासि शुक्लायां राजसत्तम ।
मत्स्यधेनुर्दातव्या सहिरण्या नृपोत्तम ॥ ५० ।

सर्व्वदा सर्व्वधेनूनां प्रदानं राजसत्तम ।
सर्व्वपापप्रशमनं भुक्तिमुक्तिप्रदायकम्* ॥ ५१ ।
एतत्ते सर्व्वमाख्यातं समासाद्बहुविस्तरम् ।
धेनूनां फलमुद्दिश्य सर्व्वकामप्रदं नृणाम्† ॥ ५२ ।
अथवा पीड्यसेऽत्यन्तं क्षुधया पार्थिवोत्तम ।
इदानीं कार्त्तिकी चेयं वर्त्तते च नराधिप‡ ॥ ५३
ब्रह्माण्डं सर्व्वसम्पन्नं भूतरत्नौषधैर्युतम् ।
देवदानवयक्षैस्तु§ युक्तमेतत्सदा विभो ॥ ५४ ।
एतद्धेममयं कृत्वा सर्व्वबीजरसान्वितम् ।
सरत्नं पुरुषः कृत्वा कार्त्तिक्यां द्वादशीदिने ॥ ५५ ।
अथवा पञ्चदश्याञ्च कार्त्तिकस्य विशेषतः ।
पुरोहिताय गुरवे दद्याद्भक्तिसमन्वितः¶ ॥ ५६ ।
ब्रह्माण्डोदरवर्त्तीनि यानि भूतानि पार्थिव ।
तानि दत्तानि तेन स्युः समासात्कथितं तव ॥ ५७
यो यज्ञै यजते राजन्सहस्रशतदक्षिणैः ।

---

* (ग) पुस्तके ४० श्लोकात् ५० श्लोकपर्य्यन्तो ग्रन्थांशो नास्ति ।

† तिलादिसर्व्वधेनूनां प्रदानं राजसत्तम इति (ख)। अपारफलमुद्दिश्य ब्रह्मणा लोककर्त्तृकेति (ग) ।

‡ श्लोकोऽयं (ग) पुस्तके नास्ति ।

§ चेति (ग) ।

¶ दापयेद्भक्तिमान्नर इति (ग) ।

सैकदेशो यजी*त्तस्य ब्रह्माण्डस्य विशेषतः ॥ ५८ ।
यः पुनः सकलञ्चेदं ब्रह्माण्डं यजते नरः ।
तेन यष्टं हुतं दत्तं पठितं कीर्त्तितं भवेत् ॥ ५९ ।
एवं श्रुत्वा ततो राजा हैमकुम्भप्रकल्पितम् ।
ब्रह्माण्डम्नृपये प्रादात्सपिधानञ्च तत्क्षणात्† ॥ ६० ।
सर्व्वकामैः सुसंवीतो ययौ स्वर्गं नराधिपः ।
तस्मात्त्वमपि राजेन्द्र तद्दत्त्वा तु सुखी भव ॥ ६१ ।
एवमुक्तो वसिष्ठेन सोऽप्येवमकरोन्नृपः‡ ।
जगाम परमां सिद्धिं यत्र गत्वा न शोचति ॥ ६२ ।

वराह उवाच ।

इयं ते कथिता देवि संहिता सर्व्वकामिका ।
वराहाख्या वरारोहे सर्व्वपातकनाशिनी ॥ ६३ ।
सर्व्वशास्त्रादुत्थिता चेयं ततो ब्रह्मा बुबोध ह ।
ब्रह्मा स्वसूनवे§ प्रादात्पुलस्त्याय महात्मने ॥ ६४ ।
सोऽपि रामाय च प्रादाद्भार्गवाय महात्मने ।
असावपि स्वशिष्याय‖ प्रादादुग्राय धारिणि ॥ ६५ ।

---

* यजेतेति साधु ।

† गुरोः क्षणादिति (ग) ।

‡ (ग) पुस्तके ६० श्लोकस्य परार्द्धं, ६१ श्लोकस्य पूर्व्वार्द्धञ्च न स्तः ।

§ ब्रह्माऽपि स्वसुते इति (ग) ।

¶ पुलस्त्योऽपि प्रददावे इति (ग) ।

‖ वसिष्ठायेति (क), (ख) ।

उग्रोऽपि मनवे प्रादादेष वः कीर्त्तितो मया* ।
सम्बन्धः पूर्व्वकल्पीयो द्वितीयं शृणु साम्प्रतम् ॥ ६६ ।
सर्व्वज्ञात्मक्षवानस्मि त्वञ्च मत्तो धराधरे ।
त्वत्तश्च तपसा सिद्धा† वेत्स्यन्ति‡ कपिलादयः ॥ ६७ ।
क्रमेण यावद्व्यासेन ज्ञातमेतद्भविष्यति ।
तस्यापि शिष्यो भविता नाम्ना वै रोमहर्षणिः ।
असौ शुनकपुत्राय§ कथयिष्यति नान्यथा ॥ ६८ ।
अष्टादश पुराणानि वेद द्वैपायनो गुरुः ।
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतन्तथा ॥ ६९ ।
तथान्यं नारदीयञ्च मार्कण्डेयञ्च सप्तमम् ।
आग्नेयमष्टमं प्रोक्तं भविष्यं नवमं तथा ॥ ७० ।
दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम् ।
वाराहं द्वादशं प्रोक्तं स्कान्दञ्चापि त्रयोदशम् ॥ ७१ ।
चतुर्द्दशं वामनकं कौर्म्मं पञ्चदशं स्मृतम् ।
मात्स्यञ्च गारुड़ञ्चैव ब्रह्माण्डञ्च ततः परम् ॥ ७२ ।
य एतत्पाठयेद्भक्त्या कार्त्तिक्यां द्वादशीदिने ।

---

* एषोऽपि परिकीर्त्तित इति (ग) ।

† तपसा युक्ता इति (ग) ।

‡ वेत्स्यन्तीति साधु ।

§ शुनकपुत्रस्येति (क) ।

तस्य नूनं भवेत्पुत्रो ह्यपुत्रस्यापि धारिणि ॥ ७३ ।
यस्येदं तिष्ठते* गेहे लिखितं पूज्यते सदा ।
तस्य नारायणो देवः स्वयं तिष्ठति धारिणि ॥ ७४ ।
यश्चैतच्छृणुयाद्भक्त्या नैरन्तर्य्येण मानवः ।
श्रुत्वा तु पूजयेद्यस्तु† शास्त्रं वाराहसंज्ञितम् ।
सर्व्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥ ७५ ।

(इति वराहपुराणे श्वेतोपाख्यानं नाम द्वादशाधिकशततमोऽध्यायः ।

---

* तिष्ठतीति साधु ।

† यो वै इति (ख)। (ग) पुस्तकेऽत्र अधिकः पाठो वर्त्तते यथा—
श्रुत्वा तु पूजयेच्छास्त्रं तथा विष्णुं सनातनम् ।
गन्धैः पुष्पैस्तथा वस्त्रैर्ब्राह्मणानाञ्च तर्पणैः ।
यथाशक्त्या रूपीग्रामैः पूजयेद्दचिर्कां धरे ॥ इति ।

त्रयोदशाधिकशततमोऽध्यायः । *

स तेन सान्त्विताया वै पृथिव्यां यः समागतः ।
सनत्कुमारस्तत्रैते दृष्ट्वा तां संस्थितां महीम् ।
स्वस्तिवाच्याह पुण्याग्रे प्रत्युवाच वसुन्धराम् ॥ १ ॥

सनत्कुमार उवाच ।

यं दृष्ट्वा वर्द्धसे देवि त्वञ्च यस्यासि माधवि ।
विष्णुना धार्य्यमाणा च किं त्वया दृष्टमद्भुतम् ॥ २ ॥
एतदाचक्ष्व तत्त्वेन यत्ते हरिमुखाच्छ्रुतम् ।
ब्रह्मपुत्रवचः श्रुत्वा पृथिवी वाक्यमब्रवीत् ॥ ३ ॥

---

* (ख) पुस्तके एतदध्यायप्रारम्भे ओँ नमो वराहाय नमो ब्रह्मपुत्राय सनत्कुमाराय नम इत्यधिकः पाठोऽस्ति । (ग) पुस्तके प्रथमतस्त्रयोदशश्लोकपर्य्यन्तमन्यथैव पाठः । यथा—

नमस्तस्मै वराहाय लीलयोद्धरते महीम् ।
खुरमध्यगतो यस्य मेरुः खणखणायते ॥
दंष्ट्राग्रेणोद्धृता गौरुदधिपरिवृता पर्व्वतैर्निम्नगाभि-
र्मंत्तानां भीतिहानी सुरनरकदशास्यान्तकः क्रोड़रूपी ।
विष्णुः सर्व्वेश्वरोऽयं यमिह कृतमना लीलया प्राप्नुवन्ति
त्यक्तात्मानोनपापे प्रभवतु मुदितारातिपक्षक्षितीशम् ॥
यस्मिन् काले क्षितिः पूर्व्वकल्पे वाराहमूर्त्तिना ।
उद्धृता च यथा भक्त्या पप्रच्छ परमेश्वरम् ॥

धरण्युवाच ।

कल्पे कल्पे भवानेव मां समुद्धरते भवान् ।
न वाद्यपीदृशी मूर्त्तिर्मादृशी गात्र केशव ॥

धरण्युवाच।

यद्गुह्यं स मया पृष्टो यच्च मे सम्प्रभाषितम्।
शृणु तत्त्वेन विप्रेन्द्र गुह्यं धर्म्मं महौजसम्॥ ४॥
भगवत्प्रोक्तधर्म्मेषु यद्गुह्यं कथयाम्यहम्।
तेन मे कथितं ह्येतत्संसारात्तु विमोक्षणम्।
विष्णुभक्तेन यत्कार्य्यं यत्क्रिया परिकीर्त्तिता॥ ५॥
उवाच परमं गुह्यं धर्म्माणां व्याप्तनिश्चयम्।
अयं धर्म्मो मया ह्येतच्छ्रुते धर्म्मे सनातने॥ ६॥
ततो महीवचः श्रुत्वा ब्रह्मपुत्रो महातपाः।
कोकामुखे मम क्षेत्रं जपन्तो ब्रह्मवादिनः॥ ७॥
तान्सर्व्वानानयामास यत्र देवी व्यवस्थिता।
सनत्कुमारः पूतात्मा प्रत्युवाच महीं प्रति॥ ८॥
यन्मया पूर्व्वमुक्तासि कथयस्व वरानने।
अप्रमेयगतिश्चैव धर्म्ममाचक्ष्व तत्त्वतः॥ ९॥
ततस्तस्य वचः श्रुत्वा प्रणम्य ऋषिपुङ्गवम्।
उवाच परमप्रीता धात्री मधुरया गिरा*॥ १०॥

धरण्युवाच।

शृण्वन्तु ऋषयः सर्व्वे यत्तद्विष्णुमुखाच्छ्रुतम्।
बाढमित्येव तां देवि स्वस्ति ब्रूहीति सोऽब्रवीत्॥ ११॥
नष्टचन्द्रानिले लोके नष्टभास्करतारके।

---

* परमया गिरेति (ख)।

स्तम्भिताश्च दिशः सर्व्वा न प्राज्ञायत किञ्चन ॥ १२ ।
न वाति पवनस्तत्र नैव चाग्निर्न विद्युतः ।
न किञ्चित्तत्र विद्येत न तारा न च रश्मयः* ॥ १३ ।
न चैवाङ्गारकस्तत्र न शुक्रो न बृहस्पतिः ।
शनैश्चरो बुधो नात्र न चेन्द्रो धनदो यमः ॥ १४ ।
वरुणोऽपि न विद्येत नान्ये केचिद्दिवौकसः ।

---

* वेदेषु चैव नष्टेषु मत्स्यो भूत्वा रसातलम् ।
प्रविश्य तानथोत्क्षिप्य ब्रह्मणे दत्तवानसि ॥
अन्यद्देव कूर्म्मरूपस्त्वं समुद्रस्य मन्थने ।
धृतवानसि कार्य्येण मन्दरं मधुसूदन ॥
पुनर्वराहरूपेण मां गच्छन्तीं रसातले ।
उज्जहारैकदंष्ट्रेण भवानेव महार्णवात् ॥
अन्यद्धिरण्यकशिपुर्वरदानेन दर्पितः ।
असावपि नृसिंहेन वपुरास्थाय नाशितः ॥
पुनर्निःक्षत्ररूपेण त्वयाऽहं विक्षता पुरा ।
जामदग्न्येन रामेण त्वया दृष्टा सकृत् प्रभो ।
पुनश्च रावणोरक्षः क्षपितं स्वेन तेजसा ।
बलिश्च बद्धो भगवन् त्वया वामनरूपिणा ॥
न च जानाम्यहं देव तव किञ्चिद्विचेष्टितम् ।
उद्धृत्य मां कथं देव सृजसे किञ्च कारणम् ॥
स्पृष्टा किमादिशः सर्व्वा न प्राज्ञायत किञ्चन ।
न वाति पवनस्तत्र नचैवाग्निर्न वाति च ॥
अंशवश्च न विद्यन्ते न नक्षत्रा न वा ग्रहाः । इति (ग) ।

वर्ज्जयित्वा त्रयो* देवान्ब्रह्मविष्णुमहेश्वरान् ॥ १५ ।
पृथिवी भारसन्तप्ता ब्रह्माणं शरणं गता ।
गत्वा च शरणं देवी दैन्यं वदति माधवी ॥ १६ ।
प्रसीद मम देवेन्द्र मग्नाहं भारपीड़िता ।
सपर्व्वतवनैः सार्द्धं मां तारय पितामह ॥ १७ ।
पृथिव्या वचनं श्रुत्वा ब्रह्मा लोकपितामहः ।
मुहूर्त्तं ध्यानमास्थाय पृथिवीन्तामुवाच ह ॥ १८ ।
नाहं तारयितुं शक्तो विषमस्थां वसुन्धरे ।
लोकनाथं सुरश्रेष्ठमादिकर्त्तारमञ्जसा ॥
लोकेशं धन्विनं श्रेष्ठं† याहि मायाकरण्डकम् ।
सर्व्वेषामेव नः कार्य्यं यच्च किञ्चित्प्रवर्त्तते ॥ १९।२० ।
सर्व्वांस्तारयितुं शक्तः किं पुनस्त्वां वसुन्धरे ।
अनन्तशयने देवः शयानं योगशायिनम् ॥ २१ ।
ततः कमलपत्राक्षी नानाभरणभूषिता ।
कृताञ्जलिपुटा देवी प्रसादयति माधवम् ॥ २२ ।

धरण्युवाच‡ ।

अहं भारसमायुक्ता ब्रह्माणं शरणङ्गता ।
प्रत्याख्याता भगवता तेनाप्युक्तमिदं वचः ॥ २३ ।

---

* त्रीमिति साधु ।

† कृष्णमिति (ग) ।

‡ एष पाठः (ग) पुस्तके नास्ति ।

नाहं तारयितुं शक्तः सुश्रोणि व्रज माधवम् ।
स त्वान्तारयितुं शक्तो मग्नासि यदि सागरे ॥ २४ ।
प्रसीद मम देवेश लोकनाथ जगत्प्रभो* ।
भक्त्या त्वां शरणं यामि† प्रसीद मम माधव ॥ २५ ।
त्वमादित्यश्च चन्द्रश्च त्वं यमो धनदस्तु वै ।
वासवो वरुणश्चासि अग्निर्मारुत एव च ॥ २६ ।
अक्षरश्च क्षरश्चासि त्वं दिशो विदिशो भवान् ।
मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽसि वामनः ॥ २७ ।
रामो रामश्च कृष्णश्च बुद्धः कल्की महात्मवान् ।
एवं पश्यसि योगिन श्रूयते त्वं महायशाः ॥ २८ ।
युगायुगसहस्राणि व्यतीतान्यसि संस्थितः ।
पृथिवी वायुराकाशमापोज्योतिश्च पञ्चमम् ।
शब्दस्पर्शस्वरूपोऽसि रसोगन्धोऽसि नो भवान्‡ ॥ २९ ।
सग्रहाणि च ऋक्षाणि कला काष्ठा मुहूर्त्तकाः§ ।
ज्योतिश्चक्रं ध्रुवश्चासि सर्व्वेषु द्योतते भवान् ॥ ३० ।
मासः पक्षमहोरात्र¶मृतुः संवत्सराण्यपि ।

---

* जगत्पते इति (ग) ।
† भक्तायाः शरणायाश्चेति (ग) ।
‡ ज्योतिश्चक्रं ध्रुवश्चाऽसि सर्व्वेषु द्योतते भवानिति (क), (ख) ।
§ सग्रहा ये च नक्षत्रा कला कालमुहूर्त्तका इति (ग) ।
¶ पक्षः, अहोरात्रः इति साधु ।

	Rs.	
Paráśara Smriti (Sans.) Fasc. I—V @ /6/ each ..	1	14
Srauta Sútra of Ápastamba, (Sans.) Fasc I—XII @ /6/ each ..	4	8
Srauta Sútra of Ásvaláyana, (Sans.) Fasc. I—XI @ /6/ each ..	4	2
Ditto Látyáyana (Sans.) Fasc. I—IX @ /6/ each ..	3	6
Ditto Sáṅkhyáyana (Sans.) Fasc. I—V @ /6/ each ..	1	14
Sáma Veda Samhitá, (Sans.) Vols. I, Fasc. 1—10 ; II, 1—6 ; III, 1—7 ; IV, 1—6 ; V, 1—8, @ /6/ each Fasc.	13	14
Sáhitya Darpaṇa, (English) Fasc. I—IV @ /6/ each	1	8
Sánkhya Aphorisms of Kapila, (English) Fasc. I and II @ /6/ each	0	12
Súrya Siddhánta, (Sans.) Fasc. IV	0	6
Sarva Darśana Sangraha, (Sans.) Fasc. II	0	6
Sankara Vijaya, (Sans.) Fasc. II and III @ /6/ each	0	12
Sánkhya Pravachana Bháshya, (English preface only) Fasc. III ..	0	6
Sánkhya Sára, (Sans.) Fasc. I	0	6
Suśruta Samhitá, (Eng.) Fasc. I and II @ /12/ each	1	8
Taittiríya Áraṇya, (Sans.) Fasc. I—XI @ /6/ each	4	2
Ditto Bráhmaṇa, (Sans.) Fasc. I—XXIV @ /6/ each	9	0
Ditto Samhitá, (Sans.) Fasc. I—XXXIV @ /6/ each ..	12	12
Ditto Prátiśákhya, (Sans.) Fasc I—III @/6/ each	1	2
Ditto and Aitareya Upanishads, (Sans.) Fasc. II and III @/6/ each	0	12
Táṇḍya Bráhmaṇa, (Sans.) Fasc. I—XIX @ /6/ each	7	2
Tattva Chintámaṇi, (Sans.) Fasc. I—VIII @ /6/ each	3	0
Uttara Naishadha, (Sans.) Fasc. III—XII @ /6/ each	3	12
Uvás-agadasáo, Fasc. I—IV @ /12/ each	3	0
Varáha Puráṇa, (Sans.) Fasc. I—V @ /6/ each	1	14
Váyu Puráṇa, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—6, @ /6/ each Fasc.	4	8
Vishṇu Smṛiti, (Sans.) Fasc. I—II @ /6/ each	0	12
Vivádaratnákara (Sans.) Fasc. I—VII @ /6/ each	2	10
Vrihannáradíya Puráṇa, (Sans.) Fasc. I—IV @ /6/ each	1	8
Yoga Sútra of Patanjali, (Sans. & English) Fasc. I—V @ /14/ each	4	6
The same, bound in cloth	5	2

Arabic and Persian Series.

'Álamgírnámah, with Index, (Text) Fasc. I—XIII @ /6/ each ..	4	14
Áín-i-Akbarí, (Text) Fasc. I—XXII @ 1/ each	22	0
Ditto (English) Vol. I (Fasc. I—VII) 1/12 each	12	4
Akbarnámah, with Index, (Text) Fasc. I—XXXVII @ 1/ each ..	37	0
Bádsháhnámah, with Index, (Text) Fasc. I—XIX @ /6/ each ..	7	2
Beale's Oriental Biographical Dictionary, pp. 291, 4to., thick paper, @ 4/12 ; thin paper	4	8
Dictionary of Arabic Technical Terms and Appendix, Fasc. I—XXI @ 1/ each	21	0
T[illegible] (Text), Fasc. I—XIV @ 1/ each	14	0
[illegible] Túsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each	3	0
Futúḥ-ul-Shám Wáqidí, (Text) Fasc. I—IX @ /6/ each ..	3	6
Ditto Ázádí, (Text) Fasc. I—IV @ /6/ each	1	8
Haft Ásmán, History of the Persian Mansawi, (Text) Fasc. I ..	0	12
History of the Caliphs, (English) Fasc. I—VI @ /12/ each ..	4	8
Iqbálnámah-i-Jahángírí, (Text) Fasc. I—III @ /6/ each ..	1	2
Isabáh, with Supplement, (Text) 49 Fasc. @ /12/ each	36	12
Maásir-ul-Umara, Vol. I, Fasc. I—V @ /6/ each	1	14
Maghází of Wáqidí, (Text) Fasc. I—V @ /6/ each	1	14
Muntakhab-ul-Tawáríkh, (Text) Fasc. I—XV @ /6/ each ..	5	10
Muntakhab-ul Tawáríkh, (English) Vol. II, Fasc. I—IV @/12/ each	3	0
Muntakhab-ul-Lubáb, (Text) Fasc. I—XIX @ /6/ each	7	2
Mu'ásir-'Álamgírí, (Text), Fasc. I—VI @ /6/ each	2	4
Nukhbat-ul-Fikr, (Text) Fasc. I	0	6
Nizámí's Khiradnámah-i-Iskandarí, (Text) Fasc. I and II @ /12/ each	1	8
.uyúṭy's Itqán, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. II—IV, VII—X @ 1/ each	7	0

(*Turn over.*)

Tabaqát-i-Náşirí, (Text) Fasc. I—V @ /6/ each 1 14
Ditto (English) Fasc. I—XIV @ /12/ each 10 8
Táríkh-i-Fíráz Sháhi, (Text) Fasc. I—VII @ /6/ each 2 10
[illegible] (Text) Fasc. I—IX @ /6/ each 3 6
[illegible] Fasc. I—V @ /6/ each 1 14
Zafarnámah, Vol. I, Fasc. I—IX; Vol. II, Fasc. I—IV @ /6/ each 4 14

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. VII, IX to XI; Vols. XIII and XVII, and Vols. XIX and XX @ /10/ each Rs. 80 0
   Ditto Index to Vols. I—XVIII 5 0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1865 (incl.) @ /4/ per No.; *and from 1870 to date @ /6/ per No.*
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1849 (12), 1850 (7), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers; and for 1851 (7), 1857 (6), 1858 (5), 1861 (4) 1864 (5), 1865 (8), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878, (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers.

N. B. The figures enclosed in brakets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784—1883 .. 3 0
   General Cunningham's Archæological Survey Report for 1863-64 (Extra No., J. A. S. B., 1864) 1 8
   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868) 1 8
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., J. A. S. B., 1875) 3 0
   Sketch of the Turki Language as spoken in Eastern Turkestan, Part II, Vocabulary, by R. B. Shaw (Extra No., J. A. S. B., 1878) 3 0
   A Grammar and Vocabulary of the Northern Balochí Language, by M. L. Dames (Extra No., J. A. S. B., 1880) 3 0
   Introduction to the Maithilí Language of North Bihár, by G. A. Grierson, Part I, Grammar (Extra No., J. A. S. B., 1880) .. 1 8
   Part II, Chrestomathy and Vocabulary (Extra No., J.A.S.B., 1882) 3 0
5. Anis-ul-Musharrihi 3 0
6. Catalogue of Fossil Vertebrata 2 0
7. Catalogue of the Library of the Asiatic Society, Bengal .. 3 8
8. Examination and Analysis of the Mackenzie Manuscripts by the Rev. W. Taylor 2 0
9. Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis .. 1 8
10. Iştiláhát-uş-Súfíyah, edited by Dr. A. Sprenger, 8vo. .. 1 0
11. Ináyah, a Commentary on the Hidáyah, Vols. II and IV, @ 16/ each 32 0
12. Jawámi-ul-'ilm ir-riyáẓí, 168 pages with 17 plates, 4to. Part I 2 0
13. Khizánat-ul-'ilm 4 0
14. Mahábhárata, Vols. III and IV, @ 20/ each 40 0
15. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—II, with 5 coloured Plates, 4to. @ 6/ each .. 12 0
16. Purána Sangraha, I (Márkandeya Purána), Sanskrit .. 1 0
17. Sharaya-ool-Islám 4 0
18. Tibetan Dictionary 10 0
19. Ditto Grammar 8 0
20. Vuttodaya, edited by Lt.-Col. G. E. Fryer 2 0
    Notices of Sanskrit Manuscripts, Fasc. I—XXI @ 1/ each .. 21 0
    Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra .. 5 0

N. B. All cheques, Money Orders &c. must be made payable to the "Treasury Asiatic Society" only.

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 654.

वराहपुराणम्।

THE VARÁHA PURÁṆA

EDITED BY

PAṆḌIT HṚISHÍKEŚA ŚÁSTRÍ

Professor, Sanskrit College, Calcutta.

FASCICULUS VI.

CALCUTTA:

PRINTED BY ŚAŚIBHÚSHAṆA BHAṬṬÁCHÁRYYA, AT THE GIRIŚA-VIDYÁRATNA PRESS,

24, GIRIŚA-VIDYÁRATNA'S LANE, UPPER CIRCULAR ROAD.

AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.

1888.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL

No. 57, PARK STREET, CALCUTTA.

AND OBTAINABLE FROM

THE SOCIETY'S LONDON AGENTS, MESSRS. TRÜBNER & CO.

57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	
Âtharvana Upanishads, (Sanskrit) Fasc. I—V @ /6/ each ..	1	
Âśvaláyana Grihya Sútra, (Sans.) Fasc. II—IV @ /6/ each ..	1	
Agni Puráṇa, (Sans.) Fasc. I—XIV @ /6/ each	5	
Aitareya Âraṇyaka of the Rig Veda (Sans.) Fasc. I—V @ /6/ each	1	
Aphorisms of Śáṇḍilya, (English) Fasc. I	0	
Aphorisms of the Vedánta, (Sans.) Fasc. III, V—XIII @ /6/ each ..	3	
Ashṭasáhasriká Prajnápáramitá. Fasc. I—IV @ /6/ each	1	
Aśvavaidyaka, (Sans.) Fasc. I—III @ /6/ each	1	
Brahma Sútras. (English) Fasc. I	0	1
Bhámatí, (Sans.) Fasc. I—VIII @ /6/ each	3	
Brihad Âraṇyaka Upanishad, (Sans.) Fasc. VI, VII & IX @ /6/ each	1	
Ditto (English) Fasc. II—III @ /6/ each	0	1
Brihat Saṃhitá. (Sans.) Fasc. II—III, V—VII @ /6/ each ..	1	1
Chaitanya-Chandrodaya Náṭaka, (Sans.) Fasc. II—III @ /6/ each	0	1
Chaturvarga Chintámaṇi. (Sans.) Vols. I, Fasc. 1—11 ; II, I—25 ; III, 1—XVIII @ /6/ each Fasc.	20	
Chhándogya Upanishad, (English) Fasc. II	0	(
Daśa Rúpa, (Sans.) Fasc. II—III @ /6/ each	0	1:
Gopatha Bráhmaṇa (Sans. & Eng.) Fasc. I and II @ /6/ each ..	0	12
Gobhilíya Grihya Sútra, (Sans.) Fasc. I—XII @ /6/ each ..	4	8
Hindú Astronomy, (English) Fasc. I—III @ /6/ each ..	1	2
Institutes of Paráśara	0	6
Kátantra, (Sans.) Fasc. I—VI @ /12/ each	4	8
Kathá Sarit Ságara, (English) Fasc. I—XIV @ /12/ each	10	2
Kála Mádhava, (Sans.) Fasc. I—III. @ /6/ each	1	2
Kauśítaki Bráhmaṇopanishads, Fasc. II	0	6
Kúrma Puráṇa, (Sans.) Fasc. I—VI @ /6/ each	2	4
Lalita Vistara, (Sans.) Fasc. II—VI @ /6/ each	1	14
Ditto (English) Fasc. I—III @ /12/ each	2	4
Madana Párijáta, (Sans.) Fasc. I, @ /6/	0	6
Manuṭíká Saṅgraha, Fasc. I—II @ /6/ each	0	12
Mímáṃsá Darśana, (Sans.) Fasc. II—XIX @ /6/ each	6	12
Márkaṇḍeya Puráṇa, (Sans.) Fasc. IV—VII @ /6/ each	1	8
Nyáyavárttikam, Fasc. I	0	6
Nrisiṃha Tápani, (Sans.) Fasc. I—III @ /6/ each	1	2
Nirukta, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—6 ; Vol. III, Fasc. 1—6 ; Vol. IV. 1—IV @ /6/ each	8	4
Nárada Pancharátra, (Sans.) Fasc. IV @ /6/ each	0	6
Nárada Smriti (Sans.) Fasc. I & II @ /6/ each	0	12
Nyáya Darśana. (Sans.) Fasc. III @ /6/ each	0	6
Nítisára, or, The Elements of Polity, By Kámandaki (Sans.) Fasc. II—V	1	8
Pariśishṭaparvan, (Sans.) Fasc. I—IV @ /6/ each	1	8
Pingala Chhandaḥ Sútra, (Sans.) Fasc. II—III @ /6/ each ..	0	12
Prithiráj Rásau, (Hindi) Fasc. I—VI @ /6/ each	2	4
Ditto (English) Fasc. I	0	12
Páli Grammar. (English) Fasc. I and II @ /6/ each	0	12
Prákrita Lakshaṇam, (Sans.) Fasc. I		

(Contd.)

कला काष्ठापि* षण्मासाः षड्सांश्चापि संयमः† ॥ २१ ।
सरितः सागराश्च त्वं‡ पर्व्वताश्च महोरगाः ।
त्वं मेरुर्मन्दरो विन्ध्यो मलयो दर्दुरो भवान् ॥ २२ ।
हिमवान्निषधश्चासि सचक्रोऽसि वरायुधः ।
धनुषाञ्च§ पिनाकोऽसि सांख्ययोगोऽसि¶ चोत्तमः ॥ २३ ।
परम्परोऽसि लोकानां नारायणः परायणः ।
संक्षिप्तश्चैव विस्तारो गोप्ता यज्ञश्च शाश्वतः‖ ॥ २४ ।
यज्ञानाञ्च महायज्ञो यूपानामसि संस्थितः ।
वेदानां सामवेदोऽसि साङ्गोपाङ्गो महाव्रतः ॥ २५ ।
गर्ज्जनं वर्षणञ्चासि त्वं वेधा अनृतानृते** ।
अमृतं सृजसे विष्णो येन लोकानधारयत् ॥ २६ ।
त्वं प्रीतिस्त्वं परा प्रीतिः पुराणः पुरुषो भवान् ।
धेयाधेयं जगत्सर्व्वं यच्च किञ्चित्प्रवर्त्तते ॥ २७ ।
सप्तानामपि लोकानां त्वं नाथस्त्वमसङ्गहः ।

---

* ऋतवश्चापीति (ग) ।

† संयुत इति (ग) ।

‡ सागरश्चासीति (ग) ।

§ धनुःसु चेति (ग) ।

¶ योगः सांख्योऽसीति (ग) ।

‖ चेप्ता च वै भवानिति (ग) ।

** त्वञ्च धाता नृतानृते इति (ग) ।

त्वञ्च कालश्च मृत्युश्च त्वं भूतो भूतभावनः ॥ ३८ ॥
आदिमध्यान्तरूपोऽसि मेधा बुद्धिः स्मृतिर्भवान् ।
आदित्यस्त्वं युगावर्त्तस्त्वं तपस्वी महातपाः ॥ ३९ ॥
अप्रमाणः प्रमेयोऽसि ऋषीणाञ्च महानृषिः ।
अनन्तश्चासि नागानां सर्पाणामसि* तक्षकः ॥ ४० ॥
उद्वहः प्रवहश्चासि वरुणो वारुणो भवान् ।
क्रीड़ाविक्षेपणश्चासि गृहेषु गृहदेवताः† ॥ ४१ ॥
सर्व्वात्मकः सर्व्वगतो वर्द्धनो मन एव च‡ ।
युगमन्वन्तरे चापि वृक्षाणाञ्च वनस्पतिः ॥ ४२ ॥
श्रद्धासि त्वञ्च देवेश दोषहन्तासि माधव§ ।
गरुड़ोऽसि महात्मानं वहसि त्वं परायणः ॥ ४३ ॥
दुन्दुभिर्नेमिघोषैश्च आकाशममलो¶ भवान् ।
जयश्च विजयश्चासि गृहेषु गृहदेवताः ॥ ४४ ॥
सर्व्वात्मकः सर्व्वगतश्चेतनो मन एव च ।
भगस्त्वं विषलिङ्गश्च परस्त्वं परमात्मकः ॥ ४५ ॥

---

* सर्पाणीति (ग) । श्रीमद्भगवद्गीतायामप्येतदर्द्धं वर्त्तते ।

† एष श्लोको (ग) पुस्तके नास्ति ।

‡ अतः परं (ग) पुस्तके—

साङ्गस्त्वं विद्युतीनाञ्च विद्युतानां महाद्युतिरित्यधिकः पाठो वर्त्तते ।

§ अण्डजोद्भिज्जस्वेदानां जरायूनाञ्च माधवेति (ग) ।

¶ आकाशगगन इति (ग) ।

सर्व्वभूतनमस्कार्य्यो नमो देवो नमो नमः*।
आदिकालात्मकः कृष्णः सर्व्वलोकात्मको विभुः† ॥ ४६ ॥
य इदं पठते स्तोत्रं केशवस्य दृढ़व्रतः।
व्याधितो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥ ४७ ॥
अपुत्त्रो लभते पुत्त्रं दरिद्रो धनमाप्नुयात्।
अभार्य्यो लभते भार्य्यामपतिः पतिमाप्नुयात् ॥ ४८ ॥
उभे सन्ध्ये पठेद्यस्तु माधवस्य महात्मकम्।
स गच्छेद्विष्णुलोकञ्च‡ नात्र कार्य्या विचारणा ॥ ४९ ॥
एवन्तु§ अचरीतोऽपि भवे तु परिकल्पना।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ५० ॥

इति वराहपुराणे विष्णुस्तवनं नाम त्रयोदशाधिकशततमोऽध्यायः।

---

* (ग) पुस्तकेऽतः परं—
मां त्वं भयामभि त्रातुं लोकनाथ इहार्हसीति (ग)।

† आदिकालात्मकं ह्येतत्सर्व्वपापहरं शिवमिति (ग)।

‡ हीति (ग)।

§ भयन्त्विति (ग)।

चतुर्द्दशाधिकशततमोऽध्यायः ।

वराह उवाच ।

संस्तूयमानो भगवान्मुनिभिर्मन्त्रवादिभिः ।
तुष्टो नारायणो देवः केशवः परमो विभुः ॥ १ ।
ततो ध्यानं समास्थाय दिव्यं योगञ्च माधवः ।
मधुरं स्वरमास्थाय प्रत्युवाच वसुन्धराम् ॥ २ ।
तव देवि प्रियार्थाय भक्त्या यं त्वं व्यवस्थिता* ।
अहं त्वां धारयिष्यामि सशैलवनकाननाम् ।
ससागरां ससरितां सप्तद्वीपसमन्विताम् ॥ ३ ।
एवमाश्वासयित्वा† तु वसुधां स च माधवः ।
रूपं सङ्कल्पयामास वाराहं सुमहौजसम् ॥ ४ ।
षट् सहस्राणि चोच्छ्रायो विस्तारेण पुनस्त्रयः ।
एवं नवसहस्राणि योजनानां विधाय च ॥ ५ ।
वामया दंष्ट्रया गृह्य‡ उज्जहार च मेदिनीम् ।
सपर्व्वतवनाकारां सप्तद्वीपां सपत्तनाम्§ ॥ ६ ।

---

* अतः परं (ग) पुस्तके—

कारयिष्यामि ते सर्व्वं यत्ते हृदि व्यवस्थितम् ।

इत्यधिकः पाठो वर्त्तते ।

† आश्वासयित्वेति आर्षम्, आश्वास्येति साधु ।

‡ गृह्येति आर्षं, गृहीत्वेति साधु ।

§ (ग) पुस्तके एतदर्द्धं परश्लोकस्य पूर्व्वार्द्धञ्च न स्तः ।

नगा विलग्नाः पतिताः केचिद्विज्ञानसंस्थिताः।
शोभन्ते च विचित्राङ्गमेघाः सन्ध्यागमे यथा* ॥ ७ ।
चन्द्रनिर्म्मलसङ्काशा वराहमुखसंस्थिताः।
शोभन्तेऽ† चक्रपाणेश्च मृणालं कर्द्दमे यथा ॥ ८ ।
एवं हि धार्य्यमाणा सा पृथिवी सागरान्विता।
वर्षाणाञ्च सहस्रं हि वज्रदंष्ट्रेण साधुना ॥ ९ ।
तस्यामेव तु कालस्य परिमाणं युगेषु च।
एकसप्ततिमे कल्पे कर्द्दमोऽयं प्रजापतिः ॥ १० ।
ततः पृथिव्या देवश्च भगवान्विष्णुरव्ययः।
अन्योन्याभिमताश्चैव वाराहे कल्प उत्तमे ॥ ११ ।
सा गौः स्तुवति‡ तत्रैव पुराणं परमव्ययम्।
योगेन परमेणैव शरणञ्चैव गच्छति ॥ १२ ।
आधारः कीदृशो देव उपयोगश्च कीदृशः।
काले काले च देवेश कर्म्मणश्चापि कीदृशः ॥ १३ ।
कीदृशी पश्चिमा सन्ध्या कीदृशी ह्यर्द्धरात्रतः।
शेषाः समानास्त्वा देव ये तु कर्म्माणि कुर्व्वते ॥ १४ ।
किन्नु संस्थापनं देव आवाहनविसर्ज्जने।
अगुरुगन्धधूपञ्च प्रमाणं§ गृह्यसे कथम् ॥ १५ ।

---

* मेघवर्णमयास्तथेति (ग)।

† निर्म्मलमिति (ख)।

‡ स्तुवतीति आर्षं, स्तौति स्तवीतीति वा साधु।

§ प्रापणमिति (ग)।

कथं पाद्यञ्च गृह्णासि स्थापनालेपनानि च ।
कथं दीपश्च दातव्यः कन्द*मूलफलानि च ॥ १६ ॥
आसनं शयनञ्चैव किङ्कर्म्मणि विधीयते ।
कथं पूजाधिकर्त्तव्या प्राणास्तत्र च वै कति ॥ १७ ॥
पश्चिमा पूर्व्वसन्ध्यायां किं पुण्यञ्चापि† तत्र वै ।
शरदि कीदृशं कर्म्म शिशिरे कर्म्म कीदृशम् ॥ १८ ॥
वसन्ते कीदृशं कर्म्म ग्रीष्मे किङ्कर्म्म कारयेत् ।
प्रावृट्काले च किङ्कर्म्म वर्षान्ते किञ्च कारयेत् ॥ १९ ॥
यानि तत्रोपयोग्यानि पुष्पाणि च फलानि च ।
कर्म्मण्यास्ते अकर्म्मण्या ये च शास्त्रवहिष्कृताः ॥ २० ॥
किङ्कर्म्मणा भोगवता यावद्गच्छति माधवः ।
कथं कर्म्म न चान्येषु अतिगच्छति कीदृशम् ॥ २१ ॥
अर्च्चायां किं प्रमाणन्तु स्थापनञ्चापि कीदृशम् ।
परिमाणं कथं देव उपवासश्च कीदृशः ॥ २२ ॥
पीतकं शुक्लरक्तं वा कथं गृह्णाति वाससाम्‡ ।
तेषान्तु कानि वस्त्राणि यैर्हि तं प्रतिपद्यते ॥ २३ ॥
केषु द्रव्येषु संयुक्तं मधुपर्कं प्रदीयते ।
के तु कर्म्मगुणास्तस्य मधुपर्कस्य माधव ।

---

* कथं मूलफलानि चेति (ग) ।

† चास्तीति (ख) ।

‡ शाश्वतमिति (ग) ।

केषु लोकेषु* गच्छन्ति मधुपर्कस्य भक्षणात्† ॥ २४ ।
स्तवे परमकालेऽपि तव भक्तस्य माधव ।
किम्प्रमाणन्तु दातव्यं मधुपर्कसमन्वितम् ॥ २५ ।
कानि मांसानि ते देव फलं शाकञ्च कीदृशः ।
प्रापणेष्वपि युज्येत कर्म्म शास्त्रसमायुतम् ॥ २६ ।
आहृतस्य च मन्त्रेण आगते धर्म्मवत्सल‡ ।
केन मन्त्रविधानेन प्राशनन्ते प्रदीयते§ ॥ २७ ।
हृतस्य चोपचारेषु अर्च्चयित्वा यथाविधि ।
कानि कर्म्माणि कुर्व्वीत तव भक्तस्य भोजनात् ॥ २८ ।
यस्तु तं प्रापणं देवं न च दोषप्रसादिकम् ।
केऽन्न भुञ्जति¶ तद्देव सर्व्वशुद्धिकरम्परम् ॥ २९ ।
ये तु एकाशिनो देवमुपसर्पति माधवम् ।
तेषान्तु का गतिर्द्देव तव मार्गानुसारिणाम् ॥ ३० ।
व्रतञ्चृत्वा यथोक्तेन येऽभिगच्छन्ति माधवम् ।
तेषान्तु का गतिर्द्देव तव भक्तिं प्रकुर्व्वताम्‖ ॥ ३१ ।
कृच्छ्रसान्तपने कृत्वा येऽभिगच्छन्ति माधवम् ।

---

* कानि लोकानीति (ग) ।

† प्राशनादिति (ग) ।

‡ भक्तिवत्सलेति (ग) ।

§ प्रदापयेदिति (ग) ।

¶ भुञ्जते इति साधु ।

‖ कां गतिं पुरुषा यान्ति भविता तव शासनादिति (ग) ।

कां गतिन्ते प्रपद्यन्ते तव कर्म्मपरायणाः ॥ ३२ ।
वायूाहारं ततः कृत्वा कृष्णं समधिगच्छति ।
तेषान्तु का गतिः कृष्ण तव भक्तौ व्यवस्थिताः ॥ ३३ ।
अक्षारलवणङ्कृत्वा येऽभिगच्छन्ति चाच्युतम् ।
कां गतिन्ते प्रपद्यन्ते तव कर्म्मानुसारिणः ॥ ३४ ।
कृत्वा पयोव्रतञ्चैव येऽभिगच्छन्ति चाच्युतम् ।
कां गतिं प्रतिपद्यन्ते नरा ये व्रतकारिणः* ॥ ३५ ।
दत्त्वा गवाह्निकञ्चैव ये प्रपद्यन्ति† माधवम् ।
कां गतिन्ते प्रपद्यन्ते तव भक्त्या व्यवस्थिताः ॥ ३६ ।
उञ्छवृत्तिं समास्थाय येऽभिगच्छन्ति माधवम् ।
कां गतिन्ते प्रपद्यन्ते नरा भिक्षोपजीवनः ॥ ३७ ।
गृहस्थधर्म्मङ्कृत्वा वै येऽभिगच्छन्ति माधवम्‡ ।
कां गतिन्ते प्रपद्यन्ते तव कर्म्मपरायणाः ॥ ३८ ।
वैकुण्ठ तव क्षेत्रेषु§ ये तु प्राणान्विमुच्यते ।
काँल्लोकांस्ते प्रपद्यन्ते तव क्षेत्रेषु ये मृताः ॥ ३९ ।
कृत्वा पञ्चातपञ्चैव¶ माधवाय प्रयच्छति ।

---

* व्रतधारिण इति (ग) ।

† प्रपद्यन्ते इति साधु ।

‡ केशवमिति (ग) ।

§ तव क्षेत्रेषु ये देवेति (क), (ख) ।

¶ पञ्चात्मकञ्चैवेति (ग) ।

कां गतिं वै परायान्ति ये तु पञ्चातपे स्थिताः॥ ४०।
कण्टशय्यां समासाद्य ये प्रपश्यन्ति चाच्युतम्।
तेषान्तु का गतिर्देव कण्टशय्यां समाश्रिताः॥ ४१।
आकाशशयनङ्कृत्वा ये प्रपद्यन्ति* चाच्युतम्।
तेषान्तु का गतिः कृष्ण तव भक्तिपरायणाः॥ ४२।
गोव्रजे शयनं कृत्वा ये प्रपद्यन्ति केशवम्।
तेषान्तु का गतिर्ब्रह्मंस्तव भक्तिपथे स्थिताः† ॥ ४३।
शाकाहारं ततः कृत्वा येऽभिगच्छन्ति चाच्युतम्‡।
तेषान्तु का गतिर्देव कणभक्षास्तु ये नराः§ ॥ ४४।
पञ्चगव्यं ततः पीत्वा येऽभिगच्छन्ति माधवम्¶।
तेषान्तु का गतिर्देव ये नरा यावकाशिनः॥ ४५।
आहारं गोमयङ्कृत्वा येऽभिगच्छन्ति केशवम्।
नारायण गतिस्तेषां कीदृशोऽत्र विधिः स्मृतः‖ ॥ ४६।
सक्तुं वै भक्षयित्वा तु ये प्रपद्यन्ति चाच्युतम्।
तेषान्तु का गतिर्देव तव कर्म्मपरायणाः** ॥ ४७।

---

* प्रपद्यन्ते इति साधु, एवं परत्रापि।

† देव तव भक्तिपरायणा इति (ग)।

‡ माधवमिति (ग)।

§ तव भक्तिपरायणा इति (ग)।

¶ (ग) पुस्तके ये नरा यावकाशिन इत्येतावन्मात्रः पाठो दृश्यते।

‖ पत्राहारं कृतं तेषां कीदृशोऽत्र विधीयते इति (ग)।

** शिरसा दीपधारणादिति (ग)। तत्र परश्लोको नास्ति।

शिरसा दीपकं कृत्वा येऽभिगच्छन्ति केशवम् ।
तेषान्तु का गतिर्देव शिरसा दीपधारणात् ॥ ४८ ॥
ये हि नित्यं पयः पीत्वा तव चिन्ताव्यवस्थिताः ।
ते गतिं कां प्रपद्यन्ति तव चिन्तापरायणाः ॥ ४९ ॥
अश्माशनं व्रतं कृत्वा ये प्रपद्यन्ति नित्यशः ।
तेषान्तु का गतिर्देव तव भक्तिपरायणाः ॥ ५० ॥
भक्षयित्वा तु दूर्वां ये प्रपद्यन्ति मनीषिणः ।
तेषान्तु का गतिर्देव स्वधर्म*गुणचारिणः ॥ ५१ ॥
जानुभ्यां प्रतिपद्यन्ति† तव प्रीत्या च माधव ।
तेषान्तु का गतिर्देव तन्ममाचक्ष्व पृच्छतः ॥ ५२ ॥
उत्तानशयनं कृत्वा धारयन्ति हि दीपिकाम्‡ ।
ते यान्ति कां गतिन्देव कथ्यते या च शाश्वती§ ॥ ५३
जानुभ्यां दीपकं कृत्वा केशवाय प्रपद्यते¶ ।
तेषान्तु का गतिर्देव कथ्यते चैव शाश्वती ॥ ५४ ॥
अवाङ्मुखस्तु भूत्वा‖ वै यः प्रपद्ये**ज्जनार्द्दनम् ।

---

* स्वकर्म्मेति (ग) ।

† प्रतिपद्यन्ते इति साधु ।

‡ येऽभिचार्य्यन्ति दीपिका इति (ग) । अभिचारयन्तीति साधु ।

§ तन्ममाचक्ष्व पृच्छतः इति (ग) ।

¶ परन्तु तेषामिति बहुवचनेन निर्द्देशादत्रापि प्रपद्यन्ते इति बहुवचनप्रयुक्तं, तथा कृते तु छन्दोभङ्गः ।

‖ अवाक्शिरस्त्विति (ग), अवाक्शिरा इति साधु ।

** प्रपद्येतेति साधु ।

भगवन् का गतिस्तस्य अवाक्शिरसि शायिनः॥ ५५।
पुत्रदारगृहञ्चैव मुक्ता योऽनुप्रपद्यते।
का गतिस्तस्य सिद्धा तु कथयस्व सुरोत्तम॥ ५६।
भाषितोऽसि मया ह्येवं सर्व्वलोकसुखावहम्।
गमनागमनञ्चैव त्वत्प्रसन्नेन माधव॥ ५७।
त्वं माता त्वं पिता चैव* सर्व्वधर्म्म†विनिश्चयः।
अतस्त्वयैव वक्तव्यो योगसाङ्ख्यविनिश्चयः॥ ५८।
त्वां भजंश्च गते जीवे मधुपर्कसमन्वितम्।
भस्माकुलेषु निक्षिप्य कथञ्चाग्नौ प्रपद्यते॥ ५९।
कां गतिं प्रतिपद्यन्ते‡ त्वद्भक्ता जलमाश्रिताः।
त्वत्क्षेत्रसंस्थितो वापि तन्ममाचक्ष्व पृच्छतः§॥ ६०।
स्मरणं पुत्र ते कृष्ण येस्तु नाम प्रकीर्त्त्यते।
नमो नारायणेत्युक्ता¶ तेषां वै का गतिर्भवेत्॥ ६१।
उद्यतेष्वपि शस्त्रेषु हन्यमाना रणे नराः।
नामप्रकीर्त्तनात्तेषां कीदृशी तु गतिर्भवेत्‖॥ ६२।
अहं शिष्या च दासी च तव भक्त्या व्यवस्थिता।

---

* त्वञ्चेति (ग)।

† कर्म्मेति (ग)।

‡ अत्र बहुवचनमार्षं, प्रतिपद्यते इति सम्यक्, तथा कृते तु छन्दोभङ्गः।

§ एतदर्द्धं परश्लोकस्य पूर्व्वार्द्धञ्च (ग) पुस्तके न स्तः।

¶ भक्तनारायणेत्युक्तेति (ग)।

‖ ये तु नाम प्रकीर्त्तन्ते तेषां वै कीदृशी भवेदिति (ग)।

रहस्यं धर्मसंयुक्तं तन्ममाचक्ष्व माधव ॥ ६३ ।
एवं तत्परमं* गुह्यं मम प्रीत्या जगद्गुरो ।
सञ्चिन्त्य लोकधर्म्मार्थं† तद्भवान्वक्तुमर्हति ॥ ६४ ।

इति वराहपुराणे पृथिव्याः प्रश्नो नाम चतुर्द्दशाधिकशततमोऽध्यायः ।

—०:०—

पञ्चदशाधिकशततमोऽध्यायः ।

ततो महीवचः श्रुत्वा देवो नारायणोऽब्रवीत् ।
कथयिष्यामि ते देवि कर्म्म स्वर्गसुखावहम् ॥ १ ।
यत्त्वया पृच्छ्यते देवि तच्छृणुष्व* वसुन्धरे ।
स्थितिं सत्तान्तु मर्त्यानां भक्त्या ये च व्यवस्थिताः ॥ २
नाहं दानसहस्रेण नाहं यज्ञशतैरपि ।
तुष्यामि न तु वित्तेन ये नराः स्वल्पचेतसः ॥ ३ ।
एकचित्तं समाधाय यो मां जानाति माधवि ।
नित्यं तुष्यामि तस्याहं पुरुषं बहुदोषकम् ॥ ४ ।

---

* ते परममिति (ग) ।

† लोकधर्म्मार्थविख्याऽथेति (ग) ।

---

* ग्रण इति साधु, एवं परत्रापि ।

यच्च पृच्छसि मां भद्रे कर्म्म स्वर्गसुखावहम् ।
तच्छृणुष्व वरारोहे गदतो मे शुचिस्मिते ॥ ५ ।
ये नमस्यति मां नित्यं पुरुषा बहुचेतसः ।
अर्द्धरात्रेऽन्धकारे च मध्याह्ने वापराह्णयोः ॥ ६ ।
यस्य चित्तं न नश्येत* मम भक्तिव्यवस्थितम् ।
द्वादश्यामुपवासन्तु यः कुर्य्यान्मम तत्परः ।
ते मामेव प्रपश्यन्ति मयि भक्तिपरायणाः† ॥ ७ ।
कृत्वा चैवोपवासन्तु गृह्य‡ चैव जलाञ्जलिम् ।
नमो नारायणेत्युक्ता आदित्यञ्चावलोकयेत् ॥ ८ ।
यावन्तो विन्दवः किञ्चित्पतन्त्येवाञ्जलेर्जलात् ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ९ ।
अथ चैव तु द्वादश्यां पुरुषा धर्म्मवादकाः ।

---

* नश्येदिति साधु ।

† न तेषां हि पश्यामि कदाचिदपि माधवीति (ग), तत्रातः परं—
लब्धचेतो गुणश्चय नरो भक्तिव्यवस्थितः (परायणः) ।
इच्छयाऽपि भवेद्भद्रे स्वर्गे वसति सुन्दरि ॥
स्वल्पकेन न गम्यन्ते दुःप्राप्योऽहं वरानने ॥
यानि कर्म्माणि कुर्व्वन्तु मां प्रपश्यन्ति माधवि ।
तानि ते कथयिष्यामि येन भक्त्या व्यवस्थिताः ॥
द्वादश्यामुपवासन्तु ये च कुर्व्वन्ति ते नराः ।
तेषामेव प्रपश्यन्ति ममभक्तिपरायणाः ॥ इत्यधिकः पाठोऽस्ति ।

‡ गृह्णीतेति साधु ।

एतैः*र्गुणैः समायुक्तो यो मां व्रजति क्षत्रियः ।
भजते मम यो नित्यं मम लोकाय गच्छति ॥ २४ ।
वैश्यानान्तु प्रवक्ष्यामि मम कर्म्मसु तिष्ठताम् ।
यानि कर्म्माणि कुरुते मम भक्तिपथे स्थितः ॥ २५ ।
एतैर्गुणैः स्वधर्म्मेण लाभालाभविवर्ज्जितः ।
ऋतुकालाभिगामी च शान्तात्मा मोहवर्ज्जितः ॥ २६ ।
शुचिर्दक्षो निराहारो मम कर्म्मरतः सदा ।
गुरुसम्पूजको नित्यं युक्तो भक्तानुवत्सलः ॥ २७ ।
वैश्योऽप्येवं सुसंयुक्तो यस्तु कर्म्माणि कारयेत्† ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ २८ ।
अथ शूद्रस्य वक्ष्यामि कर्म्माणि शृणु माधवि ।
कर्म्माणि यानि कृत्वा हि शूद्रो मह्यं व्यवस्थितः ॥ २९ ।
दम्पती मम भक्तौ यौ मम कर्म्मपरायणौ ।
उभौ भागवतौ भक्तौ मद्भक्तौ‡ कर्म्मनिष्ठितौ ॥ ३० ।
देशकालौ च जानाति रजसा तमसोज्झितः ।
निरहङ्कारशुद्धात्मा अतिथेयो विनीतवान्§ ॥ ३१ ।

---

* एभिरिति (ग) ।

† वैश्यस्त्वेवं तु संयुक्तो योऽनुकर्म्मानुसारयेदिति (ग) ।

‡ मत्पराविति (ग) ।

§ निरहङ्कारशुद्धान्तौ अतिथे धर्म्मवत्सलाविति (ग) । तत्र परत्रापि द्विवचनान्तः पाठः ।

अद्दधानोऽतिपूतात्मा लोभमोहविवर्ज्जितः।
नमस्कारप्रियो नित्यं मम चित्ताव्यवस्थितः॥ ३२।
शूद्रः कर्म्माणि मे देवि य एवं सममाचरेत्।
त्यक्त्वा ऋषिसहस्राणि शूद्रमेव भजाम्यहम्॥ ३३।
चातुर्वर्ण्यस्य कर्म्माणि यत्त्वया परिपृच्छितम्*।
एवं कर्म्मगुणाश्चैव येन भक्त्या व्यवस्थितः॥ ३४।
सर्व्ववर्णानि मां देवि अपरं चन्निये शृणु।
येन तत्प्राप्यते योगं तच्छृणुष्व वसुन्धरे॥ ३५।
त्यक्त्वा लाभमलाभञ्च मोहं कामञ्च वर्ज्जयेत्।
न प्रीते च न चीर्णे च लब्धाऽलब्धं विचिन्तयेत्॥ ३६।
न तिक्तेनातिकटुना मधुराम्लैर्न लावणैः।
न कषायैः स्पृहा यस्य प्राप्नुयात्सिद्धिमुत्तमाम्॥ ३७।
भार्य्या पुत्राः पिता माता उपभोगार्थसंयुतम्।
य एतान्हि परित्यज्य मम कर्म्मरतः सदा॥ ३८।
धृतिज्ञः कुशलश्चैव अद्दधानो धृतव्रतः।
तत्परो नित्यमुद्युक्तः अन्यकार्य्यजुगुप्सुकः॥ ३९।
बाले वयसि कल्पश्च अल्पभोगी कुलान्वितः।
कारुण्यः सर्व्वसत्त्वानां प्रत्युत्थायी महाक्षमः॥ ४०।
काले मौनक्रियां कुर्य्याद्यावत्तत्कर्म्म कारयेत्।
त्रिकालञ्च दिशो भागं सदा कर्म्मपथि स्थितः॥ ४१।

---

* परिपृष्टमिति साधु। प्रतिभाषितमिति (ग)।

उपपन्नानुभुञ्जानः कर्म्माण्यभोजनानि च ।
अनुष्ठानपरश्चैव मम पार्श्वे मनस्वरः ॥ ४२ ।
काले मूत्रपुरीषाणि विसृज्य स्नानवत्सलः ।
पुष्पे गन्धे च धूपे च मत्कर्म्मणि सदा रतः ॥ ४३ ।
कदाचित्कन्दमूलानि फलानि च कदाचन ।
पयसा याचकेनापि कदाचिद्वायुभक्षणः ॥ ४४ ।
कदाचित्षष्ठकालेन क्वचिदृष्टमहाफलः ।
कदाचित्तु चतुर्थेन कदाचित्फलमेव च ।
कदाचिद्दशमे भुञ्जेत्पक्षे मासे वसुन्धरे ॥ ४५ ।
य एतत्सप्त जन्मानि मम कर्म्माणि कुर्व्वते ।
योगिनस्तान् प्रपश्यन्ति पूर्व्वोक्तान् कर्म्मसु स्थितान्* ॥

इति वराहपुराणे विविधकर्म्मोत्पत्तौ पञ्चदशाधिकशततमोऽध्यायः ।

---

* योगिनस्तांश्च वक्ष्यामि तेनैव च सनातनमिति (ग) ।

षोड़शाधिकशततमोऽध्यायः ।

वराह उवाच ।

मया प्रोक्तविधानेन यस्तु कर्म्माणि कारयेत् ।
तच्छृणुष्व* महाभागे येन साफल्यमाप्नुयात् ॥ १ ।
एकचित्तः समास्थाय† अहङ्कारविवर्ज्जितः ।
मच्चित्तसंहतो‡ नित्यं चान्तो दान्तो जितेन्द्रियः ॥ २ ।
फलमूलानि शाकानि द्वादश्यां वा§ कदाचन ।
पयोव्रतश्च तत्काले पुनरेव¶ निरामिषः ॥ ३ ।
षष्ठ्यष्टमी अमावास्या उभे पक्षे चतुर्द्दशी ।
मैथुनं नाभिसेवेत द्वादश्याञ्च तथा प्रिये ॥ ४ ।
एवं योगविधानेन कर्म्म कुर्य्याद्दृढ़व्रतः ।
पूतात्मा धर्म्मसंयुक्तो विष्णुलोकन्तु गच्छति ॥ ५ ।
न ग्लानिर्न जरा तस्य न मोहो रोग एव च ।
भुजाष्टादश जायन्ते धन्वी खड्गी शरी गदी ।
तेषां व्युष्टिं प्रवक्ष्यामि मम कर्म्मसमुत्थिताम् ॥ ६ ।

---

* शृणुष्व त्वमिति (ग) ।

† समादायेति (ग) ।

‡ मच्चित्तोपगत इति (ग) ।

§ वै इति (ग) ।

¶ चैवेति (ग) ।

षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ।
समार्च्चनविधिङ्कृत्वा मम लोके महीयते ॥ ७ ।
दुःखमेवं प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
उचितेनोपचारेण दुःखमोचविनाशनम् ॥ ८ ।
अहङ्काराहतो नित्यं नरो मोहेन चाहतः ।
यो मां नैव प्रपद्येत* ततो दुःखतरं नु किम् ॥ ९ ।
सर्व्वाशी सर्व्वविक्रेता नमस्कारविवर्ज्जितः ।
यो न मां प्रतिपद्येत ततो दुःखतरं नु किम् ॥ १० ।
प्राप्तकाले वैश्वदेवे दृष्ट्वा चातिथिमागतम् ।
अदत्त्वा तस्य यो भुङ्क्ते ततो दुःखतरं नु किम् ॥ ११ ।
सर्व्वान्नानि तु सिद्धानि पाकभेदं करोति यः† ।
तस्य देवा न चाश्नन्ति‡ ततो दुःखतरं नु किम् ॥ १२ ।
असन्तुष्टस्तु वैषम्ये§ परदाराभिमर्षकः¶ ।
परोपतापी मन्दात्मा ततो दुःखतरं नु किम् ॥ १३ ।
अकृत्वा पुष्कलं कर्म्म गृहे संवसते‖ नरः ।

---

* ये मां नैव प्रपद्यन्त इति (ग) ।

† पाकभेदन्तु कारयेदिति (ग) ।

‡ न वैश्वदेवा नाश्नन्तीति (ग) ।

§ पैशुन्ये इति (ग) ।

¶ मर्द्दक इति (ग) ।

‖ संवसतीति साधु ।

मृत्युकालवशं प्राप्तस्ततो दुःखतरं नु किम्॥ १४।
हस्त्यश्वरथयानानि गच्छमानानि* पश्यति।
धावन्त्यस्याग्रतः पृष्ठे ततो दुःखतरं नु किम्॥ १५।
अश्नन्ति पिशितं केचित्केचिच्छालिसमन्वितम्†।
शुष्कान्नं केचिदश्नन्ति ततो दुःखतरं नु किम्॥ १६।
वरवस्त्रावृतां शय्यां समासेवति‡ भूषिताम्।
केचित्तृणेषु शेरन्ते§ ततो दुःखतरं नु किम्¶॥ १७।
विद्वान् कृती गुणज्ञश्च सर्व्वशास्त्रविशारदः।
केचिन्मूकाश्च दृश्यन्ते ततो दुःखतरं नु किम्॥ १८।
विद्यमाने धने केचित्कृपणा भोगवर्ज्जिताः।
दरिद्रो जायते दाता ततो दुःखतरं नु किम्॥ १९।
द्विभार्य्यः पुरुषो यस्तु तयोरेकाम्प्रशंसति।
एका तु दुर्भगा तत्र ततो दुःखतरं नु किम्॥ २०।
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णाः सुमध्यमे।

---

* गच्छन्तीति साधु।

† दत्तशालिसमन्वितमिति (ग)।

‡ समासेवत इति साधु।

§ शेरते इति साधु।

¶ (ग) पुस्तकेऽतः परं

सुरूपी दृश्यते कश्चित्पुरुषश्चात्मकर्म्मभिः।

केचिद्विरूपा दृश्यन्ते ततो दुःखतरं नु किम्॥

इत्यधिकः पाठो दृश्यते।

पापकर्मरता ह्यासन्ततो दुःखतरं नु किम्* ॥ २१ ।
एतत्ते कथितं भद्रे दुःखकर्मविनिश्चयम् ।
सर्वभूताहितं पापं यत्त्वया परिपृच्छितम्† ॥ २२ ।
यच्च मां पृच्छसे‡ भद्रे शुभं कीदृशमुच्यते ।
तच्छृणुष्वानवद्याङ्गि मम कर्मविनिश्चयम् ॥ २३ ।
कृत्वा तु विपुलं कर्म मद्भक्तेषु निवेदयेत् ।
यस्य बुद्धिर्विजायेत§ स दुःखायोपजायते¶ ॥ २४ ।
मां पूजयित्वा नैवेद्यं विशिष्टं परिकल्प्य च‖ ।
शेषमन्नं समश्नाति ततः सौख्यतरं नु किम् ॥ २५ ।
त्रिकालं ये प्रपद्यन्ते मयोक्तेन** वसुन्धरे ।
कृत्वा सायाह्निकं कर्म ततः सौख्यतरं नु किम् ॥ २६ ।
देवतातिथिमर्त्यानां त्यक्त्वा चान्नं वसुन्धरे ।
यश्चात्मा वै समश्नाति ततः सौख्यतरं नु किम्†† ॥ २७

---

* एष श्लोकः (ग) पुस्तके नास्ति, तत्राऽन्य एव श्लोको विद्यते । यथा—
लब्ध्वा तु मानुषीं संज्ञां पञ्चभूतसमन्विताम् ।
मामेव न प्रपद्यन्ति ततो दुःखतरं नु किम् ॥ इति ।

† परिपृष्टमिति साधु ।

‡ पृच्छसीति साधु ।

§ बुद्ध्याविजायेतेति (ग) ।

¶ उपपद्यते इति (ग) ।

‖ मामेवमर्च्चनं कृत्वा तत्र प्रापणमुत्तममिति (ग) ।

** मामेव चेति (ग) ।

†† एष श्लोकः (ग) पुस्तके नास्ति ।

प्रविष्टस्त्वतिथिर्यस्य निराशो यन्न गच्छति।
येन केनचिद्वृत्तेन ततः सौख्यतरं नु किम्॥ २८।
मासि मास्येकदिवसः* अमावास्येति योच्यते†।
पितरो यस्य तृप्यन्ति ततः सौख्यतरं नु किम्॥ २९।
भोजनेषु प्रपन्नेषु यवान्नं यः प्रयच्छति।
अभिन्नमुखरागेण ततः सौख्यतरं नु किम्॥ ३०।
उभयोरपि भार्य्यासु यस्य बुद्धिर्न नश्यति।
समं पश्यति यो देवि ततः सौख्यतरं नु किम्॥ ३१।
अहिंसनन्तु कुर्व्वीत विशुद्धेनान्तरात्मना।
अहिंसापरतः शुद्धः स सुखायोपजायते‡॥ ३२।
परभार्य्यां सुरूपान्तु दृष्ट्वा दृष्टिर्न चाल्यते§।
यस्य चित्तं न गच्छेतत्¶ ततः सौख्यतरं नु किम्॥ ३३।
मौक्तिकादीनि रत्नानि तथैव कनकानि च।
लोष्टवत्पश्यते‖ यस्तु ततः सौख्यतरं नु किम्॥ ३४।
मुदिते वाश्वनागेन्द्रे उभे सैन्ये पथि स्थिते।

---

* एकदिवसे इति (ग)।

† उपजायते इति (ग)।

‡ उपपद्यते इति (ग)।

§ परभार्य्यानुरूपानुदृष्ट्या दृष्टिर्न चाल्यत इति (ग)।

¶ गच्छेदिति साधु।

‖ पश्यतीति साधु।

यस्तु प्राणान्प्रमुच्येत ततः सौख्यतरं नु किम्* ॥ ३५ ।
लब्धेन चाप्यलब्धेन कुत्सितं कर्म्म गर्हयन्† ।
यस्तु जीवति सन्तुष्टः स सुखायोपपद्यते ॥ ३६ ।
भर्त्तुस्तु वै व्रतं‡ स्त्रीणामेवमेव वसुन्धरे ।
या तोषयति भर्त्तारं ततः सौख्यतरं नु किम् ॥ ३७ ।
विद्यते विभवेनापि पुरुषो यस्तु पण्डितः ।
निग्टहीतेन्द्रियः पञ्च§ ततः सौख्यतरं नु किम् ॥ ३८ ।
सहते चावमानन्तु व्यसने न तु दुर्मनाः ।
यस्येदं विदितं सर्व्वं ततः सौख्यतरं नु किम् ॥ ३९ ।
अकामो वा सकामो वा मम क्षेत्रे वसुन्धरे ।
यस्तु प्राणान्प्रमुच्येत¶ ततः सौख्यतरं नु किम् ॥ ४० ।
मातरं पितरञ्चैव यः सदा पूजयन्नरः ।
देवतेव सदा पश्येत्ततः सौख्यतरं नु किम् ॥ ४१ ।
ऋतुकाले तु यो गच्छेन्मासे मासे च मैथुनम् ।
अनन्यमानसो भूत्वा ततः सौख्यतरं नु किम् ॥ ४२ ।
प्रयुक्तः सर्व्वदेवानां यो मामेवं प्रपूजयेत् ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ४३ ।

---

* ३४, ३५ श्लोकौ (ग) पुस्तके न स्तः ।

† वर्ज्जितमिति (ग) ।

‡ भर्त्तुः सुखं व्रतमिति (ग) ।

§ निग्टहीतपञ्चेन्द्रिय इति समस्तमेवोचितं, असमस्तत्वार्षम् ।

¶ प्रमुच्येदिति साधु ।

एतत्ते कथितं भद्रे शुभनिर्द्देशनिश्चयः ।
सर्व्वलोकहितार्थाय यन्मान्त्वं परिपृच्छसि ॥ ४४ ।

इति वराहपुराणे सुखदुःखं नाम षोड़शाधिकशततमोऽध्यायः ।

सप्तदशाधिकशततमोऽध्यायः ।

वराह उवाच ।

शृणु भद्रे महाश्चर्य्यमाहारविधिनिश्चयम् ।
आहारञ्चाप्यनाहारं तच्छृणोहि* वसुन्धरे ॥ १ ।
भुञ्जानोयाति चाश्नाति मम योगाय माधवि ।
अशुभं कर्म्म कृत्वापि पुरुषोधर्म्ममाश्रितः ॥ २ ।
आहारञ्चैव धर्म्मज्ञ उपभुञ्जीत† नित्यशः ।
सर्व्वं चान्नैव कर्म्मण्या व्रीहयः शालयस्तथा ॥ ३ ।
अकर्म्मण्यानि वच्यामि येन भोञ्यन्ति‡ मां प्रति ।
तेन वै भुक्तमार्गेण अपराधो महौजसः ॥ ४ ।

---

* शृणु इति साधु ।

† उपभुञ्जति इति (क, ख). आर्षं तत्. उपभुङ्क्ते इति साधु ।

‡ भुज्यन्ते इति साधु ।

प्रथमश्चापराधान्नं न रोचते मम प्रिये ।
भुक्ता तु परकीयान्नं तत्परस्तन्निवर्त्तनः ।
द्वितीयस्त्वपराधोऽयं धर्म्मविघ्नाय वै भवेत् ॥ ५ ।
गत्वा मैथुनसंयोगं यो नु मां स्पृशति* नरः ।
तृतीयमपराधन्तु कल्पयामि वसुन्धरे ॥ ६ ।
दृष्ट्वा रजस्वलां नारीमस्माकं यः प्रपद्यते ।
चतुर्थमपराधन्तु दृष्टं नैवं† क्षमाम्यहम् ॥ ७ ।
स्पृष्ट्वा तु मृतकञ्चैव असंस्कारकृतन्तु वै‡ ।
पञ्चमञ्चापराधं च न क्षमामि§ वसुन्धरे ॥ ८ ।
दृष्ट्वा तु मृतकं यस्तु नाचम्य स्पृशते तु माम्¶ ।
षष्ठन्तं चापराधं‖वै न क्षमामि वसुन्धरे ॥ ९ ॥
ममार्च्चनस्य काले तु पुरीषं यस्तु गच्छति** ।
सप्तमञ्चापराधन्तु कल्पयामि वसुन्धरे ॥ १० ।
यस्तु नीलेन वस्त्रेण प्रावृतो मां प्रपद्यते ।
अष्टमञ्चापराधञ्च†† कल्पयामि वसुन्धरे ॥ ११ ।

---

* स्पृशतीति साधु ।

† वै नेति (ग) ।

‡ दृष्ट्वा तु मृतकञ्चैव नाचाम्य स्पृशते तु मामिति (ग) । स्पृशतीति स

§ अपराधन्तं न क्षमेयमिति (ग) ।

¶ (ग) पुस्तकेऽत्र स्पृष्ट्वा तु मृतकञ्चेत्याद्यर्द्धं वर्त्तते ।

‖ षष्ठमिमञ्चापराधमिति (ग) ।

** यस्तु वाक्यं प्रभाषत इति (ग) ।

†† तु इति (ग) ।

ममैवार्च्चनकाले तु यस्त्वसमं प्रभाषते ।
नवमञ्चापराधन्तं* न रोचामि† वसुन्धरे ॥ १२ ।
अविधानं तु यः स्पृश्य‡ मामेव प्रतिपद्यते ।
दशमश्चापराधोऽयं मम चाप्रियकारकः ॥ १३ ।
क्रुद्धस्तु यानि कर्म्माणि कुरुते कर्म्मकारकः ।
एकादशापराधन्तु कल्पयामि वसुन्धरे ॥ १४ ।
अकर्म्मण्यानि पुण्यानि यस्तु मामुपकल्पयेत् ।
द्वादशञ्चापराधन्तं§ कल्पयामि वसुन्धरे ॥ १५ ।
यस्तु रक्तेन वस्त्रेण कौसुम्भेनोपगच्छति ।
त्रयोदशञ्चापराधं¶ कल्पयामि वसुन्धरे ॥ १६ ।
अन्धकारे च मान्देवि यः स्पृशेत‖ कदाचन ।
चतुर्द्दशापराधन्तु कल्पयामि वसुन्धरे ॥ १७ ।
यस्तु कृष्णेन वस्त्रेण मम कर्म्माणि कारयेत् ।
पञ्चदशापराधन्तं कल्पयामि वसुन्धरे** ॥ १८ ।
अधौतेन तु वस्त्रेण यस्तु मामुपकल्पयेत् ।

---

* तु इति (ग) ।

† रोचामीति आर्षं, रोचयामीति साधु ।

‡ स्पृष्टेति साधु ।

§ तु इति (ग) ।

¶ त्रयोदशापराधन्त्विति (ग) ।

‖ स्पृशेदिति साधु ।

** वरानने इति (ग) ।

षोड़शन्त्वपराधानां कल्पयामि वरानने ॥ १९ ।
स्वयमन्नन्तु योऽद्याद्‌ज्ञानादपि माधवि ।
सप्तदशापराधन्तु कल्पयामि वसुन्धरे ॥ २० ।
यस्तु मात्स्यानि मांसानि भक्षयित्वा प्रपद्यते ।
अष्टादशापराधञ्च कल्पयामि वसुन्धरे* ॥ २१ ।
जालपादं भक्षयित्वा यस्तु मामुपसर्पति ।
एकोनविंशापराधं कल्पयामि वसुन्धरे† ॥ २२ ।
यस्तु मे दीपकं स्पृष्ट्वा मामेव प्रतिपद्यते‡ ।
विंशकञ्चापराधन्तं कल्पयामि वरानने ॥ २३ ।
श्मशानं यस्तु वै गत्वा मामेव प्रतिपद्यते ।
एकविंशापराधन्तं कल्पयामि वसुन्धरे ॥ २४ ।
पिण्याकं भक्षयित्वा तु यो मामेवाभिगच्छति§ ।
द्वाविंशञ्चापराधन्तं कल्पयामि प्रिये सदा ॥ २५ ।
यस्तु वाराहमांसानि प्रापणेनोपपादयेत् ।
अपराधं त्रयोविंशं कल्पयामि वसुन्धरे ॥ २६ ।
सुरां पीत्वा तु यो मर्त्यः कदाचिदुपसर्पति ।
अपराधं चतुर्विंशं कल्पयामि वसुन्धरे ॥ २७ ।
यः कुसुम्भञ्च मे शाकं भक्षयित्वोपचक्रमे ।

---

* अनुजानामि माधवीति (ग) ।

† प्रतिजानामि सुन्दरीति (ग) ।

‡ नवमे दीपकं दृष्ट्वा यो मां स्पृशति माधवीति (ग) ।

§ उपचक्रमे इति (ग) ।

अपराधं पञ्चविंशं कल्पयामि वसुन्धरे* ॥ २८ ।
परप्रावरणेनैव यस्तु मामुपसर्पति ।
अपराधेषु षड्विंशं कल्पयामि वसुन्धरे† ॥ २९ ।
नवान्नं यस्तु भक्षेत‡ न देवान्न पितॄन्यजेत् ।
सप्तविंशञ्चापराधं कल्पयामि गुणान्विते ॥ ३० ।
उपानहौ च प्रपदे तथा वापीञ्च गच्छति ।
अपराधमष्टविंशं कल्पयामि गुणान्विते ॥ ३१ ।
शरीरं मर्द्दयित्वा§ तु यो मामाप्नोति माधवि ।
एकोनत्रिंशापराधो न स स्वर्गेषु गच्छति ॥ ३२ ।
अजीर्णेन समाविष्टो यस्तु मामुपगच्छति ।
त्रिंशकञ्चापराधन्तं कल्पयामि यशस्विनि¶ ॥ ३३ ।
गन्धपुष्पाण्यदत्त्वा तु यस्तु धूपं प्रयच्छति ।
एकत्रिंशञ्चापराधं कल्पयामि मनस्विनि‖ ॥ ३४ ।
विना भेर्य्यादिशब्देन द्वारस्योद्घाटनं मम ।
महापराधं जानीयाद्द्वात्रिंशन्तं मम प्रिये ॥ ३५ ।
अन्यच्च शृणु वक्ष्यामि दृढ़व्रतमनुत्तमम् ।

---

* मनोरमे इति (ग) ।

† मनोरमे इति (ग) ।

‡ भक्षयेदिति साधु ।

§ मण्डयित्वेति (ग) ।

¶ वसुन्धरे इति (ङ) ।

‖ एकत्रिंशाऽपराधन्तु कल्पयामि यशस्विनीति (ग) ।

कृत्वा चावश्यकं कर्म्म मम लोकञ्च गच्छति ॥ ३६ ।
नित्ययुक्तश्च शास्त्रज्ञो मम कर्म्मपरायणः ।
अहिंसापरमश्चैव सर्व्वभूतदयापरः ॥ ३७ ।
सामान्यश्च शुचिर्दचो मम नित्यं पथे स्थितः ।
निगृह्य चेन्द्रियग्राममपराधविवर्ज्जितः ॥ ३८ ।
उदारो धार्म्मिकश्चैव स्वदारेषु सुनिष्ठितः ।
शास्त्रज्ञः कुशलश्चैव मम कर्म्मपरायणः* ।
चातुर्वर्ण्यस्य मे भद्रे सन्मार्गेषु व्यवस्थितः† ॥ ३९ ।
आचार्य्यभक्ता देवेषु भक्ता भर्त्तरि वत्सला ।
संसारेष्वपि वर्त्तन्ती‡ गच्छन्ती अग्रतो यदि ।
मम लोकस्थिताः सा वै भर्त्तारम्प्रसमीचते§ ॥ ४० ।
पुरुषोयदि मद्भक्तः स्त्रियन्त्यक्ता च गच्छति ।
स ततोऽत्र प्रतीचेत भार्य्यां भर्त्तरि वत्सलाम् ॥ ४१ ।
अन्यच्च ते प्रवच्यामि कर्म्मणां कर्म्म चोत्तमम् ।
ऋषयो मां न पश्यन्ति मम कर्म्मपथे स्थिताः¶ ॥ ४२ ।

---

* कर्म्मपथे स्थित इति (ग) ।

† एतच्चरणद्वयं (ग) पुस्तके नास्ति ।

‡ वर्त्तमाना इति साधु ।

§ सम्मतीचते इति (ग) ।

¶ (ग) पुस्तकेऽतः परं—

द्रष्टव्या मम लोकेषु ऋषयोऽपि वरानने ।
किं पुनर्मानुषा ये च मम कर्म्मव्यवस्थिताः ॥

इत्यधिकः पाठो वर्त्तते ।

अन्यदेवेषु ये भक्ता मूढ़ा वै पापचेतसः ।
मम मायाविमूढ़ास्तु न प्रपद्यन्ति* माधवि ॥ ४३ ।
मान्तु ये वै प्रपद्यन्ते मोचकामा वसुन्धरे ।
तानहं भावसंसिद्धान्बुद्धा संविभजामि वै ॥ ४४ ।
येन त्वं परया शक्त्या धारितासि मया धरे ।
तेनेदं कथितन्देवि आख्यानं धर्म्मसंयुतम् ॥ ४५ ।
पिशुनाय न दातव्यं न च मूर्खाय माधवि† ।
नादीक्षिताय दातव्यं नोपसर्प्याय यत्नतः ॥ ४६ ।
शठाय च न दातव्यं नास्तिकाय न माधवि ।
वर्ज्जयित्वा भागवतं मम कर्म्मपरायणम् ॥ ४७ ।
एतत्ते कथितन्देवि मम धर्म्मं महौजसम् ।
सर्व्वलोकहितार्थाय किमन्यत्परिपृच्छसि ॥ ४८ ।

इति वराहपुराणे द्वात्रिंशदपराधकथनं नाम सप्तदशाधिकशततमोऽध्यायः ।

---

* प्रपद्यन्ते इति साधु ।

† (ग) पुस्तके एतदर्द्धमन्यथैव दृश्यते —

ततो न चोपदिष्टाय न शठाय प्रदापयेदिति ।

अष्टादशाधिकशततमोऽध्यायः।

वराह उवाच।

शृणु तत्त्वेन मे भद्रे प्रायश्चित्तं यथाविधि।
यथावत्स च दातव्यो मम भक्तेन विद्यया॥ १।
वक्ष्यमाणेन मन्त्रेण उद्धृत्य दन्तकाष्ठकम्।
दीपं न ज्वालयेत्तावद्यावन्न स्पृश्यते धरा*॥ २।
दीपे प्रज्वालिते तत्र हस्तशौचन्तु कारयेत्।
ततः प्रक्षाल्य हस्तौ तु पुनरेवमुपागतः†॥ ३।
वन्दयित्वास्य चरणौ दन्तधावनमानयेत्।
अनेनैव तु मन्त्रेण दद्याद्वै दन्तकाष्ठकम्॥ ४।

मन्त्रश्च। भुवनभवन रविसंहरण अनन्तो मध्यश्चेति गृह्णिमं भुवनं दन्तधावनम्।

यत्त्वया भाषितं सर्व्वमेवं धर्म्मविनिश्चयम्।
दन्तधावनं दन्ते दद्याद्यावत्कर्म्म वसुन्धरे॥ ५।
निर्म्माल्यं शिरसोत्तार्य्य कृत्वा शिरसि चात्मनः।
पश्चात्तु जलपूतेन ततो हस्तेन सुन्दरि॥ ६।
कार्य्यात्तु मुखकर्म्माणि स्वल्पेन सलिलेन च।

---

* यावन्न स्पृशति भूमिं तावद्दीपं न ज्वालयेदिति (ग), स्पृशतीति साधु।

† अतः परं (ग) पुस्तके अन्यः पाठो वर्त्तते, यथा—
ततः प्रस्थाप्यैव दन्तैर्विगृह्य पूर्व्वं जलशुचिः।
निरपराधी मध्यस्य इदं मन्त्रमुदीरयेदिति॥

मुखप्रक्षालने चेमं शृणु मन्त्रञ्च सुन्दरि।
यद्द्विमं क्षतमन्त्रेण संसारात्तु प्रमुच्यते ॥ ७ ।

मन्त्रश्च। तद्भगवन्त्वां गुणश्च आत्मनश्चापि गृह्य वारिणः सर्व्वदेवतानां मुखमेवं प्रक्षालयेत्। एतेन मन्त्रेण सगन्धधूपदीपनैवेद्यं पुनरेवं समर्पयेत्।

ततः पुष्पाञ्जलिन्दत्त्वा भगवन् भक्तवत्सल।
नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत्* ॥ ८ ।
मन्त्रज्ञानां यज्ञयष्टारं भूतस्रष्टारमेव च।
अन्यपुष्पाणि संगृह्य कल्यमुत्थाय माधवि।
पूजयेद्देव†देवेशं ज्ञानी भागवतः शुचिः।
निपतेद्दण्डवद्भूमौ‡ सर्व्वकर्म्मसमन्वितः ॥ ९।१० ।
कायं निपतितङ्कृत्वा प्रसीदेति जनार्द्दनम्।
शिरसा चाञ्जलिङ्कृत्वा इमं मन्त्रमुदाहरेत् ॥ ११ ।

मन्त्रैर्लब्ध्वा संज्ञां त्वयि नाथ प्रसन्ने
त्वदिच्छातो ह्यपि योगिनाञ्चैव मुक्तिः।
यतस्त्वदीयः कर्म्मकरोऽहमस्मि
त्वयोक्तं यत्तेन देवः प्रसीदतु§ ॥ १२ ।

---

* उदाहरेदिति (ग)।

† एवं पुष्पाणीति (ग)।

‡ देवीतले निपतेत्तु इति (ग)।

§ लब्ध्वा संज्ञामपि नाथ प्रसन्नेच्छातः
संसारान्मुक्तयेऽहं कर्म्मकरो यत्त्वया पूर्व्वमुक्तं प्रसीदतु इति (ग)।

एवं मन्त्रविधिङ्कृत्वा मम भक्तिव्यवस्थितः ।
पृष्ठतोऽनुपदङ्कृत्वा शीघ्रं यावन्न हीयते ॥ १३ ।
एवं सर्व्वं समादाय मम कर्म्म दृढव्रतः ।
शीघ्रं मेऽभ्यञ्जनन्दद्यात्तैलेनाथ घृतेन वा ॥ १४ ।
ततः स्नेहं समुद्दिश्य* मन्त्रज्ञः कर्म्मकारकः ।
एवं चित्तं समाधाय इमं मन्त्रमुदीरयेत्† ॥ १५ ।
मन्त्रः ।—स्नेहं स्नेहेन संगृह्य लोकनाथ मया हृतम् ।
सर्व्वलोकेषु सिद्धात्मा ददाम्यात्मकरेण च ।
मया प्रोक्तः क्षमस्वेति तुभ्यञ्चैव नमो नमः ॥ १६ ।
एवं मन्त्रः समाख्यातस्तेनाज्यात्प्रथमं शिरः‡ ।
दक्षिणाङ्गं ततोऽभ्यज्याद्वाममङ्गं ततोऽनु च§ ॥ १७ ।
पश्चात्पृष्ठं समभ्यज्य ततोभ्यज्यात्कटिं तथा¶ ।
पश्चाल्लिम्पेत्ततो भूमिं गोमयेन दृढव्रतः ॥ १८ ।
तस्य दृष्ट्वा श्रुतं भद्रे गोमयेन सुनिश्चितम्‖ ।
यानि पुण्यान्यवाप्नोति तानि मे गदतः शृणु** ॥ १९

---

* ततस्तं स्नेहमुद्दिश्येति (ग) ।

† (ग) पुस्तके श्लोकादनन्तरं 'मन्त्रा ऊचुः' इत्यधिकः पाठो वर्त्तते ।

‡ एवं मन्त्रैः समाख्यातः शिरसि प्रथमं ददाविति (ग) ।

§ पश्चाद्दक्षिणमङ्गेषु ततो वामन्तु लेपयेदिति (ग)।

¶ पश्चात्पृष्ठं समारभ्य ततः पश्चात्कटिन्तथेति (ग) ।

‖ लिम्प यथ सुनिश्चितः इति (ग) ।

** मम मार्गानुसारिण इति (ग) ।

अज्यमानमपि तथा यावन्तस्तैलविन्दवः* ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ २० ।
ततः पुण्यक्रताँल्लोकान्पुरुषो योऽनुलिप्यते† ।
एकैककणसंख्यातः स्वर्गलोके महीयते‡ ॥ २१ ।
एवं योऽभ्यञ्जयेद्गात्रं तैलेन तु घृतेन वा§ ।
तावद्वर्षसहस्राणि मम लोके प्रतिष्ठति¶ ॥ २२ ।
अथ चोद्वर्त्तनं भद्रे प्रवक्ष्यामि प्रियं मम ।
येन शुध्यन्ति चाङ्गानि मम प्रीतिश्च जायते‖ ॥ २३ ।
भोगिना यदि वा रोध्रं यदि पिप्पलिकामधु ।
मधूकमश्वपर्णं वा रोहिणञ्चैव कर्कटम् ।
एतेषां प्राप्य लभते शास्त्रज्ञः कर्म्मकारकः ॥ २४ ।
करेण यस्य चूर्णेन पिष्टचूर्णेन वा पुनः ।
एतदुद्वर्त्तनं** कुर्य्यान्मम गात्रसुखावहम् ॥ २५ ।

---

* यावन्ति जलविन्दूनि लिप्यमानस्य सुन्दरीति (ग) ।
विन्दूनीति क्लीवमार्षं विन्दव इति साधु ।

† पुरुषैर्योऽनुलिप्यत इति (ग) ।

‡ एकेनैवानुलेपेन गोषु योन्यां प्रमुच्यते इति (ग) ।

§ एवं योऽभ्यञ्जनं दत्त्वा विशिष्टेनैव कर्म्मणा ।
यावन्तो विन्दवः केचित्स्नेहं घृततिलानि वेति (ग) ।

¶ प्रतिष्ठते इति साधु ।

‖ विशुद्धिर्मम जायत इति (ग) ।

** एतेनोद्वर्त्तनमिति (ग) ।

यदीच्छेत्परमां सिद्धिं मम कर्म्मानुसारकः ।
एवमुद्वर्त्तनङ्कृत्वा स्नानकर्म्म तु* कारयेत् ॥ २६ ।
तत आमलकञ्चैव वसुगन्धार्णमुत्तमम् ।
तेन मे सर्व्वगात्राणि मर्द्दयित्वा दृढ़व्रतः ।
जलकुम्भं ततो गृह्य इमं मन्त्रमुदाहरेत्† ॥ २७ ।
देवानां देवदेवोऽसि देव अनादिभूत ।
तवाव्यक्तरूपं स्नानं गृहाण माम्‡ ॥ २८ ।
एवन्तु स्नापनं कुर्य्यान्मम मार्गानुसारकः ।
अथ सौवर्णकुम्भेन रजतस्य घटेन वा ।
एतेषामप्यलाभेन कर्म्मज्ञः कर्म्म कारयेत् ।
ताम्रकुम्भमयेनैव कुर्य्यात्स्नापनमुत्तमम् ॥ २९।३० ।
एवन्तु स्नापनङ्कृत्वा विधिदृष्टेन कर्म्मणा ।
पश्चाद्गन्धः प्रदातव्यः प्रकृष्टो मन्त्रसंयुतः§ ॥ ३१ ।
सर्व्वगन्धाः सौमनस्याः सर्व्ववर्णाश्च ते मताः ।
उत्पन्नाः सर्व्वलोकेषु त्वया सत्येषु योजिताः¶ ॥ ३२ ।

---

* सर्व्वकर्म्माणीति (ग) ।

† (ग) पुस्तकेऽतः परं (मन्त्रा ऊचुः) इति पाठः ।

‡ देवानां देवोऽसि देव अनादि अनन्तव्यक्तरूपस्नानं गृह्य मामिति (ग) ।

§ अतः परं (ग) पुस्तके (मन्त्रा ऊचुः) इति पाठः ।

¶ सर्व्वगन्धाः सर्व्वसौगन्धिभिश्चैव सर्व्वे वर्णा ये केचिदनिन्द्यवर्णास्त्वया दत्ताः [illegible] लोकेषु दैवता वा देहिन गति सुगन्धं समादाय समाविदमपशुषि मम भक्ताय [illegible] प्रतिगृह्याशु माधव इति (ग) ।

मया च ते तवाङ्गेषु तानावह शुचीन्प्रभो।
मम भक्त्या सुसन्तुष्टः प्रतिगृह्लीष्व* माधव॥ ३३।
एवं गन्धांस्ततो दत्त्वा उत्कृष्टं कर्म्म कारयेत्।
कर्म्मण्यान्यपि माल्यानि ततो मह्यं प्रदापयेत्†॥ ३४।
तदेव‡ चार्च्चनङ्कृत्वा कर्म्मण्यः§ कर्म्मसम्मितः।
ततः पुष्पाञ्जलिं दत्त्वा इमं मन्त्रमुदीरयेत्¶॥ ३५।
जलजं स्थलजञ्चैव पुष्पं कालोद्भवं शुचि।
मम संसारमोक्षाय गृह्ण गृह्ण|| ममाच्युत॥ ३६।
एवंविधोपचारेण अर्च्चयित्वा मम प्रियम्।
पश्चाद्धूपञ्च मे दद्यात्सुगन्धद्रव्यसम्मितम्**॥ ३७।
धूपं गृह्य विधानेन ममोक्तं सुखवल्लभम्††।
उभयेषु कुलेष्वात्मा धूपमन्त्रमुदीरयेत्‡‡॥ ३८।
वनस्पतिरसं दिव्यं बहुद्रव्यसमन्वितम्।
मम संसारमोक्षाय धूपोऽयं प्रतिगृह्यताम्॥ ३९।

---

* प्रतिगृहाणेति साधु।

† कर्म्मण्येष्वपि माल्येषु शीघ्रमेव प्रदापयेदिति (ग)।

‡ तमेवेति (ग)।

§ कर्म्मज्ञ इति (ग)।

¶ उदाहरेदिति (ग)।

|| गृहाण गृहाणेति साधु।

** पश्चाद्धूपांश्च मे दद्याद्गन्धद्रव्यसमन्वितानिति (ग)।

†† समायुक्तं महत्तरमिति (ग)।

‡‡ उदाहरेदिति (ग)।

मन्त्रः।—शान्तिर्वै सर्व्वदेवानां शान्तिर्मम परायणम्।
सांख्यानां शान्तियोगेन धूपं गृह्ण नमोऽस्तु ते*।
त्राता नान्योऽस्ति मे कश्चित्त्वां विहाय जगद्गुरो ॥ ४
एवमभ्यर्च्चनङ्कृत्वा माल्यगन्धानुलेपनैः।
पश्चाद्वस्त्रञ्च वै दद्यात्† क्षौमशुक्लं सपीतकम् ॥ ४१
एवञ्चैव‡ समादाय कृत्वा शिरसि चाञ्जलिम्।
दिव्ययोगं समादाय इमं मन्त्रमुदीरयेत्§ ॥ ४२।

प्रीयतां भगवान्पुरुषोत्तमः
श्रीनिवासः श्रीमानानन्दरूपः।
गोप्ता कर्त्ताधिकर्त्ता नान्यनाथ
भूतनाथ आदिरव्यक्तरूपः।
क्षौमं वस्त्रं पीतरूपं मनोज्ञं
देवाङ्के स्वे गात्रप्रच्छादनाय¶ ॥ ४३।

वस्त्रैर्विभूषणं कृत्वा मम गात्रानुसारिणम्।
पश्चात्पुष्पं गृहीत्वा तु आसनञ्चोपकल्पयेत्।
गृहीत्वा प्रणवाद्येन‖ धर्म्मपुण्येन संवृतः ॥ ४४।

---

* शान्तिर्देवतामेव काष्ठे वसति शान्तिः।
सांख्यानां शान्तियोगानां गृह्य धूपं मम संसारमोचणमिति (ग)।

† ततो दद्यादिति (ग)।

‡ एवं वस्त्रमिति (ग)।

§ अतः परं (मन्त्रा उच्चुः) इति (ग)।

¶ देव त्वं गृह्ण गात्रप्रदानाय चेति (ग)।

‖ प्रणवार्द्धेनेति (ग)।

इदं परायणं परस्परप्रीतिकरं प्राणरक्षणं प्राणिनां स्विष्टं तदनुकल्पं सत्यमुपयुक्तमात्मने तद्देव गृहाण* ।

एवन्तु प्रापणं कृत्वा मम मार्गानुसारकः ।
मुखप्रक्षालनं दत्त्वा शीघ्रमेव प्रकल्पितम्† ॥ ४५ ।
शुचिः सुवति‡ देवानामेतद्देव§ परायणम् ।
शौचार्थन्तु जलं गृह्य कृत्वा प्रापणमुत्तमम् ॥ ४६ ।
एवन्तु भोजनं दत्त्वा व्यपनीय तु प्रापणम् ।
ताम्बूलन्तु ततो गृह्य इमं मन्त्रमुदीरयेत्¶ ॥ ४७ ।

मन्त्रः—अलङ्कारं सर्व्वतो देवानां द्रव्योनुक्तः सर्व्वसौगन्धिकादिभिः गृह्य ताम्बूल लोकनाथविशिष्टमस्माकञ्च भवनं तव प्रतिमा च ह‖ ।

अलङ्कारं मुखे श्रेष्ठं तव प्रीत्या मया कृतम् ।
मुखप्रसादनं श्रेष्ठं देव गृह्ण मया कृतम्** ॥ ४८ ।

---

* इदं परापरं नाम परस्परेण शास्त्रपरप्रमाणं प्रमाणिनां वै लिष्टं तदनुकल्पप्रयुक्तमात्मानं सत्यं सदैव गृह्णातु इति (ग) ।

† मन्त्रप्रकल्पितमिति (ग) ।

‡ सवेति इति (ग) । सौतीति साधु ।

§ एवञ्चैवमिति (ग) ।

¶ अतः परं (मन्त्रा ऊचुः) इति (ग) ।

‖ तव प्रीतिर्मे भवमिति (ग) ।

** मनोहरमिति (ग) ।

एतेनैवोपचारेण मद्भक्तः कर्म्म कारयेत् ।
अनुमुक्तो महालोकान् पश्यते* मम नित्यशः ॥ ४८ ।

इति वराहपुराणे भगवच्छास्त्रे देवोपचारविधिर्नाम
अष्टादशाधिकशततमोऽध्यायः ।

ऊनविंशत्यधिकशततमोऽध्यायः ।

धरण्युवाच ।

एवं कर्म्मविधिं श्रुत्वा सर्व्वसंसारमोक्षणम् ।
प्रसन्नवदनन्देवं पुनर्वाक्यमुवाच ह ॥ १ ।
एवं महौजसं कर्म्म तव मार्गानुसारतः ।
त्वत्तस्तु प्रापणविधिस्तव प्रीत्या मया श्रुतः ।
केन द्रव्येण संयुक्तं तन्ममाचक्ष्व माधव ॥ २ ।
वसुधाया वचः श्रुत्वा वराहः प्रीतमानसः* ।
उवाच धर्म्मसंयुक्तं धर्म्मज्ञो वाक्यकोविदः ॥ ३ ।

---

* पश्यतीति साधु ।

---

* परमात्मवानिति (ग) ।

वराह उवाच ।

येन मन्त्रेण संयुक्तो मम प्रापणकं नयेत् ।
सप्त व्रीहींस्ततो गृह्य पयसा सह संयुतम् ॥ ४ ।
परमन्नस्य शाकानि मधूकोदुम्बरन्तथा ।
एते चान्ये च बहवः शतशोऽथ सहस्रशः ।
कर्म्मण्याश्च त एतेषां ये मया* परिकीर्त्तिताः ॥ ५ ।
व्रीहीणाञ्च प्रवक्ष्यामि उपयोग्यानि माधवि ।
एकाग्रं मानसं कृत्वा† प्रापणं शृणु सुन्दरि ॥ ६ ।
धर्म्मचिल्लिकशाकञ्च सुगन्धं रक्तसालिकौ ।
दीर्घशालिमहाशाली वरकुङ्कुममाच्चिकौ ॥ ७ ।
आमोदाशिवसुन्दर्य्यौ शिरीकाकुलशालिकाः‡ ।
विविधं यावकान्नञ्च ज्ञेयान्येतानि कर्म्मणि ॥ ८ ।
कर्म्मण्या मुद्गमाषा वै तिलकङ्कुलिच्यकाः ।
गवेधुकं महामोहं मकुष्ठमथवाह्निजाम् ।
श्यामाकमिति चोक्तानि कर्म्मण्यानि वसुन्धरे§ ॥ ९ ।
कर्म्मण्यानि च शाकानि विजानीहि वसुन्धरे ।
एतानि प्रतिगृह्णामि यच्च¶ भागवतं प्रियम् ॥ १० ।

---

* कर्म्मण्याश्च य एतेषां ते मयेति (ग) ।

† एकचित्तं समादायेति (ग)

‡ कालिका इति (ग) ।

§ (ग) ८ श्लोकस्य उत्तरार्द्धं ९ श्लोकस्य न स्तः ।

¶ प्रतिगृह्णाम्यहमेतामिति (ग)।

मार्गमांसं वरं छागं शासं समनुयुज्यते ।
एतान् हि प्रापणे दद्यान्मम चैतत्* प्रियावहम् ॥ ११
युञ्जानो वितते यज्ञे ब्राह्मणे वेदपारगे ।
भागो ममास्ति तत्रापि पशूनां छागलस्य च ॥ १२ ।
माहिषं वर्ज्जयेन्मह्यं क्षीरं दधि घृतं ततः ।
वर्ज्जयेत्तत्र मांसानि यजुषा वैष्णवोऽश्नुते ।
परं पायसमपि वर्ज्ज्यानि तन्मांसं चेतकः खुरे ॥ १३ ।
पक्षिणाञ्च प्रवक्ष्यामि ये प्रयोज्या वसुन्धरे ।
ये चैव मम क्षेत्रेषु उपयुज्यन्ति† नित्यशः ॥ १४ ।
लावकं वार्त्तिकञ्चैव प्रशस्तञ्च कपिञ्जलम् ।
एते चान्ये च बहवः शतशोऽथ सहस्रशः ।
मम कर्म्मणि योग्या ये ते मया परिकीर्त्तिताः ॥ १५
यस्त्वेतत्तु विजानीयात्कर्म्मकर्त्ता तथैव च‡ ।
नापराध्नोति स नरो मम चोक्तं§ वचः प्रिये ॥ १६ ।
ते च भोज्याश्च¶ मङ्गल्या मम भक्तसुखावहाः ।

---

* मम चैवेति (ग) ।

† उपयुज्यन्ते इति साधु ।

‡ कदाचनेति (ग) ।

§ ततश्च नापराधोक्तं ममैवोक्तमिति (ग) ।

¶ भोग्याश्चेति (ग) ।

ततोपष्टव्यमेवं हि य इच्छेत्*सिद्धिमुत्तमाम् ॥ १७ ।
य एतेन विधानेन यजिष्यन्ति वसुन्धरे ।
प्राप्नुवन्ति परां सिद्धिं ममैव कृतकर्म्मिणः† ॥ १८ ।

इति वराहपुराणे भगवच्छास्त्रे प्रापणद्रव्यकर्म्मणमोज्यनियमविधिर्नाम
ऊनविंशत्यधिकशततमोऽध्यायः ।

विंशत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

शृणुष्व परमं गुह्यं पूर्व्वं पृष्टं त्वया धरे* ।
देवि सर्व्वं प्रवच्यामि संसारतरणं महत् ॥ १ ।
स्नानं कृत्वा यथान्यायं मम कर्म्मपरायणाः ।
उपसर्पन्ति ये भक्त्या कट्नाशा जितेन्द्रियाः ॥ २ ।
यश्चैवमुच्यते भद्रे मम रूपं सनातनम् ।

---

* यदासीति (ग) ।

† प्राप्नोति परमां सिद्धिं ममैव कृतकर्म्मण इति (ग) ।

---

* शृणोहि परमं गुह्यं यत्त्वया परिपृच्छितमिति (ग) ।
शृणु इति साधु । परिपृष्टमिति साधु ।

अहमेव वरारोहे सर्व्वभूतसनातनम् ॥ ३ ।
अधश्चोर्द्धञ्च तिर्य्यक् च अहमेव व्यवस्थितः ।
दिशाश्च विदिशाश्चैव उपर्य्युपरि भाविनि ॥ ४ ।
सर्व्वथा वन्दनीयास्ते मम भक्तेन सर्व्वदा* ।
क्रियासमूहयुक्तेन यदीच्छेत्परमां गतिम् ॥ ५ ।
अन्यच्च ते प्रवच्यामि† गुह्यं लोके महद्यशः ।
यथा वै वन्दनीयास्ते मम मार्गानुसारिणः ॥ ६ ।
कृत्वापि परमं कर्म्म बुद्धिमादाय तद्विधाम् ।
ततः पूर्व्वमुखो भूत्वा पुनर्गृह्य जलाञ्जलिम् ।
ओं नमो नारायणेत्युक्का‡ इमं मन्त्रमुदीरयेत् ॥ ७ ।

यजामहे धर्म्मपरायणोऽहवं
नारायणं सर्व्वलोकप्रधानम् ।
ईशानमाद्यं पुरुषं पुराणं
संसारमोचाय कृपाकरन्तम् ॥ ८ ।

ततः पश्चान्मुखो भूत्वा पुनर्गृह्य जलाञ्जलिम् ।
द्वादशाचरमुच्चार्य्य§ इमं मन्त्रमुदीरयेत्¶ ॥ ९ ।

---

* नित्यशः इति (ग) ।

† अन्यत्ते संप्रवच्यामीति (ग) ।

‡ मूलयोगं समादायेति (ग) ।

§ ओंनमो नारायणेत्युक्तेति (ग) ।

¶ (ग) पुस्तकेऽतः परं (मन्त्रा ऊचुः) इत्यधिकः पाठो वर्त्तते ।

यथा तु देवः प्रथमादिकर्त्ता
पुराणकल्पस्य यथा विभूतिः ।
तथा स्थितञ्चादिमनन्तरूप-
ममोघसङ्कल्पमनन्तमीडे ॥ १० ॥

ततस्तेनैव कालेन* पुनर्गृह्य जलाञ्जलिम् ।
तेनैव चास्य योगेन भूत्वा चैवोत्तरामुखः ।
नमो नारायणेत्युक्त्वा इमं मन्त्रमुदाहरेत् ॥ ११ ॥

यजामहे दिव्यं परं पुराण-
मनादिमध्यान्तमनन्तरूपम् ।
भवोद्भवं विश्वकरं प्रशान्तं
संसारमोक्षावहमद्वितीयम् ॥ १२ ॥

ततस्तेनैव कालेन भूत्वा वै दक्षिणामुखः ।
नमः पुरुषोत्तमायेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ १३ ॥

यजामहे यज्ञमहो रूपन्तु सत्यं
ऋतञ्च कालादिमरूपमाद्यम् ।
अनन्यरूपञ्च महानुभावम् ।
संसारमोक्षाय कृतावतारम् ॥ १४ ॥

काष्ठकृत्यस्ततो भूत्वा कृत्वा चेन्द्रियनिग्रहम् ।
अच्युते तु मनः कृत्वा इमं मन्त्रमुदाहरेत् ॥ १५ ॥

यजामहे सोमपं भवन्तं ते
सोमार्कनेत्रं शतपत्रनेत्रम् ।

---

* अथ तस्मिंस्तु कालेऽस्मिन्निति (क) ।

जगत्प्रधानं ननु लोकनाथं
मृत्युन्त्रिसंसारविमोक्षणञ्च॥ १६।
त्रिषु सन्ध्यास्वनेनैव विधिना कुर्य्यान्मम च कर्म्म तत्।
बुद्ध्या युक्त्या च मत्या च यदीच्छेत्परमां गतिम्* ॥ १७।
गुह्यानां परमं गुह्यं योगानां परमो निधिः† ।
सांख्यानां परमं सांख्यं कर्म्मणां कर्म्म चोत्तमम् ॥ १८।
एतन्न दद्यान्मूर्खाय पिशुनाय शठाय च।
दीक्षितायैव दातव्यं सुशिष्याय दृढ़ाय च ॥ १९।
एतन्मरणकालेऽपि गुह्यं विष्णुप्रभाषितम्।
बुद्ध्या धारयितव्यञ्च न विस्मर्त्तव्यं कदाचन‡ ॥ २०।
य एतत्पठते§ नित्यं कल्योत्थायी दृढ़व्रतः।
ममापि हृदये नित्यं स तिष्ठति न संशयः¶ ॥ २१।
य एतेन विधानेन त्रिसन्ध्यं कर्म्म कारयेत्।
तिर्य्यग्योनिविनिर्मुक्तो‖ मम लोकाय गच्छति ॥ २२।

इति वराहपुराणे भगवच्छास्त्रे त्रिसन्ध्यामन्त्रोपस्थानकरणं नाम
विंशत्यधिकशततमोऽध्यायः।

---

* एतेषां त्रिषु सन्ध्यासु कर्म्मचैवं समाचरेत्।
बुद्धिमान्मतिमान् भूत्वा यदीच्छेत्परमां गतिमिति (ग)।

† योगानां परमो योगो गुह्यानां परमः पर इति (ग)।

‡ बुद्धिमान्मतिमान् भूत्वा विस्मरेन्न कदाचनेति (ग)।

§ पठतीति साधु।

¶ संस्थितं त्रिगुणान्वितमिति (ग)।

‖ तिर्य्यग्योन्यापि संप्राप्त इति (ग)।

एकविंशत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

येन गर्भं न गच्छेत* तच्छृणुष्व वसुन्धरे† ।
कथयिष्यामि ते ह्येवं सर्व्वधर्म्मविनिश्चयम् ॥ १ ॥
कृत्वापि विपुलं कर्म्म आत्मानं न प्रशंसति ।
करोति बहुकर्म्माणि शुद्धेनैवान्तरात्मना ॥ २ ॥
कृत्वा तु मम कर्म्माणि‡ समर्थोऽनुग्रहे रतः ।
कार्य्याकार्य्यं विजानाति सर्व्वधर्म्मेषु निष्ठितः ॥ ३ ॥
शीतोष्णवातवर्षादिक्षुत्पिपासासहश्च यः ।
यो दरिद्रो निरालस्यः सत्यवागनसूयकः ॥ ४ ॥
स्वदारनिरतो नित्यं परदारविवर्जकः§ ।
सत्यवादी विशुद्धात्मा नित्यं भागवतप्रियः ॥ ५ ॥
संविभाज्य विशेषज्ञो नित्यं ब्राह्मणवत्सलः ।

---

* गच्छेदिति साधु ।

† तन्मे शृणुहि माधवीति (ग) । शृणु इति साधु ।

‡ कार्य्याणीति (ग) तत्राऽतः परं—

नैव कुर्व्वत्यहंकारं क्रोधं चैव न गच्छति ।
समं पश्यति चित्तेन लाभालाभविवर्ज्जितः ।
पञ्चानामिन्द्रियाणाञ्च समर्थो निग्रहे रतः ॥

इति पाठो वर्त्तते ।

§ विवर्ज्जितः इति (ग) ।

प्रियभाषी* द्विजानाञ्च मम कर्म्मपरायणः ।
कुयोनिन्तु न गच्छेत मम लोकाय गच्छति ॥ ६ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व† वसुन्धरे ।
यो वियोनिं न गच्छेत‡ मम कर्म्मपरायणः ॥ ७ ।
जीवहिंसानिवृत्तस्तु§ सर्व्वभूतहितः शुचिः ।
सर्व्वत्र समतायुक्तः समलोष्टाश्मकाञ्चनः ॥ ८ ।
बाल्ये स्थितोऽपि वयसि चान्तो दान्तः शुभे रतः ।
नित्यं नैव विजानाति परेणापकृतं क्वचित् ॥ ९ ।
कर्त्तव्यं संस्मरेत्सर्व्वं मम सत्यञ्च जल्पति¶ ।
व्यलीकादिनिवृत्तो यस्तथेतिकृतनिश्चयः ॥ १० ।
नित्यञ्च वृत्तिमान्कश्चि‖त्परोचेऽपि न चाचिपेत् ।
ऋतुकालेऽपि गच्छेद्यः अपत्यार्थं स्वकां स्त्रियम् ॥ ११ ।
ईदृशास्तु नरा भद्रे मम कर्म्मपरायणाः ।
ते वियोनिं न गच्छन्ति मम गच्छन्ति सुन्दरि ॥ १२ ।

---

* प्रियवादीति (ग) ।

† शृणु इति साधु, एवं सर्व्वत्र ।

‡ गच्छेदिति साधु ।

§ जीवांस्तु ये न हिंसन्तीति (ग) ।

¶ असत्यञ्च न जल्पतीति (ग), तत्र इतः पूर्व्वं पाठभेदोऽस्ति तच्चाशुद्धबहुल[त्वात्]
परित्यक्त एव ।

‖ नित्यञ्च धृतिमान्यश्चेति (ग), तत्र परोचे च न निचिपेदिति च पाठः ।

पुनरन्यत्प्रवच्यामि तच्छृणुष्व* वसुन्धरे।
पुरुषाणां प्रसन्नानां यश्च धर्म्मः† सनातनः॥ १३॥
मनुनाप्यन्यथा दृष्टोह्यन्यथाङ्गिरसेन च।
शुक्रेण चान्यथा दृष्टोगौतमेनापि चान्यथा॥ १४॥
सोमेन चान्यथा दृष्टोरुद्रेणाप्यन्यथा पुनः।
शङ्खेन चान्यथा दृष्टोलिखितेनापि चान्यथा॥ १५॥
कश्यपेनान्यथा दृष्टोधर्म्मेणाप्यन्यथा धरे।
अग्निना वायुना चैव दृष्टोधर्म्मोऽन्यथा धरे॥ १६॥
यमेन चान्यथा दृष्टइन्द्रेण वरुणेन च।
कुवेरेणान्यथा दृष्टः शाण्डिल्येनापि चान्यथा॥ १७॥
पुलस्त्येनान्यथा दृष्टआदित्येनापि चान्यथा।
पितृभिश्चान्यथा दृष्टोह्यन्यथापि स्वयम्भुवा॥ १८॥
आत्मनात्मनि धर्म्मेण ये नरा निश्चितव्रताः।
स्वकं पालयते धर्म्मं स्वमतेनैव भाषितम्॥ १९॥
परवादं न कुर्व्वीत सर्व्वधर्म्मेषु निश्चितम्।
न निन्देद्धर्म्मकार्य्याणि आत्मधर्म्मपथे स्थितः॥ २०॥
एभिर्गुणैः समायुक्तो मम कर्म्माणि कारयेत्‡।
वियोनिं स न गच्छेत§ मम लोकाय गच्छति॥ २१॥

---

* शृणु इति साधु। एवं परत्रापि।

† मम इति (ग)।

‡ कुर्व्वीति (ग)। करोतीति साधु।

§ गच्छेदिति साधु। एवं परत्रापि।

पुनरन्यत्तु वच्यामि तच्छृणुष्वेह माधवि ।
तरन्ति पुरुषा येन गर्भसंसारसागरम्* ॥ २२ ।
जितेन्द्रिया जितक्रोधा लोभमोहविवर्ज्जिताः ।
आत्मोपकारका नित्यन्देवातिथिगुरुप्रियाः† ॥ २३ ।
हिंसादीनि न कुर्व्वन्ति मधुमांसविवर्ज्जकाः‡ ।
मनसा ब्राह्मणीञ्चैव योगच्छेन्न कदाचन ॥ २४ ।
विप्राय कपिलां दद्याद्दद्यं सान्त्वेन पालयेत् ।
सर्व्वेषाञ्चैव पुत्राणां न विशेषं करोति यः§ ॥ २५ ।
संक्रुद्धं ब्राह्मणं दृष्ट्वा यस्तु तत्र प्रसादयेत् ।
यः स्पृशेत्कपिलां भक्त्या कुमारीं न च दूषयेत् ॥ २६ ।
अग्निं न च क्रमेत्पद्भ्यां न च पुत्रेण भाषयेत् ।
जले न मेहयेद्यस्तु¶ गुरुभक्तो न जल्पकः ॥ २७ ।
एवं धर्म्मेण संयुक्तो योनु मां प्रतिपद्यते ।
स च गर्भं न गच्छेत मम लोकाय गच्छति ॥ २८ ।

इति वराहपुराणे योनिगर्भमोचणो नाम
एकविंशत्यधिकशततमोऽध्यायः ।

---

* सागरादिति (ग) ।

† देवतातिथिषु प्रिया इति (ग) ।

‡ विवर्ज्जिता इति (ग) ।

§ विशेषं यो न कुर्व्वतीति (ग) ।

¶ जलेन मेहनञ्चैवेति (ग) ।

द्वाविंशत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

गुह्यानां परमं गुह्यं तच्छृणुष्व वसुन्धरे ।
तिर्य्यग्योनिगताश्चापि येन मुच्यन्ति* किल्बिषात् ॥ १ ॥
अष्टम्याञ्च चतुर्द्दश्यां मैथुनं यो न गच्छति ।
भुक्त्वा परस्य चान्नानि यश्चैव न विकुत्सति ॥ २ ॥
बाल्ये वयस्यपि च यो† मम नित्यमनुव्रतः ।
येन केनापि सन्तुष्टो यो मातापितृपूजकः ॥ ३ ॥
आयासे जीवति न यः प्रविभागी गुणान्वितः‡ ।
दाता भोक्ता च कार्य्येषु स्वतन्त्रो नित्यसंयतः ॥ ४ ॥
विकर्म्म नाभिकुर्व्वीत कौमारव्रतसंस्थितः ।
सर्व्वभूतदयायुक्तः सत्वेन च समन्वितः ॥ ५ ॥

---

* मुच्यन्तीति आर्षं, मुच्यन्ते इति साधु । येन गच्छति किल्विषा इति (ग) ।

† बाल्ये वयसि वर्त्तेत इति (ग) ।

‡ (ग) पुस्तकेऽत्र एवं पाठोऽस्ति—

प्रायं भुञ्जीत नित्यश्च स्वयं न परिवेषकः ।
अलुब्धः सर्व्वकार्य्येषु स्वतन्त्रो नित्यसंयतः ।
विकर्म्म नाभिकुर्व्वीत कौमारव्रतसंस्थितः ।
सर्व्वभूतदयो नित्यं संविभागी गुणान्वितः ।
दाता भोक्ता च सत्र वै सत्वेन च समन्वितः ॥ इति ।

मत्या च निस्पृहोऽत्यन्तं परार्थेष्वस्पृहः सदा* ।
इष्टबुद्धिं समादाय मम कर्म्म करोति यः† ।
तिर्य्यग्योनिं न गच्छेत मम लोकाय गच्छति ॥ ६ ।
इमं गुह्यं वरारोहे देवैरपि‡ दुरासदम् ।
तच्छृणुष्वानवद्याङ्गि कथ्यमानं मयाऽनघे ॥ ७ ।
जरायुजाण्डजोद्भिज्जस्वेदजानि कदाचन ।
ये न हिंसन्ति भूतानि शुद्धात्मानो दयापराः§ ॥ ८ ।
यस्तु कोकामुखे देवि ध्रुवं प्राणान्परित्यजेत् ।
मनसा न चलत्येव मम वल्लभतां व्रजेत् ॥ ९ ।
ततो विष्णुवचः श्रुत्वा सा मही संशितव्रता ।
वराहरूपिणन्देवं प्रत्युवाच वसुन्धरा ॥ १० ।

धरण्युवाच ।

अहं शिष्या च दासी च भक्ता च त्वयि माधव ।
एवं मे परमं गुह्यं त्वद्भक्तया वक्तुमर्हसि ॥ ११ ।
चक्रं वाराणसीञ्चैव अट्टहासञ्च नैमिषम् ।
भद्रकर्णह्रदञ्चैव हित्वा कोकां प्रशंससि¶ ॥ १२ ।

---

* मतिमान्नैव तप्यन्ते परार्थेषु कदाचनेति (ग) ।

† ईदृशीं बुद्धिमादाय मम कर्म्माणि कुर्व्वतीति (ग) ।

‡ देवैरतीति (क), (ख) ।

§ ये न हिंसन्ति भूतानि स्वेदजोद्भिज्जमण्डजान् ।
जरायुजानां शुद्धात्मा सर्व्वभूतदयापरः इति (ग) ।

¶ भद्रकर्णह्रदं नैव कोकां किं वै प्रशंससीति (ग) ॥

नगरञ्च हिरण्डञ्च मुकुटं* मण्डलेश्वरम् ।
केदारञ्च ततो मुक्का किञ्चोकाञ्च प्रशंससि† ॥ १३ ।
देवदारुवनं मुक्का तथा जालेश्वरं‡ विभुम् ।
दुर्गं महाबलं मुक्का किं वै कोकां प्रशंससि ॥ १४ ।
गोकर्णञ्च ततो मुक्का शुद्धञ्जालेश्वरन्तथा§ ।
एकलिङ्गं ततो मुक्का किं वा कोकां प्रशंससि ॥ १५ ।
एवं पृष्टस्तया भक्त्या माधवश्च महाप्रभुः ।
वराहरूपी भगवान्प्रत्युवाच वसुन्धराम् ॥ १६ ।

वराह उवाच ।

एवमेतन्महाभागे यन्मात्वं भीरु भाषसे ।
कथयिष्यामि ते गुह्यं कोका येन विशिष्यते ॥ १७ ।
एते रुद्राश्रिताः क्षेत्रा ये त्वया परिकीर्त्तिताः¶ ।
एते पाशुपताश्चैषा कोका भागवतस्य ह‖ ॥ १८ ।
तत्रान्यत्ते** प्रवक्ष्यामि महाख्यानं वरानने ।
कृतं कोकामुखे चैव मम क्षेत्रे हि†† सुन्दरि ॥ १९ ।

---

* कुक्कुटमिति (ग) ।

† कोकां किं वै प्रशंससीति (ग) । एवं परत्रापि ।

‡ यागेश्वरमिति (ग) ।

§ गोकर्णञ्च ततोगुह्यं शुद्धञ्जालेश्वरं तथेति (ग) ।

¶ क्षेत्रशब्दस्य तद्विशेषणानाञ्च पुंस्त्वनार्षम् ।

‖ आर्षप्रयोगबाहुल्यात्श्लोक एष (क) (ख) पुस्तकयोर्न धृत इत्यनुमीयते ।

** अन्यच्च ते (ग) ।

†† मम क्षेत्रेष्विति (ग) ।

कश्चिल्लुब्धो मिषाहारश्चरन्वै* कोकमण्डले ।
तत्राल्पेनाम्बुना युक्ते ह्रदे मत्स्यस्तु तिष्ठति† ॥ २० ।
दृष्ट्वा तं लुब्धकस्तूर्णं वडिशेनाजहार ह ।
तस्य हस्तात्तु बलवान्मत्स्यस्तूर्णं विनिर्गतः ॥ २१ ।
अथ श्येनस्तु तं हन्तुं मन्त्रयित्वा नभश्चरः ।
निपत्य तं गृहीत्वैव प्रोड्डीनस्त्वरयान्वितः ।
अशक्तस्य ततोनेतुं मत्स्यः कोकामुखेऽपतत् ॥ २२ ।
तत्क्षेत्रस्य प्रभावेण राजपुत्रोऽभवत्प्रभुः ।
रूपवान् गुणवान् शुद्धः कुलीन वयसान्वितः‡ ॥ २३ ।
अथ कालेन तस्यैव मृगव्याधस्य चाङ्गना ।
गृहीत्वा चैव मांसानि गच्छन्ती याति तत्र वै§ ॥ २४ ।
एका चिल्ली मांसलुब्धा तद्धस्तान्मांसगर्द्धिनी ।

---

* लुब्धोह्यामिषमाहारं चरन्तमिति (ग) ।

† अल्पोदकेषु तिष्ठन्तं ततोमध्येन मत्स्यकमिति (ग) ।

‡ २१।२२।२३ श्लोकाः (ग) पुस्तके एवं पठिताः ।—

स तेनापि प्रवृद्धेन विद्धोमत्स्यः कदाचन ।
मत्स्योऽथ बलवांस्तत्र लुब्धकस्य च पाणितः ॥
दूरे चैव धृतस्तेन स तु मत्स्यो दिगम्बरे ।
श्येनोमन्त्रयते हन्तुं निःश्वसन् खचरस्तथा ॥
सोऽपतन्मम क्षेत्रे तु कोकायान्तु वसुन्धरे ।
शकस्य पुत्रोजायेत रूपवान् बलवान् शुचिः ॥

§ (ग) पुस्तकेऽत्र पाठान्तरमस्ति, तच्चाशुद्धिबाहुल्यान्नोद्धृतम् ।

आगत्यागत्य तरसा हर्त्तुं समुपचक्रमे* ॥ २५ ।
मृगव्याधा बलान्मांसं हर्त्तुकामान्तु चिल्लिकाम्† ।
बाणेनैकेन संहत्य पातिता भुवि तत्क्षणात्‡ ॥ २६ ।
आकाशात्पतिता भद्रे कोकायां मम सन्निधौ§ ।
जाता चन्द्रपुरे रम्ये¶ राजपुत्री यशस्विनी ॥ २७ ।
व्यवर्द्धत सा तु कन्या वयोरूपगुणान्विता ।
चतुःषष्टिकलायुक्ता पुरुषं सा जुगुप्सति ॥ २८ ।
रूपवान् गुणवान् शूरो युद्धकार्य्यार्थनिश्चितः ।
सौम्यश्च पुरुषश्चैव सा च नेति जुगुप्सति‖ ॥ २९ ।
अथ केनचित्कालेन शक्र आनन्दपूरके ।
सम्बन्धोऽजायत तयोर्मध्यमे वयसि स्थयोः** ॥ ३० ।

---

* अथ चामिषलुब्धा वै चिल्ली व्यचरदम्बरे ।
तस्मिन्देशे समागम्य मांसं हरितुमिच्छति ॥ इति (ग) । हर्त्तुमिति साधु ।

† मांसगर्द्धनलोलुपामिति (ग) ।

‡ एकेनैव तु बाणेन सा वै निपतिता सहेति (ग) ।

§ नष्टले इति (ग) ।

¶ चैपेति (ग) ।

‖ सा तु वै वर्द्धते कन्या चतुःषष्टिकलान्विता ।
रूपयौवनसम्पन्ना पुरुषं सा जुगुप्सति ॥
जुगुप्सतीति आर्षं, जुगुप्सते इति साधु । (ग) पुस्तकेऽतः परं
रूपवान् गुणवान् शूरो युद्धकार्य्यार्थनिश्चितः ।
सौम्यश्च पुरुषश्चैव सर्व्वानभिजुगुप्सतीत्यधिकः पाठो वर्त्तते ।

** सम्बन्धो जायते तेषां समिच्छया वरानने इति (ग) ।

तथा तु तौ समासाद्य परस्परमथ क्रमात्* ।
यथान्यायं स विप्रोक्तं विधिदृष्टेन कर्म्मणा ॥ २१ ।
स च तया समं नित्यं सा च तेन समं शुभा ।
अन्योन्यं रममाणौ तौ मुहूर्त्तमपि नोज्झतः ॥ २२
गच्छत्येवं बहुतरे काले चैवाप्यनिन्दिता† ।
समप्रेम्णा च संयुक्ता सौहृदेन च नायकम्‡ ।
भजमाना विनीता च सौहृदाच्च विशेषतः ॥ २३ ।
एवं बहुगतः कालः कामभोगेषु§ सक्तयोः ।
राजपुत्रस्ततोऽप्यत्र शकानां नन्दवर्द्धनः ।
तस्याजायत मध्याह्ने शिरोरुगतिपीड़िनी¶ ॥ २४ ।
ये केचिद्भिषजस्तत्र गदेषु कुशलाः शुभे ।
ते तत्रौषधयोगञ्च चक्रुस्तेनापि वेदना‖ ।
ननाश नैव संयातः कालोबहुतिथस्ततः ॥ २५ ।
न सम्बुध्यति चात्मानं विष्णुमायाविमोहितः** ।
पूर्णे हि समये तत्तु उभयोश्च तदन्तरम् ॥ २६ ।

---

* प्राप्तौ तु ताविहान्योन्यमुभयोश्चैव सुन्दरि इति (ग) ।

† एवं सुवहुधाकाले गच्छत्येव अनिन्दिता इति (ग) ।

‡ नायिकेति (ग) ।

§ बहुश्चैव गतः कालः समभोगेष्विति (ग) ।

¶ अतिभीषणेति (ग) ।

‖ ते तस्य सर्व्वमाचष्टे न सा तिष्ठति वेदनेति (ग) ।

** प्रमोहित इति (ग) ।

तस्य कालः संवृत्तस्य योऽसौ पूर्व्वप्रतिस्रवः।
अयने गत एतेषां वृत्तं कौतूहलं भुवि ॥ ३७ ।
अन्योऽन्यप्रीतियुक्तौ तु नान्योऽन्यं जहतुः क्वचित्।
ततः सर्व्वानवद्याङ्गी भर्त्तारमिदमब्रवीत् ॥ ३८ ।
किमिदन्तव भद्रन्ते वेदना जायते शिरे* ।
एतदाचक्ष्व तत्त्वेन यद्यहञ्च तव प्रिया ॥ ३८ ।
बहवोभिषजश्चैव नानाशास्त्रविशारदाः ।
कुर्व्वन्ति तव कर्म्माणि वेदना च न गच्छति† ।
एवं स प्रियया प्रोक्तस्तां प्रियां पुनरब्रवीत् ॥ ४० ।
इदं किं विस्मृता भद्रे सर्व्वव्याधिसमन्वितम् ।
यत्त्वं मानुषत्वञ्च सुखदुःखसमन्वितम् ।
संसारसागरारूढं नातिप्रष्टुन्त्वमर्हसि‡ ।

---

* शिरसीति साधु ।

† शिरे तिष्ठति वेदनेति (ग)।

‡ (ग) पुस्तकेऽत्र पाठभेदो यथा—

इतः किं विस्मृता भद्रे न च त्वं ज्ञातुमर्हसि ।
मानुष्यमेव यद्भद्रे सर्व्वव्याधिसमन्वितम् ॥
लभते जातमात्रेण दुःखानि च सुखानि च ।
एवं ज्ञातं वरारोहे मानुषत्वञ्च संहतम् ।
संसारसागरारूढं नातिपृच्छितुमर्हसि ॥ इति नातिप्रष्टुमिति साधु ।

तेनैवं भाषिता बाला* श्रोतुकामा वरानना ॥ ४१।४२ ।
ततः कदाचिच्छयने सुप्तौ तौ दम्पती किल ।
गते बहुतिथे काले पुनः पप्रच्छ सा प्रियम्† ॥ ४३ ।
कथयस्व तमेवार्थं यन्मया पूर्व्वपृच्छितम्‡ ।
किं मां न भाषसे नाथ साभिप्रायं वचस्तव ॥ ४४ ।
गोप्यं वा किञ्चिदस्तीह किं गोपयसि मे पुरः ।
अवश्यञ्चैव वक्तव्यं यद्यहन्तव वल्लभा ॥ ४५ ।
इति निर्बन्धतः पृष्टः स शकाधिपतिर्नृपः ।
तां प्रियां प्रणयात्प्राह बहुमानपुरःसरम् ॥ ४६ ।
मुच्यतां मानुषं भावं तां जातिं स्मर पौर्व्विकीम्§ ।
अथ कौतूहलं भद्रे श्रवणे पूर्व्वजन्मनः ।
मन्मातापितरौ गत्वा प्रसादय शुचिस्मिते ॥ ४७ ।
मानार्हौ मानयित्वा तौ ययाहं जठरे धृतः ।
तयोराज्ञां पुरस्कृत्य मानयित्वा यथार्हतः ।
अथ कोकामुखे गत्वा¶ कथयिष्याम्यसंशयम् ॥ ४८ ।
स्वपूर्व्वजन्मवृत्तन्तु देवानामपि दुर्लभम् ।

---

* एवं सा तेन भीता त्विति (ग)।

† पञ्चमासे गते काले शोते तौ शयने गतौ ।
जातकौतूहले चैवे पुनरेवान्वपृच्छत ॥ इति (ग) ।

‡ पृष्टमिति साधु ।

§ जन्मनीति (ग) ।

¶ गत्वा कोकामुखे स्नानमिति (ग) ।

तत्र ते कथयिष्यामि सर्व्ववृत्तमनिन्दिते ॥ ४९ ।
ततः सा ह्यनवद्याङ्गी श्वश्रूश्वशुरयोः पुरः।
गत्वा गृहीत्वा चरणौ ततस्ताविदमब्रवीत्* ।
किञ्चिद्विज्ञप्तुकामास्मि तत्र वा†मवधीयताम् ॥ ५० ।
भवदाज्ञां पुरस्कृत्य भवद्भ्यामनुमानितौ ।
पुण्ये कोकामुखे गन्तुमिच्छावस्तत्र वां गुरू ।
कार्य्यगौरवभावेन न निषेध्यौ कथञ्चन ॥ ५१ ।
अद्य यावत्किमपि वां याचितन्न मया क्वचित् ।
पुरस्ताद्भगावयोस्तन्मे याचितं दातुमर्हथः ॥ ५२ ।
शिरोवेदनयायुक्तः सदा तव सुतोह्ययम् ।
मध्याह्ने मृतकल्पो वै जायते ह्यचिकित्सकम् ॥ ५३ ।
सुखानि सर्व्वविषयान्विसृज्य परिपीड़ितः ।
कोकामुखं विना कष्टं न निवृत्तं भविष्यति ॥ ५४ ।
कदाचिन्नोक्तपूर्व्वन्ते रहस्यं परमं महत् ।
त्वरितङ्गन्तुमिच्छामि विष्णोस्तत्परमं पदम् ।
दम्पतीभ्यां हि मननं रोचतां सर्व्वथैव हि ॥ ५५ ।
ततोवधूवचः श्रुत्वा शकानामधिपो नृपः‡ ।
करेण स्वयमादाय वधूं पुनरुवाच ह ॥ ५६ ।

---

* अतः परं (ग) पुस्तकेऽशुद्धबहुलः पाठः ।

† वामिति आर्षम् ।

‡ शकादिः पृथिवीपतिः इति (ग) ।

किमिदं चिन्तितं वत्स कोकामुखगमं प्रति ।
हस्त्यश्वरथयानानि स्त्रियश्चाप्सरसोपमाः ॥ ५७ ।
सर्व्वमेतत्तु सप्ताङ्गं कोषकोष्ठादिसंयुतम् ।
शरणं वित्तयोराज्यं सर्व्वं त्वयि प्रतिष्ठितम्* ॥ ५८ ।
मित्रं वरासनञ्चैव गृहीष्व सुतसत्तम† ।
त्वयि प्रतिष्ठिताः प्राणाः सन्तानञ्च तदुत्तरम्‡ ॥ ५९ ।
ततः पितुर्वचः श्रुत्वा राजपुत्रो यशस्विनि ।
पितुः पादौ गृहीत्वा च प्रोवाच विनयान्वितः§ ॥ ६० ।
अलं राज्येन कोशेन वाहनेन बलेन वा ।
गन्तुमिच्छामि तत्राहं तूर्णं¶ कोकामुखं महत् ॥ ६१ ।
शिरोवेदनया युक्तो यदि जीवाम्यहं पितः ।
तदा राज्यं बलं कोषो ममैवैतन्न संशयः ।
तत्रैव गमनान्मह्यं वेदना नाशमेष्यति‖ ॥ ६२ ।
पुत्रोक्तमवधार्य्यैवं शकानामधिपो नृपः ।
अनुजज्ञे ततः कोकां गच्छ पुत्र नमोऽस्तु ते ॥ ६३ ।

---

* त्रिवर्ज्जितमिति (ग) ।

† गृह्ण पुत्र ममोत्तरमिति (ग) ।

‡ तदुत्तममिति (ग) ।

§ पितरं चरणौ गृह्य प्रत्युवाच पुनस्तत इति (ग) ।

¶ शीघ्रमिति (ग) ।

‖ एष श्लोकः (ग) पुस्तके नास्ति ।

वणिजश्चैव पौराश्च वैश्याश्चापि* वराङ्गनाः ।
अनुजग्मु† राजपुत्रं कोकामुखपथे स्थितम्‡ ॥ ६४ ।
अथ दीर्घेण कालेन प्राप्तः कोकामुखन्त्विदम् ।
तत्र गत्वा वरारोहा भर्त्तारमिदमब्रवीत् ॥ ६५ ।
पूर्व्वपृष्टं मया यत्ते वच्यामीति च मां प्रति ।
कोकामुखे त्वयाप्युक्तं तदेतन्मम कथ्यताम् ॥ ६६ ।
निशम्येति प्रियाप्रोक्तं राजपुत्री यशस्विनि ।
प्रहस्याह प्रियान्तान्तु समालिङ्ग्य वसुन्धरे ॥ ६७ ।
रजनी सम्प्रवृत्तेयं सुखं स्वापो विधीयताम् ।
श्वः सर्व्वं कथयिष्यामि यत्ते मनसि वर्त्तते§ ॥ ६८ ।
प्रभातायान्तु शर्व्वर्य्यां स्नातौ चौमविभूषितौ ।
प्रणम्य शिरसा विष्णुं हस्ते गृह्य ततः प्रियाम् ॥ ६९ ।
ततः पूर्व्वोत्तरे पार्श्वे नित्यं यो हृदि तिष्ठति ।
अस्थीनि दर्शयामास अवशिष्टानि यानि तु ॥ ७० ।

---

* चैवेति (ग) ।

† अधावदिति (ग) ।

‡ (ग) पुस्तके श्लोक एष एवं पठितः ।—
तथा वै धार्य्यमाणोऽसौ तिष्ठते सर्व्वकर्म्मवित् ।
पित्रा तातोऽनुज्ञातो वै गच्छ पुत्र नमोऽस्तु ते ॥

§ सुखं स्वप वरारोहे इहैकां रजनीं प्रिये ।
कल्यन्ते कथयिष्यामि यच्च त्वात्ते मनीषितमिति (ग) ॥

एतानि मम चास्थीनि पूर्व्वदेहोद्भवानि च* ।
अहं पुराभवं मत्स्यः कोकेषु विचरञ्जले† ।
व्याधेन निगृहीतोऽस्मि बडिशेन जलेचरः ॥ ७१ ।
तद्धस्तान्निर्गतस्तत्र बलेन पतितो भुवि ।
श्येनेनामिषलुब्धेन नखैर्विद्धोऽस्मि सुन्दरि ॥ ७२ ।
नीत आकाशमार्गेण तस्माच्च पतितोऽत्र वै ।
तेन तस्य प्रहारेण जाता शिरसि वेदना ।
अहमेव विजानामि नान्यो जानाति मां विना‡ ॥ ७३
एतत्ते कथितं भद्रे पूर्व्वपृष्टञ्च यत्त्वया§ ।
गच्छ सुन्दरि भद्रन्ते यत्र ते वर्त्तते मनः ॥ ७४ ।
ततः साप्यनवद्याङ्गी रक्तपद्मशुभानना ।
करुणं स्वरमादाय भर्त्तारं पुनरब्रवीत् ॥ ७५ ।
एतदर्थं मया भद्र गुह्यं नोक्तं तथा स्वकम् ।
अहञ्च यादृशी पूर्व्वमभवन्तच्छृणुष्व मे ॥ ७६ ।
क्षुत्पिपासापरिश्रान्ता चिल्ली गगनगामिनी ।
वृक्षोपरि समासीना भक्ष्यञ्चैव विचिन्वती¶ ॥ ७७ ।

---

* पूर्व्वकाणि वरानने इति (ग) ।

† अहं मत्स्योनु कोके तु विचरामि जलेषु वै इति (ग) ।
तत्रातः परं चरणौ न स्तः ।

‡ न कश्चान्योविजानातीति (ग) ।

§ यत्त्वया पूर्व्वपृच्छितमिति (ग), आर्षमिदम् ।

¶ एष श्लोकः (ग) पुस्तके नास्ति ।

अथ कश्चिन्मृगव्याधो हत्वा वनचरान्बहून् ।
संगृह्य मांसभारान्वै तेन मार्गेण सङ्गतः ॥ ७८ ।
स्थापयित्वा मांसभारान् प्रियायाः सविधे स्वयम् ।
काष्ठान्यानयितुं* यातः क्षुधितो मांसपाचने† ॥ ७९ ।
प्रवृत्तोऽग्निमुपादाय तावदुड्डीय सत्वरम् ।
मांसपिण्डोमया विद्धोदृढैर्वज्रमयैर्नखैः ॥ ८० ।
न च शक्तास्मि संहर्त्तुं मांसभारप्रपीड़िता ।
अशक्ता दूरगमने सविधे हि व्यवस्थिता‡ ॥ ८१ ।
भक्षयित्वा ततो मांसं व्याधः संहृष्टमानसः§ ।
अपश्यन्मांसपिण्डन्तु मृगयामास पार्श्वतः ।

---

* आनेतुमिति साधु ।

† (ग) पुस्तकेऽत्र पाठभेदा यथा—

स्थापयित्वा मांसभारं क्वचित्काष्ठं समाहरेत् ।
अहं चरामि चाकाशे मार्गमादाय चामिषम् ।
क्षुत्पिपासापरिश्रान्ता किञ्चिन्मांसानि छिन्दती ।
तत आधार्य्य काष्ठानि प्रज्वाल्य च हुताशनम् ।
पचतस्तत्र मांसानि क्षुत्पिपासापरिप्लुता ।
ततोऽहं समासाद्य पश्यती मांसगृद्धिनी ॥
पतितास्मि ततस्तत्र यत्रासौ पच्यते मिषम् ।
अप्रमाणं मया मांसं विद्धं चन्द्रमयैर्नखैरिति ॥

पच्यते मिषमित्यत्र पचत्यामिषमिति साधु ।

‡ न दूरं गमिता तत्र तत्र स्थाने व्यवस्थितेति (ग) ।

§ प्रहृष्टेनान्तरात्मना इति (ग) ।

तावद्दर्श मान्तत्र खादन्तीं मांसपिण्डिकाम्* ॥ ८२ ।
ततः स धनुरुद्यम्य सशरञ्च व्यकर्षत† ।
विद्धा वाणेन मां तत्र भक्षयन्तीमपातयत्‡ ॥ ८३ ।
ततोऽहं भ्रममाणा वै निश्चेष्टा गतजीविता§ ।
पतितास्म्यवशाश्¶ भद्र कालतन्त्रे दुरासदे ॥ ८४ ।
एतत्क्षेत्रप्रभावेण अकामापि नृपात्मजा‖ ।
जातास्मि त्वत्प्रिया चापि स्मरन्ती पूर्व्वजन्म तत् ॥ ८५ ।
एतानि पश्य चास्थीनि शेषाणि वहुकालतः ।
गलितान्यल्पशेषाणि प्राणनाथ समीपतः ॥ ८६ ।
एवं सा दर्शयित्वा तु भर्त्तारं पुनरब्रवीत् ।
आनीतोऽसि मया भद्र स्थानं कोकामुखम्प्रति ॥ ८७ ।
एतत्क्षेत्रप्रभावेण तिर्य्यग्योनिगता अपि ।

---

* लक्षिताथि च व्याधेन क्रुद्धेनामिषकाङ्क्षिणेति (ग) ।

† वाणं गृह्य ममान्तिके इति (ग) ।

‡ ततोऽहं पातिता तेन चयन्ती मांसपिण्डिकामिति (ग) ।

§ गतमानसेति (ग) ।

¶ पतितास्मि अहमिति (क) ।

‖ (ग) पुस्तकेऽत्र पाठभेदो यथा—

अस्य क्षेत्रप्रभावेण चकामा सा यशस्विनी ।
अस्थीनि पश्य मे तानि ततः शेषाणि ये च मे ॥
जीर्णानि दीर्घकालेन ये केचित् परितिष्ठति ।

अत्रार्षप्रयोगस्य बाहुल्यमस्ति ।

उत्तमे तु कुले जाता मानुषीं जातिमाश्रिताः* ॥ ८८ ॥
यं यं प्रवक्ष्यसे† धर्म्मं विष्णुप्रोक्तं यशोधन ।
तं तमेव करिष्यामि विष्णुलोके सुखावहम्‡ ॥ ८९ ॥
ततस्तस्या वचः श्रुत्वा लब्धपूर्व्वस्मृतिर्नृपः§ ।
विस्मयं परमं गत्वा साधु साध्वित्यपूजयत्¶ ॥ ९० ॥
तस्मिन्क्षेत्रे च यत्कर्म्म कर्त्तव्यं धर्म्मसंहितम् ।
तच्छ्रुत्वा कानिचिद्देवी स्वयं चक्रे पतिव्रता ॥ ९१ ॥
अन्येऽपि सर्व्वे तच्छ्रुत्वा यस्य यद्रोचते प्रियम् ।
तत्तत्सर्व्वेऽपि कुर्व्वन्ति विधिदृष्टेन कर्म्मणा‖ ॥ ९२ ॥
तत्र तौ दम्पती द्रव्यमन्नं रत्नं द्विजेषु च ।
ददतुः परमप्रीतौ पात्रेभ्यश्च यथार्हतः ॥ ९३ ॥
येऽन्ये तत्रार्थमासाद्य यातास्तेऽपि वसुन्धरे ।
ब्राह्मणेभ्योददुः स्वानि विष्णुभक्त्या यतव्रताः ॥ ९४ ॥
तत्र स्थित्वा वरारोहे मम कर्म्मव्यवस्थिताः ।

---

* यस्य क्षेत्रप्रभावेण तिर्य्यग्योनिगता वयम् ।
जाता वै मानुषीं संज्ञामुत्तमेषु कुलेषु चेति (ग) ।

† प्रवक्ष्यसीति साधु ।

‡ तानेव कारयिष्यामि, सुखावहे इति च (ग) ।

§ आगतोऽयं पुरागतिमिति (ग) ।

¶ सोऽब्रवीदिति (ग) ।

‖ श्रुत्वा वै क्षेत्रकर्म्माणि स तस्या वचनं महत् ।
तेऽपि कुर्व्वन्ति कर्म्माणि यस्य यच्चाय रोचते इति (ग) ।

तच्चैनस्य प्रभावेण श्वेतद्वीपमुपागताः* ॥ ९५ ।

एवं स राजपुत्रोऽपि मम कर्म्मव्यवस्थितः ।
मुक्त्वा तु मानुषं भावं श्वेतद्वीपमुपागतः† ॥ ९६ ।

सर्व्वे च पुरुषास्तत्र आत्मनात्मानुदर्शनात् ।
शुक्लाम्बरधरा दिव्यभूषणैश्च विभूषिताः ।
दीप्तिमन्तो महाकायाः सर्व्वे च शुभदर्शनाः ॥ ९७ ।

स्त्रियोऽपि दिव्या यत्रत्या दिव्यभूषणभूषिताः ।
तेजसा दीप्तिमत्यश्च शुद्धसत्त्वविभूषिताः ।
मयि शुद्धं परं भावमारूढ़ाः सत्यवर्च्चसः ॥ ९८ ।

एतत्ते कथितं देवि कोकामुखमनुत्तमम् ।
यत्र मत्स्यश्च चिल्ली च सकामा ये समागताः‡ ॥ ९९ ।

---

* मम लोकमुपागत इति (ग) ।

† एवं मत्स्यश्च चिल्ली च सकामा ये समागताः ।
प्रसादान्मम सुश्रोणि श्वेतद्वीपमुपागत इति (ग) ।

‡ (ग) पुस्तके इतः पूर्व्वं एवं पाठभेदो विद्यते—
केचिच्चान्द्रायणं कुर्य्युः केचिच्चैव जलाशनम् ।
ते च विष्णुमयान्धर्म्मांस्तांस्तान्द्विजः समाचरेत् ॥
बहुधान्यवरं रत्न' दंपत्योऽथ यशस्विनि ।
तेऽपि कुर्व्वन्ति कर्म्माणि मम भक्ता व्यवस्थिताः ॥
तेऽपि दीर्घेण कालेन अटमाना मतिः कृता ।
कुर्व्वन्तोमम कर्म्माणि भाव्यं पञ्चत्वमागताः ॥
ततः चैनप्रभावेण मम कर्म्मप्रभावतः ।
मम चैव प्रसादेन श्वेतद्वीपमुपागतः ॥

प्रसादान्मम सुश्रोणि श्वेतद्वीपमुपागताः ।
एष धर्म्मश्च कीर्त्तिश्च शक्तिश्चैव महद्यशः ।
कर्म्मणां परमं कर्म्म* तपसाञ्च महत्तपः ॥ १०० ।
आख्यानानाञ्च परमं क्वतीनां परमा कृतिः† ।
धर्म्माणाञ्च परो धर्म्मस्तवार्थे कीर्त्तितो मया ॥ १०१ ।
क्रोधनाय न तं दद्यान्मूर्खाय पिशुनाय च ।
अभक्ताय न तं दद्यादश्रद्धाय शठाय च ॥ १०२ ।
दीक्षितायैव‡ दातव्यं सुप्रपन्नाय नित्यशः§ ।
पण्डिताय च दातव्यं यश्च शास्त्रविशारदः ॥ १०३ ।
एतन्मरणकालेऽपि धारयेद्यः समाहितः ।

एवं स राजपुत्रोऽथ सर्व्वभूतगुणान्वितः ।
मुक्ता तु मानुषं भावमूर्द्धशाखोपतिष्ठति ॥
योऽसौ परिजनश्चास्य मम कर्म्मव्यवस्थितः ।
मानुषं भावमुत्सृज्य मम लोकमुपागतः ॥
सर्व्वशोद्युतिमांस्तत्र आत्मनात्मदर्शनात् ।
याश्च तत्र स्त्रियः काश्चित्सर्व्वाश्चोत्पलगन्धिनी ॥
मायया मतिमान् मुक्ताः सर्व्वाश्चैव प्रिया हताः ।
एवं मत्स्यश्चेति ।

* कर्म्मणां कर्म्मणः श्रेष्ठमिति (ग) ।

† आख्यानं महदाख्यानं द्युतीनाञ्च महाद्युतिरिति (ग) ।

‡ दीक्षिताय चेति (ग) ।

§ उपपन्नाय साधवे इति (ग) ।

सोऽपि मुच्येत पूतात्मा गर्भाद्योनिभवाद्भयात् ॥ १०४ ।
एतत्ते कथितं भद्रे महाख्यानं महौजसम् ।
य एतेन विधानेन गत्वा कोकामुखं महत् ।
तेऽपि यान्ति परां सिद्धिं चिल्लीमत्स्यौ यथा पुरा ॥ १०५ ।

इति वराहपुराणे कोकामुखमाहात्म्ये द्वाविंशत्यधिकशततमोऽध्यायः ।

त्रयोविंशत्यधिकशततमोऽध्यायः ।

सूत उवाच ।

श्रुत्वा तु कोकामाहात्म्यं पृथिवी धर्म्मसंहितम्* ।
विस्मयं परमं याता श्रुत्वा धर्म्मं महौजसम् ॥ १ ।

धरण्युवाच† ।

अहो प्रभावः कोकाया माहात्म्यं क्रोड़रूपिणः ।
तिर्य्यग्योनिगतौ वापि प्राप्तौ यत्परमां गतिम् ॥ २ ।
तव देव प्रसादेन किञ्चिदिच्छामि वेदितुम् ।
यन्मया पूर्व्वंपृष्टोऽसि केन धर्म्मेण मानवाः ।

---

* धर्म्मसंहितेति (ग) ।

† एष पाठः (ग) पुस्तके नास्ति ।

तपसा कर्म्मणा वापि पश्यन्ति त्वां हि माधव।
प्रसादसुमुखोभूत्वा निखिलं वक्तुमर्हसि ॥ ३ ।
एवं पृष्टस्तदा देव्या माधव्या स तु माधवः।
प्रहस्य पुनरेवेदं वक्तुं समुपचक्रमे ॥ ४ ।

वराह उवाच* ।

एवमेतन्महाभागे यथा त्वं भीरु भाषसे ।
कथयिष्यामि ते धर्म्मं गुह्यं† संसारमोचणम् ॥ ५ ।
गते मेघागमे काले प्रसन्नशरदाशये ।
अम्बरे विमले जाते विमले शशिमण्डले ॥ ६ ।
नातिशीते न चात्युष्णे काले हंसविराविणि ।
कुमुदोत्पल‡कह्लारपद्मसौरभनिर्भरे ॥ ७ ।
कुमुदस्य च मासस्य भवेद्या द्वादशी शुभा ।
तस्यां मामर्च्चयेद्यस्तु तत्प्रभावं शृणुष्व मे§ ॥ ८ ।
यावल्लोकाश्च धार्य्यन्ते तावत्कालं वसुन्धरे ।
मद्भक्तो जायते धन्यो नान्यभक्तः कदाचनः ॥ ९ ।
कृत्वा ममैव कार्य्याणि द्वादश्यान्तत्र माधवि ।
ममैवाराधनार्थाय इमं मन्त्रमुदीरयेत् ॥ १० ।

मन्त्रः—ब्रह्मणा च रुद्रेण यस्तूयमानो भवानृषिवन्दितो वन्द-

---

* एष पाठः (ग) पुस्तके नास्ति ।
† सर्व्वं धर्म्ममिति (ग) ।
‡ कमलोत्पलेति (ग) ।
§ शृणु प्रिये इति (ग) ।

नीयश्च प्राप्ता द्वादशीयन्ते प्रबुध्यस्व जागृष्व* मेघा गताः पूर्ण-श्चन्द्रः शारदानि पुष्पाणि लोकनाथ तुभ्यमहन्ददानीति धर्म्म-हेतोस्तव प्रीतये प्रबुद्धं जाग्रन्तं लोकनाथ त्वां भजमाना यज्ञेन यजन्ते सत्रेण सत्रिणो वेदैः पठन्ति भगवन्तः शुद्धाः प्रबुद्धा जाग्रतो लोकनाथ

एवं कर्म्माणि कुर्वन्ते† द्वादश्यां वै यशस्विनि ।
मम भक्ता व्रतं श्रेष्ठं ते यान्ति परमाङ्गतिम् ॥ ११ ।
एवं वै शारदं कर्म्म निखिलं कथितं मया ।
देवि संसारमोक्षार्थं मम भक्तसुखावहम् ॥ १२ ।
इति प्रबोधिनीकर्म्म‡ ।
अन्यच्च ते प्रवक्ष्यामि शैशिरं कर्म्म शोभनम् ।
यानि कर्म्माणि कुर्व्वन्ति पुंसो§ यान्ति परां गतिम्॥ १३ ।
शीतवाताभिसन्तप्ता मम भक्त्या व्यवस्थिताः ।
अनन्यमनसो भूत्वा योगाय कृतनिश्चयाः ।
शिशिरे यानि कर्म्माणि पुष्पिताश्च वनस्पतीः ॥ १४ ।
तैरेव चार्च्चनं कृत्वा जानुभ्यां पतितः क्षितौ ।
कराभ्यामञ्जलिं कृत्वा इमं मन्त्रमुदीरयेत्¶ ॥ १५ ।

---

* जागृहीति साधु । एवं परत्र जाग्रतमिति साधु ।

† कुर्व्वते इति साधु ।

‡ एष पाठः (ग) पुस्तके नास्ति ।

§ पुमांस इति साधु ।

¶ उदाहरेदिति (ग) ।

मन्त्रः—शिशिरो भवान् धातरिमं लोकनाथ हिमम् दुस्तरन्दुष्प्रवेशं कालं संसारान्मान्तारयेमन्यत्त्वाँ त्रिलोकनाथ।

यस्त्वथैतेन मन्त्रेण शिशिरे कर्म्म कारयेत्।
स गच्छेत्परमां सिद्धिं मम भक्त्या व्यवस्थितः॥ १६।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे।
मासं मार्गशिरश्चैव* वैशाखञ्च मम प्रियम्॥ १७।
अहं तत्र प्रवक्ष्यामि पुष्पादीनाञ्च† यत्फलम्।
नववर्षसहस्राणि नववर्षशतानि च।
तिष्ठते‡ विष्णुलोकेऽस्मिन्योददाति स्म निश्चलम्॥ १८।
एकैकं गन्धपत्रञ्च दानमेतन्महत्फलम्।
मतिमान् धृतिमान् भूत्वा गन्धपुष्पाणि§ दापयेत्॥ १९।
पुनरन्यत्प्रवक्ष्यामि गन्धपत्रस्य यत्फलम्।
द्वादश्याञ्चैव यो दद्यात्त्रीन्मासांश्च समाहितः॥ २०।
कौमुदस्य तु मासस्य मार्गशीर्षस्य वै तथा।
वैशाखस्य तु मासस्य वनमालां सुपुष्पिताम्॥ २१।
एकचित्तं समाधाय गन्धपुष्पाणि यो न्यसेत्।
वर्षाणि द्वादशैवेह तेन पूजा कृता भवेत्¶॥ २२।

---

* मार्गशिरसश्चैवेति साधु।

† गन्धपत्रस्येति (ग)।

‡ तिष्ठतीति साधु।

§ गन्धपत्रं चेति (ग)।

¶ कृता गन्धेन पूजितेति (ग)।

शालपुष्पेण मिश्रेण कौमुद्याङ्गन्धकेन च ।
मासि मार्गशिरे* भद्रे दद्यादुत्पलमिश्रितम् ।
एवं महत्फलं भद्रे गन्धपत्रस्य च स्मृतम्† ॥ २३ ।
श्रुत्वेति वचनं तस्य प्रश्रयेण तु माधवी ।
प्रहस्य प्रणयाद्वाक्यमित्युवाच वसुन्धरा ॥ २४ ।
प्रभो द्वादश मासाश्च षष्ट्युत्तरशतत्रयम् ।
तत्र द्वावेव किं मह्यं भगवन् किं प्रशंससि ।
द्वादशीञ्चापि देवेश प्रशंससि सदा मम ॥ २५ ।
इति पृष्टस्तदा देव्या धरण्या स तु माधवः ।
प्रहस्य तामुवाचेदं वचनं धर्म्मसंश्रितम् ॥ २६ ।
शृणु तत्त्वेन मे देवि येनेमौ मम च प्रियौ ।
तिथीनां द्वादशी चापि सर्व्वयज्ञफलाधिका ॥ २७ ।
त्वया द्विजसहस्रेभ्यो यत्फलं प्राप्नुयान्नरः ।
तदेकं संप्रदायैव द्वादश्यामभिविन्दति ॥ २८ ।
कौमुद्याञ्च प्रबुद्धोऽस्मि वैशाख्यां च समुद्धृतः ।
महानाधिह्वरो योगस्तेनैतत्प्रभवो धरे ॥ २९ ।
अतः कौमुदिकायान्तु वैशाख्यां यतमानसः ।
गन्धपत्रं करे गृह्य इमं मन्त्रमुदीरयेत् ॥ ३० ।

मन्त्रः—भगवन्नाज्ञापय ।

इमं बहुतरं नित्यं वैशाखञ्चैव कार्त्तिकम् ।

---

* मार्गशिरसीति साधु ।

† कारयेदिति (ग) ।

गृहाण गन्धपत्राणि धर्म्ममेवं प्रवर्द्धय ।
नमो नारायणेत्युक्त्वा गन्धपत्रं प्रदापयेत्* ॥ २१ ।
पुष्पाणाञ्च प्रवक्ष्यामि यो गुणो यच्च वै फलम् ।
दत्त्वा वै गन्धपत्राणि पुष्पहस्तः शुचिर्नरः† ।
ओं नमो वासुदेवायेत्युक्त्वा मन्त्रमुदीरयेत्‡ ॥ २२ ।
मन्त्रः—भगवन्नाज्ञापय सुमनांसीमानि अर्च्चयितुं मां सुमनसङ्कुरु गृह्णीष्व सुमनस्कं देव सुगन्धेन ते नमः§ ।
प्राप्नोति ददमानस्तु¶ मम कर्म्मपरायणः ।
न जन्म मरणञ्चैव न ग्लानिं न च वै क्षुधाम् ।
दिव्यं वर्षसहस्रं वै मम लोकेषु तिष्ठति ॥ २३ ।
एकैकस्य तु पुष्पस्य पुण्यमेतन्महाफलम् ।
सुमनोगन्धसम्भूतं यत्त्वया पूर्व्वंपृच्छितम्‖ ॥ २४ ।

इति वराहपुराणे सुमनोगन्धादिमाहात्म्यं नाम
त्रयोविंशत्यधिकशततमोऽध्यायः ।

---

* (ग) पुस्तके २४—२१ श्लोका न सन्ति ।

† मम भक्तेषु सुन्दरीति (ग) ।

‡ क्रिमिकं सुमनो गृह्य इमं मन्त्रमुदीरयेदिति (ग) ।

§ भगवन्नाज्ञापय यतिसुमनो भगवन्नर्चाविशुद्धात्मा विनिश्चिताः गृह्णीष्व सुमनस्तेन देवदेवसुगन्धकाः इति (ग) ।

¶ ददान इति साधु ।

‖ परिपृच्छितमिति (ग) । पृष्टमिति साधु ।

चतुर्विंशत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

फाल्गुनस्य तु मासस्य शुक्लपक्षस्य द्वादशीम् ।
गृह्य वासन्तिकान्पुष्पान् सुगन्धा ये क्रमागताः ॥ १ ।
श्वेतं पाण्डुरकञ्चैव सुगन्धं शोभनस्त्वह ।
विधिना मन्त्रयुक्तेन सुप्रीतेनान्तरात्मना ॥ २ ।
तत एवं विधिं कृत्वा सर्व्वं भागवतः शुचिः ।
यस्तु जानाति कर्म्माणि सर्व्वमन्त्रविनिश्चितः ।
तदाहरति कर्म्माणि विधिदृष्टेन कर्म्मणा ॥ ३ ।
विधिना मन्त्रपूतेन कुर्य्याच्छान्तमनोमलः ।
नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ ४ ।
मन्त्रः—ओँ नमोऽस्तु देवदेवेश शङ्खचक्रगदाधर ।
नमोऽस्तु ते लोकनाथ प्रवीराय नमोऽस्तु ते ॥ ५ ।
संपुष्पितस्येह वसन्तकाले
वनस्पतेर्गन्धरसप्रयुक्ताः ।
पश्यंश्च मां पुष्पितपादपेन्द्रं*
वसन्तकाले समुपागते च ॥ ६ ।
यश्चैतेन विधानेन कुर्य्यान्मासे तु फाल्गुने ।
न स गच्छति संसारं मम लोकाय गच्छति ॥ ७ ।

---

* पश्येदिदं पुष्पितपादपेन्द्रमिति (ग) ।

यत्तु पृच्छसि सुश्रोणि मासे वैशाख उत्तमे।
शुक्लपक्षे तु द्वादश्यां यत्फलं तच्छृणुष्व मे॥ ८।
पुष्पितेषु च शालेषु तथान्येषु* द्रुमेषु च।
गृहीत्वा शालपुष्पाणि† मम कर्म्मणि संस्थिताः॥ ९।
कृत्वा तु मम कर्म्माणि शुभानि तरुणानि च।
पूज्य‡ भागवतान्सर्व्वान् स्थापयित्वा ततोऽग्रतः॥ १०।
ऋषयस्तुवन्ति§ मन्त्रेण वेदोक्तेन च माधवि।
गन्धर्व्वाप्सरसश्चैव गीतनृत्यैः सवादितैः॥ ११।
स्तुवन्ति देवलोकाश्च पुराणं पुरुषोत्तमम्।
सिद्धविद्याधरा यक्षाः पिशाचोरगराक्षसाः॥ १२।
स्तुवन्ति देवं भूतानां सर्व्वलोकस्य चेश्वरम्।
आदित्यवसवो रुद्रा अश्विनौ च मरुद्गणाः॥ १३।
स्तुवन्ति देवदेवेशं युगानां संक्षयेऽक्षयम्।
ततो वायुश्च विश्वे च अश्विनौ च समन्विताः॥ १४।
स्तुवन्ति केशवं देवमादिकालमयं प्रभुम्।
ततो ब्रह्मा च सोमश्च शक्रश्चाग्निसमन्वितः।
स्तुवन्ति नाथं भूतानां सर्व्वलोकमहेश्वरम्॥ १५।
नारदः पर्व्वतश्चैव असितो देवलस्तथा।

---

* कालेष्विति (ग)।

† वाणपुष्पाणीति (ग)।

‡ पूजयित्वेति साधु।

§ ऋषिः स्तुवन्तीति तत्रैकवचनमार्षं, ऋषय इत्यत्र चैकाक्षरमधिकम्।

पुलहश्च पुलस्त्यश्च भृगुश्चाङ्गिर एवच ॥ १६ ।
एते चान्ये च बहवो मितावसुपरावसू ।
स्तुवन्ति नाथं भूतानां योगिनां योगमुत्तमम् ॥ १७ ।
श्रुत्वा तु प्रतिनिर्घोषं देवानान्तु महौजसाम् ।
ततोनारायणोदेवः प्रत्युवाच वसुन्धराम् ॥ १८ ।
किमयं श्रूयते शब्दो ब्रह्मघोषेण संयुतः* ।
देवानाञ्च† महाभागे महाशब्दोऽत्र श्रूयते ॥ १९ ।
ततः कमलपत्राक्षी सर्व्वरूपगुणान्विता ।
वराहरूपिणं देवं प्रत्युवाच वसुन्धरा ॥ २० ।
देवा काङ्क्षन्ति ते देव वाराहीं रूपसंस्थितिम् ।
त्वन्नियोगनियुक्ताश्च तदर्थं लोकभावन ॥ २१ ।
ततोनारायणोदेवः पृथिवीं प्रत्युवाच ह ।
अहं जानामि तान्देवि मार्गमाणानुपस्थितान् ॥ २२ ।
दिव्यं वर्षसहस्रं वै धारितासि वसुन्धरे ।
मया लीलायमानेन एकदंष्ट्राग्रकेण‡ वै ॥ २३ ।
इहागच्छामि भद्रन्ते द्रष्टुकामा दिवौकसः ।
आदित्या वसवो रुद्राः स्कन्देन्द्रः सपितामहाः ॥ २४ ।
एवं तस्य वचः श्रुत्वा माधवस्य वसुन्धरा ।

---

* घोदित इति (ग) ।

† देवतानामिति (ग) ।

‡ क्रमेणेति (ग) ।

शिरस्यञ्जलिमाधाय ततस्तु चरणेऽपतत्*।
वाराहं पुरुषं देवं विज्ञाप्यति† वसुन्धरा ॥ २५ ।
उद्धृतास्मि त्वया देव रसातलगता ह्यहम्।
शरणन्त्वां प्रपन्नाहं त्वद्भक्ता त्वं गतिः प्रभुः‡ ॥ २६ ।
किङ्कर्म्मं कर्म्मणा केन किं वा जन्मपरायणम्।
कथं वा तुष्यसे देव पूज्यसे केन कर्म्मणा§ ॥ २७ ।
तवाहं कर्त्तुमिच्छामि यच्च मुख्यं¶ सुखावहम्।
न च मेऽस्ति व्यथा काचित्तव कर्म्मणि नित्यशः ॥ २८ ।
न ग्लानिर्न जरा काचिन्न जन्ममरणे तथा।
सर्व्वे सुरासुरा लोकाः सरुद्रेन्द्रपितामहाः।
क्वेष्टं‖ निवासं कुर्व्वन्ति एकैकञ्च यशोधर** ॥ २९ ।
कानि कर्माणि कुर्व्वन्ति ये त्वां पश्यन्ति माधव।
किमाहाराः किमाचारास्त्वां पश्यन्तीह माधव ॥ ३० ।
ब्राह्मणस्य च किं कर्म्म क्षत्रियस्य च किं भवेत्।
वैश्यः किं कुरुते कर्म्म शूद्रः किं कर्म्म कारयेत् ॥ ३१ ।

---

* शिरसा चाञ्जलिं कृत्वा ततस्तच्चरणेऽपतदिति (ग)।

† विज्ञापयतीति (क), (ख), साधुत्वेऽप्यस्य छन्दोदोषः।

‡ शरणं त्वामवाप्ता वै तद्भक्ता स्याङ्गतिः प्रभुरिति (ग)।

§ पूज्यः केनासि कर्म्मणेति (ग)।

¶ तदहं कारयिष्यामि कर्म्म स्वार्त्तमिति (ग)।

‖ क्व ते इति (ख)।

** ते वा कस्य किमात्मका इति (क), (ख)।

योगोवै प्राप्यते केन तपो वा केन निश्चितम् ।
किञ्चात्र फलमाप्नोति तव कर्म्मपरायणः ॥ ३२ ।
किञ्च दुःखनिवासं वा भोजनं पानकं तथा ।
किञ्च कर्म्म प्रयोक्तव्यं तव भक्तैश्च* माधव ।
प्रापणं कीदृशञ्चापि कासु दिक्षु तथा प्रभो† ॥ ३३ ।
कथं योनिं न गच्छेत‡ वियोनिं न च गच्छति ।
तिर्य्यग्योनिं न गच्छेत कर्मणा केन केशव ।
तन्ममाचक्ष्व सकलं येन चैव सुखं भवेत् ॥ ३४ ।
जरा वा केन गच्छेत जन्म वा केन‡ गच्छति ।
गर्भवासं न गच्छेत कर्म्मणा केन वाऽच्युत ।
संसारस्य न गच्छेत केन§ कर्म्मप्रभावतः ॥ ३५ ।
इत्युक्तो भगवांस्तत्र प्रत्युवाच वसुन्धराम् ।
शृण्वन्तु मे भागवता ये च मोक्षे व्यवस्थिताः ।
तान्मन्त्रान् कीर्त्तयिष्यामि यैस्तोषयामि नित्यशः ॥ ३६ ।

मन्त्रः—मासेषु सर्व्वेषु च मुख्यभूत¶
त्वं माधवो माधवमास एव ।

---

* भक्तैश्चेति (ग) ।

† दिशासु विदिशासु चेति (ग) ।

‡ गच्छेदिति साधु । एवं परत्रापि ।

§ जन्म केन चेति (ग) ।

¶ कस्य कर्म्मप्रभावतः इति (ग) । उभयत्राप्यार्षम् ।

‖ मास इति (ग) ।

पश्येद्देवन्तनु वसन्तकाले
उपागतङ्गन्धरसप्रयुक्त्या ।
नित्यञ्च यज्ञेषु तथेज्यते यो
नारायणः सप्तलोकेषु वीरः ॥ ३७ ।
एवं ग्रीष्मे विधिञ्चैव कुर्य्यात्सर्व्वं समोक्षितः* ।
इममुच्चारयेन्मन्त्रं सर्व्वभागवतप्रियम् ॥ ३८ ।
मासेषु सर्व्वेष्वपि मुख्यभूतो
मासोभवान् ग्रीष्म एकः प्रपन्नः ।
पश्येत† भवन्तं वर्त्तमानं ग्रीष्मे‡
तेनैव सर्व्वं दुःखमेतु प्रशान्तिम्§ ॥ ३९ ।
एवं ग्रीष्मे वरारोहे¶ मम चैवार्च्चनं कुरु ।
न जन्म मरणं येन‖ मम लोके गतिर्भवेत् ॥ ४० ।
यावन्तः पुष्पिताः शालाः पृथ्व्या यावत्सुगन्धकाः ।
अर्च्चितः स भवेत्सर्व्वैः कृतो येन ह्ययं विधिः ॥ ४१ ।

---

* विधानत इति (ग)।

† पश्येदिति साधु ।

‡ त्वनुग्रीष्मकाले इति (ग)।

§ उपागतं गन्धरसप्रयुक्त्येति (ग)। तथातः परं—

नित्यञ्च यज्ञेषु तथेज्यमानोनारायणः सर्व्वलोकेषु वीरः।

इति चरणद्वयमधिकं वर्त्तते ।

¶ एतेनैव विधानेनेति (ग)।

‖ तस्येति (ग)।

एवं वर्षास्वपि धरे* मम कर्म्म च कारयेत् ।
निष्फला भवते† बुद्धिः संसारे च न जायते ॥ ४२ ।
अन्यच्च ते प्रवच्यामि कर्म्म संसारमोचणम् ।
कदम्बमुकुलाश्चैव‡ सरलार्ज्जुनपादपाः§ ।
एतेषां सुमनोभिश्च पूजनीयो महादरात्¶ ॥ ४३ ।
मम संस्थापनङ्कृत्वा विधिदृष्टेन कर्म्मणा‖ ।
नमो नारायणायेति इमं मन्त्रमुदाहरेत् ॥ ४४ ।

पश्यन्ति ये ध्यानपरा घनाभं
त्वामाश्रिताः** पूज्यमानं महिम्ना ।
निद्रां भवान् भजतां†† लोकनाथ
वर्षास्विमं पश्यतु मेघवर्णम्‡‡ ॥ ४५ ।

आषाढ़मासि द्वादश्यां सर्व्वशान्तिकरं शुभम् ।
य एतेन विधानेन मम कर्म्म तु कारयेत् ।

---

* एवं माधवमासे चेति (ग) ।

† भवतीति साधु ।

‡ कुटजाश्चैवेति (ग) ।

§ भल्लकार्ज्जुनकास्तथेति (ग) ।

¶ एभिरेवार्च्चनं कुर्य्याद्विधिदृष्टेन कर्म्मणेति (ग) ।

‖ ततः संस्थापनं कुर्य्यान्मम मन्त्रपरायण इति (ग) ।

** पश्यन्ति मेघ्या अपि मेघवर्णं त्वामागतेति (ग) ।

†† गृह्ण तु इति (ग) ।

‡‡ मेघप्रचानिति (ग) ।

स मर्त्यो न प्रणश्येत* संसारेऽस्मिन्युगे युगे ॥ ४६ ।
एतत्ते कथितं देवि ऋतूनां कर्म्म चोत्तमम् ।
तरन्ति येन संसारं नराः कर्म्मपरायणाः ॥ ४७ ।
एतद्गुह्यं महाभागे देवाः केऽपि न जानते ।
मुक्ता नारायणन्देवं वराहं रूपमास्थितम् ॥ ४८ ।
नादीक्षिताय दातव्यं मूर्खाय पिशुनाय च ।
कुशिष्याय न दातव्यं ये च शास्त्रार्थदूषकाः ॥ ४९ ।
न पठेद्गोघ्नमध्ये वै न पठेच्छठमध्यतः† ।
धनधर्म्मक्षयस्तेषां पठनादाशु जायते ।
पठेद्भागवतां‡ मध्ये ये च धर्म्मेण दीक्षिताः ॥ ५० ।
एतत्ते कथितं भद्रे पूर्व्वं यत्पृष्टवानसि§ ।
कार्त्स्न्येन कथितं ह्येतत्किमन्यत्परिपृच्छसि ॥ ५१ ।

इति वराहपुराणे भगवच्छास्त्रे ऋतूपकरणं नाम
चतुर्विंशत्यधिकशततमोऽध्यायः ।

---

* प्रणश्येदिति साधु ।
† मध्यग इति (ग) ।
‡ भागवतानामिति साधु ।
§ एतेन कर्म्मणा भद्रे यत्त्वया परिपृच्छितमिति (ग) ।

पञ्चविंशत्यधिकशततमोऽध्यायः ।

सूत उवाच ।

श्रुत्वा षडृतुकर्म्माणि पृथिवी शंसितव्रता ।
ततो नारायणं भूयः प्रत्युवाच वसुन्धरा ॥ १ ।
मङ्गल्याश्च पवित्राश्च ये त्वया समुदाहृताः ।
मम लोकेषु विख्याता मनः प्रह्लादयन्ति ते ॥ २ ।
श्रुत्वा त्वेतानि कर्म्माणि त्वन्मुखोक्तानि माधव ।
जातास्मि निर्म्मला देव शशाङ्क इव शारदः ॥ ३ ।
एतन्मे परमं गुह्यं परं कौतूहलं तथा ।
मम चैव हितार्थाय त्वं विष्णो वक्तुमर्हसि ॥ ४ ।
यामेनां भाषसे देव मम मायेति नित्यशः ।
का माया कीदृशी विष्णो किं वा मायेति चोच्यते ।
ज्ञातुमिच्छामि मायार्थं रहस्यं परमुत्तमम् ॥ ५ ।
ततस्तस्या वचः श्रुत्वा विष्णुर्मायाकरण्डकः ।
प्रत्युवाच तदा वाक्यं प्रहस्य तु वसुन्धराम्* ॥ ६ ।
भूमे मा पृच्छ मायां मे यन्मां पृच्छसि सादरम्† ।
वृथा क्लेशं किमर्थं त्वं प्राप्स्यसे यद्विलोकनात्‡ ॥ ७ ।

---

* प्रहस्य मधुरं वाचं प्रत्युवाच वसुन्धरामिति (ग) ।

† इयं का भूमि ते माया यन्मां त्वं परिपृच्छसीति (ग) ।

‡ किञ्च मां क्लिश्यते भूमिर्न मायां ज्ञातुमर्हसीति (ग) ।

अद्यापि मां न जानन्ति रुद्रेन्द्राः सपितामहाः ।
मम मायां विशालाक्षि किं पुनस्त्वं वसुन्धरे ॥ ८ ।
पर्ज्जन्यो वर्षते* यत्र तज्जलेन प्रपूर्य्यते† ।
देशोनिर्जलतां याति एषा माया मम प्रिये ॥ ९ ।
सोमो यत्क्षीयते पक्षे पक्षे वापि च वर्द्धते ।
अमायां न स दृश्येत मायेयं मम तत्त्वतः‡ ॥ १० ।
हेमन्ते सलिलं कूपे उष्णं भवति सुन्दरि§ ।
भवेच्च शीतलं ग्रीष्मे मायेयं मम तत्त्वतः ॥ ११ ।
पश्चिमां दिशमास्थाय यदस्तं याति भास्करः ।
उदेति पूर्व्वतः प्रातर्मायेयं मम सुन्दरि ॥ १२ ।
शोणितञ्चैव शुक्रञ्च उभे ते प्राणिसंस्थिते ।
गर्भे च जायते जन्तुर्मायेयं मम सुन्दरि¶ ॥ १३ ।
जीवं प्रविश्य गर्भन्तु सुखदुःखे च विन्दति ।
जातश्च विस्मरेत्सर्व्वमेषा माया ममोत्तमा ॥ १४ ।
आत्मकर्म्माश्रितो जीवो नष्टसंज्ञो गतस्पृहः ।
कर्म्मणा नीयतेऽन्यत्र मायैषा मम चोत्तमा ॥ १५ ।

---

* वर्षतीति साधु ।

† प्रपूरयेदिति (ग) ।

‡ सुन्दरीति (ग) ।

§ तत्त्वत इति (ग) ।

¶ मम मायेत्यनुत्तमा इति (ग) ।

शुक्रशोणितसंयोगाज्जायते मम जन्तवः ।
अङ्गुल्यश्चरणौ चैव भुजौ शीर्षं कटिस्तथा ॥ १६ ।
पृष्ठं तथोदरञ्चैव दन्तौष्ठपुटनासिकाः* ।
कर्णौ नेत्रे कपालौ च ललाटं जिह्वया सह ॥ १७ ।
एतया मायया युक्ता जायन्ते यदि जन्तवः ।
तस्यैव जीर्य्यते भुक्तमग्निना पीतमेव च ।
अधश्च स्रवते जन्तुरेषा माया ममोत्तमा ॥ १८ ।
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः ।
अन्नात्प्रवर्त्तते जन्तुरेषा माया मम प्रिया ॥ १९ ।
सर्व्वर्तुषु निजाकारः स्थावरे जङ्गमे तथा ।
तत्त्वं न ज्ञायते तस्य मायैषा मम सुन्दरि ॥ २० ।
आपो दिव्यास्तथा भौमा आपो येषु प्रतिष्ठिताः ।
नद्यो वृद्धिं† प्रयान्त्यत्र मायैषा मम सुन्दरि‡ ॥ २१ ।
वृष्टौ बहूदकाः सर्व्वे§ पल्वलानि सरांसि च ।
ग्रीष्मे सर्व्वाणि शुष्यन्ति एतन्मायाबलं मम ॥ २२ ।
हिमवच्छिखरान्मुक्ता नाम्ना मन्दाकिनी नदी ।
गां गता सा भवेद्गङ्गा मायैषा मम कीर्त्तिता ॥ २३ ।

---

* नासिकमिति क्लीवैकत्वं साधु ।

† न च वृद्धिमिति (ग) ।

‡ मायैषा परमा ममेति (ग) ।

§ अत्र पुंस्त्वमार्षम् ।

मेघा वहन्ति* सलिलमुद्धृत्य लवणार्णवात्† ।
वर्षन्ति मधुरं लोके एतन्मायाबलं मम ॥ २४ ।
रोगार्त्ता जन्तवः केचिद्भक्षयन्ति महौषधम् ।
तस्य वीर्य्यं समाश्रित्य मायान्तु विसृजाम्यहम् ॥ २५ ।
औषधे दीयमानेऽपि जन्तुः पञ्चत्वमेति यत् ।
निर्वीर्य्यमौषधङ्कृत्वा कालो भूत्वा हराम्यहम् ॥ २६ ।
प्रथमं जायते गर्भः पश्चादुज्जायते पुमान् ।
जायते मध्यमं रूपं ततोऽपि जरया युतः‡ ।
तत इन्द्रियनाशश्च एतन्मायाबलं मम ॥ २७ ।
यद्भूमौ निहितं वीजं तस्मात्तज्जायतेऽङ्कुरम् ।
पुनश्च पत्रादियुतमेतन्मायाबलं मम ॥ २८ ।
एकवीजात्प्रकीर्णाद्वै जायन्ते तानि भूरिशः ।
तत्रामृतं विसृजामि§ मायायोगेन भूरिशः¶ ॥ २९ ।
लोक एवं विजानाति गरुड़ो वहतेऽच्युतम् ।
भूत्वा वेगेन गरुड़ो वहाम्यात्मानमात्मना ॥ ३० ।
या एता देवताः सर्व्वा यज्ञभागेन तोषिताः ।

---

* वर्षन्तीति (ग) ।

† लवणं सलिलार्णवे इति (ग) ।

‡ मध्यमस्तत्र ततोऽपि जरसा पुनरिति (ग) ।

§ वै सृजामीति (ग) ।

¶ माधवीति (ग) ।

मायामेतामहं कृत्वा तोषयामि दिवौकसः* ॥ २१ ।
लोकाः सर्व्वे विजानन्ति देवा नित्यं मखाशिनः ।
मायामेतामहङ्कृत्वा यक्ष्यामि त्रिदिवौकसः ॥ २२ ।
सर्व्वोऽपि भजते लोको यष्टारञ्च वृहस्पतिम् ।
मायामाङ्गिरसीङ्कृत्वा याजयामि दिवौकसः† ॥ २३ ।
सर्व्वे लोका विजानन्ति वरुणः पाति सागरम् ।
मायान्तु वारुणीङ्कृत्वा रक्षामि च महार्णवम्‡ ॥ २४ ।
सर्व्वे लोका विजानन्ति कुवेरोऽयं धनेश्वरः ।
कुवेरमायामादाय अहं रक्षामि तद्धनम् ॥ २५ ।
एवं लोका विजानन्ति वृत्रः शक्रेण सूदितः ।
शाक्रीमायां समास्थाय मया वृत्रो निषूदितः ॥ २६ ।
एवं लोका विजानन्ति आदित्यश्च ध्रुवो महान् ।
मेरुं मायामयङ्कृत्वा वहाम्यादित्यमेव च ॥ २७ ।
एवमाभाषते लोको जलं वा§ नश्यतेऽखिलम् ।
वड़वामुखमास्थाय पिवामि तदहं जलम् ॥ २८ ।
वायुं मायामयङ्कृत्वा मेघेषु विसृजाम्यहम् ।
यदीदृग्भाषते लोकः कुत्रैतत्तिष्ठते जलम् ॥ २९ ।
देवा अपि न जानन्ति अस्तं कुत्र तिष्ठति ।

---

* पृच्छामि विद्वान् सदेति (ग) ।

† दिवौकसामिति (ग) ।

‡ मोदयामि महीदधिमिति (ग) ।

§ जले किमिति (ग) ।

मम मायानियोगेन तिष्ठति ह्यौषधं वने ॥ ४० ।
लोको ह्येवं विजानाति राजा पालयते प्रजाः ।
राजमायामहङ्कृत्वा पालयामि वसुन्धराम् ॥ ४१ ।
ये तु वै द्वादशादित्या उदेष्यन्ति युगक्षये ।
प्रविश्य तानहं भूमे मायां लोके सृजाम्यहम् ॥ ४२ ।
सूर्य्यस्य चांशुना भूमे* लोकेषु पत्यते सदा ।
मायामंशुमयीङ्कृत्वा पूरयाम्यखिलं जगत् ॥ ४३ ।
वर्षन्ते यत्र संवर्त्ता धारैर्मुशलसन्निभैः ।
मायां सांवर्त्तकीं गृह्य पूरयाम्यखिलं जगत् ॥ ४४ ।
यत्स्वपामि वरारोहे शेषस्योपरि धारिणि ।
अनन्तमायया चाहं धारयामि† स्वपामि च ॥ ४५ ।
वराहमायामादाय भूमे जानासि किं न वै ।
देवा यत्र निलीयन्ते सा माया मम कीर्त्तिता ॥ ४६ ।
त्वञ्चापि वैष्णवीं मायां कृत्वा जानासि किं न तत्‡ ।
धारितासि च सुश्रोणि वारान् सप्तदशैव तु ॥ ४७ ।
माया तु मम देवीयं कृत्वा ह्येकार्णवां महीम् ।
मम मायाबलं ह्येतद्येन तिष्ठाम्यहं जले§ ॥ ४८ ।

---

* भूमि इति (ग)। एवं परत्रापि ।

† तां वहामि स्वपामि चेति (ग)।

‡ कस्माज्जानासि नैव चेति (ग)।

§ स्थलमिति (ग)।

प्रजापतिश्च रुद्रश्च सृजामि च वहामि च* ।
तेऽपि मायां न जानन्ति मम मायाविमोहिताः ॥ ४९ ।
अथो पितृगणाश्चापि य एते सूर्य्यवर्च्चसः† ।
मायां पितृमयीं ह्येतां गृह्णामीति च तत्त्वतः ॥ ५० ।
किन्तु त्वयैव सुश्रोणि अन्यच्च शृणु सुन्दरि ।
ऋषिर्मायानुसारेण स्त्रिया योनिं प्रवेशितः ॥ ५१ ।
ततो विष्णोर्वचः श्रुत्वा श्रोतुकामा वसुन्धरा ।
कराभ्यामञ्जलिङ्कृत्वा वाक्यमेतत्तदब्रवीत् ॥ ५२ ।
किं तेन ऋषिमुख्येन कृतं कर्म्म सुदुष्करम् ।
स्त्रीत्वञ्चैव पुनः प्राप्तं स्त्रीयोनिञ्चैव प्रापितः‡ ॥ ५३ ।
एतन्मे सर्व्वमाख्याहि परं कौतूहलं मम ।
तस्य ब्राह्मणमुख्यस्य स्त्रीत्वे यत्कर्म्म पापकम् ॥ ५४ ।
ततो मह्या वचः श्रुत्वा हृष्टतुष्टमनाः§ हरिः ।
मधुरं वाक्यमादाय प्रत्युवाच वसुन्धराम् ॥ ५५ ।
शृणु तत्त्वेन मे देवि धर्म्माख्याने च सुन्दरि¶ ।
माया मम विशालाक्षि रोहिणी लोमहर्षिणी ॥ ५६ ।

---

* हरामि चेति (ग) ।

† सूर्य्यतेजस इति (ग) ।

‡ प्रजापतिरिति (ग) ।

§ हृष्टपुष्टमना इति (ग) ।

¶ महामते इति (ग) ।

मायाया मम योगेन सोमशर्म्मा च कश्चितः* ।
गतो गतीरनेकाश्च उत्तमाधममध्यमाः ।
ब्राह्मणत्वं पुनः प्राप्तो मम मायाप्रणोदितः ॥ ५७ ।
यथा ब्राह्मणमुख्येन प्राप्ता स्त्रीयोनिरेव च† ।
न तस्य विकृतं कर्म्म अपराधो न विद्यते ॥ ५८ ।
ममैवाराधनपरो मम कर्म्मपरायणः ।
नित्यं चिन्तयते भूमि मम मूर्त्तिं मनोरमाम् ॥ ५९ ।
अथ दीर्घेन कालेन तस्य तुष्टोऽस्मि सुन्दरि ।
तपसा कर्म्मणा भक्त्या अनन्यमनसा स्तुतः ॥ ६० ।
ततस्तस्य मया देवि दत्त्वा दर्शनमुत्तमम् ।
वरेण छन्दितो विप्रस्तूपस्तुष्टोऽस्मि‡ ते द्विज ॥ ६१ ।
वरं वरय भद्रन्ते तव यद्धृदि वर्त्तते ।
रत्नानि काञ्चनं गावस्तथा राज्यमकण्टकम् ॥ ६२ ।
अथवेच्छसि तं स्वर्गं यत्र सौख्यं वराङ्गनाः§ ।
धनरत्नं समृद्धं हि हेमभाण्डविभूषितम् ॥ ६३ ।
यत्र सर्व्वा दिव्यरूपा भवन्त्यप्सरसः पराः ।

---

* क्लेशित इति (ग) ।

† स्त्रियायोनिश्च प्रापिता इति (ग)।

‡ साधुतुष्टोऽस्मीति (ग) ।

§ स्वर्गं वा यत्र ते चाप्सरोगणाः इति (ग)।

ददामि ते वरं विप्र यावत्ते चित्तचिन्तितम्* ॥ ६४ ।
ततो मम वचः श्रुत्वा स च ब्राह्मणपुङ्गवः ।
शिरसा पतितोभूमौ मामुवाच प्रियं वचः† ॥ ६५ ।
अथ नो कुप्यसे देव वरं समनुयाचते ।
यत्त्वया भाषितन्देव मम देयं यदृच्छया ॥ ६६ ।
न चाहं काञ्चनं गावो न च स्त्रीराज्यमेव च ।
स्वर्गं वाप्सरसो वापि‡ ऐश्वर्य्यं न मनोहरम् ॥ ६७ ।
तथा स्वर्गसहस्राणामेकञ्चापि न रोचते ।
ज्ञातुमिच्छामि ते मायां यया क्रीड़सि माधव ॥ ६८ ।
ततस्तस्य वचः श्रुत्वा स मया तत्र भाषितः ।
किं मायया ते विप्रेन्द्र अकार्य्यं पृच्छसे द्विज ।
देवा अपि न जानन्ति विष्णुमायाविमोहिताः ॥ ६९ ।
ततो मम वचः श्रुत्वा स च ब्राह्मणपुङ्गवः ।
उवाच मधुरं वाक्यं मायया च प्रणोदितः ॥ ७० ।

---

* अथ चेच्छसि विप्रेन्द्र ऋषीणां चोत्तम ऋषिः ।
भविता भारतश्चैव मम धर्म्मपरायणः ।
अथ चेच्छसि कन्यानां सहस्रं दिव्यमुत्तमम् ॥
धनरत्नसमृद्धानां हेमभाण्डविभूषितम् ।
सर्व्वासां दिव्यरूपाणां भवन्त्यप्सरसोगणाः ।
ददामि ते वरञ्चैव विप्र यत्ते चित्तचिन्तितमिति (ग) ।

† मुन्यानुवाच मधुरां गिरमिति (ग) ।

‡ नाप्सरोनैव च स्वर्गमिति (ग) ।

यदि तुष्टोऽसि मे देव कर्म्मणा तपसाऽथवा ।
तव देव प्रसादेन ममैवं दीयतां वरम् ॥ ७१ ।
ततस्तु स मया प्रोक्तस्तपस्वी ब्राह्मणस्तथा ।
गच्छ कुब्जाम्रके गङ्गास्नातो मायान्तु गच्छसि ॥ ७२ ।
ममैवं वचनं श्रुत्वा कृत्वा चैव प्रदक्षिणम् ।
कुब्जाम्रके देवि विप्रो मम मायाभिलाषुकः* ॥ ७३ ।
ततः कुण्डी त्रिदण्डी च मात्राभाण्डञ्च यत्नतः ।
स्थापयित्वा यथान्यायं तीर्थमाराधयद्यथा† ॥ ७४ ।
ततो ह्यवतरद्गङ्गां विधिदृष्टेन‡ कर्म्मणा ।
अवगाह्य ततो गङ्गां सर्व्वगात्रे च क्लेदिते§ ।
तावन्निषादसदने तत्स्त्रीगर्भे गतोऽभवत्¶ ॥ ७५ ।
हृदयेऽचिन्तयत्तत्र गर्भक्लेशेन पीड़ितः ।
अहो कष्टं मया किंस्वित्कर्म्म‖ वा दुष्कृतं कृतम् ।
योऽहं निषादगर्भेऽस्मिन्वसामि नरकेषु च ॥ ७६ ।
धिक्तपो धिक् च मे कर्म्म धिक् फलं धिक् च जीवितम् ।

---

* मायाभिकाङ्क्षयेति (ग) ।

† तीर्थान्याराधयद्यथेति (ग) ।

‡ विधिश्रेष्ठेनेति (क), (ख) ।

§ सर्व्वगात्राणि क्लेदिता इति (ग) ।

¶ निषादस्य गृहे गर्भस्तिष्ठते स च ब्राह्मण इति (ग) ।

‖ किञ्चिदिति (ग) ।

योऽहं निषादगर्भेऽस्मिन्पीड़ामि मलसङ्कुले* ॥ ७७ ।
अस्थ्नां त्रिशतसङ्कीर्णे† नवद्वाराभिसंवृते ।
पुरीषमूत्रसङ्कीर्णे मांसशोणितकर्दमे ॥ ७८ ।
दुर्गन्धे दुःसहे चैव वातिकश्लेषपैत्तिके ।
बहुरोगसमाकीर्णे बहुदुःखसमाकुले ।
अलं किं तेन चोक्तेन दुःखान्यनुभवामि च ॥ ७९ ।
कुतो विष्णुः कुतो वाहं कुतो गङ्गाजलानि च ।
गर्भसंसारनिष्क्रान्तः पश्चादाचरामि तां क्रियाम् ॥ ८० ।
एवं चिन्तयमानस्तु शीघ्रं गर्भाद्विनिःसृतः ।
भूम्यान्तु पततस्तस्य नष्टं यत्पूर्वचिन्तितम्‡ ॥ ८१ ।
अजायत§ ततः कन्या निषादस्य गृहे तदा ।
धनधान्यसमृद्धस्य वर्त्तते स च ब्राह्मणः ॥ ८२ ।
न च संज्ञायते किञ्चिद्विष्णु¶मायाप्रमोहिता ।
अथ दीर्घस्य कालस्य कृतोद्वाहा यशस्विनी ।
पुत्रान् दुहितरश्चैव जनयामास मायया ॥ ८३ ।
भक्ष्याभक्ष्यञ्च खादेत पेयापेयञ्च तत्पिवेत् ।

---

* घनसङ्कुले इति (ग) ।

† त्रिभिश्चाद्विशतैः पूर्णे इति (ग), तत्राऽतः परं षट् पादा न सन्ति ।

‡ नष्टं तद्धि विचिन्तितमिति (ग) ।

§ प्रजाता चेति (ग) ।

¶ विष्णोरिति (ग) ।

जीवानि* चैव सततं घातितानि ततस्ततः॥ ८४।
कार्य्याकार्य्यं न जानीते वाच्यावाच्यन्तथेति च।
गम्यागम्यं न जानाति मायाजालेन मोहितः† ॥ ८५।
पञ्चाशद्दर्षके काले मयाख्यातः स ब्राह्मणः।
घटं गृहीत्वा विङ्लिप्तवस्त्रक्षालनकारणात्॥ ८६।
तीरे निक्षिप्य वस्त्रं स घटञ्च विनिधाय हि।
स्नातुं गङ्गाजले स्थित्वा विगाहयति जाह्नवीम्॥ ८७।
प्रस्वेदघर्म्मसन्तप्तः स शिरःस्नानमीहते‡।
जातस्तपोधनस्तत्र दण्डी कुण्डीधरः पुनः॥ ८८।
यत्र§ पश्यति विप्रोऽसौ मात्रां कुण्डीन्त्रिदण्डकम्।
वस्त्रादि दर्शितञ्चैव यत्र संस्थापितं पुरा॥ ८९।
तत्तेन सर्व्वं सन्दृष्टं जाते ज्ञाने तु पूर्व्ववत्¶।
विप्रेण ज्ञातुकामेन विष्णुमायां यथा पुरा‖ ॥ ९०।
तत उत्तरतस्तत्र गङ्गायान्तु तपोधनः।
सव्रीड़ो गृह्णते** वासो योगञ्च परिचिन्तयन्॥ ९१।

---

* क्लीवत्वमार्षम्।

† मायया मम मोहित इति (ख)। आत्मविक्रयमेव चेति क्वचित्।

‡ सशिरस्नायमीहते इति (ग)।

§ तत इति (ग)।

¶ एतदर्द्धं (ग) पुस्तके नास्ति।

‖ जातज्ञानेन विष्णुमायाभिकाङ्क्षिणेति (ग)।

** गृह्णातीति साधु।

उपविश्य च* गङ्गायाः पुलिने समवालुके ।
ततो विन्दति चात्मानं तपसा यत्तदा कृतम्† ॥ ८२ ।
मया किं कर्म्म पापेन कृतं निन्द्यं सुदुष्करम् ।
एवं निन्दति चात्मानं धिक्कुर्व्वन् साधुदूषितम्‡ ।
आचारो वा परिभ्रष्टो येनाहं प्रापितस्त्विमाम् ॥ ८३ ।
निषादस्य कुले जातो भक्ष्याभक्ष्याश्च भक्षिताः§ ।
जीवाश्च घातिताः सर्व्वे जलस्थलदिवौकसः¶ ॥ ८४ ।
पेयापेयञ्च मे पीतं विक्रीताश्चाप्यविक्रयाः ।
अगम्यागमनञ्चैव वाच्यावाच्यं न रक्षितम् ॥ ८५ ।
वेश्मन्यभोज्यभोज्यञ्च भुक्तञ्चैव न संशयः ।
पुत्रा दुहितरश्चैव निषादाज्जनिता मया ॥ ८६ ।
ततः किञ्चापराधं वा केन वा तद्विचिन्तये ।
येनाहं प्रापितो ह्येनां नैषादीमीदृशीं दशाम् ॥ ८७ ।
एतस्मिन्नन्तरे भूमे निषादः क्रोधमूर्च्छितः ।
पुत्रैः परिवृतस्तत्र मायातीर्थमुपागतः ॥ ८८ ।
ततो मृगयते भार्य्यां भक्तियुक्तां शुभेक्षणाम्‖ ।

---

* उपविश्याचेति (ग) ।

† तद्विगर्हितमिति (ग) ।

‡ एतदर्द्धं (ग) पुस्तके नास्ति ।

§ भक्ष्याभक्ष्यञ्च भक्षितमिति (ग) ।

¶ जलजाः स्थलजाश्च ये इति (ग) ।

‖ भक्तिमान् शुभलक्षणामिति (ग) ।

परिपृच्छति चैकैकं तप्यमानं तपोधनम्* ॥ ९९ ।
किं नु पश्यथ भार्य्यां मे गङ्गातीरमुपागता ।
घटमादाय हस्तेन आगता जलकारणात् ॥ १०० ।
तत्रैव च नराः सर्व्वे मायातीर्थमुपागताः ।
पश्यन्तेऽत्र परिव्राजं कुम्भञ्चैव यथास्थितम् ॥ १०१ ।
ततो दुःखेन सन्तप्तः अपश्यंश्च स्वकां प्रियाम् ।
दृष्ट्वा पटञ्च कुम्भञ्च करुणं पर्य्यवेदयत् ॥ १०२ ।
इदं वासश्च कुम्भञ्च नदीकूले च तिष्ठति ।
न चापि दृश्यते भार्य्या मम गङ्गामुपागता ॥ १०३ ।
अथ केनापि ग्राहेण स्नायमाना तपस्विनी ।
गृहीता तोयमध्यन्तु जिह्मालोडेन चाबला ॥ १०४ ।
न चाप्रियं मयाऽप्युक्ता कदाचिदपि वाचकम् ।
स्वप्नेऽपि नोक्तपूर्व्वासि कदाचिदपि चाप्रियम् ॥ १०५ ।
अथवापि पिशाचेन भक्षिता भूतराक्षसैः ।
आकृष्टा किं नु रोगेण गङ्गातीरं समाश्रिता ॥ १०६ ।
किङ्कृतं दुष्कृतं पूर्व्वं मया कर्म्म सुसङ्कटम् ।
येन मत्पुरतो भार्य्याप्यदृष्टा विगतिं गता ॥ १०७ ।
एहि मे सुभगे कान्ते मम चित्तानुवर्त्तिनि ।
पश्यैतान्बालकान् भीतान् क्लिश्यमानानितस्ततः ॥ १०८ ।

---

* अतः परं (ग) पुस्तके—

क्व गतासि प्रियेऽस्माकं त्यक्त्वा पुत्रान् गृहं च माम् ।
बाला दुहिता रोदिति क्षुधार्त्ता स्तनपायिनीति श्लोकोऽधिको वर्त्तते ।

मां पश्यस्व* वरारोहे त्रीन्पुत्रानतिबालकान् ।
दुहितृः पश्य चत्वारि सर्व्वन्तु मम मानदे ॥ १०९ ।
मम पुत्रा रुदन्त्येते बालकास्तव लालसाः ।
नित्यञ्च दारिका रत्न मम दुष्कृतकारिणः ॥ ११० ।
कामं मां क्षुधितञ्चैव ज्ञास्यसे त्वं पिपासितम् ।
एवमुक्ता च कल्याणि मम भक्त्या व्यवस्थिता ॥ १११ ।
एवं विलपमानस्य निषादस्य इतस्ततः† ।
सव्रीडं‡ भाषते विप्रो निषादं गच्छ नास्ति सा ।
सुखं योगञ्च ते नीत्वा सा गता ह्यनिवृत्तये§ ॥ ११२ ।
तं रुदन्तं तथा दृष्ट्वा कारुण्येन परिप्लुतः ।
निषादं भाषते तत्र गच्छ किं परिक्लिश्यसे¶ ॥ ११३ ।
बालान्तान्परिरक्षस्व आहारैर्विविधैरपि ।
एते न त्यजनीयास्ते कदाचिदपि पुत्रकाः ॥ ११४ ।
परिव्राजवचः श्रुत्वा निषादस्तस्य सन्निधौ ।
उवाच मधुरं वाक्यं दुःखशोकपरिप्लुतः‖ ॥ ११५ ।
अहो मुनिवरश्रेष्ठ अहो धर्म्मभृतां वर** ।

---

* पश्येति साधु । किं मां पश्येति (ग) ।

† यतस्तत इति (ग) ।

‡ सव्रीड़ इति (ग) ।

§ सुखं योगं समाख्यातं पुत्रभार्य्यागतौ हि य इति (ग) ।

¶ परिक्लिश्यसि इति साधु ।

‖ परिप्लुतमिति (ग) ।

** धर्म्मविदां वरेति (ग) ।

	Rs.	As.
Paráśara Smriti (Sans.) Fasc. I—VI @ /6/ each ..	2	4
Srauta Sútra of Apastamba, (Sans.) Fasc. I—XII @ /6/ each ..	4	8
Srauta Sútra of Áśvaláyana, (Sans.) Fasc. I—XI @ /6/ each ..	4	2
Ditto Látyáyana (Sans.) Fasc. I—IX @ /6/ each ..	3	6
Ditto Sánkhyáyana (Sans.) Fasc. I—V @ /6/ each ..	1	14
Sáma Veda Samhitá, (Sans.) Vols I, Fasc. 1—10; II, 1—6; III, 1—7; IV, 1—6; V, 1—8, @ /6/ each Fasc.	13	14
Sáhitya Darpana, (English) Fasc. I—IV @ /6/ each	1	8
Sánkhya Aphorisms of Kapila, (English) Fasc. I and II @ /6/ each	0	12
Súrya Siddhánta, (Sans.) Fasc. IV	0	6
Sarva Darśana Sangraha, (Sans.) Fasc. II	0	6
Sankara Vijaya, (Sans.) Fasc. II and III @ /6/ each	0	12
Sánkhya Pravachana Bháshya, (English preface only) Fasc. III ..	0	6
Sánkhya Sára, (Sans.) Fasc. I	0	6
Suśruta Samhitá, (Eng.) Fasc. I and II @ /12/ each	1	8
Taittiríya Áranya, (Sans.) Fasc. I—XI @ /6/ each	4	2
Ditto Bráhmana, (Sans.) Fasc. I—XXIV @ /6/ each	9	0
Ditto Samhitá, (Sans.) Fasc. I—XXXIV @ /6/ each ..	12	12
Ditto Prátiśákhya, (Sans.) Fasc I—III @/6/ each	1	2
Ditto and Aitareya Upanishads, (Sans.) Fasc. II and III @/6/ each	0	12
Tándya Bráhmana, (Sans.) Fasc. I—XIX @ /6/ each	7	2
Tattva Chintámani, (Sans.) Fasc. I—VIII @ /6/ each	3	0
Uttara Naishadha, (Sans.) Fasc. III—XII @ /6/ each	3	12
Uvás-agadasáo, Fasc. I—IV @ /12/ each	3	0
Varáha Purána, (Sans.) Fasc. I—VI @ /6/ each	2	4
Váyu Purána, (Sans.) Vol. I, Fasc. 1—6; Vol. II, Fasc. 1—6, @ /6/ each Fasc.	4	8
Vishnu Smriti, (Sans.) Fasc. I—II @ /6/ each	0	12
Vivádaratnákara (Sans.) Fasc. I—VII @ /6/ each	2	10
Vrihannáradíya Purána, (Sans.) Fasc. I—IV @ /6/ each	1	8
Yoga Sútra of Patanjali, (Sans. & English) Fasc. I—V @ /14/ each	4	6
The same, bound in cloth	5	2

Arabic and Persian Series.

	Rs.	As.
'Álamgírnámah, with Index, (Text) Fasc. I—XIII @ /6/ each ..	4	14
Áín-i-Akbarí, (Text) Fasc. I—XXII @ 1/ each	22	0
Ditto (English) Vol. I (Fasc. I—VII) 1/12 each	12	4
Akbarnámah, with Index, (Text) Fasc. I—XXXVII @ 1/ each ..	37	0
Bádsháhnámah, with Index, (Text) Fasc. I—XIX @ /6/ each ..	7	2
Beale's Oriental Biographical Dictionary, pp. 291, 4to., thick paper, @ 4/12; thin paper	4	8
Dictionary of Arabic Technical Terms and Appendix, Fasc. I—XXI @ 1/ each	21	0
Farhang-i-Rashídí (Text), Fasc. I—XIV @ 1/ each	14	0
Fihrist-i-Ṭúsí, or, Túsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each	3	0
Futúḥ-ul-Shám Wáqidí, (Text) Fasc. I—IX @ /6/ each ..	3	6
Ditto Ázídí, (Text) Fasc. I—IV @ /6/ each	1	8
Haft Ásmán, History of the Persian Mansawi, (Text) Fasc. I ..	0	12
History of the Caliphs, (English) Fasc. I—VI @ /12/ each ..	4	8
Iqbálnámah-i Jahángírí, (Text) Fasc. I—III @ /6/ each ..	1	2
Isabáh, with Supplement, (Text) 49 Fasc. @ /12/ each	36	12
Maásir-ul-Umara, Vol. I, Fasc. I—VII @ /6/ each	2	10
Maghází of Wáqidí, (Text) Fasc I—V @ /6/ each	1	14
Muntakhab-ul-Tawáríkh, (Text) Fasc. I—XV @ /6/ each ..	5	10
Muntakhab-ul Tawáríkh, (English) Vol. II, Fasc. I—IV @/12/ each	3	0
Muntakhab-ul-Lubáb, (Text) Fasc. I—XIX @ /6/ each	7	2
Mu'ásir-'Álamgírí, (Text), Fasc I—VI @ /6/ each	2	4
Nakhbat ul-Fikr, (Text) Fasc. I	0	6
Nizámí's Khiradnámah-i-Iskandarí, (Text) Fasc. I and II @ /12/ each	1	8
Suyúty's Itqán, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. II—IV, VII—X @ 1/ each	7	0

(*Turn over.*)

Tabaqát-i-Násirí, (Text) Fasc. I—V @ /6/ each 1 14
Ditto (English) Fasc. I—XIV @ /12/ each 10 8
Táríkh-i-Fíróz Sháhi, (Text) Fasc. I—VII @ /6/ each 2 10
Táríkh-i-Baihaqí, (Text) Fasc. I—IX @ /6/ each 3 6
Wís o Rámín, (Text) Fasc. I—V @ /6/ each 1 14
Zafarnámah, Vol. I, Fasc. I—IX ; Vol. II, Fasc. I—V @ /6/ each 5 4

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. VII, IX to XI ; Vols. XIII and XVII, and Vols. XIX and XX @ /10/ each Rs. 80 0
   Ditto Index to Vols. I—XVIII 5 0
2. Proceedings of the Asiatic Society from 1865 to 1865 (incl.)@/4/ per No. ; and from 1870 to date @ /6/ per No.
3. Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1849 (12), 1850 (7), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non Subscribers ; and for 1851 (7), 1857 (6), 1858 (5), 1861 (4) 1864 (5), 1865 (8), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878, (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8) @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers.

N. B. The figures enclosed in brakets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784—1883..3 0
   General Cunningham's Archæological Survey Report for 1863-64 (Extra No. J. A. S. B. 1864) 1 8
   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868) 1 8
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., J. A. S. B., 1875) 3 0
   Sketch of the Turki Language as spoken in Eastern Turkestan, Part II, Vocabulary, by R. B. Shaw (Extra No., J. A. S. B.,1878) 3 0
   A Grammar and Vocabulary of the Northern Balochí Language, by M. L. Dames (Extra No., J. A. S. B., 1880) 3 0
   Introduction to the Maithilí Language of North Bihár, by G. A. Grierson, Part I, Grammar (Extra No., J. A. S. B., 1880) .. 1 8
   Part II, Chrestomathy and Vocabulary (Extra No., J.A.S.B.,1882) 3 0
5. Anis-ul-Musharrihín 3 0
6. Catalogue of Fossil Vertebrata 2 0
7. Catalogue of the Library of the Asiatic Society, Bengal .. 3 8
8. Examination and Analysis of the Mackenzie Manuscripts by the Rev. W. Taylor 2 0
9. Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis .. 1 8
10. Istiláhát-us-Súfíyah, edited by Dr. A. Sprenger, 8vo. .. 1 0
11. Ináyah, a Commentary on the Hidáyah, Vols. II and IV, @16/ each 32 0
12. Jawámi-ul-'ilm ir-riyází, 168 pages with 17 plates, 4to. Part I 2 0
13. Khizánat-ul-'ilm 4 0
14. Mahábhárata, Vols. III and IV, @ 20/ each 40 0
15. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—II, with 5 coloured Plates, 4to. @ 6/ each .. 12 0
16. Puráṇa Sangraha, I (Márkaṇḍeya Puráṇa), Sanskrit .. 1 0
17. Sharaya-ool-Islám 4 0
18. Tibetan Dictionary 10 0
19. Ditto Grammar 8 0
20. Vuttodaya, edited by Lt.-Col. G. E. Fryer 2 0
   Notices of Sanskrit Manuscripts, Fasc. I—XXI @ 1/ each .. 21 0
   Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra .. 5 0

N. B. All cheques, Money Orders &c. must be made payable to the "Treasury Asiatic Society" only.

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 677.

वराहपुराणम् ।

THE VARÁHA PURÁṆA

EDITED BY

PAṆḌIT HṚISHÍKESÁ SÁSTRÍ

Professor, Sanskrit College, Calcutta.

FASCICULUS VII.

CALCUTTA:

PRINTED BY SÁSIBHÚSHAṆA BHAṬṬÁCHÁRYYA, AT THE GIRIŚA-VIDYÁRATNA PRESS,
24, GIRIŚA-VIDYÁRATNA'S LANE, UPPER CIRCULAR ROAD.

AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.

1888.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL

No. 57, PARK STREET, CALCUTTA.

AND OBTAINABLE FROM

THE SOCIETY'S LONDON AGENTS, MESSRS.

TRÜBNER & CO.

57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	
Advaita Brahma Siddhi, Fasc. I	0	
Átharvana Upanishads, (Sanskrit) Fasc. I—V @ /6/ each ..		
Áśvaláyana Gṛihya Sútra, (Sans.) Fasc. II—IV @ /6/ each ..		
Agni Purána, (Sans.) Fasc. I—XIV @ /6/ each		
Aitareya Áraṇyaka of the Rig Veda, (Sans.) Fasc. I—V @ /6/ each		
Anu Bháshyam, Fasc. I		
Aphorisms of Sáṇḍilya, (English) Fasc. I		
Aphorisms of the Vedánta, (Sans.) Fasc. III, V—XIII @ /6/ each .		
Ashṭasáhasriká Prajñápáramitá, Fasc. I—V @ /6/ each ..		
Aśvavaidyaka, (Sans.) Fasc. I—III @ /6/ each		
Brahma Sútras, (English) Fasc. I		
Bhámati, (Sans.) Fasc. I—VIII @ /6/ each		0
Brihad Áraṇyaka Upanishad, (Sans.) Fasc. VI, VII & IX @ /6/ eac[h]		
Ditto (English) Fasc. II—III @ /6/ each ..		8
Brihaddharma Purána, Fasc. I		
Brihat Saṃhitá, (Sans.) Fasc. II—III, V—VII @ /6/ each		8
Chaitanya-Chandrodaya Nátaka, (Sans.) Fasc. II—III @ /6/ each		
Chaturvarga Chintámani, (Sans.) Vols. I, Fasc. 1—11 ; II, 1—25		0
III, 1—XIX @ /6/ each Fasc.		10
Chhándogya Upanishad, (English) Fasc. II	0	6
Daśa Rúpa, (Sans,) Fasc. II—III @ /6/ each	0	12
Gopatha Bráhmana (Sans. & Eng.) Fasc. I and II @ /6/ each ..	0	12
Gobhilíya Gṛihya Sútra, (Sans.) Fasc. I—XII @ /6/ each ..	4	8
Hindú Astronomy, (English) Fasc. I—III @ /6/ each ..	1	2
Institutes of Paráśara	0	6
Kátantra, (Sans.) Fasc. I—VI @ /12/ each	4	8
Kathá Sarit Ságara, (English) Fasc. I—XIV @ /12/ each ..	10	2
Kála Mádhava, (Sans.) Fasc. I—IV, @ /6/ each	1	8
Kauśítaki Bráhmanopanishads, Fasc. II	0	6
Kúrma Puráṇa, (Sans.) Fasc. I—VI @ /6/ each	2	4
Lalita Vistara, (Sans.) Fasc. II—VI @ /6/ each	1	14
Ditto (English) Fasc. I—III @ /12/ each	2	4
Madana Párijáta, (Sans.) Fasc. I—II @ /6/	0	12
Manutíká Sangraha, Fasc. I—II @ /6/ each	0	12
Mímáṃsá Darśana, (Sans.) Fasc. II—XIX @ /6/ each ..	6	12
Márkaṇḍeya Puráṇa, (Sans.) Fasc. IV—VII @ /6/ each	1	8
Nyáyavártikam, Fasc. I	0	6
Nrisiṃha Tápani, (Sans.) Fasc. I—III @ /6/ each	1	2
Nirukta, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—6 ; Vol. III, Fasc. 1—6 ; Vol. IV, I—IV @ /6/ each	8	4
Nárada Pancharátra, (Sans.) Fasc. IV @ /6/ each	0	6
Nárada Smriti (Sans.) Fasc. I & II @ /6/ each	0	12
Nyáya Darśana, (Sans.) Fasc. III @ /6/ each	0.	6
Nítisára, or, The Elements of Polity, By Kámandaki (Sans.) Fasc. II—V	1	8
Pariśishṭaparvan, (Sans.) Fasc. I—IV @ /6/ each	1	8
Pingala Chhandaḥ Sútra, (Sans.) Fasc. II—III @ /6/ each ..	0	12
Prithiráj Rásau, (Hindi) Fasc. I—VI @ /6/ each	2	4
Ditto (English) Fasc. I	0	12
Páli Grammar, (English) Fasc. I and II @ /6/ each	0	12
Prákrita Lakshaṇam, (Sans.) Fasc. I	1	8

(Continued on the third page of cover.)

सान्त्वितोऽस्मि त्वया विप्र वचनैर्मधुराक्षरैः ॥ ११६ ।
निषादस्य वचः श्रुत्वा स मुनिः संशितव्रतः ।
उवाच मधुरं वाक्यं दुःखशोकपरिप्लुतः* ॥ ११७ ।
मारोदीर्वञ्चिम† भद्रन्ते तवाहं सा प्रियाऽभवम्‡ ।
गङ्गातीरं समासाद्य मुनिर्जातोऽस्म्यहं तथा§ ॥ ११८ ।
परिव्राजवचः श्रुत्वा निषादो विगतज्वरः ।
श्लक्ष्णं वचनमादाय प्रत्युवाच द्विजोत्तमम् ॥ ११९ ।
किमिदं भाषसे विप्र अव्यक्तं यत्कदाचन ।
न भाव वा यद्घटितं स्त्रियः पुंस्त्वं सदैव हि ॥ १२० ।
निषादस्य वचः श्रुत्वा ब्राह्मणो दुःखमूर्च्छितः ।
उवाच मधुरं वाक्यं गङ्गातीरे च धीवरम् ॥ १२१ ।
शीघ्रं गच्छ स्वकन्देशमेतान् गृह्य स्वबालकान् ।
सर्व्वेषाञ्च यथासंख्यं स्नेहः कर्त्तव्य एव च ॥ १२२ ।
स तेन चोदितो ह्येवं निषादो नावगच्छति ।
मधुरं स्वरमादाय प्रत्युवाच द्विजोत्तमम्¶ ॥ १२३ ।
किं त्वया दुष्कृतं कर्म्म कृतं पूर्व्वं पुरातनम् ।

---

* एतदर्द्धं (ग) पुस्तके नास्ति ।

† वत्सेति (ग) ।

‡ प्रवरस्त्रिय इति (ग) ।

§ जातोऽस्मि च तत्र स्त्रियेति (ग) ।

¶ स ब्राह्मणमिति (ग) ।

मम यद्भाषसे चैव स्त्रीत्वं प्राप्तोऽसि तत्कथम्* ॥ १२४ ।
केन दोषेण प्राप्तस्त्वं स्त्रीत्वं भूत्वा पुमान्पुनः ।
पुंस्त्वं चैव कथं प्राप्त एतदाचक्ष्व पृच्छतः† ॥ १२५ ।
एवं तस्य वचः श्रुत्वा स ऋषिः संशितव्रतः ।
उवाच मधुरं वाक्यं मायातीर्थजलेचरम् ॥ १२६ ।
निषाद शृणु तत्त्वेन मत्कथाश्च प्रजल्पतः‡ ।
न मया दुष्कृतं किञ्चित्कृतं कुत्रापि तत्त्वतः§ ॥ १२७ ।
एकभक्तं समाचारे अभक्ष्यञ्चैव वर्ज्जितम् ।
स मयाराधितो देवो लोकनाथो जनार्द्दनः ।
कर्म्मभिर्बहुभिश्चैव मयादर्शनकाङ्क्षिणा ॥ १२८ ।
अथ दीर्घेण कालेन मया दृष्टो जनार्द्दनः ।
वरेण छन्दयामास बहुधा मायया ततः¶ ॥ १२९ ।
मया नाभीप्सितस्तस्माद्दीयमानो वरस्ततः‖ ।
मायां मे दर्शय विभो विष्णो प्रणतवत्सल** ॥ १३० ।

---

* अहं तेऽद्य वरस्त्रिय इति (ग) ।

† केन दोषेण प्राप्तस्त्वं स्त्रियत्वं ऋषिपुङ्गव ।
मुनित्वञ्च कथं प्राप्तं एतदाचक्ष्व पृच्छत ॥ इति (ग) ।

‡ यां कथां मम तत्त्वत इति (ग) ।

§ कृतमेव हि केनचिदिति (ग) ।

¶ तदनन्तरमिति (ग) ।

‖ न मया चेप्सितस्तत्र दीयमानो वरस्तदेति (ग) ।

** ईप्सिता च मया तत्र विष्णुमाया महालयेति (ग) ।

ततो मां भाषते विष्णुर्मायां दृष्ट्वा ह्यलं द्विज* ।
मया पुनः पुनश्चोक्तो मम प्रीत्या प्रदर्शय† ॥ १३१ ॥
ततोऽहन्तेन चाप्युक्तस्तर्हि द्रक्ष्यत्यलं भवान् ।
गच्छ कुब्जाम्रके गङ्गां स्नात्वेत्यन्तर्हितोऽभवत्‡ ॥ १३२ ॥
अहं मायाप्रलोभेन गङ्गातीरमुपागतः ।
दण्डं कुण्डीञ्च वस्त्रञ्च तीरं संस्थाप्य यत्नतः ।
ततः स्नानविधानेन निमग्नस्तज्जलेऽमले§ ॥ १३३ ॥
न तत्र किञ्चिज्जानामि किमिदं किं प्रवर्त्तते ।
निषादीगर्भसम्भूतस्तत्र पलत्रभवन्ततः¶ ॥ १३४ ॥
केनचित्कारणेनात्र प्रविष्टो जाह्नवीजले ।
स्नात्वाऽपश्यं पूर्ववच्च तावज्जातो ऋषिस्त्वहम्‖ ॥ १३५ ॥

---

* किन्ते मायेन ब्राह्मण इति (ग)।

† (ग) पुस्तके एतदर्द्धं, परश्लोकपूर्व्वार्द्धञ्च न स्तः।

‡ गच्छ कुब्जाम्रकं श्रेष्ठं स्नानं कुरु च जाह्नवी।
एवं ततोवरश्चोक्ता विष्णुश्चान्तरधीयत॥ इति (ग)।

§ अत्र (ग) पुस्तके पाठभेदो यथा—
स्थापितं दण्डकुण्डि च पात्रं वस्त्रञ्च निःक्षिपेत्।
उचितेनोपचारेण निमज्ज्यात्र सलिलाम्भसीति॥

¶ सर्व्वमेव विजानामि योनिपादग्टहेऽवसमिति (ग)।

‖ लोभमोहार्थकामार्थक्रोधेन च परिप्लुतः।
ततः केनापि कर्म्मेण जलक्रत्यमुपागतः।
निमज्ज्य सलिले चात्र जातोऽस्मि ब्राह्मणोह्यहमिति (ग)।

निषाद पश्य कुण्डीञ्च मालां वस्त्रं यथा पुरा* ।
पश्चाशद्वर्षदेशीयो जातोऽस्मि त्वद्गृहे वसन्† ।
दण्डवस्त्रादि यत्किञ्चिन्न जीर्णं गङ्गया हृतम्‡ ॥ १३६ ॥
एवं तेन ततश्चोक्तो निषादोऽदृश्यतां गतः ।
ये च ते बालकास्तत्र तेषां कश्चिन्न दृश्यते ॥ १३७ ॥
स ततो ब्राह्मणो देवि तपस्तपति निश्चितः ।
ऊर्द्ध्वश्वासोर्द्ध्वबाहुश्च वायुभक्षपरायणः ॥ १३८ ॥
तस्य वै तिष्ठमानस्य अपराह्णन्तु§ जायते ।
ततः प्रमुच्यते तोयं देवि कृत्वा यथोचितम् ॥ १३९ ॥
कर्म्मण्यानि च पुष्पाणि आहृत्य श्रद्धयान्वितः¶ ।
अर्च्चयित्वा यथान्यायं वीरासनमुपागतः ॥ १४० ॥
वृतस्तु ब्राह्मणैर्मुख्यैर्गङ्गास्नानेषु वै द्विजः ।
ऊचुस्ततो द्विजास्तत्र तपस्विनमनिन्दितम् ॥ १४१ ॥
पूर्व्वाह्णे स्थापयित्वात्र मालां कुण्डीं त्रिदण्डकम् ।
इतो गतोऽसि ब्रह्मेन्द्र स्थापयित्वा तु धीवरान् ।
विस्मृतं किं त्वया स्थानं कथं शीघ्रं न चागतः ॥ १४२ ॥
ततो विप्रवचः श्रुत्वा तूष्णीमासीन्मुनिस्तदा ।

---

* सचीवरमिति (ग) ।

† पश्चाशद्वर्षवासोऽपि ततस्तत्र न नश्यतीति (ग) ।

‡ न जीर्णाश्चाम्बराः सर्व्वे जाह्नव्या नैव ते हृता इति (ग) ।

§ अपराह्णश्चेति (ग) ।

¶ अकर्म्मण्येषु पुष्पेषु समार्च्चनरतः सदेति (ग) ।

ब्राह्मणानुगतं स्थानमात्मनात्मानुसंस्थितः ॥ १४३ ।
एतस्मिन्नन्तरे देवि स च ब्राह्मणपुङ्गवः ।
अद्य पञ्चाशद्वर्षाणि अमावस्याद्य चैव हि ॥* १४४ ।
कथमेतावतङ्कालं मामूचुर्ब्राह्मणाश्च किम् ।
पूर्व्वाह्णे स्थापयित्वा त्वं स्वां मातायापराह्णिके ।
कथं कालेऽनुसम्प्राप्तः किमेतदिति भाषते ॥ १४५ ।
एतस्मिन्नन्तरे देवि ब्राह्मणाय ततो मया ।
दर्शयित्वा निजं रूपं तमवोचमिदन्धरे† ॥ १४६ ।
किमिदं भ्रान्तरूपोऽसि किं वा त्वं दृष्टवानसि ।
पश्यामि त्वां व्यग्रमिव सावधानोऽभवं स्वयम् ॥ १४७ ।
एवमुक्तः स तु मया भूमौ कृत्वा शिरः स्वकम् ।
उवाच दुःखितो दीनो निःश्वस्य च मुहुर्मुहुः ॥ १४८ ।
अहो देव द्विजा एते मां वन्दन्ति‡ जगद्गुरो ।
पूर्व्वाह्णे स्थापयित्वा त्वं वस्त्रं दण्डकमण्डलू ।
आगतोऽस्यपराह्णे किं स्थलं विस्मृतवानसि ॥ १४९ ।
अहं व्याधस्य वै भूत्वा भार्य्या च व्याधयोनिजा ।
पञ्चाशद्वर्षपर्य्यन्तं तत्र स्थित्वा ततः किल ॥ १५० ।
तस्माच्चैव त्रयः पुत्रास्तिस्रश्चापि च कन्यकाः ।

---

* अमावस्या नु एष वै इति (ग) ।

† दर्शितं तस्य चात्मानं दिव्यरूपेण वर्च्चसेति (ग) ।

(ग) पुस्तकेऽत्र कति श्लोकाः परित्यक्ताः ।

‡ वन्दन्ते इति साधु ।

जातान्येवमपत्यानि दुष्टकर्मकृतस्तथा ॥ १५१ ।
स्नातुं कदाचिद्गङ्गायां गतोऽहं तीरभूमिगः ।
स्थापयित्वाद्य स्वं वस्त्रं मग्नः स्नास्यञ्जलेऽमले ।
उन्मज्य स्वयं पुनश्चैव प्राप्तो रूपं मुनिसुतम् ॥ १५२ ।
किं मया विकृतं कर्म्म सेवमानेन माधव ।
तपश्च तप्यमानेन किं मया विकृतङ्कृतम् ॥ १५३ ।
भक्तिं किमकर्म्मण्यं सेवमानेन चाच्युत ।
व्यभिचारश्च मे तत्र को जातस्तु तवार्च्चने ॥ १५४ ।
एतदाचक्ष्व तत्त्वेन येनाहं नरकं गतः ।
एतच्चिन्ताव्याकुलोऽहं निबोध भगवन्मम ॥ १५५ ।
मायालुब्धेन हि मया पूर्व्वं विज्ञापितो ह्यसि ।
नान्यत्स्मरामि पापञ्च नरके येन पातितः ॥ १५६ ।
ततस्तस्य वचः श्रुत्वा कारुण्यं परिदेवितम् ।
उक्तवानस्मि तं विप्रं दुःखसन्तप्तमानसम् ॥ १५७ ।
मा दुःखं कुरु विप्रेन्द्र आत्मदोषसमुद्भवम् ।
विकर्म्म न कृतं किञ्चिदपि मे विप्र पूजने ।
येन दुःखमनुप्राप्तं तिर्य्यग्योनिञ्च वै गतः ॥ १५८ ।
उक्तमेव मया पूर्व्वं शृणु ब्राह्मणपुङ्गव ।
वरान्वरय भो ब्रह्मन् त्वं मायां वृतवानसि ॥ १५९ ।
ददामि दिव्यभोगान्वै भौमान्वापि तवेप्सितम् ।
तांस्तु नेच्छसि मायाया दर्शनं वृतवानसि ॥ १६० ।
दृष्टा तु वैष्णवी माया या त्वया ब्राह्मणेप्सिता ।

न गतो दिवसश्चेह नापराह्नोऽपि कुत्रचित् ।
वर्षाणि चैव पञ्चाशन्निषादस्य गृहेऽपि न ॥ १६१ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व द्विजोत्तम ।
या एषा वैष्णवी माया त्वया ब्राह्मण ईप्सिता ॥ १६२ ।
त्वया न तत्कृतं किञ्चिच्छुभं वाशुभमेव वा ।
सर्व्वं मायामयं तत्र विस्मयात्परितप्यसे ॥ १६३ ।
यत्त्वया दुष्कृतं कर्म्म व्यभिचारश्च तत्र वै ।
अर्च्चनञ्च न ते भ्रष्टं तपश्चैव न नाशितम् ॥ १६४ ।
भवान्तरे कृतं यच्च येनेदं प्राप्तवान्महत् ।
दुःखन्तच्च तवाख्यास्ये शृणु ब्राह्मणसत्तम* ॥ १६५ ।
मम भक्ता द्विजाः शुद्धा यत्त्वया नाभिवादिताः ।
तत्पापादीदृशो भोगस्तव जातो हि दुःखदः ॥ १६६ ।
ये च भागवताः शुद्धास्ते नूनं मम मूर्त्तयः ।

---

* अत्र (ग) पुस्तकस्थ पाठो यथा —
पुनरन्यत् प्रवक्ष्यामि तच्छृणुष्व द्विजोत्तम ।
यस्य चैवापराधेन स्वयं कृत्वा भवान्तरे ॥
शुद्धा भागवता विप्र मद्भक्ता नाभिवादिताः ।
तस्य दोषापराधस्य कालं प्राप्तं ततोद्विजः ॥
सर्व्वथा वन्दनीया वै भक्ता भागवताः शुचिः ।
ये मां वन्दन्ति विप्रेन्द्र भक्ता भागवता मम ॥
वन्दितोऽस्मि हि विप्रेन्द्र सत्यमेतन्न संशयः ।
योमां पृच्छन्ति चैवेह यस्य वाच्यं न विद्यते ॥ इति ।

तान्विप्रान्ये नमस्यन्ति ते मामेव नमस्यते* ।
विदितोऽस्मीह विप्रेन्द्र तैरहं नात्र संशयः ॥ १६७ ।
मम दर्शनकामा ये ते मे भक्ता द्विजास्तथा ।
शुद्धा भागवताः पूज्या द्रष्टव्याः सर्व्वदा नृभिः ॥ १६८
विशेषेण कलौ ब्रह्मन्द्विजरूपो ह्यवस्थितः ।
तस्माद्ब्राह्मणभक्ता ये ते मद्भक्ता न संशयः ॥ १६९ ।
यो मां प्राप्तुमिहेच्छेत यस्यावाच्यं न विद्यते ।
अनन्यमानसो भूत्वा मद्भक्तेषु नियोजयेत् ॥ १७० ।
गच्छ ब्राह्मणसिद्धोऽसि यदा प्राणान्विमोच्यसि† ।
तदा गतोऽसि मत्स्थानं श्वेतद्वीपं न संशयः‡ ॥ १७१
एवमुक्त्वा वरारोहे तत्रैवान्तर्हितोऽभवम् ।
सोऽपि द्विजस्तनुन्त्यक्त्वा मायातीर्थे यशस्विनि ।
कृत्वा सुदुष्करं कर्म्म श्वेतद्वीपमुपागतः§ ॥ १७२ ।
धन्वी तूणी शरी खड्गी मायाबलपराक्रमः ।
माञ्च पश्यति वै नित्यं मायाबलसुसंस्थितम् ॥ १७३ ।

---

* नमस्यतीति साधु ।

† प्राणांश्चात्रैव मन्यस इति (ग) ।

‡ गच्छ मे परमं स्थानं श्वेतद्वीपं मया सहेति (ग) ।

§ अत्र (ग) पुस्तके पाठभेदो यथा—
एवमुक्तो मया भूमि स च ब्राह्मणपुङ्गवः ।
दत्त्वा वरं महाभागे तत्रैवान्तरधीयत ॥
ब्राह्मं देहं स संन्यस्य मायातीर्थे यशस्विनि । इति ।

मायया किन्तव धरे न मायां ज्ञातुमर्हसि ।
मम मायां न जानन्ति देवदानवराक्षसाः ॥ १७४ ।
एतत्ते कथितं भूमे मायाख्यानं महौजसम्* ।
मायाचक्रमिति ख्यातं सर्व्वपुण्यसुखावहम्† ॥ १७५ ।
आख्यानानां महाख्यानं तपसाञ्च परन्तपः ।
पुण्यानां परमं पुण्यं गतीनाञ्च परा गतिः ॥ १७६ ।
पठेद्यो नित्यं भक्तेषु अभक्तेषु न कीर्त्तयेत् ।
मा पठेन्नीचमध्येषु मा पठेच्छास्त्रदूषके ॥ १७७ ।
अग्रतः पृच्छताशूद्रमङ्क्तेषु तथाग्रतः ।
पठते शोभते विप्रो न तु ये शास्त्रदूषकाः ॥ १७८ ।
कल्यमुत्थाय यो भूमे पठते च दृढ़व्रतः ।
तेन द्वादश वर्षाणि ममाग्रे पठितं भवेत् ॥ १७९ ।
अथ पूर्णेन कालेन प्रमान्पञ्चत्वमागतः ।
मङ्क्तो जायते देवि वियोनिं न च गच्छति ॥ १८० ।
य एवं शृणुयान्नित्यं महाख्यानं वसुन्धरे ।
न स जायेत मन्दात्मा वियोनिं नैव गच्छति ॥ १८१ ।

---

* महौज इति साधु ।

† सर्व्वस्य सुसुखावहमिति (ग) ।

एतत्ते कथितं भद्रे त्वया यत्पूर्व्वमीप्सितम् ।
मुच्यमाना वरारोहे किमन्यत्परिपृच्छसि* ॥ १८२ ।

इति वराहपुराणे भगवच्छास्त्रे मायाचक्रं नाम
पञ्चविंशत्यधिकशततमोऽध्यायः ।

षड्विंशत्यधिकशततमोऽध्यायः ।

श्रुत्वा मायाबलं ह्येतद्धरणी शंसितव्रता ।
वराहरूपिणं देवं प्रत्युवाच वसुन्धरा ॥ १ ।

धरण्युवाच ।

यत्त्वत्कुब्जाम्रके देव भाषसे तदनन्तकम् ।
न तत्राहं विजानामि पूर्व्वमुक्तञ्च यत्त्वया* ॥ २ ।
यच्च कुब्जाम्रके पुण्यं पुष्टिस्तस्य सनातनी† ।
एतन्मे परमं गुह्यं भगवन्वक्तुमर्हसि ॥ ३ ।

---

* एतत्ते कथितं देवि त्वया वचनमीरितम् ।
अधुना च वरारोहे किमन्यत्परिपृच्छसि ॥ इति (ग) ।

---

* त्वमिह त्वविजानामि यत्त्वया पूर्व्वपृच्छितमिति (ग) ।

† यच्च कुब्जायके देव पुण्यपुष्टिः सनातनीति (ग) ।

वराह उवाच ।

सर्व्वं तत्कथयिष्यामि सर्व्वलोकसुखावहम् ।
यच्च कुब्जाम्रके पुण्यैर्यच्च तीर्थमनिन्दिते ।
तच्च कार्त्स्न्येन मे देवि शृणु तत्त्वेन सुन्दरि ॥ ४ ।
यथा कुब्जाम्रको जातस्ततस्तीर्थं यथाक्रमम् ।
यच्च कर्म्म यतोभूमे स्नातो याति मृतोऽपि च ॥ ५ ।
युगे सप्तदशे भूमे कृत्वा चैकां वसुन्धराम् ।
मधुकैटभौ तथा हत्वा ब्रह्मणो वचनात्तदा ।
जलसंहरणं कृत्वा ममाधारमुपागतः ॥ ६ ।
पश्यामि तं नतं भूमे रैभ्यं नाम महामुनिम् ।
ममैवाराधने युक्तं सर्व्वकर्म्मसु निष्ठितम् ।
युक्तिमन्तङ्गुणज्ञञ्च शुचिं दक्षं जितेन्द्रियम् ॥ ७ ।
दशवर्षसहस्राणि ऊर्द्ध्वबाहुः स तिष्ठति ।
सहस्रञ्चाम्बुभक्षेण तथा शैवालभक्षणम् ।
वर्षाणाञ्च शतं पञ्च तिष्ठते स महामुनिः ॥ ८ ।
ततः प्रीतोऽस्म्यहं देवि रैभ्यस्य च महात्मनः ।
भक्त्या च परया चैव तेन चाराधितो ह्यहम्* ॥ ९ ।

---

* (ग) पुस्तकेऽत्र पाठभेदो यथा—
ममैवाराधने युक्तो धर्म्मकर्म्मसु निष्ठितः ।
मधुञ्च कैटभं हत्वा प्रसन्नेन च चोदितः ॥
संहारन्तु ततः कृत्वा गङ्गाद्वारमुपागतः ।
पश्यामि तत्र तं भूमे भुक्तिमुक्तिमतात्मकम् ॥

ततो वै तप्यमानन्तं* गङ्गाद्वारमुपागतम् ।
आम्रवृक्षं समासाद्य दृष्टः स मुनिपुङ्गवः ॥ १० ॥
दर्शितोऽयं मया चात्मा हेतुमात्रेण केनचित् ।
मया यदाश्रितश्चाम्रस्तेन कुब्जत्वमागतः† ॥ ११ ॥
एवं कुब्जाम्रकं ख्यातं स्थानमेतन्मनस्विनि‡ ।
मृतापि§ तत्र गच्छन्ति मम लोकाय केवलम् ॥ १२ ॥
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
दृष्ट्वा स मामृषिश्चैव यानि वाक्यानि भाषते ॥ १३ ॥
एवं तत्र मया दृष्टः कुब्जरूपं समास्थितः ।
जानुभ्यामवनिङ्गत्वा किञ्चिदेव प्रभाषते ॥ १४ ॥
नमस्कृत्य स्थितं तन्तु मुनिं वै संशितव्रतम् ।
वरेण छन्दयामास अहम्प्रीतमना धरे¶ ॥ १५ ॥

गुणज्ञञ्च शुचिं दक्षं जितात्मानं जितेन्द्रियम् ।
दशवर्षसहस्राणि ऊर्द्ध्ववाहुः सहस्रकम् ॥
सहस्रं वायुभक्ष्यश्च पुनःशैवालभक्षणम् ।
वर्षाणाञ्च शतं पञ्च तिष्ठते स महामुनिः ॥ इति ।

* तप्यमानन्तु इति (ग) ।

† एतदर्द्धं (ग) पुस्तके नास्ति ।

‡ यशस्विनीति (ग) ।

§ मृता अपीति साधु ।

¶ श्लोक एष (ग) पुस्तके एवं पठितः—
जानुभ्यां पतितं दृष्ट्वा तं मुनिं शंसितव्रतम् ।
वरेण छन्दितस्तस्य यत्तस्यैव च रोचते ॥ इति ।

ममैव वचनं श्रुत्वा स मुनिस्तपसान्वितः ।
उवाच मधुरं वाक्यं प्रसादार्थी* महायशाः ॥ १६ ।
यदि प्रसन्नो भगवाँल्लोकनाथो जनार्द्दनः ।
तव चान्न† निवासं वै देव इच्छामि नित्यशः ॥ १७ ।
यावल्लोका धरिष्यन्ति तावच्चैव‡ महाप्रभो ।
स्थानन्तव हृषीकेश इच्छामि मधुसूदन§ ॥ १८ ।
त्वयि भक्तिः सदा भूयाद्यावस्थानं जनार्द्दन¶ ।
अन्यभक्तिर्मम विभो‖ रोचते न कदाचन ॥ १९ ।
एतदेव परं चित्तं मया चैव विधार्य्यते** ।
उपेन्द्र यदि तुष्टोऽसि ममायं दीयतां वरः ॥ २० ।
ततस्तस्य वचः श्रुत्वा रैभ्यस्यर्षेरहम्मुनः ।
वाढ़मित्येव ब्रह्मर्षे†† एवमेतद्भविष्यति ॥ २१ ।
ममैवं वचनं श्रुत्वा ब्राह्मणः स वसुन्धरे ।

---

* प्रसादार्थमिति (ग) ।

† तवैवान्नेति (ग) ।

‡ तावत्तवेति (ग) ।

§ स्थानं तव प्रसादाद्धि वाञ्छेयं तव संस्थितिमिति (ग) ।

¶ सा मे भक्तिर्भवेद्दैन्ये तव चर्य्या जनार्द्दनेति (ग) ।

‖ अन्यभक्तिर्भवेद्विष्णो इति (ग) ।

** एतच्च परमं वृत्तं यन्मया हृदि वर्त्तते इति (ग) ।

†† ब्रह्मेन्द्रेति (ग) ।

मुहूर्त्तं ध्यानमास्थाय मामुवाच मुदान्वितः* ॥ २२ ।
एतस्य तीर्थवर्य्यस्य महिमानं त्वया प्रभो ।
शृणुवै† कथ्यमानन्तु वद लोकोपकारक ॥ २३ ।
अन्यानि यानि तीर्थानि एतत्क्षेत्राश्रितानि तु ।
तान्यपि श्रोतुमिच्छामि कथ्यमानानि च त्वया‡ ॥ २४ ।
शृणु तत्त्वेन मे ब्रह्मन् यन्मान्त्वं परिपृच्छसि ।
तीर्थं कुब्जाम्रके पुण्ये मम लोके सुखावहे ॥ २५ ।
तीर्थन्तु कुमुदाकारं तस्मिन्कुब्जाम्रके स्थितम् ।
स्नानमात्रेण सुश्रोणि स्वर्गं प्राप्नोति मानवः ॥ २६ ।
कौमुदस्य तु मासस्य तथा मार्गशिरस्य§ च ।
वैशाखस्यैव मासस्य कृत्वा कर्म्म सुदुष्करम् ॥ २७ ।
यो वै परित्यजेत्प्राणान्स्त्री पुमान्वा नपुंसकः ।
निष्कलां लभते सिद्धिं मम लोकं स गच्छति ॥ २८ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तीर्थं मानसमित्येव विख्यातं मम सुन्दरि¶ ॥ २९ ।
यस्मिन् स्नात्वा विशालाक्षि गच्छते‖ नन्दनं वनम् ।

---

* प्रत्युवाच द्विजोत्तम इति (ग) ।

† शृणवानीति साधु ।

‡ (ग) पुस्तके २३।२४ श्लोकौ न स्तः ।

§ मार्गशिरस इति साधु ।

¶ यत्तु तत्र विधीयत इति (ग) ।

‖ गच्छतीति साधु ।

दिव्यं वर्षसहस्रं वै मोदते चाप्सरैः* सह ॥ ३० ।
पूर्णे वर्षसहस्रे तु जायते विपुले कुले ।
द्रव्यमान्गुणवांश्चैव जायते तत्र मानवः ॥ ३१ ।
तत्राथ मुञ्चते† प्राणान् कौमुदस्य तु द्वादशी ।
पुष्कलां लभते सिद्धिं मम लोकञ्च गच्छति ॥ ३२ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
मायातीर्थमिदं ख्यातं येन मायां विजानते‡ ॥ ३३ ।
तस्मिन् कृतोदको ब्रह्मन्मायातीर्थे महायशाः ।
दशवर्षसहस्राणि मद्भक्तो जायते नरः ॥ ३४ ।
लभते परमां पुष्टिं कुवेरभवनं यथा§ ।
एकं सहस्रं वर्षाणां स्वच्छन्दगमनात्त्रयम् ॥ ३५ ।
अथवा म्रियते तत्र मायातीर्थे यशस्विनी ।
मायायोगी ततो भूत्वा मम लोकाय गच्छति ॥ ३६ ।
अन्यच्च ते¶ प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तीर्थं सर्व्वात्मकं नाम सर्व्वतीर्थगुणान्वितम्‖ ॥ ३७ ।
यस्तत्र स्नायते कश्चिद्वैशाखस्य तु द्वादशीम् ।

---

* अप्सरोभिरिति साधु ।

† मुञ्चतीति साधु ।

‡ विजानीते इति साधु ।

§ तथेति (क), (ख) ।

¶ पुनरन्यदिति (ग) ।

‖ सर्व्वधर्म्मगुणान्वितमिति (ग) ।

निष्कलं लभते स्वर्गं सहस्रं दश पञ्च च ॥ ३८ ।
अथात्र मुञ्चते प्राणान्तीर्थे सार्षपके तथा ।
सर्व्वसङ्गं परित्यज्य मम लोकञ्च* गच्छति ॥ ३९ ।
पुनरन्यत्प्रवक्ष्यामि शृणुष्व† शुभलोचने ।
तीर्थं पूर्णमुखं नाम तन्न जानाति कश्चन‡ ॥ ४० ।
तत्र सर्व्वा भवेद्गङ्गा शीतलं जायते जलम् ।
यत्र चोष्णं भवत्यम्बु§ ज्ञेयं पूर्णमुखं तथा ॥ ४१ ।
स्नातो¶ गच्छति सुश्रोणि सोमलोके महीयते ।
पश्यते तु तदा सोमं सहस्रं दश पञ्च च ॥ ४२ ।
ततः स्वर्गात्परिभ्रष्टो ब्राह्मणश्चैव जायते ।
मद्भक्तः शुचिमान्दक्षः सर्व्वकर्म्मगुणान्वितः ॥ ४३ ।
अथवा म्रियते तत्र मासि मार्गशिरे‖ तथा ।
शुक्लपक्षे च द्वादश्यां मम लोकञ्च गच्छति ॥ ४४ ।
तत्र मां पश्यते नित्यं दीप्तिमन्तं चतुर्भुजम् ।
न जन्म विद्यते तस्य मरणञ्च कदाचन ॥ ४५ ।

---

* लोकायेति (ग) ।

† शृणु मे इति (ग) ।

‡ तत्तु कश्च न जानत इति (ग) ।

§ तपत्यम्बु इति (ग) ।

¶ स्नात्वेति (ग) ।

‖ मार्गशिरसीति साधु ।

पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे।
अनन्यमानसोभूत्वा भक्तोभागवतो मम ॥ ४६।
तस्मिंस्तीर्थे तु यः स्नाति* कदाचिदपि मानवः।
दशवर्षसहस्राणि मोदते ह्यमरालये ॥ ४७।
ततः स्वर्गात्परिभ्रष्टस्तत्तीर्थस्य प्रभावतः† ।
द्रव्यवान् गुणवांश्चैव मद्भक्तश्चैव जायते ॥ ४८।
वैशाखस्य तु मासस्य शुक्लपक्षस्य द्वादशी।
यदि मुञ्चेत्स्वकं देहं कृत्वा कर्म्म सुदुष्करम् ॥ ४९।
न जन्म मरणं तस्य न ग्लानिर्न च वै भयम्।
सर्व्वसङ्गविनिर्मुक्तो मम लोकाय गच्छति ॥ ५०।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे।
तीर्थं करवीरकं नाम सर्व्वलोक‡सुखावहम् ॥ ५१।
तस्य चिह्नं प्रवक्ष्यामि येन ज्ञापयते§ शुभे।
पुरुषो ज्ञानवांस्तावन्मम भक्तिविनिश्चितः¶ ॥ ५२।
माघमासे तु सुश्रोणि शुक्लपक्षे तु द्वादशी।
पुष्पिते करवीरे वै मध्याह्ने तु न संशयः ॥ ५३।
तस्मिन् कृतोदकस्तीर्थे स्वच्छन्दगमनालयः।

---

* यस्तु स्नाति तत्र तीर्थे इति (ग)।

† तस्य तीर्थस्य यत्फलमिति (ग)।

‡ मम लोकेति (ग)।

§ ज्ञापयतीति साधु।

¶ एष श्लोकः (ग) पुस्तके नास्ति।

अग्निविमानमारूढ़ो सहस्रान्नरीनर्त्तितः ॥ ५४ ।
तत्राथ म्रियते भूमे माघमासस्य* द्वादशीम् ।
ब्रह्माणं माञ्च पश्येत पश्यति† च वृषध्वजम् ॥ ५५ ।
पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तस्य ब्राह्मणमुख्यस्य पूर्व्वं यत्कथितं मया ।
तस्मिन् कुब्जाम्रके भद्रे स्थानन्तु मम रोचते ॥ ५६ ।
पुण्डरीक इति ख्यातं तीर्थञ्चैव महत्फलम् ।
तस्य चिह्नं प्रवक्ष्यामि तच्छृणुष्व शुचिस्मिते‡ ॥ ५७ ।
तस्य तीर्थस्य सुश्रोणि मध्याह्ने द्वादशीदिने ।
रथचक्रप्रमाणो वै चरते तत्र कच्छपः§ ॥ ५८ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
स्नात्वा प्राप्नोति सुश्रोणि फलं तत्र महागुणम् ॥ ५९ ।
पुण्डरीकस्य यज्ञस्य यजमानस्य यत्फलम् ।
प्राप्नोति वसुधे तत्र एवमेव न संशयः¶ ॥ ६० ।
अथवा म्रियते तत्र लब्धसंज्ञो महायशाः ।
दशानां पुण्डरीकाणां फलं प्राप्नोति मानवः ॥ ६१ ।

---

* माघमासे तु इति (ग) ।

† पश्येत् पश्यतीति साधु ।

‡ वसुन्धरे इति (ग) ।

§ एष श्लोकः (ग) पुस्तके नास्ति । तत्र केवलं तस्य तीर्थस्य सुश्रोणि फलं महा-मिति पाठो वर्त्तते ।

¶ एवमेतन्न संशय इति (ग) ।

भुक्ता यज्ञफलं तत्र जातिशुद्धो महातपाः।
सिद्धश्च लभते नित्यं मम लोकाय गच्छति॥ ६२॥
अन्यच्च ते प्रवक्ष्यामि प्रिये तद्वै शृणुष्व* मे।
अग्नितीर्थमिति ख्यातं सिद्धं कुब्जाम्रके स्थितम्।
यद्वै प्रज्ञायते† देवि द्वादश्यां पापवर्ज्जितैः॥ ६३॥
कौमुदस्य तु मासस्य मासो मार्गशिरस्य च‡।
आषाढ़स्य च मासस्य शुक्लपक्षस्य द्वादशीम्§॥ ६४॥
यथैव माधवे मासि समये हृदि वर्त्तते।
तस्यान्तु शुक्लद्वादश्यां तीर्थे तिष्ठति यत्नतः॥ ६५॥
तस्य चिह्नं प्रवक्ष्यामि शृणुष्व हि वसुन्धरे¶।
येन चिह्नेन विज्ञेयं तीर्थं तच्चैव मामकम्।
एकाग्रन्तु मनः कृत्वा तच्छृणुष्व वसुन्धरे‖॥ ६६॥
मुक्ता भागवताञ्शुद्धान्मम संहितापाठकान्**।
न हि कश्चिद्विजानाति शास्त्रं मम न यश्च वे††॥ ६७॥
फलं तस्य प्रवक्ष्यामि मृतोऽपि स्नातकोऽपि वा।

---

* शृणोहि मे इति (ग)।

† पुनः प्रजायते चैव द्वादशीः पश्य माधवि इति (ग)।

‡ मार्गशिरस इति साधु।

§ एष श्लोकः (ग) पुस्तके नास्ति।

¶ देवि तत्त्वेन ज्ञायतामिति (क), (ग)।

‖ एतदर्द्धं (ग) पुस्तके नास्ति।

** मम सद्विजयाजकानिति (ग)।

†† यस्तु शास्त्रं न जानतीति (ग)। जानातीति साधु।

एकचित्तं समाधाय तच्छृणुष्व वसुन्धरे* ॥ ६८ ।
अग्नितीर्थेषु स्नातो वै तस्मिन् कुब्जाम्रकेषु च ।
अग्नितीर्थं महाभागे दीप्तिमन्तं सवैष्णवम् ॥ ६९ ।
सप्त कृत्वाग्निमेधानां यत्फलं भवति प्रिये ।
प्राप्नोति तन्महाभागे स्नानमात्रान्न संशयः ॥ ७० ।
अथवा म्रियते तत्र एकैकान्द्वादशीकृतान् ।
स्थित्वा विंशत्यहोरात्रान् मम लोकाय गच्छति ॥ ७१ ।
तीर्थस्य तस्य वक्ष्यामि चिह्नानि शृणु सुन्दरि ।
येन विज्ञायते प्राज्ञैर्†मम भक्तां सुखावहम् ॥ ७२ ।
उष्णं भवति हेमन्ते वसुधे तज्जलन्तथा ।
उष्णकाले भवेच्छीतमेवं चिह्नन्तु तद्भवेत् ॥ ७३ ।
एष वह्निर्महाभागे‡ तीर्थमाग्नेयमुत्तरे ।
तरन्ति मानवा येन घोरं संसारसागरम् ॥ ७४ ।
अन्यच्च ते प्रवक्ष्यामि देवि कुब्जाम्रके महत्§ ।
वायव्यमिति विख्यातं तीर्थं धर्म्माद्विनिःसृतम् ॥ ७५ ।
तस्मिंस्तीर्थे तु यः स्नातः कृतनित्योदकक्रियः¶ ।
वाजपेयस्य यज्ञस्य फलं प्राप्नोति निष्कलम् ॥ ७६ ।

---

* तच्छृणीहि वसुन्धरे इति (ग) ।

† विद्यानिति (ग) ।

‡ एवं चिह्नं महाभागे इति (ग) ।

§ ध्यहमिति (ग) ।

¶ कृतोदकाकृताग्निक इति (ग) ।

अथवा म्रियते तत्र वायुतीर्थे महाह्रदे।
दिनानि दश पञ्चैतत्कृतमेव हि मामकम्॥ ७७।
जन्म वा मरणं वापि भूमौ नैव पुनर्भवेत्*।
जायते च चतुर्बाहुर्मम लोकप्रतिष्ठितः॥ ७८।
तस्य चिह्नं प्रवक्ष्यामि वायुतीर्थस्य सुन्दरि।
येन चिह्नेन विज्ञेयं तीर्थं तच्च महत्तरम्† ॥ ७९।
अश्वत्थवृक्षपत्राणि चलन्ति नित्यशो वने।
चतुर्विंशतिहीद्दश्यां येन विज्ञायते खलु‡॥ ८०।
पुनरन्यत्प्रवक्ष्यामि तीर्थं कुब्जाम्रके धरे§।
शक्रतीर्थमिति ख्यातं सर्व्वसंसारमोक्षणम्¶॥ ८१।
तस्मिंस्तीर्थे वरारोहे शक्रतीर्थे वसुन्धरे‖।
शक्रस्य वसते लोके वज्रहस्तो न संशयः॥ ८२।
अथवा म्रियते तत्र** शक्रतीर्थे महातपे।
उपोष्य दशरात्राणि†† मम लोकाय गच्छति॥ ८३।

---

* न तस्य मरणं भूमे जन्म तस्य न विद्यते इति (ग)।

† शुभैर्भागवतैस्तथेति (ग)।

‡ विभो इति (ग)।

§ भुवीति (ग)।

¶ मोचनमिति (ग)।

‖ महायशा इति (ग)।

** देवीति (ग)।

†† दशरात्रानिति साधु।

तस्य चिह्नं प्रवक्ष्यामि येन विज्ञायते ततः* ।
एकचित्तं समाधाय शृणु सुन्दरि तत्त्वतः ॥ ८४ ।
पञ्च वृक्षास्तु तिष्ठन्ति तद्दक्षिणदिशि क्षितै ।
शक्रतीर्थस्य चिह्नन्ते वसुधे परिकीर्त्तितम्† ॥ ८५ ।
अन्यच्च तीर्थं वक्ष्यामि तस्मिन् कुब्जाम्रके परम्‡ ।
वरुणेन तपस्तप्तं सहस्रं पञ्च सप्त च ॥ ८६ ।
तत्र स्नातस्य वक्ष्यामि जायते तत्र यत्फलम् ।
यत्प्राप्नोति मृतो वापि पुरुषः संशितव्रतः ॥ ८७ ।
अष्ट वर्षसहस्राणि गत्वा वै वरुणालयम् ।
स्वच्छन्दगमनो भूत्वा एवमेव न संशयः ॥ ८८ ।
अथ वै म्रियते तत्र विंशवर्षोषितो नरः§ ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥ ८९ ।
तस्य चिह्नं प्रवक्ष्यामि तच्छृणुष्व¶ वसुन्धरे ।
तत्र धारा पतत्येका एकरूपा सदा भवेत् ।
न वर्द्धते च वर्षासु घर्म्मे न ह्रसते‖ पुनः ॥ ९० ।

---

* नर इति (ग) ।

† पञ्चवृक्षास्तवत्तस्य तीर्थस्य दक्षिणे स्थिताः ।
भूमौ येन सविज्ञेयं शक्रतीर्थमिति स्मृतम् ॥ इति (ग) ।

‡ पुनरन्यत् प्रवक्ष्यामि तीर्थमेव वसुन्धरे इति (ग) ।

§ चिररात्रोषितोनरः इति (ग) ।

¶ तच्छृणोहीति (ग) ।

‖ ह्रसतीति साधु ।

सप्तसामुद्रकं नाम तस्मिन् कुब्जाम्रके परम्* ।
तस्मिन् कृतोदको भूमे नरो धर्म्मपरायणः ।
त्रयाणामश्वमेधानां फलं प्राप्नोति मानवः ॥ ८१ ।
शीघ्रं गच्छति वै स्वर्गं सहस्रं दश पञ्च च ।
ततः स्वर्गात्परिभ्रष्टः कुलवाञ्जायते द्विजः ।
वेदवेदाङ्गकुशलः सोमपश्चैव जायते ॥ ८२ ।
अथात्र मुञ्चते प्राणान्मुक्तसङ्गो जितेन्द्रियः ।
उषित्वा सप्तरात्रं वै मम लोकाय गच्छति ॥ ८३ ।
तस्य चिह्नं प्रवच्यामि तीर्थस्य शृणु सुन्दरि ।
वैशाखशुक्लद्वादश्यां विभूतिस्तत्र या भवेत् ।
विमला गाङ्गता यत्र गङ्गाजलविमिश्रितम् ॥ ८४ ।
तस्मिन्तीर्थे तद्वैतत्चीरवर्णं पुनर्भवेत् ।
पुनश्च पीतवर्णाभा पुनारक्तः कदा भवेत् ॥ ८५ ।
पुनर्मरकताभासं पुनर्मुक्तासमप्रभम्† ।
एतैश्चिह्नैस्तु विज्ञेयन्तत्तीर्थं विदितात्मभिः ॥ ८६ ।
अन्यच्च ते प्रवच्यामि तीर्थं कुब्जाम्रके महत्‡ ।
तीर्थं मानसरो नाम सर्व्वभागवतप्रियम्§ ॥ ८७ ।

---

* स्थितमिति (ग) ।

† वर्णोमरकतोभाति पुनारक्तासमप्रभ इति (ग) ।

‡ तस्मिन् कुब्जाम्रके भुवीति (ग) ।

§ सर्व्ववैष्णवकं शुभमिति (ग) ।

तस्मिन् स्नातो वरारोहे गच्छते* मानसं सरः† ।
देवान् पश्यति वै सर्व्वानुद्रेन्द्रसमरुद्गणान् ॥ ९८ ।
अथ तत्र मृतो भूमे त्रिंशद्रात्रोषितो नरः ।
सर्व्वसङ्गविनिर्मुक्तो मम लोकाय गच्छति ॥ ९९ ।
तस्य चिह्नं प्रवक्ष्यामि येन तज्ज्ञायते‡ नरैः ।
पञ्चाशत्क्रोशविततं मानुषाणां दुरासदम् ॥ १०० ।
एतत्तु भूमे विज्ञेयं यथैतन्मानसं सरः ।
शुद्धैर्§भागवतैर्ज्ञेयं मम कर्म्मसु निष्ठितैः ॥ १०१ ।
एतत्तीर्थं महाभागे तस्मिन् कुब्जाम्रके स्मृतम् ।
सिद्धिकामस्य विप्रस्य रैभ्यस्य¶ परिकीर्त्तितम् ॥ १०२ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तत्र कुब्जाम्रके वृत्तं पुराश्चर्य्यं महाद्भुतम्‖ ॥ १०३ ।
मम निर्माल्यपार्श्वे वै व्याली तिष्ठति निर्भया** ।
गन्धमाल्योपहार्य्याणि भक्षयन्ती यदृच्छया ॥ १०४ ।
कस्यचित्त्वथ कालस्य नकुलस्तत्र चागतः ।

---

* गच्छतीति साधु ।

† तस्मिंस्तीर्थे वरारोहे गच्छेन्मानससुन्दरे इति (ग) ।

‡ विज्ञायते इति (ग) ।

§ शुभैरिति (ग) ।

¶ भक्तस्येति (ग) ।

‖ महौजसमिति (ग) ।

** वसति निर्भयेति (ग) ।

पश्यति च ततस्तत्र रममाणां यदृच्छया ॥ १०५ ।
नकुलेन सह व्याल्या तदा युद्धमभूच्च तत्* ।
सम्पूर्णे ते तु मध्याह्ने माघमासे तु द्वादशीम् ॥ १०६ ।
तया स दृष्टो नकुलो नाशाय मम मन्दिरे ।
तेनापि विषदिग्धेन व्याली शीघ्रं निपातिता ॥ १०७ ।
उभौ चान्योऽन्ययुद्धेन तदा पञ्चत्वमागतौ ।
व्याली प्राग्ज्योतिषे जाता राजपुत्री यशस्विनी ॥ १०८ ।
नकुलोऽजायत तदा कोशलेषु जनाधिपः ।
रूपवान् गुणवान्देवि सर्व्वशास्त्रकलान्वितः ॥ १०९ ।
तौ तु दीर्घेण कालेन सौख्येन परिरञ्जितौ ।
अवर्द्धतां यथाकालं शुक्लपक्षे यथा शशी ॥ ११० ।
स कन्या नकुलं दृष्ट्वा सद्यो हन्तुं तथेच्छति ।
व्यालीं दृष्ट्वा राजपुत्रः सहसा हन्तुमिच्छति ॥ १११ ।
अथ तस्यास्तु कालेन कोशलाधिपतिस्तथा ।
पाणिं जग्राह विधिवन्मत्प्रसादाद्वसुन्धरे† ॥ ११२ ।
कोशलाधिपतेश्चापि राज्ञः प्राग्ज्योतिषस्य च ।
महोत्सवेन संवृत्तः सम्बन्धो मत्प्रसादतः ॥ ११३ ।
दृढ़प्रीतिस्तयोर्जाता यथा च जतुकाष्ठयोः ।
रमतो‡ धूमकेतोश्च वह्नेश्चैव यथा तथा ॥ ११४ ।

---

* प्रावर्त्ततेति (ग) ।

† मत्प्रसादेन वै देवि सम्बन्धश्चैव जायते इति इति (ग) । तत्र परश्लोको नास्ति ।

‡ रममाणश्चेति साधु ।

यथा शची च शक्रस्य रमन्ती* नन्दने वने ।
एवञ्च दीर्घकालं हि तयोः प्रीतिर्न हीयते ॥ ११५ ।
एवन्तौ विहरन्तौ तु तस्मिन्नुपवने ततः ।
वर्त्तेते च यथान्यायं वेलामिव महोदधिः ॥ ११६ ।
एवं तयोर्गतः कालो वर्षाणां सप्तसप्ततिः ।
न बुध्यतोस्तथात्मानं मम मायाविमोहितौ ॥ ११७ ।
एवन्तौ विहरन्तौ तु तस्मिन्नुपवने ततः ।
दृष्ट्वा व्यालीं राजपुत्रस्ततो हन्तुं व्यवस्थितः ॥ ११८ ।
स तया वार्य्यमाणोऽपि व्यालीं हन्तुमिहोद्यतः ।
गरुड़ो हन्ति नागान्वै दृष्ट्वैव विनतात्मजः ॥ ११९ ।
एवं स वार्य्यमाणोऽपि व्यालीं हन्ति स्म दारुणम् ।
तदा सा रुषिता देवी न किञ्चिदपि भाषते† ॥ १२० ।
ततस्तस्यान्तु वेलायां राजपुत्रग्रतो बिलात्‡ ।
नकुलस्तु विनिर्गत्य§ आहारार्थं समुद्यतः ॥ १२१ ।
दृष्ट्वा तु राजपुत्री सा नकुलं सर्पकाङ्क्षिणम् ।
हृष्टं चङ्क्रममाणं सा नकुलं शुभदर्शनम् ॥ १२२ ।

---

* रममाणाविति साधु ।

† सा तथा क्षुभ्यमाणा च शीघ्रमेव निपातिता ।
रुषिता राजपुत्री सा न किञ्चिदपि भाषते ॥ इति (ग) ।

‡ राजपुत्राग्राः समग्रत इति (ग) ।

§ बिलान्निष्क्रम्य नकुल इति (ग) ।

क्रोधार्त्तं नकुलञ्चापि विनिहन्तुं प्रचक्रमे* ।
वारिता राजपुत्रेण सुता प्राग्ज्योतिषस्य वै ॥ १२३ ।
नकुलं घातितं दृष्ट्वा मङ्गल्यं शुभदर्शनम् ।
कुपितो राजपुत्रो वै राजपुत्रीमभाषत ॥ १२४ ।
स्त्रीणां भर्त्ता सदा मान्यस्त्वं मामुल्लङ्घ्य निष्ठुरम्† ।
दर्शनीयः प्रियो राज्ञां मङ्गल्यः शुभदर्शनः ।
घातितो नकुलः कस्मान्मया वै वार्य्यमाणया ॥ १२५ ।
इति भर्त्तृवचः श्रुत्वा प्राग्ज्योतिषसुता तदा ।
प्रत्युवाच ततः क्रोधात्कोशलाधिपतेः सुतम्‡ ॥ १२६ ।
असकृद्वार्य्यमाणोऽपि व्यालीं घातितवान् यतः ।
तस्मान्मयापि नकुलो घातितः सर्पघातकः§ ॥ १२७ ।
राजपुत्र्या वचः श्रुत्वा राजपुत्रस्ततोऽब्रवीत् ।
वाग्भिः स कटुकाभिश्च तर्ज्जयन्निव¶ तां धरे ॥ १२८ ।
सर्पस्तीव्रविषो भद्रे तीक्ष्णदंष्ट्रो दुरासदः‖ ।

---

* क्रोधी वै जायते तस्या नकुलं हन्तुमुद्यतेति (ग) ।

† स्त्रीणां भर्त्ता चैव मान्यः सदैव तु विधीयत इति (ग) ॥

‡ एष श्लोकः (ग) पुस्तके नास्ति ।

§ मया वै धार्य्यमाणेन त्वया व्यालिर्निपातिता ।
किन्तेऽपराधं राजेन्द्र अहिना विलवासिना ।
यत्त्वया वार्य्यमाणेन शीघ्रमेव निपातिता ॥ इति (ग) ॥

¶ स कटुकं प्रोक्तं मम पूर्व्वं कदाचनेति (ग) ।

‖ महावन इति (ग) ।

दशते मानुषं दुष्टो येनाऽसौ म्रियते जनैः* ।
तस्मान्मया हतो भद्रेऽहितकारी विशेषतः ॥ १२९ ॥
प्रजापाला वयं भद्रे येऽपि चैवापथे† स्थिताः ।
सर्व्वांस्तान्दण्डयामो हि तीव्रदण्डैर्यथोचितम्‡ ॥ १३० ॥
साधून्ये चापि हिंसन्ति ह्यपराधविवर्ज्जितान् ।
स्त्रियश्चैवापि हिंसन्ति कामकाराश्च ये नराः ॥ १३१ ॥
ते दण्ड्याश्चैव वध्याश्च राजधर्म्मो यथार्हतः§ ।
मयापि राजधर्म्मो वै कर्त्तव्यो राजकर्म्मणि ॥ १३२ ॥
नकुलेनापराद्धं किं तद्वद त्वं ममापि हि¶ ।
दर्शनीयः सुरूपश्च राज्ञां योग्यो गृहेषु च ।
मङ्गल्यश्च पवित्रश्च नकुलः किं हतस्त्वया‖ ॥ १३३ ॥
वार्य्यमाणोऽपि हि मया घातितो नकुलस्ततः** ।
ततो मम न भार्य्यासि न चाहन्ते पतिः स्थितः ।
किञ्च तेन न हन्मि त्वां स्त्रियोऽवध्याः सदैव यत् ॥ १३४ ॥

---

* दशते मानुषं शीघ्रं तेन सर्पो मया हत इति (ग) ।

† ये केचिदपथे इति (ग) ।

‡ सर्व्वास्ते रचितव्या वै राजशास्त्रे यथा श्रुतिरिति (ग) ।

§ श्वापदं ये तु हिंसन्ति मानुषांस्तेऽपि कामतः ।
सर्पश्च येऽपि हिंसन्ति तेऽपि वध्या न संशयः ॥ इति (ग) ।

¶ ते आख्याहि यदि किं कृतमिति (ग) ।

‖ न कुत्रापि पातितः इति (ग) ।

** मम चापि न भार्य्यासि अहञ्चापि पतिर्न चेति (ग) ।

इत्युक्त्वा राजपुत्रस्तां निवृत्त्य नगरं प्रति ।
एवं क्रोधं समादाय नष्टस्नेही परस्परम् ॥ १३५ ।
एवं गच्छति काले वै कौशलायां जनाधिपः ।
शृणोति तां कथां सर्व्वां वधं नकुलसर्पयोः ॥ १३६ ।
एवं श्रुत्वा यथान्यायं सक्रोधौ तावुभावपि ।
ततः कञ्चुकिनश्चैव स्वामात्यानग्रतः स्थितान् ।
पुत्रं मम वधूञ्चैव समानयत सत्वरम् ॥ १३७ ।
ततो वै राजभृत्यास्तु राज्ञो वै प्रियकारिणः ।
राजाज्ञां तां पुरस्कृत्य वधूं पुत्रञ्च सादरम् ।
आनीय दर्शयामासुर्यत्र राजा स्वयं स्थितः ॥ १३८ ।
वधूपुत्रौ ततो दृष्ट्वा राजा वचनमब्रवीत्* ।
पुत्र कुत्र गतं प्रेम युवयोस्तत्समाहितम् ।
स्नेहश्च क्व गतः पूर्व्वो विरुद्धाचरणौ कथम् ॥ १३९ ।
आसीद्या युवयोः प्रीतिरन्योऽन्यं जतुकाष्ठवत् ।
दर्पणे प्रतिबिम्बञ्च दृश्यते यद्वदात्मनः ।
सम्मुखत्वेन च सदा तद्वद्वा याऽभवत्पुरा† ॥ १४० ।

---

* वधूपुत्रौ समानीय राजा वचनमब्रवीदिति (ग) ।

† अत्र (ग) पुस्तके पाठभेदो यथा —

कुतः पुत्र गतं प्रेम वध्वर्थे क्व गतं तव ।
वधु नु मे कष्टं पुत्रप्रीतिस्तव कुतोगता ॥
दर्पणेष्विव पश्यामि प्रतिबिम्बं यथात्मनि ।
निष्पापा वै सापराधेन कदाचिदपि पुत्रक ॥ इति ।

इत्था सुशीला धर्म्मिष्ठा नैनां त्यक्तुन्त्वमर्हसि* ।
अप्रियं नोक्तपूर्व्वन्तु यया परिजनेऽपि च† ।
मिष्टान्नसाधने दक्षा त्वया त्यक्तुं न युज्यते ॥ १४१ ।
धनसर्व्वस्तु ते धर्म्मः स च योषित्कृतः खलु‡ ।
अहो सत्यं जनानाञ्च स तु स्त्रीभ्यः सुतः कुलम् ॥ १४२ ।
ततः पितुर्वचः श्रुत्वा राजपुत्रो यशस्विनी ।
उभौ तच्चरणौ गृह्य पितरं प्रत्यभाषत ॥ १४३ ।
दोषो न विद्यते तात स्नुषायां कोऽपि कुत्रचित् ।
किं मे तु वार्य्यमाणापि नकुलं मेऽग्रतोऽहनत्§ ॥ १४४ ।
ततोऽभवन्मम क्रोधो दृष्ट्वा पातितमग्रतः¶ ।
क्रोधासक्तेन तु मया यथेयं परिभाषिता ॥ १४५ ।
मम भार्य्या न भवती न चाहन्तव वै पतिः ।
एतच्च कारणं नान्यत्किञ्चिद्राजन्न संशयः‖ ॥ १४६ ।
ततः पतिवचः श्रुत्वा प्राग्ज्योतिषकुलोद्भवा ।
शिरसा प्रणतिङ्कृत्वा इदं वचनमब्रवीत्** ॥ १४७ ।

---

* न च वै त्यक्तुमर्हसीति (ग) ।

† परिजने जने इति (ग) ।

‡ धर्म्मो यो भिन्नसंशय इति (ग) ।

§ वार्य्यमाणा मया राजन्नकुलश्चाग्रतोऽहत इति (ग) ।

¶ ततोमे जायते मन्युर्दृष्टा न कुलपातनमिति (ग) ।

‖ एष श्लोको (ग) पुस्तके नास्ति ।

** वाक्यमेदमुवाच हेति (ग) ।

अपराधविहीनश्च भीतश्च* भुजगस्तथा।
शतशो वार्य्यमाणेन शीघ्रमेव निपातितः॥ १४८।
ततः सर्पवधं दृष्ट्वा क्रोधसन्तप्तमानसा†।
नाभाषितः किमपि नो मयैतदवधेहि वै‡॥ १४९।
वधूपुत्रवचः श्रुत्वा कोशलानां जनेश्वरः।
उवाच मधुरं वाक्यमुभयोर्जनसंसदि§॥ १५०।
अनेन निहतः सर्पस्त्वया च नकुलो हतः।
कथं वा क्रियते क्रोधस्तन्मे वक्तुमिहार्हथ¶॥ १५१।
हते तु नकुले पुत्र किन्ते क्रोधस्य कारणम्‖।
राजपुत्रि हते सर्पे किं वा ते मन्युकारणम्**॥ १५२।
ततः पितुर्वचः श्रुत्वा कोशलेश्वरनन्दनः।
उवाच मधुरं वाक्यं राजपुत्रो महायशाः॥ १५३।
एतेन किं वा प्रश्नेन नैतत्प्रष्टुं त्वमर्हसि।
एनां पृच्छ महाराज ज्ञास्यते कार्य्यचेष्टितम्॥ १५४।

---

* अनपराधीभीतश्च ह्यद्येति (ग)।

† क्रोधसन्तप्तदर्शनेति (ग)।

‡ अनेन चाहं संवादं किञ्चिदेव प्रभाषितमिति (ग)।

§ यद्धितं शुभमिति (ग)।

¶ नकुलं हतमित्याह यदि सर्पो निपातितः।
किमिदं क्रियते क्रोधमेतन्मे वक्तुमर्हसीति (ग)।

‖ कस्मै मन्युर्भवेत्तत इति (ग)।

** कस्मै मन्युर्भवेदिहेति (ग)।

पुत्त्रस्य वचनं श्रुत्वा कोशलानां जनेश्वरः।
उवाच मधुरं वाक्यं धर्म्मसंयोग्यसाधनम्॥ १५५।
ब्रूहि पुत्त्र यथान्यायं यत्ते मनसि वर्त्तते।
प्रीतिविच्छेदकारणमुभयोरिह कथ्यताम्॥ १५६।
जाताः सम्बन्धिताः पुत्त्राः सर्व्वकामेषु निष्ठिताः।
पितृपृष्टन्तु यद्गुह्यं गोपयन्ति सुताधमाः* ॥ १५७।
सत्यं वा यदि वाऽसत्यं† न ब्रुवन्ति कदाचन।
पतन्ति नरके घोरे रौरवे तप्तबालुके॥ १५८।
पित्त्रा पृष्टन्तु ये ब्रूयुः शुभं वाशुभमेव वा‡।
दिव्याञ्च ते गतिं यान्ति या गतिः सत्यवादिनाम्॥ १५९।
अवश्यमेव तद्वाक्यं वक्तव्यं मम सन्निधौ।
यस्य दोषेण ते पुत्त्र नष्टा प्रीतिर्गुणाकरा॥ १६०।
ततः पितुर्वचः श्रुत्वा कोशलानन्दिवर्द्धनः।
उवाच श्लक्ष्णया वाचा तत्त्रैव जनसंसदि॥ १६१।
गच्छत्वेष§ जनः सर्व्वो यथान्यायं गृहाणि वै।
प्रातस्त्वां कथयिष्यामि यद्वक्तव्यमवश्यकम्¶॥ १६२।

---

* गोपयन्ति नराधमा इति (ग)।

† सत्यञ्च यदसत्यञ्चेति (ग)।

‡ पित्त्रा पृष्टन्तु ये सत्यं वदन्ते वा शुभाशुभमिति (ग)।

§ गच्छत्वेवेति (ग)।

¶ कल्यं ते कथयिष्यामि एवं यदि च रोचते इति (ग)।

प्रभातायान्तु शर्व्वर्य्यां दुन्दुभीनां निनादनैः।
विबुद्धः कोशलश्रेष्ठः सूतमागधवन्दिभिः॥ १६३।
तदा* कमलपत्राक्षो राजपुत्रो महायशाः।
स्नात्वा च मङ्गलैर्युक्तो राजद्वारमुपागतः† ॥ १६४।
ततस्तु कञ्चुकी गत्वा राज्ञे चैव न्यवेदयत्।
द्वारि तिष्ठति पुत्रस्ते तव दर्शनलालसः॥ १६५।
कञ्चुकेस्तु‡ वचः श्रुत्वा कोशलानां जनेश्वरः§।
शीघ्रं प्रवेशय सुतं कञ्चुकेण¶ साधुवाहिनम्।
इत्युक्तो राजपुत्रन्तु प्रावेशयदनुज्ञया॥ १६६।
राजपुत्रः पितुर्वेश्म प्रविश्य नियतः शुचिः।
ववन्दे चरणौ मूर्द्ध्ना निषीदेति सुतन्ततः।
तमब्रवीत्पिता जीव जयेत्युक्त्वा मुदान्वितः॥ १६७।
पितृपुत्रौ तु विज्ञेयौ जनैस्त्वेकत्र संस्थितौ।
हर्षितस्त्वान्तरो वाह्यः कृतकौतुकमङ्गलः॥ १६८।
ततः पुत्रं प्रहस्याह कुमारं स जनाधिपः।
वद पुत्र महाभाग पूर्व्वं पृष्टं मया हि यत्।
युवयोः प्रीतिविच्छेदे कारणं गोपितं हि यत्॥ १६९।

---

* तत इति पाठान्तरं (ग) पुस्तके दृश्यते।

† राजधानीमुपागत इति (ग)।

‡ कञ्चुकिन इति साधु।

§ नरेश्वर इति (ग) पुस्तकपाठः।

¶ कञ्चुकिनेति साधु।

ततो राजकुमारस्तं पितरं प्रत्यभाषत ।
अवश्यमेव वक्तव्यं त्वया पृष्टेन निष्फलम् ।
तद्गुह्यं हि महाराज प्रीतिविच्छेदकारकम् ॥ १७० ।
यदीच्छसि महाराज श्रोतुं गुह्यमिदं महत् ।
आगच्छ तात कुब्जाम्रे मया सह महीपते* ॥ १७१ ।
तत्र ते कथयिष्यामि कोशलाधिपते त्वरन्† ।
यत्त्वया पृच्छितं ह्येतद्गुह्यं पूर्व्वमनिन्दितम् ॥ १७२ ।
ततस्तस्य वचः श्रुत्वा राजपुत्रस्य वै नृपः ।
वाढ़मित्येव तत्राह पुत्रप्रेम्णा समन्वितः ॥ १७३ ।
राजपुत्रे गते सुभ्रु अमात्यानाञ्च सन्निधौ ।
उवाच मधुरं वाक्यं ये वै तत्र समागताः‡ ॥ १७४ ।
अमात्याः शृणुतेमं मे वचनङ्कृतनिश्चयम् ।
कुब्जाम्रकं प्रति वयं गच्छामस्तस्य साधनम् ॥ १७५ ।
शीघ्रं सम्पाद्यताञ्चैव युज्यन्तां गजवाजिनः ।
राज्ञो वचस्ते संश्रुत्य तमूचुः कृतमेव तत् ॥ १७६ ।
इत्युक्त्वा सप्तरात्रेण सर्व्वं सम्पाद्य साधनम् ।
गजाश्वपशुयानादिकार्षापणकधेनुकम् ॥ १७७ ।
सुवर्णरत्नवस्त्राणि अनन्त्वान्यदपेक्षितम् ।

---

* गच्छ कुब्जामकं शीघ्रं तात एवं मया सहेति (ग) पाठः ।

† नृपेति (ग) पुस्तके पाठः ।

‡ ये वै तत्र गताः स्थिता इति (ग) पुस्तकपाठः ।

राजानन्ते समागत्य सिद्धिमत्यूचुरीश्वरम्* ॥ १७८ ।
ततः स राजशार्दूलः पुत्रमाह वसुन्धरे ।
राज्यं शून्यं कथन्त्यक्त्वा गमिष्यामो वयं सुत ॥ १७९ ।
ततः पितुर्वचः श्रुत्वा राजपुत्रो महायशाः ।
उवाच मधुरं वाक्यं गृहीत्वा† चरणौ पितुः ॥ १८० ।
कनीयानपि मे भ्राता एकोदरसमुद्भवः‡ ।
एतस्य दीयतां राज्यं यथान्यायेन चागतम् ॥ १८१ ।
पुत्रस्य वचनं श्रुत्वा कोशलानां कुलोद्वहः§ ।
वर्त्तमानेऽपि च ज्येष्ठे कनीयान् कथमर्हति ॥ १८२ ।
ततः पितुर्वचः श्रुत्वा कोशलायाः कुलोद्भवः ।
उवाच मधुरं वाक्यं पितरन्धर्म्मकारणात् ॥ १८३ ।
अनुजानामि ते तात दीयमानां वसुन्धराम् ।
नास्य धर्म्मविलोपस्तु भुञ्जमानस्य¶ मेदिनीम् ॥ १८४ ।

---

* अत्र (ग) पुस्तके पाठभेदो यथा —

अथ ते सम्रराजेन राजानं तमुवाच ह ।

सज्जानि सर्व्वद्रव्याणि किमाज्ञापयते भवान् ॥

अमात्यानां वचः श्रुत्वा कोशलानामधाधिपः ।

साधु साध्विति चोक्त्वा वै अमात्यजनसंसदि ॥ इति ।

† निपत्य चरणाविति (ग) पुस्तकस्य पाठः ।

‡ एकोदरविनिःसृत इति (ग) पुस्तकपाठः ।

§ स राजा धर्म्मनिश्चित इति (ग) पाठः ।

¶ भुञ्जमानस्येति आर्षम्, भुञ्जत इति साधु ।

नाहङ्कुब्जाम्रकङ्गत्वा निवर्त्तिष्ये कदाचन ।
एतत्सत्यञ्च धर्म्मश्च तात ते कथितं मया* ॥ १८५ ॥
पुत्रेण चाभ्यनुज्ञातः कनीयानभिषेचितः ।
स सुखेनाभ्यनुज्ञातो भूमे भूपतिसत्तमः† ॥ १८६ ॥
ततो दीर्घेण कालेन स्थानं कुब्जाम्रकं गतः ।
अन्तःपुरेण सहितः‡ सर्व्वद्रव्यसमन्वितः ॥ १८७ ॥
ततस्तीर्थविधिङ्कृत्वा दत्त्वा दानानि भूरिशः ।
अन्नवस्त्रसुवर्णानि गोहस्त्यश्वभुवस्तथा ॥ १८८ ॥
ततो बहुतिथे काले व्यतीते सति धीमताम् ।
ततः कदाचिद्भूपालो राजपुत्रमुपस्थितम् ।
दम्पत्योः प्रीतिविच्छेदं गुह्यन्तत्समपृच्छत ॥ १८९ ॥
स्थानं पावनकं वत्स विष्णोः पादसमाश्रयम् ।
दत्तानि धनरत्नानि जातस्तस्य विधिः परः ॥ १९० ॥
इदानीं ब्रूहि सत्यं तद्यत्कृते सुन्दरी स्नुषा ।
अदुष्टकारिणी युक्ता कुलशीलगुणान्विता ।
त्वया मिथ्यैव किन्त्यक्ता तद्गुह्यं वद पुत्रक ॥ १९१ ॥
ततः स पितरम्प्राह रात्रिर्गच्छतु सुप्यताम् ।
श्वः प्रभाते ततः सर्व्वं कथयिष्यामि तत्पुनः ॥ १९२ ॥

---

* तत इति (ग) पुस्तके पाठान्तरं दृश्यते ।

† भूमिपसत्तम इति (ग) पुस्तकपाठः ।

‡ अन्तःपुरसमायुक्त इति (ग) पाठः ।

ततो रात्र्यां व्यतीतायामुदिते च दिवाकरे।*
कृतोदकस्तु गङ्गायां क्षौमवस्त्रविभूषितः॥ १९३।
अर्च्चयित्वा यथान्यायं माञ्चैव गुरुवत्सलः।
पितुः प्रदक्षिणङ्कृत्वा वाक्यमेतदुदाहरत्†॥ १९४।
एह्येहि तात गच्छामः यस्त्वं गुह्यानि पृच्छसि‡।
शृणु तत्त्वेन मे राजन् यत्त्वया पूर्व्वंपृच्छितम्॥ १९५।
राजपुत्रश्च वै राजा सा च पङ्कजलोचना।
गत्वा निर्म्माल्यकूटन्ते यत्तद्वृत्तं पुरातनम्॥ १९६।
निर्म्माल्यन्तु समासाद्य राजपुत्रो महातपाः।
उभौ तौ चरणौ गृह्य पितरं प्रत्यभाषत॥ १९७।
नकुलोऽहं महाराज वसामि कदलीतले।
ततोऽहं कालसंयुक्तः प्राप्तो निर्म्माल्यकूटकम्॥ १९८।
ततस्त्वाशीविषा सर्पी सर्पतेऽत्र जनाधिप।
भक्षयन्ति सुगन्धानि पुष्पाणि विविधानि च॥ १९९।
दृष्ट्वा तु तां महाव्याली क्रोधसंरक्तलोचनः।
अचिरेणैव कालेन तस्याङ्कं सहसा गतः॥ २००।§
तया सह महाराज घोरं युद्धमवर्त्तत।

---

* ततो रजन्यां व्युष्टायामिति (ग) पुस्तकपाठः।

† वाक्यमेतदुवाच हेति (ग) पाठः।

‡ त्वं गुह्यानि यदीच्छसीति (ग) पाठः।

§ (ग) पुस्तके (१९९–२००) श्लोकौ न स्तः।

माघमासस्य द्वादश्यां तत्र कश्चिन्न पश्यति ॥ २०१ ।
युध्यमानस्य मे तत्र गात्रञ्चैव निगूहतः ।
नासावंशे तया दष्टो भुजङ्ग्या च तदन्तरे ॥ २०२ ।
मयापि विषदिग्धेन निहता च भुजङ्गमा* ।
उभौ प्राणान्परित्यज्य उभौ पञ्चत्वमागतौ ॥ २०३ ।
मृतौ स्वकाले राजेन्द्र क्रोधमोहपरिच्युतौ† ।
जातोऽहं तव पुत्त्रस्तु कोशलाधिपते प्रियः ॥ २०४ ।
एवं मे घातितः सर्पस्तत्क्रोधवशनिश्चयात् ।
एतद्गुह्यं मया राजन् यत्त्वया पूर्व्वंपृच्छितम् ॥ २०५ ।
राजपुत्त्रवचः श्रुत्वा वधूर्वचनमब्रवीत् ।
अहं सर्पी महाराज पुरा निर्माल्यकूटके ॥ २०६ ।
युध्यमाना तु तेनैव नकुलेन निपातिता‡ ।
प्राग्ज्योतिषकुले जाता जाता तव वधूस्ततः§ ॥ २०७ ।
तेन क्रोधेन नृपते मूर्च्छिता मरणम्प्रति ।
घातितो नकुलश्चैतद्गुह्यं प्रोक्तं तव प्रभो ॥ २०८ ।
वधूपुत्त्रवचः श्रुत्वा स राजा संशितव्रतः ।
मायातीर्थं समासाद्य ततः पञ्चत्वमागतः ॥ २०९ ।

---

* भुजङ्गमीति पाठः (ग) पुस्तके दृश्यते ।

† क्रोधदोषपरिच्युताविति (ग) पाठः ।

‡ अहं सर्पी महाराज नकुलेन निपातितेति (ग) पुस्तकपाठः ।

§ वधूस्तव उपागतेति (ग) पाठः ।

राजपुत्रो विशालाक्षी राजपुत्री यशस्विनी ।
पौण्डरीके ततस्तीर्थे तेऽपि पञ्चत्वमागताः ।
गतास्ते परमं स्थानं यत्र देवो जनार्द्दनः ॥ २१० ॥
राजा वा राजपुत्रश्च राजपुत्री यशस्विनी ।
मम चैव प्रसादेन तपसश्च वलेन च ।
कृत्वा सुदुष्करं कर्म्म श्वेतद्वीपमुपागताः ॥ २११ ॥
योऽसौ परिजनो देवि कृत्वा तु सुकृतं महत्* ।
सोऽपि सिद्धिं परां प्राप्तः श्वेतद्वीपमुपागतः† ॥ २१२ ॥
एष ते कथिता देवि पुष्टिः कुब्जास्रकस्य च ।
तस्य ब्राह्मणमुख्यस्य रैभ्यस्य कथिता मया ॥ २१३ ॥
एतत्पुण्यं परञ्जप्यं चातुर्वर्ण्येन सर्व्वदा‡ ।
सर्व्वकर्म्मसु मुख्यञ्च एतदेव विशिष्यते§ ।
तेजसाञ्च महत्तेजस्तपसाञ्च महत्तपः ॥ २१४ ॥
एतन्न मूर्खमध्यन्तु पठेच्चापि कदाचन ।
न पठेन्नोष्ठमध्ये तु वेदवेदाङ्गनिन्दके ॥ २१५ ॥
न पठेद्गुरुविद्विष्टे न पठेच्छास्त्रदूषके ।
पठेद्भागवतानाञ्च मध्ये दीक्षावतान्तथा ॥ २१६ ॥

---

* तवेति पाठान्तरं (ग) पुस्तके लक्ष्यते ।

† तेऽपि सिद्धिं परां प्राप्ताः श्वेतद्वीपमुपागताः इति (ग) पाठः ।

‡ एष जप्यश्च मुख्यश्च चातुर्व्वर्ण्यव्यवस्थितैरिति (ग) पाठः ।

§ कार्य्याणाञ्च महाकार्य्यं क्रियाणाञ्च महाक्रियेति (ग) पाठः ।

य एतत्पठते भूमि कल्यमुत्थाय मानवः ।
तारयेच्च स्वकुलजान्* दशपूर्व्वान्दशापरान् ॥ २१७ ।
एतत्तु पठमानो वै यस्तु प्राणान्विमुञ्चति ।
चतुर्भुजश्च जायेत मल्लोकेषु प्रतिष्ठितः ॥ २१८ ।
एतत्ते कथितं भूमि स्थानं कुब्जाम्रके तथा ।
मम भक्तसुखार्थाय किमन्यत्परिपृच्छसि ॥ २१९ ।

इति वराहपुराणे भगवच्छास्त्रे कुब्जाम्रकमाहात्म्ये रैभ्यानुग्रहणं नाम षड्विंशत्यधिकशततमोऽध्यायः ।

सप्तविंशत्यधिकशततमोऽध्यायः ।

सूत उवाच ।

एवं धर्म्मांस्ततः श्रुत्वा बहुमोक्षार्थकारणात् ।
प्रत्युवाच ततो भूमिर्लोकनाथं जनार्द्दनम् ॥ १ ।
अहो प्रभावः क्षेत्रस्य* कथ्यमानोऽतिपुष्कलम् ।

---

* पठंस्तारयते देवीति (ग) पुस्तकस्य पाठः ।

* धर्म्मस्येति (ग) पुस्तकपाठः ।

अहं भारभराक्रान्ता लघुर्जातास्मि धावती* ॥ २ ।
विमोहा च विशुद्धा च शृखमाणा† त्विमां प्रभो ।
अहं लोकेषु विख्याता मुखात्तव विनिःसृता ॥ ३ ।
पुनः पृच्छामि ते देव संशयं धर्म्मसंहितम् ।
येन धर्म्मविधानेन दीक्षा प्राप्येत पुष्कला ॥ ४ ।
एतन्मे परमं गुह्यं परं कौतूहलञ्च मे ।
धर्म्मसङ्ग्रहणार्थाय तद्भवान्वक्तुमर्हसि‡ ॥ ५ ।
ततो महीवचः श्रुत्वा मेघदुन्दुभिनिःस्वनः ।
वराहरूपी भगवान् प्रत्युवाच वसुन्धराम् ॥ ६ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि मम धर्म्मं सनातनम् ।
देवा एतन्न जानन्ति§ ये च योगव्रते स्थिताः ॥ ७ ।
एतं¶ धर्म्मं वरारोहे माङ्गल्यसुखनिःसृतम्‖ ।
अहमेको विजानामि मद्भक्ता ये जना भुवि ॥ ८ ।
यच्च पृच्छसि मे भद्रे दीक्षां भागवतीं कथाम् ।
तच्छृणुष्व वरारोहे कर्म्मसंसारमोक्षणम्** ॥ ९ ।

---

* माधवीति (ग) पुस्तकस्य पाठान्तरम् ।

† शृखमाणेति आर्षं, शृखतीति साधु ।

‡ (ग) पुस्तके श्लोकद्वयं नास्ति ।

§ मम देवा न जानन्तीति (ग) पुस्तकपाठः ।

¶ इममिति (ग) पुस्तकस्य पाठः ।

‖ ममाङ्गविधिनिःसृतमिति (ग) पाठः ।

** कर्म्मसंसारसागरादिति (ग) पाठः ।

मयोक्तां लभते कश्चिद्दीक्षाञ्चैव सुखावहाम्* ।
चातुर्वर्ण्यविधानेन तान्दीक्षां शृणु सुन्दरि† ॥ १० ।
मयि शान्तं मनःकृत्वा तदुत्कृष्टञ्च सुन्दरि ।
अभिगच्छेद्गुरुन्देवि शाधि शिष्योऽस्मि मां गुरो‡ ॥ ११ ।
तदाज्ञान्तु पुरस्कृत्य दीक्षाद्रव्यानथाहरेत् ।
लाजा मधु कुशाश्चैव घृतञ्चामृतसन्निभम् ॥ १२ ।
गन्धं सुमनसो धूपं दीपं प्रापणकादिकम्§ ।
कृष्णाजिनञ्च पालाशं दण्डञ्चैव कमण्डलुम्¶ ॥ १३ ।
घटं वासः पादुकाञ्च‖ शुक्लयज्ञोपवीतकम् ।
यन्त्रिकामर्घपात्रीञ्च चरुस्थालीं सदर्विकाम् ।
तिलव्रीहियवांश्चैव विविधांश्च फलोदकम्** ॥ १४ ।
भक्ष्यं भोज्यान्नपानञ्च कर्म्मण्यांश्चैव सञ्चयान् ।
दीक्षिता यदि भुञ्जन्ति मम कर्म्मपरायणाः ॥ १५ ।
यानि कानि च†† वीजानि रत्नानि विविधानि च ।

---

* मयोक्तां तु वरारोहे सर्व्ववर्णसुखावहामिति (ग) ।

† चातुर्वर्ण्यं प्रवक्ष्यामि दीक्षामेव तु शाश्वतीमिति (ग) ।
अत हरन्ति मनुजा येन गर्भसंसारसागरादित्यधिकः पाठो वर्त्तते ।

‡ शिष्य, अहं तवेति (ग) पुस्तकस्य पाठः ।

§ धूपगन्धाद्य माल्याद्य पालाशी दण्डयष्टिकामिति (ग) पाठः ।

¶ चर्म्मकञ्चाजिनञ्चैव दण्डञ्चैव कमण्डलुमिति (ग) पाठः ।

‖ वासांसि पादुके चैवेति (ग) पाठः ।

** फलांस्तथेति (ग), फलानीति साधु ।

†† तानि कानि चेति (ग) पुस्तकपाठः ।

काचकादीनि* शुभ्राणि तानि शीघ्रमुपाहरेत्॥ १६।
एतान्येवोपहार्य्याणि गुरुमूले ततः परम्।
स्नात्वा मङ्गलसंयुक्तो दीक्षाकामश्च ब्राह्मणः।
गुरोश्चरणौ संस्टह्य ब्रूहि किङ्करवाणि ते॥ १७।
ततस्तु गुर्व्वनुज्ञातो वेदीं कुर्य्याच्च पुष्कलाम्।
ब्राह्मणो दीक्षमाणस्तु चतुरस्रान्तु षोड़श।
हस्तान् कृत्वा तत्र च† कलशोपरि युञ्जयेत्॥ १८।
प्रतिष्ठाप्य विधानेन धान्योपरि दृढं नवम्।
जलेन पूरितं मन्त्रैः पुष्पपल्लवशोभितम्॥ १९।
तस्योपरि तिलैः पूर्णपात्रं स्थाप्य विधानतः।
पूजयेन्मां गुरुं द्रव्यैः शिष्येणैवोपकल्पितैः॥ २०।
तत्रार्च्चनविधिङ्कृत्वा गुरुर्द्धर्म्मविनिश्चयः।
पूर्व्वोक्तानि च‡ द्रव्याणि वेदीमध्यमुपाहरेत्॥ २१।
चतुरः कलशान्दद्याच्चतुष्पार्श्वेषु सुन्दरि।
वारिपूर्णान्द्विजान् शुद्धान् सहकारविभूषितान्॥ २२।
सर्व्वतः शुक्लसूत्रेण वेष्टयेत तथानघे।
पूर्णपात्राणि चत्वारि चतुष्पार्श्वेषु स्थापयेत्॥ २३।
एवं मन्त्रं ततः कृत्वा दद्याद्दीक्षाप्रयोजकः।
सा च मन्त्रा यथान्यायं येन वा तुष्यते गुरुः॥ २४।

---

* कनकादीनीति (ग) पुस्तकस्य पाठः।

† अत्र छन्दोभङ्गः सप्ताक्षरात्मकपादत्वात्।

‡ यानि कानि चेति (ग) पाठः।

यथान्यायेन संगृह्य गुरुकर्म्मविनिश्चितः ।
प्रपद्यावसथं विष्णोर्दीक्षाणां परिकाङ्क्षिणः ॥ २५ ।
उपस्पृश्य यथान्यायं भूत्वा पूर्व्वमुखस्ततः ।
सर्व्वांस्तु श्रावयेच्छिष्यान्दीक्षणार्थं न संशयः* ॥ २६ ।
यस्तु भागवतान्दृष्ट्वा स्वयं भागवतः शुचिः† ।
अभ्युत्थानं न कुर्व्वीत तेनाहन्तु विहिंसितः‡ ॥ २७ ।
कन्यान्दत्त्वा पुनस्तान्तु कर्म्मणा नोपपादयेत् ।
अष्टौ पितृगणास्तेन हिंसिता नात्र संशयः ॥ २८ ।
भार्य्यां प्रियसखीं यस्तु साध्वीं हिंसति निर्घृणः ।
न तेन तां प्राप्नुवन्ति हिंसका दुष्टयोनिजाः§ ॥ २९ ।
ब्रह्मघ्नश्च कृतघ्नश्च गोघ्नश्च कृतपातकाः ।
एतान्छिष्यान् विवर्ज्जेत¶ उक्ता ये चान्यपातकाः ॥ ३० ।
विल्ववृक्षोदुम्बरश्च तथा चान्ये कदाचन ।
कर्म्मण्याश्चैव ये वृक्षा न छेत्तव्याः कदाचन ॥ ३१ ।
यदिच्छेत्परमां सिद्धिं मोक्षधर्म्मं सनातनम् ।
भक्ष्याभक्ष्यञ्च तं शिष्यं वेदितव्यं तदन्तरे ॥ ३२ ।
करीरस्य वधः शस्तः फलान्यौदुम्बरस्य च ।

---

* सर्व्वेषां श्रावयेद्विद्यां रक्षणार्थं न संशय इति (ग) पाठः ।

† भूत्वा भागवत इति (ग) पुस्तकपाठः ।

‡ अहं तेनापि हिंसित इति (ग) पाठः ।

§ न तेषां पुनरावृत्तिः हिंसितस्याथ सुन्दरीति (ग) पाठः ।

¶ विवर्ज्जयेति साधु ।

सद्योभक्षी भवेत्तेन अभक्ष्या पूतिवासिका॥ ३३।
न भक्षणीयं वाराहं मांसं मत्स्याश्च सर्व्वशः*।
अभक्ष्या ब्राह्मणैरेते दीक्षितैश्च† न संशयः॥ ३४।
परीवादं न कुर्व्वीत न हिंसां वा कदाचन।
पैशुन्यञ्च न कर्त्तव्यं स्तैन्यं वापि कदाचन‡॥ ३५।
अतिथिञ्चागतन्दृष्ट्वा दूराध्वानं गतं क्वचित्§।
संविभागस्तु कर्त्तव्यो येन केनापि पुत्रक॥ ३६।
गुरुपत्नी राजपत्नी ब्राह्मणस्त्री¶ कदाचन।
मनसापि न गन्तव्या एवं विष्णुः प्रभाषते॥ ३७।
कनकादीनि रत्नानि यौवनस्था च कामिनी।
तत्र चित्तं न कर्त्तव्यमेवं विष्णुः प्रभाषते॥ ३८।
दृष्ट्वा परस्य भाग्यानि आत्मनो व्यसनन्तथा।
तत्र मन्युर्न कर्त्तव्य एवं धर्म्मः सनातनः॥ ३९।
एवं ततः श्रावयीत‖ दीक्षाकामं वसुन्धरे।
छत्रञ्चोपानहञ्चैव मनसा चोपकल्पयेत्॥ ४०।
द्वे द्वे औदुम्बरस्य पत्रे वेदीमध्ये तु स्थापयेत्।

---

* भुक्त्वा मांसं वराहस्य मत्स्यस्य सकलेश्वरीति (ग) पाठः।

† दीक्षितैवेति (ग) पुस्तकपाठः।

‡ पिशुनस्तेनी वा क्वचिदिति (ग) पाठः।

§ दूरस्थानागतं क्वचिदिति (ग) पुस्तकपाठः।

¶ ब्राह्मणी वेति (ग) पुस्तकस्य पाठः।

‖ श्रावयित्वेति (ग) पाठः।

क्षुरञ्चैव वरारोहे* जलपूर्णञ्च भाजनम् ।
ममावाहनपूर्व्वन्तु मन्त्रेण विधिनार्च्चयेत् ॥ ४१ ।

ओं मन्त्रः—सप्त द्वीपानि सप्त सागराश्च सप्त पर्व्वताश्च दश स्वर्गसहस्राश्च† समस्ताश्च नमोऽस्तु सर्व्वास्ते हृदये वसन्ति। यश्चैतद्वर्षति पुनरुन्नमति । ओं भगवन्वासुदेव ममैतत्सारय युक्तं वराहरूपस्पृष्टेन‡ पृथिव्यान्तु मन्त्रानुस्मरणञ्च य आज्ञापयानुभावनास्माकमाज्ञप्तमनुचिन्तयित्वा भगवन्नागच्छ दीक्षाकामविप्रस्त्वत्प्रसादात्तु दीक्षति। एतन्मन्त्रमुदाहरित्वा§ शिरसा जानुभ्यामवनिं गतेन भवितव्यम् । ओं स्वागतं स्वागतवानिति ।

तत एतेन मन्त्रेण आनयित्वा वसुन्धरे ।
अर्घ्यं पाद्यञ्च दातव्यं मन्त्रेण विधिनिश्चयात् ॥ ४२ ।

मन्त्रः—अक्षतघ्ने देवानसुराक्षतघ्नरुद्रेण ब्राह्मणाय च लब्धं सर्व्वमिमां भगवतेऽस्तु दत्तं प्रतिगृह्णीष्व च लोकनाथ ।

एवं भूमे ततो दत्त्वा अर्घ्यम्पाद्यञ्च कर्म्मणा ।
क्षुरं गृहीत्वा¶ यथान्यायमिमं मन्त्रमुदीरयेत् ॥ ४३ ।

मन्त्रः—एवं वरुणः पातु शिष्य ते वपतः शिरः ।

---

* उदुम्बरं वरारोहे इति (ग) पुस्तकस्य पाठः ।

† सप्त स्वर्गसहस्राश्चेति (ग) पुस्तकधृतपाठः ।

‡ वराहरूपतुष्टेनेति (ग) पुस्तकस्य पाठान्तरम् ।

§ उदाहृत्येति साधु ।

¶ चीरं गृह्येति (ग) पुस्तकपाठो न समीचीनः ।

जलेन विष्णुयुक्तेन दीक्षा संसारमोक्षणम् ॥ ४४ ।
एकस्य कलशन्द्याल्लक्ष्मंकारस्य सुन्दरि ।
निष्कलन्तु शिरः कृत्वा शोणितेन विवर्ज्जितम् ।
पुनः स्नानं ततः कृत्वा शीघ्रमेव न संशयः ॥ ४५ ।
एतस्य विधिवत्कृत्वा दीक्षाकामस्य सुन्दरि ।
दत्त्वा संसारमोक्षाय सर्व्वकामविनिश्चितः ।
जानुभ्यामवनीं गत्वा इमं मन्त्रमुदीरयेत् ॥ ४६ ।
औं मन्त्रः—वेदाम्यहं* भागवतांश्च सर्व्वान्†

सुदीक्षिता ये गुरवश्च सर्व्वे ।
विष्णुप्रसादेन च लब्धदीक्षा
मम प्रसीदन्तु नमामि सर्व्वान् ॥ ४७ ।

नत्वा तु‡ भगवद्भक्तान् प्रज्वाल्य च हुताशनम् ।
घृतेन मधुमिश्रेण लाजाक्षणतिलैस्तथा§ ॥ ४८ ।
सप्तवारांस्ततो दत्त्वा विंशतिञ्च तिलोदनम्¶ ।
जानुभ्यामवनिं गत्वा इमं मन्त्रमुदाहरेत् ॥ ४९ ।
मन्त्रः—अश्विनौ दिशः सोमसूर्य्यौ साक्षिमानं‖ वयं प्रसन्नाः शृणवन्तु मे सत्यवाक्यं वदामि ।

---

* वेदामीति आर्षप्रयोगः, वेद्मीति साधु ।

† वन्दामि भो भागवतांश्च सर्व्वानिति (ग) पाठः ।

‡ नमित्वेति (ग) पाठस्तु न साधुः ।

§ क्षणतिलेन चेति (ग) पुस्तकपाठः ।

¶ विंशत्येवं प्रसोदनमिति (ग) पाठः प्रामादिकः ।

‖ साक्षिपात्रमिति (ग) पाठः ।

सत्येन धार्य्यते भूमिः सत्येन तिष्ठति भूमिः ।†
सत्येन गच्छते* सूर्य्यो वायुः सत्येन वाति च ॥ ५० ।

एवं सत्यं ततः कृत्वा ब्राह्मणोवीत्त्वणं पुनः ।
गुरुम्प्रसादयेत्तत्र मन्त्रेण विधिनार्च्चयन् ॥ ५१ ।

तिस्रः प्रदक्षिणाः कृत्वा देवं भागवतं गुरुम् ।
गुरुपादौ तु संग्रह्य‡ इमं मन्त्रमुदीरयेत् ॥ ५२ ।

मन्त्रः—गुरुदेवप्रसादेन लब्धा दीक्षा यदृच्छया ।
यच्चैवापकृतं§ किञ्चिद्गुरुर्मर्षयतां मम ॥ ५३ ।

एवं प्रसादयित्वा तु शिष्यो मन्त्रेण सुन्दरि ।
वेदीमध्ये स्थापयित्वा भूत्वा पूर्व्वमुखस्ततः ।
शिष्यमेव ततो दृष्ट्वा गृहीत्वा च कमण्डलुम् ।
शुक्लयज्ञोपवीतञ्च इमं मन्त्रमुदाहरेत् ॥ ५४ ।

मन्त्रः—विष्णुप्रसादेन गतोऽसि सिद्धिं
प्राप्ता च दीक्षा सकमण्डलुश्च ।
गृहीत्वा तु कराभ्यां युक्तोऽसि
कर्म्मणा क्रियायाञ्चैव ॥ ५५ । ¶

---

* गच्छतीति साधु ।

† भूमिः सत्येन वर्त्तते इति (ग) पुस्तकस्य पाठः ।

‡ गुरवे चरणौ गृह्येति (ग) पाठो न साधुः ।

§ यत्ते पापं कृतमिति (ग) पुस्तकपाठः ।

¶ आगृह्य राज्यकराभ्यां युक्तो सिद्धिं कर्म्मणा क्रियायाञ्चैवेति (ग) पाठः ।

मुखपद्मं ततः कृत्वा दीक्षितो गुरुणा तथा।
सर्व्वप्रदक्षिणङ्कृत्वा इमं मन्त्रमुदाहरेत्॥ ५६।

अधोऽधो भूत्वा यद्यहम्भ्राम्य-
ल्लँब्धो गुरुर्विष्णुदीक्षा च लब्धा।
तव प्रसादाच्च गुरो यथा च॥ ५७।

एतेन मन्त्रेण मुखं पद्मं कारयेत्। शौचसिक्ते वै कुर्य्याद्देवान् तन्तुवाससम्।

एवं वै वास आदत्ते गृह्य वस्त्र कमण्डलुम्।
इमं लोकेषु विख्यातं शोधनं सर्व्वकर्म्मसु॥ ५८।

मन्त्रः—गृह्णीष्व* गन्धपात्राणि सर्व्वगन्धं सुखोचितम्।
सर्व्वत्रैष्णवकं शुद्धं सर्व्वसंसारमोक्षणम्।
मधुपर्कं गृहीत्वा तु इमं मन्त्रमुदीरयेत्† ॥ ५९।

मन्त्रः—गृहाण‡ मधुपर्कञ्च प्रार्थकाय विशोधनम्।
ततो गृहीत्वा चरणौ गुरोर्यत्नात्सुतोषयेत्§ ॥ ६०।
शिरसा¶ चाञ्जलिङ्कृत्वा मनश्चैव सुसंयतम्।
गुरूपदिष्टं सन्धार्य्य‖ इमं मन्त्रमुदीरयेत्** ॥ ६१।

---

* गृह्ण त्वं गन्धपात्राणीति (ग) पुस्तकपाठः।

† एतदर्द्धं (ग) पुस्तके नास्ति।

‡ गृह्ण त्वमिति (ग) पुस्तकधृतपाठः।

§ उभौ तु चरणौ गृह्य उपाध्यायोपकल्पयेदिति (ग) पाठः।

¶ मनसेति (ग) पुस्तकस्य पाठान्तरम्।

‖ अथ गृह्य यथान्यायमिति (ग) पाठः।

** उदाहरेदिति (ग) पुस्तकपाठः।

मन्त्रः—शृण्वन्तु मे भागवतास्तु सर्व्वे

गुरुश्च मे सर्व्वकामक्षयञ्चकार ।

अहं शिष्यो दासभूतस्तथैव*

देवसमो गुरुश्च मे तथोपपन्नम्† ॥ ६२ ।

एषागमे ब्राह्मणस्य दीक्षा भूमे ह्युदाहृता‡ ।

त्रयाणामथ वर्णानां मम दीक्षाविधीञ्छृणु ॥ ६३ ।

एतेनैव विधानेन दीक्षयेत वसुन्धरे ।

उभौ च प्राप्नुतां सिद्धिमाचार्य्यः शिष्य एव च ॥ ६४ ।

इति वराहपुराणे ब्राह्मणदीक्षासूत्रं नाम

सप्तविंशत्यधिकशततमोऽध्यायः ।

अष्टाविंशत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

क्षत्रियस्य प्रवक्ष्यामि तच्छृणुष्व* वसुन्धरे ।

त्यक्त्वा प्रहरणान्सर्व्वान्यत्किञ्चित्पूर्व्वशिक्षितम् ।

---

* तवेति (ग) पुस्तकधृतः पाठः ।

† दासभूतश्च देव समयश्च मे यथोपपन्न इति (ग) पाठः ।

‡ एषागमेषु वर्णेषु दीक्षां भूमि विजानतेति (ग) पाठः ।

---

* शृणोहीति (ग) पाठः ।

पूर्व्वमन्त्रेण* मे भूमे तस्य दीक्षाञ्च कारयेत्॥ १।
मया च पूर्व्वमुक्तानि यानि संसारकानि च।
तानि सर्व्वाणि चानीय एकं वर्ज्ज्यं यशस्विनि॥ २।
न दद्यात्कृष्णसारस्य चर्म्म तत्र कदाचन।
पालाशं दण्डकाष्ठञ्च दीक्षायान्न तु कारयेत्॥ ३।
छागस्य चैव कृष्णस्य चर्म्म तत्र प्रदापयेत्।
आश्वत्थं दण्डकाष्ठन्तु दीक्षायान्तदनन्तरम्॥ ४।
कृत्वा द्वादशहस्तान्तु वेदीन्तत्रोपलेपयेत्।
सर्व्वं ममोक्तं कर्त्तव्यं यच्च मे† पूर्व्वभाषितम्॥ ५।
एवं क्षत्रियदीक्षायां सर्व्वं सम्पाद्य यत्नतः‡।
चरणौ मम सङ्गृह्य§ इमं मन्त्रमुदाहरेत्॥ ६।
मन्त्रः—त्यक्तानि विष्णो शस्त्राणि त्यक्तं सर्व्वं क्षत्रियकर्म्म सर्व्वं त्यक्त्वा देवं विष्णुं प्रपन्नोऽथ संसाराद्वै जन्मनान्तारयस्व।
एवं ततो वचश्चोक्त्वा क्षत्रियो मम पार्श्वतः।
उभौ च चरणौ गृह्य इमं मन्त्रमुदीरयेत्¶॥ ७।

---

* पूर्व्वक्रमेणेति (ग) पुस्तके पाठो दृश्यते।

† यन्मयेति (ग) पुस्तकपाठः।

‡ एवं कृत्वा ततः सर्व्वं क्षत्रिये दीक्षाकारिणीति (ग) पाठः।

§ ममैव चरणं गत्वेति (ग) पुस्तकपाठः।

¶ मन्त्रमुदाहरेदिति (ग) पाठः।

मन्त्रः—नाहं शस्त्रं देवदेव स्पृशामि
परापवादं न च देव ब्रवीमि ।
कर्म्म करोमि संसारमोक्षण-
न्त्वया चोक्तमेव वराहसंस्थान* ॥ ८ ।

तत एवं वचो ब्रूते सर्व्वञ्चैवात्र पूजयेत्† ।
विविधैर्गन्धपत्रैश्च धूपैश्चैव यथोदितम् ॥ ९ ।
यथोक्तेनैव तान्भूमे भोजयेत्तदनन्तरम्‡ ।
शुद्धान्भागवतांश्चैव§ एवमेतन्न संशयः ॥ १० ।
एषा वै क्षत्रिये दीक्षा देवि संसारमोक्षणम् ।
मत्प्रसादेन कर्त्तव्यं यदीच्छेत्सिद्धिमुत्तमाम् ॥ ११ ।
वैश्यस्य चैव वक्ष्यामि¶ शृणु तत्त्वेन सुन्दरि ।
दीक्षा च यादृशी तस्य‖ यथा भवति सुन्दरि ॥ १२ ।
त्यक्त्वा तु वैश्यकर्म्माणि मम कर्म्मपरायणः ।
यथा च लभते सिद्धिं तृतीया वर्णसंस्थितिः ॥ १३ ।
सर्व्वं तत्र समानीय यन्मया पूर्व्वभाषितम् ।
दशहस्तां ततः कृत्वा वेदीं वेदविचेतितः** ॥ १४ ।

---

* संस्थितमिति (ग) पुस्तकपाठो न समीचीनः ।

† योजयेदिति (ग) पुस्तकस्य पाठः ।

‡ गोपयेत्तदनन्तरमिति (ग) पुस्तकपाठः ।

§ शुभैर्भागवतैश्चेति (ग) पुस्तकस्य पाठः ।

¶ वैश्यस्यैव प्रवक्ष्यामीति (ग) पाठान्तरम् ।

‖ तत्रेति (ग) पुस्तकपाठो न सुसङ्गतः ।

** विंशद्धस्तां समालिप्य पूर्व्वन्यायेन कारयेदिति (ग), तत्र परश्लोकस्य पूर्व्वार्द्धं नास्ति

लेपयेद्गोमयेनादौ पूर्व्वन्यायेन तत्र वै।
चर्म्मणापि तु छागस्य स्वगात्रं परिवेष्टयेत्॥ १५॥
उदुम्बरं दन्तकाष्ठं गृहीत्वा दक्षिणे करे*।
शुद्धभागवतानाञ्च कृत्वा त्रिः परिवर्त्तनम्†।
जानुभ्यामवनीङ्कृत्वा इमं मन्त्रमुदीरयेत्‡॥ १६॥
मन्त्रः—अहं वैश्यो भवन्तमुपागतः
प्रमुच्य कर्म्माणि च वैश्ययोगम्।
दीक्षा च लब्धा भगवत्प्रसादा-
त्प्रसीदतां§ मे भवबन्धमोक्षणम्॥ १७॥
मामेवं सोऽपि चोक्त्वा वै मम कर्म्मप्रसादवान्¶।
गुरोश्च चरणौ गृह्य इमं मन्त्रमुदाहरेत्॥ १८॥
त्यक्त्वा वै कृषिगोरक्षावाणिज्यक्रयविक्रयम्।
लब्धा च त्वत्प्रसादेन विष्णुदीक्षा मयाऽधुना‖॥ १९॥
देवाभिवादनङ्कृत्वा पुरो भागवतेषु च।
पश्चात्तु भोजनं दद्यादपराधवहिष्कृतम्॥ २०॥
एवं दीक्षा तु वैश्यानां मम मार्गानुसारिणाम्।

---

* गृह्य हस्ते च दक्षिणे इति (ग) पाठः।

† कुर्य्याद्भागवतान् शुद्धान् त्रीणि वारान् प्रदक्षिणमिति (ग) पाठः।

‡ मन्त्रमुदाहरेदिति (ग) पुस्तकपाठः।

§ प्रसीदेति साधु।

¶ मम त्वेवं ततश्चोक्त्वा मम कर्म्मप्रसादनादिति (ग) पाठः।

‖ विष्णुदीक्षाऽहं कामये इति (ग) पाठः।

येन मुच्यन्ति* सुश्रोणि घोरसंसारसागरात् ॥ २१ ।
शूद्रस्यापि प्रवच्यामि मद्भक्तस्य वराङ्गने† ।
यस्तु दीक्षां समासाद्य मुच्यते सर्व्वकिल्विषैः ॥ २२ ।
सर्व्वसंस्कारद्रव्याणि मया पूर्व्वोदितानि च ।
दीक्षाकामस्य शूद्रस्य शीघ्रं तानि प्रकल्पयेत् ॥ २३ ।
अष्टहस्तां ततो देवि संलिप्य नीयतां ततः ।
चर्म्म नीलस्य छागस्य कल्पयेच्छूद्रयोनये ।
दण्डञ्च वैणवं दद्यान्नीलं वस्त्रञ्च तस्य वै‡ ॥ २४ ।
एवं गृहीत्वा शूद्रोऽपि दीक्षायाः कारणं परम्§ ।
ममैव शरणं गत्वा इमं मन्त्रमुदाहरेत् ॥ २५ ।
मन्त्रः—शूद्रोऽहं शूद्रकर्म्माणि मुक्त्वा भक्त्यञ्च सर्व्वशः ।
भक्ष्याभक्ष्यं ततस्त्यक्त्वा त्यक्त्वा च शूद्रकर्म्म च ॥ २६ ।
एवं वदेत्ततो देवि¶ शूद्रो दीक्षाभिकाङ्क्षिणम् ।
विमुक्तः सर्व्वपापेभ्यो लब्धसंज्ञो गतस्पृहः ॥ २७ ।
उभौ तौ चरणौ गृह्य गुरोर्वै तदनन्तरम् ।
गुरोः प्रसादनार्थाय इमं मन्त्रमुदाहरेत् ॥ २८ ।

---

* मुच्यन्ते इति साधु । मुच्येत इति (ग) पुस्तकपाठः ।

† वसुन्धरे इति (ग) पुस्तकस्य पाठः ।

‡ उपलिप्य सप्तहस्तं स्थण्डिलं तदनन्तरम् ।
चर्म्मणा कृष्णछागस्य तस्य गात्राणि वेष्टते ॥ इति (ग) पाठः ।

§ एवं गृह्य यथान्यायं शूद्रोदीक्षाय कारणमिति (ग) पाठः ।

¶ देवीति (ग) पाठः ।

मन्त्रः—विष्णुप्रसादे गुह्यं प्रसन्नात्पूर्व्ववच्च लब्धा चैव संसारमोचणाय करोमि कर्म्म प्रसीद।

एतन्मन्त्रं समुच्चार्य्य कुर्य्यात्तत्र प्रदक्षिणम्।
चतुरश्च यथान्यायं पुनश्चैवाभिवादयेत्॥ २९।
अनन्तरन्ततः कुर्य्याद्गन्धमाल्येन चार्च्चनम्।
भोजयेच्च* यथान्यायमपराधविवर्ज्जितः॥ ३०।
दीक्षा एषा च शूद्राणामुपचारश्च ईदृशः।
चतुर्णामपि वर्णानां दुःखसंसारमोक्षणम्॥ ३१।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व† वसुन्धरे।
चतुर्णामपि वर्णानां यथा छत्रं‡ प्रदीयते॥ ३२।
ब्राह्मणे पाण्डुरञ्छत्रं क्षत्रिये रक्तमेव च।
वैश्याय पीतं वै दद्यान्नीलं शूद्राय दापयेत्॥ ३३।

सूत उवाच।

चातुर्वर्ण्यस्य श्रुत्वा वै सा मही संशितव्रता।
वराहं पुनरप्याह नत्वा सा धरणी तदा§॥ ३४।

धरोवाच¶।

श्रुता दीक्षा यथान्यायं चातुर्वर्ण्यस्य केशव।

---

* भोजयेतेति (ग) पुस्तकस्य पाठः।

† शृणोहीति (ग) पुस्तकपाठः।

‡ शस्त्रमिति (क), (ख) पुस्तकयोः पाठः।

§ वराहरूपिणं वन्द्यं प्रत्युवाच वसुन्धरेति (ग) पाठः।

¶ धरण्युवाचेति (ग) पाठः।

दीक्षितैः किन्नु कर्त्तव्यं तव कर्म्मपरायणैः ॥ ३५ ।
ततो महीवचः श्रुत्वा मेघदुन्दुभिनिःस्वनः ।
वराहरूपी भगवानुवाच स महाद्युतिः ॥ ३६ ।

वराह उवाच ।

शृणु तत्त्वेन कल्याणि यन्मां त्वं परिपृच्छसि ।
सर्व्वत्र चिन्तनीयोऽहं गुह्यमेव गणान्तिकम् ॥ ३७ ।
नारायणवचः श्रुत्वा धरणी शंसितव्रता ।
हृष्टतुष्टमनास्तत्र श्रुत्वा तच्च महौजसम् ।
शुचिर्भागवतां श्रेष्ठा तव कर्म्मणि नित्यशः ॥ ३८ ।
ततः कमलपत्राक्षी भक्ताभक्तेषु वत्सला ।
कराभ्यामञ्जलिङ्कृत्वा नारायणमथाब्रवीत् ॥ ३९ ।

धरण्युवाच ।

त्वद्भक्तेन महाभाग विधिना दीक्षितेन च ।
तव चिन्तापरेणात्र किङ्कर्त्तव्यञ्च माधव ॥ ४० ।
केन चिन्तयितव्यस्त्वमचिन्त्यो* मानुषैः परः ।
किञ्च भागवतैः कार्य्यं यथावित्तं न शक्यते ॥ ४१ ।
ततो भूम्या वचः श्रुत्वा आदिरव्यक्तसम्भवः ।
मधुरं स्वरमादाय प्रत्युवाच वसुन्धराम् ॥ ४२ ।

वराह उवाच ।

देवि तत्त्वेन वक्ष्यामि यन्मां त्वं परिपृच्छसि ।

---

* चिन्तयसे देवेति (ग) पाठः ।

येन चिन्तयसे चिन्तां मम कर्म्मपरायणा* ॥ ४३ ।
एषा गणान्तिका नाम दीक्षाङ्गबीजनिःसृता ।
एतद्गुह्यां महाभागे मम चिन्तां विचिन्तयेत् ॥ ४४ ।
दीक्षितेन तु शुद्धेन मम निश्चितकर्म्मणा† ।
ग्रहीतव्यं‡ विशालाक्षि मन्त्रेण विधिनात्र वै ॥ ४५ ।
यस्तु भागवतो भूत्वा तद्गृह्णाति गणान्तिकाम् ।
जनस्य दर्शनस्पर्शसंयुक्तां वामसंयुताम् ।
तस्य धर्म्मो न विद्येत दीक्षा तस्य महाफला§ ॥ ४६ ।
यस्तु गृह्णाति सुश्रोणि मन्त्रपूतां गणान्तिकाम् ।
आसुरी नाम सा दीक्षा यथाधर्मः प्रवर्त्तते ॥ ४७ ।
यस्माद्गणान्तिकां गुह्यां चिन्तयेच्छुद्धमानसः ।
गुह्यां गणान्तिकां यो मां चिन्तयेत्स बुधोत्तमः¶ ।
जन्मान्तरसहस्राणि चिन्तिता तेन तेन सः ॥ ४८ ।
ग्रहणस्य प्रवक्ष्यामि यथा शिष्याय दीयते ।
मन्त्रं लोकसुखार्थाय तच्छृणुष्व वसुन्धरे‖ ॥ ४९ ।

---

* चिन्ता चिन्तयते मम कर्म्मपरायणः इति (ग) पाठः ।

† दीक्षितेन विशुद्धेन विधिदृष्टेन कर्म्मणेति (ग) पाठः ।

‡ मद्धितार्थमिति (ग) पुस्तकस्य पाठान्तरम् ।

§ न स दीक्षित उच्यत इति (ग) पाठः ।

¶ गुह्यां गणान्तिकां देवी यो मां चिन्तयते बुध इति (ग) पाठः ।

‖ मन्त्रं लोकसुखार्थस्य तच्छृणोहि वसुन्धरे इति (ग) पाठः ।

कौमुदस्य तु मासस्य मार्गशीर्षस्य वाप्यथ* ।
वैशाखस्यापि मासस्य शुक्लपक्षे तु द्वादशी ॥ ५० ॥
कुर्य्यान्निरामिषं तत्र दिनानि त्रीणि निश्चितः ।
तस्मिन् गणान्तिकं प्राह्यं मम धर्म्मविनिश्चयात्† ॥ ५१ ॥
ममाग्रतो वरारोहे प्रज्वाल्य च हुताशनम् ।
कुशैरास्तरणङ्कृत्वा‡ स्थापयित्वा गणान्तिकम् ॥ ५२ ॥
ततः शिष्यो गुरुश्चैव दीक्षितः शुचिरुत्तमः ।
नमो नारायणेत्युक्ता इमं मन्त्रमुदीरयेत् ॥ ५३ ॥
मन्त्रः—या धारिता पूर्व्वपितामहेन§
ब्रह्मण्यदेवेन भवोद्भवेन ।
नारायणाद्दक्षिणगात्रजातां
हे शिष्य गृह्णीष्व स वै त्वमेव ॥ ५४ ॥
तत एतेन मन्त्रेण गुरुर्गृह्य¶ गणान्तिकम् ।
शिष्याय दत्त्वा स्निग्धाय इमं मन्त्रमुदीरयेत्‖ ॥ ५५ ॥
मन्त्रः—नारायणस्य दक्षिणगात्रजातां
त्वशिष्य गृह्णीष्व समयेन देवीम् ।

---

* मार्गशीर्षस्य वा तथेति (ग) पाठः ।

† तस्मिन् गणान्तिकां प्राप्य मम धर्म्मविनिश्चयादिति (ग) पाठः ।

‡ संस्तरणं कृत्वेति (ग) पुस्तकस्य पाठः ।

§ पाद्यादिना पूजिता पितामहेनेति (ग) पाठः ।

¶ पुनर्गृह्य गणान्तिकामिति (ग) पाठः ।

‖ शिष्याय प्रददौ तत्र पुनर्मन्त्रमुदाहरेदिति (ग) पाठः ।

एतद्विचिन्त्यापरएव भूत्वा
भवे पुनर्भावनमेति नैव ॥ ५६ ।

धरण्युवाच ।

स्नानोपकल्पनान्तेषु किङ्कर्त्तव्यन्तु माधव ।
प्रसाधनविधिञ्चैव केन मन्त्रेण कल्पयेत्* ।
अकर्म्मण्येन मुच्येत तत्र कर्म्मपरायणः ॥ ५७ ।
ततो भूम्या वचः श्रुत्वा लोकनाथो जनार्द्दनः ।
धर्म्मसंयुक्तवाक्येन प्रत्युवाच वसुन्धराम् ॥ ५८ ।

वराह उवाच ।

देवि तत्त्वेन वक्ष्यामि यन्मान्त्वं परिपृच्छसि ।
स्नानस्यैवोपचाराणि यानि कुर्व्वन्ति कर्म्मिणः ॥ ५९ ।
वृत्तेष्वेवोपचारेषु जलप्रधानाणिकेषु च ।
कङ्कतीञ्चाञ्जनञ्चैव दर्पणञ्चैव सुन्दरि ।
यथा मन्त्रेण दातव्यं तच्छृणुष्व वसुन्धरे† ॥ ६० ।
स्पृष्ट्वा तु मम गात्राणि क्षौमवस्त्रेण संवृतः ।
अञ्जनं कङ्कतीञ्चैव शीघ्रमेव प्रसादयेत्‡ ॥ ६१ ।
ततो जानुस्थितो भूत्वा मम कर्म्मपरायणः ।

---

* कारयेदिति (ग) पुस्तकस्य पाठः ।

† कङ्कतीञ्चाञ्जनञ्चैव शीघ्रमेव प्रकल्पयेत् ।
दर्पणञ्च वरारोहे येन मन्त्रेण दीयते ॥ इति (ग) ।

‡ प्रकल्पयेदिति (ग) पाठः ।

अञ्जलौ कङ्कतीं* गृह्य इमं मन्त्रमुदाहरेत् ॥ ६२ ।

मन्त्रः—एतां कङ्कतीमञ्जलिस्थां प्रगृह्य†

प्रसीद नारायण शिरः प्रसाधि हि ।

महानुभाव विश्वनेत्रे स्वनेत्रे

याभ्यां पश्यसे-त्वं त्रिलोकीम् ।

लोकप्रभो सर्व्वलोकप्रधान

एषो जनमञ्जनं लोकनाथ ॥ ६३ ।

ततः संस्नापयेद्देवं मन्त्रेणानेन सुव्रतम् ॥ ६४ ।

मन्त्रः—देवदेव स्नानीयमिदं मम कल्पितं सुवर्णकलसं गृहाण प्रसीद एषोऽञ्जलिर्मया परिकल्पितःस्नाहि स्नाहीति‡।

नमो नारायणेत्युक्ता इमं मन्त्रमुदीरयेत् ॥ ६५ ।

मन्त्रः—एषा मया माधव त्वत्प्रसादा-

द्गुरुप्रसादाच्च हि मन्त्रपूजा ।

प्राप्ता ममैषा च गणान्तिका वै

भवेदधर्म्मो न च मे कदाचित् ॥ ६६ ।

य एतेन विधानेन मम कर्म्मणि दीक्षितः ।

गुरोर्गृहीत्वा महतो मम लोकाय गच्छति ।

कुशिष्याय न दातव्या पिशुनाय शठाय च ॥ ६७ ।

---

* अञ्जलिकाणकमिति (ग) पुस्तकपाठः ।

† एषोऽञ्जलिं काणकं देव इति (ग) पाठः ।

‡ एष पाठः (ग) पुस्तके नास्ति ।

एषा चैव वरारोहे गृहीत्वा गणनान्तिका।
सुशिष्याय च दातव्या हस्ते चैव गणान्तिका॥ ६८।
उत्तमाष्टाधिकशतं पञ्चाशच्चतुर्थमध्यमा।
तदर्द्धं कन्यसी चापि परिमाणेन सुन्दरि* ॥ ६९।
रुद्राक्षैरुत्तमा सा तु मध्यमा पुत्त्रजीवकैः† ।
पद्माक्षैः कन्यसी ज्ञेया देवि ते कथिता मया॥ ७०।
एतत्कश्चिन्न जानाति‡ जन्मान्तरशतैरपि।
सर्व्वलोकहितां शुद्धां मोक्षकामां गणान्तिकाम्॥ ७१।
नोच्छिष्टः संस्पृशेत्तान्तु§ स्त्रीणां हस्ते न कारयेत्।
आकाशे स्थापनं कुर्य्यान्न च वामेन संस्पृशेत्॥ ७२।
न दर्शयेच्च कस्यापि चिन्तयित्वा तु पूजयेत्¶ ।
एतत्ते परमं गुह्यमाख्यातं मोक्षदायकम्॥ ७३।
एवं हि विधिपूर्व्वेण पालयेत गणान्तिकाम्‖ ।
विमुक्तो मम भक्तश्च मम लोकाय गच्छति॥ ७४।

---

* परिमाणं विधीयत इति (ग) पुस्तकपाठः।

† रुद्राक्षा उत्तमा चैव पुत्त्रजीवकमध्यमा इति (ग) पाठः।

‡ एतन्न जानते कश्चिदिति (ग) पाठः।

§ नोच्छिष्टेन तु स्प्रष्टव्या इति (ग) पाठः।

¶ यदीच्छेत् परमां गतिमिति (ग) पाठः।

‖ गुह्यात्तु परमं गुह्यं सन्ध्योपासनमेव च।
एष मन्त्रश्च जापश्च पूज्या वै गणनान्तिकेति (ग) पाठः।

एवं विष्णोर्वचः श्रुत्वा धरणी संसितव्रता* ।
प्रत्युवाच परं श्रेष्ठं लोकनाथं महौजसम् ॥ ७५ ।
दर्पणन्ते कथं देयां† तन्ममाख्याहि माधव ।
येन तुष्टो निजं रूपं पश्यसे चिन्तितः प्रभोः ॥ ७६ ।
धरण्यास्तद्वचः श्रुत्वा वराहः पुनरब्रवीत् ।
शृणु मे दर्पणविधिं यथावद्देवि सुव्रते ।
नमो नारायणेत्युक्का इमं मन्त्रमुदीरयेत् ॥ ७७ ।

मन्त्रः—श्रुतिर्भागवती श्रेष्ठा श्रुती अग्निर्द्विजश्च तव मुखं नासेऽश्विनौ नयने चन्द्रसूर्य्यौ मुखञ्च चन्द्र इव गात्राणि जगत्प्रधानानीमञ्च दर्पणं पश्य पश्य रूपम्‡ ।

य एतेन विधानेन मम कर्म्मपरायणः ।
करोति मम कर्म्माणि तारितं कुलसप्तकम्§ ॥ ७८ ।
एतेन मन्त्रेण वै भूमे उपचारस्तु¶ ईदृशः ।
हृष्टतुष्टेन कर्त्तव्यो यदीच्छेत्परमां गतिम् ॥ ७९ ।

इति वराहपुराणे कङ्कताञ्जनदर्पणं नाम
अष्टाविंशत्यधिकशततमोऽध्यायः ।

---

* रत्नभूषितेति (ग) पुस्तकस्य पाठः ।

† दद्यादिति (ग) पुस्तकपाठः ।

‡ शुचिर्भागवताः श्रेष्ठाः तव कर्म्म विनिश्चिता गात्राणि यत्प्रयतानि मुखं चन्द्रो भ्रमतानेत्रे दर्पणं च मे दर्पणलोकनाथस्य स्वरूपजगत्सर्व्वतः इति (ग) पाठः ।

§ मम कर्म्माणि कुर्व्वीत तारितान् सप्त वै कुलानिति (ग) पाठः ।

¶ भूमि उपचारश्चेति (ग) पाठः ।

ऊनत्रिंशदधिकशततमोऽध्यायः।

वराह उवाच।

भूषितालङ्कृतङ्कृत्वा मम कर्म्मपरायणः।
शुक्लं यज्ञोपवीतञ्च देयन्नवगुणन्तथा*।
गन्धेन तिलकं दद्याल्ललाटे मम सुन्दरि ॥ १ ।

---

* दद्यान्नवगुणन्तथेति (ग) पाठः। अस्माच्छ्लोकादनन्तरं (ग) पुस्तके कश्चिदधिकः पाठो वर्त्तते यथा—

शिरसा चाञ्जलिङ्कृत्वा वसुधा पुनरब्रवीत्।

धरण्युवाच।

एतन्मां परमं गुह्यं तद्भक्तां वक्तुमर्हसि।
सन्ध्यां वैकेन मन्त्रेण तव कर्म्मपरायणाम्।
वद भागवतां शुद्धां तव कर्म्मविनिश्चिताम् ॥
ततो भूमिवचः श्रुत्वा भूतानां प्रभवोऽव्ययः।
वराहरूपी भगवान् प्रत्युवाच वसुन्धराम् ॥

वराह उवाच।

शृणु माधवि तत्त्वेन यन्मां त्वं परिपृच्छसि।
कथयिष्यामि ते भद्रे प्रवरं गुह्यमुत्तमम् ॥
यया वन्दितसुभूपैः पुण्याः भागवता. शुभाः।
कृत्वा तु मम कर्म्माणि शुचिः संसारमोचणीम् ॥
कुर्व्वीतैव परां सन्ध्यां यथावदिति निश्चितम्।
जलाञ्जलिं ततोगृह्य मम भक्त्या व्यवस्थितः।
मुहूर्त्तं ध्यानमास्थाय इमं मन्त्रमुदाहरेत् ॥

मन्त्रः—भवोद्भवमादिव्यक्तरूपसारं सर्व्वे देवा ब्रह्मा रुद्रस्त्वाष्टकसमभासीत् ध्यानयोग-

अन्यच्च ते प्रवक्ष्यामि कर्म्म लोकसुखावहम् ।
येन मन्त्रेण दातव्यं ललाटे तिलकं मम* ॥ २ ॥

मन्त्रः—मुखं मण्डनं चिन्तया† वासुदेव
त्वया प्रयुक्तञ्च मयोपनीतम् ।
एतेन चित्तं कुरु वासुदेव

स्थिता ते सन्ध्यासंस्था वासुदेवं नमति वयं देवमादिव्यत्तरूपमात्मसप्रदिवसं तथापि संसारार्थं कर्म्म तत्करणेमैव सन्ध्यासंस्था वासुदेव नमोऽस्तु ते ।

मन्त्राणां परमो मन्त्रस्तपसां परमं तपः ।
आचारं कुरुते ह्येवं मम लोकाय गच्छति ॥
गुह्यानां परमं गुह्यं रहस्यं परमुत्तमम् ।
य एवं पठते नित्यं न स पापेन लिप्यते ॥
नादीक्षिताय दातव्यं नोपवीते कथञ्चन ।
दीक्षितायैव दातव्यं उपपन्ने तथैव च ॥
पुनरन्यत्प्रवक्ष्यामि देवि तत्त्वेन मे शृणु ।
न दीपमपि गृह्णाति दत्तं भागवतैः शुभे: ॥
कृत्वा तु मम कर्म्माणि गृह्य दीपकमुत्तमम् ।
जानुसंस्थां ततः कृत्वा इमं मन्त्रमुदीरयेत् ॥

मन्त्रः—ओँ नमो भगवतेऽनुग्रहतेजसे विष्णो सर्व्वदेवा त्वाग्निसंस्था प्रविष्टा एवा चाग्निसंस्था प्रविष्टा एवं चाग्निस्तव तेजसा भविष्यति स्वतेजसा मामाग्नु मन्त्रस्य तेजसा संसारार्थं देव गृह्यं दीपकं निमन्त्रं मूर्त्तिमन्त्रं अभूत्वा इमं कर्म्म निष्फलम् ।

तत्करोति यथान्यायं दीपकं ददते नरः ।
तारिताः पितरस्तेन निष्फलाश्च पितामहाः ॥ इति

* समन्त्रकमिति (घ) पाठः ।

† मुखमण्डलं विधेति (घ) पाठः ।

मम चैवं कुरु संसारमोक्षम्* ।
एतेन मन्त्रेण चित्रकं मे
दद्याल्ललाटे तिलकं धरित्रि† ॥ ३ ।

ततः सुमनसो गृह्य इमं मन्त्रमुदाहरेत् ॥ ४ ।

मन्त्रः—इमाः सुमनसः सौमनस्याय भगवन्! सर्व्वं सुमनसं कुरु त्वयैते सौमनस्याय निर्म्मिता गृहीता स्वाहा ।

एवं सुमनसो दत्त्वा धूपञ्चैव निवेदयेत् ।
ततो गृहीत्वा धूपन्तु सुगन्धं सुमनोहरम् ।
नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ ५ ।

मन्त्रः—सुगन्धानि तवाङ्गानि स्वभावेनैव केशव ।
अमुना चैव धूपेन धूपितानि तवाऽनघ ॥ ६ ।
तवाङ्गानां सुगन्धेन सर्व्वं सौगन्धिकं कुरु ।
गृहाणेमञ्च मे धूपं सर्व्वसंसारमोक्षणम् ॥ ७ ।
पुनरन्यत्प्रवक्ष्यामि यथा दीपं निवेदयेत् ।
यथा दत्तन्तु गृह्णामि मम भक्तैः सुखावहम्‡ ॥ ८ ।
कृत्वा तु मम कर्म्माणि गृह्य दीपमनुत्तमम् ।
जानुसंस्थं ततः कृत्वा इमं मन्त्रमुदीरयेत् ॥ ९ ।

मन्त्रः—नमो भगवते तेजसे विष्णो
सर्व्वे देवास्त्वग्निसंस्थाः प्रतिष्ठाः ।
एवञ्चाग्निस्तव तेजसा प्रतिष्ठितो

---

* एतेन चिन्नं ते देवगृहं ममैव संसारकारामोक्षमिति (ग)। † एतेन मन्त्रेण चित्रकं दातव्यमिति (ग)। ‡ (ग) पुस्तके (४–७) श्लोका न सन्ति।

तेजश्चात्मा स्वयमेव मन्त्रश्च ॥ १० ।
तेजः संसारान्मोचयितुं देव
गृह्णीष्व दीपं द्युतिमन्तञ्च
मूर्त्तिश्च भूत्वा इदं कर्म्म निष्कलम् ॥ ११ ।
मां करोति यथान्यायं दीपकं ददते नरः ।
तारिताः पितरस्तेन निष्कलाश्च पितामहाः ॥ १२ ।
नारायणवचः श्रुत्वा विस्मिता च* वसुन्धरा ।
वराहरूपिणन्देवं प्रत्युवाच वसुन्धरा† ॥ १३ ।
श्रुता मया भागवतास्तव कर्म्मपरायणाः ।
शेषसंश्रवणार्थाय मनो धावति सत्पथे‡ ॥ १४ ।
तव प्रापणकं कृत्यं केषु पात्रेषु कारयेत् ।
एतदाचक्ष्व तत्त्वेन येन तुष्यसि माधव ॥ १५ ।
ततोभूमेर्वचः§ श्रुत्वा लोकनाथोऽब्रवीदिदम् ।
शृणु तत्त्वेन मे देवि पात्राणि यानि रोचते¶ ।
तानि ते कथयिष्यामि त्वया मे पूर्व्वपृच्छितम् ॥ १६ ।
सौवर्णं रजतङ्कांस्यं येषु दद्यात्प्रापणकम् ।
सर्व्वाणि तानि त्यक्त्वेह ताम्रञ्च मम रोचते ॥ १७ ।
एतन्नारायणाच्छ्रुत्वा धर्म्मकामा‖ वसुन्धरा ।

---

* प्रत्युवाचेति (ग)। † प्रत्युवाच पुनर्वच इति (ग)। ‡ कृत्वा च तव कर्म्माणि शेषे च तपसे वने इति (ग)। § भूम्या वच इति (घ)। ¶ ये च पात्रा मम प्रिया इति (ग), अत पात्रस्य पुंस्त्वमार्षम्। ‖ धर्म्मकामेति (क), (ख)।

उवाच मधुरं वाक्यं लोकनाथं जनार्द्दनम्।
एतन्मे परमं गुह्यं ताम्रन्ते रोचते कथम्॥ १८।
ततो भूमेर्वचः* श्रुत्वा अनादिरपराजितः।
लोकानां प्रवरः श्रेष्ठः प्रत्युवाच वसुन्धराम्॥ १९।
शृणु तत्त्वेन मे भूमे† कथ्यमानं मयाऽनघे।
एकाग्रं चित्तमाधाय येन ताम्रं मम प्रियम्॥ २०।
सप्तयुगसहस्राणि आदिकालेऽथ माधवि।
यथा ताम्रं समुत्पन्नं यथैव प्रियदर्शनम्‡॥ २१।
पूर्व्वं कमलपत्राक्षि गुड़ाकेशो महासुरः।
ताम्ररूपं समादाय ममैवाराधने रतः§॥ २२।
तत आराधितस्तेन वर्षाणान्तु चतुर्द्दश¶।
सहस्राणि विशालाक्षि धर्म्मकामेन निश्चलम्‖॥ २३।
अहन्तु तपसा तुष्टस्तीव्रेण कृतनिश्चयात्**।
ततस्ताम्रमये रम्ये यत्र ताम्रसमुद्भवः॥ २४।
दृष्ट्वाश्रमं महादेवि किञ्चिदेव सुभाषितम्।
ततो जानुस्थितो भूत्वा†† मम एष विचिन्तयत्‡‡॥२५।
चतुर्वाहुञ्च मां दृष्ट्वा मम कर्म्मपरायणः§§।

---

* भूमिवच इति (ग)। † भूमि इति (ग)। ‡ ममैव प्रियदर्शनमिति (ग)। § स्थित इति (ग)। ¶ सहस्राणि च षोडशेति (ग)। ‖ मम भक्तो विशालाक्षि धर्म्मकामे तु निश्चये इति (ग)। ** ततः प्रीतोऽस्मि सुश्रोणि तस्य संतपनिश्चयादिति (ग)। †† जानुस्थितो भूयेति (ग)। ‡‡ विचिन्त्य तदिति (ग)। §§ ऊर्द्धवाहुस्ततोदृष्ट्वा मम चिन्तापरायण इति (ग)।

प्रणतः प्राञ्जलिः प्राह शिरो भूमौ निधाय्य सः ।
तञ्च दृष्ट्वा मया प्रोक्तं प्रसन्नेनान्तरात्मना* ॥ २६ ।
गुड़ाकेश महाभाग ब्रूहि किङ्करवाणि ते ।
तोषितोऽस्म्यनया भक्त्या दुराराध्योऽपि सुव्रत† ॥ २७ ।
यत्त्वया चिन्तितं सौम्य कर्म्मणा मनसा गिरा‡ ।
वरं ब्रूहि महाभाग तव यद्रोचतेऽनघ§ ॥ २८ ।
एवं मम वचः श्रुत्वा गुड़केशोऽब्रवीदिदम्¶ ।
कराभ्यामञ्जलिङ्कृत्वा विशुद्धेनान्तरात्मना ॥ २९ ।
यदि तुष्टोऽसि मे देव समस्तेनान्तरात्मना ।
जन्मानान्तु सहस्राणि त्वयि भक्तिर्दृढ़ाऽस्तु मे ।
चक्रेण वधमिच्छामि त्वया मुक्तेन केशव‖ ॥ ३० ।
चक्रेण पातितस्यैतद्यमांसानि किञ्चन** ।
ताम्रं नाम भवेद्देव पवित्रीकरणं शुभम् ॥ ३१ ।
तेन पात्रं ततः कृत्वा शुद्धधर्म्मविनिश्चितः ।
तस्मिन् प्रापणकं कृत्वा शुद्धे वै ताम्रभाजने ।
निवेदिते परा प्रीतिर्भवत्वेतन्मनोगतम् ॥ ३२ ।
प्रसन्नो यदि मे देव ह्येष मे दीयतां वरः ।

---

* गुड़ाकेशो महाभाग मम कर्म्मविधौ स्थितः । एवं तत्तु मया प्रोक्तं प्रसन्नेनान्तरात्मनेति (ग) । † तोषितोऽहं महाभाग्य त्वया भक्तेन केवलमिति (ग) । ‡ च वै इति (ग) । § यद्दीति (ग) । ¶ वचोऽब्रवीदिति (ग) । ‖ सर्व्वेश इति (ग) । ** य एष मम मांसौघस्त्वया चक्रेण पातित इति (ग) ।

यच्चिन्तितोऽसि देवेश उग्रे तपसि तिष्ठता* ॥ ३३ ।
वाढ़मित्येव सोऽप्युक्तो यावल्लोकस्थितिर्मया ।
तावत्ताम्रास्थितो भूत्वा मम संस्थो भविष्यसि† ॥ ३४ ।
ततःप्रभृति ताम्रात्मा गुड़ाकेशो व्यवस्थितः ।
तत्ताम्रभाजने मह्यं दीयते यत्सुपुष्कलम् ।
अतुला तेन मे प्रीतिर्भूमेः‡ जानीहि सुव्रते ॥ ३५ ।
मङ्गल्यञ्च पवित्रञ्च ताम्रन्तेन प्रियं मम ॥ ३६ ।
त्वञ्च द्रक्ष्यसि तच्चक्रं मध्यसंस्थे दिवाकरे ।
वैशाखस्य तु मासस्य शुक्लपक्षे तु द्वादशी ।
मम तेजोमयं चक्रं त्वां वधिष्यत्यसंशयम् ।
एष्यसे मम लोकाय एवमेतन्न संशयः ॥ ३७।३८ ।
एवमुक्त्वा गुड़ाकेशं तत्रैवान्तर्हितोऽभवम् ।
चक्राद्वधमभीप्सन्वै सोऽपि मत्कर्मणि स्थितः ॥ ३९ ।
दिने दिने विशिष्टन्तु शुभं कुर्व्वंस्तपस्यति ।
विष्णुसंस्थो भविष्यामि कदाहमिति चिन्तयन् ॥ ४० ।
एवं स्थितस्य तस्याथ वैशाखस्य तु द्वादशी ।
शुक्लपक्षस्य सम्प्राप्ता तस्यां धर्म्मविनिश्चितः ।
विष्णुपूजां ततः कृत्वा प्रार्थयामास मां प्रति ॥ ४१ ।
मुञ्च मुञ्च प्रभो चक्रमपि वह्निसमप्रभम् ।

---

* यत्त्वया चिन्तितं देव उग्रं तप इदं महदिति (ग)। † वाढ़मित्येव सोऽप्युक्त-एवमेतद्भविष्यति। यावल्लोका धरिष्यन्ति यावच्चैव महीसुराः। तावत्ताम्रस्थित इति (ग)। ‡ भूमि इति (ग)।

आत्मा मे नीयतां शीघ्रं निकृत्याङ्गानि सर्व्वशः ॥ ४२ ।

तद्देव चक्रेण विपाटितोऽसौ

प्राप्तोऽपि मां भागवतप्रधानः ।

ताम्रन्तु तन्मांसमसृक् सुवर्ण-

मस्थीनि रूप्यं बहुधातवश्च ।

रङ्गञ्च सीसं त्रपुधातुसंस्थं

कांस्यञ्च रीतिश्च मलस्तु तेषाम् ॥ ४३ ।

ताम्रपात्रेण वै भूमे प्रापणं यत्प्रदीयते ।

सिक्थेऽसिक्थे* फलं तस्य शृणुष्व गदतो मम ॥ ४४ ।

एतद्भागवतैः कार्य्यं मम प्रियकरैः सदा

एवं ताम्रं समुत्पन्नमिति मे रोचते हि तत् ।

दीक्षितैर्वै भागवतैः पाद्यार्घादौ च दीयते ॥ ४५ ।

एवं दीक्षाविधिः प्रोक्त एवं ताम्रसमुद्भवः ।

देवि तत्त्वेन कथितः किमन्यत्परिपृच्छसि ॥ ४६ ।

भूमिरुवाच ।

देवदेव कथं सन्ध्यां दीक्षितः कुरुते वद ।

केन मन्त्रेण वा भक्तस्तव कर्म्मपरायणः ॥ ४७ ।

वराह उवाच ।

शृणु माधवि तत्त्वेन सन्ध्यामन्त्रमनुत्तमम् ।

यथा वन्दन्ति वै सूर्य्यं सन्ध्यां पूर्व्वापरान्तथा ॥ ४८ ।

जलाञ्जलिं गृहीत्वा तु मम भक्त्या व्यवस्थितः ।

---

* सिद्धेऽसिद्धे इति (क), (ख) ।

मुहूर्त्तम्ध्यानमास्थाय इमं मन्त्रमुदीरयेत् ॥ ४९ ।
सिक्थानि* तत्र यावन्ति ताम्रप्रापणके धरे ।
तावद्वर्षसहस्राणि मम लोके स मोदते ॥ ५० ।

मन्त्रः—भवोद्भवमादिव्यक्तरूपमादित्यं
सर्व्वे देवा ब्रह्मरुद्रेन्द्रास्त्वाञ्च ।
कृष्णे यथासीद्ध्यानयोगस्थितास्ते
सन्ध्यासंस्था वासुदेवं नमन्ति ॥ ५१ ।
वयं देवमादिमव्यक्तरूपं
कृत्वा चात्मनि देव संस्थास्तथापि ।
संसारार्थं कर्म्म तत्कारणमेव
सन्ध्यासंस्था वासुदेव नमो नमः ॥ ५२ ।

अनेनैव हि† मन्त्रेण सन्ध्यां कुर्य्यात्तु दीक्षितः ॥ ५३ ।

इति वराहपुराणे चतुर्वर्णदीक्षा नाम ऊनत्रिंशदधिकशततमोऽध्यायः ।

त्रिंशदधिकशततमोऽध्यायः ।

सूत उवाच ।

एवं दीक्षां ततः श्रुत्वा नारायणमुखान्मही ।
विशुद्धमानसा देवी नारायणमथाब्रवीत् ॥ १ ।

---

* सिद्धानीति (ग) । † अनेनैव लिति (ग) ।

धरण्युवाच ।

अहो ते दीक्षामाहात्म्यं यस्य वै व्युष्टिरुत्तमा ।
श्रुत्वाहन्तु महाभाग जातास्मि विमला विभो ॥ २ ।
अहो देवस्य माहात्म्यं लोकनाथस्य तत्त्वतः ।
येन सा कारिता दीक्षा चातुर्वर्ण्यसुखावहा ॥ ३ ।
एकं मे परमं गुह्यं यदीश हृदि वर्त्तते ।
भव भक्तसुखार्थाय तत्त्वं मे वक्तुमर्हसि ॥ ४ ।
देव पूर्व्वापराधास्ते द्वात्रिंशदपि कीर्त्तिताः* ।
एवङ्कृत्वापराधानि† मनुजा अल्पचेतसः ॥ ५ ।
कर्म्मणा केन शुद्ध्यन्ति अपराधस्य कारिणः ।
तन्ममाचक्ष्व तत्त्वेन मम प्रीत्या च माधव ॥ ६ ।
तद्वै भूम्या वचः श्रुत्वा हृषीकेशो महामनाः ।
दिव्यम्ध्यानं समादाय प्रत्युवाच वसुन्धराम् ॥ ७ ।

वराह उवाच ।

शुद्धा भागवता भूत्वा मम कर्म्मपरायणाः ।
ये तु भुञ्जन्ति राजान्नं लोभेन च भयेन वा ॥ ८ ।
आपन्नता हि भुञ्जन्ति राजान्नन्तु वसुन्धरे ।
दशवर्षसहस्राणि पच्यन्ते‡ नरके नराः ॥ ९ ।
भगवद्वचनं श्रुत्वा कम्पिता च वसुन्धरा ।
दिनानि सप्त दश च भयन्तीव्रमजायत ॥ १० ।

---

* द्वात्रिंशत्परिकीर्त्तितेति (ग) । † अपराधानिति साधु । ‡ पचन्ते इति (क), (ख) ।

ततो दीनमना भूत्वा सा मही शंसितव्रता।
उवाच मधुरं वाक्यं सर्व्वलोकसुखावहम्॥ ११॥

धरण्युवाच।

शृणु तत्त्वेन मे देव हृदये हि व्यवस्थितम्।
को नु दोषोऽस्ति राज्ञां हि तन्मे त्वं वक्तुमर्हसि॥ १२॥
ततो भूम्या वचः श्रुत्वा सर्व्वधर्म्मविदां वरः।
प्राह नारायणो वाक्यं धर्म्मकामां वसुन्धराम्॥ १३॥

वराह उवाच।

शृणु सुन्दरि तत्त्वेन गुह्यमेतदनिन्दिते।
राजान्नन्तु न भोक्तव्यं शुभैर्भागवतैः सदा॥ १४॥
यद्यप्येष समत्वेन राजा लोके प्रवर्त्तते।
राजसन्तामसं वापि कुर्व्वन् कर्म्म सुदारुणम्॥ १५॥
अपि वा गर्हितं तेन राजान्नन्तु वसुन्धरे।
धर्म्मसन्धारणार्थाय न तु मे रोचते भुवि॥ १६॥
ततो यद्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे।
यथा राज्ञान्तु भोज्यं वै शुद्धैर्भागवतैर्नरैः॥ १७॥
स्थापयित्वा तु मां देवि विधिदृष्टेन कर्म्मणा।
धनधान्यसमृद्धानि दत्त्वा भागवतैरपि॥ १८॥
सिद्धं भागवतैश्चान्नं मम प्रापणशेषकम्।
भुञ्जानस्तु वरारोहे न स पापेन लिप्यते॥ १९॥
एवं विष्णुवचः श्रुत्वा धरणी शंसितव्रता।
वराहरूपिणं देवं प्रत्युवाच वरानना॥ २०॥

धरण्युवाच ।

राजान्नन्तु नरो भुक्त्वा शुद्धो भागवतः शुचिः ।
कर्म्मणा केन शुद्धेत तन्मे ब्रूहि जनार्द्दन ॥ २१ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि यन्मान्त्वं भीरु भाषसे ।
तरन्ति पुरुषा येन राजान्नस्योपभुञ्जकाः ॥ २२ ।
एकं चान्द्रायणङ्कृत्वा तप्तकृच्छ्रञ्च पुष्कलम् ।
कुर्य्यात्सान्तपनञ्चैकं शीघ्रं मुचन्ति* किल्विषात् ।
न तस्य चापराधोऽस्ति वसुधे वै वचो मम ॥ २३ ।
एवमेव न भोक्तव्यं राजान्नं वै कदाचन ।
ममात्र पूजाकामेन यदीच्छेत्परमां गतिम् ॥ २४ ।

इति वराहपुराणे भगवच्छास्त्रे राजान्नप्रायश्चित्तं नाम त्रिंशदधिकशततमोऽध्यायः ।

एकत्रिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

दन्तकाष्ठमखादित्वा यो हि मामुपसर्पति* ।
पूर्व्वकालकृतं कर्म्म तेन चैकेन नश्यति ॥ १ ।

---

* मुच्यन्ते इति साधु ।

---

* अतःपरं (ग) पुस्तके श्लोक एको नास्ति ।

नारायणवचः श्रुत्वा पृथिवी धर्म्मसंस्थिता।
विष्णुभक्तसुखार्थाय हृषीकेशमुवाच ह ॥ २ ।

धरण्युवाच।

सर्व्वकालकृतं कर्म्म क्लेशेन महताऽनघ।
कथमेकापराधेन सर्व्वमेव प्रणश्यति ॥ ३ ।

वराह उवाच।

शृणु सुन्दरि तत्त्वेन कथ्यमानं मयाऽनघे।
येन चैकापराधेन पूर्व्वकर्म्म प्रणश्यति ॥ ४ ।
मनुष्यः किल्बिषी भद्रे कफपित्तसमन्वितः।
पूयशोणितसम्पूर्णं दुर्गन्धि मुखमस्य तत् ॥ ५ ।
तत्सर्व्वबीजं नश्येत* दन्तकाष्ठस्य भक्षणात्।
शुद्धिर्भागवती चैव आचारेण विवर्ज्जिता ॥ ६ ।

धरण्युवाच।

दन्तकाष्ठमखादित्वा यः कर्म्माणि करोति ते।
प्रायश्चित्तञ्च मे ब्रूहि येन धर्म्मो न नश्यति ॥ ७ ।

वराह उवाच।

एवमेतन्महाभागे यन्मान्त्वं परिपृच्छसि।
कथयिष्यामि हीदं ते यथा शुध्यन्ति मानवाः ॥ ८ ।
आकाशशयनङ्कृत्वा दिनानि द्वे च पञ्च च।
अभुक्तदन्तकाष्ठास्तु एवं शुध्यन्ति मानवाः ॥ ९ ।
एवं ते कथितं भद्रे दन्तकाष्ठस्य भक्षणम्।

---

* न सहेदुच्चितं देवीति (ग)।

य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
कुतस्तस्यापराधोऽस्ति एवमेव न संशयः ॥ १० ।

इति वराहपुराणे दन्तकाष्ठाभक्षणप्रायश्चित्तं
नामैकत्रिंशदधिकशततमोऽध्यायः ।

द्वात्रिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

गत्वा तु मैथुनं भद्रे अस्नातो यः समस्पृशेत् ।
रेतः पिबति दुर्बुद्धिः सहस्रं नव पञ्च च ॥ १ ।
एतन्नारायणाच्छ्रुत्वा सा मही शंसितव्रता ।
ततो दीनमना भूत्वा प्रोवाच मधुसूदनम् ॥ २ ।

धरण्युवाच ।

किमिदं भाषसे देव धर्मं भीषणसङ्कटम् ।
कथमेवं पुमान्वै स रेतःपानपरो भवेत् ।
एतन्मे परमं दुःखं तद्भवान्वक्तुमर्हसि ॥ ३ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि इदं गुह्यमनुत्तमम् ।
चिह्नमेतद्वरारोहे आधिचारविनिश्चयः ॥ ४ ।

पुरुषः स्त्रीषु कर्म्माणि यो विकुर्व्वीत निर्घृणः।
दृष्टं तस्यापराधस्य फलं प्राप्नोति मानवः॥ ५॥
एवमेतद्वरारोहे यन्मात्त्वं परिपृच्छसि।
अपराधस्य दोषेण विशुद्धिश्च न जायते॥ ६॥
प्रायश्चित्तं प्रवक्ष्यामि रागदोषेण दोषितम्।
गृहस्थाः पुरुषा भद्रे मम कर्म्मपरायणाः॥ ७॥
यावकेन त्रयं चिप्रां पिन्याकेन दिनत्रयम्।
वायुभक्षं दिनं त्वेकं ततो मुच्येत किल्विषात्॥ ८॥
य एवं कुरुते भूमे विधिदृष्टेन कर्म्मणा।
ज्ञात्वा कर्म्मापराधन्तु न स पापेन लिप्यते॥ ९॥
एतत्ते कथितं भद्रे मिथुनं योऽभिगच्छति।
प्रायश्चित्तं महाभागे मम लोकसुखावहम्॥ १०॥
स्पृष्ट्वा तु मृतकं भद्रे नरं पञ्चत्वमागतम्।
मम शास्त्रं वहिष्कृत्वा यः श्मशानं प्रपद्यते॥ ११॥
पितरस्तस्य सुश्रोणि आत्मनश्च पितामहाः।
श्मशाने जम्बुका भूत्वा भक्षयन्ति शवांस्तथा॥ १२॥
ततो हरेर्वचः श्रुत्वा धर्म्मकामा वसुन्धरा।
उवाच मधुरं वाक्यं सर्व्वलोकहिताय वै॥ १३॥

धरण्युवाच।

तव नाथ प्रपन्नानां क्व पापं विद्यते प्रभो।
प्रायश्चित्तञ्च मे ब्रूहि येन मुच्यन्ति* किल्विषात्॥ १४॥

---

* मुच्यन्ते इति साधु।

वराह उवाच ।

शृणु सुन्दरि तत्त्वेन यस्मात्त्वं परिपृच्छसि ।
कथयिष्यामि ते ह्वीदं शोभनं पापनाशनम् ॥ १५ ।
एकाहारी दिनान्सप्त त्रिरात्रं चाप्युपोषितः ।
पञ्चगव्यं ततः पीत्वा ततो मुच्यति* किल्बिषात् ॥ १६ ।
शवे स्पृष्टेऽपराधस्य एष ते कथितो विधिः ।
सर्व्वथा वर्ज्जनीयं वै सर्व्वभागवतेन तु ॥ १७ ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
विमुक्तः सर्व्वपापेभ्यो नापराधोऽस्ति तस्य वै† ॥ १८ ।
नारीं रजस्वलां स्पृष्ट्वा यो मां स्पृशति निर्भयः ।
रागमोहेन संयुक्तः कामेन च वशीकृतः ॥ १९ ।
वर्षाणान्तु सहस्रैकं रजः पिबति निर्घृणः ।
अन्धश्च जायते देवि दरिद्रो ज्ञानमूर्खवान् ॥ २० ।
न च विन्दति चात्मानं पतितो नरके यथा ।
अपराधमिमङ्कृत्वा तत्रैवं नास्ति संशयः ॥ २१ ।

धरण्युवाच ।

तव देव प्रपन्नानां मोक्षं संसारसागरात् ।
अपराधसमायुक्तास्तव कर्म्मपरायणः ।
कर्म्मणा येन शुध्येत तन्मे ब्रूहि जनार्द्दन ॥ २२ ।

वराह उवाच ।

स्पृष्ट्वा रजस्वलां नारीं नरो मद्भक्तितत्परः ।

---

* मुच्यते इति साधु । † अपराधो न विद्यते क्वचित् (ग) ।

तपः कृत्वा त्रिरात्रन्तु आकाशशयने वसेत् ॥ २३ ।
शुद्धो भागवतो भूत्वा मम कर्म्मपरायणः ।
एवङ्कृत्वा महाभागे प्रायश्चित्तं मम प्रियम् ॥ २४ ।
मुच्यते किल्बिषाद्देवि आचारेण वहिष्कृतः ।
एतत्ते कथितं भद्रे यत्स्पृष्ट्वा तु रजस्वलाम् ॥ २५ ।
स्पृष्ट्वा तु मृतकं देवि यो मत्क्षेत्रेषु तिष्ठति ।
शतं वर्षसहस्राणि गर्भेषु परिवर्त्तते ॥ २६ ।
दशवर्षसहस्राणि चण्डालश्चैव जायते ।
अन्धः सप्तसहस्राणि मण्डूकश्च* शतं समाः ॥ २७ ।
मक्षिका त्रीणि वर्षाणि टिट्टिभैकादशं† समाः ।
दंशो वै सप्त चान्यानि कृकलासो भवेत्समाः ॥ २८ ।
हस्ती वर्षशतञ्चैव खरो द्वात्रिंशकं भवेत् ।
मार्ज्जारो नव वर्षाणि वानरो दश पञ्च च ॥ २९ ।
एवं स चात्मदोषेण मम कर्म्मपरायणः ।
प्राप्नोति सुमहद्दुःखं देवि चैवं न संशयः ॥ ३० ।
ततो हरेर्वचः श्रुत्वा दुःखेन परिपृच्छती ।
सर्व्वसंसारमोक्षाय प्रत्युवाच वसुन्धरा ॥ ३१ ।

धरण्युवाच ।‡

किमिदं भाषसे देव मानुषाणां दुरासदम् ।
वाक्यभीषणमत्यन्तं§ मम मर्म्मप्रभेदकम् ॥ ३२ ।

---

* कान्दूकश्चेति (ग)।　† डिण्डिभैकादशमिति (ग)।　‡ (ग) पुस्तके एष पाठो नास्ति।　§ भीषणकश्चैवेति (ग)।

आचाराच्च परिभ्रष्टस्तव कर्म्मपरायणः ।
यथा तरति* दुर्गाणि प्रायश्चित्तं तथा वद ॥ ३३ ।
श्रुत्वा पृथ्व्यास्तथा वाक्यं† लोकनाथो जनार्द्दनः ।
धर्म्मसंरक्षणार्थाय प्रत्युवाच वसुन्धराम् ॥ ३४ ।

वराह उवाच ।

स्पृष्ट्वा तु मृतकं भूमि मम कर्म्मपरायणः ।
एकाहारं ततस्तिष्ठेद्दिनानि दश पञ्च च ॥ ३५ ।
ततः एवं विधिङ्कृत्वा पञ्चगव्यन्तु प्राशयेत् ।
शुद्धभावं विशुद्धात्मा कर्म्मणा च न लिप्यति ॥ ३६ ।
एतत्ते कथितन्देवि स्पृष्ट्वा मृतकमेव च ।
दोषश्चैवं विशुद्ध्यर्थं यत्त्वया पूर्व्वमिच्छितम्‡ ॥ ३७ ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
अपराधविमुक्तो वै मम लोकं स गच्छति ॥ ३८ ।

इति वराहपुराणे मृतकस्य स्पर्शनप्रायश्चित्तं नाम
द्वात्रिंशदधिकशततमोऽध्यायः ।

---

* तरन्ति येनेति (ग) । † ततोवाक्यमिति (ग) । ‡ पूर्व्वपृच्छितमिति (ग) ।

त्रयस्त्रिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

सृग्यमानेन मां भूमे वातकर्म्म प्रमुच्यते* ।
एवञ्च पुरुषो युक्तो वायुपीड़ितमानसः ॥ १ ।
मक्षिका पञ्च वर्षाणि त्रीणि वर्षाणि मूषकः ।
श्वा चैव त्रीणि वर्षाणि कूर्म्मो वै जायते नव ॥ २ ।
एष वै तापनं देवि मोहनं मम साम्प्रतम्† ।
यो वै शास्त्रं विजानाति मम कर्म्मपरायणः ।
श्रुत्वा वाक्यं हृषीकेशं प्रत्युवाच वसुन्धरा ॥ ३ ।

धरण्युवाच ।

अतुलं लभते पापं तव कर्म्मपरायणः ।
तस्य देव सुखार्थाय विशुद्धिं वक्तुमर्हसि ॥ ४ ।

वराह उवाच ।

शृणु कार्त्स्न्येन मे देवि‡ कथ्यमानं मयाऽनघे ।
अपराधमिमङ्कृत्वा सन्तरेद्येन कर्म्मणा ॥ ५ ।
पावकेन दिनं त्रीणि नक्तानि च पुनस्त्रयः§ ।
कर्म्म चैवं ततः कृत्वा स च मे नापराध्यति ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥ ६ ।

---

* सृग्यमानोऽथ मां देवि वातकर्म्म प्रमुञ्चतीति (ग) । सृगता, सृगन् वा साधु ।
† शंसतीति (क), (ख) । ‡ शृणु क्रमेण मे देवि इति (ग) । § नक्तेन च पुनस्त्रय-इति (ग) । उभयत्रापि त्रय इति पुंस्त्वमार्षं त्रीणीति साधु ।

एतत्ते कथितं भद्रे मद्दल्कर्मापराधिनः ।
दोषञ्चैव गुणञ्चैव यत्त्वया परिपृच्छितम्* ॥ ७ ।
शृणु तत्त्वेन मे भूमे कथ्यमानं मयाऽनघे ।
पुरीषं मुच्यते यस्तु मम कर्म्म समाचरन् ॥ ८ ।
दिव्यवर्षसहस्रन्तु रौरवे नरके वसेत् ।
पुरीषं भक्षयेत्तत्र मम कर्म्मपरायणः ॥ ९ ।
प्रायश्चित्तं वदाम्यत्र येन मुच्येत किल्बिषात् ।
मम कर्म्मपरिभ्रष्टो विह्वलेनान्तरात्मना ॥ १० ।
एकां जलमयीं शय्यामेकमाकाशशायिनीम् ।
एवङ्कृत्वा विधानन्तु सोऽपराधात्प्रमुच्यते ॥ ११ ।
एतत्ते कथितं भद्रे पुरीषं यः समुत्सृजेत् ।
मद्भक्तेषु विशालाक्षि अपराधविनिश्चयः ॥ १२ ।

इति वराहपुराणे मकल्कर्म-पुरीषोत्सर्ग-प्रायश्चित्तं नाम
त्रयस्त्रिंशदधिकशततमोऽध्यायः ।

चतुस्त्रिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

भुक्त्वा तु मम कर्म्माणि मम कर्म्मपरायणः ।
प्रायश्चित्तविधिन्देवि यस्तु वाक्यं प्रभाषते ।

---

* परिपृष्टमिति साधु ।

मूर्खो भवति सुश्रोणि मम कर्म्मपरायणः॥ १।
प्रायश्चित्तविधिन्देवि येन मुच्येत किल्बिषात्।
आकाशशयनं कृत्वा दिनानि दश पञ्च च।
मुच्यते किल्बिषात्तत्र देवि चैवं न संशयः॥ २।

इति मौनत्यागप्रायश्चित्तम्।

वराह उवाच।

भूषितो नीलवस्त्रेण यो हि मामुपपद्यते।
वर्षाणां हि शतं पञ्च कृमिर्भूत्वा स तिष्ठति॥ ३।
तस्य वक्ष्यामि सुश्रोणि अपराधविशोधनम्।
प्रायश्चित्तं विशालाक्षि येन मुच्येत किल्बिषात्॥ ४।
व्रतं चान्द्रायणङ्कृत्वा विधिदृष्टेन कर्म्मणा।
मुच्यते किल्बिषाद्भूमे एवमेतन्न संशयः*॥ ५।
अविधानेन संस्पृश्य यो हि मामुपसर्पति।
स मूर्खः पापकर्म्मा च मम विप्रियकारकः॥ ६।
तेन दत्तं वरारोहे गन्धमाल्यसुगन्धितम्।
शयनञ्च न गृह्णामि स्पृष्टञ्चापि कदाचन॥ ७।
ततो नारायणवचः श्रुत्वा सा संशितव्रता।
उवाच मधुरं वाक्यं धर्म्मकामा वसुन्धरा॥ ८।

धरण्युवाच।

यस्मात्त्वं भाषसे नाथ आचारस्य व्यतिक्रमम्।

---

* अतःपरं (ग) पुस्तके इति नीलवस्त्रप्रायश्चित्तमित्यधिकः पाठो वर्त्तते।

उपस्पृश्य समाचारं रहस्यं वक्तुमर्हसि ॥ ९ ।
केन कर्म्मविधानेन भूत्वा भागवता भुवि ।
उपस्पृश्योपसर्पन्ति तव कर्म्मपरायणाः ॥ १० ।
एतन्मे संशयं* देव परं कौतूहलं हि मे ।
तव भक्तसुखार्थाय निष्कलं वक्तुमर्हसि ॥ ११ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि यन्मां त्वं भीरु भाषसे ।
कथितं मम तत्त्वेन गुह्यमेतत्परं महत् ॥ १२ ।
विमुच्य सर्व्वकर्म्माणि यो हि मामुपसर्पति ।
तस्य वै शृणु सुश्रोणि उपस्पृश्य च या क्रिया ॥ १३ ।
भूत्वा पूर्व्वमुखस्तत्र पादौ प्रचाल्य चाम्बुभिः ।
उपस्पृश्य यथान्यायं तिस्रो वै गृह्य मृत्तिकाः ॥ १४ ।
ततः प्रचालितं हस्तं जलेन तदनन्तरम् ।
सप्तकोशं ततो गृह्य जलेन चालयेत्ततः† ॥ १५ ।
पादमेकैकशस्तद्वत्पञ्च चदेत्ततः ।
कोशौ सम्मृज्यतां‡ तत्र यदीच्छेत§ मम प्रियम् ॥ १६ ।
त्रीणि कोशान्पिबेत्तत्र सर्व्वपापविशोधनम्¶ ।
कराभ्यां मुखं मार्ज्जेत|| सर्व्वमिन्द्रियनिग्रहम् ॥ १७ ।

---

* अत क्लीवत्वमार्षम्, एष मे संशय इति साधु । † मुखं प्रचालयेत्तथेति (ग) ‡ संसृज्यतां तथेति (ग) । § यदीच्छेत मम प्रियमिति (ग) ; तत इच्छेदिति साधु ¶ सर्व्वकर्म्मविशोधनमिति (ग) । || मुखमित्यत्र छन्दोभङ्ग आर्षः, मार्ज्जयेतेति आर्षम् ।

प्राणायामन्ततः कृत्वा मम चिन्तापरायणः।
कर्म्मणा विधिदृष्टेन कुर्य्यात्संसारमोक्षणम्॥ १८।
त्रीणि* वारान् स्पृशेत्तत्र शिरो ब्रह्मणि संस्थितः।
त्रीणि वारान् पुनस्तत्र उभे ते कर्णनासिके॥ १९।
स्पृशेत्† निष्कलस्तत्र योऽहि यत्र प्रतिष्ठितः।
विक्षिपेत्त्रीणि वाराणि‡ सलिलं प्रवरं त्रयम्॥ २०।
एवमुक्तस्य कर्त्तव्यं ममाभिगमनेषु च।
उपस्पृश्य तनुं वामे§ यदीच्छेत प्रियं मम॥ २१।
एवञ्च कुर्व्वतस्तस्य मम कर्म्मव्यवस्थितः।
अपराधं न विन्देत एवं देवि न संशयः॥ २२।
ततो नारायणवचः श्रुत्वा देवी वसुन्धरा।
उवाच मधुरं वाक्यं सर्व्वभागवतां प्रियम्॥ २३।

धरण्युवाच।

उपस्पृश्य विधानेन यस्तु कर्म्माणि चाप्नुयात्।
तापनं शोधनञ्चैव तद्भवान्वक्तुमर्हसि॥ २४।

वराह उवाच।

शृणु तत्त्वेन मे भूमि इमं गुह्यमनिन्दिते।
यां गतिञ्च प्रपद्यन्ते मम कर्म्मबहिष्कृताः॥ २५।
व्यभिचारञ्च मे कृत्वा यश्च मामुपसर्पति।
दशवर्षसहस्राणि दशवर्षशतानि च।

---

* त्रीनिति साधु। एवं परत्रापि। † स्पृशेदिति साधु। स्पृशेत्तदिति (ग)।
‡ त्रीन् वारानिति साधु। § चान्ते इति (ग)।

कृमिर्भूत्वा यथान्यायं तिष्ठते* नात्र संशयः ॥ २६ ॥
प्रायश्चित्तं प्रवक्ष्यामि तस्य मूर्खस्य माधवि ।
यच्च कृत्वा महाभागे कृतकृत्यः पुनर्भवेत् ॥ २७ ॥
महासान्तपनङ्कृत्वा तप्तकृच्छ्रञ्च निष्कलम् ।
ब्राह्मणः क्षत्रियो वैश्यो मम ये च मते स्थिताः ॥२८॥
अनेन विधिना कृत्वा प्रायश्चित्तं यशस्विनि ।
किल्बिषात्तु प्रमुक्तास्ते गच्छन्ति† परमां गतिम् ॥२९॥
यस्तु क्रोधसमाविष्टो मम भक्तिपरायणः‡ ।
स्पृशेत मम गात्राणि चित्तङ्कृत्वा चलाचलम् ॥ ३० ॥
न चाहं रागमिच्छामि क्रुद्धमेव यशस्विनि ।
इच्छामि च सदा दान्तं शुभं भागवतं शुचिम् ।
पञ्चेन्द्रियसमायुक्तं लाभालाभविवर्जितम् ।
अहङ्कारविनिर्मुक्तं कर्म्मण्यभिरतं मम ॥ ३१।३२ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वरानने ।
मां यदा लभते क्रुद्धः शुद्धो भागवतः शुचिः ॥ ३३ ।
चिल्ली जातो वर्षशतं श्येनो वर्षशतं पुनः ।
भेकस्त्रिशतवर्षाणि§ यातुधानः पुनर्दश ॥ ३४ ।
अपुमान् षट् च वर्षाणि¶ रेतोभक्षस्तु जायते ।
अन्धो जायेत सुश्रोणि पञ्च सप्त तथा नव ॥ ३५ ।

---

* तिष्ठतीति साधु । † विप्रमुक्तास्तु गच्छन्तीति (क), (ख) । ‡ मम कर्मपरायण इति (ग) । § मण्डूको त्रिंशद्वर्षाणीति (ग) । ¶ षड्वर्षाणीति (ग) ।

गृध्रो द्वात्रिंशवर्षाणि चक्रवाको दशैव तु*।
शैवालभक्षिता चैव ह्याकाशगमनन्तथा ॥ ३६ ।
ब्राह्मणो जायते भूमे क्रोधस्य च पथे स्थितः† ।
आत्मकर्म्मापराधेन प्राप्तः संसारसागरे ॥ ३७ ।

धरण्युवाच ।

अहो वै परमं गुह्यं यत्त्वया पूर्व्वभाषितम् ।
जातं मे विह्वलं चित्तं न स्थिरं जायते क्वचित् ॥ ३८ ।
यत्त्वया भाषितं ह्येदं भक्तानाञ्च दुरासदम् ।
श्रुत्वा सुदुस्तरं सारं भीतास्मि परिदेविता ॥ ३९ ।
नाहमाज्ञापयामि त्वां देवदेव जगत्पते ।
मम चैव प्रियार्थाय सर्व्वलोकसुखावहम् ॥ ४० ।
येन मुच्यन्ति‡ संशुद्धा बुधाः कर्म्मपरायणाः ।
अल्पसत्त्वा गतभया लोभमोहसमन्विताः ।
तरन्ति येन दुर्गाणि प्रायश्चित्तञ्च मे वद ॥ ४१ ।
ततः कमलपत्राक्षो वराहः सम्मुखे स्थितः§ ।
सनत्कुमारो मे भक्तो पुनर्नारायणोऽब्रवीत् ॥ ४२ ।
ततो भूम्या वचः श्रुत्वा ब्रह्मणश्च सुतो मुनिः ।
सनत्कुमारो योगज्ञः प्रत्युवाच वसुन्धराम् ॥ ४३ ।
धन्या चैव सुभाग्या च यत्त्वया परिपृच्छितम् ।
वराहरूपी भगवान् सर्व्वमायाकरण्डकः ॥ ४४ ।

---

* दशैव चेति (ग)। † मण्डूकस्य पथे स्थित इति (ग)। ‡ मुच्यन्ते इति साधु।
§ अत्र संस्थित इति (ग)।

किं त्वया भाषितो देवि सर्व्वयोगाङ्गयोगवित् ।
देवो नारायणस्तत्र सर्व्वधर्म्मविदां वरः ॥ ४५ ।
कुमारवचनं श्रुत्वा स महीं प्रत्यभाषत ।
शृणु तत्त्वेन मे ब्रह्मन्यन्मया परिपृच्छितम् ।
कार्य्यं क्रियाञ्च योगञ्च आध्यात्मंत्र पार्थिवस्थितम् ॥ ४६ ।
एतन्मे पृच्छ्यते ब्रह्मन्देवो नारायणः प्रभुः ।
ततो मां भाषते ब्रह्मन्विष्णुर्मायाकरण्डकः ॥ ४७ ।
शुद्धा भागवता ब्रह्मन्येन शुद्ध्यन्ति किल्विषात् ।
कृत्वा तेन व्रतञ्चैव मम कर्म्मपरायणः ॥ ४८ ।
षष्ठे काले तु भुञ्जीत गृहभिक्षामनिन्दिताम् ।
अष्टौ भिक्षा यथान्यायं शुद्धभागवतां* गृहे ॥ ४९ ।
य एतेन विधानेन ब्रह्मकर्म्माणि कारयेत् ।
मुच्यते किल्विषात्तस्मादेवमाह जनार्द्दनः ॥ ५० ।
यदीच्छसि परां सिद्धिं विष्णुलोकं जनार्द्दनात्† ।
शीघ्रमाराधयेद्विष्णुं द्विजमुख्यो न संशयः ॥ ५१ ।
ततो भूमेर्वचः श्रुत्वा ब्रह्मणश्च सुतो मुनिः ।
प्रत्युवाच विशालाक्षीं धर्म्मकामो वसुन्धराम् ॥ ५२ ।
अहो गुह्यं रहस्यञ्च यत्त्वया देवि भाषितम् ।
तस्य ये मुखनिष्क्रान्ता धर्म्मास्तान्वक्तुमर्हसि ॥ ५३ ।

धरण्युवाच ।

ततः स पुण्डरीकाक्षः शङ्खचक्रगदाधरः ।

---

* भागवतामिति चार्षं, भागवतानामिति साधु । † जिजीतम इति (क) ।

वराहरूपी भगवान् लोकनाथो जनार्द्दनः।
उवाच मधुरं वाक्यं मेघदुन्दुभिनिःस्वनः॥ ५४ ॥
भक्तकर्म्मसुखार्थाय गुणवित्तसमन्विताम्।
अनेनैव विधानेन आचारेण समन्वितः।
देवि कारयेत* कर्म्म मम लोकाय गच्छति॥ ५५ ॥
क्रुद्धेन न च कर्त्तव्यं लोभेन त्वरया न च।
मत्पूजनं विधानेन यदीच्छेत्परमां गतिम्॥ ५६ ॥
ये मां देवि यजिष्यन्ति क्रोधन्त्यक्त्वा जितेन्द्रियाः।
संसारन्ते न गच्छन्ति अपराधविवर्ज्जिताः† ॥ ५७ ॥

वराह उवाच।

अकर्म्मण्येन पुष्पेण यो मामर्च्चयते भुवि।
पातनन्तस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे॥ ५८ ॥
नाहं तत्प्रतिगृह्णामि न च ते वै मम प्रियाः।
मूर्खा भागवता देवि मम विप्रियकारिणः॥ ५९ ॥
पतन्ति नरके घोरे रौरवे तदनन्तरम्।
अज्ञानस्य च दोषेण दुःखान्यनुभवन्ति च॥ ६० ॥
वानरो दश वर्षाणि मार्ज्जारश्च त्रयोदश।
सूकः पञ्च च वर्षाणि बलीवर्द्दश्च द्वादश॥ ६१ ॥
छागश्चैवाष्टवर्षाणि मासं वै‡ ग्रामकुक्कुटः।
त्रीणि वर्षाणि महिषो भवत्येव न संशयः॥ ६२ ॥

* कारयेदिति साधु। † अतः परं (ग) पुस्तके इति क्षुद्रप्रायश्चित्तमित्यधिकः पाठो दृश्यते। ‡ मासौ द्वाविति (ग)।

एतत्ते कथितं भद्रे पुष्पं यन्मे न रोचते ।
अकर्म्मण्यं विशालाक्षि पुष्पं ये च ददन्ति वै ॥ ६३ ।

धरण्युवाच ।

भगवन्यदि तुष्टोऽसि विशुद्धेनान्तरात्मना ।
येन शुध्यन्ति ते भक्तास्तव कर्म्मपरायणाः ॥ ६४ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि यन्मात्त्वं परिपृच्छसि ।
प्रायश्चित्तं महाभागे येन शुध्यन्ति मानवाः ॥ ६५ ।
एकाहारं ततः कृत्वा मासमेकं वरानने* ।
वीरासनविधींश्चैव कारयेत्सप्त सप्त च ॥ ६६ ।
चतुर्थभक्ष्यमेकेन मासेन घृतपायसम् ।
यावकान्नं† दिनत्रीणि वायुभक्षो दिनत्रयम् ॥ ६७ ।
य एतेन विधानेन देवि कर्म्माणि कारयेत् ।
सर्व्वपापप्रमुक्तात्मा मम लोकं स गच्छति ॥ ६८ ।

इति वराहपुराणे अकर्म्मण्यप्रायश्चित्तं नाम
चतुस्त्रिंशदधिकशततमोऽध्यायः ।

---

* वसुन्धरे इति (ग) । † श्यामाकान्नमिति (ग) ।

पञ्चत्रिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

रक्तवस्त्रेण संयुक्तो यो हि मामुपसर्पति ।
तस्यापि शृणु सुश्रोणि कर्म्म संसारमोक्षणम् ॥ १ ।
रजस्वलासु नारीषु रजो यत्तत्प्रवर्त्तते ।
तेनासौ रजसा पुष्टो कर्म्मदोषेण जानतः* ॥ २ ।
वर्षाणि दश पञ्चैव वसते तत्र निश्चयः ।
रजो भूत्वा महाभागे रक्तवस्त्रपरायणः ॥ ३ ।
प्रायश्चित्तं प्रवक्ष्यामि तस्य कायविशोधनम् ।
येन शुध्यन्ति ते भूमे पुरुषाः शास्त्रनिश्चिताः ॥ ४ ।
एकाहारस्ततः कृत्वा दिनानि दश सप्त च ।
वायुभक्षो दिनत्रीणि दिनमेकं जलाशनः ॥ ५ ।
एवं स मुच्यते भूमे मम विप्रियकारकः ।
प्रायश्चित्तं ततः कृत्वा ममासौ रोचते सह ॥ ६ ।
एतत्ते कथितं भूमे रक्तवस्त्रविभूषिते ।
प्रायश्चित्तं महाभागे सर्व्वसंसारमोक्षणम्† ॥ ७ ।
यस्तु मामन्धकारेषु विना दीपेन सुन्दरि ।
स्पृशते‡ च विना शास्त्रं त्वरमाणो विमोहितः ।

---

* जानन्निति साधु । † अत्र (ग) पुस्तके रक्तवस्त्रपरिधानप्रायश्चित्तमित्यधिकः पाठो वर्त्तते । ततः परं वराह उवाच इत्यपि च । ‡ स्पृशतीति साधु ।

निरपराधी दत्तश्च अहङ्कारविवर्ज्जितः ॥ २६ ।

धरण्युवाच ।

श्रुतमेतन्मया देव यत्त्वया समुदाहृतम् ।
संसारं वाससोच्छिष्टा येन गच्छन्ति मानुषाः ॥ २७ ।
प्रायश्चित्तञ्च मे ब्रूहि सर्व्वकर्म्मसुखावहम् ।
किल्विषाद्येन मुच्यन्ते तव कर्म्मपरायणाः ॥ २८ ॥

वराह उवाच ।

शृणु तत्त्वेन मे देवि कथ्यमानं मयाऽनघे ।
प्रायश्चित्तम्प्रवक्ष्यामि मम कर्म्मपरायणः ॥ २९ ।
यावकेन दिनं त्रीणि पिण्याकेन दिनत्रयम् ।
पर्णभक्षो दिनत्रीणि पयोभक्षो दिनत्रयम ॥ ३० ।
पायसेन त्रिरात्रन्तु वायुभक्षो दिनत्रयम् ।
एवङ्कृत्वा महाभागे वाससोच्छिष्टकारिणः ।
अपराधन्न विन्देरन् संसारं न प्रयान्ति च* ॥ ३१ ।

श्वानोच्छिष्टन्तु† यो दद्यान्मम कर्म्मपरायणः ।
पापन्तस्य प्रवक्ष्यामि संसारे च महद्भयम् ॥ ३२ ।
श्वानो वै सप्त जन्मानि गोमायुः सप्त वै तथा ।
उलूकः सप्त वर्षाणि‡ पश्चाज्जायेत मानुषः ॥ ३३ ।
विशुद्धात्मा श्रुतिज्ञश्च मद्भक्तश्चैव जायते ।

---

* (ग) पुस्तके अतः परमधौतवासःप्रायश्चित्तम् । वराह उवाच इत्यधिकः पाठो वर्त्त

† श्वानोच्छिष्टमिति आर्षं, शुनोच्छिष्टमिति साधु ।　‡ सप्त जन्मानीति (ग) ।

गृहे भागवतोत्कृष्टे अपराधविवर्ज्जितः॥ ३४ ।
शृणु तत्त्वेन वसुधे प्रायश्चित्तं महौजसम्* ।
तरन्ति मानुषा येन त्यक्त्वा संसारसागरम्॥ ३५ ।
मूलभक्षो दिनत्रीणि फलाहारो दिनत्रयम् ।
शाकभक्षो दिनत्रीणि पयोभक्षो दिनत्रयम्॥ ३६ ।
दध्याहारो दिनत्रीणि पायसेन दिनत्रयम् ।
वाय्वाहारो दिनत्रीणि स्नानङ्कृत्वा दृढव्रतः॥ ३७ ।
एवं दिनान्येकविंशत्कृत्वा वै शुभलक्षणम् ।
अपराधं न विन्देत मम लोकाय गच्छति॥ ३८ ।
भुक्त्वा वराहमांसन्तु यश्च मामिह सर्पति ।
पातनं तस्य वक्ष्यामि यथा भवति सुन्दरि॥ ३९ ।
वराहो दश वर्षाणि कृत्वानुचरते वने ।
व्याधो भूत्वा महाभागे समाः पञ्च च सप्त च† ॥ ४० ।
ततश्च मूषको भूत्वा वर्षाणि च चतुर्द्दश ।
एकोनविंशतिवर्षाणि‡ यातुधानश्च जायते॥ ४१ ।
शल्लकी चाष्टवर्षाणि जायते भवने वहु ।
व्याघ्रस्त्रिंशच्च वर्षाणि जायते पिशिताशनः॥ ४२ ।
एवं संसारिताङ्कृत्वा वराहामिषभक्षकः ।
जायते विपुले सिद्धे कुले भागवते तथा॥ ४३ ।

---

* नयौजसमिति (ग)। † अतः परं (ग) पुस्तके भूत्वा समाः सप्त सप्त तिष्ठते तत्र पुष्कले इत्यधिकः पाठो वर्त्तते। ‡ अत्रैकाक्षराधिक्याच्छन्दोदोषः।

हृषीकेशवचः श्रुत्वा सर्व्वं सम्पूर्णलक्षणम् ।
शिरसा चाञ्जलिं कृत्वावाक्यञ्चेदमुवाच ह ॥ ४४ ॥
एतन्मे परमं गुह्यं तव भक्तसुखावहम् ।
वराहमांसभक्षस्तु येन मुच्येत किल्बिषात् ॥ ४५ ॥
तरन्ति मानुषा येन तिर्य्यक्संसारसागरात् ।
गोमयेन दिनं पञ्च कणाहारेण सप्त वै ॥ ४६ ॥
पानीयन्तु ततो भुक्त्वा तिष्ठेत्सप्तदिनं ततः ।
अक्षारलवणं सप्त सक्तुभिश्च तथा त्र्यः ॥ ४७ ॥
तिलभक्षो दिनान् सप्त पाषाणस्य च भक्षकः ।
पयो भुक्त्वा दिनं सप्त कारयेद्बुद्धिमान्नरः ॥ ४८ ॥
क्षान्तं दान्तं तथा कृत्वा अहङ्कारविवर्ज्जितः ।
दिनान्येकोनपञ्चाशच्चरेत्कृतविनिश्चयः ॥ ४९ ॥
विमुक्तः सर्व्वपापेभ्यः ससंज्ञो विगतज्वरः ।
कृत्वा मम च कर्म्माणि मम लोकाय गच्छति* ॥ ५० ॥

जालपादं भक्षयित्वा यस्तु मामुपसर्पति ।
जालपादस्ततो भूत्वा वर्षाणि दश पञ्च च ॥ ५१ ॥
कुम्भीरो दश वर्षाणि पञ्चवर्षाणि शूकरः ।
तावद्भ्रमति संसारे मम चैवापराधतः ॥ ५२ ॥
कृत्वा तु दुष्करं कर्म्म जायते विपुले कुले ।

---

* (ग) पुस्तके इति वराहमांसभक्षणप्रायश्चित्तम् । वराह उवाच इत्यधिकः पाठो वर्त्तते ।
† ख०...

	Rs.	
Parásara Smriti (Sans.) Fasc. I—VI @ /6/ each ..	2	4
Srauta Sútra of Ápastamba, (Sans.) Fasc. I—XII @ /6/ each ..	4	8
Srauta Sútra of Ásvaláyana, (Sans.) Fasc. I—XI @ /6/ each ..	4	2
Ditto Látyáyana (Sans.) Fasc. I—IX @ /6/ each ..	3	6
Ditto Sánkhyáyana (Sans.) Fasc. I—V @ /6/ each ..	1	14
Sáma Veda Samhitá, (Sans.) Vols. I, Fasc. 1—10 ; II, 1—6 ; III, 1—7 ; IV, 1—6 ; V, 1—8, @ /6/ each Fasc.	13	14
Sáhitya Darpana, (English) Fasc. I—IV @ /6/ each	1	8
Sánkhya Aphorisms of Kapila, (English) Fasc. I and II @ /6/ each	0	12
Súrya Siddhánta, (Sans.) Fasc. IV	0	6
Sarva Darsana Sangraha, (Sans.) Fasc. II	0	6
Sankara Vijaya, (Sans.) Fasc. II and III @ /6/ each	0	12
Sánkhya Pravachana Bháshya, (English preface only) Fasc. III ..	0	6
Sánkhya Sára, (Sans.) Fasc. I	0	6
Srí Bháshyam, Fasc. I	0	6
Susruta Samhitá, (Eng.) Fasc. I and II @ /12/ each	1	8
Taittiríya Áranya, (Sans.) Fasc. I—XI @ /6/ each	4	2
Ditto Bráhmana, (Sans.) Fasc. I—XXIV @ /6/ each	9	0
Ditto Samhitá, (Sans.) Fasc. I—XXXIV @ /6/ each ..	12	12
Ditto Prátisákhya, (Sans.) Fasc I—III @/6/ each	1	2
Ditto and Aitareya Upanishads, (Sans.) Fasc. II and III @/6/ each	0	12
Tándya Bráhmana, (Sans.) Fasc. I—XIX @ /6/ each	7	2
Tattva Chintámani, (Sans.) Fasc. I—IX @ /6/ each	3	6
Tulsí Satsí, Fasc. I	0	6
Uttara Naishadha, (Sans.) Fasc. III—XII @ /6/ each	3	12
Uvás-agadasáo, Fasc. I—IV @ /12/ each	3	0
Varáha Purána, (Sans.) Fasc. I—VII @ /6/ each	2	10
Váyu Purána, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—6, @ /6/ each Fasc.	4	8
Vishnu Smriti, (Sans.) Fasc. I—II @ /6/ each	0	12
Vivádaratnákara (Sans.) Fasc. I—VII @ /6/ each	2	10
Vrihannáradíya Purána, (Sans.) Fasc. I—IV @ /6/ each	1	8
Yoga Sútra of Patanjali, (Sans. & English) Fasc. I—V @ /14/ each	4	6
The same, bound in cloth	5	2

Arabic and Persian Series.

'Álamgírnámah, with Index, (Text) Fasc. I—XIII @ /6/ each ..	4	14
Áin-i-Akbarí, (Text) Fasc. I—XXII @ 1/ each	22	0
Ditto (English) Vol. I (Fasc. I—VII) 1/12 each	12	4
Akbarnámah, with Index, (Text) Fasc. I—XXXVII @ 1/ each ..	37	0
Bádsháhnámah, with Index, (Text) Fasc. I—XIX @ /6/ each ..	7	2
Beale's Oriental Biographical Dictionary, pp. 291, 4to., thick paper, @ 4/12 ; thin paper	4	8
Dictionary of Arabic Technical Terms and Appendix, Fasc. I—XXI @ 1/ each	21	0
Farhang-i-Rashídí (Text), Fasc. I—XIV @ 1/ each	14	0
Fihrist-i-Túsí, or, Túsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each	3	0
Futúh-ul-Shám Wáqídí, (Text) Fasc. I—IX @ /6/ each ..	3	6
Ditto Azádí, (Text) Fasc. I—IV @ /6/ each	1	8
Haft Ásmán, History of the Persian Mansawi, (Text) Fasc. I ..	0	12
History of the Caliphs, (English) Fasc. I—VI @ /12/ each ..	4	8
Iqbálnámah-i Jahángírí, (Text) Fasc. I—III @ /6/ each ..	1	2
Isabáh, with Supplem[illegible] —49 Fasc. @ /12/ each	36	12
Maásir-ul-Umara, [illegible] I—IX ; Vol. II, I—III @/6/ each ..	4	8
Maghází of Wá[illegible] —V @ /6/ each	1	14
Muntakhab-ul-[illegible] I—XV @ /6/ each ..	5	10
Muntakhab-u[illegible] II, Fasc. I—IV @/12/ each	3	0
Muntakhab-[illegible] IX @ /6/ each	7	2

Tabaqát-i Násirí, (Text) Fasc. I—V @ /6/ each 1 14
Ditto (English) Fasc. I—XIV @ /12/ each 10 8
Tárikh-i-Firúz Sháhi, (Text) Fasc. I—VII @ /6/ each 2 10
[illegible] (Text) Fasc. I—IX @ /6/ each 3 6
[illegible] Fasc. I—II @ /6/ each 0 12
Wis o Rámin, (Text) Fasc. I—V @ /6/ each 1 14
Zafarnámah, Vol. I, Fasc. I—IX ; Vol. II, Fasc. I—VII @/6/ each 6 0

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. VII, IX to XI ; Vols. XIII and XVII, and Vols. XIX and XX @ /10/ each Rs. 80 0
   Ditto Index to Vols. I—XVIII 5 0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1865 (incl.)@/4/ per No. ; and from 1870 to date @ /6/ per No.
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1849 (12), 1850 (7), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers ; and for 1851 (7), 1857 (6), 1858 (5), 1861 (4), 1864 (5), 1865 (8), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7) 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878, (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8) @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers.

N. B. The figures enclosed in brakets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784—1883..3 0
   General Cunningham's Archæological Survey Report for 1863-64 (Extra No., J. A. S. B., 1864) 1 8
   Theobald's *Catalogue of Reptiles in the Museum of the Asiatic Society* (Extra No., J. A. S. B., 1868) 1 8
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., J. A. S. B., 1875) 3 0
   Sketch of the Turki Language as spoken in Eastern Turkestan, Part II, Vocabulary, by R. B. Shaw (Extra No., J. A. S. B., 1878) 3 0
   A Grammar and Vocabulary of the Northern Balochí Language, by M. L. Dames (Extra No., J. A. S. B., 1880) 3 0
   Introduction to the Maithilí Language of North Bihár, by G. A. Grierson, Part I, Grammar (Extra No., J. A. S. B., 1880) .. 1 8
   Part II, Chrestomathy and Vocabulary (Extra No., J.A.S.B., 1882) 3 0
5. Anis-ul-Musharrihi 3 0
6. Catalogue of Fossil Vertebrata 2 0
7. Catalogue of the Library of the Asiatic Society, Bengal .. 3 8
8. Examination and Analysis of the Mackenzie Manuscripts by the Rev. W. Taylor 2 0
9. Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis .. 1 8
10. Istiláhát-us-Súfíyah, edited by Dr. A. Sprenger, 8vo. .. 1 0
11. Ináyah, a Commentary on the Hidáyah, Vols. II and IV, @16/ each 32 0
12. Jawámi-ul-'ilm ir-riyázi, 168 pages with 17 plates, 4to. Part I 2 0
13. Khizánat-ul-'ilm 4 0
14. Mahábhárata, Vols. III and IV, @ 20/ each 40 0
15. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—II, with 5 coloured Plates, 4to. @ 6/ each .. 12 0
16. Puráṇa Sangraha, I (Márkaṇḍeya Puráṇa), Sanskrit .. 1 0
17. Sharaya-ool-Islám 4 0
18. Tibetan Dictionary 10 0
19. Ditto Grammar 8 0
20. Vuttodaya, edited by Lt.-Col. G. E. Fryer 2 0
    Notices of Sanskrit Manuscripts, Fasc. I—XXI @ 1/ each .. 21 0
    Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra .. 5 0

N. B. All cheques, Money Orders &c. must be made payable to the "Treasury Asiatic Society" only.

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 694.

वराहपुराणम् ।

THE VARÁHA PURÁNA

EDITED BY

PAṆḌIT HṚISHÍKESÁ SÁSTRÍ

Professor, Sanskrit College, Calcutta.

FASCICULUS VIII.

CALCUTTA:

PRINTED BY ŚASIBHÚSHAṆA BHAṬṬÁCHÁRYYA, AT THE GIRIŚA-VIDYÁRATNA PRESS,

24, GIRIŚA-VIDYÁRATNA'S LANE, UPPER CIRCULAR ROAD.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1888.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL

No. 57, PARK STREET, CALCUTTA.

AND OBTAINABLE FROM

THE SOCIETY'S LONDON AGENTS, MESSRS. TRÜBNER & CO.

57 AND 59, LUDGATE HILL. LONDON, E. C.

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	As.
Advaita Brahma Siddhi, Fasc. I	0	6
Átharvaṇa Upanishads, (Sanskrit) Fasc. I—V @ /6/ each .. Rs.	1	14
Áśvaláyana Gṛihya Sútra, (Sans.) Fasc. II—IV @ /6/ each ..	1	2
Agni Puráṇa, (Sans.) Fasc. I—XIV @ /6/ each	5	4
Aitareya Aranyaka of the Rig Veda, (Sans.) Fasc. I—V @ /6/ each	1	14
Anu Bháshyam, Fasc. I	0	6
Aphorisms of Sáṇḍilya, (English) Fasc. I	0	6
Aphorisms of the Vedánta, (Sans.) Fasc. III, V—XIII @ /6/ each ..	3	12
Ashṭasáhasriká Prajñápáramitá, Fasc. I—VI @ /6/ each	2	4
Áśvavaidyaka, (Sans.) Fasc. I—III @ /6/ each	1	2
Avadána Kalpalatá, (Sans. & Tibetan) Fasc. I	1	0
Brahma Sútras, (English) Fasc. I	0	12
Bhámatí, (Sans.) Fasc. I—VIII @ /6/ each	3	0
Bṛihad Áraṇyaka Upanishad, (Sans.) Fasc. VI, VII & IX @ /6/ each	1	2
Ditto (English) Fasc. II—III @ /6/ each	0	12
Bṛihaddharma Puráṇa, Fasc. I	0	6
Bṛihat Saṃhitá, (Sans.) Fasc. II—III, V—VII @ /6/ each ..	1	14
Chaitanya-Chandrodaya Náṭaka, (Sans.) Fasc. II—III @ /6/ each	0	12
Chaturvarga Chintámaṇi, (Sans.) Vol. I, Fasc. 1—11 ; Vol. II, I—25 ; Vol. III, 1—XIX @ /6/ each Fasc.	20	10
Chhándogya Upanishad, (English) Fasc. II	0	6
Daśa Rúpa, (Sans.) Fasc. II—III @ /6/ each	0	12
Gopatha Bráhmaṇa (Sans. & Eng.) Fasc. I and II @ /6/ each ..	0	12
Gobhilíya Gṛihya Sútra, (Sans.) Fasc. I—XII @ /6/ each ..	4	8
Hindú Astronomy, (English) Fasc. I—III @ /6/ each	1	2
Institutes of Paráśara	0	6
Kátantra, (Sans.) Fasc. I—VI @ /12/ each	4	8
Kathá Sarit Ságara, (English) Fasc. I—XIV @ /12/ each	10	2
Kála Mádhava, (Sans.) Fasc. I—IV, @ /6/ each	1	8
Káuśítaki Bráhmaṇopanishads, Fasc. II	0	6
Kúrma Puráṇa, (Sans.) Fasc. I—VII @ /6/ each	2	10
Lalita Vistara, (Sans.) Fasc. II—VI @ /6/ each	1	14
Ditto (English) Fasc. I—III @ /12/ each	2	4
Madana Párijáta, (Sans.) Fasc. I—III @ /6/	1	2
Manutíká Sangraha, Fasc. I—II @ /6/ each	0	12
Mímáṃsá Darśana, (Sans.) Fasc. II—XIX @ /6/ each	6	12
Márkaṇḍeya Puráṇa, (Sans.) Fasc. IV—VII @ /6/ each	1	8
Nyáyavárttikam, Fasc. I	0	6
Nṛisiṃha Tápaní, (Sans.) Fasc. I—III @ /6/ each	1	2
Nirukta, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—6 ; Vol. III, Fasc. 1—6 ; Vol. IV, I—IV @ /6/ each	8	4
Nárada-Pancharátra, (Sans.) Fasc. IV @ /6/ each	0	6
Nárada Smṛiti (Sans.) Fasc. I & II @ /6/ each	0	12
Nítisára, or, The Elements of Polity, By Kámandaki (Sans.) Fasc. II—V	1	8
Nyáya Darśana, (Sans.) Fasc. III @ /6/ each	0	6
Nyáya Kusumáñjali, (Sans.) Fasc. I—II	0	12
Pariśishṭaparvan, (Sans.) Fasc. I—IV @ /6/ each	1	8
Pingala Chhandaḥ Sútra, (Sans.) Fasc. II—III @ /6/ each ..	0	1
Prithiráj Rásau, (Hindi) Fasc. I—VI @ /6/ each	2	4
Ditto (English) Fasc. I	0	12

(Continued on the third page of cover.)

शुद्धो भागवतश्रेष्ठो ह्यपराधविवर्ज्जितः।
सर्व्वकर्म्माण्यतिक्रम्य मम लोकाय गच्छति ॥ ५३ ।
प्रायश्चित्तं प्रवक्ष्यामि जालपादस्य भक्षणे।
तरन्ति मनुजा येन घोरसंसारसागरात् ॥ ५४ ।
यावकान्नं दिनत्रीणि वायुभक्षो दिनत्रयम्।
फलभक्षो दिनत्रीणि तिलभक्षो दिनत्रयम् ॥ ५५ ।
अक्षारलवणाशी पुनस्तत्र दिनत्रयम्।
पञ्चदश दिनान्येवं प्रायश्चित्तं समाचरेत् ॥ ५६ ।
जालपादापराधस्य एवं कुर्व्वीत शोधनम्।
विनीतात्मा शुचिर्भूत्वा य इच्छेत्सुन्दरां गतिम् ॥ ५७ ।

इति वराहपुराणे जालपादभक्षणापराधप्रायश्चित्तं नाम
पञ्चत्रिंशदधिकशततमोऽध्यायः।

षट्त्रिंशदधिकशततमोऽध्यायः।

वराह उवाच।

दीपं स्पृष्ट्वा तु यो देवि मम कर्म्माणि कारयेत्।
तस्यापराधाद्वै भूमि* पातं प्राप्नोति मानवः।
तच्छृणुष्व महाभागे कथ्यमानं मयाऽनघे ॥ १ ।
जायते षष्टिवर्षाणि कुष्ठी गात्रपरिप्लुतः।

* तस्यापराधेन भूमि इति (क), (ख)।

चाण्डालस्य गृहे तत्र एवमेतन्न संशयः ॥ २ ।
एवं भुक्त्वा तु तत्कर्म्म मम चेत्ते मृतो यदि ।
मद्भक्तश्चैव जायेत शुद्धे भागवते गृहे ॥ ३ ।
प्रायश्चित्तं प्रवक्ष्यामि दीपस्य स्पर्शनाद्भुवि ।
तरन्ति मनुजा येन कष्टं चाण्डालयोनिषु ॥ ४ ।
यस्य कस्यापि मासस्य शुक्लपक्षे च द्वादशी ।
चतुर्थभक्तमाहारमाकाशशयने स्वपेत् ॥ ५ ।
दीपं दत्त्वापराधाद्वै तरन्ति मनुजा भुवि ।
शुचिर्भूत्वा यथान्यायं मम कर्म्मपथे स्थितः ॥ ६ ।
एतत्ते कथितं भद्रे स्पर्शने दीपकस्य तु ।
संसारशोधनञ्चैव यत्कृत्वा लभते शुभम्* ॥ ७ ।
श्मशानं यो नरो गत्वा अस्नात्वैव तु मां स्पृशेत् ।
मम दोषापराधस्य शृणु तत्त्वेन यत्फलम् ॥ ८ ।
जम्बूको जायते भूमौ वर्षाणां नव पञ्च च ।
गृध्रस्तु सप्त वर्षाणि जायते खचरेश्वरः ॥ ९ ।
चरन्तौ मानुषं मांसमुभौ† तौ गृध्रजम्बुकौ ।
पिशाचो जायते तत्र वर्षाणि नव पञ्च च ।
ततस्तु कुणपोच्छिष्टं त्रिंशद्वर्षाणि खादति ॥ १० ।
ततो नारायणाच्छ्रुत्वा धरणी वाक्यमब्रवीत् ।

---

* अतः परं (ख) पुस्तके दीपस्पर्शापराधप्रायश्चित्तम् । वराह उवाच इत्यधिकः पाठोऽस्ति । † मांसं भूमौ इति (ग) ।

एतन्मे परमं गुह्यं लोकनाथ जनार्द्दन ।
परं कौतूहलन्देव निखिलं वक्तुमर्हसि ॥ ११ ।
श्मशानं पुण्डरीकाक्ष ईश्वरेण प्रशंसितम् ।
किन्वत्र त्रिगुणन्देव पवित्रे शिवभाषिते ॥ १२ ।
स तत्र रमते नित्यं भगवांस्तु महामतिः* ।
कपालं गृह्य† देवोऽत्र दीप्तिमन्तं महौजसम् ॥ १३ ।
प्रशंसितञ्च रुद्रेण भवता किं विनिन्दितम् ।
श्मशानं पद्मपत्राक्ष रुद्रस्य च निशि प्रियम् ॥ १४ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि इदमाख्यानमुत्तमम् ।
अद्यापि ते न जानन्ति अनघे शंसितव्रताः ॥ १५ ।
कृत्वा सुदुष्करं कर्म्म सर्व्वभूतपतिं हरिम् ।
हत्वा च बालान् वृद्धांश्च त्रिपुरे रूपिणीः स्त्रियः ॥
तेन पापेन सम्बद्धो न शक्नोति विचेष्टितुम् ।
प्रनष्टमानसैश्वर्य्यो नष्टा माया च योगिनः ॥ १६।१७ ।
विवर्णवदनो भूत्वा तिष्ठते स महेश्वरः ।
तत्र स्थाने शिवो भूमे गणैः सर्वैः समावृतः ॥ १८ ।
नष्टमायं ततो देवि चिन्तयामि वसुन्धरे ।
ततो ध्यातो मया देवि शङ्करः पुनरेष्यति ॥ १९ ।
यावत्पश्यामि तन्देवं देवि दिव्येन चक्षुषा ।

---

* महाद्युतिरिति (ग) । † गृहीत्वेति साधु ।

नष्टं मायाबलं* रुद्रं सर्व्वभूतमहेश्वरम् ॥ २० ।
ततोऽहं तत्र गत्वा तु यष्टुकाममिवियम्बकम् ।
नष्टसंज्ञो हतज्ञानो नष्टयोगबलोऽबलः ॥ २१ ।
तत ईशो मया चोक्तो वाक्यमेवं सुखावहम् ।
किमिदन्तिष्ठसे रुद्र कश्मलेन समाहतः ॥ २२ ।
त्वं कर्त्ता च विकर्त्ता च विकाराकार एव च ।
त्वं वैशाख्यं† वियोगश्च त्वं योनिस्त्वम्परायणम् ॥ २३ ।
त्वमुग्रदेवदेवादिस्त्वं साम त्वं तथा दिशः ।
किन्न बुध्यसि चात्मानं गणैः परिहृतो भवान् ॥ २४ ।
किमिदं देवदेवेश विवर्णः पृथुलोचनः ।
तन्ममाचक्ष्व तत्त्वेन यत्पृष्टोऽसि मया भवान् ॥ २५ ।
स्मर योगञ्च मायाञ्च पश्य विष्णोर्महात्मनः ।
तव चैव प्रियार्थाय येनाहमिह चागतः ॥ २६ ।
ततो मम वचः श्रुत्वा लब्धसंज्ञो महेश्वरः ।
उवाच मधुरं वाक्यं पापसन्तप्तलोचनः ॥ २७ ।
शृणु तत्त्वेन मे देव कोऽन्योऽप्येवं करिष्यति ।
देवं नारायणञ्चैकं सर्व्वलोकमहेश्वरम् ॥ २८ ।
हे विष्णो त्वत्प्रसादेन देवत्वञ्चैव माधव ।
लब्धोयोगश्च साङ्ख्यञ्च जातोऽस्मि विगतज्वरः ॥ २९ ।
त्वत्प्रसादेन जातोऽस्मि पूर्णाम्बुरिव सागरः ।

---

* नष्टमायावनमिति (ग)। † त्वं वै सांख्यञ्च योगश्चेति (ग)।

अहन्त्वान्तु विजानामि मान्त्वं जानासि माधव ॥ ३० ।
आवयोरन्तरं कोऽपि न पश्यति जनार्द्दन ।
ब्रह्माणन्तु विजानाति नावयोरन्तरेण हि ।
साधु विष्णो महाभाग सर्व्वमायाकरण्डक ॥ ३१ ।
एवं मह्यं हरो वाक्यमुक्त्वा भूतमहेश्वरः ।
मुहूर्त्तं ध्यानमास्थाय पुनः प्रोवाच माधवि ॥ ३२ ।
तव विष्णोः प्रसादेन मया तत्त्रिपुरं हतम्।
निहता दानवास्तत्र गर्भिण्यश्च निपातिताः ॥ ३३ ।
बालवृद्धा हतास्तत्र विस्फुरन्तो दिशो दश ।
तस्य पापस्य दोषेण* न शक्नोमि विचेष्टितुम् ॥ ३४ ।
प्रनष्टयोगमायश्च नष्टैश्वर्य्यश्च माधव ।
किङ्कर्त्तव्यं मया विष्णो पापावस्थेन सम्प्रति ॥ ३५ ।
विष्णो तत्त्वेन मे ब्रूहि शोधनं पापनाशनम् ।
येन वै कृतमात्रेण शुद्धो मुच्येय किल्विषात् ॥ ३६ ।
एवं चिन्तात्मनस्तस्य मया रुद्रस्य भाषितम् ।
कपालमालां गृहीत्वा समलं† गच्छ शङ्कर ॥ ३७ ।
ममैवं वचनं श्रुत्वा भगवान्परमेश्वरः ।
उवाच मां पुनर्व्यक्तं मां बोधय जगत्पते ।
कीदृशः समलो विष्णो यत्र गच्छामहे वयम् ॥ ३८ ।
ततस्तस्य वचः श्रुत्वा शङ्करस्य महेश्वरि ।

---

* तस्य पापेन दोषस्येति (ग)। † तं शमनमिति (ग)।

तत्पापशोधनार्थाय मया वाक्यं प्रभाषितम् ॥ ३९ ।
श्मशानं समलं रुद्र पूतिको* व्रणगन्धिकः ।
स्वयं तिष्ठन्ति वै तत्र मनुजा विगतस्पृहाः ॥ ४० ।
तत्र गृह्य† कपालानि रम तत्रैव शङ्कर ।
तत्र वर्षसहस्राणि दिव्यान्येव दृढ़व्रतः ॥ ४१ ।
ततो भक्षय मांसानि पापक्षयचिकीर्षुकः ।
हतानां चैव मांसानि ये च भोज्यास्तव प्रियाः‡ ॥ ४२ ।
एवं सर्व्वैर्गणैः सार्द्धं वस तत्र सुनिश्चितः ।
पूर्णे वर्षसहस्रे तु स्थित्वा त्वं समले§ पुनः ।
गच्छाश्रमपदं पश्चाद्गौतमस्य महामुनेः ॥ ४३ ।
तत्र ज्ञास्यसि चात्मानं गौतमाश्रमसंस्थितः ।
प्रासादाद्गौतममुनेर्भवता¶ गतकिल्विषः ॥ ४४ ।
सततं पापसम्पन्नं कपालं शिरसि स्थितम् ।
ऋषिः पातयितुं शक्तस्त्वत्प्रसादान्न संशयः ॥ ४५ ।
एवं रुद्रं वरं दत्त्वा तत्रैवान्तर्हितोऽभवम् ।
रुद्रोऽपि भ्रमती‖ तत्र श्मशाने पापसंवृते ॥ ४६ ।
अतो न रोचते भूमे श्मशानं मे कदाचन ।
यत्र रुद्रकृतम्पापं स्थितङ्किल भयावहम् ॥ ४७ ।
एतत्ते कथितम्भद्रे श्मशानं मे जुगुप्सितम् ।

---

* श्मनमिति (ग)। † गृहीत्वेति साधु। ‡ अत्र पुंस्त्वमार्षं यानि भोज्यानीति साधु। § शमने इति (ग)। ¶ भवितेति (ग)। ‖ भ्राम्यति, भ्रमति वा साधु।

विना तु कृतसंस्कारोमम कर्म्मपरायणः।
प्रायश्चित्तम्प्रवक्ष्यामि येन शुध्यति किल्विषात्॥ ४८।
कृत्वा चतुर्थभक्तन्तु दिनानि दश पञ्च च।
आकाशशयनं कुर्य्यादेकवस्त्रः कुशासने॥ ४९।
प्रभाते पञ्चगव्यञ्च पातव्यं कर्म्मशोधनम्।
विमुक्तः सर्व्वपापेभ्यो मम लोकाय गच्छति*॥ ५०।
पिण्याकं भक्षयित्वा तु यो देवमुपसर्पति।
तस्य वै शृणु सुश्रोणि प्रायश्चित्तं सुशोधनम्॥ ५१।
उलूको दश वर्षाणि कच्छपस्तु समास्त्रयः।
जायते मानवस्तत्र मम कर्म्मपरायणः॥ ५२।
यांस्तु दोषान्प्रपश्यन्ते† संसारेऽस्मिन्वसुन्धरे।
तस्य वक्ष्यामि सुश्रोणि प्रायश्चित्तं महौजसम्॥ ५३।
किल्विषाद्येन मुच्येत संसारान्तञ्च गच्छति।
यावकेन दिनैकन्तु गोमूत्रेण च कारयेत्॥ ५४।
रात्रौ वीरासनं कुर्य्यादाकाशशयने‡ वसेत्।
स न गच्छति संसारं मम लोकाय गच्छति§॥ ५५।
वराहमांसेन तु यो मम कुर्व्वीत प्रापणम्।
मूर्खः स पापकर्म्मा च मम कर्म्मपरायणः।
यांस्तु दोषान्प्रपद्येत संसारञ्च वसुन्धरे॥ ५६।

---

* अतः परं (ग) पुस्तके श्मशानप्रवेशापराधप्रायश्चित्तम्। वराह उवाचेत्यधिकः पाठो वर्त्तते। † प्रपश्यन्तीति साधु। ‡ कुर्य्यादाकाशशयने इति (ग)। § अतः परं (ग) पुस्तके पिण्याकभक्षणप्रायश्चित्तम्। वराह उवाचेत्यधिकः पाठो वर्त्तते।

यावद्रोम वराहस्य मम गात्रेषु संस्थितम् ।
तावद्वर्षसहस्राणि नरके पच्यते भुवि ॥ ५७ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
वराहेण तु मांसेन यस्तु कुर्व्वीत प्रापणम् ॥ ५८ ।
यावत्तत्तनुसंस्थन्तु भाजने तु प्रतिष्ठितम् ।
तावत्स पतति* देवि सौकरीं योनिमाश्रितः ॥ ५९ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यां गतिं सम्पद्येत मम कर्म्मपरायणः ॥ ६० ।
अन्धो भूत्वा ततो देवि जन्म चैवं प्रतिष्ठितम् ।
एवं गत्वा तु संसारं वराहमांसप्रापणात् ।
जायते विपुले सिद्धे कुले भागवते शुचिः ॥ ६१ ।
विनीतः कृतसंस्कारो मम कर्म्मपरायणः ।
द्रव्यवान् गुणवांश्चैव रूपवान् शीलवान् शुचिः ॥ ६२ ।
प्रायश्चित्तम्प्रवक्ष्यामि तस्य कायविशोधनम् ।
किल्विषाद्येन मुच्येत मम कर्म्मपरायणः ॥ ६३ ।
फलाहारी दिनान्सप्त सप्त मूलाशनस्तथा ।
दिनानि सप्त तिष्ठेत सप्त वै पायसेन च ॥ ६४ ।
तक्रेण सप्त दिवसान् सप्त पावकभोजनः ।
प्रायश्चित्तान्महाभागे मम लोकाय गच्छति† ॥ ६५ ।

---

* पततीति साधु । † (ग) पुस्तकेऽतः परं वराहमांसप्रापणापराधप्रायश्चित्तम्
वराह उवाच इत्यधिकः पाठो दृश्यते ।

मद्यम्पीत्वा वरारोहे यस्तु मामुपसर्पति ।
तत्र दोषम्प्रवक्ष्यामि शृणु सुन्दरि तत्त्वतः ॥ ६६ ।
दशवर्षसहस्राणि दरिद्रो जायते पुनः ।
ततो भवेत्सुपूतात्मा मद्भक्तः स न संशयः ॥ ६७ ।
यस्तु भागवतोभूत्वा कामरागेण मोहितः ।
दीक्षितः पिबते मद्यम्प्रायश्चित्तं न विद्यते ॥ ६८ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
अग्निवर्णां सुरां पीत्वा तेन मुच्येत किल्बिषात् ॥ ६९ ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
न स लिप्यति पापेन संसारञ्च न गच्छति* ॥ ७० ।
कौसुम्भञ्चैव यः शाकं भक्षयेन्मम पूजकः ।
नरके पच्यते घोरे दश पञ्च च सूकरः† ॥ ७१ ।
ततोगच्छेच्छ्वयोनौ च त्रीणि वर्षाणि जम्बुकः ।
वर्षमेकं ततः शुध्येन्मत्कर्म्मणि रतः शुचिः‡ ।
मम लोकमवाप्नोति शुद्धोभूत्वा वसुन्धरे ॥ ७२।७३ ।
ततो भूमिर्वचः श्रुत्वा प्रत्युवाच पुनर्हरिम् ।
कुसुम्भशाकनैवेद्यप्रापणेन च किल्बिषात् ।
कथं मुच्येत देवेश प्रायश्चित्तं वद प्रभो ॥ ७४ ।

वराह उवाच ।

यो मे कुसुम्भशाकेन प्रापणं कुरुते नरः ।

---

* (ग) पुस्तकेऽतः परं मद्यपानप्रायश्चित्तम् । वराह उवाचेत्यधिकः पाठो दृश्यते । † शूकर इति (ग) । ‡ मत्कर्म्मनिरतः शुचिरिति (ग) ।

दशवर्षसहस्राणि नरके परिपच्यते ॥ ७५ ।
प्रायश्चित्तम्प्रवक्ष्यामि तच्च मे वदतः शृणु ।
भक्षणे तु कृते कुर्य्याच्चान्द्रायणमतन्द्रितः ।
प्रापणे तु कृते कुर्य्याद्द्वादशाहं पयोव्रतम् ॥ ७६ ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
न स लिप्येत पापेन मम लोकञ्च गच्छति* ॥ ७७ ।
यः पारक्येण वस्त्रेण न धूतेन च माधवि ।
प्रायश्चित्तीभवेन्मूर्खो† मम कर्म्मपरायणः ॥ ७८ ।
करोति मम कर्म्माणि स्पृशते‡ मां तदा स्थितः ।
मृगो वै जायते देवि वर्षाणि त्रीणि सप्त च ॥ ७९ ।
हीनपादेन जायेत चैकञ्जन्म वसुन्धरे ।
मूर्खश्च क्रोधनश्चैव मङ्कुश्चैव जायते ॥ ८० ।
तस्य वक्ष्यामि सुश्रोणि प्रायश्चित्तं महौजसम् ।
येन गच्छति संसारं मम भक्तो व्यवस्थितः ॥ ८१ ।
अष्टभक्तं ततः कृत्वा मम भक्तिपरायणः ।
माघस्यैव तु मासस्य शुक्लपक्षस्य द्वादशीम् ॥ ८२ ।
तिष्ठेज्जलाशये गत्वा शान्तो दान्तो यतव्रतः ।
अनन्यमानसो भूत्वा मम चिन्तापरायणः ॥ ८३ ।
प्रभातायान्तु शर्व्वर्य्यामुदिते तु दिवाकरे ।

---

* (ग) पुस्तकेऽतः परं कुसुम्भशाकभक्षणप्रापणकयोः प्रायश्चित्तम् । वराह उवाचेत्यधिकः पाठः । † प्रायश्चित्ताङ्गवेन्मूर्ख इति (ग) । ‡ स्पृशतीति साधु ।

पञ्चगव्यं ततः पीत्वा मम कर्म्माणि कारयेत्॥ ८४।
य एतेन विधानेन प्रायश्चित्तं समाचरेत्।
सर्व्वपापविनिर्मुक्तो मम लोकाय गच्छति* ॥ ८५।
अकृत्वा यो नवान्नानि मम कर्म्मपरायणः।
ततो भागवतो भूत्वा नवान्नं यो न कारयेत्।
पितरस्तस्य नाश्नन्ति वर्षाणि दश पञ्च च॥ ८६।
अदत्त्वा यस्तु भुञ्जीत नवान्नानि कदाचन।
न तस्य धर्म्मो विद्येत एवमेतन्न संशयः॥ ८७।
अन्यच्च ते प्रवक्ष्यामि येन तस्मात्प्रमुच्यते।
प्रायश्चित्तं महाभागे मम भक्तसुखावहम्॥ ८८।
उपवासं त्रिरात्रन्तु तत एकेन वा पुनः।
आकाशशयनङ्कृत्वा चतुर्थेऽहनि शुध्यति॥ ८९।
एवं तत्र विधिङ्कृत्वा उदिते च दिवाकरे।
पञ्चगव्यं ततः पीत्वा शीघ्रं मुच्येत किल्बिषात्॥ ९०।
य एतेन विधानेन प्रायश्चित्तं समाचरेत्।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति† ॥ ९१।
अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति।
कुणपो जायते भूमै यातुधानो न संशयः॥ ९२।
वर्षाणि चैकविंशानि अयस्कारनिवासकः।

---

* (ग) पुस्तकेऽतः परं परकीयवस्त्रापराधप्रायश्चित्तम्। वराह उवाचेत्यधिकः पाठः।
† (ग) पुस्तकेऽतः परं नवान्नभक्षणप्रायश्चित्तम्। वराह उवाचेत्यधिकः पाठः।

तिष्ठते*ऽत्र महाभागे एवमेतन्न संशयः ॥ ९३ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
प्रायश्चित्तम्प्रवक्ष्यामि येन मुच्येत किल्बिषात् ॥ ९४ ।
यस्य कस्यचिन्मासस्य शुक्लपक्षस्य द्वादशीम् ।
उपोष्य चाष्टभक्तन्तु दशैकादशमेव च ॥
प्रभातायान्तु शर्व्वर्य्यामुदिते रविमण्डले ।
पञ्चगव्यं ततः पीत्वा शीघ्रं मुच्यति† किल्बिषात्॥९५।९६।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
तानि तानि तरन्त्येनं‡ सर्व्वं एव पितामहाः§ ॥ ९७ ।

वहन्नुपानही पद्भ्यां यस्तु मामुपचङ्क्रमेत् ।
चर्म्मकारस्तु जायेत वर्षाणान्तु त्रयोदश ॥ ९८ ।
तज्जन्मनः परिभ्रष्टः सूकरो जायते पुनः ।
सूकरत्वात्¶परिभ्रष्टः श्वा भवेच्च जुगुप्सितः ॥ ९९ ।
ततः श्वत्वात्परिभ्रष्टो मानुषेषूपजायते ।
मद्भक्तश्च विनीतश्च अपराधविवर्ज्जितः ।
मुक्तस्तु सर्व्वसंसारान्मम लोकाय गच्छति ॥ १०० ।
य एतेन विधानेन वसुधे कर्म्म कारयेत् ।
न स लिप्येत पापेन एवमेतन्न संशयः॥ ॥ १०१ ।

---

* तिष्ठतीति साधु । † मुच्येत इति साधु । ‡ तरन्त्येवेति (ग) । § अतः पर (ग) पुस्तके गन्धमाल्यदानं विना धूपदाने प्रायश्चित्तम् । वराह उवाच इत्यधिकः पाठः ¶ सूकरत्वादिति (ग) । ‖ उपानहापराधप्रायश्चित्तम् । वराह उवाच इति (ग) पुस्तके अधिकः पाठः ।

भेरीशब्दमकृत्वा तु यस्तु मां प्रतिबोधयेत् ।
बधिरोजायते भूमे एकं जन्म न संशयः ॥ १०२ ।
तस्य वक्ष्यामि सुश्रोणि प्रायश्चित्तं मम प्रियम् ।
किल्बिषाद्येन मुच्येत भेरीताड़नमोहितः ॥ १०३ ।
यस्य कस्यचिन्मासस्य शुक्लपक्षे तु द्वादशी ।
आकाशशयनङ्कृत्वा शीघ्रं मुच्येत किल्बिषात् ॥ १०४ ।
य एतेन विधानेन वसुधे कर्म्म कारयेत् ।
अपराधन्न गच्छेत मम लोकाय गच्छति* ॥ १०५ ।
अन्नम्भुक्त्वा बहुतरमजीर्णेन परिप्लुतः ।
उद्गारेण समायुक्तः अस्नात उपसर्पति ॥ १०६ ।
एकजन्मनि श्वा चैव वानरश्चैव जायते ।
एकस्मिञ्जन्मनि च्छागः शृगालश्चैकजन्मनि ॥ १०७ ।
एकजन्म भवेदन्धो मूषिकी जायते पुनः ।
तारितो ह्येष संसाराज्जायते विपुले कुले ॥ १०८ ।
शुद्धोभागवतः श्रेष्ठस्त्वपराधविवर्ज्जितः ।
प्रायश्चित्तम्प्रवक्ष्यामि मम भक्तसुखावहम् ॥ १०९ ।
किल्बिषाद्येन मुच्येत मम भक्तिपरायणः ।
त्रिदिनं पावकाहारी मूलाहारी दिनत्रयम् ॥ ११० ।
पायसेन दिनत्रीणि त्रिदिनं शक्तुना तथा ।

---

* (ग) पुस्तकेऽतः परं भेरीताड़नापराधप्रायश्चित्तम् । वराह उवाचेत्यधिकः पाठः ।

त्रिदिनं वायुभक्षोऽपि आकाशशयनस्थितकम् ॥ १११ ।
उत्थायापररात्रे तु कृत्वा वै दन्तधावनम् ।
पञ्चगव्यं पिबेच्चैव शरीरपरिशोधनम् ॥ ११२ ।
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
न स लिप्येत पापेन मम लोकाय गच्छति ॥ ११३ ।
आख्यानानां महाख्यानं तपसाञ्च परन्तप: ।
अत्राहङ्कीर्त्तयिष्यामि ब्राह्मणेभ्यो महेश्वरि ॥ ११४ ।
एष धर्म्मश्च कीर्त्तिश्च आचाराणां महौजसाम् ।
गुणानाञ्च परं श्रेष्ठ ऋतीनाञ्च महाऋति:* ॥ ११५ ।
य एतत्पठते नित्यं कल्यमुत्थाय मानव: ।
स पितॄंस्तारयेज्जन्तुर्दश पूर्व्वान्दशापरान् ॥ ११६ ।
आरोग्याणां महारोग्यं मङ्गलानान्तु मङ्गलम् ।
रत्नानां परमं रत्नं सर्व्वपापप्रणाशनम् ॥ ११७ ।
यस्तु भागवतो नित्यं पठते च दृढव्रत: ।
कृत्वा सर्व्वापराधानि न स पापेन लिप्यते ॥ ११८ ।
एष जप्य: प्रमाणञ्च सन्ध्योपासनमेव च ।
कल्यमुत्थाय पठते मम लोकाय गच्छति ॥ ११९ ।
न पठेन्मूर्खमध्ये तु कुशिष्याणां तथैव च ।
दद्याद्भागवते श्रेष्ठे मम कर्म्मपरायणे ॥ १२० ।

* द्युतीनाञ्च महाद्युतिरिति (ग) ।

एतत्ते कथितो देवि आचारस्य विनिश्चयः ।
पूर्व्वन्त्वया यत्पृष्टन्तु किमन्यच्छ्रोतुमिच्छसि ॥ १२१ ।

इति वराहपुराणे भगवच्छास्त्रे प्रायश्चित्तकर्म्मसूत्रं नाम
षट्त्रिंशदधिकशततमोऽध्यायः ।

सप्तत्रिंशदधिकशततमोऽध्यायः ।

सूत उवाच ।

श्रुत्वा तु विपुलं ह्येतदपराधविशोधनम् ।
कर्म्म भागवतं श्रेष्ठं सर्व्वभागवतप्रियम् ॥ १ ।
अहो कर्म्म महाश्रेष्ठं भगवंस्तव भाषितम् ।
मम चैव प्रियार्थाय तव भक्तसुखावहम् ॥ २ ।*
श्रुतं ह्येव महावाहो सर्व्वधर्म्मार्थसाधकम् ।
तव भक्तसुखार्थाय तद्भवान्वक्तुमर्हति ॥ ३ ।
किमुच्यते व्रतञ्चैव शुभं कुब्जाम्रकं† महत् ।
कतरच्चापि तच्छ्रेष्ठं चैनभक्तसुखावहम् ॥ ४ ।

वराह उवाच ।

शृणु मे परमं गुह्यं यत्त्वया पृच्छितं‡ मम ।

---

* एष श्लोकः क-खयोः पुस्तकयोर्नास्ति । † कुब्जामकं महदिति (ग) । ‡ पृष्टमिति साधु ।

मम क्षेत्रं परञ्चैव शुद्धं भागवतप्रियम् ॥ ५ ।
परं कोकामुखं स्थानं तथा कुब्जाम्रकं परम् ।
परं सौकरवं स्थानं सर्व्वसंसारमोक्षणम् ॥ ६ ।
यत्र संस्था च मे देवि ह्युद्धृतासि रसातलात् ।
यत्र भागीरथी गङ्गा मम सौकरवे स्थिता ॥ ७ ।

धरोवाच ।

केषु लोकेषु यान्तीश सौकरे ये मृताः प्रभो ।
किं वा पुण्यं भवेत्तत्र स्नातस्य पिबतस्तथा ॥ ८ ।
कति तीर्थानि पश्चाच्च क्षेत्रे सौकरवे तव* ।
धर्म्मसंस्थापनार्थाय तद्विष्णो वक्तुमर्हसि ॥ ९ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि यत्त्वं माम्परिपृच्छसि ।
यां गतिन्ते प्रपद्यन्ते नराः सौकरवे मृताः ॥ १० ।
यत्र स्नातस्य यत्पुण्यं गतस्य च मृतस्य च ।
यत्र यानि च तीर्थानि मम संस्थानसंस्थिताः ॥ ११ ।
शृणु पुण्यं महाभागे मम क्षेत्रेषु सुन्दरि ।
प्राप्नुवन्ति महाभागे गत्वा सौकरवम्प्रति ॥ १२ ।
दश पूर्व्वापराश्चापि अपरे सप्त पञ्च च ।
स्वर्गं गच्छन्ति पुरुषास्तेषां ये तत्र वै मृताः† ॥ १३ ।
गमनादेव सुश्रोणि मुखस्य मम दर्शनात् ।

* तथेति (ग) । † मृता इति (ग) ।

सप्तजन्मान्तरे भद्रे जायते विपुले कुले ॥ १४ ।
धनधान्यसमृद्धेषु रूपवान् गुणवान् शुचिः ।
मद्भक्तश्चैव जायेत मम कर्म्मपरायणः ॥ १५ ।
एवं वै मानुषो भूत्वा अपराधविवर्ज्जितः ।
गमनन्तस्य चैत्रस्य मरणं तत्र कारणम् ॥ १६ ।
ये मृतास्तस्य चैत्रस्य सौकरस्य प्रभावतः ।
शङ्खचक्रगदापद्मधनुर्हस्ताश्चतुर्भुजाः ।
त्यक्त्वा कलेवरन्तूर्णं श्वेतद्वीपाय यान्ति ते ॥ १७ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तीर्थेषु तेषु स्नातश्च यां* प्राप्नोति परां गतिम् ॥ १८ ।
चक्रतीर्थं महाभागे यत्र चक्रं प्रतिष्ठते† ।
शृणु पुण्यं तत्र भद्रे प्राप्नोति परमं नरः ॥ १९ ।
चक्रतीर्थे नरो गत्वा नियतो नियताशनः ।
वैशाखद्वादशीम्प्राप्य स्नायाद्यो विधिपूर्व्वकम् ॥ २० ।
दश वर्षसहस्राणि दश वर्षशतानि च ।
धनधान्यसमृद्धो हि जायते विपुले कुले ॥ २१ ।
मद्भक्तश्चापि जायेत मम कर्म्मपरायणः ।
अपराधं वर्ज्जयति दीक्षितश्चैव जायते ॥ २२ ।
भूत्वा वै मानुषस्तत्र तीर्थे संसारसागरम् ।
तीर्त्वा चक्रगदाशङ्खपद्मपाणिश्चतुर्भुजः ॥ २३ ।

---

* तीर्थेषु स्नातश्च यां प्राप्नोति परमां गतिमिति (क), (ख) पुस्तकयोः पाठस्तत्र च्छन्दोदोषः । † प्रतिष्ठितमिति (ग) ।

मम रूपधरः श्रीमान्मम लोके महीयते ।
चक्रतीर्थे विशालाक्षि मरणे कृतकृत्यतः ॥ २४ ।
एतच्छ्रुत्वा वचस्तस्य श्रोतुकामा वसुन्धरा ।
शिरस्यञ्जलिमाधाय श्लक्ष्णमेतदुवाच ह ॥ २५ ।
तत्र सौकरवे तीर्थे चन्द्रमास्त्वामतोषयत् ।
एतदाचक्ष्व तत्त्वेन परं कौतूहलं हि मे ॥ २६ ।
वसुधाया वचः श्रुत्वा विष्णुर्मायाकरण्डकः ।
उवाच वाक्यं मेदिन्याः मेघदुन्दुभिनिःस्वनः ॥ २७ ।
शृणु भूमे प्रयत्नेन कथ्यमानं मयानघे ।
तस्य वै कारणं येन तेन चाराधितोऽस्म्यहम् ॥ २८ ।
तस्य प्रीतोऽस्म्यहं देवि विशुद्धेनान्तरात्मना ।
दर्शितश्च मया ह्यात्मा यो हि देवेषु दुर्लभः ॥ २९ ।
रूपं सोमेन तद्दृष्ट्वा विसंज्ञस्तदनन्तरम् ।
मह्यं* द्रष्टुं न शक्नोति मम तेजःप्रमोहितः ॥ ३० ।
ततो निमीलिताक्षेण कृत्वा शिरसि चाञ्जलिम् ।
न शक्नोति तथा वक्तुं भीरुः सन्त्रस्तलोचनः ॥ ३१ ।
एवमेतद्विचेष्टन्तं† ब्राह्मणानामपीश्वरम् ।
वाणीं सूक्ष्मां समादाय स सोमो नोदितो मया ॥ ३२ ।
किंवा फलं समुद्दिश्य तप्यसे सुमहत्तपः ।
ब्रूहि तत्त्वेन मे सोम यत्ते मनसि वर्त्तते ।

---

* मह्यमित्यत्र मामिति साधु । † विचेष्टन्तमित्यत्र विचेष्टमानमिति साधु ।

सर्व्वं सम्पादयिष्यामि त्वत्प्रसादान्न संशयः॥ ३३।
मम वाक्यं ततः श्रुत्वा ग्रहाणां प्रवरेश्वरः।
उवाच मधुरं वाक्यं सोमतीर्थमवस्थितः॥ ३४।
भगवन्यदि तुष्टोऽसि मम चात्र ततः प्रभो।
योगनाथोजगच्छ्रेष्ठः सर्व्वयोगीश्वरेश्वरः॥ ३५।
यावल्लोका धरिष्यन्ति तावत्त्वयि जनार्द्दन।
अतुला त्वयि मे भक्तिर्भवेन्नित्यं सुनिश्चला॥ ३६।
यच्चापि मम तद्रूपं त्वया संस्थापितं प्रभो।
सप्तद्वीपेषु दृश्येत तत्र तत्रैव संस्थितम्॥ ३७।
सोम इत्येव यज्ञेषु पिबन्तु मम ब्राह्मणाः।
गतिः परमिका तेषां दिव्या विष्णो भवेद्यथा॥ ३८।
क्षीणस्तत्र त्वमावस्यां तत्र पिण्डपितृक्रिया।
प्रवर्त्तन्ते यथान्यायं भवेयं सौम्यदर्शनः॥ ३९।
अधर्म्मे च न मे बुद्धिर्भवेद्विष्णो कदाचन।
पतिस्त्वञ्चाथ गच्छेयमोषधीनां तथा कुरु॥ ४०।
यदि तुष्टो महादेव आदिमध्यान्तवर्ज्जितः।
मम चैव प्रियार्थाय एतन्मे* दीयतां वरः॥ ४१।
ततः सोमवचः श्रुत्वा तत्रैवान्तर्हितोऽभवम्॥ ४२।
एवं तप्तं महाभागे तप. सोमेन निश्चयात्।
प्राप्ता च परमा सिद्धिः सोमतीर्थेऽन्यदुर्ल्लभा॥ ४३।

---

* एतदित्यत्र एष इति साधु।

स्नायाद्यः सोमतीर्थे तु मम कर्म्मपरायणः ।
अष्टमेन तु भक्तेन मम कर्म्मविधौ स्थितः ।
फलन्तस्य प्रवक्ष्यामि सोमतीर्थे नरस्य यत् ॥ ४४ ।
यत्र तप्तन्तपस्तेन सोमेन सुमहात्मना ।
पञ्चवर्षसहस्राणि एकपादेन तिष्ठता ।
पञ्चवर्षसहस्राणि तथैवोर्द्ध्वमुखः स्थितः ॥ ४५ ।
एवमुग्रन्तपः कृत्वा कान्तिमानभवच्च सः ।
ममापराधान्मुक्तश्च ब्राह्मणानां पतिस्तथा ॥ ४६ ।
एवमेव महाभागे सोमतीर्थे कृतोदकः ।
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ।
जायते ब्राह्मणः सुभ्रु* वेदवेदाङ्गपारगः ॥ ४७ ।
द्रव्यवान् गुणवांश्चैव संविभागी यशस्विनि ।
मद्भक्तश्चैव जायेत अपराधविवर्ज्जितः ॥ ४८ ।
स एष ब्राह्मणोभूत्वा संसाराद्विप्रमुच्यते ।
तस्य चिह्नं प्रवक्ष्यामि सोमतीर्थस्य सुन्दरि ।
तत्तीर्थं येन विज्ञेयं मम मार्गानुसारिणा ॥ ४९ ।
वैशाखस्य तु मासस्य शुक्लपक्षस्य द्वादशी ।
प्रवृत्ते चान्धकारे तु यत्र कश्चिन्न दृश्यते ॥ ५० ।
सोमेन च विना भूमिर्दृश्यते चन्द्रसप्रभा ।
आलोकश्चैव दृश्येत सोमस्तत्र न दृश्यते ॥ ५१ ।

---

* शुभे इति (ग) ।

एवन्त्वां वच्मि हे भद्रे एष वै विस्मयः परः ।
एतच्चिह्नं महाभागे पुच्छे सौकरवे मम ।
सौमतीर्थे विशालाक्षि येन मुच्यन्ति* जन्तवः ॥ ५२ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
प्रभावमस्य क्षेत्रस्य विस्मयम्परमं महत्† ॥ ५३ ।
अकामा तु मृता तीर्थे आत्मनः कर्म्मनिश्चयात् ।
मम क्षेत्रप्रभावेण शृगाली मानुषी भवेत् ॥ ५४ ।
राजपुत्री विशालाक्षी श्यामा सर्व्वाङ्गसुन्दरी ।
गुणवद्रूपसम्पन्ना चतुःषष्टिकलान्विता ॥ ५५ ।
तस्य पूर्व्वेण पार्श्वेन तीर्थं गृध्रवटं‡ स्मृतम् ।
यत्राकामो मृतो गृध्रो मानुषत्वमुपागतः ॥ ५६ ।
वाक्यं नारायणाच्छ्रुत्वा धरणी शुभलक्षणा ।
उवाच मधुरं वाक्यं विष्णुभक्तसुखावहम् ॥ ५७ ।
अहो तीर्थप्रभावो वै त्वया प्रोक्तो महान्मम ।
यस्य देव प्रभावेण तिर्य्यग्योनित्वमागतौ ।
गृध्रश्चैव शृगाली च प्राप्तौ वै मानुषीन्तनुम् ॥ ५८ ।
स्नानेन तत्र तीर्थे च मरणाद्वा जनार्द्दन ।
काङ्गतिं वै प्रपद्यन्ते तन्ममाचक्ष्व केशव ॥ ५९ ।
चिह्नञ्च कीदृशन्तेषां ज्ञायन्ते येन ते तथा ।

---

* मुच्यन्ते इति साधु । † महदिति आर्षं महान्तमिति साधु । ‡ गृध्रघट-मिति (ग) ।

अकामावपि तौ चैत्रे प्राप्तौ तु परमां गतिम् ॥ ६० ।
ततोमहीवचः श्रुत्वा विष्णुर्धर्म्मविदां वरः ।
उवाच मधुरं वाक्यन्धर्म्मकामो वसुन्धराम् ॥ ६१ ।
शृणु तत्त्वेन मे भूमे यन्मान्त्वं परिपृच्छसि ।
उभौ तौ* कारणाद्यस्मात्प्राप्तौ वै मानुषीङ्गतिम् ॥ ६२ ।
तस्मिन् काले ह्यतिक्रान्ते मम कर्म्मविनिश्चयात् ।
त्रेतायुगे ह्युपक्रान्ते जाते च युगसंस्थितौ ॥ ६३ ।
तत्र राजा महाभागः स्वधर्म्मकृतनिश्चयः ।
ब्रह्मदत्तेति† विख्यातः पुरं काम्पिल्लमास्थितः ॥ ६४ ।
तस्य पुत्त्रोमहाभागः सर्व्वधर्म्मेषु निष्ठितः ।
सोमदत्तेति विख्यातः कुमारः शुभलक्षणः ।
पित्रर्थे मृगयां यातोमृगलिप्सुर्वने तदा ॥ ६५ ।
अरण्ये स तदा गत्वा व्याघ्रसिंहनिषेविते ।
न तत्र लभते किञ्चित्पितृकार्य्ये नराधिपः ॥ ६६ ।
एवं हि भ्रमतस्तस्य‡ शृगाली दक्षिणे तथा ।
अङ्गमध्ये तु विद्धा सा स्फुरन्ती सर्व्वमङ्गला ॥ ६७ ।
तथा सा बाणसन्तप्ता व्यथया च परिप्लुता ।
पीत्वा सा सलिलं तत्र वृक्षं शाकोटकङ्गता ॥ ६८ ।
आतपेन परिक्लान्ता बाणविद्धातुरा भृशम् ।

---

* उभौ तु इति (ग)। † ब्रह्मदत्त इतीति साधु। एवं परत्र सोमदत्त इतीति।
‡ एवं सम्भ्रमतस्तस्येति (ग)।

अकामा मुञ्चती प्राणांस्तीर्थं सोमात्मकम्प्रति ॥ ६९ ।
एतस्मिन्नन्तरे भद्रे राजपुत्रः क्षुधार्द्दितः ।
प्राप्तो गृध्रवटं तीर्थं विश्रामन्तत्र चाकरोत् ॥ ७० ।
अथ पश्यति गृध्रं स वटशाखां समाश्रितम् ।
एकेन स तु वाणेन तथा गृध्रो निपातितः ॥ ७१ ।
स तत्र पतितो गृध्रो वटमूले यशस्विनि ।
गतासुर्नष्टसंज्ञो वै वाणभिन्नस्तथा हृदि ॥ ७२ ।
तं दृष्ट्वा पतितं गृध्रं राजपुत्रस्तुतोष ह ।
तस्य च्छित्वा ततः पत्नौ गृहीत्वा राजनन्दनः* ।
वाणपत्रान्विधातुञ्च सोमदत्तो गृहान्ययौ ॥ ७३ ।
सोऽपि दीर्घेण कालेन अकामोऽपि मृतः खगः ।
जातः कलिङ्गराजस्य सुतो गुणविभूषितः ।
रूपवान् पण्डितश्चैव प्रजानन्दकरः सदा ॥ ७४ ।
तस्मिन्राजनि नायासं कोऽपि कुत्रापि विन्दति ॥ ७५ ।
या सा शृगाली सञ्जज्ञे काञ्चीराज्ञो† गृहे सुता ।
रूपयुक्ता गुणवती दत्ता‡ सर्व्वाङ्गसुन्दरी ॥ ७६ ।
चतुःषष्टिकलायुक्ता कोकिलेव सुखस्वरा ॥ ७७ ।
एवं प्रवर्त्तिते तत्र काञ्चीराज्ये कलिङ्गके ।
हार्द्दिक्यात्सौहृदात्प्रीतिरन्योऽन्यकुलनिश्चयात् ।

---

* राजसत्तम इति (क), (ख)। † कान्तीराज्ञ इति (ग)। एव परत्रापि।
‡ दृष्टेति (ग)।

भूमे मम प्रसादेन सम्बन्धो जायते ततः ॥ ७८ ॥
अथ दीर्घेण कालेन काञ्चीराजसुता तथा ।
कलिङ्गराजपुत्त्रेण विधिना तु विवाहिता ॥ ७९ ॥
काञ्चीराजस्तयोः प्रीत्या नानारत्नानि चाददत् ।
भूषणानि च दिव्यानि गजाश्वमहिषीः स्त्रियः ॥ ८० ॥
ततः कलिङ्गराजोऽपि सवधूकं निजं सुतम् ।
आदाय* स्वगृहं यातस्तेन राज्ञातिमानितः ॥ ८१ ॥
एवं गच्छति काले वै दम्पत्योस्तुष्यमानयोः† ।
अव्युच्छिन्नाऽभवत्प्रीती रोहिणीचन्द्रयोरिव ॥ ८२ ॥
रेमतुस्तौ‡ विहारेषु देवतायतनेषु च ।
वने चोपवने चैव ये केचिन्नन्दनोपमाः§ ॥ ८३ ॥
भर्त्तारं सा न पश्येच्चेत्कदाचिदपि पार्श्वतः ।
नष्टं मन्येत चात्मानं राजपुत्त्री यशस्विनी ॥ ८४ ॥
न चेत्पश्यति भार्य्यां स्वां सोऽपि राजन्यनन्दनः ।
आत्मानं मन्यते प्रीत्या नष्टप्रायं वसुन्धरे ॥ ८५ ॥
दिने दिने तयोरेवं वर्द्धते प्रीतिरुत्तमा ।
नान्तरं पश्यते¶ कश्चित्पुरुषः पुण्यकर्म्मणोः ॥ ८६ ॥
सोऽपि वृद्धा सुशीलेन व्रतेन च वसुन्धरे ।
कलिङ्गस्तोषयामास पौराञ्ज्ञानपरांस्तथा ॥ ८७ ॥

---

* आहृयेति (ग)। † तुष्यतोरिति साधु। ‡ रेमतुरिति आर्षं रेमाते इति साधु। § यत्किञ्चिन्नन्दनोपममिति साधु। ¶ पश्यतीति साधु।

अन्तःपुरे तु या नार्य्यः कलिङ्गेषु धरे तयोः।
ताभ्यां सन्तोषिताः सर्व्वाः शीलेन स्वगुणैस्तथा ॥ ८८ ।
एवम्प्रवर्द्धिता ताभ्यां प्रीतिः पूर्व्वं यशस्विनि।
रमते तत्र चान्योऽन्यं शचीवासवयोरिव ॥ ८९ ।
अथ प्रणयपूर्व्वं सा कान्तं सर्व्वाङ्गसुन्दरी।
व्यजिज्ञपद्राजसुतं सौहृदेन यशस्विनी ॥ ९० ।
किञ्चिदिच्छामि ते वक्तुं राजपुत्र यशोधन।
मम स्नेहात्प्रियञ्चैव तद्भवान्वक्तुमर्हति ॥ ९१ ।
ततो भार्य्यावचः श्रुत्वा कलिङ्गस्य सुतः प्रभुः।
उवाच मधुरं वाक्यं पद्मपत्रनिभेक्षणः ॥ ९२ ।
यद्वदिष्यसि भद्रे त्वं यच्च तेऽस्ति मनीषितम्।
सर्व्वन्ते कथयिष्यामि शपे सत्येन सुन्दरि ॥ ९३ ।
सत्यं मूलं ब्राह्मणानां विष्णुः सत्ये प्रतिष्ठितः।
तस्य मूलं तपो राज्ञि राज्यं सत्ये प्रतिष्ठितम् ॥ ९४ ।
नाहं मिथ्या प्रवक्ष्यामि कदाचिदपि सुन्दरि।
न मिथ्या पूर्व्वमुक्तं मे ब्रूहि किङ्करवाणि ते ॥ ९५ ।
हस्त्यश्वरथरत्नानि यानानि च धनानि च।
अथवा परमग्रन्तु पट्टबन्धङ्करोमि ते ॥ ९६ ।
सा भर्त्तृवचनं श्रुत्वा काञ्चीराजस्य चात्मजा।
उभौ चरणौ संगृह्य भर्त्तारमिदमब्रवीत् ॥ ९७ ।
न चैव रत्नानीच्छामि हस्त्यश्वरथमेव च।
पट्टबन्धेन कार्य्यञ्च यावद्ध्रियति मे गुरुः ॥ ९८ ।

एका स्वपितुमिच्छामि मध्याह्ने तु तथाविधे ।
न चिरं बाल्यकालन्तु यथा कश्चिन्न पश्यति ॥ ९९ ।
श्वशुरो यदि वा श्वश्रूर्यथैवान्यो नराधिप ।
सुप्ता नैव च द्रष्टव्या व्रतमेतन्मुहूर्त्तकम् ॥ १०० ।
आत्मनो वै गृहजना ये केचित्स्वजने जनाः ।
ते मां प्रसुप्तां पश्येयुः कदाचिदपि संस्थिताम् ॥ १०१ ।
ततो भार्य्यावचः श्रुत्वा कलिङ्गैश्वर्य्यवर्द्धनः ।
बाढ़मित्येव तां वाक्यं प्रत्युवाच वसुन्धरे ॥ १०२ ।
विस्रब्धा भव सुश्रोणि कल्याणि न यशस्विनि ।
न त्वां वै द्रक्ष्यते कश्चिच्छयनीये महाव्रताम्* ॥ १०३ ।
एवं गच्छति काले तु तयोस्तु तदनन्तरे ।
कलिङ्गो जरया युक्तो पुत्रं राज्येऽभ्यषेचयत् ॥ १०४ ।
राज्यं दत्त्वा वरारोहे यथान्यायं कुलोद्भवम् ।
कृत्वा निष्कण्टकं राज्यं दत्त्वा पञ्चत्वमागतः ॥ १०५ ।
एवम्प्रभुस्ततोराज्यं पितुर्द्दत्तं यथोचितम्† ।
एकाकी स्वपते तत्र यत्र कश्चिन्न पश्यति ॥ १०६ ।
स तु दीर्घेण कालेन कलिङ्गवंशवर्द्धनः ।
सुतानजनयत्पञ्च आदित्यसमतेजसः ॥ १०७ ।
एवन्तु मानुषं लोकं मम मायाप्रमोहितम् ।
आत्मकर्म्मसु संयुक्तं चक्रवत्परिवर्त्तते ॥ १०८ ।

---

* शयनीयंमहाव्रतामिति (क), (ख) । † यशोऽर्च्चितमिति (ग) ।

जातो जन्तुर्भवेद्बाली बालोस्तु तरुणो भवेत्।
तरुणो मध्यमं याति पश्चाद्याति जरान्ततः॥ १०८।
बालो वै यानि कर्म्माणि करोत्यज्ञानतः स्वयम्।
न स लिप्यति* पापेन एवमेतन्न संशयः॥ ११०।
ततः करिष्यतोराज्यन्निष्कण्टकमनामयम्।
सप्तसप्ततिवर्षाणि ह्यतीतानि यशस्विनि॥ १११।
अष्टसप्ततिमे वर्षे एकान्ते तु नराधिपः।
तमेव चिन्तयन्नर्थं मध्यसंस्थे दिवाकरे॥ ११२।
माधवस्य तु मासस्य शुक्लपक्षे तु द्वादशी।
बुद्धिः सम्पद्यते तस्य प्रियादर्शनलालसा॥ ११३।
कोऽर्थस्तत्किं† व्रतञ्चास्या एषा स्वपिति निर्जने।
न सुप्तायाः‡ व्रतं किञ्चिद्दृश्यते धर्मसञ्चयः॥ ११४।
न च विष्णुकृतं कर्म्म न चैवेश्वरचोदितम्।
मनुना वै कृतोधर्म्म एष चैव न दृश्यते॥ ११५।
न काप्यपकृतो§ धर्म्मो महानपि न योगिनाम्।
न तत्र एष विद्येत यश्चरेद्व्रतमीदृशम्॥ ११६।
वार्हस्पत्येषु धर्म्मेषु याम्येषु च न विद्यते।
न एष विद्यते तत्र सुप्ता चरति यद्व्रतम्॥ ११७।
भुक्त्वा तु कामभोगानि भुक्त्वा तु पिशितोदनम्¶।

---

* लिप्यते इति साधु। † कोऽर्थस्तच्चिन्तितञ्चास्या इति (क), (ख)। ‡ सुप्तायामिति (ग)। § न काश्यपकृत इति बहुषु पाठः। ¶ आशितोदनमिति (क), (ख)।

ताम्बूलं रक्तवस्त्रन्तु सुसूक्ष्मे पट्टवाससी ॥ ११८ ।
सुगन्धैर्भूषिता गात्रे सर्व्वरत्नसमायुता ।
मम कान्ता विशालाक्षी किमत्र चरते व्रतम् ॥ ११९ ॥
कुप्येतापि तु सन्दृष्टा प्रिया मे कमलेक्षणा ।
अवश्यमेव द्रष्टव्या चरति कीदृशं व्रतम् ॥ १२० ।
किन्नरैः सुप्रलक्ष्येत वशीकरणमुत्तमम् ।
अथ योगीश्वरी भूत्वा गच्छते यत्र रोचते ।
अथवा चान्यसंस्पृष्टा कामरागेण चावृता* ॥ १२१ ।
एवञ्चिन्तयतस्तस्य अस्तं प्राप्तो दिवाकरः ।
संवृत्ता रजनी सुभ्रूः सर्व्वसार्थसुखावहा ॥ १२२ ।
ततो रात्र्यां व्यतीतायां प्रभातसमये शुभे ।
पठन्ति मागधा वन्दिसूता वैतालिकास्तथा ॥ १२३ ।
शङ्खदुन्दुभिनादैश्च बोधितो वसुधाधिपः ।
सर्व्वलोकहितार्थाय उदिते च दिवाकरे ॥ १२४ ।
यत्तदा चिन्तितं पूर्व्वं द्रष्टुकामेन तां प्रियाम् ।
सर्व्वचिन्तां परित्यज्य सा चिन्ता हृदि वर्त्तते ॥ १२५ ।
स्नातस्तु विधिना सोऽथ क्षौमाभ्यामुपसंवृतः ।
भूत्वा चोत्सारयामास आज्ञां दत्त्वा यथोचितम् ॥ १२६ ।
व्रतस्थं मान्तु यः स्पृशेन्नारी पुरुष एव च ।
धर्म्मयुक्तेन दण्डेन मम वध्यो भवेत्तु सः ॥ १२७ ।

---

* एष श्लोकः (ग) पुस्तके नास्ति ।

एवमाज्ञापयित्वा तु कालिङ्गो नृपतिः किल ।
गतश्च त्वरया धीमान्प्रविष्टस्तत्र सुव्रते ॥ १२८ ।
पर्य्यङ्कस्य तले तत्र राजा दर्शनलालसः ।
विलोक्य तां वरारोहान्ततश्चिन्तापरायणाम् ॥ १२९ ।
ततः कमलपत्राक्षी वेदनायासपीड़िता ।
रुजार्त्ता रुरुदे तत्र शिरोवेदनताड़िता ॥ १३० ।
किम्मया तु कृतं कर्म्म पूर्व्वमेव सुदुष्करम् ।
येनाहमीदृशीं प्राप्ता दशां पुण्यपरिक्षयात् ।
भर्त्ता च मां न जानाति क्लिश्यमानामनाथवत् ॥ १३१ ।
अथ माङ्किं कथं भर्त्ता मन्यते स्वजनोऽपि वा ।
कथये किं शयाना तु सखीनां शयने स्थिता ॥ १३२ ।
एवमत्र न युज्येत यन्मया परिचिन्तितम् ।
किञ्च वात्मनि दुःखस्य सर्व्वमेतच्च* युज्यते ॥ १३३ ।
किञ्च मां वक्ष्यते भर्त्ता किञ्च मामितरे जनाः ।
अन्यायेन व्रतञ्चीर्णं सर्व्वतो विक्षतं भवेत् ॥ १३४ ।
कदाचिदपि काले तु गच्छेत्सौकारवम्प्रति ।
ततो ब्रूयामिदं वाक्यं यन्मे हृद्यवतिष्ठते ॥ १३५ ।
ततः प्रियावचः श्रुत्वा समुत्थाय ततो नृपः ।
दोर्भ्यामालिङ्ग्य वै भार्य्यां वाक्यमेतदुवाच ह ॥ १३६ ।
किमिदं भाषसे† भद्रे आत्मानं न प्रशंससि ।

---

* सर्व्वमेतन्न युज्यते इति (क), (ख) । † किमिदं निन्दसे इति (ग) ।

अशोच्या शोचती या तु यच्च निन्दसि चात्मनि ॥ १३७ ।
भिषजः किं न विद्यन्ते अष्टकर्म्मसमाहिताः ।
ये तु संस्थापयेयुस्ते शिरसोवेदनां पराम् ॥ १३८ ।
त्वया पूर्व्वं व्रतमिषाद्वेदना यदि गोपिता* ।
येन वै क्लिश्यसे† भद्रे शिरस्यसुखपीड़िता ॥ १३९ ।
वायुना कफपित्तेन शोणितेन कफेन वा ।
सन्निपातस्य दोषेण येनेदम्पीड्यते शिरः ॥ १४० ।
काले विकाले कृत्वा वै पित्तोद्रेकं यशस्विनि ।
अश्नासि पिशितं चान्नन्तेनेदं दूष्यते शिरः ॥ १४१ ।
क्रियतेऽत्र शिरावेधो रुधिरस्राव एव च ।
दीयते चेच्छिरोऽभ्यङ्गः कथं तिष्ठति वेदना ॥ १४२ ।
किमेतद्गोपितं भद्रे मयि तन्न निवेदितम् ।
त्वया व्रतमिषेणायमात्मा संक्लिश्यते वृथा ॥ १४३ ।
या त्वं वै भाषसे वाक्यं सौकरे गमनं प्रति ।
तत्र गोप्यं किमस्तीति येन ते परिवेदना ॥ १४४ ।
ततः कमलपत्राक्षी सव्रीड़ा दुःखपीड़िता ।
भर्त्तुर्गृहीत्वा चरणौ सा पतिं प्रत्यभाषत ॥ १४५ ।
प्रसीद मे महाराज नेदं प्रष्टुन्त्वमर्हसि ।
मम पूर्व्वकथां वीर दुष्टकर्मानुसारिणीम् ॥ १४६ ।
ततो भार्य्यावचः श्रुत्वा कलिङ्गानां जनाधिपः ।

---

* परिगोपितेति (ग) । † क्लिश्यसीति साधु ।

उवाच मधुरं वाक्यं वहितेनान्तरात्मना* ॥ १४७ ।
किमिदं गोप्यते देवि ममाग्रे वरवर्णिनि ।
तथ्यमेव महाभागे पृच्छ्यमाना यशस्विनि ॥ १४८ ।
ततो भर्त्तृवचः श्रुत्वा विस्मयोत्फुल्ललोचना ।
उवाच मधुरं वाक्यं कलिङ्गानां महाधिपम् ॥ १४९ ।
भर्त्ता धर्मो यशो भर्त्ता भर्त्तैव प्रियमात्मनः ।
अवश्यमेव तद्वाच्यं यन्मां त्वं परिपृच्छसि ॥ १५० ।
तथापि नोत्सहे वक्तुं हृदि यत्परिवर्त्तते ।
तव पीड़ाकरमिति तन्मान्न प्रष्टुमर्हसि ॥ १५१ ।
एतद्दुःखं महाभाग हृदि मे परिवर्त्तते ।
सुखे हि वर्त्तसे नित्यं महाराजोऽसि सुन्दरः ॥ १५२ ।
बह्व्यो मत्सदृशा भार्य्यास्तिष्ठन्त्यन्तःपुरे तव ।
अश्नासि पिशितान्नञ्च प्रावारान् भूषणानि च ॥ १५३ ।
आच्छादयसि यानैश्च हस्त्यश्वरथपृष्ठगः ।
गच्छस्यनारतं राजन् किं स्थितञ्च मया विना ॥ १५४ ।
आज्ञा च तेऽप्रतिहता गन्धान् भोगांश्च सर्व्वशः ।
विभर्षि स्वेच्छया राजन्न मां संप्रष्टुमर्हसि ॥ १५५ ।
त्वं मे देवो गुरुः साक्षाद्भर्त्ता यज्ञः सनातनः ।
धर्म्मस्यार्थस्य कामस्य यशः स्वर्गस्य† मानद ॥ १५६ ।

---

* वहितेन अवहितेन। विहितेनान्तरात्मना इति (ग)। † यशैश्वर्य्यस्य मानसमिति (ग), यश ऐश्वर्य्यमिति साधु।

पृष्टया मे सदा वाच्यं सर्व्वं सत्यं प्रियं तव ।
पतिव्रतानां सर्व्वासामेष धर्म्मः सनातनः ॥ १५७ ।
न संशये नियोक्तव्यः सुखस्थोहि पतिः स्त्रिया ।
एतन्निश्चित्य मे पीड़ां न प्रष्टुन्त्वमिहार्हसि ॥ १५८ ।
ततो भार्य्यावचः श्रुत्वा कलिङ्गानां जनाधिपः ।
उवाच मधुरं वाक्यं भार्य्यापीड़ाभिपीड़ितः ॥ १५९ ।
शृणु तत्त्वेन मे भद्रे शुभं वा यदि वाशुभम् ।
अवश्यमेव वक्तव्यं पृष्टया पतिना ध्रुवम् ॥ १६० ।
यानि गुह्यान्यगुह्यानि स्त्रियो धर्म्मपथे स्थिताः ।
भर्त्तारञ्च समासाद्य रहस्तां गोपयन्ति न ॥ १६१ ।
कृत्वा सुदुष्करं कर्म्म रागलोभप्रमोहिता ।
या सुगोपायते गुह्यं सती सा नोच्यते बुधैः ॥ १६२ ।
एवं चिन्त्य* महाभागे ब्रूहि सत्यं यशस्विनि ।
अधर्म्मस्ते न भविता गुह्यार्थकथने मम ॥ १६३ ।
ततो भर्त्तृवचः श्रुत्वा सा देवी परमप्रिया ।
प्रत्युवाच प्रियं वाक्यं राजानं धर्म्मवादिनम् ॥ १६४ ।
देवोराजा गुरूराजा सोमोराजेति पठ्यते† ।
अवश्यमेव वक्तव्यमेष धर्म्मः सनातनः ॥ १६५ ।
यदि गुह्यं न मे कार्य्यं‡ श्रूयतां राजसत्तम ।
अभिषिञ्चस्व§ राज्ये स्वे ज्येष्ठं पुत्रं कुलोचितम् ।

* चिन्त्येति आर्षं चिन्तयित्वेति साधु । † मन्यते इति (ग) । ‡ वाक्यमिति (ग)
§ अभिषिच्येति साधु ।

एहि नाथ मया सार्द्धं चेत्रं सौकरवम्प्रति ॥ १६६ ।
ततोभार्य्यावचः श्रुत्वा कलिङ्गानां जनाधिपः ।
वाढ़मित्येव वाक्येन छन्दयामास तां प्रियाम् ॥ १६७ ।
दास्यामि राज्यं पुत्राय वचनात्तव सुन्दरि ।
यथा पूर्व्वं मया लब्धं स्वपितुर्य्यद्यथाक्रमम् ॥ १६८ ।
इत्युक्त्वा तौ महाभागौ युक्तश्चैव परस्परम् ।
राजा च राजपुत्री च निष्क्रान्तौ तद्गृहात्ततः ॥ १६९ ।
ततः कञ्चुकिनं दृष्ट्वा प्रोवाचोच्चस्वरेण च ।
अपसारय सर्व्वं वै जनमाहूत्य तिष्ठति ।
ज्ञानकौतूहलोयोऽत्र शीघ्रं गच्छलितौ वहिः ॥ १७० ।
ततोहलहलाशब्दः प्रवृत्तोऽन्तःपुरे महान् ।
किमिदं कारणं वृत्तं येन चोत्सारिता वयम्* ॥ १७१ ।
नात्रास्ति चिन्तालोलानामागतानां स्वकार्य्यतः ।
अश्रोतव्यं भवेन्नूनं येन चोत्सारिता वयम् ॥ १७२ ।
ततोभोज्यान्नपानानि भुक्त्वा रुच्या नृपः प्रियान् ।
समं महिष्या चाचम्य चणं विश्रम्य पार्थिवः ।
अमात्यानानयामास ह्यभिषेक्तुं निजं सुतम् ॥ १७३ ।
सम्प्राप्तान् सचिवांस्तत्र राजा वचनमब्रवीत् ।
संस्क्रियतां राजधानी मङ्गलाचारपूर्व्वकम् ॥ १७४ ।
वृद्धामात्यमुपास्याथ कलिङ्गो धर्म्मसंहितम् ।

---

* एष श्लोकः (ग) पुस्तके अत्र नास्ति, १७३ श्लोकादनन्तरमस्ति ।

नीतिशास्त्रार्थतत्त्वज्ञमुवाचाविक्लवं वचः ॥ १७५ ।
कल्यमिच्छाम्यहं तात पुत्त्रं राज्येऽभिषेचितुम्* ।
शीघ्रं सज्जं प्रकुर्व्वन्तु आभिषेचनिकं विधिम् ॥ १७६
भूतमित्येव तम्प्राहुः सचिवास्तं नराधिपम्† ।
अस्माकमपि तच्चैव रोचते यत्प्रभाषसे ॥ १७७ ।
पुत्त्रस्ते राजशार्दूल सर्व्वलोकहिते रतः ।
प्रजानुरागवान्शूरो नीतिज्ञस्तु विचारकः ।
मनीषितं तव विभो सम्यङ्नोमनसः प्रियम् ॥ १७८ ।
एवमुक्त्वा गतामात्याः‡ सूर्य्यश्चास्तमुपागतः ।
सुखेन सा गता रात्रिर्गीतगान्धर्व्ववादितैः ॥ १७९
बोधितः स च राजा तु सूतमागधवन्दिभिः ।
वैतालिकैश्च सुश्रोणि सर्व्वमङ्गलपाठकैः ॥ १८० ।
प्रभातायान्तु शर्व्वर्य्यामुदिते च दिवाकरे ।
मुहूर्त्ते शुभमासाद्य ह्यभिषिक्तः सुतः शुचिः ॥ १८१ ।
एवन्दत्त्वा तदा राज्यं मूर्द्ध्नि चाघ्राय धर्म्मवित् ।
उवाच मधुरं वाक्यं पुत्रं पुत्त्रवतां वरः ॥ १८२ ।
राज्यस्थेनापि ते पुत्त्र कर्त्तव्यं शृणु तन्मम ।
यदीच्छेः परमं§ धर्म्मं पितॄणां तारणं तथा ॥ १८३ ।
दातव्यं न च हन्तव्यं हन्तव्याः पारदारिकाः ।

---

* अभिषेक्तुमिति साधु । † अत्र तमित्यस्य पुनरुक्तिरस्ति, सचिवास्ते इति कोऽपि दोषः स्यात् । ‡ गता अमात्या इति साधु । § यदिच्छेत्परममिति वहुषु तत्र प्रथमपुरुषप्रयोग आर्षः ।

बालघाताश्च हन्तव्याः हन्तव्याः स्त्रीविघातकाः ॥ १८४ ।
न लोभः परभार्य्यासु ब्राह्मणीषु विशेषतः ।
सुरूपां परनारीन्तु दृष्ट्वा चक्षुर्निमीलयेः* ॥ १८५ ।
मा लोभः परद्रव्येषु अन्यायोपार्ज्जितेषु च† ।
न चिरं तिष्ठसि क्वापि कश्चन न पश्यसि‡ ॥ १८६ ।
रक्षणीयश्च ते देशः कुशलन्यायसज्जितः ।
नित्योद्युक्तेन स्थातव्यममात्यवचनङ्कुरु ॥ १८७ ।
अमात्यो यद्वचो ब्रूयात्तस्य कार्य्यं विमर्शनम् ।
अवश्यमेव कर्त्तव्यं शरीरपरिरक्षणम् ॥ १८८ ।
प्रजा येन प्रमोदन्ति येन तुष्यन्ति ब्राह्मणाः ।
एवं ते पुत्त्र कर्त्तव्यं मम प्रियहितैषुणा ॥ १८९ ।
सप्तव्यसनवर्गोऽत्र§ दोषो राज्ञां महान् भवेत् ।
अर्थदूषणकञ्चैव न कर्त्तव्यं कदाचन ।
अमात्यं नाप्रियं ब्रूया यमिच्छेराजकर्म्मणि¶ ॥ १९० ।
नाहं निवारणीयस्ते गमनाय पथि स्थितः ।
एतन्मे क्रियतां शीघ्रं यदीच्छसि मम प्रियम् ॥ १९१ ।
ततः पितुर्वचः श्रुत्वा राजपुत्त्रो यशस्विनि ।
पितुः पादौ तु संगृह्य करुणमत्युवाच तम् ॥ १९२ ।

---

* एष श्लोकः (ग)पुस्तके नास्ति । † न लोभः परद्रव्येषु नोऽन्यायोपार्ज्जितेषु चेति (ग) । ‡ सर्व्वे वानाः कथचनेति (ग) । § सप्तव्यसनगोत्रसेति (ग) । ¶ अमात्येनाप्रियं ब्रूयाद्यमिच्छेद्राजकर्म्मणीति (ग), अत्रापि प्रथमपुरुषक्रियाप्रयोग आर्षः ।

मम किं तात राज्येन कोशेन च बलेन च ।
यस्त्वया रहितस्तात न शक्नोमि विचेष्टितुम् ॥ १९३ ।
अभिषेकं राजशब्दं मम संज्ञापितन्त्वया ।
एतन्न बहुमन्येऽहं विना तात त्वया ह्यहम् ॥ १९४ ।
क्रीड़ामेवाऽत्र जानामि येन क्रीड़न्ति बालकाः ।
राज्यचिन्तां न जानामि राजानो यान्तु कुर्व्वते* ॥ १९५ ।
ततः पुत्त्रवचः† श्रुत्वा कलिङ्गानां महीपतिः ।
उवाच मधुरं वाक्यं सामपूर्व्वं यशस्विनि ॥ १९६ ।
यच्चेदं भाषसे पुत्त्र नाहं जानामि तद्वचः ।
पुत्त्र शिक्षापयिष्यन्ति पौरजानपदास्तव ॥ १९७ ।
एवं सन्दिश्य तं तत्र स राजा धर्म्मशास्त्रतः ।
गमनाय मतिञ्चक्रे क्षेत्रं सौकरवम्प्रति ॥ १९८ ।
तम्प्रयान्तं ततो दृष्ट्वा पौरजानपदास्तदा ।
सकलत्रसुताः सर्व्वेऽप्यनुयान्ति नराधिपम् ॥ १९९ ।
हस्त्यश्वरथयानानि स्त्रियश्चान्तःपुरस्थिताः ।
संहृष्टमनसः सर्व्वे अनुयान्ति नराधिपम्‡ ॥ २०० ।
अथ दीर्घेण कालेन प्राप्ता सौकरवम्प्रति ।
धनधान्यसमृद्ध्यादि प्रददौ तत्र माधवि ॥ २०१ ।
एवं गच्छति काले तु तयोस्तत्र वसुन्धरे ।

---

* येन कुर्व्वते इति (ग) । † तत्तु पुत्रवच इति (ग) । ‡ (ग) पुस्तके एष श्लोकः परश्लोकस्य च पूर्व्वार्द्धं न स्तः ।

प्रवर्त्तमानयोर्नित्यं धर्म्मे कर्म्मणि शुद्धयोः ॥ २०२ ।
ततः स पद्मपत्राक्षः कलिङ्गानां जनाधिपः ।
उवाच मधुरं वाक्यं काञ्चीराजसुतां तदा ॥ २०३ ।
पूर्णं वर्षसहस्रं वै जीवितं मम सुन्दरि ।
ब्रूहि तत्परमं गुह्यं यन्मया पूर्व्वपृच्छितम्* ॥ २०४ ।
ततो भर्त्तुर्वचः श्रुत्वा प्रहस्य रुचिरेक्षणा ।
उभौ तौ चरणौ गृह्य† राजानं वाक्यमब्रवीत् ॥ २०५ ।
एवमेतन्महाभाग यन्मात्त्वं परिपृच्छसि ।
उपोष्य तु त्रिरात्रन्त्वं पश्चाच्छ्रोष्यसि मानद ॥ २०६ ।
वाढ़मित्येव तां राजा प्रत्युवाच यशस्विनि ।
पद्मपत्रविशालाक्षि पूर्णचन्द्रनिभानने ।
यथा वदसि सुश्रोणि तथैव मम रोचते ॥ २०७ ।
दन्तकाष्ठं समादाय द्वादशाङ्गुलमायतम् ।
स्नात्वा सङ्कल्पयामास त्रिरात्रं नियमान्वितः ॥ २०८ ।
उपोष्य तौ‡ त्रिरात्रन्तु विधिना नियमान्वितौ ।
ततः स्नातौ शुची क्षौमे परिधाय तु वाससी ।
प्रणम्य भूषितौ विष्णुं दम्पती तदनन्तरम् ॥ २०९ ।
ततः सा सुन्दरी भूषां समुत्तार्य्य शुभेक्षणा ।
मह्यं निवेदयामास प्रोवाच च जनेश्वरम्§ ।

---

* पृष्टमिति साधु। † गृहीत्वेति साधु, एवं परत्र। ‡ उपोष्य तु इति (ग)।
§ जनेश्वरीति (ग)।

एह्येहि नाथ गच्छावः पश्य गोप्यं मनीषितम्* ॥ २१० ।
ततो हस्ते पतिं गृह्य उद्वाहे इव सुन्दरी ।
उवाच मधुरं वाक्यं कलिङ्गाधिपतिं तथा ॥ २११ ।
शृगाली पूर्व्वमेवाहं तिर्य्यग्योनिव्यवस्थिता ।
विद्धास्मि सोमदत्तेन वाणेन मृगलिप्सुना ॥ २१२ ।
एतं शिरसि मे राजन् पश्य वाणं सुसंस्कृतम् ।
यस्य दोषेण मेऽप्येष रुजा शिरसि संस्थिता ॥ २१३ ।
काञ्चीराजकुले जन्म पित्रा दत्ता तव प्रिया ।
चैत्रप्रभावान्मे सैषा† जाता सिद्धिर्नमोऽस्तु ते ॥ २१४ ।
स ततः पद्मपत्राक्षः कलिङ्गानां जनाधिपः ।
श्रुत्वा राजा प्रियां वाक्यं प्रत्युवाच स्मृतिङ्गतः ॥ २१५ ।
अहं गृध्रोमहाभागे तेनैव वनचारिणा ।
सोमदत्तेन वाणेन एकेनैव निपातितः ॥ २१६ ।
ततोजातोऽस्म्यहं भद्रे कलिङ्गानां जनाधिपः ।
जातोऽस्मि परमा व्युष्टिः प्राप्तं राज्यं मया महत्॥ २१७ ।
सिद्धिर्लब्धा‡ वरारोहे मया सर्व्वाङ्गसुन्दरि ।
अकामपतितेनापि पश्य चैत्रस्य वै फलम् ॥ २१८ ।
ये च भागवतश्रेष्ठा ये च नारायणप्रियाः ।
पौरजानपदाः सर्व्वे श्रुत्वा तु तदनन्तरम् ।
लाभालाभौ परित्यज्य सर्व्वकर्म्माण्यकारयन् ॥

---

* मनीषिभिरिति (ग)। † चैत्रप्रभावान्मय्येषेति (ग)। ‡ सिद्धिर्वद्धेति (ग)।

तत्रैव मरणम्प्रापुः* सर्व्वसङ्गविवर्ज्जिताः
श्वेतद्वीपं ततः प्राप्ताः सर्व्वे एव चतुर्भुजाः।
सर्व्वे शङ्खधराश्चैव सर्व्वे चायुधसंयुताः॥ २१९।२२०।
ताः स्त्रियश्च वरारोहे द्युतिमान्या महौजसः।
श्वेतद्वीपे प्रमोदन्ते सर्व्वभोगसमन्विताः॥ २२१।
एवं ते कथितं भूमि व्युष्टिः सौकरवे महत्।
अकामपतिताश्चैव श्वेतद्वीपमुपागताः॥ २२२।
य एतेन विधानेन वासन्तीर्थे तु कारयेत्।
मरणञ्च विशालाक्षि श्वेतद्वीपं स गच्छति॥ २२३।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे।
स्नानादाखोटके तीर्थे यत्फलं समुपाश्नुते॥ २२४।
दशवर्षसहस्राणि दशवर्षशतानि च।
नन्दनं समवाश्रित्य मोदन्ते चैव सर्व्वदा॥ २२५।
ततः स्वर्गात्परिभ्रष्टो जायते विपुले कुले।
मद्भक्तश्चैव जायेत एवमेतन्न संशयः॥ २२६।
पुनरन्यत्प्रवक्ष्यामि स्नातो वटप्रवटे नरः।
यत्फलं समवाप्नोति स्नानमात्रकृतोदकः॥ २२७।
नववर्षसहस्राणि नववर्षशतानि च।
इन्द्रलोकं समासाद्य मोदते दैवतैः सह॥ २२८।
इन्द्रलोकात्परिभ्रष्टो मम तीर्थप्रभावतः।

---

* एष श्लोकः (ग) पुस्तके नास्ति।

सर्व्वसङ्गं परित्यज्य मद्भक्तश्चैव जायते ॥ २२९ ।
एतत्ते कथितम्भद्रे स्नानमात्रस्य यत्फलम् ।
यत्त्वया पृच्छितं पूर्व्वं सर्व्वसंसारमोचणम् ॥ २३० ।
ततो नारायणाच्छ्रुत्वा पृथिवी शंसितव्रता ।
उवाच मधुरं वाक्यं लोकनाथं जनार्द्दनम् ॥ २३१ ।
केन कर्म्मविपाकेन तीर्थं पुनरवाप्यते ।
स्नानं वा मरणन्देव यथावद्वक्तुमर्हसि ॥ २३२ ।

वराह उवाच ।

शृणु देवि महाभागे पूर्व्वधर्म्मकृतो नराः ।
केनचित्कर्म्मदोषेण तिर्य्यग्योनिमवाप्य हि ॥ २३३ ।
जन्मान्तरार्ज्जितैः पुण्यैस्तीर्थस्नानजपादिभिः ।
महादानैश्च लभ्येत* तीर्थं पञ्चत्वमर्च्चकैः ॥ २३४ ।
जन्मान्तरकृतं कर्म्म यत्स्वल्पमपि वा बहु ।
तत्कदाचित्फलत्येव न तस्य परिसङ्क्षयः ॥ २३५ ।
कदाचिद्वासहायो वै पुण्यतीर्थादिदर्शनात् ।
दुर्व्वलं प्रबलम्भूत्वा प्रबलं दुर्व्वलम्भवेत् ॥ २३६ ।
पापान्तरं समासाद्य गहना कर्म्मणोगतिः ।
यदल्पमिव दृश्येय तन्महत्त्वाय कल्पते ॥ २३७ ।
अतएव मनुष्यत्वं प्राप्तो राजत्वमेव च ।
शृगाली चैव गृध्रश्च तीर्थस्यैव प्रभावतः ॥ २३८ ।

---

* तत्रैव मरणं प्राप्येति (ग) ।

मरणादेव सम्प्राप्य क्षीणपापौ स्मृतिं पुनः।
श्वेतद्वीपं ततः प्राप्तौ जानीहि त्वं वसुन्धरे ॥ २३९ ॥

पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे।
तीर्थं वैवस्वतं नाम यत्रार्कस्तप्तवांस्तपः ॥ २४० ॥
कदाचित्पुत्रकामेन मार्त्तण्डेन महत्तपः।
कृतं चान्द्रायणं तत्र दशवर्षसहस्रकम् ॥ २४१ ॥
ततः सप्तसहस्राणि वायुभक्षस्तु संस्थितः।
ततस्तुष्टोऽस्म्यहं भद्रे सूर्य्यस्य सुमहौजसः ॥ २४२ ॥
वरेण छन्दयामास आदित्यं तदनन्तरम्।
विवस्वन्तं महाभागं मम कर्म्मपरायणम्।
वरं वरय भद्रन्ते यस्ते मनसि वर्त्तते ॥ २४३ ॥
ततो मम वचः श्रुत्वा कश्यपस्य सुतो बली।
मधुरं स्वरमादाय प्रत्युवाच महद्वचः ॥ २४४ ॥
यदि देव प्रसन्नोऽसि अयं मे दीयतां वरः।
पुत्रमिच्छाम्यहं देव प्रसादात्ते सुरेश्वर ॥ २४५ ॥
विवस्वद्वचनं श्रुत्वा तुष्टोऽहन्तस्य सुन्दरि।
तस्य शुद्धेन मनसा प्रोक्तवानस्मि सुन्दरि।
यमश्च यमुना चैव मिथुनं जनयिष्यसि ॥ २४६ ॥
एवं तस्य वरं दत्त्वा आदित्यस्य वसुन्धरे।
आत्मयोगप्रभावेण तत्रैवान्तर्हितोऽभवम् ॥ २४७ ॥
आदित्योऽपि गतो भद्रे वेश्म स्वञ्च महाधनम्।
पुण्यं सौकरवे कृत्वा सुदुष्करतरं महत् ॥ २४८ ॥

अष्टमेन तु भक्तेन यस्तु स्नाति वसुन्धरे।
दशवर्षसहस्राणि सूर्य्यलोके महीयते ॥ २४९ ॥
अथवा तत्र सुश्रोणि म्रियते पुण्यवान्नरः।
यमलोकं न गच्छेत* तीर्थस्यास्य प्रभावतः ॥ २५० ॥
एतत्ते कथितं भद्रे स्नानस्य मरणस्य च।
फलञ्चैव यथावृत्तं तीर्थे सौकरवे मम ॥ २५१ ॥
आख्यानानां महाख्यानं क्रियाणाञ्च महाक्रिया।
एष जप्यः प्रमाणञ्च† सन्ध्योपासनमेव च ॥ २५२ ॥
एष तेजश्च‡ मन्त्रश्च सर्व्वभागवतप्रियम्§।
पिशुनाय न दातव्यं मूर्खे भागवते न तु।
न च वैश्याय शूद्राय ये न जानन्ति मां परम् ॥ २५३ ॥
पण्डितानां सभामध्ये ये च भागवता भुवि।
मठे ब्राह्मणमध्ये तु ये च वेदविदां वराः।
दीक्षिताय च दातव्यं ये च शास्त्राणि जानते ॥ २५४ ॥
एतत्ते कथितम्भद्रे पुण्यं सौकरवे महत्।
य एतत्पठते सुभ्रु कल्य उत्थाय मानवः।
तेन द्वादश वर्षाणि चिन्तितोऽहं न संशयः ॥ २५५ ॥

---

* गच्छेदिति साधु। † प्रमाणश्चेति सार्व्वत्रिकः पाठ इति अस्माभिरपि त उद्धृतः, वस्तुतः प्रमाणञ्चेति सम्यक्, यथा वेदाः प्रमाणमित्यादि। ‡ एष वेदाश्च मन्त्राश्च (ग)। § सर्व्वभागवतप्रियमिति सार्व्वत्रिकः पाठः, वस्तुतः सर्व्वभागवतप्रिय इति कृते सुष्ठु स्यात्, एष इत्यस्य पुंस्त्वेन निर्द्देशात्।

न स जायेत गर्भेषु मुक्तिमाप्नोति शाश्वतीम्।
यः पठेदेकमध्यायं तारयेत्स कुलान्दश ॥ २५६ ।

इति वराहपुराणे भगवच्छास्त्रे तीर्थमाहात्म्ये सौकरवे
गृध्रजम्बूकाख्यानादित्यवरप्रदानादिर्नाम
सप्तत्रिंशदधिकशततमोऽध्यायः।

अष्टात्रिंशदधिकशततमोऽध्यायः।

सूत उवाच।

एतत्पुण्यतमं श्रुत्वा* रम्ये सौकरवे तदा।
गुणस्तवञ्च माहात्म्यं जात्यानां परिवर्त्तनम् ॥
ततः कमलपत्राक्षी सर्व्वधर्म्मविदां वरा।
विस्मयं परमङ्गत्वा निर्वृतेनान्तरात्मना।
पुनः पप्रच्छ तन्देवं विस्मयाविष्टमानसा ॥ १।२ ।
अहो तीर्थस्य माहात्म्यं क्षेत्रे सौकरवे तव।
अकामान्म्रियमाणस्य मानुषत्वमजायत।
किं वान्यद्वृत्तमाख्याहि क्षेत्रे सौकरवे प्रति† ॥ ३ ।
शृण्वन्त्या मे महाजातं चित्ते कौतूहलं परम्।
गायमानस्य किं पुण्यं वाद्यमानस्य किं फलम्।

---

* एतत्पुण्यमतो भूत्वेति (क) (ख)। † क्षेत्रं सौकरवं प्रतीति साधु।

नृत्यत: किम्भवेत्सुखं जाग्रतो वा फलं नु किम् ॥ ४ ।
गोदातुरन्नदातुर्वा जलदातुस्तु किम्फलम् ।
सम्मार्ज्जने लेपने वा गन्धपुष्पादिदानत: ॥ ५ ।
धूपदीपादिनैवेद्यै: किम्फलं समुदीरितम् ।
अन्येन कर्म्मणा चैव जपयज्ञादिनाऽथवा ॥ ६ ।
कां गतिम्प्रतिपद्यन्ते ये शुद्धमनसो जना: ।
तव भक्तसुखार्थाय तद्भवान्वक्तुमर्हसि ॥ ७ ।
ततो मह्या वच: श्रुत्वा सर्व्वदेवमयो हरि: ।
उवाच मधुरं वाक्यं धर्म्मकामां वसुन्धराम् ॥ ८ ।

वराह उवाच ।

शृणु सुन्दरि तत्त्वेन यन्मात्त्वं परिपृच्छसि ।
सर्व्वन्ते कथयिष्यामि पुण्यकर्म्म सुखावहम् ॥ ९ ।
तस्मिन् सौकरवे पक्षी खञ्जरीटस्तु कीटकान् ।
बहून् भुक्ता हि वसुधे अजीर्णभृशपीड़ित: ।
मरणं समनुप्राप्त: पतित: स्वेन कर्म्मणा ॥ १० ।
सम्प्राप्तास्तत्र वै बाला: क्रीड़न्तस्तं मृतङ्गगम् ।
ग्रहीष्याम इति प्रोच्य धावन्तस्तत्र तत्र ह ॥ ११ ।
ममायं वै ममायं वै जिघृक्षन्त: परस्परम् ।
सङ्घर्षात्कलह*श्चक्रुर्भृशं क्रीड़नकौतुका: ॥ १२ ।
तत एको गृहीत्वैनं गङ्गाम्भसि समाक्षिपत् ।

---

* सद्य: किल हन्तामिति (क), (ख) ।

युष्माकमेव भवतु नानेनास्मत्प्रयोजनम् ॥ १३ ।
एवं स खञ्जरीटोऽहि गङ्गातोयाप्लुतस्तदा ।
आदित्यतीर्थसंक्लिन्नशरीरः स वसुन्धरे ॥ १४ ।
वैश्यस्य तु गृहे जातो ह्यनेकक्रतुयाजिनः* ।
धनरत्नसमृद्धे तु रूपवान् गुणवान् शुचिः ।
विबुद्धश्च पवित्रश्च मद्भक्तश्च वसुन्धरे ॥ १५ ।
जातस्य तस्य वर्षाणि जग्मुर्द्वादश सुव्रते ॥ १६ ।
कदाचिदुपविष्टौ तौ दृष्ट्वा बालो गुणान्वितः ।
मातरं पितरं चोभौ हर्षेण महतान्वितौ ।
प्रणम्य शिरसा भूमौ बद्धाञ्जलिरयाचत ॥ १७ ।
मत्प्रियं यदि कर्त्तव्यमेको मे दीयतां वरः ।
न चाहं वारणीयो वै पित्रा मात्रा कथञ्चन ।
सत्यं शपामि गुरुणा यथा ननु कृतम्भवेत् ॥ १८ ।
पुत्त्रस्य वचनं श्रुत्वा दम्पती तौ मुदान्वितौ ।
ऊचतुस्तत्प्रियं वाक्यं बालं कमललोचनम् ॥ १९ ।
यद्यत्त्वं वक्ष्यसे वत्स यद्यत्ते हृदि वर्त्तते ।
सर्व्वं तत्तत्करिष्यावो विस्रब्धं वद साम्प्रतम् ॥ २० ।
त्रिंशत्सहस्त्रगावो हि सर्व्वाश्च शुभदोहनाः ।
यद्यत्र रोचते पुत्त्र देहि त्वमविचारितम् ॥ २१ ।
पुनरन्यत्प्रवक्ष्यामि† आवयोः पुत्त्र कारणात् ।

---

* अनेकक्रूरयाजिन इति (क), (ख)। † (ग) पुस्तके १८ श्लोकस्य चतुर्थः पादः, १९ श्लोकः, २० श्लोकस्य प्रथमपादश्च न सन्ति ।

वाणिज्यं नः स्मृतङ्कर्म्म तत्ते पुत्त्र यदीप्सितम् ॥ २२ ।
तत्कुरुष्व यथान्यायं मित्रेभ्योदीयतां धनम् ।
धनधान्यानि रत्नानि देहि पुत्त्र अवारितः ॥ २३ ।
कन्या वै रमणीयाश्च सजातीयाः कुलोद्भवाः ।
आनयिष्याव भद्रन्ते उद्वाहेन क्रमेण ते ॥ २४ ।
यदीच्छसि पुनस्त्वान्यद्यज्ञैर्यष्टुं सुपुत्त्रक ।
विधिना पूर्व्वदृष्टेन वैश्या येन यजन्ति च ॥ २५ ।
अष्टौ सम्पूर्णधुर्य्याणां हलानां तावतां शतम् ।
वैश्यकर्म्म समादाय किं पुनः प्राप्तुमिच्छसि ॥ २६ ।
यावद्भोजनतृप्तान्वा* द्विजानिच्छसि तर्पितुम् ।
सर्व्वं निजेच्छया पुत्त्र कर्त्तुमर्हसि साम्प्रतम् ॥ २७ ।
पितृमातृवचः श्रुत्वा स बालो धर्म्मसंयुतः ।
चरणावुपसंगृह्य पितरौ पुनरब्रवीत् ॥ २८ ।
गोप्रदाने न मे कार्य्यं मित्रं वापि न चिन्तितम् ।
कन्यालाभे न चेच्छास्ति न च यज्ञफले तथा ॥ २९ ।
नाहं वाणिज्यमिच्छामि कृषिगोरक्ष्यमेव च ।
न च सर्व्वातिथित्वं वा मम चित्ते प्रसज्जति ॥ ३० ।
एकं मे परमं चिन्त्यं यन्ममेच्छा तपोधृतौ ।
चिन्ता नारायणश्चैवं गाढ़ं सौकरवम्प्रति ॥ ३१ ।
ततः पुत्त्रवचः श्रुत्वा मम कर्म्मपरायणौ ।

---

* तृप्तान् द्वीति (ग) ।

करुणम्परिदेवन्तौ रुदन्तौ तावुभौ तथा ॥ ३२ ।
अद्य द्वादशवर्षाणि तव जातस्य पुत्रक ।
किमिदं चिन्तितं वत्स त्वया नारायणाश्रयम् ।
चिन्तयिष्यसि भद्रन्ते यदा तत्प्राप्नुया वयः ॥ ३३ ।
अद्यापि भोजनं गृह्य* धावमानास्मि पृष्ठतः ।
किमिदं चिन्तितं वत्स गमने सौकरम्प्रति† ॥ ३४ ।
अद्यापि मत्स्तनौ धन्यौ प्रस्नुतौ हि दिवानिशम् ।
पुत्र त्वत्स्पर्शनाशायाः किमेतच्चिन्तितं त्वया ॥ ३५ ।
रात्रौ सुप्तोऽसि वत्स त्वं शय्यासु परिवर्त्तितः ।
अम्बेति भाषसेऽद्यापि कथमेतद्विचिन्तितम् ॥ ३६ ।
स्पृशन्ति तव नार्य्योऽपि क्रीडमानस्य पुत्रक ।
अपराधी न विद्येत पुत्र चेत्त्गृहेष्वपि ॥ ३७ ।
न वा स्वजनभृत्याद्यैः परुषन्ते प्रभाषितम् ।
रुष्टेन वापि भीषायै गृह्यते चैव यष्टिका ।
पुत्र हेतुं न पश्येऽहं तव निर्व्वेदकारणम्‡ ॥ ३८ ।
इति मातुर्वचः श्रुत्वा स वैश्यकुलनन्दनः ।
उवाच मधुरं वाक्यं जननीं संशितव्रतः ॥ ३९ ।
उषितोऽस्मि त्वदङ्गेषु गर्भस्थः कुक्षिसम्भवः ।

---

* गृहीत्वेति साधु, एवं सर्व्वत्र । † गमने सौकरवं प्रतीति (क), (ख), तत्र छन्दो-दोषः । सौकरं प्रतीति पाठे च सौकरवेत्यस्य वकारलोप आर्षः । यान्ने सौकरवं प्रतीत्येवं कृते तु न दोषः । ‡ तवेदं कारणं प्रतीति (क), (ख) ।

क्रीड़ितोऽस्मि यथान्यायं तवोत्सङ्गे यशस्विनि ॥ ४० ।
स्तनौ द्वौतौ मया पीतौ ललितेन विजृम्भितौ ।
अङ्गन्तव समारुह्य पांशुभिर्गुण्ठिता तनुः ॥ ४१ ।
अम्ब त्वं मयि कारुण्यं कुरुष्व खलु चोचितम् ।
मुञ्च पुत्रकृतं शोकं त्यज मातरनिन्दिते ॥ ४२ ।
आयान्ति च पुनर्यान्ति गता गच्छन्ति चापरे* ।
दृश्यते च पुनर्नष्टो न दृश्यते पुनः क्वचित्† ॥ ४३ ।
कुतोजातः क्व सम्बद्धः कस्य माता पिताथवा ।
इमां योनिमनुप्राप्तो घोरे संसारसागरे ॥ ४४ ।
मातापितृसहस्राणि पुत्रदारशतानि च ।
जन्मजन्मनि वर्त्तन्ते कस्य ते कस्य वा वयम् ।
एवं चिन्तां समासाद्य मा शुचो जननि क्वचित् ॥ ४५
एवं तौ पितरौ श्रुत्वा विस्मयात्पुनरूचतुः ।
अहोवत महद्गुह्यं किमेतत्तात कथ्यताम् ॥ ४६ ।
एतद्वचनमाकर्ण्य स वैश्यकुलबालकः ।
उवाच मधुरं वाक्यं जननीं पितरन्तथा ॥ ४७ ।
यदि श्रुतेन वः कार्य्यं गुह्यस्य परिनिश्चयात् ।
तत्पृच्छ्यतां‡ भवद्भ्यां हि गुह्यं सौकरवम्प्रति ॥ ४८ ।
तत्राहं कथयिष्यामि स्वस्य गुह्यं महौजसम् ।

---

* -सागरे इति (क), (ख) ।　† दृश्यन्ते च पुनर्नष्टा दृश्यन्ते च पुनः क्वचिदिति (ग) ।　‡ पृच्छतमिति (ग), स चार्षप्रयोगः ।

सूर्य्यतीर्थं समासाद्य यत्तात परिपृच्छसि ॥ ४९ ।
वाढ़मित्येव पुत्रं तौ दम्पती प्रोचतुश्च तम्* ।
गमने कृतसङ्कल्पा ततः सौकरवं प्रति ॥ ५० ।
सर्व्वद्रव्यसमायुक्तो गमने सौकरवम्प्रति† ।
ततः स पद्मपत्राच्च आभीराणां जनेश्वरः ।
गावोविंशसहस्राणि प्रेषयत्यग्रतोद्रुतम् ॥ ५१ ।
अग्रे प्रययुस्ताः सर्व्वा द्रव्येण च समायुताः ।
यच्च किञ्चिद्गृहे वास्ति‡ कृतं नारायणम्प्रति ॥ ५२ ।
ततः पूर्व्वार्द्धयामेन माघमासि त्रयोदशी ।
सर्व्वं स्वजनमामन्त्य सम्वद्धञ्च यथाविधि ॥ ५३ ।
मुहूर्त्तेन च तेनैव गमनं कुरुते ततः ।
स्नात्वा च कृतशौचास्ते नारायणमुदावहाः ॥ ५४ ।
अथ§ दीर्घेण कालेन नारायणमुदावहाः ।
वैशाखस्य तु द्वादश्यां मम क्षेत्रमुपागताः ॥ ५५ ।
स्नाताः सन्तर्प्य च पितॄन्मम वस्त्रविभूषिताः ।
गावोविंशतिसाहस्रा याः पूर्व्वमुपकल्पिताः ॥ ५६ ।
तत्र भङ्गुरसोण¶ नाम मम कर्म्मपरायणः ।
तेनैव ता गृहीता वै विधिदृष्टेन कर्म्मणा ॥ ५७ ।
ततः स प्रददौ तस्य विंशा गावी महाधनाः ।

---

* वाढ़मित्येव तं पुत्रं दम्पती प्रत्युवाच तमिति (ग), तत्र कर्त्तृद्वयस्य एकवचनान्तक्रियात्वस्य पुनरुक्तिश्च । † अत्रापि पूर्व्ववत् छन्दोदोषः, याने सौकरवं प्रतीति कृते तु न पः । ‡ चासीति (ग) । § तेऽथेति (ग) । ¶ भागुरसो नामेति (ग) ।

मङ्गल्याश्च पवित्राश्च सर्व्वाश्च वरदोहना: ॥ ५८ ।
प्रददौ धनरत्नानि नित्यमेव दिने दिने ।
मोदते सह पुत्त्रेण भार्य्यया स्वजनेन च ॥ ५९ ।
एवन्तु वसतस्तस्य वर्षाकाल उपागतः ।
प्रावृडुपस्थिता तत्र सर्व्वशस्यप्रवर्द्धिनी ॥ ६० ।
पुष्पितानि कदम्बानि कुटजार्ज्जुनकानि च ।
एवं दुःखमनुप्राप्ताः स्त्रियो या रहिताः प्रियैः ॥ ६१ ।
गर्ज्जताङ्कुञ्जताञ्चैव धारापातनिपातिताः ।
मेघाः सविद्युतश्चैव बलाकाङ्गदभूषिताः ॥ ६२ ।
नदीनाञ्चैव निर्घोषो मयूराणाञ्च निस्वनः ।
कुटजार्ज्जुनगन्धाश्च कदम्बार्ज्जुनपादपाः ॥ ६३ ।
वाताः प्रवान्ति ते तत्र शिखिनाञ्च सुखावहाः ।
शोकेन कामिनीनाञ्च भर्त्रा च रहिताश्च याः ॥ ६४ ।
एवं स गच्छते* कालो मेघदुन्दुभिनादितः ।
ततः शरदनुप्राप्ता अगस्तिरुदितो महान् ॥ ६५ ।
तड़ागानि प्रसन्नानि कुमुदोत्पलवन्ति च ।
पद्मषण्डैः सुरम्याणि पुष्पितानि समन्ततः ॥ ६६ ।
प्रवान्ति तु सुखा वाताः सुगन्धाश्च सुशीतलाः ।
सप्तपर्णसुगन्धाश्च शीतलाः कामिवल्लभाः ॥ ६७ ।
एवं शरदि निर्वृत्ते कौमुदे समुपागते ।

---

* गच्छतीति साधु ।

सा तस्मिन्मासे सुश्रोणि शुक्लपक्षान्तरे तदा ॥ ६८ ।
एकादश्यां ततः सुस्नु स्नातौ क्षौमविभूषितौ ।
उभौ तौ दम्पती तत्र पुत्रमूचतुरात्मनः ॥ ६९ ।
उषितास्त्वत्र षण्मासान् सुखांश्च द्वादशी भवेत् ।
किन्नो न वक्ष्यसे* गुह्यं येन वै वारिता वयम् ॥ ७० ।
पित्रोस्तु वचनं श्रुत्वा स पुत्त्रो धर्म्मनिष्ठितः ।
उवाच मधुरं वाक्यं तयोस्तु कृतनिश्चयः ॥ ७१ ।
एवमेतन्महाभाग यत्त्वया परिभाषितम् ।
कल्यन्ते† कथयिष्यामि इदं गुह्यं महौजसम् ॥ ७२ ।
एषा वै द्वादशी तात प्रभुनारायणप्रिया ।
मङ्गला च विचित्रा च विष्णुभक्तसुखावहा ॥ ७३ ।
ददतेऽस्यां प्रहृष्टा च द्वादश्याङ्कौमुदे सिते ।
दीक्षितास्ते योगिकुले विष्णुभक्तिपरायणाः ॥ ७४ ।
तेन दानप्रभावेण विष्णुतोषकरेण च ।
तरन्ति दुस्तरन्तात घोरं संसारसागरम् ॥ ७५ ।
एवं कथयतान्तेषां प्रभाता रजनी शुभा ।
ततः सन्ध्यामुपास्याथ उदिते सूर्य्यमण्डले ।
शुचिर्भूत्वा यथान्यायं क्षौमवस्त्रविभूषितः ॥ ७६ ।
प्रणम्य शिरसा देवं शङ्खचक्रगदाधरम् ।
उभौ तच्चरणौ गृह्य पितरौ समभाषत ॥ ७७ ।

---

* वक्ष्यसीति साधु ।   † कल्ये ते इति (ख) ।

शृणु तात महाभाग यदर्थं समुपागतः ।
यद्भवान्पृच्छते* तात गुह्यं सौकरवम्मति ॥ ७८ ।
खञ्जरीटोह्यहं तात पक्षियोनिसमुद्भवः ।
भक्षिताश्च पतङ्गा मे अजीर्णेनातिपीड़ितः ॥ ७९ ।
अहन्तेनैव दोषेण न शक्नोमि विचेष्टितुम् ।
दृष्ट्वा मां विह्वलं बाला गृहीत्वा क्रीड़ितुं गताः ॥ ८० ।
हस्ताद्धस्तेन क्रीड़न्तश्चान्योऽन्यपरिहासया ।
त्वया दृष्टोमया दृष्टो ह्ययञ्चेति कलिः कृतः ॥ ८१ ।
तत एकेन बालेन भ्रामयित्वाक्षयेऽम्भसि ।
न ममेति तवेत्युक्त्वा ह्यादित्यं तीर्थमुत्तमम् ।
क्रोधेनादाय तीव्रेण क्षिप्तो गङ्गाम्भसि त्वरा ॥ ८२ ।
तत्र मुक्ता मया प्राणाः सूर्य्यतीर्थे महौजसि ।
अकामेन विशालाक्षि तत्प्रभावादहं ततः† ।
जातस्तव सुतो मातस्तदेतद्दिनमुत्तमम् ॥ ८३ ।
अकामान्म्रियमाणस्य वर्षाण्यद्य त्रयोदश ।
व्यतीतानि च गुह्यन्ते कथनं मम चैव यत् ॥ ८४ ।
एतत्ते कथितन्तात गुह्यमागमनन्मति ।
अहङ्कर्म करिष्यामि गच्छ तात नमोऽस्तु ते ॥ ८५ ।
ततो माता पिता चैव पुत्रम्पुनरुवाच ह ।
विष्णुप्रोक्तानि कर्म्माणि यं यत्कारयिता‡ भवान् ॥

---

* पृच्छतीति साधु । † तव इति (ग) । ‡ यद्यत्कारयितेति साधु ।

तान्वयञ्च करिष्यामो विधिदृष्टेन कर्म्मणा ।
घटमाना* यथान्यायङ्कर्म्म संसारमोक्षणम् ॥ ८६।८७ ।
तेऽपि दीर्घेण कालेन मम कर्म्मपरायणाः ।
कृत्वा तु विपुलं कर्म्म ततः पञ्चत्वमागताः ॥ ८८ ।
मम क्षेत्रप्रभावेण चात्मनः कर्म्मनिश्चयात् ।
विमुक्ताः सर्व्वसंसाराच्छ्वेतद्वीपमुपागताः† ॥ ८९ ।
योऽसौ परिजनः कश्चिद्गृहेभ्यश्च समागतः‡ ।
सर्व्वः श्रिया युतः§स्तत्र रोगव्याधिविवर्ज्जितः ॥ ९० ।
सर्व्वे च योगिनस्तत्र सर्व्वे चोत्पलगन्धयः ।
मोदन्ते तु यथान्यायं प्रसादात्क्षेत्रजान्मम ॥ ९१ ।
एतत्ते कथितन्देवि महाख्यानं महौजसम् ।
पुनरन्यत्प्रवक्ष्यामि यद्वृत्तं सौकरे¶ मम ॥ ९२ ।
एषा व्युष्टिर्महाभागे क्षेत्रे यत्क्रियते महत् ।
तिर्य्यग्योनिविनिर्मुक्ताः श्वेतद्वीपमुपागताः ॥ ९३ ।
य एतत्पठते नित्यं कल्यमुत्थाय मानवः ।
स कुलांस्तारयेत्तूर्णं दश पूर्व्वान्दशावरान्‖ ॥ ९४ ।
न पठेन्मूर्खमध्ये तु पापिष्ठे शास्त्रदूषके ।
न पठेत्पिशुनानाञ्च एकाकी तु पठेद्गृहे ॥ ९५ ।

---

* पठमाना इति (क), (ख) । † प्रमुक्ताः सर्व्वसंसारान्मम कर्म्मपरायणाः । देवि चेत्रप्रभावेण श्वेतद्वीपमुपागताः इति (ग) । ‡ एतदर्द्धं (ग) पुस्तके नास्ति । § श्रियावृत इति (ग) । ¶ सौकरवे ममेति (क), (ख) । पाठेऽत्र एकाक्षराधिक्यम् । अन्यत्र वकारलोप आर्षः । ‖ दशापरानिति (ग) ।

पठेद्ब्राह्मणमध्ये च ये च वेदविदां वराः ।
वैष्णवानाञ्च पुरतो* ये च शास्त्रगुणान्विताः ।
विशुद्धानां विनीतानां सर्व्वसंसारमोक्षणम् ॥ ८६ ।

इति वराहपुराणे खञ्जरीटोपाख्यानं नाम
अष्टात्रिंशदधिकशततमोऽध्यायः ।

ऊनचत्वारिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि लिप्यमानस्य यत्फलम् ।
सर्व्वन्ते कथयिष्यामि यथा प्राप्नोति मानवः ॥ १ ।
गृहीत्वा गोमयम्भूमिं मम वेश्मोपलेपयेत् ।
न्यस्तानि तत्र यावन्ति पदानि च विलिम्पतः ।
तावद्वर्षसहस्राणि दिव्यानि दिवि मोदते ॥ २ ।
यदि द्वादशवर्षाणि लिप्यते मम कर्म्मसु ।
जायते विपुले शुद्धे धनधान्यसमाकुले ॥ ३ ।
दिव्यैर्नमस्कृतो देवि कुशद्वीपञ्च गच्छति ।
कुशद्वीपमनुप्राप्य सहस्राणि च जीवति ।
दश चैव तु वर्षाणां मम भक्तो महान् शुचिः ॥ ४ ।

---

* वैष्णवानाञ्च पूता ये इति (क), (ख) ।

कुशद्वीपात्परिभ्रष्टो मम कर्म्मपरायणः।
राजा वै जायते सुभ्रु सर्व्वधर्म्मेषु निष्ठितः॥ ५॥
लेपनस्य प्रभावेण मम कर्म्मपरायणः।
भक्तो व्यवस्थितश्चापि सर्व्वशास्त्राणि पृच्छति॥ ६॥
देवि कारयते सर्व्वं मम चायतनानि च।
कारयित्वा यथान्यायं मम लोकाय गच्छति॥ ७॥
गोमयस्य तु वक्ष्यामि तच्छृणुष्व वसुन्धरे।
गोमयन्तु समासाद्य यावल्लोकोऽनुगच्छति।
समीपे यदि वा दूरे गत्वा नयति गोमयम्॥ ८॥
यावन्ति तत्पदान्यस्य तावद्वर्षसहस्रकम्।
गोमयानयिता चैव स्वर्गलोके महीयते॥ ९॥
ततः स शाल्मले द्वीपे रमते च मुदा युतः।
एकादशसहस्राणि एकादशशतानि च॥ १०॥
शाल्मलात्तु परिभ्रष्टोराजा भवति धार्म्मिकः।
मद्भक्तश्चैव जायेत सर्व्वधर्म्मविदां वरः॥ ११॥
अथ द्वादशवर्षाणि मच्छ्रितः सुदृढ़व्रतः।
वहते गोमयं सुभ्रु मम लोकाय गच्छति॥ १२॥
स्नानोपलेपने भूमे सलिलं यो ददाति च।
तस्य पुण्यं महाभागे शृणु तत्त्वेन निष्कलम्॥ १३॥
यावन्तो विन्दवस्तत्र पानीयस्य वसुन्धरे।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥ १४॥
स्वर्गलोकात्परिभ्रष्टः क्रौञ्चद्वीपञ्च गच्छति।

क्रौञ्चद्वीपात्परिभ्रष्टो राजा भवति धार्म्मिकः ।
तेनैव गुणयोगेन श्वेतद्वीपञ्च गच्छति ॥ १५ ।
सम्मार्ज्जनम्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यां गतिम्पुरुषा यान्ति स्त्रियो वा कर्म्मसु स्थिताः ॥ १६ ।
शुचिर्भागवतः शुद्धो अपराधविवर्ज्जितः ।
यावन्तः पांशवो भूमेरुड्डीयन्ते तु चालिताः ।
तावद्वर्षशतान्याशु स्वर्गलोके महीयते ॥ १७ ।
स्वर्गलोकात्परिभ्रष्टः शाकद्वीपाय गच्छति ।
तत्र स्थित्वा चिरङ्कालं राजा भवति धार्म्मिकः ॥ १८ ।
ततोभुक्त्वा सर्व्वभोगान् स्थित्वा संसारसागरे ।
श्वेतद्वीपं ततो गच्छेन्मत्कर्म्मनिरतः शुचिः ॥ १९ ।
अन्यच्च ते प्रवक्ष्यामि शृणुष्व गदतोमम ।
गायनं ये प्रकुर्व्वन्ति मम कर्म्मपरायणाः ।
तेषां यद्यत्फलम्भूमि शृणुष्व गदतोममं* ॥ २० ।
गायमानस्य गीतस्य यावदक्षरपङ्क्तयः ।
तावद्वर्षसहस्राणि इन्द्रलोके महीयते ॥ २१ ।
रूपवान् गुणवान् सिद्धः सर्व्ववेदविदां वरः ।
नित्यम्पश्यति तत्रस्थोदेवराजं न संशयः ॥ २२ ।
मद्भक्तश्चैव जायेत इन्द्रलोकपथे स्थितः ।
सर्व्वकर्म्मगुणश्रेष्ठस्तत्रापि मम पूजकः ॥ २३ ।

---

* (ग) पुस्तके एतदर्द्धं परश्लोकश्च न स्तः ।

इन्द्रलोकात्परिभ्रष्टो मम गीतपरायणः ।
नन्दनोपवने रम्ये रमन्* देवगणैः सह ॥ २४ ।
ततः स भूमौ जायेत वैष्णवैः सह संस्थितः ।
गायन्मम यशो नित्यं भक्त्या परमया युतः ।
मत्प्रसादात्स शुद्धात्मा मम लोकाय गच्छति ॥ २५ ।

सूत उवाच ।

तस्य तद्वचनं श्रुत्वा माधवस्य यशस्विनी ।
कृताञ्जलिपुटा भूयः प्रत्युवाच वसुन्धरा ॥ २६ ।

धरण्युवाच ।

अहो गीतप्रभावो वै यस्त्वया कीर्त्तितो महान् ।
के च गीतप्रभावेण सिद्धिं प्राप्ता महौजसः ॥ २७ ।

वराह उवाच ।

तत्रैव चाश्रमे भद्रे चाण्डालः कृतनिश्चयः† ।
दूराज्जागरणे याति मम भक्तौ व्यवस्थितः ॥ २८ ।
गायमानश्च गीतानि संवत्सरगणान् बहून् ।
श्वपाकः स गुणज्ञश्च मद्भक्तश्चैव सुन्दरि ॥ २९ ।
कौमुदस्य तु मासस्य शुक्लपक्षे तु द्वादशी ।
सुप्ते गते जने जाते वीणामादाय चङ्क्रमत् ।
जाग्रंस्तत्र स चाण्डालोऽगृहीतोब्रह्मरक्षसा ॥ ३० ।
अल्पप्राणः श्वपाको वै बलवान् ब्रह्मराक्षसः ।

---

* रमन् इति आर्षं रममाण इति साधु । † कृतनिश्चय इति (क), (ख) ।

दुःखशोकेन सन्तप्तो न शक्नोति विचेष्टितुम् ॥ ३१ ।
तेन प्रोक्तः श्वपाकेन बलवान् ब्रह्मराक्षसः ।
किन्त्वया चेष्टितं मह्यं यस्त्वेवं परिधावसि ॥ ३२ ।
श्वपाकवचनं श्रुत्वा तेन वै ब्रह्मरक्षसा ।
ततः प्रोवाच तं श्वादं मानुषाहारलोलुपः ॥ ३३ ।
अथेह दशरात्रं मे निराहारस्य तिष्ठतः ।
विधात्रा विहितस्त्वञ्च आहारः पारणाविधौ ॥ ३४ ।
अद्य त्वां भक्षयिष्यामि सवसामांसशोणितम् ।
तृप्तिं यास्यामि परमां विधात्रा विहितां मम ॥ ३५ ।
ब्रह्मरक्षोवचः श्रुत्वा श्वपाको गीतलालसः ।
राक्षसं छन्दयामास मम भक्त्या व्यवस्थितः ॥ ३६ ।
एवमेतन्महाभाग भक्ष्योऽहं समुपागतः ।
अवश्यमेतत्कर्त्तव्यं धात्रा दत्तं यथा तव ॥ ३७ ।
किन्त्वहं देवदेवस्य भक्त्या गातुञ्च जागरे ।
उद्यतस्तत्र गत्वाहमुपास्य विधिना हरिम् ।
पश्चात्खादस्व* मां रक्षो जागराद्विनिवर्त्तितम्† ॥ ३८ ।
विष्णोः सन्तोषणार्थाय यतोमे व्रतमास्थितम् ।
जागरे विनिवृत्ते मां भक्षय त्वं यदीच्छसि‡ ॥ ३९ ।
श्वपाकस्य वचः श्रुत्वा ब्रह्मरक्षः क्षुधार्द्दितः ।

---

* खाद खादयेति वा साधु । † विनिवर्त्तितमित्यत्र स्वार्थे णिच् । ‡ भक्षयस्व यदीच्छसीति (ग) ।

उवाच परुषं वाक्यं श्वपाकन्तदनन्तरम् ॥ ४० ॥
मिथ्या किं भाषसे मूढ़ पुनरेष्यामि तेऽन्तिकम्।
मृत्योर्मुखमनुप्राप्य पुनर्ज्जीवति मानवः।
रक्षसोमुखविभ्रष्टः पुनरागन्तुमिच्छसि ॥ ४१ ॥
राक्षसस्य वचः श्रुत्वा चाण्डालस्तमथाब्रवीत्।
यद्यप्यहं हि चाण्डालः पूर्व्वकर्म्मविदूषितः।
सम्प्राप्तो मानुषम्भावं विहितेनान्तरात्मना ॥ ४२ ॥
शृणु मत्समयं रक्षो येनाहं पुनरागमम्।
दूराज्जागरणङ्गत्वा लोकस्य द्विजराक्षस।
सत्येन पुनरेष्यामि मन्यसे यदि मुञ्च माम् ॥ ४३ ॥
सत्यमूलञ्जगत्सर्व्वं लोकाः सत्ये प्रतिष्ठिताः।
सत्येन सिद्धिम्प्राप्ता हि ऋषयो ब्रह्मवादिनः ॥ ४४ ॥
सत्येन दीयते कन्या सत्यं जल्पन्ति ब्राह्मणाः।
सत्यं जयन्ति राजानस्त्रीण्येतान्यब्रुवन्नृतम् ॥ ४५ ॥
सत्येन गम्यते स्वर्गो मोक्षः सत्येन चाप्यते।
सत्येन तपते सूर्य्यः सोमः सत्येन रज्यते ॥ ४६ ॥
षष्ठ्यष्टमीममावास्यामुभे पक्षे चतुर्द्दशी।
अस्नातानाङ्गतिङ्गच्छे यद्यहं नागमे* पुनः ॥ ४७ ॥
गुरुपत्नीं राजपत्नीं योऽभिगच्छति मोहितः।
ताङ्गतिं सम्प्रपद्येऽहं यद्यहं नागमे पुनः ॥ ४८ ॥

---

* गच्छे इत्यार्षं गच्छेयमिति साधु। नागमे इत्यार्षं नागच्छेयमिति साधु। एवं परत्र।

याजकानाञ्च ये लोका ये च मिथ्याभिभाषिणाम् ।
ताङ्गतिं सम्प्रपद्येऽहं यद्यहं नागमे पुनः ॥ ४९ ।
ब्रह्मघ्ने च सुरापे वा स्तेने भग्नव्रते तथा ।
तेषां गतिम्प्रपद्येऽहं यद्यहं नागमे पुनः ॥ ५० ।
श्वपाकवचनं श्रुत्वा तुष्टो ब्राह्मणराक्षसः ।
उवाच मधुरं वाक्यं गच्छ शीघ्रं नमोऽस्तु ते ॥ ५१ ।
ब्रह्मराक्षसमुक्ता तु श्वपाकः कृतनिश्चयः ।
पुनर्गायति मर्त्त्यं वै मम भक्तौ व्यवस्थितः ॥ ५२ ।
अथ प्रभाते विमले गीते नृत्ये च जागरे ।
नमो नारायणायेति श्वपाकः परिवर्त्तते ॥ ५३ ।
ततस्त्वरितमागत्य पुमांस्तस्याग्रतः स्थितः ।
उवाच मधुरं वाक्यं चाण्डालङ्कृतनिश्चयम् ॥ ५४ ।
क्व यासि त्वरितः साधो न च त्वं गन्तुमर्हसि ।
जानन् कौणपपतिन्तञ्च न त्वं मर्त्तुमिहार्हसि ॥ ५५ ।
पुरुषस्य वचः श्रुत्वा चाण्डालः पुनरब्रवीत् ।
समयोमे कृतः पूर्व्वं राक्षसेन हि भक्षता ।
तेन तत्र गमिष्यामि सत्यं च परिपालयन् ॥ ५६ ।
ततः स पद्मपत्राक्षः श्वपाकम्प्रत्युवाच ह ।
मधुराङ्गिरमादाय विहितेनान्तरात्मना ॥ ५७ ।
मा गच्छ तत्र चाण्डाल यत्रासौ पापराक्षसः ।
जीवितार्थाय सत्यस्य न दोषः परिहापनात् ॥ ५८ ।
ततस्तस्य वचः श्रुत्वा श्वपाकः शंसितव्रतः ।

उवाच मधुरं वाक्यं मरणे कृतनिश्चयः ॥ ५९ ।
नाहमेवं करिष्यामि यन्मात्वं परिभाषसे ।
न चाहं नाशये सत्यमेतन्मे निश्चितं व्रतम् ॥ ६० ।
सत्यमूलं जगत्सर्व्वं कुलं सत्ये प्रतिष्ठितम् ।
सत्यमेव परोधर्म्म आत्मा सत्ये प्रतिष्ठितः ॥ ६१ ।
न चैवाहं तदुत्सृज्य असत्यः स्यां कदाचन ।
नाहं मिथ्या चरिष्यामि गच्छ तात नमोऽस्तु ते ॥ ६२ ।
एवमुक्त्वा श्वपाकोऽपि नित्यं सत्यव्रते स्थितः ।
राक्षसं समनुप्राप्तस्तमुवाचाथ पूजयन् ॥ ६३ ।
आगतोऽस्मि महाभाग मा विलम्बय भक्षय ।
त्वत्प्रसादादहं गन्ता वैष्णवं स्थानमुत्तमम् ॥ ६४ ।
एतानि मम गात्राणि भक्षयस्व यथेष्टतः* ।
पिबोष्णं रुधिरं मह्यं† पीड़ितोऽसि क्षुधा भृशम् ।
तर्पयस्व स्वमात्मानं कुरुष्व मम वै हितम् ॥ ६५ ।
श्वपाकस्य वचः श्रुत्वा ततः स ब्रह्मराक्षसः ।
उवाच मधुरं वाक्यं श्वपाकन्तदनन्तरम् ॥ ६६ ।
साधु तुष्टोऽस्म्यहं वत्स सत्यं धर्म्मञ्च पालितम् ।
चण्डालस्याविधिज्ञस्य यस्य ते मतिरीदृशी ॥ ६७ ।
ब्रह्मरक्षोवचः श्रुत्वा श्वपाकः सत्यसङ्गरः ।
उवाच मधुरं वाक्यं ब्रह्मराक्षसमेव तु ॥ ६८ ।

---

* यथेच्छितमिति (ग)। † ममेत्यत्र मह्यमिति आर्षम्।

यद्यप्यहं वै चाण्डालः सर्व्वकर्म्मविवर्ज्जितः* ।
तथापि सत्यं वक्तव्यं ब्रह्मराक्षस नित्यशः ॥ ६९ ।
श्वपाकवचनं श्रुत्वा ब्रह्मरक्षो भयानकम् ।
उवाच मधुरं वाक्यं श्वपाकं संश्रितव्रतम् ॥ ७० ।
यत्त्वया गीयते रात्रौ विष्णोर्जागरणम्प्रति ।
फलङ्गीतस्य मे देहि यदीच्छेर्जीवितं स्वकम् ।
ततो मोक्ष्यामि कल्याण भक्षयामि न भीषणः† ॥ ७१ ।
ब्रह्मरक्षोवचः श्रुत्वा श्वपाकः प्रत्युवाच ह ।
मनोऽज्ञातमिदं वाक्यं ब्रह्मरक्षो निभाषसे ।
भक्षयामीति चोक्त्वा मां गीतपुण्यं किमिच्छसि ॥ ७२ ।
श्वपाकवचनं श्रुत्वा ब्रह्मरक्षोऽब्रवीत्पुनः ।
एकयामीयं मे देहि पुण्यङ्गीतस्य वै परम् ।
ततोमोक्ष्यसि भक्ष्येण सङ्गतः पुत्त्रदारकैः ॥ ७३ ।
श्रुत्वा राक्षसवाक्यानि चाण्डालोगीतलोभितः ।
उवाच मधुरं वाक्यं राक्षसङ्कृतनिश्चयः ॥ ७४ ।
न गायनफलन्दद्मि ब्रह्मरक्षस्तवेप्सितम् ।
भक्षयस्व यथान्यायं रुधिरं पिव चेप्सितम् ॥ ७५ ।
श्वपाकवचनं श्रुत्वा राक्षसः पुनरब्रवीत् ।
एकगीतस्य मे देहि यत्त्वया विष्णुसंसदि ।
एतेन तारितोऽस्मीति तव गीतफलेन वै ॥ ७६ ।

* पाककर्म्मवहिष्कृत इति (ग) । † सशीर्षण इति (क), (ख) ।

श्रुत्वा वाक्यानि चाण्डालो राक्षसस्य निवारयन् ।
उवाच मधुरं वाक्यं चाण्डालो विस्मयान्वितः ॥ ७७ ।
किन्त्वया विकृतं कर्म्म तद्ब्रूहि मम राक्षस ।
कर्म्मणो यस्य दोषेण राक्षसत्वं समागतः ॥ ७८ ।
श्वपाकवचनं श्रुत्वा ब्रह्मरक्षोमहायशाः ।
उवाच मधुरं वाक्यं दुःखसन्तप्तमानसः ॥ ७९ ।
नाम्ना वै सोमशर्म्माहं चरको ब्रह्मयोनिजः ।
सूत्रमन्त्रपरिभ्रष्टो यज्ञकर्म्मसु निष्ठितः ॥ ८० ।
ततोऽहं याजयाम्यज्ञान् लोभमोहप्रपीड़ितः ।
प्रवर्त्तमाने यज्ञे तु कदाचिद्वै वयोगतः ।
उदरे जातशूलोऽहं तेन पञ्चत्वमागतः ॥ ८१ ।
अथ पञ्चमहारात्रे ह्यसमाप्ते क्रतौ तथा ।
अस्य यज्ञस्य दोषेण मातङ्ग* शृणु मे वचः ।
राक्षसत्वमनुप्राप्तस्तेन दुष्टेन कर्म्मणा ॥ ८२ ।
मन्त्रहीनं मया तत्र स्वरहीनञ्च तत्कृतम् ।
सूत्रहीनं तथा तत्र प्राग्वंशादि कृतं मया ॥ ८३ ।
परिमाणञ्च रूपञ्च मया तत्रोपलक्षितम् ।
कृतस्य तस्य दोषेण योनिम्प्राप्तोऽस्मि राक्षसीम् ॥ ८४ ।
स्वगीतफलदानेन निस्तारयितुमर्हसि ।
मोचयस्वाधमं पापाद्विष्णुगीतेन सत्वरम् ॥ ८५ ।

---

* मतङ्ग इति (ग) ।

ब्रह्मरक्षोवचः श्रुत्वा श्वपाकः संशितव्रतः ।
बाढ़मित्येव तं वाक्यं राक्षसम्प्राब्रवीत्तदा ॥ ८६ ।
एतस्य मम गीतस्य सुस्वरस्य फलन्तु यत् ।
ददामि राक्षस त्वञ्चेन्मुच्यसे शुद्धमानसः ॥ ८७ ।
यस्तु गायति संयुक्तं गीतकं विष्णुसन्निधौ ।
स तारयति दुर्गाणीत्युक्त्वा तद्दत्तवान्फलम् ॥ ८८ ।
एवं तस्मात्फलम्प्राप्य श्वपाकाद्राक्षसस्तदा ।
जातः सुविमलो भद्रे शरदीव यथा शशी ॥ ८९ ।
श्वपाकश्चापि सुश्रोणि मम चैवोपगायकः ।
कृत्वा सुविपुलं कर्म्म स ब्रह्मत्वमुपागतः ॥ ९० ।
एतद्गीतफलन्देवि प्राप्नोति मनुजो भुवि ।
मद्भक्त्या जागरतो भद्रे गीयमानं मनस्विनि ॥ ९१ ।
यस्तु गायति सुश्रोणि कौमुदीं द्वादशीं प्रति ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥ ९२ ।
यस्तु गायति गीतानि मम जागरणे सदा ।
सर्व्वसङ्गात्प्रमुक्तो वै मम लोकाय गच्छति ॥ ९३ ।
एतत्ते कथितन्देवि गायनस्य फलं महत् ।
यस्य गीतस्य शब्देन तरेत्संसारसागरम् ॥ ९४ ।
वादित्रस्य प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
प्राप्तवान्मानुषो येन देवेभ्यः सबलां* स्वयम् ॥ ९५ ।

* समतामिति (ग) ।

शम्यातालप्रयोगेण सन्निपातेन वा पुनः।
नववर्षसहस्राणि नववर्षशतानि च।
कुवेरभवनङ्गत्वा मोदते वै यदृच्छया॥ ९६॥
कुवेरभवनाद्भ्रष्टः स्वच्छन्दगमनालयः।
शम्यादितालसम्पातैर्मम लोकाय गच्छति॥ ९७॥
नृत्यमानस्य* वच्यामि तच्छृणुष्व वसुन्धरे।
मानवो येन गच्छेत† छित्त्वा संसारबन्धनम्॥ ९८॥
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च।
पुष्करद्वीपमासाद्य स्वच्छन्दगमनालयः।
फलम्प्राप्नोति सुश्रोणि मम कर्म्मपरायणः॥ ९९॥
रूपवान्गुणवान् शूरः शीलवान् सत्पथे स्थितः।
मद्भक्तश्चैव जायेत संसारपरिमोचितः॥ १००॥
यस्तु जागरते नित्यं गीतवाद्येन नर्त्तकः।
जम्बुद्वीपं समासाद्य राजराजस्तु जायते॥ १०१॥
सर्व्वकर्म्मसमायुक्तो रचिता वै महीपतिः।
मद्भक्तश्चैव जायेत मम कर्म्मपरायणः॥ १०२॥
उपहार्य्याणि पुष्पाणि मम कर्म्मपरायणः।
यो मामुपानयेद्भूमि मम कर्म्मपथे स्थितः॥ १०३॥
पुष्पाणि तत्र यावन्ति मम मूर्द्धनि धारयेत्।
स कृत्वा पुष्कलङ्कर्म्म मम लोकाय गच्छति॥ १०४॥

---

* नृत्यत इति साधु। † गच्छेदिति साधु।

एतत्ते कथितन्देवि भक्तानान्तु महौजसाम् ।
मम भक्तसुखार्थाय सर्व्वसंसारमोचणम् ॥ १०५ ।
य एतत्पठते* भूमे कल्यमुत्थाय मानवः ।
स तु तारयते† जन्तुर्दश पूर्व्वान्दशापरान् ॥ १०६ ।
न पठेन्मूर्खमध्ये तु पिशुनानां पुरो न च ।
पठेद्भागवतानाञ्च मध्ये सुक्तिरतात्मनाम् ॥ १०७ ।
अश्रद्दधाने क्रूरे वा न पठेद्देवले तथा ।
यदीच्छेत्सिद्धिकल्याणं मङ्गलञ्च मम प्रियम् ॥ १०८ ।
धर्म्माणां परमं धर्म्मं क्रियाणाम्परमा क्रिया ।
मा पठेच्छास्त्रदूषाय अध्यायं वा कदाचन ।
यदीच्छेत्परमां सिद्धिं मम लोके महीयते ॥ १०९ ।

इति वराहपुराणे भगवच्छास्त्रे सौकरे चाण्डालब्रह्मराक्षससंवादे
सौकरमाहात्म्यं नाम ऊनचत्वारिंशदधिकशततमोऽध्यायः ।

चत्वारिंशदधिकशततमोऽध्यायः ।

धरण्युवाच ।

श्रुतानि देवस्थानानि त्वया प्रोक्तानि यान्युत ।
कस्मिंस्तिष्ठसि नित्यन्त्वं तद्भवान्वक्तुमर्हसि ॥ १ ।
किञ्च ते परमं स्थानं यत्र मूर्त्त्याकृतिर्भवान् ।

---

* पठतीति साधु । † तारयतीति साधु ।

कस्मिन्स्थाने कृतङ्कर्म्म येन यात्युत्तमां गतिम् ॥ २ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि भक्तानां भक्तवत्सले ।
येषु स्थानेषु तिष्ठामि कथ्यमानानिमान्* शृणु ॥ ३ ।
तत्र कोकामुखं नाम यन्मया पूर्व्वभाषितम् ।
वदरीति च विख्यातं गिरिराजशिलातलम् ॥ ४ ।
स्थानं लोहार्गलं नाम म्लेच्छराजसमाश्रितम् ।
क्षणश्चापि न मुञ्चामि एवमेतन्न संशयः ॥ ५ ।
सचैत्यं पश्य मे स्थानं जगदेतच्चराचरम् ।
सर्व्वनाहं वरारोहे न मन्मूनं हि जानते ॥ ६ ।
ये तु जानन्ति मां देवि गुह्यां कामगतिं मम ।
शीघ्रङ्कोकामुखं यान्तु मम कर्म्मपरायणाः ॥ ७ ।
ततो देववचः श्रुत्वा पृथिवी वाक्यमब्रवीत् ।
शिरस्यञ्जलिमाधाय निर्वृतेनान्तरात्मना† ॥ ८ ।

धरण्युवाच ।

सर्व्वतो लोकनाथेश परङ्कौतूहलं हि मे ।
कथङ्कोकामुखं श्रेष्ठं तद्भवान्वक्तुमर्हसि ॥ ९ ।

वराह उवाच ।

नास्ति कोकामुखात्क्षेत्रं श्रेष्ठङ्कोकामुखाच्छुचि‡ ।
नास्ति कोकामुखात्स्थानं नास्ति कोकामुखात्प्रियम् ॥ १० ।

---

* स्थानस्य क्लीवत्वात्कथ्यमानानीमानीति युक्तम् । † निभृतेनान्तरात्मनेति (ग) ।
‡ क्वचिदिति (ग) ।

यस्तु कोकामुखङ्गत्वा न भूयोविनिवर्त्तते ।
कर्म्माणि तत्र कुर्व्वीत यष्टम्भवति चात्मनि ॥ ११ ।
यानि यानि च क्षेत्राणि त्वया पृष्टं वसुन्धरे* ।
कोकामुखसमं स्थानं न भूतं न भविष्यति ॥ १२ ।
मम सा परमा मूर्त्तिर्यां न जानन्ति गोपिताम् ।
स्थितङ्कोकामुखं नाम एतत्ते कथितं मया ॥ १३ ।

धरण्युवाच ।

देव देव महादेव भक्तानामभयप्रद ।
यानि गुह्यानि सन्त्यत्र कोकायां वक्तुमर्हसि ॥ १४ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि यन्मान्त्वम्परिपृच्छसि ।
तस्मिन् कोकामुखं रम्यं कथ्यमानं मयाऽनघे ॥ १५ ।
जलविन्दुरिति ख्याता†त्पर्व्वतात्पत्तनाद्भुवि ।
तत्तु गुह्यमति देवि कृत्वा कर्म्म महौजसम् ।
सर्व्वसङ्गान्परित्यज्य मम लोकाय गच्छति ॥ १६ ।
विष्णुधारेति विख्याता कोकायां मम मण्डले ।
पर्व्वतात्पतिता भूमौ धारा मुसलसन्निभा ॥ १७ ।
अहोरात्रोषितो भूत्वा स्नायात्तत्र प्रयत्नतः ।
अग्निष्टोमसहस्राणां फलमाप्नोति मानवः ॥ १८ ।
न मुह्यति स कर्त्तव्ये फलमाप्नोति चोत्तमम् ।

---

* त्वया पृष्टानि सुन्दरीति साधु । † जलविन्दुरिति विख्यातादिति (क), (ख) ।

जायते विपुले शुद्धे मम मार्गानुसारिणि ॥ १९ ।
तत्राथ मुञ्चते प्राणान्विष्णुधारां समाश्रितः ।
पश्यते परमां मूर्त्तिमेतां मम न संशयः ॥ २० ।
तत्र विष्णुपदं नाम स्थानङ्कोकामुखाश्रितम् ।
एतत्कश्चिन्न जानाति धरे वाराहसंश्रितम् ॥ २१ ।
तस्मिन् कृतोदको देवि रात्रावुपोषितो नरः ।
क्रौञ्चद्वीपे प्रजायेत मम भक्तिपरायणः ॥ २२ ।
तत्राथ मुञ्चते प्राणान् गुह्यस्थाने परे मम ।
सर्व्वसङ्गान् परित्यज्य मम लोकाय गच्छति ॥ २३ ।
अस्ति विष्णुसरोनाम यत्त्वया सह क्रीड़ितम्* ।
यत्र दंष्ट्राप्रहारेण चाहतासि वसुन्धरे ॥ २४ ।
तत्र स्नानन्तु कुर्व्वीत प्रातःकाले वसुन्धरे ।
सर्व्वपापविशुद्धात्मा मम लोकाय गच्छति ॥ २५ ।
सोमतीर्थमिति ख्यातङ्कोकायां मम मण्डले ।
यत्र पञ्चशिलाभूमिर्विष्णुनाम्ना तथाङ्किता ॥ २६ ।
यस्तत्र कुरुते स्नानं पञ्चरात्रोषितो नरः ।
गोमेदे जायते द्वीपे मम मार्गानुसारकः ॥ २७ ।
तत्राथ मुञ्चते प्राणान् गुह्यक्षेत्रे परे मम ।
सर्व्वपापविनिर्मुक्तः शुद्धात्मा मां स पश्यति ॥ २८ ।
तुङ्गकूटेति विख्यातं कोकायां मम मण्डले ।

---

* यत्र त्वया सह क्रीड़ितमिति (क), (ख) पुस्तकयोः पाठः, तत्र तु छन्दोदोषः।

धाराः पतन्ति चत्वारः पर्व्वतादुच्चसंश्रिताः ॥ २९ ।
यस्तत्र कुरुते स्नानं पञ्चरात्रोषितो नरः ।
कुशद्वीपं समासाद्य मम लोकेषु तिष्ठति ॥ ३० ।
अनित्यमाश्रमं नाम चेत्रकर्मसुखावहम् ।
देवापि* यं न जानन्ति किम्पुनर्मनुजादयः ॥ ३१ ।
तत्र स्नात्वा वरारोहे अहोरात्रोषितो नरः ।
जायते पुष्करद्वीपे मम कर्म्मपरायणः ॥ ३२ ।
अथ तत्र मृतोभूमे पुण्यचेत्रे महाशुचिः ।
सर्व्वपापविनिर्मुक्तोमम लोकाय गच्छति ॥ ३३ ।
अस्त्यत्राग्निसरो नाम परङ्गुह्यं मम स्थितम् ।
पञ्च धाराः पतन्त्यत्र गिरिकुञ्जसमाश्रिताः ॥ ३४ ।
तत्र चापि कृतस्नानः पञ्चरात्रोषितोनरः ।
कुशद्वीपे च जायेत मम कर्म्मपरायणः ॥ ३५ ।
तत्राऽथ मुञ्चते† प्राणान्कृत्वा कर्म्म महौजसम् ।
कुशद्वीपात्परिभ्रष्टो ब्रह्मलोकञ्च गच्छति ॥ ३६ ।
अस्ति ब्रह्मसरोनाम गुह्यक्षेत्रं परं मम ।
यत्र धारा पतत्येका पुण्या भूमि शिलातले ॥ ३७ ।
तत्र स्नानम्प्रकुर्व्वीत पञ्चरात्रोषितो नरः ।
वसते सूर्य्यलोकेषु मम मार्गानुसारकः ॥ ३८ ।
अथाऽत्र मुञ्चते प्राणान् सूर्य्यधारां समाश्रितः ।

---

* देवा अपीति साधु । † मुञ्चतीति साधु, एवं परत्रापि ।

सूर्य्यलोकमतिक्रम्य मम लोकन्तु गच्छति ॥ ३८ ।
अस्ति धेनुवटं नाम गुह्यं चेत्रं परं मम ।
एका धारा पतत्यत्र देवि पूर्णा शिलोच्चयात्* ॥ ४० ।
तत्र स्नानम्प्रकुर्व्वीत एकमेकं दिनन्तथा ।
सप्तरात्रोषितोभूत्वा मम कर्म्मसमाश्रितः ॥ ४१ ।
स्नात्वा सप्तसमुद्रेषु लब्धसंज्ञः समाहितः ।
विहरेत्सप्तद्वीपेषु मम कर्म्मपरायणः ॥ ४२ ।
तत्राथ मुञ्चते प्राणान्मम भक्तिसमन्वितः ।
सप्तद्वीपमतिक्रम्य मम लोकन्तु गच्छति ॥ ४३ ।
अस्ति धर्म्मोद्भवं नाम तस्मिन् चेत्रे परे मम ।
गिरिकुञ्जात्पतत्येका धारा भूमितले शुभा ॥ ४४ ।
तत्र स्नानम्प्रकुर्व्वीत एकरात्रोषितो नरः ।
स वैश्योजायते शूद्रो मम कर्म्मपरायणः ॥ ४५ ।
तत्राऽथ मुञ्चते प्राणान् गुह्ये देवि शिलोच्चये ।
साङ्गयज्ञं सदक्षिण्यं भुक्ता मां† प्रतिपद्यते ॥ ४६ ।
अस्ति कोटिवटं नाम चेत्रं गुह्यम्परं मम ।
एका धारा पतत्यत्र वटमूलसुपाश्रिता ॥ ४७ ।
तत्र स्नानन्तु कुरुते रात्रावुपोषितो नरः ।
यावन्ति वटपत्राणि तस्मिन् शृङ्गे परे मम ।
तावद्वर्षसहस्राणि रूपसम्पत्समन्वितः ।

---

* पूर्णशिलोच्चयादिति (ग)। † भक्तोमामिति (क), (ख)।

तिष्ठते* तु वरारोहे मम मार्गानुसारिणि ॥ ४८।४९ ।
तत्राऽथ मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
अग्निवर्णस्ततोभूत्वा मम लोकाय गच्छति ॥ ५० ।
पापप्रमोचनं नाम गुह्यमस्मिन् परं मम ।
पतितैकतमा धारा स्थूला कुम्भसमा ततः ॥ ५१ ।
यस्तत्र कुरुते स्नानमहोरात्रोषितो नरः ।
जायते च चतुर्वेदी मम कर्म्मपरायणः ॥ ५२ ।
तत्राऽथ मुञ्चते प्राणान् कौशिकीमाश्रितो नदीम् ।
यस्तत्र कुरुते स्नानं पञ्चरात्रोषितो नरः ।
मोदते वासवे लोके मम मार्गानुसारिणि ॥ ५३ ।
तत्राथ मुञ्चते प्राणान्मम कर्म्मपरायणः ।
वासवं लोकमुत्सृज्य मम लोकञ्च† गच्छति ॥ ५४ ।
यमव्यसनकं नाम गुह्यमस्ति परं मम ।
स्रोतोवहति तत्रैकङ्कौशिकीमाश्रितं नदीम् ॥ ५५ ।
यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः ।
न स गच्छति दुर्गाणि यमस्य व्यसनं महत् ॥ ५६ ।
अथ तत्र त्यजेत्प्राणान्मम कर्म्मपरायणः ।
विशुद्धोमुक्तपापोऽसौ मम लोकाय गच्छति ॥ ५७ ।
मातङ्गं नाम विख्यातं तस्मिन् क्षेत्रे परं मम ।
स्रोतोवहति तत्रैव आश्रितङ्कौशिकीं नदीम् ॥ ५८ ।

---

* तिष्ठतीति साधु । † मम लोकन्त्विति (ग) ।

स्नानङ्कुर्व्वन्ति ये तत्र एकरात्रोषितो नरः ।
भेदङ्किम्पुरुषम्प्राप्य जायते नाऽत्र संशयः ।
विद्वान् शुचिश्च जायेत मम कर्म्मानुसारकः* ॥ ५९ ।
तत्राऽथ मुञ्चते प्राणान् गुह्ये देवि परे मम ।
मुक्त्वा किम्पुरुषभेदं मम लोकञ्च गच्छति ॥ ६० ।
अस्ति वज्रभवं नाम गुह्ये तस्मिन् परं मम ।
स्रोतोवहति तत्रैकमाश्रितङ्कौशिकीं नदीम् ॥ ६१ ।
स्नानङ्करोति यस्तत्र एकरात्रोषितो नरः ।
जायते शक्रलोके तु मम कर्म्मानुसारकः ॥ ६२ ।
शरीरचक्रसङ्घाते वज्रहस्तः स्वरूपकः ।
तत्र स्नानप्रभावेण जायते नात्र संशयः ॥ ६३ ।
अथाऽत्र मुच्यते प्राणान्मम चिन्तनतत्परः ।
शक्रलोकमतिक्रम्य मम लोकम्प्रपद्यते ॥ ६४ ।
तत्र त्रिक्रोशमात्रेण गुह्यं चेत्रम्परं मम ।
शक्ररुद्रेति† विख्यातं तस्मिन् कोकाशिलातले ॥ ६५ ।
स्नानङ्करोति यस्तत्र त्रिरात्रोपोषितो नरः ।
जम्बूद्वीपे प्रजायेत जम्बूर्यत्र प्रतिष्ठिता ।
जम्बूद्वीपं परित्यज्य जायते मम पार्श्वगः ॥ ६६ ।
अस्ति चान्यन्महच्छ्रद्रे चेत्रे गुह्ये विशेषितम् ।
मनुजा येन गच्छन्ति मुक्त्वा संसारसागरम् ॥ ६७ ।

---

* सारतः इति (क), (ख) । † शक्रकद्र इति साधु ।

दंष्ट्राङ्कुरेति* विख्यातं यत्र कोका विनिःसृता ।
एतद्गुह्यं न जानन्ति यतोमुञ्चन्ति जन्तवः ॥ ६८ ।
कृतोदकस्तत्र भद्रे अहोरात्रोषितो नरः ।
जायते शाल्मलिद्वीपे मम कर्म्मानुसारिणि ॥ ६९ ।
तत्राऽथ मुञ्चते प्राणान्मम कर्म्मसु निष्ठितः ।
शाल्मलिद्वीपमुत्सृज्य मम पार्श्वे स तिष्ठति ॥ ७० ।
तस्मिन्क्षेत्रे महागुह्ये परमस्ति फलोदयम् ।
विष्णुतीर्थमिति ख्यातं मम भक्तसुखावहम् ॥ ७१ ।
ततः पर्व्वतमध्यात्तु कोकायाम्पतते† जलम् ।
त्रिस्रोतसं महाभागे सर्व्वसंसारमोक्षणम् ॥ ७२ ।
तस्मिन् कृतोदकोभूमे छित्त्वा संसारबन्धनम् ।
वायोः स भवनम्प्राप्य वायुभूतस्तु तिष्ठति ॥ ७३ ।
तत्राऽथ मुञ्चते प्राणान्मम कर्म्मसु निष्ठितः ।
वायुलोकमतिक्रम्य मम लोकं स गच्छति ॥ ७४ ।
अस्ति तत्र वरं स्थानं सङ्गमङ्कौशिकोकयोः ।
सर्व्वकामिकेति विख्याता‡ शिला तिष्ठति चोत्तरे ॥ ७५ ।
तत्र यः कुरुते स्नानमहोरात्रोषितोनरः ।
विस्तीर्णे जायते वंशे जातिं स्मरति चात्मनः ॥ ७६ ।
स्वर्गे वा यदि वा भूमौ यं यङ्कामयते नरः ।
तं तं प्राप्नोति वै कामं स्नातमात्रः शिलातले ॥ ७७ ।

---

* दंष्ट्राङ्कुरमिति साधु । † पततीति साधु । ‡ सर्व्वे कामिकेति (क), (ख) । चरणेऽत्र छन्दोदोषः ।

तत्राऽथ मुञ्चते प्राणान्मम कर्मण्यवस्थितः ।
सर्व्वसङ्गं परित्यज्य मम लोकं स गच्छति ॥ ७८ ।
अस्ति मत्स्यशिला नाम गुह्यङ्कोकामुखे वरम् ।
धाराः पतन्ति तिस्रो वै कौशिकीमाश्रिता नदीम् ॥ ७९ ।
तत्र च स्नायमानस्तु* यदि मत्स्यं प्रपश्यति ।
ततोजानाम्यहं देवि प्राप्तोनारायणः स्वयम् ॥ ८० ।
तत्र मत्स्यं पुनर्दृष्ट्वा यजमानस्तु† सुन्दरि ।
दद्यादर्घ्यं ततो भद्रे मधुलाजसमन्वितम् ॥ ८१ ।
यस्तत्र कुरुते स्नानं देवि गुह्ये ततः परे ।
तिष्ठते‡ पद्मपत्रे तु सोत्तरे मेरुसंश्रिते ॥ ८२ ।
अथ संप्राप्य मुच्येत मत्स्यं गुह्यम्परं मम ।
मेरुशृङ्गं समुल्लङ्घ्य मम लोकाय गच्छति ॥ ८३ ।
पञ्चयोजनविस्तारं चैतत्कोकामुखं मम ।
यस्त्वेतत्तु विजानाति न स पापेन लिप्यते ॥ ८४ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तस्मिन् कोकामुखे रम्ये तिष्ठामि दक्षिणामुखः ॥ ८५ ।
शिलाचन्दनसङ्काशं देवानामपि दुर्लभम् ।
वराहरूपमादाय तिष्ठामि पुरुषाकृतिः ॥ ८६ ।
वामोन्नतमुखङ्कृत्वा वामदंष्ट्रासमुन्नतम् ।
पश्यामि च जगत्सर्व्वं ये च भक्ता मम प्रियाः ॥ ८७ ।

---

* स्नांस्तु इति साधु । † स्नायमानस्तु इति (ग) । ‡ तिष्ठतीति साधु ।

ये च मां स्मरते* भूमे पुरुषा मुक्तकिल्बिषाः ।
तत्र कुर्व्वन्ति कर्म्माणि शुद्धाः संसारमोक्षणे ॥ ८८ ।
यदि कोकामुखङ्गच्छेत्कदाचित्कालपर्य्यये ।
मा ततो विनिवर्त्तेत यदीच्छेन्मम साम्यताम् ॥ ८९ ।
गुह्यानां परमङ्गुह्यमेतत्स्थानं परं महत् ।
सिद्धानाम्परमा सिद्धिर्गुह्यङ्कोकामुखम्परम् ॥ ९० ।
न च सांख्येन योगेन सिद्धिं यान्ति महत्पराम्† ।
याति कोकामुखङ्गत्वा रहस्यङ्कथितं मया ॥ ९१ ।
एवं श्रेष्ठं महाभागे यत्त्वया परिपृच्छितम्‡ ।
कथनङ्कथितं सर्व्वङ्किमन्यच्छ्रोतुमिच्छसि ॥ ९२ ।
य एतत्कथितम्भूमे कोकामुखमनुत्तमम् ।
तारिताः पितरस्तेन दश पूर्व्वास्तथा पराः ॥ ९३ ।
मृतो वा तत्र जायेत शुद्धे भागवते कुले ।
अनन्यमानसो भूत्वा मम मार्गप्रदर्शकः ॥ ९४ ।
यश्चेदं शृणुयान्नित्यङ्कल्य उत्थाय मानवः ।
सप्तपञ्चशतं जन्म मम भक्तश्च जायते ॥ ९५ ।
य एतत्पठते नित्यङ्कोकाख्यानन्तथोषसि ।
गच्छते परमं स्थानमेवमेतन्न संशयः ॥ ९६ ।

इति वराहपुराणे भगवच्छास्त्रे कोकामुखमाहात्म्यवर्णनं नाम
चत्वारिंशदधिकशततमोऽध्यायः ।

---

* स्मरन्तीति साधु । † महापरामिति साधु । ‡ परिपृष्टमिति साधु ।

एकचत्वारिंशदधिकशततमोऽध्यायः ।

वराह उवाच ।

तस्मिन्हिमवतः पृष्ठे परं गुह्यमतः* शृणु ।
बदरीति च विख्याता देवानामपि दुर्लभा ॥ १ ॥
न तत्प्राप्नोति मनुजः कृत्वा कर्म्म सुदुष्करम् ।
प्राप्नुवन्ति च भक्ता ये बदरीं विश्वतारिणीम् ॥ २ ॥
दुर्लभं तन्मम क्षेत्रं हिमकूटशिलातले ।
यस्तत्प्राप्नोति हि क्षेत्रङ्कृतकृत्यो भवेन्नरः ॥ ३ ॥
ब्रह्मकुण्डमिति ख्यातमास्ते† तत्र शिलोच्चये ।
हिमसंस्थं तथात्मानङ्कृत्वा तिष्ठामि माधवि ॥ ४ ॥
स्नानङ्करोति यस्तत्र त्रिरात्रोपोषितो नरः ।
अग्निष्टोमस्य यज्ञस्य फलम्प्राप्नोति मानवः ॥ ५ ॥
मुञ्चेत्प्राणांस्तत्र यदि व्रतनिष्ठो जितेन्द्रियः ।
सत्यलोकमतिक्रम्य मम लोकञ्च गच्छति ॥ ६ ॥
अग्निसत्यपदं नाम तस्मिन् क्षेत्रे परं मम ।
शृङ्गत्रयात्पतन्त्यत्र धारा मुसलसन्निभाः ॥ ७ ॥
यस्तत्र कुरुते स्नानं त्रिरात्रोपोषितो नरः ।
सत्यवादी भवेद्धन्यो मम कर्म्मपरायणः ॥ ८ ॥
यस्तत्र मुञ्चते प्राणान्यदि कृत्वा जलाशयम् ।

---

* गुह्यतमं शृणु इति (ग) । † मास्तं तत्रेति (ग) ।

सत्यलोकमतिक्रम्य मम लोके स मोदते ॥ ९ ।
इन्द्रलोकमिति ख्यातं वदर्य्याञ्च ममाश्रमम् ।
तत्राहन्देवि शक्रेण निष्कलम्परितोषितः ॥ १० ।
तत्र चैव तु शृङ्गेभ्यः स्थूलधारा पतत्युत ।
स्थूले शिलातले तत्र मम धर्म्मो व्यवस्थितः ॥
स्नानङ्करोति यस्तत्र एकरात्रोषितो नरः ।
सत्यवादी शुचिर्भूत्वा सत्यलोके महीयते ॥ ११।१२ ।
अथात्र मुञ्चते प्राणान् कृत्वा चानाशकं व्रतम् ।
सत्यलोकमतिक्रम्य मम लोकेषु तिष्ठति ॥ १३ ।
अस्ति पञ्चशिखं* नाम वदर्य्यामाश्रमम्प्रति ।
यत्र धाराः पतन्त्यत्र पञ्चशृङ्गसमाश्रिताः ॥ १४ ।
यस्तत्र कुरुते स्नानं पञ्चस्रोतसि मानवः ।
अश्वमेधफलम्प्राप्य दैवतैः सह मोदते ॥ १५ ।
यद्यत्र मुञ्चते† प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
स्वर्गलोकमतिक्रम्य मम लोके महीयते ॥ १६ ।
चतुःस्रोतमिति ख्यातं तस्मिन् क्षेत्रे परे मम ।
धाराः पतन्ति चत्वारि चतुरो‡ दिशमाश्रिताः ॥ १७ ।
यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः ।
मोदते नाकपृष्ठे तु मम भक्तश्च§ जायते ॥ १८ ।

---

* पञ्चशिखा नामेति (क)। † मुञ्चतीति साधु, एवमन्यत्र। ‡ धारादिक्शब्दयोः स्त्रीलिङ्गत्वात् चत्वारि चतुर इति आर्षं, चतस्र इति साधु। § भक्तिश्चेति (ग)।

अथ प्राणान् परित्यज्य कृत्वा कर्म्म सुदुष्करम् ।
नाकपृष्ठमतिक्रम्य मम लोकं प्रपद्यते ॥ १९ ।
वेदधारमिति* ख्यातं तस्मिन् क्षेत्रे परे मम ।
यत्र ब्रह्ममुखाद्भ्रष्टा वेदाश्चत्वार एव च ॥ २० ।
तत्रैव हिमवत्पृष्ठे चतुःशृङ्गाद्विनिःसृताः ।
धाराः पतन्ति चत्वारि विषमाश्च शिलोच्चये ॥ २१ ।
यस्तत्र कुरुते स्नानं चतूरात्रोषितो नरः ।
चतुर्णामपि वेदानाङ्कृहणो कारणम्भवेत् ॥ २२ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मपथे स्थितः ।
देवलोकमतिक्रम्य मम लोके प्रतिष्ठते ॥ २३ ।
द्वादशादित्यकुण्डेति† तस्मिन् क्षेत्रे परे मम ।
यत्र ते द्वादशादित्या देवि संस्थापिता मया ॥ २४ ।
तत्र पर्व्वतशृङ्गे तु स्थूलमूले शिलातले ।
द्वादश पतति‡धारा मम कर्म्म सुखावहाः ॥ २५ ।
यस्तत्र कुरुते स्नानं यां काञ्चिद्द्वादशीं प्रति ।
यत्र ते द्वादशादित्यास्तत्र गच्छेन्न संशयः ॥ २६ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मणि संस्थितः ।
समतिक्रम्य चादित्यान्मम लोके महीयते ॥ २७ ।
लोकपालमिति ख्यातं तस्मिन् क्षेत्रे परे मम ।
तत्र ते लोकपालास्तु मया संस्थापिताः पुरा ॥ २८ ।

---

* वेदधारा इतीति (ग) । † कुण्डमिति साधु । ‡ पतन्तीति साधु ।

तत्र पर्व्वतमध्ये तु स्थलकुण्डं वृहन्मम ।
भित्त्वा पर्व्वतमुद्गीर्णं* यत्र सोमसमुद्भवः ॥ २९ ।
तत्र स्नानन्तु कुर्व्वीत ज्यैष्ठमासस्य द्वादशीम् ।
मोदते लोकपालेषु मम भक्तश्च जायते ॥ ३० ।
अथात्र मुञ्चते प्राणान्मम कर्म्मसु तत्परः ।
लोकपालानतिक्रम्य मम लोकम्प्रपद्यते ॥ ३१ ।
अस्ति मेरोर्वरं नाम तस्मिन् गुह्यम्परं मम ।
तत्र स्थितेन भूमे तु मेरुः संस्थापितः स्वयम् ॥ ३२ ।
धारास्तिस्रः पतन्त्यत्र सुवर्णसदृशप्रभाः ।
पतेत्तु तज्जलभूमौ† व्यक्तिं नैवोपलभ्यते‡ ॥ ३३ ।
यस्तत्र कुरुते स्नानन्त्रिरात्रोपोषितो नरः ।
मोदते मेरुशृङ्गेषु मम भक्तश्च§ जायते ॥ ३४ ।
अथ तत्र मृतोदेवि तस्मिन् गुह्ये परे मम ।
मेरुपृष्ठमतिक्रम्य मम लोकाय गच्छति ॥ ३५ ।
मानसोद्भिदमिति च तत्रान्यत्तीर्थमुत्तमम् ।
पृथ्वीमुद्भिद्य मध्ये तु जलङ्गच्छति सत्वरम् ॥ ३६ ।
देवाप्येवं¶ न जानन्ति तं देशं तत्र संस्थितम् ।
मानुषा हि विजानन्ति भूम्यां पतति तज्जलम् ॥ ३७ ।
यस्तत्र कुरुते स्नानमहोरात्रोषितो नरः ।

---

* भित्त्वा पर्व्वतमुद्गार इति (ग)। † पतितं तज्जलमित्येवं कृते साधु स्यात्
‡ व्यक्तिर्नैवोपलभ्यते इति बहुषु पाठः। § मम भक्तिश्चेति (ग)। ¶ देवा अपीति साधु

मोदते मानसे दिव्ये मम भक्तश्च जायते ॥ ३८ ।
अस्ति पञ्चशिरं नाम तस्मिन्गुह्यं परं मम ।
ब्रह्मणा छिद्यते यत्र शिरश्चैव महाद्युति ॥ ३९ ।
तत्र वै पञ्च कुण्डानि स्थूलशीर्षशिलोच्चये ।
पञ्चात्र शिरसः* स्थाने वहुधारासमन्विताः ॥ ४० ।
यत्र तन्मध्यमं कुण्डं छिन्नमेव स्वयम्भुवा ।
तत्र रक्तजला भूमिर्दृश्यते धारसङ्कुला ॥ ४१ ।
यस्तत्र कुरुते स्नानं पञ्चरात्रोषितो नरः ।
मोदते ब्रह्मलोकस्थो मम भक्तश्च जायते ॥ ४२ ।
तथात्र मुञ्चते प्राणाग्गुह्ये पञ्चशिरे मम ।
जलचान्द्रायणङ्कृत्वा† मम कर्मसु निष्ठितः ॥ ४३ ।
बुद्धिमान्मतिमांश्चैव रागमोहविवर्ज्जितः ।
ब्रह्मलोकमतिक्रम्य मम लोकाय गच्छति ॥ ४४ ।
अस्ति सोमाभिषेकेति‡ तीर्थमन्यत्परं मम ।
राजत्वे ब्राह्मणानान्तु मया सोमोऽभिषेचितः§ ॥ ४५ ।
तत्राहं तोषितस्तेन अत्रिपुत्रेण माधवि ।
नवपञ्चककोट्यग्रे¶ कृत्वा कर्म्म सुदुष्करम् ।
प्राप्तश्च परमां सिद्धिं मत्प्रासादाद्वसुन्धरे ॥ ४६ ।
तदायत्तं जगत्सर्व्वं ब्रीहयः परमौषधीः‖ ।

---

* शिरसामिति (ग) । † जलं चान्द्रायणमिति (ग) । ‡ सोमाभिषेकमिति साधु । § अभिषेचित इति स्वार्थे णिच् । ¶ नवपञ्चककोटीस्तु, नवपञ्चककोटिं तु वा साधु । ‖ औषध्यः, औषधय इति वा साधु ।

जायन्तेऽस्मिन्प्रलीयन्ते स्कन्देन्द्राः समरुद्गणाः ।
भूमि सोममयं सर्व्वं मम संस्थन्भविष्यति ॥ ४७ ।
तत्र सोमगिरिर्नाम यत्र धारा पतेद्भुवि ।
कुण्डेऽरण्ये विशाले तु एतत्ते कथितं मया ॥ ४८ ।
यस्तत्र कुरुते स्नानं त्रिरात्रोपोषितो नरः ।
मोदते सोमलोकेषु एवमेतन्न संशयः ॥ ४९ ।
अथात्र म्रियते देवि कृत्वा कर्म्म सुदुष्करम् ।
सोमलोकमतिक्रम्य मम लोकम्प्रपद्यते ॥ ५० ।
अस्ति चोर्वशिकुण्डेति* गुह्यक्षेत्रे परं मम ।
यत्र चैवोर्वशी भित्त्वा दक्षिणोरुमजायत ॥ ५१ ।
तत्र तप्याम्यहन्देवि देवानामपि कारणात् ॥ ५२ ।
न मां कश्चिद्विजानाति स्वात्मानो हि विजानते ।
ततोमे तप्यमानस्य बहुवर्षव्यतिक्रमात् ।
देवा अपि न जानन्ति वह्निब्रह्ममहेश्वराः ॥ ५३ ।
एकैकेन फलेनाऽत्र वदर्य्यान्तु सुनिश्चितम् ।
बहुवर्षसहस्रन्तु तपश्चीर्णं मया भुवि ॥ ५४ ।
तत्राहं दशकोट्यस्तु दशवर्षं दशार्वुदम् ।
दश भूमे तथान्यानि पद्मानि तपसि स्थितः ॥ ५५ ।
ततस्ते मां न पश्यन्ति देवा गुह्यपथे स्थितम् ।
विस्मयं परमं जग्मुर्देवा दुःखपरायणाः ॥ ५६ ।

---

* उर्व्वशीकुण्डमिति साधु ।

अहम्पश्यामि सर्व्वं वै तपःसंस्थो वसुन्धरे।
न मां सर्व्वे प्रपश्यन्ति योगमायासमावृताः॥ ५७।
ततस्ता देवताः सर्व्वाः प्रत्यूचुश्च पितामहम्।
विष्णुना च विना लोके शान्तिर्नैव लभामहे॥ ५८।
देवानान्तु वचः श्रुत्वा ब्रह्मा लोकपितामहः।
योगमायापटच्छन्नङ्कथयामास मां तदा॥ ५९।
ततो देवाः सगन्धर्व्वाः सिद्धाश्च परमर्षयः।
तत्र जग्मुर्महाभागे तुष्यन्तः परमं मुदा।
विभावयन्ति मां तत्र देवा इन्द्रपुरोगमाः॥ ६०।
त्वया नाथ परित्यक्ता दुःखिताः शर्म्मवर्ज्जिताः।
त्रायस्व नो हृषीकेश परमानुग्रहेण वै॥ ६१।
एतत्कृत्वा विशालाक्षि देवान् प्रणतिपूर्व्वकम्।
मया विलोकिताः सर्व्वे परां निर्वृतिमागताः॥ ६२।
एतस्मिन्नुर्व्वशीकुण्डे एकरात्रोषितो नरः।
यः स्नाति सर्व्वपापेभ्यो मुच्यते नात्र संशयः।
उर्व्वशीलोकमासाद्य क्रीड़ते कालमक्षयम्॥ ६३।
यस्तत्रोत्सृजते* प्राणान्मम कर्म्मपरायणः।
पुण्यपापविनिर्म्मुक्तो याति मल्लयतां प्रिये॥ ६४।
बदरीमाश्रमं पुण्यां यत्र यत्र स्थितः स्मरेत्।
स याति वैष्णवं स्थानं पुनरावृत्तिवर्ज्जितः॥ ६५।
य इदं शृणुयान्नित्यं मद्भक्तः सततम्पठेत्।

* उत्सृजतीति साधु।

ब्रह्मचारी जितक्रोधः सत्यवादी जितेन्द्रियः ।
ध्यानयोगरतो नित्यं स मुक्तिफलभाग्भवेत् ॥ ६६ ॥
यस्यैतद्विदितं सर्व्वं ध्यानयोगं वसुन्धरे ।
योऽवगच्छति चात्मानं स गच्छेत्परमाङ्गतिम् ॥ ६७ ॥

इति वराहपुराणे भगवच्छास्त्रे वदरिकाश्रममाहात्म्यवर्णनं नाम
एकचत्वारिंशदधिकशततमोऽध्यायः ।

द्वाचत्वारिंशदधिकशततमोऽध्यायः ।

सूत उवाच ।

ततो देववचः श्रुत्वा धर्म्मकामा वसुन्धरा ।
कृताञ्जलिपुटा भूत्वा प्रसादयति माधवम् ॥ १ ॥

धरण्युवाच ।

दास्यां मे प्रणयङ्कृत्वा विज्ञाप्यं शृणु माधव ।
मृदुना च स्वभावेन वक्ष्यामि त्वां जनार्द्दन ॥ २ ॥
अल्पप्राणबला नार्य्यो यत्त्वया परिभाषितम् ।
अशक्ताः सहितुं* ह्येताः क्षुधामनशनेऽबलाः ॥ ३ ॥
भुञ्जमाना नरा ह्यत्र रजसा यान्ति शं परम् ।
अन्नं ह्यनुग्रहन्देव येन ते कर्म्मसंश्रिताः ॥ ४ ॥
तस्यास्तद्वचनं श्रुत्वा माधव्याः स तु माधवः ।

---

* सोढुमिति साधु ।

प्रहस्य भावशुद्धात्मा तत एवम्प्रभाषति* ॥ ५ ।

वराह उवाच ।

साधु देवि वरारोहे मम कर्म्मव्यवस्थिते ।
पृष्टोऽहं परमङ्गुह्यं मम भक्तसुखावहम् ॥ ६ ।
स्पृष्टा या रजसा देवि मम कर्म्मपरायणा ।
मां संस्पृशन्तु तत्रस्थं यत्र तिष्ठामि सुन्दरि ॥ ७ ।
यदि भावस्तदा कश्चिद्भोजने कायसाधने ।
चित्तन्यस्य† मयि चौणि भोक्तव्यञ्च न संशयः ॥ ८ ।
न सा लिप्यति दोषेण भुञ्जमाना रजस्वला ।
अञ्जलिं शिरसा कृत्वा मयोक्तं मन्त्रमुत्तमम् ॥ ९ ।
अनादिमध्यान्तमजं पुराणं
रजस्वला देववरं नमामि ।
तत एतेन मन्त्रेण भुक्त्वा देवि रजस्वला ।
करोति यानि कर्म्माणि न सा दुष्येत कर्हिचित् ॥ १० ।
स्नात्वा सा तु महाभागे पञ्चमात्तु दिनात्पुनः ।
यथार्हङ्कुरुते कर्म्म मच्चित्ता मत्परायणाः ।
प्राप्नुयात्पुरुषत्वञ्च न्यस्तसंसारचिन्तनात् ॥ ११ ।

धरण्युवाच ।

पुरुषा वा स्त्रियो वापि न पुमांसो न वा‡ स्त्रियः ।
कथन्दोषेण मुच्यन्ते जन्मसंसारबन्धनात् ॥ १२ ।

---

* प्रभाषते इति साधु । † चित्तन्यस्येति (क), (ख) । ‡ न चेति (ग) ।

वराह उवाच ।

इन्द्रियाणि निगृह्याथ* चित्तमप्यनुवेश्य च ।
मयि सन्यासयोगेन मम कर्म्मपरायणः ।
मम योगेषु सन्यासमेकचित्तो दृढ़व्रतः† ॥ १३ ।
एवं कुर्व्वन्महाभागे स्त्रियोवा पुन्नपुंसकम् ।
ज्ञानसन्यासयोगं वा यदीच्छेत्परमाङ्गतिम् ॥ १४ ।
अन्यच्च ते प्रवच्यामि तच्छृणुष्व वसुन्धरे ।
मनो बुद्धिश्च चित्तञ्च ते ह्यनीशाः शरीरिणाम् ।
एकचित्तं मनः कृत्वा ज्ञानेन पृथुलोचने ।
समचित्तं प्रपद्यन्ते न ते लिप्यन्ति मानवाः ॥ १५।१६ ।
सर्व्वभक्ष्याणि भक्षन्तः पेयापेयांस्तथैव च ।
समं चित्तं‡ मयि यदि तदा तस्य न च क्रिया ॥ १७ ।
चित्तं मनश्च बुद्धिश्च मत्संस्थञ्च समं यदि ।
यत्किञ्चित्कुर्व्वतः कर्म्म पद्मपत्रमिवाम्भसि ।
संयोगान्न च लिप्येत समत्वादेव नान्यथा ॥ १८ ।
रात्रिन्दिवं मुहूर्त्तं वा क्षणं वा यदि वा कला ।
निमेषं वा त्रुटिं वाथ§ देवि चित्तं समङ्कुरु ॥ १९ ।
सदा दिवानिशोश्चैव कुर्व्वन्तः कर्म्मसङ्करम् ।
तेऽपि यान्ति परां सिद्धिं यदि चित्तं व्यवस्थितम् ॥ २० ।
जाग्रतः स्वपतो वापि शृखतः पश्यतोऽपि वा ।

---

* निगृह्यार्थेति (ग) । † अत्र तिष्ठेत्किमप्यन्यद्वा क्रियापदसूह्यम् । ‡ समचित्तमिति (ग) । § वापीति (ग) ।

योमां चित्ते चिन्तयति मच्चिन्तस्य च किम्भयम्* ॥ २१ ।
दुर्वृत्तमपि चाण्डालं ब्राह्मणं चाऽपथि स्थितम् ।
तन्तु देवि प्रशंसामि नान्यचित्तं कदाचन ॥ २२ ।
यजन्तः सर्व्वधर्म्मज्ञा ज्ञानसंस्कारसंस्कृताः ।
मयि चित्तं समाधाय मम कर्म्मपरायणाः ॥ २३ ।
ये मत्कर्म्माणि कुर्व्वन्ति मया हृदि समाश्रिताः ।
सुखन्निद्रां समादाय स्वपन्तः कर्म्मसंस्थिताः ॥ २४ ।
येषां प्रसङ्गतश्चित्तं तेऽपि देवि मम प्रियाः ।
सर्व्वमात्मनि कर्म्म स्वं शुभं वा यदि वाऽशुभम् ॥ २५ ।
प्राप्नुवन्ति च दुःखानि भ्रमच्चित्ता नराधमाः ।
चित्तं नाशोहि लोकस्य चित्तं मोक्षस्य कारणम्† ॥२६।
तस्माच्चित्तं समादाय माम्प्रपद्यस्व मेदिनि ।
न्यस्य ज्ञानञ्च योगञ्च एकचित्ता भजस्व माम् ॥ २७ ।
मच्चित्तः सततं यो मां भजेत नियतव्रतः ।
मत्पार्श्वम्प्राप्य परमं मद्भावायोपपद्यते ॥ २८ ।
मया चैव पुरा सृष्टं प्रजार्थेन वसुन्धरे ।
मासि मासि तु गन्तव्यमृतुकाले व्यवस्थितम् ।
एकचित्तं समादाय यदीच्छेत मम प्रियम् ॥ २९ ।
न गच्छेद्यदि मासि तु ऋतुकालव्यवस्थितम् ।

---

* (ग) पुस्तके मम चित्तस्य च किम्भयमिति पाठोऽत्र एकाक्षराधिक्यं वर्त्तते।

† मोक्षस्य कर्म्मण इति (ग)।

पितरस्तस्य हन्यन्ते दश पूर्व्वा दशापराः ॥ ३० ।
न तत्र कामलोभेन मोहेन च वसुन्धरे ।
त्यक्तानङ्गञ्च मोहञ्च पित्रर्थाय स्त्रियं व्रजेत् ॥ ३१ ।
द्वितीयान्न स्पृशेन्नारीं लोभमोहात्कथञ्चन ।
न संस्पृशेत्तृतीयान्तु चतुर्थीं न कदाचन ॥ ३२ ।
कृते सम्भोगधर्म्मे तु कृतकौतुकसंस्थितः ।
शयने न स्त्रियं पश्येद्यदीच्छेच्छुद्धिमुत्तमाम् ॥ ३३ ।
कौतुके कृतकृत्ये तु मम कर्म्मपरायणाः ।
जलस्नानं ततः कुर्य्यादन्यवस्त्रपरिग्रहम् ॥ ३४ ।
अपूर्णे ऋतुकाले तु योऽभिगच्छेद्रजस्वलाम् ।
रेतःपाः पितरस्तस्य एवमेतन्न संशयः ॥ ३५ ।
एकान्तु पुरुषो याति द्वितीयाङ्कामसमोहितः ।
तृतीयां वा चतुर्थीं वा तदा स पुरुषाधमः ॥ ३६ ।
सर्व्वस्यैव तु लोकस्य समयोऽयं हि मत्कृतः ।
ऋतुकाले तु सर्व्वासां पित्रर्थंभोग इष्यते ।
ऋतुकालाभिगामी यो ब्रह्मचार्य्येव सम्मतः ॥ ३७ ।
न गच्छति च यः क्रोधान्मोहाद्वा पुरुषाधमः ।
ऋतौ ऋतौ भ्रूणहत्यां प्राप्नोति पुरुषश्चरन् ॥ ३८ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
ज्ञानन्तु चित्तयोगस्य कर्म्मयोगस्य यत्क्रिया* ॥ ३९ ।

---

* एवं हि समापकक्रियान्तरमपेक्षते, यत् क्रियामिति कृते तस्य च शृणुष्वेत्यनेनान्व न दोषः ।

कर्म्मणा यान्ति मत्स्थानं यान्ति मद्ध्याननिष्ठिताः ।
यान्ति योगविदः स्थानं नास्ति चान्या परा गतिः ॥ ४० ।
ज्ञानं योगञ्च साङ्ख्यञ्च नास्ति चित्तव्यपाश्रितम् ।
लभन्ते पुष्कलां सिद्धिं मम मार्गानुसारिणः ॥ ४१ ।
यस्तु भागवतो भूत्वा ऋतुकाले व्यवस्थितः ।
वायुभक्षस्ततस्तिष्ठेद्भूमे त्रीणि दिनानि च ॥ ४२ ।
अथ तत्र चतुर्थे तु दिने प्राप्ते वसुन्धरे ।
कृत्वा वै सिद्धिकर्म्माणि न गच्छत्यपराणि च ॥ ४३ ।
ततः स्नानेन कुर्व्वीत शिरसोमलशोधनम् ।
शुक्लाम्बरधरोभूत्वा चित्तङ्कृत्वा समाहितम् ॥ ४४ ।
ततोबुद्धिं मनश्चैव समङ्कृत्वा वसुन्धरे ।
पश्चात्कुर्व्वन्ति कर्म्माणि सदा ते मे हृदि स्थिताः ॥ ४५ ।
मम प्रापणकङ्कृत्वा ततः कुर्व्वन्ति भोजनम् ।
अञ्जलिं शिरसा कृत्वा मयोक्तं कर्म्म सम्मितम्* ॥ ४६ ।
तत्र मन्त्रः—आदिर्भवान्गुप्तमनन्तमध्यो
　　रजस्वला देव वयं नमामः ।
　　उपोषितास्त्रीणि दिनानि चैवं
　　मुक्तौ रतं† वासुदेवं नमामः ॥ ४७ ।
तत एतेन मन्त्रेण शुद्धा भूमे रजस्वलाः ।
ये तु कुर्व्वन्ति कर्म्माणि स्नातास्नातानि भागशः ॥ ४८ ।

---

* कर्म्म संज्ञितमिति (ग) ।　† मुक्तौ रतमिति (ग) ।

एवं न दृश्यते देवि नारी वा पुरुषोऽपि वा ।
कुर्व्वन्ति मम कर्म्माणि ते यथावन्मम प्रियाः ॥ ४९ ।
सर्व्वाण्यनुदिनभद्रे मम चित्तानुसारिणः ।
प्राप्नुयात्पुरुषः स्त्री वा रजसा दूषिता अपि ॥ ५० ।
एकचित्तस्ततो भूत्वा भूमे चेन्द्रियनिग्रहात् ।
मम योगेष्टसन्न्यासं यदीच्छेत्परमाङ्गतिम् ॥ ५१ ।
एवङ्कुर्व्वन्ति ये नित्यं स्त्रियः पुंसोनपुंसकाः ।
ज्ञाने सत्यप्ययोगानां मम कर्म्मसु कर्म्मिणाम् ॥ ५२ ।
अद्यापि मां न जानन्ति नराः संसारसंस्थिताः ।
ते वै भूमे विजानन्ति* ये मद्भक्त्या व्यवस्थिताः ॥ ५३ ।
मातापितृसहस्राणि पुत्रदारशतानि च ।
चक्रवत्परिवर्त्तन्ते यन्मोहान्मां न जानते ॥ ५४ ।
अज्ञानेनावृतो लोको मोहेन च वशीकृतः ।
सङ्गैश्च बहुभिर्बद्धस्तेन चित्तं न सन्न्यसेत् ॥ ५५ ।
अन्यत्र गच्छते† माता पिता चान्यत्र गच्छति ।
पुत्राश्चान्यत्र गच्छन्ति दासश्चान्यत्र गच्छति ॥ ५६ ।
जायन्ते चात्मनः स्थाने स्वस्वकर्म्मसमुद्भवे ।
ज्ञानमूढ़ा वरारोहे नराः संसारमोहिताः ॥ ५७ ।
अल्पकालं परश्चैव माससंवत्सरेति च ।
भविष्यन्ति पुनः कृत्वा न मे मूर्त्यां सहासते ॥ ५८ ।

---

* विजानन्त इति (क) (ख) । † गच्छतीति साधु ।

यस्यैतद्विदितं सर्व्वं न्यासयोगं वसुन्धरे।
योगे न्यस्य सदात्मानं मुच्यते न च संशयः॥ ५९।
य एतच्छृणुयान्नित्यं कल्यमुत्थाय मानवः।
पुष्कलां लभते सिद्धिं मम लोकञ्च गच्छति॥ ६०।
एतत्ते कथितम्भद्रे रहस्यम्परमं महत्।
त्वया पृष्टञ्च यद्देवि मम भक्तसुखावहम्॥ ६१।

इति वराहपुराणे भगवच्छास्त्रे गुह्यकर्ममाहात्म्यवर्णनं नाम
द्वाचत्वारिंशदधिकशततमोऽध्यायः।

त्रयश्चत्वारिंशदधिकशततमोऽध्यायः।

वराह उवाच।

पुनरन्यत्प्रवक्ष्यामि एकान्तं शृणु सुन्दरि।
स्थानं मे परमं गुह्यं मद्भक्तानां सुखावहम्॥ १।
जाह्नव्या दक्षिणे कूले विन्ध्यपृष्ठसमाश्रितम्।
मन्दारेति* च विख्यातं सर्व्वभागवतप्रियम्॥ २।
तत्र त्रेतायुगे भूमे रामो नाम महाद्युतिः† ।
भविष्यति न सन्देहः स च मां स्थापयिष्यति॥ ३।

---

* मन्दारमितीति साधु, एवं परत्र। † महाकृतिरिति (क), (ख)।

नारायणमुखाच्छ्रुत्वा धर्म्मकामा वसुन्धरा ।
उवाच मधुरं वाक्यं लोकनाथं जनार्द्दनम् ॥ ४ ।

धरण्युवाच ।

देव देव महादेव हरे नारायण प्रभो ।
मन्दारेति त्वया प्रोक्तं देव धर्म्मार्थसंयुतम् ॥ ५ ।
मन्दारे कानि कर्म्माणि कुर्व्वन्ति च ततो नराः ।
कांश्च लोकान् प्रपद्यन्ते तत्र कर्म्मकृतो नराः ॥ ६ ।
मन्दारे कानि गुह्यानि रहस्यञ्चिच्च तत्र वै ।
वक्तुमर्हस्यशेषेण परङ्कौतूहलं मम ॥ ७ ।

वराह उवाच ।

शृणु सुन्दरि यत्नेन यन्मात्वम्परिपृच्छसि ।
कथयिष्यामि ते गुह्यां मन्दारस्य महाक्रियाम् ॥ ८ ।
क्रीड़मानोऽस्म्यहं तत्र मन्दारे पुष्पिते तदा ।
मन्दारपुष्पमादाय मनोज्ञं न्यस्य वै हृदि ॥ ९ ।
ततो ममाभवच्चिन्ता मन्दारे पर्व्वतस्थिते ।
तत्रैकादशकुण्डानि निःसृतानि गिरौ धरे ॥ १० ।
विन्ध्ये च मत्प्रभावेण मन्दारश्च महाद्रुमः ।
स्थितोऽहं तत्र सुभगे भक्त्यानुग्रहकामया ॥ ११ ।
दर्शनीयतमं स्थानं मनोज्ञञ्च शिलातलम् ।
यत्र तिष्ठाम्यहं देवि मन्दारद्रुममाश्रितः ॥ १२ ।
विस्मयं शृणु सुश्रोणि मन्दारेऽस्मिन्महाद्रुमे ।
द्वादश्याञ्च चतुर्द्दश्यां स पुष्पति महाद्रुमः ॥ १३ ।

तत्र मध्याह्नवेलायां वीक्ष्यमाणोजनैस्ततः ।
ततोऽन्यदिनमासाद्य दृश्यते न कदाचन ॥ १४ ।
तस्मिन्मन्दारकुण्डे तु एकभक्तोषितो नरः ।
स्नानङ्करोति शुद्धात्मा स गच्छेत्परमाङ्गतिम् ॥ १५ ।
अथ प्राणान्प्रमुच्येत कुण्डे मन्दारसंस्थिते ।
तपः कृत्वा वरारोहे मम लोकाय गच्छति ॥ १६ ।
तस्य चोत्तरपार्श्वे च प्रापणं नाम तद्गिरिम् ।
तिस्रो धाराः पतन्त्यत्र दक्षिणां दिशमाश्रिताः ॥ १७ ।
स्नानकुण्डमिति ख्यातं तस्मिन् क्षेत्रे परं मम ।
दक्षिणे पतते* धारा स्रवते चोत्तरामुखम् ॥ १८ ।
तत्र स्नातो वरारोहे एकरात्रोषितो नरः ।
मोदनं दक्षिणे शृङ्गे तस्मिन्मेरौ शिलोच्चये ॥ १९ ।
तत्राथ मुञ्चयेत्प्राणान्मम† कर्मपरायणः ।
सर्व्वसङ्गम्परित्यज्य मम लोकाय गच्छति ॥ २० ।
तस्य पूर्व्वोत्तरे पार्श्वे गुह्यं वैकुण्ठकारणम् ।
यत्र धारा पतत्येका हरिद्रावर्णसन्निभा ॥ २१ ।
यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः ।
नाकपृष्ठं समासाद्य मोदते सह दैवतैः ॥ २२ ।
तथाऽत्र‡ मुञ्चते प्राणान् कृतकृत्यः सुनिश्चितः ।

---

* पततीति साधु, एवं परत्र । † मोचयेदिति साधु । मुञ्चते प्राणान्ममेति (ग) ।
‡ तत्राथेति (ग) ।

तारयित्वा कुलं सर्व्वं मम लोकम्प्रपद्यते ॥ २३ ।
तस्य दक्षिणपूर्व्वेण समस्रोतो वराङ्गणे ।
पतति विन्ध्यशृङ्गेषु अगाधश्च महाह्रदः ॥ २४ ।
तत्र स्नानन्तु कुर्व्वीत एकभक्तोषितो नरः ।
मोदते पूर्व्वपार्श्वे तु तस्मिन्मेरौ शिलोच्चये ॥ २५ ।
अथात्र मुञ्चते प्राणान्मम चित्तव्यवस्थितः ।
छित्त्वा वै सर्व्वसंसारं मम लोकाय गच्छति ॥ २६ ।
मन्दारस्य तु पूर्व्वेण गुह्यकोटरसंस्थितम् ।
यत्र धारा पतत्येका मुसलेन समन्विता ॥ २७ ।
तत्र स्नानम्प्रकुर्व्वीत पञ्चभक्तोषितो नरः ।
मोदते पूर्व्वपार्श्वे च मेरौ तस्मिञ्छिलोच्चये ॥ २८ ।
अथात्र मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
मेरुशृङ्गं समुत्सृज्य मम लोकञ्च गच्छति ॥ २९ ।
तस्य दक्षिणपार्श्वे तु गुह्यं विन्ध्यविनिःसृतम् ।
पञ्च धाराः पतन्त्यत्र मुसलेन समन्विताः ॥ ३० ।
तत्र स्नानम्प्रकुर्व्वीत अहोरात्रोषितो नरः ।
मोदते दक्षिणे शृङ्गे महामेरौ शिलोच्चये ॥ ३१ ।
अथात्र मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
मेरुशृङ्गं परित्यज्य मम लोकम्प्रपद्यते* ॥ ३२ ।
दक्षिणे पश्चिमे भागे मन्दारस्य यशस्विनि ।

---

* मेरुशृङ्गं परित्यज्य मम लोकञ्च गच्छतीति (ग) ।

अत्र धारा पतत्येका आदित्यसमतेजसा ॥ ३३ ।
तत्र स्नानं प्रकुर्व्वीत अहोरात्रोषितो नरः ।
मोदते पश्चिमे भागे भुवो यत्र प्रवर्त्तते ॥ ३४ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मव्यवस्थितः ।
सर्व्वपापविनिर्मुक्तो मम लोके च मोदते ॥ ३५ ।
तस्य पश्चिमपार्श्वे तु गुह्यं देवसमन्वितम् ।
चक्रावर्त्तमिति ख्यातमगाधश्च महाह्रदः ॥ ३६ ।
स्नानङ्करोति यस्तत्र पञ्चभक्तोषितो नरः ।
मोदते मेरुशृङ्गेषु स्वच्छन्दगमनालयः ॥ ३७ ।
अथ वै मुञ्चते प्राणांश्चक्रवर्त्ती महायशाः ।
शृङ्गान्सर्व्वान् परित्यज्य मोदते मम सन्निधौ ॥ ३८ ।
दिशं वायव्यमाश्रित्य तस्मिन्विन्ध्यशिलोच्चये ।
तिस्रो धाराः पतन्त्यत्र मुसलाकृतयः शुभाः ॥ ३९ ।
तत्र स्नानम्प्रकुर्व्वीत मम चित्तव्यवस्थितः ।
मोदते सर्व्वशृङ्गेषु एकचित्तं समाश्रितः ॥ ४० ।
अथात्र मुञ्चते प्राणान्तस्मिन् गुह्ये यशस्विनि ।
सर्व्वसङ्गम्परित्यज्य मम लोकाय गच्छति ॥ ४१ ।
तस्य विक्रोशमात्रेण दक्षिणां दिशमाश्रितः ।
गुह्यो गभीरको नाम अगाधश्च महाह्रदः ॥ ४२ ।
तत्र स्नानम्प्रकुर्व्वीत अष्टभक्तोषितो नरः ।
मोदते सर्व्वद्वीपेषु स्वच्छन्दगमनालयः ॥ ४३ ।
अथ वै मुच्यते प्राणान्मम कर्म्मव्यवस्थितः ।

सर्व्वद्वीपान् परित्यज्य मम लोकम्प्रपद्यते ॥ ४४ ।
तस्य पश्चिमपार्श्वे तु गुह्यं वै परमं महत् ।
सप्त धाराः पतन्त्यत्र अगाधस्य महाह्रदः ॥ ४५ ।
तत्र स्नानम्प्रकुर्व्वीत अहोरात्रोषितो नरः ।
मोदते शक्रलोके तु स्वच्छन्दगमनालयः ॥ ४६ ।
अथ वै मुञ्चते प्राणान् स्वकर्म्मपरिनिष्ठितः ।
सर्व्वसङ्गम्परित्यज्य मम लोकम्प्रपद्यते ॥ ४७ ।
मण्डलं तस्य चेत्रस्य कथ्यमानं मया शृणु ।
समन्तपञ्चकञ्चैव मन्दारस्य गिरौ मम ।
तत्र तिष्ठामि सुश्रोणि विन्ध्यस्य गिरिमूर्द्धनि ॥ ४८ ।
मन्दारे परमं गुह्यं तस्मिन् गुह्यशिलोच्चये ।
दक्षिणे संस्थितञ्चक्रं वामे स्थाने च वै गदा ॥ ४९ ।
य एतच्छृणुयान्नित्यं गुह्यं मन्दारसंस्थितम् ।
लाङ्गले मुसलञ्चैव शङ्खस्तिष्ठति चाग्रतः ।
तव चैव प्रियार्थाय मम भक्तसुखावहम् ॥ ५० ।
एतन्न जानते केचिन्मम मायाविमोहिताः ।
मुच्यः* भागवताञ्छुद्रान्ये च वाराहसंश्रिताः ॥ ५१ ।

इति वराहपुराणे भगवच्छास्त्रे मन्दारमहिमवर्णनो नाम

त्रयश्चत्वारिंशदधिकशततमोऽध्यायः ।

---

* मुक्तेति साधु ।

Páli Grammar, (English) Fasc. I and II @ /6/ each	0	12
Prákrita Lakshanam, (Sans.) Fasc. I	1	8
Parásara Smriti (Sans.) Fasc. I—VII @ /6/ each Rs.	2	10
Srauta Sútra of Apastamba, (Sans.) Fasc I—XII @ /6/ each	4	8
Srauta Sútra of Ásvaláyana, (Sans.) Fasc. I—XI @ /6/ each	4	2
Ditto *Látyáyana* (Sans.) Fasc. I—IX @ /6/ each	3	6
Ditto Sánkhyáyana (Sans.) Fasc. I—V @ /6/ each	1	14
Sáma Veda Samhitá, (Sans.) Vols I, Fasc. 1—10 ; II, 1—6 ; III, 1—7 ; IV, 1—6 ; V, 1—8, @ /6/ each Fasc.	13	14
Sáhitya Darpana, (English) Fasc. I—IV @ /6/ each	1	8
Sánkhya Sútra Vritti (Sans.) Fasc. I	0	6
Sánkhya Aphorisms of Kapila, (English) Fasc. I and II @ /6/ each	0	12
Súrya Siddhánta, (Sans.) Fasc. IV	0	6
Sarva Darśana Sangraha, (Sans.) Fasc. II	0	6
Sankara Vijaya, (Sans.) Fasc. II and III @ /6/ each	0	12
Sánkhya Pravachana Bháshya, (English preface only) Fasc. III	0	6
Sánkhya Sára, (Sans.) Fasc. I	0	6
Srí Bháshyam, Fasc. I	0	6
Suśruta Samhitá, (Eng.) Fasc. I and II @ /12/ each	1	8
Taittiríya Áranya, (Sans.) Fasc. I—XI @ /6/ each	4	2
Ditto Bráhmana, (Sans.) Fasc. I—XXIV @ /6/ each	9	0
Ditto Samhitá, (Sans.) Fasc. I—XXXIV @ /6/ each	12	12
Ditto Prátiśákhya, (Sans.) Fasc I—III @ /6/ each	1	2
Ditto and Aitareya Upanishads, (Sans.) Fasc. II and III @ /6/ each	*0*	12
Tándya Bráhmana, (Sans.) Fasc. I—XIX @ /6/ each	7	2
Tattva Chintámani, (Sans.) Fasc. I—X @ /6/ each	3	12
Tulśí Satśí, Fasc. I	0	6
Uttara Naishadha, (Sans.) Fasc. III—XII @ /6/ each	3	12
Uvás-agádasáo, Fasc. I—IV @ /12/ each	3	0
Varáha Purána, (Sans.) Fasc. I—VIII @ /6/ each	3	0
Váyu Purána, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—7, @ /6/ each Fasc.	4	14
Vishnu Smriti, (Sans.) Fasc. I—II @ /6/ each	0	12
Vivádaratnákara (Sans.) Fasc. I—VII @ /6/ each	2	10
Vrihannáradíya Purána, (Sans.) Fasc. I—V @ /6/ each	1	14
Yoga Sútra of Patanjali, (Sans. & English) Fasc. I—V @ /14/ each	4	6
The same, bound in cloth	5	2

Arabic and Persian Series.

'Álamgírnámah, with Index, (Text) Fasc. I—XIII @ /6/ each	4	14
Áín-i-Akbarí, (Text) Fasc. I—XXII @ 1/ each	22	0
Ditto (English) Vol. I (Fasc. I—VII) 1/12 each	12	4
Akbarnámah, with Index, (Text) Fasc. I—XXXVII @ 1/ each	37	0
Bádsháhnámah, with Index, (Text) Fasc. I—XIX @ /6/ each	7	2
Beale's Oriental Biographical Dictionary, pp. 291, 4to., thick paper, @ 4/12 ; thin paper	4	8
Dictionary of Arabic Technical Terms and Appendix, Fasc. I—XXI @ 1/ each	21	0
Farhang-i-Rashídí (Text), Fasc. I—XIV @ 1/ each	14	0
Fihrist-i-Túsí, or, Túsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each	3	0
Futúh-ul-Shám Wáqidí, (Text) Fasc. I—IX @ /6/ each	3	6
Ditto Ázádí, (Text) Fasc. I—IV @ /6/ each	1	8
Haft Ásmán, History of the Persian Mansawi, (Text) Fasc. I	0	12
History of the Caliphs, (English) Fasc. I—VI @ 12/ each	4	8
Iqbálnámah-i Jahángírí, (Text) Fasc. I—III @ /6/ each	1	2
Isabáh, with Supplement, (Text) 49 Fasc. @ /12/ each	36	12
Ma'sir-ul-Umara, Vol. I, Fasc. I—IX ; Vol. II, I—V @ /6/ each	5	4
Maghází of Wáqidí, (Text) Fasc. I—V @ /6/ each	1	14
Muntakháb-ul-Tawáríkh, (Text) Fasc. I—XV @ /6/ each	5	10
Muntakhab-ul Tawáríkh, (English) Vol. II, Fasc. I—IV @ /12/ each	3	0
Muntakhab-ul-Lubáb, (Text) Fasc. I—XIX @ /6/ each	7	2
Mu'ásir-'Álamgírí, (Text), Fasc. I—VI @ /6/ each	2	4
Nukhbat-ul-Fikr, (Text) Fasc. I	0	6

(*Turn over.*)

Nizámí's Khiradnámah-i-Iskandarí. (Text) Fasc. I and II @ /12/ each 1 8
Suyúty's Itqán, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. II—IV. VII—X @ 1/ each 7 0
Tabaqát-i Násirí, (Text) Fasc. I—V @ /6/ each 1 14
Ditto (English) Fasc. I—XIV @ /12/ each 10 8
Táríkh-i-Fíróz Sháhi. (Text) Fasc. I—VII @ /6/ each 2 10
Táríkh-i-Baihaqí. (Text) Fasc. I—IX @ /6/ each 3 6
Táríkh-i Firozshahí. Fasc. I—IV @ /6/ each 1 8
Wis o Rámín, (Text) Fasc. I—V @ /6/ each 1 14
Zafarnámah, Vol. I. Fasc. I—IX ; Vol. II, Fasc. I—VIII @/6/ each 6 6

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. VII. IX to XI ; Vols XIII and XVII, and Vols. XIX and XX @ /10/ each Rs. 80 0
   Ditto Index to Vols. I—XVIII 5 0
2. Proceedings of the Asiatic Society from 1865 to 1865 (incl.) @ /4/ per No. ; and from 1870 to date @ /6/ per No
3. Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1849 (12), 1850 (7), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non Subscribers; and for 1851 (7), 1857 (6), 1858 (5), 1861 (4) 1864 (5), 1865 (8), 1866 (7), 1867 (6), 1868 (6), 1869 (8) 1870 (8), 1871 (7) 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878, (8), 1879 (7), 1880 (8), 1881 (7). 1882 (6), 1883 (5). 1884 (6), 1885 (6), 1886 (8) @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers.

N. B. The figures enclosed in brakets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784—1883..3 0
   General Cunningham's Archæological Survey Report for 1863-64 (Extra No. J. A. S. B 1864) 1 8
   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868) 1 8
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No, J. A. S. B., 1875) 3 0
   Sketch of the Turki Language as spoken in Eastern Turkestan, Part II, Vocabulary, by R. B. Shaw (Extra No., J. A. S. B., 1878) 3 0
   A Grammar and Vocabulary of the Northern Balochí Language, by M. L. Dames (Extra No., J. A. S. B., 1880) 3 0
   Introduction to the Maithilí Language of North Bihár, by G. A. Grierson, Part I, Grammar (Extra No., J. A. S. B., 1880) .. 1 8
   Part II, Chrestomathy and Vocabulary (Extra No., J.A.S.B., 1882) 3 0
5. Anis-ul-Musharrihi 3 0
6. Catalogue of Fossil Vertebrata 2 0
7. Catalogue of the Library of the Asiatic Society, Bengal .. 3 8
8. Examination and Analysis of the Mackenzie Manuscripts by the Rev. W. Taylor 2 0
9. Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis .. 1 8
10. Istiláhát-us-Súfíyah, edited by Dr. A. Sprenger, 8vo. .. 1 0
11. Ináyah, a Commentary on the Hidáyah, Vols. II and IV, @16/ each 32 0
12. Jawámi-ul-'ilm ir-riyází, 168 pages with 17 plates, 4to. Part I 2 0
13. Khizánat-ul-'ilm 4 0
14. Mahábhárata, Vols. III and IV, @ 20/ each 40 0
15. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—II, with 5 coloured Plates, 4to. @ 6/ each .. 12 0
16. Puráṇa Sangraha, I (Márkaṇḍeya Puráṇa), Sanskrit .. 1 0
17. Sharaya-ool-Islám 4 0
18. Tibetan Dictionary 10 0
19. Ditto Grammar 8 0
20. Vuttodaya, edited by Lt.-Col. G. E. Fryer 2 0
    Notices of Sanskrit Manuscripts, Fasc. I—XXII @ 1/ each .. 22 0
    Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra .. 5 0

N. B. All cheques, Money Orders &c. must be made payable to the "Treasurer Asiatic Society" only.

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 710.

वराहपुराणम् ।

THE VARÁHA PURĀṆA

EDITED BY

PAṆḌIT HṚISHÍKESÁ SÁSTRÍ

Professor, Sanskrit College, Calcutta.

FASCICULUS IX.

CALCUTTA:

PRINTED BY ŚAŚIBHÚSHAṆA BHAṬṬÁCHÁRYYA, AT THE GIRIŚA-VIDYÁRATNA PRESS,

24, GIRIŚA-VIDYÁRATNA'S LANE, UPPER CIRCULAR ROAD.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1889.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL

No. 57, PARK STREET, CALCUTTA.

AND OBTAINABLE FROM

THE SOCIETY'S LONDON AGENTS, MESSRS. TRÜBNER & CO.

57 AND 59, LUDGATE HILL, LONDON, E. C.

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, Fasc. I—II @ /6/ each 0 1
Átharvaṇa Upanishads, (Sanskrit) Fasc. I—V @ /6/ each .. Rs. 1 1
Áśvaláyana Grihya Sútra, (Sans.) Fasc. II—IV @ /6/ each .. 1
Agni Puráṇa, (Sans.) Fasc I—XIV @ /6/ each 5
Aitareya Áraṇyaka of the Rig Veda, (Sans.) Fasc. I—V @ /6/ each 1 1
Anu Bháshyam, Fasc. I 0
Aphorisms of Śáṇḍilya, (English) Fasc. I 0
Aphorisms of the Vedánta, (Sans.) Fasc. III, V—XIII @ /6/ each .. 3 1
Ashtasáhasriká Prajñápáramitá, Fasc I—VI @ /6/ each 2
Aśvavaidyaka, (Sans.) Fasc I—III @ /6/ each 1
Avadána Kalpalatá, by Kshemendra (Sans. & Tibetan) Fasc. I .. 1
Brahma Sútras, (English) Fasc. I 0 1
Bhámatí, (Sans.) Fasc. I—VIII @ /6/ each 3
Brihad Áraṇyaka Upanishad, (Sans.) Fasc. VI, VII & IX @ /6/ each 1
Ditto (English) Fasc. II—III @ /6/ each 0 1
Brihaddharma Puráṇa, Fasc. I—II @ /6/ each 0 1
Brihat Saṃhitá, (Sans.) Fasc. II—III, V—VII @ /6/ each .. 1 1
Chaitanya-Chandrodaya Nátaka, (Sans.) Fasc. II—III @ /6/ each 0 1
Chaturvarga Chintámaṇi, (Sans.) Vol. I, Fasc. 1—11 ; Vol. II, 1—25 ; Vol. III. Part I, 1—19, Part II, 1—3 @ /6/ each Fasc. 21
Chhándogya Upanishad, (English) Fasc. II 0 6
Daśa Rúpa, (Sans.) Fasc. II—III @ /6/ each 0 12
Gopatha Bráhmaṇa (Sans. & Eng.) Fasc. I and II @ /6/ each .. 0 12
Gobhilíya Grihya Sútra, (Sans.) Fasc. I—XII @ /6/ each .. 4 8
Hindú Astronomy, (English) Fasc. I—III @ /6/ each .. 1 2
Institutes of Paráśara 0 6
Kátantra, (Sans.) Fasc. I—VI @ /12/ each 4 8
Kathá Sarit Ságara, (English) Fasc. I—XIV @ /12/ each 10 2
Kála Mádhava, (Sans.) Fasc. I—IV, @ /6/ each 1 8
Kausítaki Bráhmaṇopanishads, Fasc. II 0 6
Kúrma Puráṇa, (Sans.) Fasc. I—VIII @ /6/ each 3 0
Lalita Vistara, (Sans.) Fasc. II—VI @ /6/ each 1 14
Ditto (English) Fasc. I—III @ /12/ each 2 4
Madana Párijáta, (Sans.) Fasc. I—V @ /6/ 1 14
Manutiká Saṅgraha, Fasc. I—II @ /6/ each 0 12
Mímáṃsá Darśana, (Sans.) Fasc. II—XIX @ /6/ each 6 12
Márkaṇḍeya Puráṇa Fasc. I 0 6
Márkaṇḍeya Puráṇa, (Sans.) Fasc. IV—VII @ /6/ each 1 8
Nyáyavártikam, Fasc. I 0 6
Nrisiṃha Tápaní, (Sans.) Fasc. I—III @ /6/ each 1 2
Nirukta, (Sans.) Vol I, Fasc. 1—6 ; Vol. II, Fasc. 1—6 ; Vol. III, Fasc. 1—6 ; Vol. IV, I—IV @ /6/ each 8 4
Nárada Pancharátra, (Sans.) Fasc. IV @ /6/ each 0 6
Nárada Smriti (Sans.) Fasc. I & II @ /6/ each 0 12
Nítisára, or, The Elements of Polity, By Kámandaki (Sans.) Fasc. II—V 1 8
Nyáya Darśana, (Sans.) Fasc. III @ /6/ each 0 6
Nyáya Kusumáñjali, (Sans.) Fasc. I—II 0 12
Pariśishtaparvan, (Sans.) Fasc. I—IV @ /6/ each 1 8
Pingala Chhandaḥ Sútra, (Sans.) Fasc. II—III @ /6/ each .. 0 1
Prithiráj Rásau, (Hindi) Fasc. I—VI @ /6/ each 2 4
Ditto (English) Fasc. I 0 12

(Continued on the third page of cover.)

चतुश्चत्वारिंशदधिकशततमोऽध्यायः ।

सूत उवाच ।

श्रुत्वा मन्दारमाहात्म्यं धर्म्मकामा वसुन्धरा ।
विस्मयम्परमङ्गत्वा पुनः पप्रच्छ माधवम् ॥ १ ।

धरण्युवाच ।

मया देवप्रसादेन श्रुतं मन्दारवर्णनम् ।
मन्दारात्परमं स्थानं विष्णो तद्वक्तुमर्हसि ॥ २ ।

वराह उवाच ।

शृणु तत्त्वेन मे देवि यन्मान्त्वं परिपृच्छसि ।
कथयिष्यामि मे गुह्यं शालग्राममिति स्मृतम् ॥ ३ ।
द्वापरे तु युगे भूमे यदूनाङ्कुलसङ्कुले ।
तत्र शूर इति ख्यातो यदूनां वंशवर्द्धनः ॥ ४ ।
तस्य पुत्रो महाभागे सर्व्वकर्म्मपरायणः ।
वसुदेवो गृहे जातो यादवानां कुलोद्वहः ॥ ५ ।
तस्य भार्य्या च वसुधे सर्व्वावयवसुन्दरी ।
देवकी नाम नाम्ना च मनोज्ञा शुभदर्शना ॥ ६ ।
तस्या गर्भे महाभागे भविष्यामि न संशयः ।
वासुदेव इति ख्यातो देवानामरिमर्द्दनः ॥ ७ ।
ततोऽपि संस्थिते तत्र यादवानां कुलोद्वहे ।
तत्र ब्रह्मर्षिपरमः सालङ्कायन एव च ॥ ८ ।
ममैवाराधनार्थाय भ्रमते स दिशो दश ।

पुत्त्रार्थं स तपस्तेपे मेरुशृङ्गे समाहितः ॥ ९ ॥
ततः पिण्डाकरे गत्वा मम क्षेत्रे वसुन्धरे ।
लोहार्गले ततो गत्वा सहस्रञ्चैव तिष्ठति ॥ १० ।
ईश्वरेण समं पूर्व्वं* सर्व्वयोगेश्वरं स्थितम् ।
न च मां पश्यते† देवि मार्गमाण इतस्ततः ॥ ११ ।
ईश्वरेण समम्पूर्व्वमहमासं वसुन्धरे ।
तस्यैव तप्यमानस्य सालङ्कायनकस्य ह ॥ १२ ।
तस्मिन् क्षेत्रे हरो देवो मत्स्वरूपेण संयुतः ।
शालग्रामे गिरौ तस्मिञ्छिलारूपेण तिष्ठति ॥ १३ ।
अहन्तिष्ठामि तत्रैव गिरिरूपेण नित्यदा ।
तस्मिञ्छिलाः समग्रास्तु मत्स्वरूपा न संशयः ।
पूजनीयाः प्रयत्नेन किं पुनश्चक्रलाञ्छिताः ॥ १४ ।
लिङ्गरूपेण च हरस्तत्र देवालये गिरौ ।
शिवनाभाः शिलास्तत्र चक्रनाभास्तथा शिलाः ॥ १५ ।
सोमेश्वराधिष्ठितस्तु शिवरूपो गिरिः स्मृतः ।
सोमेन तत्र संस्थाप्य स्वनाम्ना लिङ्गमुत्तमम् ।
वर्षाणान्तु सहस्रं वै स्वशापस्य निवृत्तये ॥ १६ ।
ततः शापा‡द्विनिर्मुक्तः तेजसा च परिप्लुतः ।
स्वकं तेजो बलम्प्राप्य तुष्टाव गिरिजापतिम् ।
सोमेश्वराच्च वरदमाविर्भूतन्त्रियम्बकम् ॥ १७ ।

---

* पुनमिति (ग) । † पश्यतीति साधु । ‡ ततः चयादिति (क), (ख) ।

सोम उवाच।

शिवं सौम्यमुमाकान्तभक्तानुग्रहकातरम्।
नतोऽस्मि पञ्चवदनं नीलकण्ठं त्रिलोचनम्॥ १८।
शशाङ्कशेखरन्दिव्यं सर्व्वदेवनमस्कृतम्।
पिनाकपाणिं देवेशं भक्तानामभयप्रदम्॥ १९।
त्रिशूलिनं डमरुणा लसद्धस्तं वृषध्वजम्।
नानामुखैर्गणैर्जुष्टं नानारूपैर्भयानकैः॥ २०।
त्रिपुरघ्नं महाकालमन्धकारिनिषूदनम्।
गजाजिनावृतं स्थाणुं व्याघ्रचर्म्मविभूषितम्॥ २१।
नागभोगोपवीतञ्च रुद्रमालधरम्प्रभुम्।
अरूपमपि सर्व्वेशं भक्तेच्छोपात्तविग्रहम्॥ २२।
वह्निसोमार्कनयनं मनोवाचामगोचरम्।
जटाजूटप्रकटितं गङ्गासम्मार्ज्जितांहसम्।
कैलासनिलयं शम्भुं हिमाचलकृताश्रमम्॥ २३।
एवं स्तुतस्तदा शम्भुरिन्दुं वचनमब्रवीत्।
वरं वरय भद्रन्ते यत्ते मनसि वर्त्तते।
दुर्लभं दर्शनं यस्मात्तत्प्राप्तवानसि गोपते॥ २४।

सोम उवाच।

वरन्ददासि चेद्देव मम लिङ्गे सदा वस।
एतल्लिङ्गस्य भक्तानां पूरयस्व मनोरथम्॥ २५।

देवदेव उवाच।

विष्णुसान्निध्यमप्यत्र सदैव निवसाम्यहम्।

विशेषतस्त्वदीयेऽस्मिन्नद्यप्रभृति गोपते ।
ममैवान्या परा मूर्त्तिस्त्वं शशाङ्क न संशयः ॥ २६ ।
एतल्लिङ्गार्च्चकानाञ्च भक्तानां मम सर्व्वदा ।
वरान्दास्यामि भद्रन्ते देवानामपि दुर्लभान् ॥ २७ ।
सालङ्कायनकाख्यस्य मुनेस्तु तपसो बलात् ।
विष्णुना सह संमन्त्र्य स्थितावावां कलानिधे ॥ २८ ।
शालग्रामगिरिर्विष्णुरहं सोमेश्वराभिधः ।
तयोः पर्व्वतयोर्या वै शिला विष्णुशिवाभिधाः ॥ २९ ।
रेवया च कृतं पूर्व्वन्तपः शिवसुतुष्टिदम् ।
मम त्वत्सदृशः पुत्त्रो भूयादिति विभूतया* ॥ ३० ।
अहङ्कस्यापि न सुतः किङ्करिष्यामि चिन्तयन् ।
रेवायास्तु वरो देयस्त्ववश्यं मृगलाञ्छन ।
निश्चित्यैवं तदा प्रोक्तः प्रसन्नेनान्तरात्मना ॥ ३१ ।
लिङ्गरूपेण ते देवि गजाननपुरस्कृतः ।
गर्भे तव वसिष्यामि पुत्त्रो भूत्वा शिवप्रिये ॥ ३२ ।
मम त्वमपरा मूर्त्तिः ख्याता जलमयी शिवा ।
शिवशक्तिविभेदेन आवामेकत्र संस्थितौ ॥ ३३ ।
एवं दत्तवरा रेवा मत्सान्निध्यमिहागता ।
रेवाखण्डमिति ख्याते ततःप्रभृति गोपते ॥ ३४ ।
गण्डक्यापि पुरा तप्तं वर्षाणामयुतं विधौ ।

---

* विभौ तया इति (क), (ख) ।

शीर्णपर्णाशनङ्कृत्वा वायुभक्षाऽप्यनन्तरम्।
दिव्यवर्षशतं तेपे* विष्णुं चिन्तयती तदा॥ ३५।
ततः साक्षाज्जगन्नाथो हरिर्भक्तजनप्रियः।
उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः॥ ३६।
गण्डकि त्वां प्रसन्नोऽस्मि तपसा विस्मितोऽनघे।
अनविच्छिन्नया भक्त्या वरं वरय सुव्रते।
किं देयन्तद्वदस्वाशु प्रीतोऽस्मि वरवर्णिनि॥ ३७।
गण्डक्यापि पुरा दृष्ट्वा शङ्खचक्रगदाधरम्।
दण्डवत्प्रणता भूत्वा ततः स्तोतुम्प्रचक्रमे॥ ३८।
अहो देव मया दृष्टो दुर्दर्शो योगिनामपि।
त्वया सर्व्वमिदं सृष्टं जगत्स्थावरजङ्गमम्॥ ३९।
तदनु त्वम्प्रविष्टोऽसि पुरुषस्तेन चोच्यसे।
त्वन्नीलोन्मीलिते विश्वे कः स्वतन्त्रोऽस्ति वै पुमान्॥ ४०।
अनाद्यन्तमपर्य्यन्तं यद्ब्रह्म श्रुतिबोधितम्।
तदेव त्वं महाविष्णो यस्त्वां वेद स वेदवित्॥ ४१।
तवैवाद्या जगन्माता या शक्तिः परमा स्मृता।
तां योगमायाप्रकृतिम्प्रधानमिति चक्षते॥ ४२।
निर्गुणः पुरुषोऽव्यक्तश्चित्स्वरूपो निरञ्जनः।
आनन्दरूपः शुद्धात्मा ह्यकर्त्ता निर्विकारकः॥ ४३।
स्वां योगमायामाविश्य कर्त्तृत्वम्प्राप्तवानसि।

---

* तत्रेति (क), (ख)।

प्रकृत्या सृज्यमानेऽस्मिन्द्रष्टा साक्षी निगद्यसे ॥ ४४ ।
प्रकृतेस्त्रिगुणैरस्मिन् सृज्यमानेऽपि नान्यथा ।
सान्निध्यमात्रतो देव त्वयि स्फुरति कारणे ॥ ४५ ।
स्फटिके हि यथा स्वच्छे जवाकुसुमरागतः ।
प्रकाश्यते त्वप्रकाशाज्ज्योतीरूपं नतास्मि तत् ॥ ४६ ।
ब्रह्माद्योऽपि कवयो न विदन्ति यथार्थतः ।
तत्कथं वेद्म्यहं मूढ़ा तव रूपं निरञ्जनम् ॥ ४७ ।
मूढ़स्य जगतो मध्ये स्थिता किञ्चिदजानती ।
त्वया स्तुता* कृता चास्मि योग्यायोग्यसविन्दती ॥ ४८ ।
तेन लोके महत्त्वञ्च त्वत्प्रसादेन चेच्छिता† ।
ययाचेऽज्ञतयोदार तन्मे दातुं त्वमर्हसि ।
दयालुरसि दीनेषु नेति मां न वद प्रभो ॥ ४९ ।
ततः प्रोवाच भगवान्देवि यद्यत्त्वमिच्छसि ।
तद्याचय वरारोहे अदेयमपि सर्व्वथा ॥ ५० ।
यद्दुर्लभं मनुष्याणां शीघ्रं याचय मां प्रति ।
मद्दर्शनमनुप्राप्य को वाऽपूर्णो मनोरथः ॥ ५१ ।
ततो हिमांशो सा देवी गण्डकी लोकतारिणी ।
प्राञ्जलिः प्रणता भूत्वा मधुरं वाक्यमब्रवीत् ॥ ५२ ।
यदि देव प्रसन्नोऽसि देयो मे वाञ्छितो वरः ।
मम गर्भगतो भूत्वा विष्णो मत्पुत्रतां व्रज ॥ ५३ ।

---

* त्वया दृष्टेति (ग) । † इच्छतीति (ग), वस्तुत इच्छन्तीति कृते सङ्गतिः स्यात् ।

ततः प्रसन्नो भगवांश्चिन्तयामास गोपते।
किं याचितं निम्नगया नित्यं मत्सङ्गलुब्धया।
दास्यामि याचितं येन लोकानां भवमोचणम्।
इत्येवं क्षपया देवो निश्चित्य मनसा स्वयम्।
गण्डकीमवदत्प्रीतः शृणु देवि वचो मम ॥ ५४ ।
शालग्रामशिलारूपी तव गर्भगतः सदा ।
स्थास्यामि तव पुत्रत्वे भक्तानुग्रहकारणात् ॥ ५५ ।
मत्सान्निध्यान्नदीनान्त्वमतिश्रेष्ठा भविष्यसि ।
दर्शनात्स्पर्शनात्स्नानात्पानाच्चैवावगाहनात् ।
हरिष्यसि महापापं वाङ्मनःकायसम्भवम् ॥ ५६ ।
यः स्नास्यति विधानेन देवर्षिपितृतर्पकः ।
तर्पयेत्स्वपितृंश्चापि तारयित्वा दिवं नयेत् ।
स्वयं मम प्रियो भूत्वा ब्रह्मलोकङ्गमिष्यति ॥ ५७ ।
यदि त्वय्युत्सृजेत्प्राणान्मम कर्मपरायणः ।
सोऽपि याति मम स्थानं यत्र गत्वा न शोचति ॥ ५८ ।
एवं दत्त्वा वरान्देव्यै तत्रैवान्तरधीयत ॥ ५९ ।
ततः प्रभृति तिष्ठामः चेत्रेऽस्मिन्छशलाञ्छन ।
अहञ्च भगवान्विष्णुर्भक्तेच्छोपात्तविग्रहः ॥ ६० ।
एवमुक्त्वा द्विजपतिमन्वगच्छत्* हरः प्रभुः ।
प्रभासयन्नुडुपतेरङ्गानि प्रममार्ज्ज ह ॥ ६१ ।

---

* मन्वगच्छेति (ग)।

शङ्करेण करेणापि नीरुजानि विधाय च ।
पश्यतस्तस्य तु विधोस्तत्रैवान्तरधीयत ॥ ६२ ।
सोमेशाद्दक्षिणे भागे बाणेनाद्रिं विभिद्य वै ।
रावणेन प्रकटिता जलधाराऽतिपुण्यदा ।
बाणगङ्गेति विख्याता या स्नाता अघहारिणी ॥ ६३ ।
सोमेशात्पूर्व्वदिग्भागे रावणस्य तपोवनम् ।
यत्र स्थित्वा त्रिरात्रेण तपसः फलमश्नुते ॥ ६४ ।
यत्र नृत्येन देवेशस्तुष्टस्तस्मै वरं ददौ ।
तेन रावणनृत्येन प्रख्यातो नर्त्तनाचलः ॥ ६५ ।
स्नात्वा तु बाणगङ्गायां दृष्ट्वा बाणेश्वरं प्रभुम् ।
गङ्गास्नानफलम्प्राप्य मोदते देववद्दिवि ॥ ६६ ।
सालङ्कायनकोऽप्याशु चेत्रे तस्मिन्परं समं ।
शालग्रामे महातीव्रमास्थितम्परमन्तपः ॥ ६७ ।
अन्यच्च ते प्रवक्ष्यामि परङ्गुह्यं वसुन्धरे ।
तप्यतस्तस्य तु मुनेरीश्वरेण समं सुतम् ।
प्राप्यामीति परं भावं ज्ञात्वा देवो महेश्वरः ।
सुन्दरन्त्वपरं रूपं धृत्वा दृष्टिसुखावहम् ।
सालङ्कायनपुत्रत्वं योगमायामुपाश्रितः ॥ ६८।६९ ।
प्राप्तोऽपि तं न जानाति दक्षिणम्पार्श्वमास्थितः* ।
मायायोगबलोपेतस्त्र्यक्षो वै शूलपाणिधृक् ।

---

* पाश्रित इति (ग) ।

रूपवान् गुणवांश्चैव वपुषादित्यसन्निभः।
स तं न ज्ञायते* जातं ममैवाराधने स्थितः॥ ७०।७१।
अथ नन्दी प्रहस्याह महादेवाज्ञया मुनिम्।
उत्तिष्ठ मुनिशार्दूल सफलस्ते मनोरथः।
त्वद्दक्षिणाङ्गाज्जातोऽस्मि पुत्रस्ते शाधि माम्प्रभो॥ ७२।
त्वया तपः समारब्धमीश्वरेण समं सुतम्।
प्राप्स्यामीति ततो मह्यं† सदृशोऽन्यो न कश्चन।
विचार्य्यैति तवाहं वै जातोऽस्मि स्वयमेव च॥ ७३।
तपसाराधयन्देवं शङ्खचक्रगदाधरम्।
प्राप्तोऽसि परमां सिद्धिं त्वत्पुत्रोऽहं यतः स्थितः॥ ७४।
श्रुत्वा तन्नन्दिनो वाक्यं प्रहृष्टवदनो मुनिः।
विस्मितस्तु तदोवाच कथं नाद्यापि मे हरिः।
दृग्गोचरत्वमायाति जातश्चेत्तपसः फलम्॥ ७५।
यावत्तं न समीक्षिष्ये तावन्न विरतन्तपः।
अहमत्रैव वत्स्यामि यावदच्युतदर्शनम्॥ ७६।
पुत्र त्वमपि योगेन मथुरां व्रज सत्वरम्।
मदाश्रमे तत्र पुण्ये धनं गोव्रजसङ्कुलम्।
आमुष्यायणमादाय शीघ्रमत्र समानय॥ ७७।
ततस्त्वाज्ञां समादाय नन्दी सत्वरमाव्रजत्।
गत्वा च मथुरान्तस्य ऋषेराश्रममीक्ष्यत‡ च।
दृष्ट्वामुष्यायणन्तत्र पृष्ट्वा नाम तमप्युत।

---

* न जानातीति साधु। † मम स्थाने मह्यमिति आर्षम्। ‡ ईक्षितेति साधु।

गृहे वित्ते च कुशलमपृच्छन्नोधनेषु च ॥ ७८ ।
सालङ्कायनशिष्योऽपि आमुष्यायणसंज्ञितः ।
सर्व्वत्र कुशलं साधो प्रभावात्तु गुरोर्मम ।
गुरोश्च कुशलं ब्रूहि कुत्रास्ते स तपोधनः ॥ ७९ ।
भवान् कुतः समायातः किमत्रागमकारणम् ।
तन्मे विस्तरतो ब्रूहि अर्घ्यश्चैवोपगृह्यताम् ॥ ८० ।
इत्युक्तः सोऽर्घ्यमादाय विश्रम्य च ततो गुरोः ।
वृत्तान्तं कथयामास स्वागमस्य च कारणम् ॥ ८१ ।
ततस्तेनैव सहितो गोधनं तत्प्रगृह्य च ।
दिनैः कतिपयैश्चैव गण्डकीतीरमाश्रितः ॥ ८२ ।
शनैरुत्तीर्य्य च ततस्त्रिवेणीं प्राप्य हर्षितः* ।
देविका नाम देवानाम्प्रभावाच्च तपस्यताम् ।
नियमार्थं समुद्भूता गण्डक्या मिलिता शुभा ॥ ८३ ।
आश्रमादपरा चासीत्पुलस्त्यपुलहाश्रमात् ।
गण्डक्या मिलिता सापि त्रिवेणी गण्डकीत्यभूत् ॥ ८४ ।
कामिकं तन्महातीर्थं पितॄणामतिवल्लभम् ।
तत्र स्थितं महालिङ्गं त्रिजलेश्वरसंज्ञितम् ।
मुक्तिभुक्तिप्रदं देवि दर्शनादघनाशनम् ॥ ८५ ।

धरण्युवाच ।

प्रयागे या त्रिवेणीति यत्र देवोमहेश्वरः ।
शूलटङ्क इति ख्यातः सोमेश इति चापरः ॥ ८६ ।

---

* हृष्टो, हर्षितो वेति साधु ।

वेणिमाधवनाम्नाऽपि यत्र विष्णुः स्वयं स्थितः।
गङ्गा च यमुना चैव सरस्वत्यपरा नदी॥ ८७।
सर्व्वेषाञ्चैव देवानामृषीणां सरसामपि।
सर्व्वेषाञ्चैव तीर्थानां समाजस्तत्र मे श्रुतः॥ ८८।
यत्राप्लुता दिवं यान्ति मृता मुक्तिं प्रयान्ति च।
तीर्थराज इति ख्यातं तत्तीर्थं केशवप्रियम्।
सैव त्रिवेणी विख्याता किमपूर्व्वां प्रशंससि॥ ८९।
एतद्गुह्यतमम्प्रोक्तं त्वया विष्णो न संशयः।
तत्कथ्यतां महाभाग लोकानां हितकाम्यया।
मय्यनुक्रोशबुद्ध्या च कृपां कुरु दयानिधे॥ ९०।

वराह उवाच।

शृणुष्व देवि भद्रं ते यद्गुह्यम्परिपृच्छसि।
अत्र ते कीर्त्तयिष्यामि सेतिहासाङ्कथां शुभाम्॥ ९१।
पुरा विष्णुस्तपस्तेपे लोकानां हितकाम्यया।
हिमालये गिरौ रम्ये देवतागणसेविते॥ ९२।
ततो बहुतिथे काले याते* सति तपस्यतः।
तीव्रन्तेजः प्रादुरासीद्येन लोकाश्चराचराः॥ ९३।
तस्योष्मणा समुद्भूतः स्वेदपूरस्तु गण्डयोः।
तेन जाता धुनी दिव्या लोकानामघहारिणी॥ ९४।
महर्लोकादयः सर्व्वे विस्मिताः सर्व्वतो दिशम्।

---

* गते सतीति (ग)।

तस्य प्रभवमिच्छन्तो ज्ञातुं नेशुः कथञ्चन ॥ ९५ ।
देवाः सर्व्वे ततो जग्मुर्ब्रह्माणम्प्रति चोत्सुकाः ।
पप्रच्छुः प्रभवन्तस्य प्रणम्य च पुनः पुनः ॥ ९६ ।
ब्रह्मापि हि न जानाति मोहितस्तस्य मायया ।
ततो देवैः समं ब्रह्मा शङ्करम्प्रत्युपस्थितः ॥ ९७ ।
तं दृष्ट्वा सहसा देवैः समेतं प्रत्युपस्थितम् ।
पप्रच्छ तं महादेवस्तदागमनकारणम् ॥ ९८ ।
ब्रह्मा तच्च महादेवम्पप्रच्छ प्रणतः स्थितः ।
अत्यद्भुतं महत्तेजः किमुद्भूतं महेश्वर ॥ ९९ ।
येन प्रत्याहता ह्यासौ जगद्दातिकरावहत् ।
किन्तु स्यात्कथमेतत्स्यात्कश्चास्य प्रभवो विभो ॥ १०० ।
शिवः क्षणं ततो ध्यात्वा ब्रह्माद्यान् प्रत्युवाच ह ।
महसोऽस्य समुत्पत्तिं महतो दर्शयामि वः ॥ १०१ ।
जगाम देवसहितः सोमः सहगणः प्रभुः ।
यत्रास्ते भगवान्विष्णुर्महता तपसान्वितः ॥ १०२ ।
उवाच परमप्रीतस्तदा शम्भुः स्मयन्निव* ।
तपस्यसि किमिच्छन्त†स्त्वं कर्त्ता जगताम्प्रभुः ।
सर्व्वाधारोऽखिलाध्यक्षस्तत्किं यत्तव दुर्लभम् ॥ १०३ ।
एवमुक्तः प्रत्युवाच प्रणम्य जगताम्प्रभुः ।
अहं लोकहितार्थाय तपस्तप्तुं समुद्यतः ॥ १०४ ।

---

* स्मयमान इवेति साधु । † इच्छन्निति साधु ।

त्वत्तो वरानभीप्सन्वै त्वद्दर्शनसमुत्सुकः।
त्वद्दर्शनमनुप्राप्य कृतार्थोऽस्मि जगत्पते ॥ १०५ ।

शिव उवाच ।

मुक्तिक्षेत्रमिदं देव दर्शनादेव मुक्तिदम् ।
गण्डस्वेदोद्भवा यत्र गण्डकी सरितां वरा ।
भविष्यति न सन्देहो यस्या गर्भे भविष्यसि ॥ १०६ ।
त्वयि स्थिते जगन्नाथे तव सान्निध्यकारणात् ।
अहं ब्रह्मा च देवाश्च ऋषिभिः सह केशव ।
सर्व्वे वेदाश्च यज्ञाश्च सर्व्वतीर्थानि चाप्युत ।
वसिष्यामः सदैवात्र गण्डक्यां जगताम्पते ॥ १०७।१०८ ।
कार्त्तिकं सकलं मासं यः स्नास्यति नरः प्रभो ।
सर्व्वपापविनिर्मुक्तो मुक्तिभागी न संशयः ॥ १०९ ।
तीर्थानां परमं तीर्थं मङ्गलानाञ्च मङ्गलम् ।
यत्र स्नानेन लभ्येत गङ्गास्नानफलं नरैः ॥ ११० ।
स्मरणाद्दर्शनात्स्पर्शान्निष्पापो जायते नरः ।
यस्यास्तत्समताङ्गान्या लभेद्गङ्गां विना नदीम् ॥ १११ ।
यत्र सा परमा पुण्या गण्डकी भुक्तिमुक्तिदा ।
अपरा देविका नाम्ना* गण्डक्या सह सङ्गता ॥ ११२ ।
पुलस्त्यपुलहौ पूर्व्वं तेपाते परमन्तपः ।
यत्र सृष्टिविधानार्थं कृत्वाश्रमपदं पृथक् ।

---

* नाम्नीति (ग) ।

सृष्टेर्विधानसामर्थ्यं यत्र लब्धं ततः परम् ॥ ११३ ।
ततोऽभूद्ब्रह्मतनया पुण्या सा सरितां वरा*।
गण्डक्या यत्र मिलिता ब्रह्मपुत्री यशस्विनी† ॥ ११४ ।
त्रिवेणी सा महापुण्या देवानामपि दुर्लभा ।
धरे जानीहि तत्क्षेत्रं योजनम्परमार्च्चितम् ॥ ११५ ।
पुरा वेदनिधेः पुत्रौ जयो विजय एव च ।
यजनाय गतौ राज्ञा हृतौ तौ कर्द्दमात्मजौ ।
तृणविन्दोः सुतौ पापौ जातौ ह्यथैव सुव्रतौ ॥ ११६ ।
यज्ञविद्यासुनिपुणौ वेदवेदाङ्गपारगौ ।
पूजयन्तौ हरिम्भक्त्या तन्निष्ठेन्द्रियमानसौ ॥ ११७ ।
ययोः पूजयतोर्नित्यं सान्निध्यं किल केशवः ।
ददाति पूजाऽवसरे भक्त्या किल वशीकृतः ॥ ११८ ।
मरुत्तेन कदाचित्तावाहूतौ कुशलौ द्विजौ ।
राज्ञा समाप्तयज्ञेन पूजयित्वा पुरस्कृतौ ॥ ११९ ।
दक्षिणाभिस्तोषयित्वा विसृष्टौ गृहमागतौ ।
विभागङ्कर्त्तुमारब्धौ पस्पर्द्धाते परस्परम् ॥ १२० ।
समो विभागः कर्त्तव्य इति ज्येष्ठोऽभ्यभाषत ।
विजयश्चाब्रवीच्चैनं येन लब्धं हि तस्य तत् ॥ १२१ ।
जयोऽब्रवीदसामर्थ्यं मन्वानो मां ब्रवीषि किम् ।
न ददासि गृहीत्वा यत्तस्माद्ग्रहत्वमाप्नुहि ॥ १२२ ।

---

* पुरा पुण्या सरिद्वरेति (ग) ।   † सर्व्वदेवसमन्विता इति (ग) ।

विजयोऽप्यब्रवीन्नूनमन्धीभूतोऽसि किन्धनैः ।
गजो भव मदान्धस्त्वं यो मामेवम्प्रभाषसे ॥ १२३ ।
एवन्तौ ग्राहमातङ्गावभूतां शापतः पृथक् ।
गण्डक्यामेव सञ्जातो ग्राहः पूर्व्वस्मृतिर्द्विजः ॥ १२४ ।
त्रिवेणीक्षेत्रमध्ये तु जयोऽभूद्वै महान् गजः ।
करिणीवैर्गजाभिश्च क्रीड़मानो वने वसन् ॥ १२५ ।
बह्वन्यब्दसहस्राणि व्यतीतानि तयोस्तदा ।
वने विहरतोर्भूमि शापमोहितयोः सतोः ॥ १२६ ।
कदाचित्स गजः स्नातुं करेणुगणसंवृतः ।
त्रिवेणीमभितो यातोऽवगाहनपरायणः ॥ १२७ ।
सिञ्चन् करेणूस्ताभिश्च सिच्यमानो जलम्पिबन् ।
स्वयञ्च पाययंस्ताश्च चिक्रीड़ प्रीतमानसः ॥ १२८ ।
एवं संक्रीड़तस्तत्र दैवयोगेन तस्य हि ।
ग्राहः सम्प्रेरितः पूर्व्वं वैरयोगमनुस्मरन् ।
जग्राह सुदृढ़म्पादं गजोऽपि च विषाणतः ।
ग्राहं विव्याध सोऽप्येनमाकर्षयत तज्जले ॥ १२९।१३०।
तयोर्युद्धं समभवदनेकाब्दं विकर्षणैः ।
आकर्षणैश्च बहुभिर्दन्तभेदैः परस्परम् ॥ १३१ ।
प्रयुद्धयोस्तयोरेवं मत्सरग्रस्तयोः सतोः ।
सत्त्वानि पीड़ितान्यासन्ननेकानि क्षयं ययुः ॥ १३२ ।
ततो जलेश्वरो राजा भगवन्तं व्यजिज्ञपत् ।
तेन विज्ञापितो देवो भगवान् भक्तवत्सलः ।

सुदर्शनेन चक्रेण ग्राहास्यं समपाटयत् ॥ १२३ ।
चिप्तं पुनः पुनस्तत्तु शिलाः सङ्घट्टयन्धरे ।
सङ्घट्टनात्तु चक्रस्य शिलाश्चक्रेण लाञ्छिताः ॥ १२४ ।
बाहुल्येन बभूवुर्हि तस्मिन् क्षेत्रे परे मम ।
वज्रकीटैश्च जातानि सन्ततानि विलोकय ॥ १२५ ।
न सन्देहस्त्वया कार्य्यस्त्रिवेणीं प्रति सुन्दरि ।
त्रिवेणीक्षेत्रमहिमा एवन्ते परिकीर्त्तितः ॥ १२६ ।
यदा च भरतो राजा पुलस्त्यस्याश्रमान्तिके ।
स्थित्वा पर्य्यचरद्विष्णुं त्रिजलेशमपूजयत् ॥ १२७ ।
ततःप्रभृति तस्यासीद्भरतेनारतिस्फुटम् ।
पुनश्च मृगदेहान्ते जड़ः स भरतोऽभवत् ॥ १२८ ।
तेनैव पूजितो यस्माज्जलेश्वर इति स्मृतः ।
यस्य सम्पूजनाद्भक्त्या योगसिद्धिः प्रजायते ॥ १२९ ।
शालग्रामे परे क्षेत्रे यदाहं सुभगे स्थितः ।
तत्र ज्ञात्वा जलेशेन स्तुतोऽहं वसुधे महि ॥ १४० ।
ततो भक्तकृपावेशात् चिप्तवांस्तत्सुदर्शनम् ।
प्रथमं पतितं यत्र तत्र तीर्थं ततोऽभवत् ॥ १४१ ।
तत्र स्नानेन तेजस्वी सूर्य्यलोके महीयते ।
यदि प्राणैर्वियुज्येत मम लोके महीयते ॥ १४२ ।
भक्तसंरक्षणार्थाय मयाक्षिप्तं सुदर्शनम् ।
यत्र यत्र भ्रमति तत्तत्र तत्र शिलाङ्किताः ।
एवं तद्वै भ्रमाचिप्तं सर्व्वं चक्रमयन्त्वभूत् ॥ १४३ ।

ततः स पञ्चरात्राणि स्थित्वा वै विधिपूर्व्वकम् ।
गोधनान्यग्रतः कृत्वा हरिक्षेत्रं जगाम ह ॥ १४४ ।
हरिणाधिष्ठितक्षेत्रं पूजनीयं ततः स्मृतम् ।
यदा नन्दी शूलपाणिर्गोधनेन पुरस्कृतः ।
स्थितवांस्तद्दिनादेतत् ख्यातं हरिहरप्रभम्* ।
देवानामटनाच्चैव देवाट इति संज्ञितम् ॥ १४५ ।
तस्य देवस्य महिमा केन वक्तुं हि शक्यते ।
स शूलपाणिर्देवेशो भक्ताभयविधायकः ।
मुनिभिर्देवगन्धर्व्वैः सेव्यतेऽचिन्त्यशक्तिमान् ॥ १४६ ।
तस्मिन् स्थाने महादेवः सालङ्कायनकस्य हि ।
पुत्त्रत्वं नन्दिरूपेण प्राप्तः साक्षाच्छिवः प्रभुः ॥ १४७ ।
स्वयञ्चैव महायोगी योगसिद्धिविधायकः ।
आस्थितः परमम्पीठं तीर्थे चैव त्रिधारके ॥ १४८ ।
त्रिजटाभ्योऽभवन्धारास्तिस्रो वै परमाद्भुताः ।
गङ्गा च यमुना चैव पुण्या चैव सरस्वती ।
एतत्त्रैधारिकन्तीर्थन्त्रिजटाभ्यः समुत्थितम् ॥ १४९ ।
यत्र शम्भुः स्थितः साक्षान्महायोगी महेश्वरः ।
शालग्रामाभिधे क्षेत्रे हरिशीलनतत्परः ।
दिशन् ज्ञानं स्वभक्तानां संसाराद्येन मुच्यते ॥ १५० ।
तीर्थे त्रिधारे यः स्नात्वा सन्तर्प्य पितृदेवताः ।

---

* हरिहरात्मकमिति (ग) ।

महायोगिनमभ्यर्च्च न भूयोजन्मभाग्भवेत् ॥ १५१ ।
तस्यैव पूर्व्वदिग्भागे हंसतीर्थमिति स्मृतम् ।
तत्रैकङ्कौतुकं वृत्तन्तच्छृणुष्व महत्तरम् ॥ १५२ ।
कदाचिच्छिवरात्र्यान्तु भक्तैः पूजामहोत्सवे ।
नैवेद्यैर्विविधैः सृष्टैः पूजयित्वा तु योगिनम् ।
तत्र काकाः समुत्पेतुरन्ने तस्मिन् बुभुक्षिताः ।
गृहीत्वान्नन्तु तत्काकस्तेन उड्डीय निर्गतः ।
तद्गृहीतुम्परः काकस्तेनायुध्यत चाम्बरे ॥ १५३ ।
तावुभौ युध्यमानौ तु कुण्डे तस्मिन्निपेततुः ।
तत्र हंसौ ततोभूत्वा निर्गतौ चन्द्रवर्चसौ ॥ १५४ ।
तद्दृष्ट्वा महदाश्चर्य्यं तत्र ये मिलिता जनाः ।
हंसतीर्थमिति प्रोचुस्ततः प्रभृति सत्तमे* ।
ततः प्रभृति तत्तीर्थं हंसतीर्थमिति स्मृतम्† ॥ १५५ ।
पूर्व्वं यच्चक्षतन्तत्तु यच्चतीर्थमिति स्मृतम् ।
तत्र स्नातोनरः शुद्धोयच्चलोके महीयते ॥ १५६ ।
तत्राऽथ मुञ्चते प्राणान् शिवभक्तिपरायणः ।
यच्चलोकमतिक्रम्य मम लोकं प्रपद्यते ॥ १५७ ।
एवम्प्रभावन्तत्तीर्थं महायोगिप्रभावतः ।
अहं शिवश्च लोकानामनुग्रहपरायणौ ॥ १५८ ।
एतत्ते सर्व्वमाख्यातङ्क्षेत्रं गुह्यं वसुन्धरे ।

---

* स्पष्टं देवि तथाऽमचमिति (क), (ख) । † एतदर्द्धं (ग) पुस्तके नास्ति ।

ऋषिर्ज्ञानपरिश्रान्तः सालङ्कायनकोऽद्भुतम् ।
पश्यते च पुनः शालं शुभानां शुभदर्शनम् ॥ ४ ।
ततो दृष्ट्वा महाशालं परिश्रान्तो महामुनिः ।
विश्रामं कुरुते तत्र द्रष्टुकामोऽथ मां मुनिः ॥ ५ ।
शालस्य तस्य पूर्व्वेण स्थितः पश्चान्मुखो मुनिः ।
मायया मम मूढ़ात्मा शक्तोद्रष्टुं न मामभूत् ॥ ६ ।
ततः पूर्व्वेण पार्श्वेन तस्य शालस्य सुन्दरि ।
वैशाखमासद्वादश्यां मद्दर्शनमुपागतः ॥ ७ ।
दृष्ट्वा मां तत्र स मुनिस्तपस्वी शंसितव्रतः ।
तुष्टाव वैदिकैः सूक्तैः प्रणम्य च पुनः पुनः ॥ ८ ।
मत्तेजसा ताड़िताक्षः शनैरुन्मील्य लोचने ।
यावत्पश्यति मां तत्र स्तुवन् स तपसान्वितः ।
वृक्षस्य दक्षिणे पार्श्वे गतस्तावदहन्धरे* ॥ ९ ।
पूर्व्वस्थानं परित्यज्य स ऋषिः शंसितव्रतः ।
स्थित्वा मत्प्रमुखे चैव स्तुवन्नेवं मम प्रियम् ॥ १० ।
ततोऽहं स्तूयमानो वै ऋग्वेदस्यैव ऋग्गतैः ।
स्तोत्रैः सम्पूज्यमानो हि गतोऽस्मि पश्चिमान्दिशम् ॥
ततः पश्चिमपार्श्वे तु स्थितस्तत्रैव माधवि ।
यजुर्वेदोक्तमन्त्रेण संस्तुतः पश्चिमाङ्गतः ॥ १२ ।
स्तुवतीत्थं मुनौ देवि गतोऽहमुत्तरान्दिशम् ।

* गतस्तावदसुन्धरे इति (क), (ख) ।

तत्रापि* सामवेदोक्तैर्मन्त्रैस्तुष्टाव मां मुनिः ॥ १३ ।
ततोऽहं स्तूयमानो वै ऋषिमुख्येन सुन्दरि ।
प्राप्तश्च परमाम्प्रीतिं तमवोचमृषिं तदा ॥ १४ ।
साधु ब्रह्मन्महाभाग सालङ्कायन सत्तम ।
तपसानेन सन्तुष्टः स्तुत्या चैवानया तव ।
वरं वरय भद्रं ते संसिद्धस्तपसा भवान् ॥ १५ ।
एवमुक्तः स तु मया सालङ्कायनको मुनिः ।
शालवृक्षं समाश्रित्य निभृतेनान्तरात्मना ॥ १६ ।
ततो मां भाषते देवि स ऋषिः संशितव्रतः ।
तवैवाराधनार्थाय तपस्तप्तं मया हरे ॥ १७ ।
पर्य्यटामि महीं सर्व्वां सशैलवनकाननाम् ।
इदानीं खलु दृष्टोऽसि चक्रपाणे महाप्रभो ॥ १८ ।
यदि तुष्टोऽसि मे देव सर्व्वशान्तिकरः परः ।
यदि देयोवरोमह्यं तपसाराधितेन च ।
तदा देहि जगन्नाथ ममेश्वरसमं सुतम् ।
एष एव वरोमह्यं दीयतां मधुसूदन ॥ १९।२० ।
एवं वरं याचितोऽस्मि मुनिना भीमकर्म्मणा ।
पुत्रकामेन विप्रेण दीर्घकालन्तपस्यता ॥ २१ ।
एवं तस्य वचः श्रुत्वा ब्राह्मणस्य तपस्विनः ।
मधुराङ्गिरमादाय प्रत्यवोचमृषिम्प्रति ॥ २२ ।

---

* तत्राऽसाविति (ग) ।

चिरकालं व्रतस्थेन यत्त्वया चिन्तितं मुने ।
स कामस्तव सञ्जातः सिद्धोऽसि तपसा भवान् ॥ २३ ।
ईश्वरस्य परा*मूर्त्तिर्नाम्ना वै नन्दिकेश्वरः ।
त्वद्दक्षिणाङ्गादुद्भूतः पुत्त्रस्तव मुनीश्वर ।
संहरस्व तपो ब्रह्मन् शान्तिङ्गच्छ महामुने ॥ २४ ।
अथ चैतस्य जातस्य कल्पा वै सप्त सप्त च ।
त्वं न जानासि विप्रर्षे स जातो नन्दिकेश्वरः ।
मायायोगबलोपेतो गोव्रजं स मया स्थितः ॥ २५ ।
मथुरायाः समानीय आमुष्यायणसंज्ञितम् ।
तव शिष्यं पुरस्कृत्य शूलपाणिरवस्थितः ॥ २६ ।
तत्राश्रमे महाभाग स्थित्वा त्वं तपसान्निधे ।
पुत्त्रेण परमप्रीतो मत्क्षेत्रेऽस्मत्समो भव ॥ २७ ।
अन्यच्च† गुह्यं वक्ष्यामि सालङ्कायन तच्छृणु ।
तव प्रीत्या प्रवक्ष्यामि येनैतत्क्षेत्रमुत्तमम् ।
शालग्राममिति ख्यातं तन्निबोध मुने शुभम् ॥ २८ ।
योऽयं वृक्षस्त्वया दृष्टः सोऽहमेव न संशयः ।
एतत्कोऽपि न जानाति विना देवं महेश्वरम् ।
माययाऽहं निगूढोऽस्मि त्वत्प्रसादात्प्रकाशित ॥ २९ ।
एवं तस्मै वरन्दत्त्वा सालङ्कायनकाय वै ।
पश्यतस्तस्य वसुधे तत्रैवान्तर्हितोऽभवम् ॥ ३० ।

---

* ईशस्य परमा मूर्त्तिरिति (क), (ख) । † अन्यत्ते इति (क), (ख) ।

इत्थं दक्षिणतः कृत्वा जगाम स्वाश्रमं मुनिः ॥ ३१ ।
मम तद्रोचते स्थानं गिरिकूटशिलोच्चये ।
शालग्राम इति ख्यातं भक्तसंसारमोक्षणम् ॥ ३२ ।
तत्र गुह्यानि मे भूमे वक्ष्यमाणानि मे शृणु ।
तरन्ति मनुजा येभ्यो घोरं संसारसागरम् ॥ ३३ ।
गुह्यानि तत्र वसुधे तीर्थानि दश पञ्च च ।
नाद्यापि किञ्चिज्जानन्ति मुच्यन्ते यैरिह स्थिताः ॥ ३४ ।
तत्र विल्वप्रभं नाम गुह्यक्षेत्रं मम प्रियम् ।
कुण्डानि तत्र चत्वारि क्रोशमात्रे यशस्विनि ।
हृद्यन्तत्परमङ्गुह्यं भक्तकर्म्मसुखावहम् ॥ ३५ ।
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितोनरः ।
चतुर्णामश्वमेधानाम्फलम्प्राप्नोति मानवः ॥ ३६ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मसु निष्ठितः ।
अश्वमेधफलम्भुक्त्वा मम लोके स मोदते ॥ ३७ ।
चक्रस्वामीति विख्यातं तस्मिन् क्षेत्रे परं मम ।
चक्राङ्कितशिलास्तत्र दृश्यन्ते च इतस्ततः ॥ ३८ ।
चक्राङ्कितशिला यत्र तिष्ठते* वरवर्णिनि ।
तदेतद्विद्धि वसुधे समन्ताद्योजनत्रयम् ॥ ३९ ।
तत्र स्नानन्तु कुर्व्वीत त्रिरात्रोपोषितो नरः ।
त्रयाणामपि तन्त्राणां फलम्प्राप्नोति निश्चितम् ॥ ४० ।

---

* तिष्ठतीति साधु ।

अथात्र मुञ्चते प्राणान्मम कर्मपरायणः ।
वाजपेयफलं भुक्त्वा मम लोकञ्च गच्छति ॥ ४१ ।
तत्र* विष्णुपदं नाम क्षेत्रं गुह्यम्परं मम ।
तिस्रो धाराः पतन्त्यत्र हिमकूटसमाश्रिताः ॥ ४२ ।
तत्र स्नानन्तु कुर्व्वीत त्रिरात्रोपोषितो नरः ।
त्रयाणामपि रात्रीणां फलम्प्राप्नोति निष्कलम् ॥ ४३ ।
तथैव मुञ्चते प्राणान्मुक्तसङ्गो गतक्लमः ।
अतिरात्रफलम्भुक्त्वा मम लोके महीयते ॥ ४४ ।
तत्र कालीह्रदं नाम गुह्यक्षेत्रम्परं मम ।
अत्र चैव ह्रदस्रोतो वदरीवृक्षनिःसृतः ॥ ४५ ।
तत्र स्नानन्तु कुर्व्वीत षष्ठिकालोषितो नरः ।
नरमेधस्य यज्ञस्य फलम्प्राप्नोति मानवः ॥ ४६ ।
अथात्र मुञ्चते प्राणान्मुक्तरागो गतक्लमः ।
नरमेधफलम्भुक्त्वा मम लोके च मोदते ॥ ४७ ।
अन्यच्च ते प्रवक्ष्यामि महाश्चर्य्यं वसुन्धरे ।
तत्र शङ्खप्रभं नाम गुह्यक्षेत्रम्परं मम ।
श्रूयते शङ्खशब्दश्च द्वादश्यामर्द्धरात्रके ॥ ४८ ।
गदाकुण्डमिति ख्यातं तस्मिन्क्षेत्रे परं मम ।
यत्र वै कम्पते स्रोतो दक्षिणान्दिशमाश्रितम् ॥ ४९ ।
तत्र स्नानन्तु कुर्व्वीत† त्रिरात्रोपोषितो नरः ।

---

* यत्रेति (ग) । † स्नानं प्रकुर्व्वीतेति (ग) ।

वेदान्तगानां विप्राणां फलम्प्राप्नोति मानवः॥ ५०।
अथ वै मुञ्चते प्राणान्कृतकृत्योगुणान्वितः।
गदापाणिर्महाकायो मम लोकम्प्रपद्यति॥ ५१।
पुनश्चाग्निप्रभं नाम गुह्यङ्क्षेत्रं परं मम।
धारा पतति तत्रैका पूर्व्वोत्तरसमाश्रिता॥ ५२।
यस्तत्र कुरुते स्नानं चतुर्भक्तोषितोनरः।
अग्निष्टोमात्पञ्चगुणं फलम्प्राप्नोति मानवः॥ ५३।
अथात्र मुञ्चते प्राणान्मम कर्म्मसु निष्ठितः।
अग्निष्टोमफलम्भुक्त्वा मम लोकम्प्रपद्यते॥ ५४।
तत्राश्चर्य्यं महाभागे कथ्यमानं मया शृणु।
हेमन्ते चोदकमुष्णं ग्रीष्मे भवति शीतलम्॥ ५५।
गुह्यं सर्व्वायुधं नाम तत्र क्षेत्रे परं मम।
पतन्ति सप्त स्रोतांसि हिमवन्निःसृतानि वै॥ ५६।
तत्र स्नानम्प्रकुर्व्वीत सप्तरात्रोषितो नरः।
राजा भवति सुश्रोणि सर्व्वायुधकलान्वितः॥ ५७।
अथ वै मुञ्चते प्राणान्मम कर्म्मविनिश्चितः।
स भुक्त्वा राज्यभोज्यानि मम लोकञ्च गच्छति॥ ५८।
तत्र देवप्रभं नाम गुह्यङ्क्षेत्रं परं मम।
धाराः पञ्चमुखास्तत्र पतन्ति गिरिसंश्रिताः॥ ५९।
तत्र स्नानन्तु कुर्व्वीत अष्टकालोषितोनरः।
चतुर्णामपि देहिनां याति पारं न संशयः॥ ६०।
अथात्र मुञ्चते प्राणाँल्लोभमोहविवर्ज्जितः।

वेदकर्म्म समुत्सृज्य मम लोके महीयते ॥ ६१ ।
गुह्यं विद्याधरं नाम तत्र क्षेत्रे परं मम ।
पञ्च धाराः पतन्त्यत्र हिमकूटविनिःसृताः ॥ ६२ ।
यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः ।
याति वैद्याधरं लोकङ्कृतकृत्यो न संशयः ॥ ६३ ।
अथात्र मुञ्चते प्राणान्वीतरागो गतक्लमः ।
भुक्त्वा वैद्याधरान्भोगान्मम लोकाय गच्छति ॥ ६४ ।
तत्र पुण्यनदी नाम गुह्यक्षेत्रे परे मम ।
शिला कुञ्जलताकीर्णा गन्धर्व्वाप्सरसेविता* ॥ ६५ ।
तत्र स्नानन्तु कुर्व्वीत अष्टभक्तोषितो नरः ।
भ्रमते† सप्तद्वीपेषु स्वच्छन्दगमनालयः ॥ ६६ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मानुसारकः‡ ।
सप्तद्वीपान्समुत्सृज्य मम लोकं स गच्छति ॥ ६७ ।
गन्धर्व्वेति च विख्यातं तस्मिन्क्षेत्रं परं मम ।
एकधारा पतन्त्यत्र पश्चिमां दिशमाश्रिता ॥ ६८ ।
तत्र स्नानन्तु कुर्व्वीत चतूरात्रोषितोनरः ।
मोदते लोकपालेषु स्वच्छन्दगमनालयः ॥ ६९ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मपरायणः§ ।

---

* अप्सरःसेवितेति साधु । तथा कृते छन्दोदोषः स्यात् । † भ्राम्यति, भ्रमति व
‡ मम कर्म्मविनिश्चित इति (ग) । § मम भक्त्या व्यवस्थित इति (ग) ।

लोकपालान् परित्यज्य* मम लोकाय गच्छति ॥ ७० ।
तत्र देवह्रदं नाम मम क्षेत्रं वसुन्धरे ।
यत्र कान्तासि मे भूमि बलेर्यज्ञविनाशनात् ॥ ७१ ।
स ह्रदो वरदः श्रेष्ठो मनोज्ञः सुखशीतलः ।
अगाधः सौख्यदश्चापि देवानामपि दुर्लभः ॥ ७२ ।
तस्मिन् ह्रदे महाभागे मम वै नियमोदके ।
मत्स्याश्चक्राङ्किताश्चैव पर्य्यटन्ते† इतस्ततः ॥ ७३ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
महाश्चर्य्यं विशालाक्षि यत्र तत्परिवर्त्तते ।
अद्दधानस्तु पश्येत‡ न पश्येत्पापपूरुषः ॥ ७४ ।
तस्मिन्देवह्रदे पुण्यं चतुर्विंशतिर्द्वादश ।
सौवर्णानि च पद्मानि दृश्यते भास्करोदये ॥ ७५ ।
तावत्पश्यन्ति भूतानि यावन्मध्यन्दिनम्भवेत् ।
यत्र स्नाता दिवं यान्ति शुद्धा वाक्कायजैर्म्मलैः ॥ ७६ ।
तत्र स्नानम्प्रकुर्व्वीत दशभक्तोपितोनरः ।
दशानामश्वमेधानां प्राप्नोत्यविकलम्फलम् ॥ ७७ ।
अथाऽत्र मुञ्चते प्राणान्मम चिन्ताव्यवस्थितः ।
अश्वमेधफलम्भुक्त्वा भूमे मत्समतां व्रजेत् ॥ ७८ ।
अन्यच्च ते प्रवक्ष्यामि क्षेत्रं गुह्यं परं मम ।
सम्भेदो देवनद्यास्तु समस्तसुखवल्लभः ॥ ७९ ।

---

* लोकपालान् समुत्सृज्येति (ग) । † पर्य्यटन्तीति साधु । ‡ पश्येदिति साधु ।

दिवोऽवतीर्य्य तिष्ठन्ति देवा यत्र सहप्रियाः ।
गन्धर्व्वाप्सरसश्चैव नागकन्याः सहोरगैः ॥ ८० ॥
देवर्षयश्च मुनयः समस्तसुरनायकाः ।
सिद्धाश्च किन्नराश्चैव स्वर्गादवतरन्ति हि ॥ ८१ ॥
नेपाले यच्छिवस्थानं समस्तसुखवल्लभम् ।
तेभ्यस्तेभ्यश्च स्थानेभ्यस्तीर्थेभ्यश्च विशेषतः ॥ ८२ ॥
महादेवजटाजूटान्नीलकण्ठाच्छिवालयः ।
श्वेतगङ्गेति या प्रोक्ता तया सम्भूय सादरम् ।
नानानद्यः समायाता दृश्याऽदृश्यतया स्थिताः ॥ ८३ ॥
गण्डक्या कृष्णया चैव या कृष्णस्य तनूद्भवा ।
तया सम्भेदमापन्ना या सा शिवतनूद्भवा ।
त्रिशूलगङ्गेत्याख्याता सापि तत्र महानदी ॥ ८४ ॥
एवं नदीसमुद्भेदः सर्व्वतीर्थकदम्बकम् ।
मम चैत्रे समाख्यातं पुण्यं परमपावनम् ।
वसुधे त्वं विजानीहि देवानामपि दुर्लभम् ॥ ८५ ॥
यश्च सिद्धाश्रम इति विख्यातः पुण्यवर्द्धनः ।
भगोस्तपोवनं* तत्र सर्व्वाश्रमवरम्मतिं ॥ ८६ ।
नानापुष्पफलोपेतङ्कदलीखण्डमण्डितम् ।
निचुलैश्चैव पुन्नागैः केसरैश्च विराजितम् ॥ ८७ ।
खर्ज्जूराशोकवकुलैश्चूतैश्चैव प्रियालकैः ।

---

* भगोस्तपोवनमिति (क) ।

नारिकेलैश्च पूगैश्च चम्पकैर्जम्बुभिर्धवैः ॥ ८८ ।
नारङ्गैर्बदरीभिश्च जम्बीरैर्मातुलुङ्गकैः ।
केतकीमल्लिकाजातीयूथिकाराजिराजितम् ॥ ८९ ।
कुन्दैः कुरवकैर्नागैः कुटजैर्दाड़िमैरपि ।
आगत्य यत्र क्रीड़न्ति देवानां मिथुनानि च ॥ ९० ।
तस्मिन्ह्रदे महापुण्ये पुण्यनद्योस्तु सङ्गमे ।
स्नानाच्छताश्वमेधानां फलम्प्राप्नोति मानवः ॥ ९१ ।
स्नात्वा तत्र तु वैशाखे गोसहस्रफलम्भवेत् ।
माघमासे पुनः स्नात्वा प्रयागस्नानजम्फलम् ॥ ९२ ।
कार्त्तिके मासि यः स्नाति तुलासंस्थे दिवाकरे ।
विधिना नियतः सोऽपि मुक्तिभागी न संशयः ॥ ९३ ।
यस्त्रिरात्रमुषित्वा तु नियते नियताशनः ।
राजसूयफलम्प्राप्य मोदते देववद्दिवि ॥ ९४ ।
यज्ञस्तपोऽथवा दानं श्राद्धमिष्टस्य पूजनम् ।
यत्किञ्चित्क्रियते कर्म्म तदनन्तफलम्भवेत् ।
भूमे तस्यापराधांश्च सर्व्वानेव क्षमाम्यहम् ॥ ९५ ।
गङ्गायमुनयोर्यद्वत्सङ्गमो मर्त्त्यदुर्लभः ।
तथैवायं देवनद्योः सङ्गमः समुदाहृतः ॥ ९६ ।
एतद्गुह्यं परन्देवि मम क्षेत्रे वसुन्धरे ॥ ९७ ।
अहमस्मिन्महाक्षेत्रे धरे पूर्व्वमुखः स्थितः ।
शालग्रामे महाक्षेत्रे भूमे भागवतप्रियः ॥ ९८ ।
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।

अन्तर्गुह्यं परं श्रेष्ठं* यत्र जानन्ति मोहिताः ॥ ९९ ।
शिवो मे दक्षिणस्थानं तिष्ठते† विगतज्वरः ।
लोकानाम्प्रवरः श्रेष्ठः सर्व्वलोकवरो हरः ॥ १०० ।
तं ये विन्दन्ति ते देवि नूनं मामेव विन्दति‡ ।
ये मां विदन्ति देवेशि ते विदन्ति शिवम्परम् ॥ १०१ ।
अहं यत्र शिवस्तत्र शिवो यत्र वसुन्धरे ।
तत्राहमपि तिष्ठामि आवयोर्नान्तरं क्वचित् ॥ १०२ ।
शिवं यो वन्दते भूमे स हि मामेव वन्दते ।
लभते पुष्कलां सिद्धिमेवं यो वेत्ति तत्त्वतः ॥ १०३ ।
एवमेतन्महाभागे क्षेत्रं हरिहरात्मकम् ।
मृता येऽत्र गतिं यान्ति मम कर्म्मानुसारिणः ॥ १०४
मुक्तिक्षेत्रं प्रथमतो रुरुखण्डन्ततः परम् ।
सम्भेदो देवनद्योश्च त्रिवेणी च ततः परम् ।
क्षेत्रं प्रमाणं§ विज्ञेयं गण्डकीसङ्गतं परम् ॥ १०५ ।
एवं सा गण्डकी देवि नदीनामुत्तमा नदी ।
गङ्गया मिलिता यत्र भागीरथ्या महाफला ।
अपरन्तन्महत्क्षेत्रं हरिक्षेत्रमिति स्मृतम् ॥ १०६ ।
आदौ सा गण्डकी पुण्या भागीरथ्या च सङ्गता ।
तस्य तीर्थस्य महिमा ज्ञायते न सुरैरपि ॥ १०७ ।

---

* क्षेत्रमिति (ग)। † तिष्ठतीति साधु। ‡ विन्दतीति आर्षं, विन्दन्ति वि
वा साधु। § प्रथममिति (क), (ख)।

एतत्ते कथितम्भद्रे शालग्रामस्य सुन्दरि।
गण्डक्याश्चैव माहात्म्यं सर्व्वकल्मषनाशनम्।
पूर्व्वंपृष्टन्त्वया यच्च पुण्यं भागवतप्रियम्॥ १०८।
आख्यानानां महाख्यानं द्युतीनां परमा द्युतिः।
पुण्यानां परमं पुण्यं तपसाञ्च महत्तपः॥ १०९।
गुह्यानां परमङ्गुह्यं गतीनाम्परमा गतिः।
महालाभस्तु लाभानां नास्त्यस्मादपरं महत्॥ ११०।
पिशुनाय न दातव्यं न शठाय गुरुद्रुहे।
ये च पापा कृतघ्नाश्च द्विजदेवापराधिनः।
कुशिष्याय न दातव्यं न दद्याच्छास्त्रदूषके।
नीचाय न च दातव्यं ये न जानन्ति सेवितुम्॥ १११।११२।
सुशिष्याय च दातव्यं धीराय शुभवुद्धये।
लोभमोहमदाद्यैर्य्यै वर्ज्जिताः पुण्यवुद्धयः॥ ११३।
य एतत्पठते नित्यङ्काल्यमुत्थाय मानवः।
कुलानि तारितान्येवं सप्त सप्त च सप्त च॥ ११४।
एवं मरणकाले तु न कदाचिद्विमुह्यते।
यदीच्छेत्परमां सिद्धिं मम लोकाय गच्छति॥ ११५।
शालग्रामस्य चैतस्य माहात्म्यं परमं मया।
कथितं ते महादेवि किमन्यच्छ्रोतुमिच्छसि॥ ११६।

इति वराहपुराणे भगवच्छास्त्रे शालग्रामचैत्रमाहात्म्यवर्णनं नाम
पञ्चचत्वारिंशदधिकशततमोऽध्यायः।

षट्चत्वारिंशदधिकशततमोऽध्यायः ।

सूत उवाच ।

शालग्रामस्य माहात्म्यं श्रुत्वा गुह्यं महौजसम् ।
विस्मयं परमं गत्वा हृष्टा वचनमब्रवीत् ॥ १ ।

धरण्युवाच ।

अहो क्षेत्रस्य माहात्म्यं यत्त्वया भाषितं हरे ।
एतच्छ्रुत्वा महाभाग जातास्मि विगतज्वरा ॥ २ ।
रुरुखण्डमिति प्रोक्तं यत्त्वया परमार्च्चितम् ।
रुरुर्नाम कथं को वा आसीत्पूर्व्वं जनार्द्दन ॥ ३ ।
यन्नाम्ना परमक्षेत्रं हृषीकेश त्वयाश्रितम् ।
कथयस्व जगन्नाथ यद्यनुग्राह्यता मयि ॥ ४ ।

वराह उवाच ।

आसीत्पुरा महाभागो देवदत्त इति द्विजः ।
भृगुवंशे समुत्पन्नो वेदवेदाङ्गपारगः ।
यज्ञविद्यासु कुशलो व्रतनिष्ठोऽतिथिप्रियः ॥ ५ ।
तत्राश्रमपदं पुण्यं पुण्यद्रुमलतान्वितम् ।
शान्तैर्मृगगणैः कीर्णं कन्दमूलफलान्वितम् ॥ ६ ।
तत्र तीव्रं तपोऽतप्यद्देवदत्तो मुनीश्वरः ।
वर्षाणामयुतं साग्रं तत इन्द्रो व्यचिन्तयत् ॥ ७ ।
कामं वसन्तसहितं गन्धर्व्वान् ससखीन् पुनः* ।

* ससखान् पुर इति (क), (ख) ।

उवाच मधुरं वाक्यं क्षुब्धेन्द्रियमना: प्रभुः ॥ ८ ।
अहो सखायः किञ्चिन्मे महत्कार्य्यमुपस्थितम् ।
तस्य मे चिन्तयानस्य यूयमेव परा गतिः ।
भवत्प्रसादात्सुस्थोऽहं निर्भयस्तद्विचिन्त्यताम् ॥ ९ ।
तदिन्द्रस्य वचः श्रुत्वा ते काममलयानिलाः ।
प्रत्यूचुर्देवराजान*माज्ञापय निजप्रियम् ॥ १० ।
जितेन्द्रियस्यापि मनः कस्य संक्षोभयामहे ।
कं वा सुतीव्रात्तपसो भ्रंशयामः सुपेशलम्† ।
आज्ञाप्रसादन्ते लब्ध्वा वद शीघ्रं सुखी भव ॥ ११ ।
इत्युक्तः शतमन्युर्वै प्रत्युवाचाऽथ मानयन् ।
तदैव मे गता चिन्ता भवतां दर्शनं यदा ।
जातमेवाऽखिलङ्कार्य्यं मे वै त‡च्छृणुताखिलाः ॥ १२ ।
हिमशैले महारम्ये हृषीकेशाश्रितो मुनिः ।
देवदत्त इति ख्यातस्तपस्यति महत्तपः ।
जिघृक्षुर्मे पदं नूनं तत्तपो विनिवर्त्त्यताम् ॥ १३ ।
इत्युक्तास्ते तदाज्ञां वै गृहीत्वा शिरसा द्रुतम् ।
प्रस्थानाय मतिञ्चक्रुः कामदेवपुरःसराः ।
प्रस्थाप्याग्रे वसन्तञ्च मलयानिलमेव च ॥ १४ ।
ततः सुरपतिः शक्रः प्रम्लोचान्नाम नामतः ।
प्रशंस्य प्रणयात्पूर्व्वं मानयन्निदमब्रवीत् ॥ १५ ।

* देवराजानमिति आर्षं देवराजमिति साधु । † सुपेशसमिति (ग) । ‡ मम्मैत-
त (ग) ।

गच्छ स्वस्तिमती देवि विजयाय मुनेर्भुवि ।
यत्राश्रमपदन्तस्य देवदत्तस्य वै मुनेः ।
ललितैः स्वैर्विलासैस्तं मोहयित्वा वशङ्कुरु ॥ १६ ।
यथा मत्प्रीतिरतुला त्वं मे कार्य्यकरी सदा ।
तथा कुरुष्व भद्रन्ते हृषीकेशसमीपतः ॥ १७ ।
इन्द्रस्याज्ञां समादाय ययौ तस्याश्रमम्प्रति ।
समीपोपवने रम्ये नानाद्रुमलताकुले ।
मधुरालापबहुले कोकिलानां कुलाकुले ।
रसालमञ्जरीव्याप्तरसामोदालिसङ्कुले ।
गुञ्जन्मत्तालिसन्नादस्तुतिश्रुतिधारान्विते ।
गन्धर्व्वगीतसंमिश्रे मलयानिलशीतले ।
सम्फुल्लपङ्कजवने सुनिर्म्मलजलाशये ।
मुनिप्रभावसन्त्यक्तक्रौर्य्यस्थलजलालये ।
मधुरामोदमधुरे चित्तक्षोभविधायिनि ॥ १८।१९।२०।२१ ।
प्रविश्य सा वरारोहा गीतं सुमधुरं जगौ ।
यदा ध्यानादुपरतः समाधेर्विरतश्चिरात् ।
गान्धर्व्वम्प्रारभंस्ते* तु गन्धर्व्वाः सुरसम्मताः ॥ २२ ।
तस्मिन्नेव क्षणे लब्ध्वाऽवसरं पञ्चसायकः ।
विचकर्ष धनुः पौष्पं सायकान्समयूयुजत् ।
संलक्ष्य तं मुनिं शान्तं भाविदैवबलात्कृतम् ॥ २३ ।

---

* प्रारभन्त इति साधु ।

श्रुत्वा तन्मधुरं गीतं पञ्चमालापसुन्दरम्।
क्षुब्धचित्तः समभवत्स मुनिः संशितव्रतः॥ २४।
चकर्ष च धनुः कामः पुनः पुनरतन्द्रितः।
देवव्रतोऽपि स मुनिः क्षुब्धात्मा नियतोऽपि सन्॥ २५।
विचचाराश्रमपदं पश्यन् सन्तुष्टमानसः।
दूराद्ददर्श तन्वङ्गीं क्रीड़न्तीं कन्दुकेन ताम्॥ २६।
दृष्ट्वैव तान्तु चार्व्वङ्गीं विद्धः कामेन पत्रिणा।
तस्याः समीपमगमत् स्मयमानो महामुनिः॥ २७।
सापि दृष्ट्वा देवदत्तं सज्जन्ती हरिणेक्षणा।
कटाक्षयन्ती सहसा लज्जमाना विगूहति॥ २८।
करेण कन्दुकं घ्नन्ती चञ्चलाक्षी सुपेशला।
स्रंसता केशपाशेन गलत्पुष्पेण राजता।
मनोहरन्ती तस्यर्षेर्ललितैर्विभ्रमोद्भवैः॥ २९।
एतस्मिन्नन्तरे तस्या दक्षिणः पवनोऽहरत्।
वासः सूक्ष्मङ्गलन्नीवि काञ्चीदामगुणान्वितम्॥ ३०।
पुष्पवाणोऽप्यविध्यत्तं दृष्ट्वाऽवसरमन्तिके।
सम्मोहितः स तु मुनिर्गत्वान्तिकमथाब्रवीत्॥ ३१।
का त्वङ्कस्यासि सुभगे वनेऽस्मिन्किञ्चिकीर्षसि।
मादृशान् किं मृगयसे वाहुपाशेन वा मृगान्।
वद्धा गृहीत्वा वामोरु किं वाऽस्मान् कर्त्तुमिच्छसि॥ ३२।
सर्व्वथाऽस्मांस्त्वधीनान् यद्वा कारयिष्यसि*।

* किञ्चिद्वा कारयिष्यसीति (क), (ख)।

तत्तत्कर्म्मी वयं नित्यं त्वदधीनाः स्म सर्व्वथा ॥ ३३ ।
अथ तां हसमानाञ्च गृहीत्वा दक्षिणे करे ।
समालिङ्ग्य विषज्जन्तीं रमयामास मोहितः ॥ ३४ ।
रममाणस्तया सार्द्धं भुञ्जन्* भोगान्मनोरमान् ।
तपःप्रभावोपनतान्दिवारात्रमतन्द्रितः ॥ ३५ ।
बहूनहर्गणानेवं रममाणो यदृच्छया ।
सुप्तोत्थित इवाकस्माद्विवेकेन समन्वितः ।
निर्वेदम्प्राप्तवान् सद्यस्तदोवाच भृशातुरः ॥ ३६ ।
अहो भागवती माया ययाहं भृशमोहितः ।
जानन्नपि तपोभ्रंशं प्राप्तो दैवबलात्कृतः ॥ ३७ ।
अग्निकुण्डसमा नारी घृतकुम्भसमः पुमान् ।
इति प्रवादो मूर्खाणां विचारान्महदन्तरम् ॥ ३८ ।
घृतकुम्भोऽग्नियोगेन द्रवते न तु दर्शनात् ।
पुमान्स्त्रीदर्शनादेव द्रवते यद्विमोहितः ॥ ३९ ।
नापराधस्त्वतो नार्य्याः स्वयं यदजितेन्द्रियः ।
इत्युक्त्वाऽसौ निवृत्तात्मा विससर्ज्ज सुराङ्गनाम् ।
प्रम्लोचान्देववशगो मनस्येतदचिन्तयत् ॥ ४०।४१ ।
उपसर्गो महानत्र तपसोभ्रंशकारकः ।
त्यक्त्वाश्रममिमं चान्यत्स्थानङ्गत्वा समाहितः ।
तपस्तीव्रं समास्थाय शोषयिष्ये कलेवरम् ॥ ४२ ।
इति निश्चित्य मनसा गत्वा भृग्वाश्रमम्प्रति ।

* भुञ्जान इति साधु ।

गण्डकीसङ्गमे स्नात्वा सन्तर्प्य पितृदेवताः।
विष्णुं शिवञ्च सम्पूज्य तपःस्थानं विचिन्तयन्।
पश्यन् भृग्वाश्रमं रम्यमुत्तरङ्गतवान् शनैः॥ ४३।४४।
गण्डक्याः पूर्व्वभागे तु विविक्तं विजनं शुभम्।
दृष्ट्वा तीरेषु विश्रान्तस्तपोभूमिमचिन्तयत्॥ ४५।
भृगुतुङ्गं समासाद्य शङ्कराराधने रतः।
अतप्यत तपोघोरं शिवदर्शनलालसः॥ ४६।
अथ दीर्घेण कालेन सन्तुष्टः स महेश्वरः।
लिङ्गरूपधरः साक्षादुपर्य्यपि तथा ह्यधः।
तिर्य्यक् च जलधाराभिर्युक्तस्तत्तापशान्तिकृत्।
उवाच च प्रसन्नात्मा मुने पश्यस्व* मां शिवम्।
मामेवावेहि विष्णुं त्वं मा पश्यस्वान्तरं मम॥४७।४८।
पूर्व्वमन्तरभावेन दृष्टवानसि यन्मम।
तेन विघ्नोऽभवद्येन गलितन्त्वत्तपो महत्।
आवामेकेन भावेन पश्यंस्त्वं सिद्धिमाप्स्यसि॥ ४९।
तपःप्रभावाल्लिङ्गानि प्रादुर्भूतानि यत्र वै†।
समङ्गमिति विख्यातमेतत् स्थानं भविष्यति॥ ५०।
स्नात्वाऽत्र‡ गण्डकीतीर्थे मम लिङ्गानि योऽर्च्चयेत्।
तस्य योगफलं सम्यग्भविष्यति न संशयः॥ ५१।
इति दत्त्वा वरं शम्भुस्तत्रैवान्तरधीयत॥ ५२।

---

* पश्यस्वेति आर्षं पश्येति साधु। एवं परत्रापि। † तत्र वै इति (ग)।
‡ स्थित्वेति (क), ख)।

देवदत्तोऽपि स मुनिः सम्प्राप्य ज्ञानमुत्तमम् ।
शिवोपदिष्टमार्गेण सायुज्यं परमं गतः ॥ ५३ ।
प्रम्लोचापि मुनेर्गर्भं सम्प्राप्याश्रममन्तिकात् ।
प्रसूता कन्यकां त्यक्त्वा स्वर्गमेव जगाम ह ।
पुनर्जातमिवात्मानं मन्यमाना शुचिस्मिता ॥ ५४ ।
सापि कन्या मृगैस्तत्र रुरुभिर्वर्द्धिता सती ।
रुरुरित्येव विख्याता पितुरेवाश्रमे स्थिता ।
युवभिः प्रार्थ्यमानापि चित्ते कञ्चन नाध्यगात् ॥ ५५ ।
ततः सुनिश्चयङ्कृत्वा तपसे धृतमानसा ।
चिन्तयन्ती जगन्नाथं भगवन्तं रमापतिम् ।
मासे सा प्रथमे बाला फलाहारपरायणा ।
एकान्तरं दिनम्प्राप्य द्वितीये त्रिदिनान्तरे ।
तृतीये पञ्चमदिने चतुर्थे सप्तमान्तरे ।
पञ्चमे नवरात्रेण षष्ठे पञ्चदशाह्नके ।
मासेन सप्तमे चैव शीर्णपर्णाशनाष्टमे ।
त्यक्त्वा तान्यपि सा बाला वाय्वाहारा बभूव ह ॥

५६।५७।५८।५९ ।

सैवं वर्षशतं स्थित्वा हरावेकाग्रमानसा ।
समाधिना समा भूत्वा स्थाणुवन्निश्चलाऽभवत् ॥ ६० ।
द्वन्द्वानि नाविदच्चापि* आत्मभूतान्तरं विना ।
पराङ्काष्ठां समापन्ना प्रकाशमयकान्तिधृक् ॥ ६१ ।

* नाविदिति साधु ।

तत्तेजसा हृतं सर्व्वं तदा दृष्ट्वा वसुन्धरे।
अहं विस्मयमापन्नस्तस्याः प्रत्यक्षतां गतः॥ ६२।
सन्निरुद्धेन्द्रियग्रामा नाचक्षत* वहिःस्थितम्।
तदा हृषीकाण्याविश्य संहृत्य स्वं हृदो वहिः।
स्थितोऽहं वसुधे देवि अक्ष्णोः प्रत्यक्षतां गतः॥ ६३।
हृषीकाणि नियम्याहं यतः प्रत्यक्षतां गतः।
हृषीकेश इति ख्यातो नाम्ना तत्रैव संस्थितः॥ ६४।
सा मां यदैव नापश्यदुन्मील्य नयने ततः।
वहिः स्थितञ्च मां दृष्ट्वा प्रणनाम कृताञ्जलिः॥ ६५।
गद्गदस्वरसंयुक्ता अश्रुक्लिन्नविलोचना।
रोमाञ्चिततनुश्चासीत्कदम्बमुकुलाकृतिः॥ ६६।
तथाभूतान्तु तां दृष्ट्वा प्रावोचमहमङ्गनाम्।
अयि बाले विशालाक्षि तुष्टोऽहं तपसस्तव॥ ६७।
वरं याचय मत्तस्त्वं यत्ते मनसि वर्त्तते।
अदेयमपि ते दद्मि यदन्येषां सुदुर्लभम्॥ ६८।
इति श्रुत्वा प्रभोर्वाक्यं प्रणम्य च पुनः पुनः।
स्तुत्वा तं देवदेवेशं† प्रबद्धकरसम्पुटा॥ ६९।
ददासि चेद्वरं मह्यं देवदेव जगत्पते।
अनेनैव स्वरूपेण भगवन् स्थातुमर्हसि॥ ७०।

---

* नाचष्टेति साधु। † पुनः स्तुत्वा तं देवेशमिति (क), ख)। एतत्पाठे तु छन्दोदोषः।

स्थितोऽस्म्यत्रैव भद्रन्ते अपरं वरयाशु मे ।
दुर्लभन्ते वरं दद्मि तपसाऽहं प्रतोषितः ॥ ७१ ।
इत्युक्ता मां प्रणम्याह रुरुः सा प्रंसितव्रता ।
यदि प्रसन्नो देवेश तदा मां कुरु पावनीम् ।
मन्नाम्ना क्षेत्रमेतच्च ख्यातं भवतु नान्यथा ॥ ७२ ।
तामहं देवि सुभगे प्रावोचं पुनरेव हि ।
तीर्थानां परमं तीर्थं तव देहोभवत्त्वयम् ।
तव नाम्ना च विख्यातमेतत् क्षेत्रं भविष्यति ॥ ७३ ।
तव तीर्थे कृतस्नानस्त्रिरात्रोपोषितो नरः ।
विलोक्य मां भवेत्पूतो मम वाक्यान्न संशयः ॥ ७४ ।
ब्रह्महत्यादिपापानि ज्ञात्वाऽज्ञात्वा कृतान्यपि ।
यास्यन्ति विलयं क्षिप्रमेवमेतन्न संशयः ॥ ७५ ।
इति दत्त्वा वरांस्तस्यै तत्रैवान्तर्हितः स्थितः ।
सापि कालेन सञ्जाता तीर्थभूता तथाऽभवत् ॥ ७६ ।
एतत्ते कथितं देवि रुरुमाहात्म्यमुत्तमम् ।
रुरुक्षेत्रस्य प्रभवमेतद्गुह्यं परं मम ॥ ७७ ।

इति वराहपुराणे भगवच्छास्त्रे रुरुक्षेत्रहृषीकेशमहिमवर्णनं नाम
षट्चत्वारिंशदधिकशततमोऽध्यायः ।

सप्तचत्वारिंशदधिकशततमोऽध्यायः ।

धरण्युवाच ।

अत्याश्चर्य्यं श्रुतं ह्येतद्गुह्यक्षेत्रसमुद्भवम् ।
हृषीकेशस्य महिमा त्वया य उपवर्णितः ॥ १ ॥

अन्यच्च यत्परं गुह्यं क्षेत्रं परमपावनम् ।
वक्तुमर्हसि देवेश परङ्कौतूहलं मम ॥ २ ॥

वराह उवाच ।

शृणु भूमि प्रयत्नेन कारणं परमं मम ।
गुह्यमस्त्यपरञ्चैव हिमशृङ्गशिलोच्चये ॥ ३ ॥

गोनिष्क्रमणकं नाम गावो यत्र प्रतारिताः* ।
यथा निष्क्रमणम्प्राप्य सुरभीणां वसुन्धरे ॥ ४ ॥

सप्ततिर्यत्र कल्पानि और्वो यत्र प्रजापतिः ।
तपश्चचार परमं मम मायाबलान्वितः ॥ ५ ॥

तस्यैवं वर्त्तमानस्य याति काले महत्तरे ।
एवं हि तप्यमानस्य सर्व्वलोकस्य संशयः ॥ ६ ॥

न वरं प्रार्थयत्येष लाभालाभसमन्वितः ।
सूचकोऽपि न विद्येत वलिकर्म्मसुसंयतः ॥ ७ ॥

अथ दीर्घस्य कालस्य कश्चिद्ब्रह्मयतिस्तदा ।
तपस्तपस्यति मुनौ तस्मिन् शैलोच्चये धरे ।

---

* प्रजापतेरिति (ग) ।

एतस्मिन्नन्तरे देवि मया गावोऽवतारिताः ।
सप्तसप्तति कल्याणि सौरभेया महौजसः ॥ २६ ।
तेनाप्लावितदेहाश्च परां निर्वृतिमागताः ।
तच्च गोनिष्क्रमं नाम तीर्थं परमपावनम् ॥ २७ ।
तत्र स्नानन्तु कुर्व्वीत एकरात्रोषितोनरः ।
गोलोकञ्च समासाद्य मोदते नात्र संशयः ॥ २८ ।
अथात्र मुञ्चते प्राणान्कृत्वा कर्म्म सुदुष्करम् ।
शङ्खचक्रगदायुक्तो मम लोके महीयते ॥ २९ ।
पञ्च धाराः पतन्त्यत्र मूले मूलवटस्य हि ।
तत्र स्नानं प्रकुर्व्वीत पञ्चरात्रोषितो नरः ।
पञ्चानामपि यज्ञानां फलमाप्नोति मानवः ॥ ३० ।
अथात्र मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
पञ्चयज्ञफलं भुक्त्वा मम लोकं प्रपद्यते ॥ ३१ ।
अस्ति पञ्चपदं नाम तस्मिन्क्षेत्रे परं मम ।
मम पूर्व्वेण पार्श्वेण दृढाः पञ्च महाशिलाः ।
मत्पूर्व्वां दिशमाश्रित्य तत्र ब्रह्मपदद्वयम् ॥ ३२ ।
मध्ये तु तस्य कुण्डस्य शिलाविस्तीर्णसंश्रिता ।
ऊर्द्धं नालपरीणाहं तत्र विष्णुपदं मम ॥ ३३ ।
तत्र स्नानन्तु कुर्व्वीत पञ्चरात्रोषितोनरः ।
याति शुद्धानि लोकानि* ये च भागवतप्रियाः ॥ ३४ ।
अथात्र मुञ्चते प्राणान्युक्तः पञ्चपदे नरः ।

---

* लोकांनीति क्लीवत्वमार्षम् ।

विमुक्तः सर्व्वसंसारान्मम लोकञ्च गच्छति ॥ ३५ ।
ततो ब्रह्मपदं नाम क्षेत्रङ्गुह्यं परं मम ।
यत्र धारा पतत्येका पश्चिमां दिशमाश्रिता ॥ ३६ ।
तत्र स्नानन्तु कुर्व्वीत एकरात्रोपितोनरः ।
ब्रह्मलोकमवाप्नोति ब्रह्मणा सह मोदते ॥ ३७ ।
कौमुदस्य तु मासस्य शुक्लपक्षस्य द्वादशी ।
यज्ञानां वाजपेयानां फलम्प्राप्नोति मानवः ॥ ३८ ।
अथात्र मुञ्चति प्राणान्मम कर्म्मसु निष्ठितः।
वाजपेयफलं मुक्त्वा मम लोके प्रमोदते ॥ ३९ ।
अस्ति कोटिवटं नाम तस्मिन्क्षेत्रे परं मम ।
पञ्चक्रोशं ततो गत्वा वायव्यां दिशि संस्थितः ॥ ४० ।
तत्र स्नानन्तु कुर्व्वीत षष्ठकालोषितो नरः ।
बहुयज्ञस्य कोटीनां फलं प्राप्नोति निष्कलम् ॥ ४१ ।
अथात्र मुञ्चति प्राणान् भूमे कोटिवटे शुभे ।
यज्ञकोटिफलम्भुक्त्वा मम कोटिं* प्रपद्यते ॥ ४२ ।
अस्ति विष्णुसरोनाम तस्मिन् क्षेत्रे परं मम ।
पूर्व्वोत्तरेण पार्श्वेन पञ्चक्रोशं न संशयः ॥ ४३ ।
मत्सरः पद्मपत्राक्षि अगाधं परिसंस्थितम् ।
पञ्चक्रोशश्च विस्तारः पर्व्वतः परिमण्डलः ॥ ४४ ।
तत्र भ्रमति योभद्रे कुर्य्याच्चैव प्रदक्षिणम् ।
उपवासं त्रिरात्रन्तु कृत्वा कर्म्म सुदुष्करम् ॥ ४५ ।

* मम लोकं प्रपद्यते इति (ग)।

यावन्ति भ्रममाणस्य पदानि ननु सुन्दरि ।
तावद्वर्षसहस्राणि ब्रह्मलोके महीयते ॥ ४६ ।
अथाऽत्र मुञ्चते प्राणान् स्वकर्म्मपरिनिष्ठितः ।
ब्रह्मलोकं समुत्सृज्य मम लोके महीयते ॥ ४७ ।
तस्मिन् क्षेत्रे महाभागे आश्चर्य्यं शृणु सुन्दरि ।
गवां वै श्रूयते शब्दो मम कर्म्मसुखावहः ॥ ४८ ।
अथात्र ज्येष्ठमासस्य शुक्लपक्षस्य द्वादशी ।
श्रूयते सुमहाञ्छब्दः स्वयमेतन्न संशयः ॥ ४९ ।
एवङ्गोस्थलके पुण्ये महाभागवतः शुचिः ।
करोति शुभकर्म्माणि शीघ्रं मुच्येत किल्बिषात् ॥ ५० ।
एवं तेन महाभागे ईश्वरेण यशस्विनि ।
शापदाहो विनिर्मुक्तः सर्व्वैः सह मरुद्गणैः ॥ ५१ ।
एतद्गोस्थलकं नाम सर्व्वशान्तिकरं परम् ।
कथितं देवि कार्त्स्न्येन तवानुग्रहकाम्यया ॥ ५२ ।
एषोऽध्यायो महाभागे सर्व्वमङ्गलकारकः ।
मम मार्गानुसाराणां मम च प्रीतिवर्द्धनः ॥ ५३ ।
श्रेष्ठानां परमं श्रेष्ठं मङ्गलानाञ्च मङ्गलम् ।
लाभानां परमो लाभोधर्म्माणां धर्म्म उत्तमः ॥ ५४ ।
लभन्ते पठमाना वै मम मार्गानुसारिणः ।
तेजः श्रियञ्च लक्ष्मीञ्च सर्व्वकामान्यशस्विनि ॥ ५५ ।
यावन्ति चाक्षराणि स्युरत्राध्याये मनस्विनि ।
तावद्वर्षसहस्राणि मम लोके महीयते ॥ ५६ ।

पतनञ्च न विद्येत पठमाना दिने दिने।
तारितानि कुलान्येभिः सप्त सप्त च सप्त च॥ ५७॥
पिशुनाय न दातव्यं न मूर्खाय शठाय च।
देयं पुत्राय शिष्याय यश्च जानाति सेवितुम्॥ ५८॥
एतन्मरणकाले तु न कदाचित्तु विस्मरेत्।
श्लोकं वा यदि वा पादं यदीच्छेत्परमाङ्गतिम्॥ ५९॥
तत्क्षेत्रन्तु महाभागे पञ्चयोजनमण्डलम्।
तिष्ठामि परया प्रीत्या दिशं पूर्व्वामुपाश्रितः॥ ६०॥
पश्चिमेन वहेद्गङ्गां निष्कामेण वसुन्धरे।
एवं रहस्यं गुह्यञ्च सर्व्वकर्म्मसुखावहम्॥ ६१॥
एतत्ते परमं भद्रे गुह्यं धर्म्मसमन्वितम्।
मम क्षेत्रं महाभागे यत्त्वया परिपृच्छितम्॥ ६२॥

इति वराहपुराणे भगवच्छास्त्रे गोनिष्क्रमणमाहात्म्यवर्णनं नाम सप्तचत्वारिंशदधिकशततमोऽध्यायः।

अष्टाचत्वारिंशदधिकशततमोऽध्यायः।

सूत उवाच।
गोनिष्क्रमणमाहात्म्यं श्रुत्वा गुह्यमनुत्तमम्।
विस्मयम्परमङ्गत्वा सर्व्वरत्नविभूषिता॥ १॥

धरण्युवाच ।

अहो गवां हि माहात्म्यं तव चैवं श्रुतं मया ।
यच्छ्रुत्वाऽहं जगन्नाथ जातास्मि परिनिर्वृता ॥ २ ।
एवमेव परङ्गुह्यं ब्रूहि नारायण प्रभो ।
अस्मात् क्षेत्रात्परं देव* यदि क्षेत्रं विशिष्यते ॥ ३ ।

वराह उवाच ।

अहं नारायणो देवः सर्व्वधर्म्मव्यपाश्रयः ।
मात्सर्य्यञ्चैव मे नास्ति तेनाहं परमः प्रभुः ॥ ४ ।
एतच्छास्त्रं महाभागे प्रयुक्तं लीलया मया ।
वराहरूपमादाय सर्व्वभागवतप्रियम् ॥ ५ ।

धरण्युवाच ।

यथा यथा भाषसे धर्म्मकारण-
मिदं वचो धर्म्मविनिश्चयं महत् ।
तथा तथा देववराऽप्रमेयं
हृद्यं मनो भावयसे जनार्द्दन ॥ ६ ।

ततो महीवचः श्रुत्वा धर्म्मश्रेष्ठोमहामनाः ।
वराहरूपी भगवान् प्रत्युवाच वसुन्धराम् ॥ ७ ।

वराह उवाच† ।

साधु भूमि महाभागे मम कर्म्मव्यवस्थिते ।
कथयिष्याम्यहं ह्येवं गुह्यं लोकसुखावहम् ॥ ८ ।

---

* देवीति (ग), तदसङ्गतमेव । † वाराह उवाचेति (ग) ।

स्तुतस्वामीति विख्यातं गुह्यं क्षेत्रं परं मम।
द्वापरं युगमासाद्य तत्र स्थास्यामि सुन्दरि॥ ९।
पुत्रोऽहं वसुदेवस्य देवक्यां गर्भसम्भवः।
वासुदेव इति ख्यातः सर्व्वदानवसूदनः॥ १०।
पञ्च तस्य सुशिष्याश्च भविष्यन्ति विचक्षणाः।
ऋषयो धर्म्मसंयुक्ता मत्प्रसादाद्वलान्विताः।
ते मां संस्थापयिष्यन्ति धर्म्ममूर्त्तिं महीङ्गतम्॥ ११।
शाण्डिल्यो जाजलिश्चैव कपिलश्चोपसायकः।
भृगुश्चैव महाभागे मम मार्गानुसारिणः॥ १२।
ते च प्रसन्नमनस आत्मदृष्टान्तदर्शिनः।
स्वयं ज्ञानप्रभावेण भासयिष्यन्ति मां सदा॥ १३।
सङ्कर्षणो वासुदेवः प्रद्युम्नो ह्यनिरुद्धकः।
गच्छता बहुकालेन मम कर्म्मपरायणाः॥ १४।
ततो दीर्घेण कालेन इज्यापूर्व्वस्थितेन च।
वरन्तेषां प्रदास्यामि यो यस्य हृदि संस्थितः॥ १५।
ते प्रवक्ष्यन्ति मां देवि आत्मशास्त्रव्यवस्थिताः।
आत्मशास्त्रप्रतिष्ठेत यत्र धर्म्मः सुनिष्ठितः।
भवत्वेतन्निश्चयेन न तु मिथ्या कदाचन।
तव देव प्रसादेन इह लोकः* प्रवर्त्तताम्॥ १६।१७।
तानप्येवं वदिष्यामि शिष्याय भवतां प्रियम्।

---

* लोके इति (ग)।

भविष्यति न सन्देहो यतो यूयं मम प्रियाः ॥ १८ ।
सुशिष्या वाढ़मित्येवं भविष्यन्ति न संशयः ।
तद्देते प्रवदिष्यन्ति सर्व्वंभागवतप्रियम् ॥ १९ ।
यथा च मथ्यमानाद्वै दध्नश्चोड्रियते घृतम् ।
एवं सर्व्वेषु शास्त्रेषु वाराहं घृतसम्मितम् ॥ २० ।
वाराहं ज्ञानमुत्सृज्य महाभागं महौजसम् ।
एवं समं मया चैव आत्मना परिभाषितम् ।
ते प्रमाणं करिष्यन्ति सिद्धिं प्राप्स्यन्ति वै पराम् ॥ २१ ।
महाज्ञानमिदं सूक्ष्मं भूमे भक्तेषु दृश्यते ।
शास्त्राणां परमं शास्त्रं सर्व्वसंसारमोचणम् ॥ २२ ।
किञ्चिदन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
शास्त्रमेतन्महाभागे स्थूलकर्म्म महौजसम् ॥ २३ ।
केचित्तरन्ति ज्ञानेन केचित्कर्म्मणि निष्ठिताः ।
केचिद्यथेष्टं सुश्रोणि केचिद्दानेन कर्मणा ॥ २४ ।
केचिद्योगबलं भुक्त्वा* पश्यन्ति मम संस्थितिम् ।
विधिपूर्व्वन्तु मे किञ्चिन्नराः पश्यन्ति निष्ठिताः ॥ २५ ।
सर्व्वधर्म्मकराः केचित्सर्व्वाशाः सर्व्वविक्रयाः† ।
ते मां पश्यन्ति वै भूमे एकचित्तव्यवस्थिताः ॥ २६ ।
एवमेतन्महाशास्त्रं देवि संसारमोचणम् ।
मम भक्तव्यवस्थायै प्रयुक्तं परमं प्रियम्‡ ॥ २७ ।

---

* भक्ता इति (ग)। † (ग) पुस्तके सर्व्वाशौ सर्व्वविक्रयौत्येकवचनान्तः पाठ
‡ मयेति (ग)।

ते तथा च प्रवच्यन्ति यच्च यस्याभिरोचते* ।
अन्यथान्यस्य दृष्टानामृषिभिर्यत्प्रयोजितम् ।
तद्युगस्य प्रभावेण भूमे कुर्व्वन्ति मानवाः ॥ २८ ।
तैः स्वशिष्यैः समं देवि ये शास्त्रविनियोजिताः ।
मत्प्रसादेन ते सर्व्वे सिद्धिं यास्यन्ति मत्पराम् ॥ २९ ।
मम शिष्येषु येषाञ्च मात्सर्य्योपहतात्मनाम् ।
मच्छास्त्रे च भवेद्दोषस्तेषामत्र पुनर्भवः ॥ ३० ।
मात्सर्य्यं ये च कुर्व्वन्ति मद्धर्म्मपरमे जने ।
तेषान्नायं परो लोको मात्सर्य्योपहतात्मनाम् ॥ ३१ ।
अन्यच्च ते प्रवच्यामि तच्छृणुष्व वसुन्धरे ।
मम मार्गानुसारेण परङ्कुर्य्यां मम प्रिये ॥ ३२ ।
शास्त्रवन्तो विनीताश्च बहुदोषविवर्ज्जिताः ।
ते तु मात्सर्य्यदोषेण नष्टाचाराः पतन्त्यधः ॥ ३३ ।
मात्सर्य्यं सर्व्वनाशाय मात्सर्य्यं धर्म्मनाशकम् ।
यस्तु मात्सर्य्यसंयुक्तो न स पश्यति मां क्वचित् ॥ ३४ ।
बहुकर्म्मसमायुक्ता दानाध्ययननिष्ठिताः ।
तपसा ज्ञानयुक्ता वा नित्यकर्म्मसु चोद्यताः ।
अनेन हि स्वभावेन मात्सर्य्यञ्चैव कुर्व्वते† ।
न ते पश्यन्ति मां भूमे मायया परिदूषिताः ॥ ३५।३६ ।

---

* यस्याभिरोचते इत्यत्र यस्येति सम्बन्धविवक्षायां षष्ठी । यस्मै अभिरोचत इत्येव सम्यक् । † वर्त्तते इति (क), (ख) ।

न कर्त्तव्यं ततः सर्व्वैर्मात्सर्य्यं धर्म्मघातकम् ।
मम शास्त्रपरैरिह यदीच्छेत्परमाङ्गतिम् ॥ ३७ ।
एतद्गुह्यं महाभागे न जानन्ति मनीषिणः ।
मात्सर्य्यस्य तु दोषेण बहवो निधनङ्गताः ॥ ३८ ।
एतच्छास्त्रं महाभागे प्रयुक्तं विधिना* मया ।
वराहरूपमादाय सर्व्वभागवतप्रियम् ॥ ३९ ।
तत्राश्चर्य्यं महाभागे शृणु भूतगिरौ मम ।
आयसी प्रतिमा तत्र अभेद्या चैव दृश्यते ॥ ४० ।
ब्रुवन्ति केचित्कांस्येति आयसीत्यपरेऽब्रुवन् ।
पाषाणीत्यपरे केचिदन्ये वज्रमयीति च ॥ ४१ ।
ऊर्द्धं वा यदि वाऽधोवा ये कुर्व्वन्ति ममार्च्चनम् ।
तथापि संस्पृशन्ति मां शिरोमध्ये तु सुन्दरि ॥ ४२ ।
ये तु पश्यन्ति मां भूमे मणिपूरगिरौ स्थितम् ।
स्तुवन्त्याचार्य्यवन्तश्च मत्प्रसादात्सुसंयताः ॥ ४३ ।
आचार्य्याणां गुणान् भुक्ता मम कर्म्मपथे स्थिताः ।
सर्व्वकिल्बिषमुक्ताश्च यान्ति ते परमाङ्गतिम् ॥ ४४ ।
तस्मिन् चैत्रे महाभागे अस्ति गुह्यम्परं मम ।
पञ्चारुमेति विख्यातं उत्तरां दिशमाश्रितम् ॥ ४५ ।
तत्र स्नानं प्रकुर्व्वीत पञ्चकालोषितो नरः ।
मोदते नन्दने दिव्ये अप्सरोभिः समाकुले ॥ ४६ ।

---

* विधया म(न?)या इति (ग) ।

अथात्र मुञ्चते प्राणान्कृतकृत्यो भवेन्नरः ।
नन्दनं वनमुत्सृज्य मम लोकञ्च गच्छति ॥ ४७ ।
भृगुकुण्डेति विख्यातमत्र गुह्यं परं मम ।
मम दक्षिणपार्श्वे तु अदूरादर्द्धयोजनात् ॥ ४८ ।
तत्र स्नानन्तु कुर्व्वीत मम मार्गानुसारकः ।
भूपृष्ठे न तु जायेत कालेन विजितेन्द्रियः ॥ ४९ ।
भुवो यत्र तु तिष्ठेत मेरुशृङ्गे शिलोच्चये ।
तत्र मोदति* सुश्रोणि अप्सरोभिर्यथासुखम् ॥ ५० ।
अथात्र मुञ्चते प्राणान्मम कर्म्मपथे स्थितः ।
ध्रुवलोकं परित्यज्य मम लोके महीयते ॥ ५१ ।
मणिकुण्डेति विख्यातं तत्र गुह्यम्परं मम ।
मणयो यत्र दृश्यन्ते अनेकालयसंस्थिताः ॥ ५२ ।
अगाधं तं ह्रदम्भद्रे देवानामपि दुर्लभम् ।
विस्मयं किं पुनस्तत्र मलयश्चचलस्थिताः ॥ ५३ ।
तत्र स्नानं प्रकुर्व्वीत पञ्चकालोषितो नरः ।
रत्नभागी भवेद्वीरराजलक्षणसंयुतः† ॥ ५४ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मपथे स्थितः ।
छित्त्वा वै सर्व्वसंसारं मम लोकम्प्रपद्यते ॥ ५५ ।
सुगुह्यम्पूर्व्वपार्श्वेण मम चेत्रस्य सुन्दरि ।
अदूरात्त्रीणि क्रोशानि‡ परिमाणं विधीयते ॥ ५६ ।

---

* मोदते इति साधु । † मम शास्त्रेण संयुत इति (क) (ख) । ‡ क्रोशानीति क्रोवत्वमार्षं, त्रीन् क्रोशानिति साधु ।

तत्र स्नानन्तु कुर्व्वीत मम लोकाय गच्छति ॥ ५७ ।
धूतपापेति विख्यातं तत्र गुह्यं परं मम ।
अदूरात्पञ्च क्रोशा वै मम क्षेत्रस्य पश्चिमे ॥ ५८ ।
तत्र कुण्डं महाभागे मम तद्रोचते जलम् ।
मारकतं सुवर्णाभमगाधं निर्म्मितं मया ॥ ५९ ।
तत्र स्नानं प्रकुर्व्वीत पञ्चभक्तोषितो नरः ।
भुन्वानो दुष्करं कर्म्म पञ्चभूतात्मनिष्ठितम् ॥ ६० ।
तत्र क्षतोदको भद्रे धूतपापो यशस्विनि ।
गत्वेन्द्रलोकं सुश्रोणि देवैः सह स मोदते* ॥ ६१ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मपरायणः ।
इन्द्रलोकम्परित्यज्य मम लोकं प्रपद्यते† ॥ ६२ ।
तत्राश्चर्य्यं महाभागे धूतपापे शृणुष्व मे ।
वर्त्तते च विशालाक्षि मणिपूरे गिरौ मम ॥ ६३ ।
तावन्न‡ पतते धारा यावत्पापं न धूयते ।
धूते पापे च सुश्रोणि धारा च पतने§ मही ॥ ६४ ।
एवं तत्र विशालाक्षि वृक्षमश्वत्थमिश्रितम् ।
धूतपापं न प्रविशेन्नरे शुद्धे प्राविशति¶ ॥ ६५ ।
तस्मिन् क्षेत्रे वरारोहे समन्तात्पञ्चयोजने‖ ।
यत्र तिष्ठाम्यहं देवि पश्चिमां दिशमाश्रितः ॥ ६६ ।

---

* सुमोदते इति (ग)। † मम लोके महीयते इति (ङ)। ‡ यावदिति (ग)
§ पततीति साधु। ¶ अत्र पतत्प्रहुलात् कश्चीदोषः। ‖ पञ्चयोजनमिति (ग)।

तत्र चामलकभद्रे अदूरादर्द्धयोजनात् ।
मम चैव प्रभावेण सर्व्वकामफलोदयम् ॥ ६७ ।
तत्र कश्चिन्न जानाति पापकर्म्मा नराधमः ।
भक्तं भागवतं शुद्धं मम कर्म्मव्यवस्थितम् ॥ ६८ ।
उपोष्य च त्रिरात्राणि श्रद्दधानो जितेन्द्रियः ।
तत्र गत्वा वरारोहे उदिते च दिवाकरे ।
अथ मध्याह्नवेलायां यदि वास्तगतेऽपि वा ।
एकचित्तेन गन्तव्यं धृतिङ्कृत्वा सुपुष्कलाम् ॥ ६९।७० ।
यत्तत्र लभते भद्रे फलमामलकं शुभम् ।
पञ्चरात्रेण लभते तस्मिन् भूतगिरौ मम ॥ ७१ ।
ततो हरिवचः श्रुत्वा सा मही संशितव्रता ।
पुनर्नारायणन्तत्र प्रोवाच विनयान्विता ॥ ७२ ।
स्तुतस्वामी श्रुतोऽसि त्वं तत्र स्थानानि यानि च ।
एतन्नामनिरुक्तिन्त्वं वक्तुमर्हसि साम्प्रतम् ॥ ७३ ।

वराह उवाच ।

भूमि हत्वा तु संसाराग्र्ये चान्ये देवकण्टकाः ।
द्वापरं युगमासाद्य यत्र स्थास्यामि सुन्दरि ॥ ७४ ।
ततोऽमरैश्च ब्रह्माद्यैर्बहुभिर्मन्त्रवादिभिः ।
स्तुतिः कर्त्तुं समारब्धा मणिपूराश्रितस्य मे ॥ ७५ ।
ततो मां नारदो देवि असितो देवलस्तथा ।
पर्व्वतश्च महाभागे मम भक्त्या व्यवस्थितः ।
नाम कुर्व्वन्ति मे तत्र मणिपूरगिरौ ततः ॥ ७६ ।

स्तुतस्वामीति विख्यातं मम कर्म्मव्यपाश्रितम् ॥ ७७ ।
एतत्ते कथितम्भद्रे निरुक्तिकरणं मया ।
त्वया पृष्टं हि यद्भद्रे सर्व्वभागवतप्रियम् ॥ ७८ ।
एतत्स्तुतगिरेर्द्देवि माहात्म्यङ्कथितं मया ।
द्वापरं युगमासाद्य यत्र स्थास्यामि सुन्दरि ॥ ७९ ।
एतानि भूमि गुह्यानि तत्र भूतगिरौ मम ।
श्रद्दधानेन मर्त्त्येन श्रोतव्यं नात्र संशयः ॥ ८० ।
एतत्ते कथितम्भद्रे सर्व्वधर्म्मव्यपाश्रयम् ।
श्रीस्तुतस्वामिमाहात्म्यङ्किमन्यत्परिपृच्छसि ॥ ८१ ।

इति वराहपुराणे भगवच्छास्त्रे स्तुतस्वामिमाहात्म्यं नाम
अष्टाचत्वारिंशदधिकशततमोऽध्यायः ।

ऊनपञ्चाशदधिकशततमोऽध्यायः ।

सूत उवाच ।

श्रीस्तुतस्वामिमाहात्म्यं श्रुत्वा धर्म्मपरायणा ।
परितुष्टमना देवी वाक्यमेतदुवाच ह ॥ १ ।

धरण्युवाच ।

एतच्छ्रुत्वा तु माहात्म्यं देवदेववर प्रभो ।
मम चित्तस्य परमा जाता शान्तिरनुत्तमा ॥ २ ।

नाराचधारावरणासिधारी
सुररिपुवधकारी धरणीधरः।
धृतशङ्खगदाब्जचक्रपाणिः
स्वयमिह शास्त्रमुदावहत्प्रधानम्* ॥ ३।

एवं हि गुणमाहात्म्यं सुतस्वामिनि मच्छ्रुतम्।
अस्माच्चेदं परं श्रेष्ठं तन्मे वद कृपानिधे ॥ ४।

वराह उवाच।

एवम्भूमे वरं श्रेष्ठे फुल्लपङ्कजमालिनि।
कथयिष्यामि चान्यत्ते गुह्यम्पापभयापहम् ॥ ५।
द्वापरं युगमासाद्य यादवानां कुलोद्वहः।
सौरीति तत्र विख्यातो भविष्यति पिता मम ॥ ६।
द्वारकेति च विख्याता पुरी तत्र स्थिताऽभवत्।
या च देवपुरीरम्या विश्वकर्म्मविनिर्म्मिता ॥ ७।
पञ्चयोजनविस्तारा दशयोजनमायता।
वसाम्यत्र वरारोहे शतपञ्चसमास्तथा† ॥ ८।
भारावतरणङ्कृत्वा देवानां सुमहत्प्रियम्।
पुनरप्यागमिष्यामि स्वर्लोकम्प्रति सुन्दरि ॥ ९।
भविष्यति वरारोहे ईश्वरः सदृशो मम।
दुर्व्वासा इति विख्यातः शपिष्यति कुलं मम ॥ १०।
तस्य शापाभिसन्तापाद्वारकावासिनो धरे।

---

* (ग) पुस्तके श्लोकस्यास्य पादविपर्य्यासो दृश्यते। † स्थिता इति (ग)।

वृष्ण्यन्धकाश्च भोजाश्च गमिष्यन्ति यमक्षयम् ॥ ११ ।
चन्द्रपाण्डुरसङ्काशो वनमाली हलायुधः ।
हलेनाक्षष्य नगरं समुद्रङ्गमयिष्यति ॥ १२ ।
नारायणवचः श्रुत्वा धर्म्मकामा वसुन्धरा ।
उभौ तौ चरणौ गृह्य* पुनः पप्रच्छ माधवी ॥ १३ ।

धरण्युवाच ।

लोकनाथोऽसि सर्व्वेषां देव मायाकरण्डक ।
शपिष्यति कथं तत्र दुर्व्वासास्तद्वदस्व मे ॥ १४ ।

वराह उवाच ।

तत्र जाम्बवती नाम मम पत्नी भविष्यति ।
रूपयौवनसम्पन्ना मम भोगसमन्विता ॥ १५ ।
तस्याः पुत्त्रो महाभागे रूपयौवनदर्पितः ।
साम्ब इत्यभिविख्यातो ममैव सततम्प्रियः ॥ १६ ।
तेनैव क्रीड़मानेन† कृत्वा गर्भमतथ्यतः ।
स पृष्टः परमश्रेष्ठ ऋषिरेषा प्रसोष्यति ।
पुत्त्रकामा स्त्रियं बाला मुने तत्प्रब्रवीहि मे ॥ १७ ।
साम्बोऽयमिति च ज्ञात्वा स मुनिः कोपमूर्च्छितः ।
उवाच तर्हि ते गर्भान्मुसलं कुलनाशनम् ।
येन वृष्ण्यन्धकाः सर्व्वे गमिष्यन्ति यमक्षयम् ॥ १८ ।
श्रुत्वा दुर्व्वाससः शापन्ते च सर्व्वे कुमारकाः ।
शापेन सन्तप्तधियो मामूचुर्भयसंयुताः ॥ १९ ।

---

* गृहीत्वेति साधु । † क्रीड़तेति साधु ।

ततस्तानागतान्दृष्ट्वा कुमारान् हृष्टवाहनम्।
ते च मामब्रुवन् सर्व्वे यथावृत्तं समुत्सुकाः॥ २०॥
तच्च तेषां वचः श्रुत्वा प्रोक्तवानस्मि तच्छृणु।
भविष्यति न सन्देहो दुर्व्वासा यदुवाच ह॥ २१॥
एवन्ते कथितं भूमि कृष्णादिशापकारणम्।
तत्र स्थानानि मे भूमि कथ्यमानानि वै शृणु॥ २२॥
द्वारकायां महाभागे वैष्णवानां सुखावहे।
अस्ति पञ्चसरो नाम गुह्यं चेतं परं मम।
समुद्रतीरमुत्सृज्य मम कर्म्मसुखावहम्॥ २३॥
तत्र स्नानन्तु कुर्व्वीत षष्ठकालोषितोनरः।
मोदते नाकपृष्ठे तु अप्सरोगणसङ्कुले॥ २४॥
अथात्र मुञ्चते प्राणान् चैत्रे पञ्चसरे मम।
देवलोकं समुत्सृज्य मम लोके महीयते॥ २५॥
प्लक्षो वै तत्र सुश्रोणि शतशाखोमहाद्रुमः।
सुफलैः शोभनैः कुम्भाकृतिभिर्बहुभिः फलैः*॥ २६॥
बहवस्तत्र गच्छन्ति लाभलौल्येन† मानवाः।
फलं न लभते कश्चिन्मुक्त्वा भागवतं नरम्॥ २७॥
लभन्ते ये फलं तत्र मुक्ताः पापेन कर्म्मणा।
ते लभन्ते परां सिद्धिं मम कर्म्मणि संस्थिताः॥ २८॥

---

* चतुर्विंशतिद्वादशीसुमहत्फलितोभिः फलैरिति (ग)। † लाभालाभेन मानवा इति (ग)।

प्रभासमिति विख्यातं तस्मिंस्तीर्थे* परे मम ।
मनुजा यं न पश्यन्ति रागलोभसमन्विताः ॥ २९ ॥
तत्र स्नानम्प्रकुर्व्वीत पञ्चभक्तोषितो नरः ।
मोदते सप्तद्वीपेषु गुह्यानि च स गच्छति ॥ ३० ॥
अथ चेन्मुञ्चते प्राणान् प्रभासे गतकिल्बिषः ।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति ॥ ३१ ॥
तत्राश्चर्य्यं महाभागे कथ्यमानं मया शृणु ।
प्रभासे यत्र शृण्वन्ति सागरे न मरम्प्रति† ॥ ३२ ॥
मकरास्तत्र दृश्यन्ते भ्रममाणास्ततस्ततः ।
न किञ्चिदपराध्यन्ति स्नायमाना जले ततः ॥ ३३ ॥
अथात्र प्रक्षिपेत्पिण्डान् प्रसन्ने सलिले नरः‡ ।
असम्प्राप्ते च गृह्णन्ति एवमेतन्न संशयः ॥ ३४ ॥
पापकर्म्मरतस्यापि न गृह्णन्ति जलम्प्रति ।
धर्म्मात्मनाञ्च गृह्णन्ति पिण्डमेव न संशयः ॥ ३५ ॥
पञ्चपिण्डमिति ख्यातं तस्मिन् गुह्यं परं मम ।
अगाधस्याप्यपारस्य क्रोशविस्तार एव च ॥ ३६ ॥
तत्राभिषेकङ्कुर्व्वीत पञ्चकालोषितोनरः ।
मोदते शक्रलोके स एवमेतन्न संशयः ॥ ३७ ॥
अथात्र मुञ्चते प्राणान् पञ्चकुण्डे यशस्विनि ।

---

* तीर्थे इति (क), (ख)। † नगरं प्रतीति (क), (ख)। ‡ सलिले न तु इति (क), (ख)।

शक्रलोकम्परित्यज्य मम लोकं स गच्छति ॥ ३८ ।
तत्राश्चर्य्यं महाभागे कथ्यमानं मया शृणु ।
न पश्येत्पापकर्म्मा वै शुभकर्म्मैव पश्यति ॥ ३९ ।
चतुर्विंशतिद्वादश्यां मध्याह्ने च दिवाकरे ।
रौप्यं सुवर्णकम्पद्मं दृश्यते नात्र संशयः ॥ ४० ।
क्षेत्रं सङ्गमनं नाम तस्मिंस्तीर्थे परं मम ।
धाराः पतन्ति चत्वारि* मणिपूरगिरौ स्थिताः ॥ ४१ ।
तत्राभिषेकं कुर्व्वीत चतुर्भक्तोषितोनरः ।
वैखानसेषु लोकेषु मोदते नाऽत्र संशयः ॥ ४२ ।
अथाऽत्र मुञ्चते प्राणान् मम भक्तिपरायणः ।
त्यक्त्वा वैखानसाँल्लोकान्मम लोकं स गच्छति ॥ ४३ ।
तत्रापि परमाश्चर्य्यं कथ्यमानं शृणुष्व मे ।
दृश्यन्ते यानि कुण्डेषु मणिपूरगिरौ तथा ॥ ४४ ।
प्रचीयमाणे पापे तु नयते तज्जलं भुवि ।
स्नायमानेषु पापेषु न पतेत्तद्यथा पुरा ॥ ४५ ।
हंसकुण्डेति विख्यातं तस्मिन् क्षेत्रे परे मम ।
धारा चैका पतत्यत्र मणिपूरगिरौ स्थिता ॥ ४६ ।
तत्राभिषेकं कुर्व्वीत षष्ठकालोषितोनरः ।
मुक्तसङ्गो महाभागे मोदते वरुणालये ॥ ४७ ।
अथाऽत्र मुञ्चते प्राणान् हंसकुण्डे वरानने ।

---

* चतस्र इति साधु ।

वारुणं लोकमुत्सृज्य मम लोके महीयते ॥ ४८ ।
तत्राश्चर्यं प्रवक्ष्यामि हंसकुण्डे यशस्विनि ।
शुद्धाः पश्यन्ति मनुजाः पापकर्म्मा न पश्यति ॥ ४९ ।
चतुर्विंशतिद्वादश्यां मध्याह्ने च दिवाकरे ।
हंसाश्चैवाऽत्र दृश्यन्ते चन्द्रकुन्दसमप्रभाः ॥ ५० ।
यस्तत्र पश्यति* हंसान् भ्रममाणानितस्ततः ।
लभन्ते ते परां सिद्धिं धरे नास्त्यत्र संशयः ॥ ५१ ।
कादम्बमिति विख्यातं तस्मिन् क्षेत्रे परं मम ।
वृष्णयो यत्र वै शुद्धाः संप्राप्ताश्च ममालयम् ॥ ५२ ।
तत्राभिषेकं कुर्व्वीत चतुःकालोषितोनरः ।
मोदते ऋषिलोकेषु पुण्यात्मा वै न संशयः ॥ ५३ ।
अथाऽत्र मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम् ।
ऋषिलोकं परित्यज्य मम लोकं प्रपद्यते ॥ ५४ ।
तत्राश्चर्यं महाभागे कथ्यमानं शृणुष्व मे ।
कादम्बात्पतति† धारा तत्र पूर्व्वं विनिःसृता ॥ ५५ ।
स कदम्बो महाभागे माघमासस्य द्वादशी ।
पुष्पाणि वै प्रकटयत्युदयस्थे दिवाकरे ॥ ५६ ।
ये वा लभन्ते तत्पुष्पं मम मार्गानुसारिणः ।
ते लभन्ते परां सिद्धिमेवमेतन्न संशयः ॥ ५७ ।
चक्रतीर्थमिति ख्यातं तस्मिन् क्षेत्रे परं मम ।

---

* पश्यतीति साधु । † पततीति साधु ।

पञ्च धाराः पतन्त्यत्र मणिपूरसमाश्रिताः ॥ ५८ ।
तत्राभिषेकं कुर्व्वीत पञ्चकालोषितो नरः ।
दशवर्षसहस्राणि स्वर्गलोके स मोदते ॥ ५९ ।
अथाऽत्र मुञ्चते प्राणाँल्लोभमोहविवर्ज्जितः ।
सर्व्वान् स्वर्गान् समुत्सृज्य मम लोकाय गच्छति ॥ ६० ।
तत्राश्चर्यं प्रवक्ष्यामि कथ्यमानं शृणुष्व मे ।
अन्यथैतन्न पश्यन्ति मम कर्म्मपरायणाः ॥ ६१ ।
चतुर्विंशतिद्वादश्यामर्द्धरात्रे यशस्विनि ।
श्रूयते तत्र निर्घोषो मनःकर्णसुखावहः ॥ ६२ ।
सुगन्धोवहते वायुर्बहुमाल्यसमन्वितः ।
दुर्लभः पापिनाञ्चैव सुलभः पुण्यकर्म्मिणाम् ॥ ६३ ।
तस्य चोत्तरपार्श्वेन अशोकश्च महाद्रुमः ।
पुष्पते सोऽथ तत्रापि सूर्य्ये चाभ्युदिते* सति ॥ ६४ ।
ये तत्र लभते पुष्पं मम मार्गानुसारिणः ।
ते लभन्ते परां सिद्धिं एवं भूमे न संशयः ॥ ६५ ।
अस्ति रैवतकं नाम तस्मिन् क्षेत्रे परं मम ।
सर्व्वलोकेषु विख्यातं यत्र विक्रीडितं मया ॥ ६६ ।
बहुगुल्मलताकीर्णं बहुपुष्पैश्च शोभितम् ।
बहुवर्णशिलापङ्क्ता गुहाश्चापि दिशो दश ।
वाप्यश्च कन्दराश्चैव देवानामपि दुर्लभाः ॥ ६७ ।

---

* अभ्युदयते इति (ग) ।

तत्राभिषेकं कुर्व्वीत षष्ठकालोषितो नरः ।
गच्छते* सोमलोकाय क्षतकृत्यो न संशयः ॥ ६८ ।
अथाऽत्र मुञ्चते प्राणान्मम कर्म्मसु निष्ठितः ।
सोमलोकं समुत्सृज्य मम लोकं प्रपद्यते ॥ ६९ ।
तत्राश्चर्य्यं महाभागे कथ्यमानं मया शृणु ।
पश्यन्ति मनुजाः सर्व्वे धर्म्मकामा न संशयः ॥ ७० ।
पतन्ति सर्व्ववृक्षाणां पत्राणि सुबहून्यपि ।
एकञ्चापि न दृश्येत प्रसन्नं याति तज्जलम् ।
स च पूर्व्वेण पार्श्वेण शोभते वै महाद्रुमः ॥ ७१ ।
अपरो मम पार्श्वेण देवानामपि दुर्लभः ।
पञ्चक्रोशसुविस्तारः शोभते वै महाद्रुमः ॥ ७२ ।
पद्मैश्चैवोत्पलैश्छन्नं सुगन्धिकुसुमैः सह ।
बहुमत्स्यजलाकीर्णं सर्व्वतस्तु फलान्वितम् ।
शिलातलगुहाच्छन्नं सुगन्धिकुसुमैः सह ॥ ७३ ।
तत्राभिषेकं कुर्व्वीत अष्टभक्तोषितो नरः ।
मोदते नन्दने दिव्ये अप्सरोभिः समन्विते ॥ ७४ ।
अत्राश्चर्य्यं महाभागे कथ्यमानं मया शृणु ।
पश्यन्ति मनुजाः सर्व्वे धर्म्मकामा न संशयः ॥ ७५ ।
मध्याह्ने च पुनः पूर्णयार्द्धरात्रे समोवहेत् ।
वर्द्धते क्षीयते चैव यथैव च महोदधिः ॥ ७६ ।

---

* गच्छतीति साधु ।

तस्य पश्चिमपार्श्वे तु विल्वश्चैव महाद्रुमः ।
चतुर्विंशतिद्वादश्यां स पुष्यति च निष्फलम् ॥ ७७ ।
पश्यति शुभकर्म्मा च पापकर्म्मा न पश्यति ।
दृश्यते च महाभागे अस्तमिते दिवाकरे ॥ ७८ ।
यस्तत्र लभते पुष्पं मम मार्गानुसारकः ।
स लभेत परां सिद्धिमेवम्भूमि न संशयः ॥ ७९ ।
विष्णुसंक्रमणं नाम तस्मिन् क्षेत्रे परे मम ।
विद्धोऽस्मि यत्र व्याधेन स्वमूर्त्तिं चास्थितः पुनः ॥ ८० ।
तत्र कुण्डं महाभागे मणिपूरगिरौ श्रुतम् ।
धारा चैका पतत्यत्र लाभालाभविवर्जितः ।
सूर्य्यलोकं समुत्सृज्य मम लोके महीयते ॥ ८१ ।
तत्राश्चर्य्यं प्रवक्ष्यामि विष्णुं शत्रुगणेश्वरम् ।
पापिनां यस्तु दुर्द्दर्शः सुदृश्यः पुण्यचारिणाम् ॥ ८२ ।
तस्य दक्षिणपार्श्वेन अश्वत्थो वै महाद्रुमः ।
चतुर्विंशतिद्वादश्यां मध्याह्ने तु दिवाकरे ।
फलते स यथान्यायं सर्व्वभागवतप्रियम् ।
उच्चश्चैव विशालश्च मनोज्ञश्चैव शीतलः ॥ ८३।८४ ।
ये लभन्ते फलं तत्र मम मार्गानुसारिणः ।
ते लभन्ते परां सिद्धिमेवमेतन्न संशयः ॥ ८५ ।
तस्मिन् क्षेत्रे महाभागे तिष्ठामि चोत्तरामुखः ।
सर्व्वभागवतप्रीतिं समुद्रतटमाश्रितः ।
अहं रामेण सहितः सा च एकादशी शुभा ।

त्रीणि तत्रैव तिष्ठामी द्वारकायां यशस्विनि ॥ ८६।८७ ।
तस्मिन् चैत्रे महाभागे त्रयो मोदामहे वयम् ।
त्रिंशद्योजनविस्तारः सर्व्वतस्तु दिशो दश ॥ ८८ ।
तत्र गत्वा वरारोहे ये मां द्रक्ष्यन्ति भक्तितः ।
अदीर्घेणैव कालेन प्राप्नुवन्ति पराङ्गतिम् ॥ ८९ ।
आख्यानानां महाख्यानं शान्तीनां शान्तिरुत्तमा ।
धर्म्माणां परमो धर्म्मो द्युतीनां परमा द्युतिः ॥ ९० ।
लाभानां परमो लाभः क्रियाणां परमा क्रिया ।
श्रुतीनां परमं श्रेष्ठं तपसाञ्च परं तपः ॥ ९१ ।
एतन्मरणकालेऽपि मा कदाचित्तु विस्मरेत् ।
यदीच्छेत्परमां सिद्धिं मम लोकाय गच्छति ॥ ९२ ।
य एतत्पठते भद्रे कल्यमुत्थाय मानवः ।
सकुल्यास्तारितास्तेन सप्त सप्त च सप्त च ॥ ९३ ।
एतत्ते कथितम्भद्रे द्वारकायाः सुनिश्चयम् ।
उचितेनोपचारेण किमन्यत्परिपृच्छसि ॥ ९४ ।

इति वराहपुराणे भगवच्छास्त्रे द्वारवतीमाहात्म्यवर्णनो नाम

ऊनपञ्चाशदधिकशततमोऽध्यायः ।

पञ्चाशदधिकशततमोऽध्यायः ।

सूत उवाच ।

द्वारकायास्तु माहात्म्यं श्रुत्वा ह्येतत्सुभाषितम् ।
हृष्टोवाच तदा देवं धर्म्मकामा वसुन्धरा ॥ १ ।

धरण्युवाच ।

अहो देव प्रसादश्च यत्त्वया परिकीर्त्तितम् ।
श्रुत्वैतत्परमं पुण्यं प्राप्तास्मि परमां श्रियम् ॥ २ ।
एतस्मादपि चेद्गुह्यं लोकनाथ जनार्द्दन ।
यद्यस्ति प्रोच्यतां मह्यङ्कृपा चेत्परमाऽपि ते ॥ ३ ।
ततो महीवचः श्रुत्वा विष्णुः कमललोचनः ।
वराहरूपी भगवान् प्रत्युवाच वसुन्धराम् ॥ ४ ।

वराह उवाच ।

सानन्दूरेति विख्यातं भूमे गुह्यम्परं मम ।
उत्तरे तु समुद्रस्य मलयस्य तु दक्षिणे ॥ ५ ।
तत्र तिष्ठामि वसुधे उदीचीं दिशमाश्रितः ।
प्रतिमा वै मदीयास्ति नात्युच्चा नातिनीचका ॥ ६ ।
आयसीन्तां वदन्त्येके अन्ये ताम्रमयीन्तथा ।
कांस्यां रीतिमयीमन्ये केचित्सीसकनिर्म्मिताम् ।
शिलामयीमित्यपरे महदाश्चर्य्यरूपिणीम् ॥ ७ ।
तत्र स्थानानि वै भूमे कथ्यमानानि वै शृणु ।
मनुजा यत्र मुच्यन्ते गताः संसारसागरम् ॥ ८ ।

तत्राश्चर्य्यं प्रवक्ष्यामि सानन्दूरे यशस्विनि ।
सौवर्णं दृश्यते पद्मं मध्याह्ने तु दिवाकरे ॥ ९ ।
यत्र रामगृहं नाम मम गुह्यं यशस्विनि ।
तत्रापि शृणु चाश्चर्य्यं यथापि परिवर्त्तते ॥ १० ।
एका तत्र लता वृक्षे उच्चैस्थूलो महाद्रुमः ।
समुद्रमध्ये तिष्ठन्तं कोऽपि तत्र न पश्यति ॥ ११ ।
अन्यच्च ते प्रवक्ष्यामि महाश्चर्य्यं वसुन्धरे ।
मम भक्ता हि पश्यन्ति तिष्ठमानाः स्वकर्म्मणा ।
बहुमत्स्यसहस्राणि कोट्योह्यर्व्वुदमेव च ॥ १२ ।
क्षिप्तः पिण्डश्च तन्मध्ये येन केन विकर्म्मिणा ।
एकस्तत्र स्थूलमत्स्यो भूमे चक्रेण चाङ्कितः ।
तावत्कश्चिन्न गृह्णाति यावत्तेन न भक्षितः ॥ १३ ।
तत्र रामसरो नाम गुह्यक्षेत्रं परं मम ।
अगाधश्चाप्यपारश्च रक्तपद्मविभूषितम् ॥ १४ ।
तत्र स्नानन्तु कुर्व्वीत एकरात्रोषितो नरः ।
बुधस्य भवनङ्गत्वा मोदते नात्र संशयः ॥ १५ ।
अथ प्राणान् प्रमुच्येत तस्मिन् सरसि सुन्दरि ।
बुधस्य भवनं त्यक्त्वा मम लोकम्प्रपद्यते ॥ १६ ।
तस्मिन्रामसरस्युच्चैराश्चर्य्यं शृणु सुन्दरि ।
मनुजास्तत्र पश्यन्ति मम कर्म्मरता न ये ॥ १७ ।
तत्सरः क्रोशविस्तारं बहुगुल्मलतावृतम् ।
मनोज्ञं रमणीयञ्च जलजैश्चापि संवृतम् ॥ १८ ।

तत्र रूढ़ानि पद्मानि द्योतयन्ति दिशो दश ।
एकन्तु दृश्यते श्वेतमब्जं रुक्ममयं तथा ॥ १९ ।
तत्र ब्रह्मसरस्युच्चैरुत्तरम्पार्श्वमाश्रिता ।
धारा चैका प्रपतति स्थूला मुसलसन्निभा ॥ २० ।
तत्र स्नानं प्रकुर्व्वीत षष्ठकालोषितोनरः ।
ब्रह्मलोकं समासाद्य मोदते नात्र संशयः ॥ २१ ।
अथात्र मुञ्चते प्राणैर्भूमे ब्रह्मसरस्यपि ।
ब्रह्मणा समनुज्ञातो मम लोकञ्च गच्छति ॥ २२ ।
तत्राश्चर्य्यं महाभागे रम्ये ब्रह्मसरे* शृणु ।
मद्भक्ता यत्र† पश्यन्ति घोरसंसारमोक्षणम् ॥ २३ ।
चतुर्विंशतिद्वादश्यां सा धारा पृथुलेक्षणे ।
मध्याह्ने पतति‡ भूमि यावत्सूर्य्यस्तु तिष्ठति ॥ २४ ।
परिवृत्ते तु मध्याह्ने सा धारा न पतेद्भुवि ।
एवं तत्र महाश्चर्य्यं पुण्यब्रह्मसरोवरे ॥ २५ ।
अस्ति सङ्गमनं नाम गुह्यक्षेत्रं परं मम ।
समुद्रस्यैव रामस्य समीप्येते वराङ्गने ॥ २६ ।
तत्र कुण्डं महाभागे प्रसन्नविमलोदकम् ।
बहुगुल्मलताकीर्णं शोभितञ्च विहङ्गमैः ॥ २७ ।
समुद्रस्य तु पार्श्वेण अदूरात्तत्र योजनात् ।
मण्डितं कुमुदैः पद्मैः सुगन्धैर्योत्तमैस्तथा ॥ २८ ।

---

* ब्रह्मसरसीति साधु । † यानि पश्यन्तीति (ग) । ‡ पततीति साधु, एवमन्यत्रापि ।

तत्र स्नानन्तु कुर्व्वीत षष्ठकालोषितोनरः ।
समुद्रभवनङ्गत्वा मम लोकम्प्रपद्यते ॥ २९ ।
तत्राश्चर्य्यं प्रवक्ष्यामि कुण्डं रामस्य सङ्गमे ।
यद्दृष्ट्वा मनुजास्तत्र भ्रमन्ति विगतज्वराः ॥ ३० ।
यानि कानि च पर्णानि पतन्ति जलसंसदि ।
एकमप्यत्र पश्यन्ति न केऽपि वसुधे नराः ॥ ३१ ।
अच्छिद्राणि च पत्राणि तस्मिन्रामस्य सङ्गमे ।
प्रपन्नेनापि मार्गं तच्छिद्रं तत्र न पश्यति ॥ ३२ ।
अस्ति शक्रसरो नाम गुह्यक्षेत्रं परं मम ।
तत्र पूर्व्वेण पार्श्वेण अदूरादर्द्धयोजनात् ।
तस्य कुण्डस्य सुश्रोणि चतस्रो विषमाश्रिताः* ।
धाराः पतन्ति कल्याणि प्रसन्नसलिलास्तथा ॥ ३३।३४ ।
तत्र स्नानं प्रकुर्व्वीत चतुष्कालोषितो नरः ।
चतुर्णां लोकपालानां लोकानाप्नोति चोत्तमान् ॥ ३५ ।
अस्मिंश्च शक्रसरसि यदि प्राणान् प्रमुञ्चति ।
लोकपालान् समुत्सृज्य मम लोकेषु मोदते ॥ ३६ ।
तत्राश्चर्य्यं महाभागे दृश्यते तच्छृणुष्व मे ।
शुद्धैर्भागवतैर्भूमे सर्व्वसंसारमोचणम् ॥ ३७ ।
ता धाराश्चतुरो भद्रे पतन्ति चतुरो दिशः ।
न च तद्वर्द्धते चाम्भो न चैव परिहीयते ॥ ३८ ।

---

* दिगुपाश्रिता इति (ग) ।

मासे भाद्रपदे चैव शुक्लपक्षे तु द्वादशी ।
श्रूयते गीतनिर्घोषः श्रुतिकर्म्ममनोहरः ॥ ३९ ।
अस्ति सूर्पारकं नाम गुह्यं क्षेत्रं परं मम ।
जामदग्न्यस्य रामस्य आश्रमोऽथ भविष्यति ॥ ४० ।
तत्र तिष्ठाम्यहं देवि समुद्रतटमाश्रितः ।
शाल्मलीञ्चाग्रतः कृत्वाधिष्ठितश्चोत्तरामुखः ॥ ४१ ।
तत्र स्नानम्प्रकुर्व्वीत पञ्चकालोषितो नरः ।
ऋषिलोकं ततो गत्वा पश्यते चाप्यरुन्धतीम् ॥ ४२ ।
अथ प्राणान्विमुञ्चेत कृत्वा कर्म्म सुदुष्करम् ।
ऋषिलोकं परित्यज्य मम लोकं प्रपद्यते ॥ ४३ ।
तत्राश्चर्य्यं महाभागे नमस्कारं च कुर्व्वते ।
वर्षाणि द्वादशैतेन नमस्कारः कृतोभवेत् ॥ ४४ ।
तस्मिन् क्षेत्रे महाभागे पश्यन्ति परिनिष्ठिताः ।
पापात्मानो न पश्यन्ति मम मायाविमोहिताः ॥ ४५ ।
चतुर्विंशतिद्वादश्यां समुपायान्ति शाल्मलीम् ।
तत्र पश्यन्ति सुश्रोणि शुद्धा भागवता नराः ॥ ४६ ।
तस्मिन् क्षेत्रे महाभागे अस्ति गुह्यम्परं मम ।
जटाकुण्डमिति ख्यातं वायव्यां दिशि संस्थितम् ॥ ४७ ।
तत्कुण्डस्य महाभागे समन्तादृश्ययोजनम् ।
मलयस्य दक्षिणेन समुद्रस्योत्तरे तथा ॥ ४८ ।
तत्र स्नानन्तु कुर्व्वीत पञ्चकालोषितो नरः ।
अगस्तिभवनं गत्वा मोदते नात्र संशयः ॥ ४९ ।

अथ प्राणान् प्रमुञ्चेत मम चिन्तापरायणः ।
अगस्तिभवनं त्यक्त्वा मम लोकन्तु गच्छति ॥ ५० ।
तस्य कुण्डस्य सुश्रोणि नव धारा न किञ्चन ।
विस्तारश्च महाभागे अगाधश्च महार्णवः ॥ ५१ ।
आश्चर्य्यं सुमहत्तत्र कथ्यमानं मया शृणु ।
यच्च पश्यति सुश्रोणि समन्तादितरो जनः ॥ ५२ ।
चतुर्विंशतिद्वादश्यां रवावभ्युदिते सति ।
न वर्द्धति* ततश्चाम्भो यावत्तिष्ठति तत्पुनः ॥ ५३ ।
एतत्ते कथितं भद्रे सानन्दूरेति तन्मया ।
आश्चर्य्यञ्च प्रमाणञ्च भक्तिकीर्त्तिविवर्द्धनम् ॥ ५४ ।
गुह्यानां परमङ्गुह्यं स्थानानां परमं महत् ।
यस्तु गच्छति सुश्रोणि अष्टभक्तपथे स्थितः ।
प्राप्नोति परमां सिद्धिं ममैव वचनं यथा ॥ ५५ ।
य एतत्पठते नित्यं यश्चैवं शृणुयान्मुदा ।
कुलानि तेन तीर्णानि षट् च षट् च पुनश्च षट् ॥ ५६ ।
एतन्मरणकाले न विस्मर्त्तव्यङ्कदाचन ।
यदीच्छेद्विष्णुलोके हि निष्कलङ्कमनं नरः ॥ ५७ ।
एतत्ते कथितम्भद्रे त्वया पृष्टश्च मां प्रति ।
उक्तं भागवतार्थाय किमन्यत्परिपृच्छसि ॥ ५८ ।

इति वराहपुराणे भगवच्छास्त्रे सानन्दूरमाहात्म्यवर्णनो नाम
पञ्चाशदधिकशततमोऽध्यायः ।

---

* वर्द्धते इति साधु ।

एकपञ्चाशदधिकशततमोऽध्यायः ।

सूत उवाच ।

सानन्दूरस्य माहात्म्यमेतच्छ्रुत्वा वसुन्धरा ।
कृताञ्जलिपुटा भूत्वा वराहं पुनरब्रवीत् ॥ १ ।

धरण्युवाच ।

श्रुतमेतज्जगन्नाथ विष्णो गुह्यमनुत्तमम् ।
यच्छ्रुत्वा सुमहाभाग जाताऽस्मि विगतज्वरा ॥ २ ।
अपरं वाऽस्ति चेत्किञ्चिद्गुह्यं चेत्रं शुभावहम् ।
सानन्दूरात्परङ्गुह्यक्षेत्रमस्ति न वा परम् ॥ ३ ।

सुरकरण नृसिंह लोकनाथ
युतससुरासुरधीरदेववीर ।
कमलदलसहस्रनेत्ररूपो
जयति कृतान्तसमानकालरूपः ॥ ४ ।

गद्गदं वचनं श्रुत्वा पृथिव्याः स जनार्द्दनः ।
उवाच मधुरं वाक्यं सर्व्वलोकार्त्तिहा हरिः ॥ ५ ।

वराह उवाच ।

शृणु देवि च तत्त्वेन यस्मात्त्वं परिपृच्छसि ।
गुह्यमन्यत्प्रवक्ष्यामि मद्भतः कर्म्मणोजनिः ॥ ६ ।
ततः सिद्धवटे गत्वा त्रिंशद्योजनदूरतः ।
म्लेच्छमध्ये वरारोहे हिमवन्तं समाश्रितम् ॥ ७ ।
तत्र लोहार्गले चेत्रे निवासो विहितः शुभः ।

गुह्यं पञ्चदशायामं समन्तात्पञ्चयोजनम् ॥ ८ ।
दुर्गमं दुःसहञ्चैव पापैः सर्व्वत्र वेष्टितम् ।
सुलभं पुण्ययुक्तानां मम चिन्तानुसारिणाम् ॥ ९ ।
तत्र तिष्ठाम्यहं भद्रे उदीचीं दिशमाश्रितः ।
हिरण्मप्रतिमां कृत्वा जातरूपां न संशयः ॥ १० ।
ततो मे दानवाः सर्व्वे व्रामन्तो लोकमुत्तमम् ।
मया चैवान्तरङ्कृत्वा कृत्वा मायां च वैष्णवीम् ॥ ११ ।
तत्र ब्रह्मा च रुद्राश्च स्कन्देन्द्रसमरुद्गणाः ।
आदित्या वसवो वायुरश्विनौ च महौजसौ ॥ १२ ।
सोमो बृहस्पतिश्चैव ये चान्ये वै दिवौकसः ।
तेषाञ्चैवार्गलं दत्त्वा चक्रं गृह्य महौजसम् ।
शतकोटिसहस्राणि शीघ्रमेव निपातितम् ॥ १३ ।
ततश्च देवताः सर्व्वास्तुष्यमाणा* इतस्ततः ।
एवं लोहार्गलं नाम चेत्रं नाम मया कृतम् ॥ १४ ।
ततो देवासुरे युद्धे हत्वा त्रिदशकण्टकान् ।
तेषां संस्थापनं तत्र कृतञ्चैव महौजसाम् ॥ १५ ।
यो मां पश्यति तत्रस्थं प्रयत्नेन कदाचन ।
सोऽपि भागवतो भूमे भवत्येव सुनिश्चितः ॥ १६ ।
तस्मिन् कुण्डेति† सुश्रोणि यः स्नाति नियतो नरः ।
उपोष्य च त्रिरात्रन्तु विधिदृष्टेन कर्म्मणा ।
ततः स्वर्गसहस्रेषु मोदते नात्र संशयः ॥ १७ ।

---

* तुष्यन्ता इति साधु । † कुण्डे इति छन्दोरार्षः ।

अथाऽत्र मुञ्चते प्राणान् स्वकर्म्मपरिनिष्ठितः।
सर्व्वान् स्वर्गान् परित्यज्य मम लोकं प्रपद्यते॥ १८।
अन्यच्च ते प्रवक्ष्यामि यत्र तत्परमाद्भुतम्।
लोकविस्मापनार्थाय मया तत्र च यत्कृतम्॥ १९।
चतुर्विंशतिद्वादश्यां मासेन विधिना मम।
बलिः प्रदीयते तत्र सर्व्वकामविशोधमः॥ २०।
अश्वो मे कल्पितस्तत्र सर्व्वरत्नविभूषितः।
श्वेतः कुमुदवर्णाभः शङ्खकुन्दसमप्रभः॥ २१।
मार्गणा मे धनुस्तत्र अक्षसूत्रं कमण्डलुः।
आसनं विततं दिव्यं दीयतेऽश्वोपरि स्थिरम्॥ २२।
श्वेतपर्व्वतमारुह्य पतमानः कुरून् बहून्।
पतितस्तत्र दृश्येत चतं तत्र न दृश्यते॥ २३।
अनेकान्येव रूपाणि पातयित्वा नभस्तलात्।
शान्तो दान्तः परिक्लिष्टः स चाश्वोद्दिवि वर्त्तते॥ २४।

सूत उवाच।

ततो भूम्या वचः श्रुत्वा ब्रह्मपुत्त्रो महामुनिः।
विस्मयं परमम्प्राप्तो विष्णुमायोपबृंहितः॥ २५।
ततः स विस्मयाविष्टो ब्रह्मपुत्त्रो महामतिः।
सनत्कुमारो भगवान् पुनरेव प्रभापत*॥ २६।

सनत्कुमार उवाच।

धन्यासि देवि सुश्रोणि सुपुण्यासि वरानने।

---

* प्राभापतेति साधु।

देवि यल्लोकनाथस्य साक्षाद्दर्शनमागता ॥ २७ ।
पद्मपत्रविशालाक्षो यत्त्वया परिभाषितः ।
तेनोक्तं शंस सकलं सर्व्वेषां सुखवर्द्धनम् ॥ २८ ।

यथा यथा वदसि च धर्म्मसंहितं
गुह्यं परं देववरप्रणीतम् ।
गुणोत्तमङ्कारणसम्प्रयुक्तं
तथा तथा भावयसे मनो मम ॥ २९ ।

ततः स पुण्डरीकाक्षः किमाचष्ट ततः परम् ।
कर्म्मणा विविष्टेन सर्व्वभागवतप्रिय ॥ ३० ।

सूत उवाच ।

तस्य तद्वचनं श्रुत्वा कुमारस्य महौजसः ।
उवाच मधुरं वाक्यमाभाष्य ब्रह्मणः सुतम् ।
शृणु वत्स जगन्नाथो यथा मामाह नोदितः ॥ ३१ ।

वराह उवाच ।

एवं तत्रैव कर्म्माणि क्रियन्ते विधिपूर्व्वकम् ।
शोधकानि च पापानां मृदूनि च शुभानि च ॥ ३२ ।
अश्वानां तत्कुलीनानामावहन्ति सुमध्यमे ।
नान्यं वहन्ति ते चाश्वा मम वाहा दुरत्ययाः ॥ ३३ ।
कुण्डं पञ्चसरो नाम गुह्यं चैत्रं परं मम ।
धाराः पतन्ति चत्वारि* शङ्खवर्णा मनोजवाः ॥ ३४ ।

* चतस्र इति पाठः ।

तत्र स्नानन्तु कुर्व्वीत चतुर्भुक्तोषितो नरः।
लोकञ्चैत्राङ्गदङ्गत्वा गन्धर्व्वैः सह मोदते ॥ ३५ ।
अथ चेन्मुञ्चते प्राणांस्तस्मिन् चेत्रे परे मम।
गन्धर्व्वलोकमुत्सृज्य मम लोकाय गच्छति ॥ ३६ ।
ततो नारदकुण्डेति मम चेत्रे परे महत्।
पञ्च धाराः पतन्त्यत्र तालवृक्षसमोपमाः ॥ ३७ ।
तत्र स्नानन्तु कुर्व्वीत एकभक्तोषितो नरः।
देवर्षिं नारदं पश्येन्मोदते तेन वै समम् ॥ ३८ ।
अथात्र मुञ्चते प्राणान्मम गुह्यविनिश्चितः।
प्रमुच्य नारदं दिव्यं मम लोकञ्च गच्छति ॥ ३९ ।
ततो वसिष्ठकुण्डेति तस्मिन् चेत्रं परं मम।
धाराः पतन्ति तिस्रस्तु न स्थूला नाति वै कृशाः ॥ ४० ।
तत्राभिषेकं कुर्व्वीत पञ्चकालोषितो नरः।
वासिष्ठं लोकमासाद्य मोदते नात्र संशयः ॥ ४१ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मसु निष्ठितः।
वासिष्ठं लोकमुत्सृज्य मम लोकं प्रपद्यते ॥ ४२ ।
पञ्चकुण्डेति विख्यातं तस्मिन् चेत्रे परं मम।
पञ्च धाराः पतन्त्यत्र हिमकूटविनिःसृताः ॥ ४३ ।
तत्राभिषेकं कुर्व्वीत पञ्चकालोषितो नरः।
स तत्र गच्छते* भूमे यत्र पञ्चशिखो मुनिः ॥ ४४ ।

---

* गच्छतीति साधु।

अथात्र मुञ्चते प्राणान्मम भक्तो जितेन्द्रियः ।
पञ्चचूड़ं समुत्सृज्य स याति परमाङ्गतिम् ॥ ४५ ।
सप्तर्षिकुण्डं विख्यातमस्मिन् क्षेत्रे परं मम ।
सप्त धाराः पतन्त्यत्र हिमवत्पर्व्वतस्थिताः ॥ ४६ ।
तत्राभिषेकं कुर्व्वीत सप्तभक्तोषितो नरः ।
मोदते ऋषिलोकेषु ऋषिकन्याभिसंवृतः ॥ ४७ ।
अथात्र मुञ्चते प्राणान्रागलोभविवर्ज्जितः ।
सप्तर्षीन् स समुत्सृज्य मोदते मम संस्थितः ॥ ४८ ।
शरभङ्गस्य कुण्डं वै क्षेत्रे गुह्यं परे मम ।
तत्र धारा पतत्येका शरभङ्गाश्रिता नदी ॥ ४९ ।
स्नानं यस्तत्र कुर्व्वीत षष्ठभक्तोषितो नरः ।
मोदते तस्य लोकेषु ऋषिकन्याप्रमोदितः ॥ ५० ।
अथात्र मुञ्चते प्राणान् सर्व्वसङ्गविवर्ज्जितः ।
शरभङ्गं समुत्सृज्य मम लोके महीयते ॥ ५१ ।
कुण्डमग्निसरो नाम सर्व्वमायाभिसंवृतम् ।
भूमिं नीत्वा जलं तत्र तिष्ठते* च वरानने ॥ ५२ ।
तत्र स्नानम्प्रकुर्व्वीत अष्टकालोषितो नरः ।
गच्छत्यङ्गिरसो लोकं सुखभागी न संशयः ॥ ५३ ।
अथात्र मुञ्चते प्राणान्मम कर्म्मपरायणः ।
अग्निलोकं समुत्सृज्य मम लोकं स गच्छति ॥ ५४ ।

---

* तिष्ठतीति भाषु ।

कुण्डं बृहस्पतेर्भूमे सर्व्ववेदोदकाश्रितम्।
धारा चैका पतत्यत्र हिमकूटसमाश्रिता ॥ ५५ ।
तत्र स्नानम्प्रकुर्व्वीत षष्ठकालोषितो नरः।
गत्वा बृहस्पतेर्लोकं मुनिकन्याभिमोदितः ॥ ५६ ।
अथात्र मुञ्चते प्राणान्मम लोकसमाश्रितः।
सोऽपि याति परां सिद्धिं समुत्सृज्य बृहस्पतिम् ॥ ५७ ।
वैश्वानरस्य कुण्डेति गुह्यक्षेत्रं परं मम ।
धारा चैका पतत्यत्र दृश्यते हिमसङ्कयात् ॥ ५८ ।
तत्राभिषेकं कुर्व्वीत षष्ठभक्तोषितो नरः।
गत्वा बृहस्पतेर्लोकं मुनिकन्याभिमोहितः।
वैश्वानरेषु लोकेषु मोदते नाऽत्र संशयः॥ ५९ ।
अथाऽत्र मुञ्चते प्राणान्मम कर्म्मपरायणः।
वैश्वानरं समुत्सृज्य मम लोकं स गच्छति ॥ ६० ।
कार्त्तिकेयस्य कुण्डेति गुह्यक्षेत्रं परं मम।
यत्र पञ्चदशा* धाराः पतन्ति हिमपर्व्वतात् ॥ ६१ ।
तत्र स्नानम्प्रकुर्व्वीत षष्ठकालोषितोनरः।
कुमारम्पश्यते व्यक्तं षन्मुखं शुभदर्शनम् ॥ ६२ ।
अथाऽत्र मुञ्चते प्राणान् कृत्वा चान्द्रायणं शुचिः।
कार्त्तिकेयं समुत्सृज्य मोदते मम मण्डले ॥ ६३ ।
उमाकुण्डेति विख्यातं तस्मिन् क्षेत्रे परं मम।
सा गौरी यत्र चोत्पन्ना महादेववराङ्गना ॥ ६४ ।

* पञ्चदशा इत्यार्षम्, पञ्चदश इति साधु।

तत्र स्नानन्तु कुर्व्वीत दशरात्रोषितोनरः।
गौरीं स पश्यते देवीं तस्या लोके च मोदते॥ ६५।
अथ प्राणान् प्रमुच्चेत दशरात्रोषितोनरः।
उमालोकं समुत्सृज्य मम लोकन्प्रपद्यते॥ ६६।
महेश्वरस्य वै कुण्डं यत्र चोद्वाहिता उमा।
कादम्बैश्चक्रवाकैश्च हंससारससेवितम्॥ ६७।
तिस्रो धाराः पतन्त्यत्र हिमवत्पर्व्वताश्रिताः।
स्थूलाश्च रमणीयाश्च न ह्रस्वाश्चातिनिर्म्मलाः॥ ६८।
तत्र स्नानन्तु कुर्व्वीत द्वादशाहोषितो नरः।
मोदते रुद्रलोकेषु रुद्रकन्याभिरावृतः॥ ६९।
अथात्र मुञ्चते प्राणान् कृत्वा कर्म्म सुदुष्करम्।
रुद्रलोकं समुत्सृज्य मम लोकञ्च गच्छति॥ ७०।
प्रख्यातं ब्रह्मकुण्डेति वेदा यत्र समुत्थिताः।
चतुरो* वेदधारास्तु पतन्ति च हिमालयात्॥ ७१।
ततः पूर्व्वेण पार्श्वेन समा धारा पतेच्छुभा।
उष्णा च रमणीया च पाण्डरोदकशोभिता॥ ७२।
पुनरस्योत्तरे पार्श्वे सुवर्णसदृशोपमा।
ऋग्वेदः पतते धारा प्रसन्ना विमलोदका॥ ७३।
अथ पश्चिमपार्श्वेन यजुर्वेदेन संयुता।
अथ दक्षिणपार्श्वेन आथर्व्वणसमन्विता॥ ७४।
एका धारा पतत्यत्र इन्द्रगोपकसन्निभा॥ ७५।

---

* पतग इति साधु।

यस्तत्र कुरुते स्नानं सप्तरात्रोषितो नरः ।
ब्रह्मलोकं समासाद्य ब्रह्मणा सह मोदते ॥ ७६ ।
अथात्र मुञ्चते प्राणानहङ्कारविवर्ज्जितः ।
ब्रह्मलोकं परित्यज्य मम लोकम्प्रपद्यते ॥ ७७ ।
गुह्याख्याने महाभागे चेत्रे लोहार्गले मम ।
सिद्धिकामेन मर्त्त्येन गन्तव्यं नात्र संशयः ॥ ७८ ।
समन्तात्पञ्चविंशन्तु योजनानि वरानने ।
न तस्य कर्म्म विद्येत स एवमपि संस्थितः ॥ ७९ ।
आख्यानानां महाख्यानं धर्म्माणां धर्म्म उत्तमः ।
पवित्राणां पवित्रन्तु न देयं यस्य कस्यचित् ॥ ८० ।
ये पठन्ति महाभागे शृण्वन्ति मत्परे स्थिताः ।
तारितानि कुलानि स्युरुभयत्र दशापि च ॥ ८१ ।
एतन्मरणकाले तु न कदाचित्तु विस्मरेत् ।
यदिच्छेत्परमां सिद्धिं सर्व्वसंसारमोचणीम् ॥ ८२ ।
एतत्ते कथितं भद्रे लोहार्गलमनुत्तमम् ।
माहात्म्यं पद्मपत्राचि गुह्यं यच्च मह्योजसम् ।
मङ्गल्यञ्च पवित्रञ्च मम भक्तसुखावहम् ॥ ८३ ।

इति वराहपुराणे भगवच्छास्त्रे लोहार्गलमाहात्म्यवर्णनो नाम एकपञ्चाशदधिकशततमोऽध्यायः ।

द्वापञ्चाशदधिकशततमोऽध्यायः ।

सूत उवाच ।

श्रुत्वा देवस्य माहात्म्यं लोहार्गलनिवासिनः ।
त्रैलोक्यनाथाधिपतेर्विस्मयं परमङ्गता ॥ १ ।

धरण्युवाच ।

पद्मपत्रविशालाक्ष लोकनाथ जगत्पते ।
त्वत्प्रसादाच्च देवेश श्रुतं शास्त्रं महौजसम् ॥ २ ।
तव शिष्या च दासी च त्वामहं शरणङ्गता ।
जगद्धाता जगज्ज्योतिर्जगत्प्रभुरतन्द्रितः ॥ ३ ।
तव सम्भावनाद्देव* जातास्मि कनकोज्ज्वला ।
अलङ्कृता च शस्ता च सर्व्वशास्त्रेण मानद ॥ ४ ।
जगद्धातुर्जगच्छास्त्रकृतेन हि परिश्रमः ।
त्वय्यायत्तं जगत्सर्व्वं यच्च किञ्चित्प्रवर्त्तते ॥ ५ ।
इति कृत्वा च मे देव साह्लादोहृदि वर्त्तसे ।
लोहार्गलात्परं श्रेष्ठं गुह्यं परमदुर्ल्लभम् ॥ ६ ।
तीर्थं तद्वद कल्याणं तीर्थानामुत्तमोत्तमम् ।
यदस्ति दुर्ल्लभं तीर्थं तत्त्वं कथय मे प्रभो ॥ ७ ।

वराह उवाच ।

न विद्यते च पाताले नान्तरीक्षे न मानुषे ।
समानं मथुराया हि प्रियं मम वसुन्धरे ॥ ८ ।

---

* तव सम्भाषणादिति (ग) पुस्तके पाठः ।

सूत उवाच।

तच्छ्रुत्वा वचनं तस्य प्रियञ्च वसुधा तदा।
प्रणम्य शिरसा देवी वराहं पुनरब्रवीत्॥ ९॥

पृथिव्युवाच।

पुष्करं नैमिषञ्चैव पुरीं वाराणसीं तथा।
एतान् हित्वा महाभाग मथुरां किं प्रशंससि॥ १०॥

वराह उवाच।

शृणु कार्त्स्न्येन वसुधे कथ्यमानं मयानघे।
मथुरेति च विख्यातं तस्मान्नास्ति परं मम।
सा रम्या च सुशस्ता च जन्मभूमिस्तथा मम॥ ११॥
शृणु देवि यथा स्तौमि मथुरां पापहारिणीम्।
तत्र वासी नरो याति मोक्षं नास्त्यत्र संशयः॥ १२॥
महामाघ्यां प्रयागे तु यत्फलं लभते नरः।
तत्फलं लभते देवि मथुरायां दिने दिने॥ १३॥
पूर्णं वर्षसहस्रन्तु वाराणस्यान्तु यत्फलम्।
तत्फलं लभते देवि मथुरायाङ्क्षणेन हि॥ १४॥
कार्त्तिक्याञ्चैव यत्पुण्यं पुष्करे तु वसुन्धरे।
तत्फलं लभते देवि मथुरायां जितेन्द्रियः॥ १५॥
मथुरान्तु परित्यज्य योऽन्यत्र कुरुते रतिम्।
मूढो भ्रमति संसारे मोहितोमम मायया॥ १६॥
यः शृणोति वरारोहे माथुरं मम मण्डलम्।
अन्येनोच्चारितं शश्वत्सोऽपि पापैः प्रमुच्यते॥ १७॥

पृथिव्यां यानि तीर्थानि आसमुद्रं सरांसि च ।
मथुरायां प्रयान्त्यत्र सुप्ते चैव जनार्दने ॥ १८ ।
मथुरामण्डलं प्राप्य श्राद्धङ्कृत्वा यथाविधिं ।
तृप्तिं प्रयान्ति पितरो यावत्स्थित्यग्रजन्मनः ॥ १९ ।
ये वसन्ति महाभागे मथुरामितरे जनाः ।
तेऽपि यान्ति परां सिद्धिं मत्प्रसादान्न संशयः ॥ २० ।
कुब्जाम्रके सौकरवे मथुरायां विशेषतः ।
विना सांख्येन योगेन मत्प्रसादान्न संशयः ॥ २१ ।
मथुरायां महापुर्य्यां ये वसन्ति शुचिव्रताः ।
बलिभिक्षाप्रदातारो देवास्ते नरविग्रहाः ॥ २२ ।
भविष्यामि वरारोहे द्वापरे युगसंस्थिते ।
ययातिभूपवंशाच्च क्षत्रियः कुलवर्द्धनः ।
भविष्यामि वरारोहे मथुरायां न संशयः ॥ २३ ।
मूर्त्तिं चतुर्विधाङ्कृत्वा स्थास्यामि ऋषिभिः स्तुतः ।
वत्सराणां शतं तत्र युद्धेषु कृतनिश्चयः ॥ २४ ।
एका चन्दनसङ्काशा द्वितीया कनकप्रभा ।
अशोकसदृशा चान्या अन्याचोत्पलसन्निभा ॥ २५ ।
तत्र गुह्यानि नामानि भविष्यन्ति मम प्रिये ।
पुण्यानि च पवित्राणि संसारच्छेदनानि च ॥ २६ ।
यत्राहङ्घातयिष्यामि द्वात्रिंशतिर्वसुन्धरे ।
दैत्यान् घोरान्महाभागे कंसादीन्धर्मदूषकान् ॥ २७ ।
यमुना यत्र सुवहा नित्यसन्निहिता ध्रुवम् ।

वैवस्वतसुता रम्या यमुना यत्र विश्रुता ।
गङ्गां प्राप्य प्रयागे या वेणीति प्रथिता भुवि ।
गङ्गाशतगुणा पुण्या माथुरे मम मण्डले ।
यमुना विश्रुता देवि नात्र कार्य्या विचारणा ॥ २८।२९ ।
तत्र तीर्थानि गुह्यानि भविष्यन्ति ममानघे ।
येषु स्नाने नरो देवि मम लोके महीयते ॥ ३० ।
अथात्र मुञ्चते प्राणान्मम कर्म्मपरायणः ।
न जायते स मर्त्त्येषु जायते च चतुर्भुजः ॥ ३१ ।
अविमुक्ते नरः स्नातो मुक्तिम्प्राप्नोत्यसंशयम् ।
तथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ३२ ।
विश्रान्तिसंज्ञकं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
यस्मिन् स्नातो नरो देवि मम लोकम्प्रपद्यते ॥ ३३ ।
सर्व्वतीर्थेषु यत्स्नानं सर्व्वतीर्थेषु यत्फलम् ।
तत्फलं लभते देवि दृष्ट्वा देवं गतश्रमम् ॥ ३४ ।
न च यज्ञैर्न तपसा न ध्यानैर्न च संयमैः ।
तत्फलं लभते स्नातो यथा विश्रान्तिसंज्ञके ॥ ३५ ।
कालनयन्तु वसुधे यः पश्यति गतश्रमम् ।
कृत्वा प्रदक्षिणे द्वे तु विष्णुलोकं स गच्छति ॥ ३६ ।
अस्ति चान्यत्परं गुह्यं सर्व्वसंसारमोक्षणम् ।
यस्मिन् स्नातो नरो देवि मम लोकम्प्रपद्यते ॥ ३७ ।
प्रयागं नाम तीर्थन्तु देवानामपि दुर्ल्लभम् ।
यस्मिन् स्नातो नरोदेवि अग्निष्टोमफलं लभेत् ॥ ३८ ।

इन्द्रलोकं समासाद्य नरोऽसौ देवि मोदते ।
अथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ३९ ।
तथा कनखलं नाम तीर्थं गुह्यम्परं मम ।
स्नानमात्रेण तत्रापि नाकपृष्ठे स मोदते ॥ ४० ।
अस्ति क्षेत्रं परं गुह्यं तिन्दुकं णाम नामतः ।
तस्मिन् स्नातो नरो देवि मम लोके महीयते ॥ ४१ ।
अस्मिंस्तीर्थे पुरा वृत्तं तच्छृणुष्व वसुन्धरे ॥ ४२ ।
पाञ्चालविषये देवि काम्पिल्यञ्च पुरोत्तमम् ।
धनधान्यसमायुक्तं ब्रह्मदत्तेन पालितम् ॥ ४३ ।
तस्मिंस्तु वसते देवि तिन्दुको नाम नापितः ॥ ४४ ।
तस्मिंस्तु वसतस्तस्य नापितस्य पुरोत्तमे ।
कालेन महता तस्य कुटुम्बञ्च क्षयङ्गतम् ॥ ४५ ।
क्षीणे कुटुम्बे तु तदा सुभृशं दुःखपीड़ितः ।
सर्व्वसङ्गं परित्यज्य सोऽगच्छन्मथुरां तदा ॥ ४६ ।
ब्रह्मणावसथे सोऽपि वसमानो* वसुन्धरे ।
तस्य कर्म्मगतङ्कृत्वा स्नात्वैव यमुनां नदीम् ।
नित्यं स यमुनां स्नाति चिरकालं दृढ़व्रतः ॥ ४७ ।
ततः कालेन महता पञ्चत्वं समुपागतः ।
स च तीर्थप्रभावेण जातोऽसौ ब्राह्मणोत्तमः ॥ ४८ ।
तस्मिन्वरगृहे देवि ब्राह्मणोयोगिनां वरः ।

---

* वसन्निति साधु ।

जातिस्मरो महाप्राज्ञो विष्णुभक्तो वसुन्धरे।
तत्तीर्थस्य प्रभावेण जाता मुक्तिः सुदुर्लभा॥ ४९॥
ततः परं सूर्य्यतीर्थं सर्व्वपापप्रमोचनम्।
वैरोचनेन बलिना सूर्य्यस्त्वाराधितः पुरा।
भ्रष्टराज्येन हि तथा धनकामेन सुन्दरि॥ ५०॥
ऊर्द्ध्वबाहुर्निराहारस्ततापं परमन्तपः*।
साग्रं संवत्सरं देवि ततः काममवाप्तवान्॥ ५१॥
तस्य प्रसन्नो भगवान् द्युमणिः प्रत्यभाषत।
किङ्कारणं बले ब्रूहि तपस्यति† महत्तपः॥ ५२॥

बलिरुवाच।

भ्रष्टराज्योऽस्मि देवेश पाताले निवसाम्यहम्।
वित्तेनापि विहीनस्य कुटुम्बभरणङ्कुतः॥ ५३॥
मुकुटात्तस्य वै सूर्य्यो ददौ चिन्तामणिं ततः।
चिन्तामणिं समासाद्य पातालमगमद्बलिः॥ ५४॥
तस्मिंस्तीर्थे नरः स्नातः सर्व्वपापैः प्रमुच्यते।
तत्राऽथ मुञ्चते प्राणान्मम लोकञ्च गच्छति॥ ५५॥
आदित्याहनि संक्रान्तौ‡ ग्रहणे चन्द्रसूर्य्ययोः।
तस्मिन् स्नातो नरो देवि राजसूयफलं लभेत्§॥ ५६॥
ध्रुवेण यत्र सन्तप्तं स्वेच्छया परमं तपः।

---

* स तेपे परमन्तप इति साधु। † भवानिति कर्त्तृपदस्य व्यवहारः कर्त्तव्यः वा तपस्यसीति कर्त्तव्यम्। ‡ संप्राप्ते इति (ग)। § लभेतेति साधु।

तत्र वै स्नानमात्रेण ध्रुवलोके महीयते ।
तत्राथ मुञ्चते प्राणान्मम लोके महीयते ॥ ५७ ।
ध्रुवतीर्थे तु वसुधे यः श्राडं कुरुते नरः ।
पितॄंस्तारयते सर्व्वं पितृपक्षे विशेषतः ॥ ५८ ।
दक्षिणे ध्रुवतीर्थस्य तीर्थराजं प्रकीर्त्तितम् ।
तस्मिन् स्नाते नरो देवि मम लोकम्प्रपद्यते ॥ ५९ ।
तद्दक्षिणे महादेवि ऋषितीर्थं परं मम ।
तत्र स्नातो नरो देवि ऋषिलोकम्प्रपद्यते ।
अथात्र मुञ्चते प्राणान्मम लोके महीयते ॥ ६० ।
दक्षिणे ऋषितीर्थस्य मोक्षतीर्थं परं मम ।
तत्र वै स्नानमात्रेण मोक्षमेव प्रपद्यते ॥ ६१ ।
तत्र वै कोटितीर्थं हि देवानामपि दुर्ल्लभम् ।
तत्र स्नानेन दानेन मम लोके महीयते ॥ ६२ ।
कोटितीर्थे नरः स्नात्वा सन्तर्प्य पितृदेवताः ।
तारिताः पितरस्तेन तथैव प्रपितामहाः ॥ ६३ ।
कोटितीर्थे नरः स्नात्वा ब्रह्मलोके महीयते ॥ ६४ ।
तत्रैव वायुतीर्थन्तु पितॄणामपि दुर्ल्लभम् ।
पिण्डदानात्तु तत्रैव पितृलोकं स गच्छति ॥ ६५ ।
गयापिण्डप्रदानेन यत्फलं लभते नरः ।
तत्फलं लभते देवि ज्येष्ठे दानान्न न संशयः ॥ ६६ ।
द्वादशैतानि तीर्थानि देवानां दुर्ल्लभानि च ।
स्नानं दानं जपं होमं सहस्रगुणितम्भवेत् ॥ ६७ ।

एषां स्मरणमात्रेण सर्व्वपापैः प्रमुच्यते ।
तीर्थानाञ्चैव माहात्म्यं श्रुत्वा कामानवाप्नुयात् ॥ ६८ ।

इति वराहपुराणे मथुरातीर्थप्रशंसा नाम
दापञ्चाशदधिकशततमोऽध्यायः ।

अथ:पञ्चाशदधिकशततमोऽध्यायः ।

वराह उवाच ।

उत्तरे शिवकुण्डाच्च तीर्थानां नवकं स्मृतम् ।
नवतीर्थात्परं तीर्थं न भूतं न भविष्यति ॥ १ ।
तत्रैव स्नानमात्रेण सौभाग्यं जायते परम् ।
रूपवन्तः प्रजायन्ते स्वर्गलोके न संशयः ।
तस्मिन् स्नातो नरो देवि मम लोकम्प्रपद्यते ॥ २ ।
तत्र संयमनं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
तत्र स्नातो मृतो वापि मम लोकं स गच्छति ॥ ३ ।
पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व* वसुन्धरे ।
तस्मिन्संयमने तीर्थे यद्वृत्तं पुरातनम् ॥ ४ ।
कश्चित्पापसमाचारो निषादो दुष्टमानसः ।

---

* शृणुष्वेति आर्षम्, शृणु इति साधु ।

वसती* नैमिषारण्ये सुप्रतीते सुपापकृत् ॥ ५ ।
केनचित्त्वथ कार्य्येण सोऽगच्छन्मथुरां प्रति ।
तत्र प्राप्य च कालिन्दीं कृष्णपक्षे चतुर्द्दशीम् ।
स निषादस्तर्त्तुकामस्तस्याञ्चैव तिथौ ततः ।
ततार यमुनां सोऽथ प्राप्य संयमनं शुभे ।
ममज्जासौ ततः पापस्तस्मिंस्तीर्थे वरे शुभे ।
मग्नमानस्ततः पापः सद्यः प्राणैर्व्ययुज्यत ॥ ६।७।८ ।
तत्तीर्थस्य प्रभावेण जातोऽसौ पृथिवीपतिः ।
सौराष्ट्रविषये देवि क्षत्रियोऽभूद्धनुर्द्धरः ।
नाम्ना यक्षधनुर्नाम सोऽभवत्प्रियदर्शनः ।
पालयामास वसुधां क्षत्रधर्म्मसमाश्रितः ॥ ९।१० ।
तेनोढ़ा काशीराजस्य पीवरी नामतः शुभा ।
पत्नी भीतानां मुख्यानां प्रवरा सा वसुन्धरे ॥ ११ ।
ताञ्चैव रमयामास उद्यानेषु वनेषु च ।
प्रासादेषु च रम्येषु नदीनां पुलिनेषु च ॥ १२ ।
प्रजाः पालयतस्तस्य दानानि ददतस्तथा ।
कालोगच्छति राजा तु भोगासक्तिञ्च विन्दति† ॥ १३ ।
भोगासक्तस्य वसुधे वर्षाणि‡ सप्तसप्ततिः ।
पुत्राः सप्त तथा जाताः कन्याः पञ्च सुशोभनाः ॥ १४ ।
राज्ञां पञ्चसु ता दत्ताः कन्याः कमललोचनाः ।

---

* वसतीति साधु । † राज्ञस्तु भोगासक्तिञ्च विन्दतीति बहुषु पाठः । ‡ वर्षाणा-मिति (ग) ।

पुत्रान् संस्थापयामास स्थानेषु वसुधाधिपान् ॥ १५ ।
पीवर्य्या सह सुप्तः स रात्रौ च वसुधाधिपः ।
तत्र प्रबुद्धो नृपतिर्हा हेति वदते मुहुः ।
स्मृत्वा तु मथुरां देवि स्मृत्वा संयमनं परम् ॥ १६ ।
ततः सा पीवरीत्याह किमेवं भाषसे नृप* ।
प्रियाया वचनं श्रुत्वा राजा वचनमब्रवीत् ।
मत्तः सुप्तः प्रमत्तश्च असम्बद्धं प्रभाषते ।
निद्रावशस्य वचनं न सम्प्रष्टुन्त्वमर्हसि ॥ १७।१८ ।

पीवर्य्युवाच ।

कथयस्व ममाद्य त्वं यद्यहं वल्लभा तव ।
प्राणांस्त्यक्ष्याम्यहं देव गोपयिष्यसि मे यदि ॥ १९ ।
प्रियाया वचनं श्रुत्वा प्रत्युवाच नराधिपः ।
अवश्यं यदि वक्तव्यं गच्छावो मथुरां पुरीम् ।
तत्र गत्वा यथातत्त्वं वदिष्यामि शुभानने ॥ २० ।
ददस्व विपुलं दानं ब्राह्मणेभ्यः सुलोचने ।
पुत्रान् संस्थाप्य दौहित्रान् स्वे स्वे स्थाने शुभान् प्रिये ।
कोशं रत्नानि ग्रामांश्च पुत्रान्वीक्ष्य पुनः पुनः ॥ २१ ।
ततः सम्मानयामास जनं पुरनिवासिनम् ।

---

* ततः सा पीवरी राज्ञी भर्त्तारं पर्य्यपृच्छत । किं त्वया भाषितं राजन् मथुरेति पुनः पुनः ॥ एवं सा पृच्छते देवी भर्त्तारं शुभलोचना । इति (ग) पुस्तकेऽत्र पाठभेदः । अत्र प्रच्छधातोरात्मनेपदमार्षम् ।

पितृपैतामहं राज्यं पालनीयं यथाक्रमम् ।
राज्ये पुत्रान्नियोक्ष्यामि यदि वो रोचतेऽनघाः ॥ २२ ।
राज्यपुत्रकलत्राणि बन्धुवर्गं तथैव च ।
नित्यमिच्छन्ति वै लोको यमस्येच्छानि* चान्यथा ।
एवं ज्ञात्वा प्रपन्नेन कर्त्तव्यञ्चात्मनो हितम् ।
तस्मात्सर्व्वप्रयत्नेन गच्छामो मथुरां पुरीम् ॥ २३।२४ ।
अहो कष्टं यदस्माभिः पुरा राज्यमनुष्ठितम् ।
इदानीन्तु मया ज्ञातं त्यागान्नास्ति परं सुखम् ॥ २५ ।
नास्ति विद्यासमञ्चक्षुर्नास्ति चक्षुःसमं बलम् ।
नास्ति रागसमं दुःखं नास्ति त्यागात्परं सुखम् ॥ २६ ।
यः कामान्कुरुते सर्व्वान्यश्चैतान् केवलांस्त्यजेत् ।
प्रायेण सर्व्वकामानां परित्यागो विशिष्यते ॥ २७ ।
अभिषिच्य सुतं ज्येष्ठमनुयोज्य परान्बहून् ।
ततः पौरजनं दृष्ट्वा चतुरङ्गबलान्वितः ।
ततः कालेन महता सम्प्राप्तो मथुरां पुरीम् ॥ २८ ।
तेन दृष्टा पुरी रम्या वासवस्य पुरी यथा ।
तीर्थैर्द्वादशभिर्युक्ता पुण्या पापहरा शुभा ॥ २९ ।
रम्यं मधुवनं नाम विष्णुस्थानमनुत्तमम् ।
तं दृष्ट्वा मनुजो देवि कृतकृत्यो हि जायते ॥ ३० ।
एकादशी शुक्लपक्षे मासि भाद्रपदे तथा† ।
तस्यां‡ स्नातो नरो देवि कृत्यकृत्यो हि जायते ॥ ३१ ।

* इच्छानीति स्त्रीवत्त्वमार्षम् । † हि या इति (ग) । ‡ तस्मिन्निति (ग) ।

वनं कुन्दवनं नाम तृतीयञ्चैवमुत्तमम्।
तत्र गत्वा नरो देवि कृतकृत्यो हि जायते॥ ३२।
एकादशी कृष्णपक्षे मासि भाद्रपदे हि या।
तत्र स्नातो नरो देवि रुद्रलोके महीयते॥ ३३।
चतुर्थङ्काम्यकवनं वनानां वनमुत्तमम्*।
तत्र गत्वा नरो देवि मम लोके महीयते॥ ३४।
विमलस्य च कुण्डे तु सर्व्वपापैः प्रमुच्यते।
यस्तत्र मुञ्चते प्राणान्मम लोकं स गच्छति॥ ३५।
पञ्चमम्बकुलवनं नाम वनानामुत्तमं वनम्।
तत्र गत्वा नरो देवि अग्निस्थानं स गच्छति॥ ३६।
यमुनायाः परे पारे देवानामपि दुर्लभम्।
अस्ति भद्रवनं नाम षष्ठं वनमनुत्तमम्॥ ३७।
तत्र गत्वा तु वसुधे मद्भक्तो मत्परायणः।
तद्वनस्य प्रभावेण नागलोकं स गच्छति॥ ३८।
सप्तमन्तु वनं भूमे खादिरं लोकविश्रुतम्।
तत्र गत्वा नरो भद्रे मम लोकं स गच्छति॥ ३९।
महावनञ्चाष्टमन्तु सदैव तु मम प्रियम्।
यत्र गत्वा तु मनुज इन्द्रलोके महीयते॥ ४०।
लोहजङ्घवनं नाम लोहजङ्घेन रक्षितम्।
नवमन्तु वनं नाम सर्व्वपातकनाशनम्॥ ४१।

---

* चतुर्थं बहुलवनं नाम वनानामुत्तमं वनमिति (ग)।

वनं विल्ववनं नाम दशमं देवपूजितम् ।
तत्र गत्वा तु मनुजो ब्रह्मलोके महीयते ॥ ४२ ।
एकादशन्तु भाण्डीरं योगिनां प्रियमुत्तमम् ।
तस्य दर्शनमात्रेण नरो गर्भं न गच्छति ॥ ४३ ।
भाण्डीरं समनुप्राप्य वनानां वनमुत्तमम् ।
वासुदेवं ततो दृष्ट्वा पुनर्जन्म न विद्यते ॥ ४४ ।
वृन्दावनं द्वादशमं वृन्दया परिरक्षितम् ।
मम चैव प्रियं भूमि महापातकनाशनम् ॥ ४५ ।
वृन्दावनञ्च गोविन्दं ये पश्यन्ति वसुन्धरे ।
न ते यमपुरं यान्ति यान्ति पुण्यकृताङ्गतिम् ॥ ४६ ।

इति वराहपुराणे भगवच्छास्त्रे मथुरातीर्थमाहात्म्यवर्णनं नाम त्रयःपञ्चाशदधिकशततमोऽध्यायः ।

चतुःपञ्चाशदधिकशततमोऽध्यायः ।

वराह उवाच ।

एवंविधाञ्च मथुरां दृष्ट्वा तौ मुदमापतुः ।
एवन्तु वसतस्तस्य राज्ञस्तत्र वसुन्धरे ।
पप्रच्छ च तदा भार्य्या यद्गुह्यं पूर्व्वभाषितम् ॥ १ ।
पुरस्थेन तदा राज्ञा वक्ष्यामि मथुराम्प्रति ।

तन्मे वद महाराज यन्नोप्यं पूर्व्वभाषितम् ॥ २ ।
राजाप्युवाच तां राज्ञीं त्वयाप्युक्तं पुरा मम ।
तद्वदस्व स्वकं गुह्यं पश्चाद्वच्याम्यहन्तव ॥ ३ ।
इत्युक्ता पीवरी ज्ञात्वा प्रहस्य तु गुणालया ।
प्रोवाच चैव राजानं मनसः प्रीतिकारणम् ॥ ४ ।
अहन्तु पीवरी नाम गङ्गातीरनिवासिनी ।
आगतेमां पुरीं द्रष्टुं कुमुदस्य तु द्वादशीम् ॥ ५ ।
नावमारुह्य यान्तीह पतिता यमुनाजले ।
सद्यः प्राणैर्व्वियुक्ता च तत्तीर्थस्य प्रभावतः ॥ ६ ।
काशीराजपतेः कन्या जातास्मि वसुधाधिप ।
त्वया विवाहिता राजन्न च मां विजहात् स्मृतिः ॥ ७ ।
एतत्तीर्थप्रभावेण धर्म्मयुक्ता तथाऽनघ ।
धारापतनके तीर्थे त्यक्ता जीवितमात्मनः ॥ ८ ।
एतच्छ्रुत्वा ततो राजा कथां प्राग्जन्मसम्भवाम् ।
स्वाञ्चाप्यकथयत्तस्यै यथा संयमने मृतः ॥ ९ ।
एवं तौ मथुराम्प्राप्य स्नात्वा यामुनतीर्थयोः ।
मां पश्यन्तौ नियमतस्तत्रैव निधनं गतौ ।
मत्तौ सर्व्वपरित्यक्तौ गतौ मम सलोकताम् ॥ १० ।
एतत्ते कथितं देवि आश्चर्य्यं यदभून्महत् ।
त्यक्त्वा चात्मतनुं तीर्थे धारापतनसंज्ञके ।
नाकलोकमवाप्नोति त्यक्तपापो न संशयः ॥ ११ ।
यमुनेश्वरमासाद्य त्यक्त्वा जीवितमात्मनः ।

विष्णुलोकमवाप्नोति दिव्यमूर्त्तिश्चतुर्भुजः ॥ १२ ।
धारापतनके स्नात्वा वैनाकलोके समोदते ।
अथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १३ ।
अतः परं नागतीर्थं तीर्थानामुत्तमोत्तमम् ।
यत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥ १४ ।
घण्टाभरणकं तीर्थं सर्व्वपापप्रमोचनम् ।
यस्मिन्स्नातो नरो याति सूर्य्यलोकं न संशयः ।
अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १५ ।
पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
तीर्थानामुत्तमं तीर्थं ब्रह्मलोकेषु विश्रुतम् ॥ १६ ।
तत्र स्नात्वा च पीत्वा च नियतो नियताशनः ।
ब्रह्मणा समनुज्ञातो मम लोकं स गच्छति ॥ १७ ।
सोमतीर्थं तु वसुधे पवित्रे यमुनाम्भसि ।
यत्र मां पश्यते सोमो द्वापरे युगसंस्थिते ॥ १८ ।
तत्राभिषेकं कुर्व्वीत स्वकर्म्मपरिनिष्ठितः ।
मोदते सोमलोके तु एवमेव न संशयः ।
अथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १९ ।
सरस्वत्याश्च पतनं सर्व्वपापहरं शुभम् ।
तत्र स्नातो नरोदेवि अवर्णोऽपि यतिर्भवेत् ॥ २० ।
पुनरन्यत्प्रवक्ष्यामि माथुरे मम मण्डले ।
यस्तत्र कुरुते स्नानं त्रिरात्रोपोषितो नरः ।
स्नानमात्रेण मनुजो मुच्यते ब्रह्महत्यया ।

	Rs.	As.
Páli Grammar, (English) Fasc. II	0	6
Prákrita Lakshaṇam, (Sans.) Fasc. I	1	8
Parásara Smriti (Sans.) Fasc. I—VII @ /6/ each .. Rs.	2	10
Srauta Sútra of Ápastamba, (Sans.) Fasc I—XII @ /6/ each	4	8
Srauta Sútra of Ásvaláyana, (Sans.) Fasc. I—XI @ /6/ each	4	2
Ditto Látyáyana (Sans.) Fasc. I—IX @ /6/ each	3	6
Ditto Sáṅkhyáyana (Sans.) Fasc. I—V @ /6/ each	1	14
Sáma Veda Samhitá, (Sans.) Vols I, Fasc. 1—10; II, 1—6; III, 1—7; IV, 1—6; V, 1—8. @ /6/ each Fasc.	13	14
Sáhitya Darpaṇa, (English) Fasc. I—IV @ /6/ each	1	8
Sáṅkhya Sútra Vritti (Sans.) Fasc. I and II @ /6/ each	0	12
Sankhya Aphorisms of Kapila, (English) Fasc. I and II @ /6/ each	0	12
Sárya Siddhánta, (Sans.) Fasc. IV	0	6
Sarva Darśana Sangraha, (Sans.) Fasc. II	0	6
Sankara Vijaya, (Sans.) Fasc. II and III @ /6/ each	0	12
Sánkhya Pravachana Bháshya, (English preface only) Fasc. III	0	6
Sánkhya Sára, (Sans.) Fasc. I	0	6
Sri Bháshyam, Fasc. I	0	6
Suśruta Samhitá, (Eng.) Fasc. I and II @ /12/ each	1	8
Taittiríya Áraṇya, (Sans.) Fasc. I—XI @ /6/ each	4	2
Ditto Bráhmaṇa (Sans.) Fasc. I—XXIV @ /6/ each	9	0
Ditto Samhitá, (Sans.) Fasc. I—XXXIV @ /6/ each	12	12
Ditto Prátiśákhya, (Sans.) Fasc I—III @ /6/ each	1	2
Ditto and Aitareya Upanishads, (Sans.) Fasc. II and III @ /6/ each	0	12
Táṇḍya Bráhmaṇa, (Sans.) Fasc. I—XIX @ /6/ each	7	2
Tattva Chintámaṇi, (Sans.) Vol. I, Fasc. 1—9; Vol. II, Fasc. 1—2 @ /6/ each	4	2
Tulsí Satsí, Fasc. I	0	6
Uttara Naishadha, (Sans.) Fasc. III—XII @ /6/ each	3	12
Uvás-agadasáo, Fasc. I—V @ /12/ each	3	12
Varáha Puráṇa, (Sans.) Fasc. I—IX @ /6/ each	3	6
Váyu Puráṇa, (Sans.) Vol. I, Fasc. 1—6; Vol. II, Fasc. 1—7, @ /6/ each Fasc.	4	14
Vishnu Smriti, (Sans.) Fasc. I—II @ /6/ each	0	12
Vivádaratnákara (Sans.) Fasc. I—VII @ /6/ each	2	10
Vrihannáradíya Puráṇa, (Sans.) Fasc. I—V @ /6/ each	1	14
Yoga Sútra of Patanjali, (Sans. & English) Fasc. I—V @ /14/ each	4	6
The same, bound in cloth	5	8

Tibetan Series.

	Rs.	As.
Sher Phyin, Fasc. I—II @ 1/ each	2	0
Rtogs brjoddpagbsamkhri Siñ (Tibetan & Sans.) Fasc. I	1	0

Arabic and Persian Series.

	Rs.	As.
'Álamgírnámah, with Index, (Text) Fasc. I—XIII @ /6/ each	4	14
Áin-i-Akbarí, (Text) Fasc. I—XXII @ 1/ each	22	0
Ditto (English) Vol. I (Fasc. I—VII) 1/12 each	12	4
Akbarnámah, with Index, (Text) Fasc. I—XXXVII @ 1/ each	37	0
Bádsháhnámah, with Index, (Text) Fasc. I—XIX @ /6/ each	7	2
Beale's Oriental Biographical Dictionary, pp. 291, 4to., thick paper, @ 4/12; thin paper	4	8
Dictionary of Arabic Technical Terms and Appendix, Fasc. I—XXI @ 1/ each	21	0
Farhang-i-Rashídí (Text), Fasc. I—XIV @ 1 each	14	0
Fihrist-i-Ṭúsí, or, Ṭúsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each	3	0
Futúḥ-ul-Shám Wáqidí, (Text) Fasc. I—IX @ /6/ each	3	6
Ditto Azádí, (Text) Fasc. I—IV @ /6/ each	1	8
Haft Ásmán, History of the Persian Mansawi, (Text) Fasc. I	0	12
History of the Caliphs, (English) Fasc. I—VI @ /12/ each	4	8
Iqbálnámah-i Jahángírí, (Text) Fasc. I—III @ /6/ each	1	2
Iṣábah, with Supplement, (Text) 49 Fasc. @ /12/ each	36	12
Maásir-ul-Umara, Vol. I, Fasc. 1—9; Vol. II, 1—6 @ /6/ each	5	10
Maghází of Wáqidí, (Text) Fasc. I—V @ /6/ each	1	14
Muntakhab-ul-Tawáríkh, (Text) Fasc. I—XV @ /6/ each	5	10
Muntakhab-ul Tawáríkh, (English) Vol. II, Fasc. I—IV @ /12/ each	3	0
Muntakhab-ul-Lubáb, (Text) Fasc. I—XIX @ /6/ each	7	2
Ma'ásir-'Álamgírí, (Text), Fasc I—VI @ /6/ each	2	4

Nizámí's Khiradnámah-i-Iskandarí. (Text) Fasc. I and II @ /12/ each	1	8
Suyúty's Itqán, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. II—IV, VII—X @ 1/ each	7	0
Tabaqát-i Násirí, (Text) Fasc. I—V @ /6/ each	1	14
Ditto (English) Fasc. I—XIV @ /12/ each	10	8
Táríkh-i-Fíróz Sháhi. (Text) Fasc. I—VII @ /6/ each	2	10
Táríkh-i-Baihaqí. (Text) Fasc. I—IX @ /6/ each	3	6
Táríkh-i Firozshsháhí, Fasc. I—IV @ /6/ each	1	8
Wis o Rámin, (Text) Fasc. I—V @ /6/ each	1	14
Zafarnámah, Vol. I, Fasc. I—IX ; Vol. II, Fasc. I—VIII @/6/ each	6	6

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. VII. IX to XI; Vols. XIII and XVII, and Vols. XIX and XX @ /10/ each	Rs. 80	0
Ditto Index to Vols. I—XVIII	5	0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1865 (incl.)@/4/ per No.; and from 1870 to date @ /6/ per No		
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1849 (12), 1850 (7), @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers; and for 1851 (7), 1857 (6), 1858 (5), 1861 (4) 1864 (5), 1865 (8), 1866 (7), 1867 (6), 1868 (6), 1869 (8) 1870 (8), 1871 (7) 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878, (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8) @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers.		

N. B. The figures enclosed in brakets give the number of Nos. in each Volume.

4. Centenary Review of the Researches of the Society from 1784—1883..	3	0
General Cunningham's Archæological Survey Report for 1863-64 (Extra No. J. A. S. B 1864)	1	8
Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868)	1	8
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No, J. A. S. B., 1875)	3	0
Sketch of the Turki Language as spoken in Eastern Turkestan. Part II, Vocabulary, by R. B. Shaw (Extra No., J. A. S. B. 1878)	3	0
A Grammar and Vocabulary of the Northern Balochí Language, by M. L. Dames (Extra No., J. A S. B., 1880)	3	0
Introduction to the Maithilí Language of North Bihár, by G. A. Grierson, Part I, Grammar (Extra No, J. A. S. B., 1880) ..	1	8
Part II, Chrestomathy and Vocabulary (Extra No., J.A.S.B., 1882)	3	0
5. Anis-ul-Musharrihi	3	0
6. Catalogue of Fossil Vertebrata	2	0
7. Catalogue of the Library of the Asiatic Society, Bengal ..	3	8
8. Examination and Analysis of the Mackenzie Manuscripts by the Rev. W. Taylor	2	0
9. Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis ..	1	8
10. Istiláhát-us-Súfiyah, edited by Dr. A. Sprenger, 8vo. ..	1	0
11. Ináyah, a Commentary on the Hidáyah, Vols. II and IV, @16/each	32	0
12. Jawámi-ul-'ilm ir-riyázi, 168 pages with 17 plates, 4to. Part I	2	0
13. Khizánat-ul-'ilm	4	0
14. Mahábhárata, Vols. III and IV, @ 20/ each	40	0
Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—II, with 5 coloured Plates, 4to. @ 6/ each ..	12	0
. Purána Sangraha, I (Márkandeya Purána), Sanskrit ..	1	0
. Sharaya-ool-Islám	1	0
Tibetan Dictionary	4	0
Ditto Grammar	10	0
. Vuttodaya, edited by Lt.-Col. G. E. Fryer	8	0
	2	0
Notices of Sanskrit Manuscripts, Fasc. I—XXII @ 1/ each ..	22	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ..	5	0

N. B. All cheques, Money Orders &c. must be made payable to the Treasurer Asiatic Society" only.

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

New Series, No. 714.

वराहपुराणम् ।

THE VARÁHA PURÂṆA

EDITED BY

PANḌIT HṚISHÍKEŚA ŚÁSTRÍ

Professor, Sanskrit College, Calcutta.

FASCICULUS X.

CALCUTTA:

PRINTED BY ŚAŚIBHÚSHAṆA BHAṬṬÁCHÁRYYA, AT THE GIRIŚA-VIDYÁRATNA PRESS.

24, GIRIŚA-VIDYÁRATNA'S LANE, UPPER CIRCULAR ROAD:

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1889.

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	As.
Advaita Brahma Siddhi, Fasc. I—II @ /6/ each	0	12
Átharvaṇa Upanishads, (Sanskrit) Fasc. I—V @ /6/ each .. Rs.	1	14
Áśvaláyana Grihya Sútra, (Sans.) Fasc. II—IV @ /6/ each ..	1	2
Agni Puráṇa, (Sans.) Fasc. I—XIV @ /6/ each	5	4
Aitareya Áraṇyaka of the Rig Veda, (Sans.) Fasc. I—V @ /6/ each	1	14
Anu Bháshyam, Fasc. I	0	6
Aphorisms of Sáṇḍilya, (English) Fasc. I	0	6
Aphorisms of the Vedánta, (Sans.) Fasc. III, V—XIII @ /6/ each ..	3	12
Ashṭasáhasriká Prajñápáramitá, Fasc. I—VI @ /6/ each	2	4
Aśvavaidyaka, (Sans.) Fasc. I—III @ /6/ each	1	2
Avadána Kalpalatá, by Kshemendra (Sans. & Tibetan) Fasc. I ..	1	0
Brahma Sútras, (English) Fasc. I	0	12
Bhámati, (Sans.) Fasc. I—VIII @ /6/ each	3	0
Brihad Áraṇyaka Upanishad, (Sans.) Fasc. VI, VII & IX @ /6/ each	1	2
Ditto (English) Fasc. II—III @ /6/ each	0	12
Brihaddharma Puráṇa, Fasc. I—II @ /6/ each	0	12
Brihat Saṃhitá, (Sans.) Fasc. II—III, V—VII @ /6/ each ..	1	14
[illegible] Náṭaka, (Sans.) Fasc. II—III @ /6/ each	0	12
[illegible] (Sans.) Vol. I, Fasc. 1—11, Vol. II, 1—25; Part II, 1—3 @ /6/ each Fasc.	21	6
Chhándogya Upanishad, (English) Fasc. II	0	6
Daśa Rúpa, (Sans.) Fasc. II—III @ /6/ each	0	12
Gopatha Bráhmaṇa (Sans. & Eng.) Fasc. I and II @ /6/ each ..	0	12
Gobhilíya Grihya Sútra, (Sans.) Fasc. I—XII @ /6/ each ..	4	8
Hindú Astronomy, (English) Fasc. I—III @ /6/ each ..	1	2
Kátantra, (Sans.) Fasc. I—VI @ /12/ each	4	8
Kathá Sarit Ságara, (English) Fasc. I—XIV @ /12/ each	10	2
Kála Mádhava, (Sans.) Fasc. I—IV, @ /6/ each	1	8
Kausítaki Bráhmaṇopanishads, Fasc. II	0	6
Kúrma Puráṇa, (Sans.) Fasc. I—VIII @ /6/ each	3	0
Lalita Vistara, (Sans.) Fasc. II—VI @ /6/ each	1	14
Ditto (English) Fasc. I—III @ /12/ each	2	4
Madana Párijáta, (Sans.) Fasc. I—VI @ /6/	2	4
Manutíká Sangraha, Fasc. I—II @ /6/ each	0	12
Mímámsá Darśana, (Sans.) Fasc. II—XIX @ /6/ each	6	12
Márkaṇḍeya Puráṇa (English) Fasc. I—II @ /12/ each ..	1	8
Márkaṇḍeya Puráṇa, (Sans.) Fasc. IV—VII @ /6/ each ..	1	8
Nyáyavártikam, Fasc. I	0	6
Nrisiṃha Tápani, (Sans.) Fasc. I—III @ /6/ each	1	2
Nirukta, (Sans.) Vol. I, Fasc. 1—6; Vol. II, Fasc. 1—6; Vol. III, Fasc. 1—6; Vol. IV, 1—6 @ /6/ each	9	0
Nárada Pancharátra, (Sans.) Fasc. IV	0	6
Nárada Smriti (Sans.) Fasc. I & II @ /6/ each ..	0	12
Nítisára, or, The Elements of Polity, By Kámandaki (Sans.) Fasc. II—V	1	8
Nyáya Darśana, (Sans.) Fasc. III	0	6
Nyáya Kusumáñjali, (Sans.) Fasc. I—II	0	12
Paráśara, Institutes of (English)	0	12
Paráśara Smriti (Sans.) Fasc. I—VII @ /6/ each .. Rs.	2	10
Pariśishṭaparvan, (Sans.) Fasc. I—IV @ /6/ each ..	1	8
Pingala Chhandaḥ Sútra, (Sans.) Fasc. II—III @ /6/ each ..	0	1

(Continued on the third page of cover.)

अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ २१।२२ ।
दशाश्वमेधमृषिभिः पूजितं सर्व्वदा मुदा ।
तत्र ये स्नान्ति नियतास्तेषां स्वर्गो न दुर्लभः ॥ २३ ।
मथुरापश्चिमे पार्श्वे सततमृषिपूजितम् ।
ब्रह्मणा सृष्टिकाले तु मनसा निर्म्मितं पुरा ।
मानसं नाम तीर्थन्तु ऋषिभिः पूजितं पुरा ।
तत्र स्नाता दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥ २४।२५ ।
तीर्थन्तु विघ्नराजस्य पुण्यं पापहरं शुभम् ।
तत्र स्नातान्मनुष्यांश्च विघ्नराजोन पीड़येत् ॥ २६ ।
अष्टम्याञ्च चतुर्द्दश्यां चतुर्थ्यान्तु विशेषतः ।
तस्मिंस्तीर्थवरे स्नातं न पीड़यति विघ्नराट् ॥ २७ ।
विद्यारम्भेषु सर्व्वेषु यज्ञदानक्रियासु च ।
अविघ्नं कुरुते तस्य सततं पार्व्वतीसुतः ।
तत्राथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥ २८ ।
ततः परे कोटितीर्थं पवित्रं परमं स्मृतम् ।
तत्र वै स्नानमात्रेण गवां कोटिफलं लभेत् ॥ २९ ।
तथात्र* मुञ्चते प्राणांल्लोभमोहविवर्ज्जितः ।
सोमलोकमतिक्रम्य मम लोकञ्च गच्छति ॥ ३० ।
अतःपरं शिवक्षेत्रमर्द्धक्रोशन्तु दुष्करम् ।
तत्र स्थितो हरो देवो मथुरां रक्षते† सदा ॥ ३१ ।

---

* तत्राथेति (ग) ।　† रक्षतीति साधु ।

तत्र स्नात्वा च पीत्वा च माथुरं लभते फलम् ।
अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ३२ ।

इति वराहपुराणे यमुनातीर्थप्रभाववर्णनो नाम

चतुःपञ्चाशदधिकशततमोऽध्यायः ।

पञ्चपञ्चाशदधिकशततमोऽध्यायः ।

वराह उवाच ।

पुनरन्यत्प्रवक्ष्यामि मर्त्त्यलोके सुदुर्लभम्* ।
अनन्तं विदितं तीर्थमचलं ध्रुवमव्ययम् ॥ १ ।
तत्र नित्यं स्थितो देवि लोकानां हितकाम्यया ।
मां दृष्ट्वा मनुजा देवि मुक्तिभाजो भवन्ति ते ॥ २ ।
अयने विषुवे चैव तथा विष्णुपदीषु च ।
अनन्तं तं समासाद्य मुच्यते सर्व्वपातकैः ॥ ३ ।
अक्रूरेति च विख्यातं मम क्षेत्रं वसुन्धरे ।
तत्र स्नात्वा महाभागे राहुग्रस्ते दिवाकरे ।
राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः ॥ ४ ।
तीर्थराजं हि चाक्रूरं गुह्यानां गुह्यमुत्तमम् ।
तत्स्नानात्फलमाप्नोति प्रयागस्नानजं फलम् ॥ ५ ।

---

* मर्त्यलोकेषु दुर्लभमिति (ग) ।

अस्मिंस्तीर्थे पुरावृत्तं तच्छृणुष्व वसुन्धरे।
नाम्ना तु सुधनो नाम मम भक्तः सदैव हि।
धनधान्यसमायुक्तः सुतयुक्तः* सदैव हि॥ ६॥
बन्धुपुत्रकलत्रैश्च गृहे प्रीतिरनुत्तमा।
पुत्रदारसमेतस्य मयि भक्तिर्वसुन्धरे॥ ७॥
गच्छन्ति दिवसास्तस्य मासाः संवत्सरास्तथा।
करोति गृहकृत्यानि धनोपायेन नित्यशः।
मानकूटं तुलाकूटं न करोति स कर्हिचित्† ॥ ८॥
एवञ्च वसतस्तस्य बहवो वत्सरा गताः।
नित्यकालञ्च कुरुते हरिपूजनमुत्तमम्।
पुष्पदीपप्रदानेन चन्दनेन सुगन्धिना।
उपहारेण दिव्येन धूपेन च सुगन्धिना॥ ९॥
एकादश्यान्तु कुरुते पक्षयोरुभयोरपि।
उपवासं तु कुरुते रात्रौ जागरणं तथा॥ १०॥
स गच्छति यथाकालमक्रूरं तीर्थमुत्तमम्।
तत्रागत्य ममाग्रेऽसौ नृत्यते‡ शुभदर्शनः॥ ११॥
सुधनस्तु वणिक्श्रेष्ठः कदाचिद्रात्रिजागरे।
गच्छमानो§ गृहीतस्तु चरणे ब्रह्मरक्षसा॥ १२॥
कृष्णवर्णो महाकाय ऊर्द्धकेशो भयङ्करः।

---

* बन्धुयुक्तः सदैव हीति (ग)। † स कदाचिदिति (क), (ख)। ‡ नृत्यतीति साधु। § गच्छन्निति साधु।

पादे गृहीत्वा वसुधे इदं वचनमब्रवीत् ॥ १३ ।
राक्षसोऽहं वणिक्श्रेष्ठ वसामि वनमाश्रितः ।
त्वामद्य भक्षयिष्यामि तृप्तिं यास्यामि शाश्वतीम् ॥ १४ ।

सुधन उवाच ।

प्रतीक्षस्व क्षणं मेऽद्य* दास्यामि तव पुष्कलम् ।
भक्षयिष्यसि मे गात्रं मिष्टान्नपरिपोषितम् ॥ १५ ।
जागरं देवदेवस्य कर्त्तुमिच्छामि राक्षस ।
मम व्रतं सार्व्वकालं यज्जागर्मि हरेः पुरः ॥ १६ ।
तत्र जागरणङ्कृत्वा प्रभाते तव सन्निधौ ।
आगमिष्याम्यहं शीघ्रमादित्योदयनम्प्रति ॥ १७ ।
ततः खादिष्यसे† गात्रं विनिवृत्तस्य जागरात् ।
विष्णुतुष्ट्यै व्रतमिदमारब्धं सर्व्वकामदम् ॥ १८ ।
मा कुरु व्रतभङ्गं मे रक्षो नारायणस्य हि ।
जागरे विनिवृत्ते तु मां भक्षय यथेप्सितम् ॥ १९ ।
सुधनस्य वचः श्रुत्वा ब्रह्मरक्षः क्षुधार्द्दितः ।
उवाच मधुरं वाक्यं वणिजं प्रति सादरम् ॥ २० ।
मिथ्या प्रभाषसे साधो त्वं पुनः कथमेष्यसि ।
को हि रक्षोमुखाद्भ्रष्टो मानुषो यो निवर्त्तते ॥ २१ ।
राक्षसस्य वचः श्रुत्वा स वणिग्वाक्यमब्रवीत् ।
सत्यमूलं जगत्सर्व्वं सर्व्वं सत्ये प्रतिष्ठितम् ।

---

* दिनं मेऽद्येति (ग) । † खादिष्यसीति साधु ।

सिद्धिं लभन्ते सत्येन ऋषयो वेदपारगाः ॥ २२ ।
यद्यहञ्च वणिक् पूर्व्वं कर्म्मणा न हि दूषितः ।
प्राप्तश्च मानुषो भावो विहितेनान्तरात्मना ।
शृणु मत्समयं रक्षो येनाहं पुनरागमम्* ॥ २३ ।
कृत्वा जागरणं तत्र नृत्यङ्कृत्वा यथासुखम् ।
पुनरेष्याम्यहं रक्षो नासत्यं विद्यते मयि ॥ २४ ।
सत्येन दीयते कन्या सत्यं जल्पन्ति† ब्राह्मणाः ।
सत्योत्तीर्णा हि राजानः सत्येन वसुधा धृता ॥ २५ ।
स्वर्गमिच्छन्ति सत्येन मोक्षः सत्येन लभ्यते ।
सत्येन सूर्य्यस्तपति सोमः सत्येन राजते ॥ २६ ।
यमः सत्येन हरति सत्यादिन्द्रो विराजते ।
तत्सत्यं मम नश्येत‡ यद्यहं नागमे§ पुनः ॥ २७ ।
परदारांस्तु यो गच्छेत्काममोहप्रपीड़ितः ।
तस्य पापेन लिप्येऽहं यदि नायामि ते पुनः ॥ २८ ।
यो वै रजस्वलाङ्गच्छेत्काममोहप्रपीड़ितः ।
तेन पापेन लिप्येऽहं¶ यदि नायामि ते पुरः ॥ २९ ।
दत्त्वा च भूमिदानं यो ह्यपकारङ्करोति च ।
तेन पापेन लिप्येऽहं‖ यद्यहं नागमे पुनः ॥ ३० ।

---

* पुनरागमिष्यामीति साधु । † (ग) पुस्तकेऽतः परं सार्द्धं चरणपञ्चकं नास्ति ।
‡ नश्येदिति साधु । § नागच्छेयमिति साधु, एवं परत्रापि । ¶ लिप्येयमिति (ग) ।
‖ लिप्येयमिति (ग) ।

पूर्व्वं भुक्ता स्त्रियं यस्तु सुखमाप्य विहृत्य च ।
द्वेषात्तां यदि चेज्जह्यात्तस्याघं मे भवत्त्वलम् ॥ २१ ॥
पङ्क्तिभेदन्तु यः कुर्य्यादेकपङ्क्त्याशिनां भुवम् ।
तस्य पापेन लिप्येऽहं नागन्ता* यदि ते पुरः ॥ २२ ॥
अमावस्यां महारच्चः श्राद्धङ्कृत्वा स्त्रियं व्रजेत् ।
तेन पापेन लिप्येऽहं† यद्यहं नागमे पुनः ॥ २३ ॥
षष्ठ्यष्टमी त्वमावस्या उभे पक्षे चतुर्द्दशी ।
अस्नातानां गतिं गच्छेम्‡ यद्यहं नागमे पुनः ॥ २४ ॥
गुरोर्भ्रातुः सुतस्यापि सख्युर्वै मातुलस्य च ।
व्यवस्यति च यन्नारीं यो मोहेन विमोहितः§ ।
अभिगच्छति मन्दात्मा तत्पापं मे भवेत्तदा ॥ २५ ॥
राजपत्नीं ब्रह्मपत्नीं विधवां योऽभिगच्छति ।
तस्य पापेन लिप्येऽहं यद्यहं नागमे पुनः¶ ॥ २६ ॥
यस्तु कन्यां सकृद्दत्त्वा अन्यस्मै चेत्पुनर्द्ददेत्‖ ।
तेन पापेन लिप्येऽहं** यद्यहं नागमे पुनः ॥ २७ ॥
राजयाजकयाज्याश्च ये च वै ग्रामयाजकाः ।
तेषां पापेन लिप्येऽहं†† यद्यहं नागमे पुनः ॥ २८ ॥
ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे ।

---

* नागत इति (क), (ख) ।　† लिप्येयमिति (ग) ।　‡ गच्छेयमिति साधु ।
§ पितृव्यपत्नीं यो गच्छेन्मोहेन हि विमोहित इति (ग) ।　¶ लिप्येयं यदि नायामि नेऽन्तिकमिति (ग) ।　‖ दद्यादिति साधु ।　** लिप्येयमिति (ग) ।　†† लिप्येयमिति (ग) ।

या गतिस्तां प्रपद्येऽहं यद्यहं नागमे पुनः ॥ ३९ ।

वराह उवाच ।

सुधनस्य वचः श्रुत्वा सन्तुष्टो ब्रह्मराक्षसः ।
उवाच मधुरं वाक्यं गच्छ शीघ्रं नमोऽस्तु ते ॥ ४० ।
ब्रह्मराक्षसमुक्तोऽसौ वणिक् तु दृढ़निश्चयः ।
पुनर्नृत्यति चैवाग्रे मम भक्तौ व्यवस्थितः ॥ ४१ ।
अथ प्रभातसमये नृत्यचित्तोऽतिकोविदः ।
पुनः पुनर्वै उच्चार्य नमो नारायणाय च ।
निवृत्ते जागरे सोऽथ कालिन्दीसलिलाप्लुतः ।
दृष्ट्वा मां दिव्यरूपन्तु गतोऽसौ मथुरां पुरीम् ॥ ४२।४३ ।
दृष्टश्चाग्रे त्वहं तेन पुरुषो दिव्यरूपवान् ।
स च पृष्टो मया देवि क्व भवान्प्रस्थितो द्रुतम् ॥ ४४ ।
पुरुषस्य वचः श्रुत्वा सुधनो वाक्यमब्रवीत् ।
अहङ्गच्छामि त्वरितो ब्रह्मराक्षससन्निधौ ॥ ४५ ।
निवारयामास तदा न गन्तव्यं त्वयानघ ।
जीवतो धर्म्ममाहात्म्यं मृते धर्म्मः कुतो यशः ॥ ४६ ।
पुरुषस्य वचः श्रुत्वा स वणिग्वाक्यमब्रवीत् ।
तत्र सत्यं वदिष्यामि यास्ये* राक्षससन्निधौ ॥ ४७ ।
आगतोऽहं महाभाग नर्त्तयित्वा यथासुखम् ।
विष्णवे लोकनाथाय आगतो† हरिजागरात् ॥ ४८ ।

---

* यास्यामीति साधु। † आयात इति (ग)।

इदं शरीरं मे रक्षो भक्षयस्व यथेप्सितम् ।
यथान्यायं विधानेन यथा वा तव रोचते ॥ ४९ ।
नोक्तपूर्व्वं मयाऽसत्यं कदाचिदपि राक्षसः ।
तेन सत्येन मां भुङ्क्ष्व ब्रह्मराक्षस दारुण ॥ ५० ।
वणिजस्तु वचः श्रुत्वा ततोऽसौ ब्रह्मराक्षसः ।
उवाच मधुरं वाक्यं सुधनं तदनन्तरम् ॥ ५१ ।
साधु तुष्टोऽस्मि भद्रन्ते सत्यं धर्म्मश्च पालितः ।
वणिक् त्वञ्चातिविज्ञस्तु यस्य ते गतिरीदृशी ॥ ५२ ।
जागरस्य समस्तस्य मम पुण्यं प्रयच्छ वै ।
सत्य*पुण्यप्रभावेण यथाहं मुक्तिमाप्नुयाम् ॥ ५३ ।

सुधन उवाच ।

नाहं दास्यामि† ते पुण्यं नृत्यस्य नरभोजन ।
अर्द्धं वाथ समस्तं वा प्रहरं चार्द्धमेव वा ॥ ५४ ।
सुधनस्य वचः श्रुत्वा अब्रवीद्ब्रह्मराक्षसः ।
एकनृत्यस्य मे पुण्यं दद‡ त्वं वणिजोत्तम§ ॥ ५५ ।

सुधन उवाच ।

नाऽहं दास्यामि ते पुण्यं यथोक्तञ्च समाचर ।
केन त्वं कर्म्मदोषेण राक्षसत्वमुपागतः ।
यत्ते गुह्यं महाभाग सर्व्वं तत्कथयस्व मे ॥ ५६ ।
सुधनस्य वचः श्रुत्वा विहसित्वा¶ह राक्षसः ।

---

* तस्येति (ग) । † ददामीति (ग) । ‡ देहीति साधु । § वणिगुत्तमेति साधु ।
¶ विहस्येति साधु ।

किं त्वं माञ्च विजानासि प्रतिवासी ह्यहं तव।
अग्निदत्तस्तु वै नाम छान्दसो ब्राह्मणोत्तमः॥ ५७।
इष्टकांस्तु हरन्नित्यं परकीयांश्च सर्व्वदा।
मृतस्तु गृहकामेन राक्षसत्वमुपागतः॥ ५८।
मया त्वं हि यथाप्राप्त उपकारं कुरुष्व मे।
एकविश्रामपुण्यं मे देहि त्वं वणिजोत्तम॥ ५९।
कृपया तु समायुक्तो वणिग्वचनमब्रवीत्।
साधु राक्षस दत्तन्ते एकनृत्यं मया तव।
एकनृत्यप्रभावेण राक्षसो मुक्तिमागतः॥ ६०।

वराह उवाच।

सुधनस्तु ततो देवि विश्वरूपं जनार्द्दनम्।
अग्रतस्तु स्थितं देवं दृष्ट्वाऽसौ धरणीं गतः॥ ६१।
उवाच मधुरं वाक्यं देवदेवो जनार्द्दनः।
चतुर्भुजो दिव्यतनुः शङ्खचक्रगदाधरः॥ ६२।
विमानवरमारुह्य मम लोकं व्रजस्व च*।
इत्युक्त्वा माधवो देवस्तत्रैवान्तरधीयत॥ ६३।
सुधनः सशरीरोऽपि सकुटुम्बो दिवं ययौ।
विमानवरमारुह्य विष्णोर्लोकं जगाम ह॥ ६४।
एष तीर्थप्रभावो वै कथितस्ते वसुन्धरे।
अक्रूराच्च परं तीर्थं न भूतं न भविष्यति।
तस्य तीर्थप्रभावेण सुधनो मुक्तिमाप्तवान्॥ ६५।

* व्रज इति साधु।

द्वादशी शुक्लपक्षे तु कुमुदस्य च या भवेत् ।
तस्मिन् स्नातस्य वसुधे राजसूयफलं भवेत् ॥ ६६ ।
कार्त्तिकीं समनुप्राप्य तत्तीर्थे तु वसुन्धरे ।
वृषोत्सर्गं नरः कुर्व्वंस्तारयेत्स्वकुलोद्भवान् ॥ ६७ ।
श्राद्धं यः कुरुते सुभ्रु कार्त्तिक्यां प्रयतोनरः ।
पितरस्तारितास्तेन सदैव प्रपितामहाः ॥ ६८ ।

इति वराहपुराणे मथुरामाहात्म्ये अक्रूरतीर्थप्रभावो नाम
पञ्चपञ्चाशदधिकशततमोऽध्यायः ।

षट्पञ्चाशदधिकशततमोऽध्यायः ।

वराह उवाच ।

वत्सक्रीड़नकं नाम तीर्थं वक्ष्ये परं* मम ।
तत्र रक्तशिलाबद्धं रक्तचन्दनभूषितम् ।
स्नानमात्रेण तत्रैव वायुलोकं व्रजेन्नरः ।
तत्राऽथ मुञ्चते प्राणान्मम लोके महीयते ॥ १।२ ।
पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
अस्ति भाण्डीरकं नाम यत्तीर्थं परमुत्तमम् ।
शालैस्तालैश्च तरुभिस्तमालैरर्ज्जुनैस्तथा ।

---

* चैत्रे परमिति (ग) ।

इङ्गुदैः पीलुकैश्चैव करीरैरक्तपुष्पकैः॥ ३।४।
तस्मिन् भाण्डीरके स्नातो नियतो नियताशनः।
सर्व्वपापविनिर्मुक्त इन्द्रलोकं स गच्छति।
तत्राऽथ मुञ्चते प्राणान्मम लोकञ्च गच्छति॥ ५।
पुनरन्यत्प्रवक्ष्यामि क्षेत्रं वृन्दावनं मम।
तत्राहं क्रीड़यिष्यामि गोभिर्गोपालकैः सह।
रम्यञ्च* सुप्रतीतञ्च देवदानवदुर्लभम्॥ ६।
तत्र कुण्डे महाभागे बहुगुल्मलतावृते।
तत्र स्नानम्प्रकुर्व्वीत एकरात्रोषितोनरः।
गन्धर्व्वैरप्सरोभिश्च क्रीड़मानः स मोदते।
तत्राऽथ मुञ्चते प्राणान्मम लोकञ्च गच्छति॥ ७।८।
पुनरन्यत्प्रवक्ष्यामि महापातकनाशनम्।
तत्र वृन्दावने तीर्थे यत्र केशी निपातितः।
तीर्थं शतगुणं† पुण्यं यत्र केशी निपातितः।
केश्याः शतगुणं पुण्यं यत्र विश्रमते हरिः।
तस्माच्छतगुणम्पुण्यं नात्र कार्य्या विचारणा॥ ९।१०।
तत्रापि च विशेषोऽस्ति केशीतीर्थे वसुन्धरे।
तस्मिन्पिण्डप्रदानेन गयातुल्यफलं भवेत्।
स्नाने दाने तथा होमे अग्निष्टोमफलम्भवेत्‡॥ ११।
सूर्य्यतीर्थेषु वसुधे द्वादशादित्यसंज्ञके।

---

* सुरम्यमिति (ग)। † गङ्गाशतगुणमिति (ग)। ‡ शुभे इति (ग)।

कालियो रमते तत्र कालिन्द्याः सलिले शुभे ॥ १२ ।
कालियो दमित*स्तत्र आदित्याः स्थापिता मया ।
वरं वृणुध्वं भद्रं वो यद्वो मनसि वर्त्तते ॥ १३ ।

आदित्या ऊचुः ।

वरं ददासि नो देव वरार्हा यदि वा वयम् ।
अस्मिंस्तीर्थवरे स्नानमस्माकं सम्प्रदीयताम्† ॥ १४ ।
आदित्यानां वचः श्रुत्वा क्रीड़ां कृत्वा वसुन्धरे ।
स्नानमात्रेण तत्रैव मुच्यते सर्व्वकिल्विषैः ।
अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १५ ।
उत्तरे हरिदेवस्य दक्षिणे कालियस्य तु ।
अनयोर्द्देवयोर्मध्ये ये मृतास्तेऽपुनर्भवाः ॥ १६ ।

इति वराहपुराणे मथुरामाहात्म्ये मथुराप्रादुर्भावो नाम षट्पञ्चाशदधिकशततमोऽध्यायः ।

सप्तपञ्चाशदधिकशततमोऽध्यायः ।

वराह उवाच ।

यमुनापारमुल्लङ्घ्य तत्रैव च महामुने ।
मलयार्ज्जुनकं तीर्थं कुण्डं तत्र च विद्यते ॥ १ ।

---

* आदित्योदमित इति (क), (ख) । † सम्प्रदायितमिति (क), (ख) ।

पर्यस्तं तत्र शकटं भिन्नभाण्डकुटीघटम् ।
तत्र स्नानोपवासाभ्यामनन्तं फलमश्नुते ॥ २ ।
द्वादश्यां शुक्लपक्षस्य ज्यैष्ठमासे वसुन्धरे ।
तत्र स्नानेन दानेन महापातकनाशनम् ॥ ३ ।
ज्यैष्ठस्य शुक्लद्वादश्यां स्नात्वा सुनियतेन्द्रियः ।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमाङ्गतिम् ॥ ४ ।
यमुनासलिले स्नातः शुचिर्भूत्वा जितेन्द्रियः ।
समभ्यर्च्याच्युतं सम्यक् प्राप्नोति परमाङ्गतिम् ॥ ५ ।
अपि चास्मत्कुले जातः कालिन्दीसलिले प्लुतः ।
अर्चयिष्यति गोविन्दं मथुरायामुपोषितः ।
इति गायन्ति पितरः परलोकगताः* सदा ॥ ६ ।
ज्यैष्ठमासे तु द्वादश्यां समभ्यर्च्य जनार्द्दनम् ।
धन्योऽसौ पिण्डनिर्वापं यमुनायां करिष्यति ॥ ७ ।
तत्रैव तु महातीर्थे वने बहुलसंज्ञके ।
तत्र स्नातो नरो देवि रुद्रलोके महीयते ॥ ८ ।
चैत्रमासे तु द्वादश्यां शुक्लपक्षे वसुन्धरे ।
तत्र स्नातो नरो याति मम लोकं न संशयः ॥ ९ ।
अस्ति भाण्डह्रदं नाम परपारेषु दुर्लभम् ।
दृश्यन्तेऽहरहस्तत्र आदित्याः शुभकारिणः ॥ १० ।
तत्र चार्कस्थले कुण्डे स्नानं यः कुरुते नरः ।

---

* परलोकं गता इति (ग) ।

सर्व्वपापविनिर्मुक्तः सूर्य्यलोकं* व्रजेन्नरः ।
तत्राऽथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ११ ।
अर्कस्थलसमीपे तु कूपन्तु विमलोदकम् ।
सप्तसामुद्रकं नाम देवानामपि दुर्लभम् ॥ १२ ।
तत्र स्नानेन वसुधे स्वच्छन्दगमनालयः ।
अथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १३ ।
तत्र वीरस्थलं नाम क्षेत्रं गुह्यं परं मम ।
आसन्नसलिलञ्चैव पद्मोत्पलविभूषितम् ॥ १४ ।
यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः ।
स मत्प्रसादात्सुश्रोणि वीरलोके महीयते ।
अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १५ ।
कुशस्थलञ्च तत्रैव पुण्यं पापहरं शुभम् ।
तत्र स्नातो नरो देवि ब्रह्मलोके महीयते ।
अथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १६ ।
तत्र पुष्पस्थलं नाम शिवक्षेत्रमनुत्तमम् ।
तत्र स्नानेन मनुजः शिवलोके महीयते ॥ १७ ।
एते पञ्चस्थलाख्याता† महापापविनाशनाः ।
तेषु स्नानेषु वसुधे ब्रह्मणा सह मोदते ।
तत्र गोपीश्वरोनाम महापातकनाशनः ॥ १८ ।
कृष्णस्य रमणार्थं हि सहस्राणि च षोड़श ।

---

* सूर्य्यलोके इति (ग) । † एतत्पञ्चस्थलाख्यानमिति बहुषु पाठः ।

गोप्योरूपाणि चक्रे च तत्र क्रीड़नके हरिः ॥
यदा बालेन कृष्णेन भग्नार्जुनयुगं तथा ।
शकटञ्च तदा भिन्नं घटभाण्डकुटीरकम् ॥ १८।२० ।
ताभिस्तत्रैव गोविन्दं क्रीड़न्तञ्च यदृच्छया ।
परिष्वज्य* हि धर्म्मेण व्याजेन च सुगोपितम् ।
मातलिस्तत्र चागत्य देवैरुक्तं यथोदितम् ।
गोपवेशधरं देवमभिषेकञ्चकार ह ॥ २१।२२ ।
आनीय सप्त कलशान्त्तौषधिपरिप्लुतान् ।
गोपीमण्डलपातेन स्नापितो हेमकुण्डलः ।
गोप्यो गायन्ति नृत्यन्ति कृष्ण कृष्ण इति ब्रुवन्† ॥ २३ ।
तत्र गोपीश्वरं देवं मातलिः स्थाप्य‡ पूजितम् ।
कूपञ्च स्थापयामास माङ्गल्यैः कलशैः§ शुभैः ।
सप्तसामुद्रिकं नाम कूपन्तु विमलोदकम् ॥ २४ ।
देवस्याग्रे तु वसुधे गोपा यस्य महात्मनः ।
पितरश्चापि नन्दन्ति पानीयं पिण्डमेव च ॥ २५ ।
सप्तसामुद्रिके कूपे यः श्राद्धं सम्प्रदास्यति ।
पितरस्तारितास्तेन कुलानां सप्तसप्ततिः ॥ २६ ।
सोमवारे त्वमायां वै पिण्डदानङ्करोति यः ।
पितरस्तस्य तृप्यन्ति कोटिवर्षशतान्यलम् ॥ २७ ।
गोविन्दस्य च देवस्य तथा गोपीश्वरस्य च ।

---

* परिष्वक्तमिति (ग) । † ब्रुवत्य इति साधु । ‡ स्थापयित्वेति साधु । § कवचैरिति (ग) ।

मध्ये तु मरणं यस्य शक्रस्येति सलोकताम् ।
तथा बहुलरुद्रस्य गोविन्दस्यैव मध्यतः ।
तद्वद्ब्राह्मणमाशास्य गोपीशस्यैव मध्यतः ॥ २८।२९ ।
एतेषु स्नानदानेन पिण्डपातेन भामिनि ।
नरस्तारयते पुंसां दश पूर्व्वान्दशापरान् ॥ ३० ।
एषु स्नातो नरोदेवि देवैश्च सह मोदते ।
तत्राऽथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ३१ ।
वसुपत्रं महातीर्थं पुण्यं परमसुत्तमम् ।
मथुरादक्षिणे पार्श्वे क्षेत्रं फाल्गुनकं तथा ।
तत्र स्नात्वा च पीत्वा च परलोके महीयते ॥ ३२ ।
तत्र फाल्गुनके चैव तीर्थे परमदुर्लभे ।
वृषभाञ्जनकं नाम क्षेत्रं मे दुर्लभं महत् ॥ ३३ ।
तत्राभिषेकं यः कुर्य्यात्स देवैः सह मोदते ।
तत्र यो मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ३४ ।
अस्ति तालवनं नाम धेनुकासुररक्षितम् ।
मथुरापश्चिमे भागे अदूरादर्द्धयोजनम् ॥ ३५ ।
तत्र कुण्डं स्वच्छजलं नीलोत्पलविभूषितम् ।
तत्र स्नानेन दानेन वाञ्छितं फलमाप्नुयात् ॥ ३६ ।
अस्ति सम्पीठकं नाम अस्मिन् क्षेत्रे परं मम* ।
तत्र कुण्डं विशालाक्षि प्रसन्नसलिलं शुभम् ॥ ३७ ।

* (क), (ख) पुस्तकयोरत्र तीर्थमृषिवर्णार्चितमिति पाठोऽस्ति, तत्र चातः परं चरण-चतुष्टयं नास्ति ।

तत्र स्नानं च ये कुर्य्युरेकरात्रोषिता नराः।
अग्निष्टोमफलञ्चैव लभन्ते नात्र संशयः।
अथाऽत्र मुञ्चति प्राणान्मम लोकं स गच्छति ॥ ३८।
देवकीगर्भसम्भूतो* वसुदेवगृहे शुभे।
तत्र पुण्येन हि मया रविराराधितः शुभः।
लब्धः प्राज्ञो मया पुत्त्रो रूपवांश्च गुणान्वितः ॥ ३९।
तत्रैवं तु ततो दृष्टः पद्महस्तो दिवाकरः।
मासि भाद्रपदे देवि तिग्मतेजा विभावसुः।
सप्तम्यां कृष्णपक्षस्य रविस्तिष्ठति सर्व्वदा ॥ ४०।
तस्मिन्नहनि यः स्नानं कुर्य्यात्कुण्डे समाहितः।
न तस्य दुर्लभं लोके सर्व्वदाता दिवाकरः ॥ ४१।
आदित्येऽहनि सम्प्राप्ते सप्तम्यान्तु वसुन्धरे।
नरो वाप्यथवा नारी प्राप्नोत्यविकलम्फलम् ॥ ४२।
तत्रैव तु तपस्तप्तं राज्ञा शान्तनुना पुरा।
आदित्यन्तु पुरः स्थाप्य† प्राप्तो भीष्मोमहाबलः ॥ ४३।
शान्तनुः प्राप्य तं पुत्त्रं गतोऽसौ हस्तिनापुरम्।
तत्र स्नानेन दानेन वाञ्छितं फलमाप्नुयात् ॥ ४४।

इति वराहपुराणे मथुरामाहात्म्ये सप्तपञ्चाशदधिक-
शततमोऽध्यायः।

---

* देवकीगर्भसम्भूत इति पाठः सर्व्वत्र वर्त्तते, देवकीगर्भजातेन इति कृते तु सम्यक् स्यादिति। † स्थापयित्वेति साधु।

अष्टापञ्चाशदधिकशततमोऽध्यायः ।

वराह उवाच ।

विंशतिर्योजनानान्तु माथुरं मम मण्डलम् ।
यत्र तत्र नरः स्नातोमुच्यते सर्व्वकिल्बिषैः ॥ १ ।
वर्षाकाले तु स्नातव्यं यत्र स्नानन्तु हर्षदम् ।
पुण्यात्पुण्यतरञ्चैव माथुरे मम मण्डले ॥ २ ।
सप्तद्वीपेषु तीर्थानि पुण्यान्यायतनानि च ।
मथुरायां गमिष्यन्ति प्रसुप्ते तु सदा मयि ॥ ३ ।
सुप्तोत्थितं तु दृष्ट्वा मां मथुरायां वसुन्धरे ।
ते नरा मां प्रपश्यन्ति सर्व्वकालं न संशयः ॥ ४ ।
सुप्तोत्थितन्तु वसुधे दृष्ट्वा मे मुखपङ्कजम् ।
सप्तजन्मकृतं पापं तत्क्षणादेव मुच्यते ॥ ५ ।
मथुरावासिनो लोकाः सर्व्वे ते मुक्तिभाजनाः ॥ ६ ।
मथुरां समनुप्राप्य दृष्ट्वा देवन्तु केशवम् ।
स्नात्वा पुनस्तु कालिन्द्यां मम लोके महीयते ।
स तत्फलमवाप्नोति राजसूयाश्वमेधयोः ॥ ७ ।
प्रदक्षिणीकृतो येन मथुरायान्तु केशवः ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ ८ ।
घृतपूर्णेन पात्रेण समग्रेण च वाससा ।
केशवस्याग्रतो दत्त्वा दीपकन्तु वसुन्धरे ।
पञ्चयोजनविस्तारमायामं पञ्चविस्तरम् ।

दीपमालासमाकीर्णं विमानं लभते नरः ॥ ९।१० ।
सर्व्वकामसमृद्धं तदप्सरोगणसेवितम् ।
रम्यमालासमाकीर्णं भोगाढ्यं सर्व्वकामिकम् ।
समारोहति वै नित्यं प्रभामण्डलमण्डितम् ॥ ११ ।
ये देवा ये च गन्धर्व्वाः सिद्धाश्चारणपन्नगाः ।
तं स्पृहन्ति सदा देवि पुण्यमस्ति कृतम्भुवि ॥ १२ ।
यदि कालान्तरे पुण्यं हीयतेऽस्य पुरा कृतम् ।
सतां पुण्यगृहे देवि जायते मानवो हि सः ॥ १३ ।

धरण्युवाच ।

क्षेत्रं हि रक्षते* देव कस्त्विदं पापनाशनम् ।
पशुभूतपिशाचैश्च रक्षोभूतविनायकैः ।
एवमादिभिराकृष्टन्तत्क्षेत्रं फलदं भवेत् ॥ १४ ।

वराह उवाच ।

मत्क्षेत्रं ते न पश्यन्ति मत्प्रभावात्कदाचन ।
न विकुर्व्वन्ति ते दृष्ट्वा मत्पराणां हि देहिनाम् ॥ १५ ।
रक्षार्थं हि मया दत्ता दिक्पालास्तु वरानने ।
लोकपालास्तु चत्वारस्तीर्थं रक्षन्ति ये सदा ॥ १६ ।
पूर्व्वां रक्षति इन्द्रस्तु यमो रक्षति दक्षिणाम् ।
पश्चिमां रक्षते नित्यं वरुणः पाशभृत्स्वयम् ॥ १७ ।
उत्तरान्तु कुवेरस्तु महाबलपराक्रमः ।

---

* रक्षतीति साधु, एवं परत्र ।

मध्यान्तु रक्षते नित्यं शिवो देव उमापतिः ॥ १८ ॥
मथुरायां गृहं यस्तु प्रासादङ्कुरुते नरः ।
चतुर्भुजस्तु विज्ञेयो जीवन्मुक्तो न संशयः ॥ १९ ॥
मथुराया महाभागे कुण्डे च विमलोदके ।
गम्भीरे सर्व्वदा देवि तिष्ठते* च चतुर्भुजः ॥ २० ॥
तत्र मुञ्चेत यः प्राणान्स्नानङ्कृत्वा वसुन्धरे ।
वैष्णवं लोकमासाद्य क्रीड़ते स सुखादिव ॥ २१ ॥
तत्रैव तु महाश्चर्य्यं कथ्यमानं मया शृणु ।
यदुच्यते वै सुश्रोणि कुण्डे तु विमलोदके ॥ २२ ॥
हेमन्ते तु भवेच्चोष्णं शीतलङ्ग्रीष्मके भवेत् ।
तेजसा मम सुश्रोणि तुषारसदृशोपमम् ॥ २३ ॥
न वर्द्धते च वर्षासु ग्रीष्मे चापि न हीयते ।
एतच्च महदाश्चर्य्यं तस्मिन्कुण्डे परं मम ॥ २४ ॥
पदे पदे तीर्थफलं मथुरायां वसुन्धरे ।
तत्र तत्र नरः स्नातो मुच्यते सर्व्वपातकैः ॥ २५ ॥
वर्षासु स्थूल†तीर्थेषु स्नातव्यन्तु प्रयत्नतः ।
कूपे ह्रदे देवखाते‡ गर्त्तेषु च नदीषु च ॥ २६ ॥
प्रवाहेषु च दिव्येषु नदीनां सङ्गमेषु च ।
वर्षासु सर्व्वतः स्नायाद्यदीच्छेत्परमाङ्गतिम् ॥ २७ ॥

---

* तिष्ठतीति साधु । † स्थलीतीर्थेष्विति (क), (ख) । ‡ ह्रदेषु देवखाते-ष्विति (ग) ।

अस्ति क्षेत्रं परं दिव्यं मुचुकुन्दन्तु नामत: ।
मुचुकुन्द: स्वपित्यत्र दानवासुरपातन: ॥ २८ ।
तत्र कुण्डे नर: स्नात्वा प्राप्नोत्यभिमतं फलम् ।
अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ २९ ।
इहजन्मकृतं पापमन्यजन्मकृतञ्च यत् ।
तत्सर्व्वं नश्यते शीघ्रङ्कीर्त्तनात्केशवस्य तु ॥ ३० ।
किं तस्य बहुभिर्मन्त्रैर्भक्तिर्यस्य जनार्द्दने ।
नरके पाच्यमानस्य गतिर्द्देवि जनार्द्दन: ॥ ३१ ।
कृत्वा प्रदक्षिणं देवि विश्रामं कुरुते तु य: ।
नारायणसमीपन्तु सोऽनन्तफलमश्नुते ॥ ३२ ।
सुप्तोत्थितं हरिं दृष्ट्वा मथुरायां वसुन्धरे ।
न तस्य पुनरावृत्तिर्जायते स चतुर्भुज: ॥ ३३ ।
कुमुदस्य तु मासस्य नवम्यान्तु वसुन्धरे ।
प्रदक्षिणीकृत्य वसुधां* सर्व्वपापै: प्रमुच्यते ॥ ३४ ।
ब्रह्मघ्नश्च सुरापश्च गोघ्नो भग्नव्रतस्तथा ।
मथुरान्तु परिक्रम्य पूतो भवति मानव: ॥ ३५ ।
अष्टम्यां प्राप्य मथुरां दन्तधावनपूर्व्वकम् ।
ब्रह्मचर्य्येण तां रात्रिङ्कृतसङ्कल्पमानस: ॥
धौतवस्त्रस्तु सुस्नातो मौनव्रतपरायण: ।

---

* सर्व्वत्रैव एष: पाठो दृश्यते, परमत्र छन्दोदोष: । प्रदक्षिणीकृत्य धरामिति पाठे न दोष: ।

प्रदक्षिणन्तु कुर्व्वीत सर्व्वपातकनाशनम्* ॥ ३६।३७।
प्रदक्षिणां क्रियमाण†मन्योयः स्पृशते‡ नरः।
सर्व्वकामानवाप्नोति नाऽत्र कार्य्या विचारणा ॥ ३८।
मथुरायां नरो गत्वा दृष्ट्वा देवं स्वयम्भुवम्।
प्रदक्षिणायां यत्पुण्यं तत्पुण्यं लभते नरः ॥ ३९।
देवस्याग्रे तु वसुधे कूपन्तु विमलोदकम्।
पितरश्चाभिनन्दन्ति पानीयं पिण्डमेव च ॥ ४०।
चतुःसामुद्रिकं नाम त्रिलोकेषु च विश्रुतम्§।
तत्र स्नातो नरो भद्रे देवैश्च सह मोदते।
तत्राऽथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ४१।

इति वराहपुराणे मथुरातीर्थप्रादुर्भावो नाम
अष्टापञ्चाशदधिकशततमोऽध्यायः।

ऊनषष्ट्यधिकशततमोऽध्यायः।

धरण्युवाच।

श्रुतं सुबहुशो देव तीर्थानां गुणविस्तरम्।
प्रोच्यमानन्तु पुण्याख्यं त्वत्प्रसादाज्जनार्द्दन* ॥ १।

---

* सर्व्वपातकशुद्धये इति (ग)। † प्रदक्षिणं हि कुर्व्वाणमिति साधु। ‡ स्पृ...तीति साधु। § कूपं लोकेषु विश्रुतमिति (ग)।

---

* (ग) पुस्तके प्रथमः श्लोकः द्वितीयश्लोकस्यप्रथमपादश्च न स्तः।

न दानैर्न तपोभिश्च न यज्ञैस्तादृशं फलम् ।
भूमेः प्रदक्षिणायाश्च यादृशं तीर्थसेवया ॥ २ ।
भुवश्च चतुरन्तायास्तीर्थप्रक्रमणं हरे ।
सर्व्वतीर्थाभिगमनमस्ति दुर्गतरं नृणाम् ॥ ३ ।
अस्ति कश्चिदुपायोऽत्र येन सम्यगवाप्यते ।
प्रसादसुमुखो भूत्वा तत्सर्व्वं कथयस्व मे ॥ ४ ।

वराह उवाच ।

भद्रे शृणु महत्पुण्यं पृथिव्यां सर्व्वतोदिशम् ।
परिक्रम्य यथाध्वानं प्रमाणगणितं शुभम्* ॥ ५ ।
भूम्याः परिक्रमे सम्यक् प्रमाणयोजनानि च ।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥ ६ ।
तीर्थान्येतानि देवाश्च तारकाश्च नभस्तले ।
गणितानि समस्तानि वायुना जगदायुषा ॥ ७ ।
ब्रह्मणा लोमशेनैव नारदेन ध्रुवेण च ।
जाम्बवतीशपुत्रेण रावणेन हनूमता ।
एतैरनेकधा देवैः ससागरवना मही ।
क्रमिता बलिना चैव बाह्यमण्डलरेखया ॥ ८।९ ।
अन्तरा भ्रमणेनैव सुग्रीवेण महात्मना ।
तथा च पूर्व्वं देवेन्द्रैः पञ्चभिः पाण्डुनन्दनैः ।
योगसिद्धैस्तथा कैश्चिन्मार्कण्डेयमुखैरपि ।

---

* परिक्रम्य यथाध्वानं पृथिव्यां सर्व्वतोदिशमिति क्वचित्पाठः ।

क्रमिता न क्रमिष्यन्ति न पूर्व्वे नापरे जनाः ॥ १०।११ ।
अल्पसत्त्वबलोपेतैः प्राणिभिश्चाल्पबुद्धिभिः ।
मनसाऽपि न शक्यन्ते गमनस्य च का कथा ॥ १२ ।
सप्तद्वीपे च तीर्थानां भ्रमणाद्यत्फलं भवेत् ।
प्राप्यते चाधिकं तस्मान्मथुरायाः परिक्रमे ॥ १३ ।
मथुरां समनुप्राप्य यस्तु कुर्य्यात्प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ १४ ।
तस्मात्सर्व्वप्रयत्नेन सर्व्वकामानभीप्सुभिः ।
कर्त्तव्या मथुराम्प्राप्य नरैः सम्यक् प्रदक्षिणा ॥ १५ ।

धरण्युवाच ।

यथाविधानक्रमणं मथुरायामवाप्यते ।
प्रदक्षिणाफलं सम्यगनुक्रमविधिं वद ॥ १६ ।

वराह उवाच ।

पुरा सप्तर्षिभिः पृष्टो ब्रह्मा लोकपितामहः ।
इदमेव पुरा प्रोक्तं यथा त्वं पृष्टवान्मम ॥ १७ ।
श्रुत्वा सर्व्वपुराणोक्तं तीर्थानुक्रमणं परम् ।
पृथिव्याश्चतुरन्तायास्तथा तद्वक्तुमुद्यतः ॥ १८ ।
सर्व्वदेवेषु यत्पुण्यं सर्व्वतीर्थेषु यत्फलम् ।
सर्व्वदानेषु यत्प्रोक्तमिष्टापूर्त्तेषु चैव हि ॥ १९ ।
यत्फलं लभ्यते विप्रास्तस्माच्छतगुणोत्तरम् ।
प्रक्रमान्मथुरायास्तु सत्यमेतद्वदामि वः ॥ २० ।
इत्युक्त्वा ऋषयो जग्मुरभिवाद्य स्वयम्भुवम् ।

आगत्य मथुरां देवीमाश्रमांश्चक्रतु*र्द्विजाः।
ध्रुवेण सहिता आसन्कामयानास्तु तद्दिनम्॥ २१॥
कुमुदस्य तु मासस्य नवम्यां शुक्लपक्षके।
मथुरोपक्रमं कृत्वा सर्व्वपापैः प्रमुच्यते॥ २२॥

इति वराहपुराणे मथुरामाहात्म्यं नाम
ऊनषष्ठ्यधिकशततमोऽध्यायः।

षष्ठ्यधिकशततमोऽध्यायः।

वराह उवाच।

अष्टम्यां मथुरां प्राप्य कार्त्तिकस्यासिते नरः।
स्नात्वा विश्रान्तितीर्थे तु पितृदेवार्च्चने रतः॥ १॥
विश्रान्तिदर्शनङ्कृत्वा दीर्घविष्णुञ्च केशवम्।
प्रदक्षिणायाः सम्यग्वै फलमाप्नोति मानवः॥ २॥
उपवासरतः सम्यगल्पमेध्याशनोऽथवा।
दन्तकाष्ठञ्च सायाह्ने कृत्वा शुद्ध्यर्थमात्मनः॥ ३॥
ब्रह्मचर्य्येण तां रात्रिं कृत्वा सङ्कल्पमानसः।
धौतवस्त्रेण सुस्नातो मौनव्रतपरायणः॥ ४॥
तिलाक्षतकुशान् गृह्य* पितृदेवार्थमुद्यतः।

---

* चक्रतुरिति (क), (ख), अत्र द्वयमपि आर्षम्, चक्रुरित्येवं साधु।

---

* गृहीत्वेति साधु।

दीपहस्तो वनङ्गत्वा श्रान्तो विश्रान्तिजागरे ॥ ५ ।
यथानुक्रमणन्तैश्च ध्रुवाद्यैर्ऋषिभिः कृतम् ।
एवं परम्परायातं क्रमणीयं नरोत्तमैः ॥ ६ ।
प्रदक्षिणावर्त्तमानो नरो भक्तिसमन्वितः ।
सर्व्वान् कामानवाप्नोति हयमेधफलं लभेत्* ॥ ७ ।
एवं जागरणं कृत्वा नवम्यां नियतः शुचिः ।
ब्राह्मे मुहूर्त्ते सम्प्राप्ते ततो यात्रामुपक्रमेत्† ॥ ८ ।
तथा प्रारभयेद्यात्रां यावन्नोदयते‡ रविः ॥ ९ ।
प्रातःस्नानं तथा कुर्य्यात्तीर्थे दक्षिणकोटिके ।
प्रक्षाल्य पादावाचम्य हनूमन्तं प्रसादयेत् ॥ १० ।
सर्व्वमङ्गलमाङ्गल्यं कुमारं ब्रह्मचारिणम् ।
विज्ञाप्य सिद्धिकर्त्तारं यात्रासिद्धिप्रदायकम् ।
यस्य संस्मरणादेव सर्व्वे नश्यन्त्युपद्रवाः ॥ ११ ।
यथा रामस्य यात्रायां सिद्धिस्ते सुप्रतिष्ठिता ।
तथा परिभ्रमन्मेऽद्य भवान्सिद्धिप्रदो भव ॥ १२ ।
इति विज्ञाप्य विधिवद्धनूमन्तं गणेश्वरम् ।
दीपपुष्पोपहारैस्तु पूजयित्वा विसर्ज्जयेत् ॥ १३ ।
तथैव पद्मनाभन्तु दीर्घविष्णुं भयापहम् ।
विज्ञाप्य सिद्धिकर्त्तारं देव्यश्च§ तदनन्तरम् ।
दृष्ट्वा वसुमतीं देवीं तथैव ह्यपराजिताम् ।

---

* लभेतेति साधु । † उपक्रमेतेति साधु । ‡ उदयतीति साधु । § देवीरिति साधु, एवं परत्र गृहदेवीः, वास्तुदेवीरिति साधु ।

आयुधागारसंस्थाञ्च नृणां सर्व्वभयापहाम् ॥
कंसवासनिकां तद्वदौग्रसेनाञ्च* चर्च्चिकाम् ।
वधूटीञ्च तथा देवि† दानवक्षयकारिणीम् ।
जयदां देवतानाञ्च मातरो‡ देवपूजिताः ।
गृहदेव्योवासुदेव्यो दृष्ट्वानुज्ञाप्य निर्गमेत्§॥ १४।१५।१६।१७।
मौनव्रतधरो गच्छेद्यावद्दक्षिणकोटिके ।
प्राप्य स्नात्वा पितॄंस्तर्प्य¶ दृष्ट्वा देवं प्रणम्य च ।
नत्वा गच्छेदिक्षुवासां देवि‖ कृष्णसुपूजिताम् ॥ १८ ।
बालक्रीड़नरूपाणि कृतानि सह गोपकैः ।
यानि तीर्थानि तान्येव स्थापितानि महर्षिभिः ।
ख्यातिङ्गतानि सर्व्वाणि सर्व्वपापहराणि च ॥ १९ ।
वत्सयुक्तं ततो गच्छेत्सर्व्वपापहरं परम् ।
अर्कस्थलं** वीरस्थलं कुशस्थलमनन्तरम् ॥ २० ।
पुण्यस्थलं महास्थलं महापापविनाशनम्††।
पञ्चस्थलानि तत्रैव सर्व्वपापहराणि च ॥
येषां तु दर्शनादेव ब्रह्मणा सह मोदते ।
शिवं सिद्धमुखं दृष्ट्वा स्थलानां फलमाप्नुयात् ॥ २१।२२ ।
हयमुक्तिं ततो गच्छेत्सिन्दूरं ससहायकम् ।
श्रूयते चात्र ऋषिभिर्गाथा गीता पुरातना‡‡ ॥ २३ ।

---

* औग्रसेनीन्त्विति (ग)। † तथा देवीमिति (ग)। ‡ मातृरिति साधु।
§ निर्गच्छेदिति साधु। ¶ तर्पयित्वेति साधु। ‖ देवीमिति (ग)। ** अङ्कस्थलमिति (ग), (ख)। †† महापातकनाशनमिति (ग)। ‡‡ पुरातनीति साधु।

अश्वारूढ़ेन तेनैव यत्रेयं समनुस्थिता ।
अश्वोमुक्तिं गतस्तत्र सहायसहितः सुखम् ॥ २४ ।
राजपुत्तः स्थितस्तत्र यानयात्रा न मुक्तिदा ।
तस्माद्यानैश्च यात्रा च न कर्त्तव्या फलेच्छया ॥ २५ ।
तस्मिंस्तीर्थे तु तं दृष्ट्वा स्पृष्ट्वा पापैः प्रमुच्यते ।
कुण्डं शिवस्य विख्यातं तत्र स्नानफलं महत् ॥ २६ ।
मल्लिकादर्शनङ्कृत्वा कृष्णस्य जयदं शुभम् ।
ततः कदम्बखण्डस्य गमनात्सिद्धिमाप्नुयात् ॥ २७ ।
चर्च्चिका योगिनी तत्र योगिनीपरिवारिता ।
कृष्णस्य रक्षणार्थं हि स्थिता सा दक्षिणां दिशम् ॥ २८ ।
अस्पृश्या चास्पृशा चैव मातरौ लोकपूजितौ* ।
बालानां दर्शनं ताभ्यां महारक्षाङ्करिष्यति ॥ २९ ।
वर्षखातं ततोगत्वा कुण्डं पापहरम्परम् ।
गत्वा स्नात्वा पितॄंस्तर्प्य† सर्व्वपापैः प्रमुच्यते ॥ ३० ।
क्षेत्रपालं ततो गत्वा शिवं भूतेश्वरं हरम् ।
मथुराक्रमणं तस्य जायते सफलं तथा ॥ ३१ ।
कृष्णक्रीड़ासेतुबन्धं महापातकनाशनम् ।
बालानां क्रीड़नार्थञ्च कृत्वा देवोगदाधरः ।
गोपकैः सहितस्तत्र क्षणमेकं दिने दिने ।
तत्रैव रमणार्थं हि नित्यकालं स गच्छति ॥ ३२।३३ ।

---

* लोकपूजिते इति साधु । † तर्पयित्वेति साधु ।

बलिह्रदश्च* तत्रैव जलक्रीडाकृतं शुभम् ।
यस्य सन्दर्शनादेव सर्व्वपापैः प्रमुच्यते ॥ ३४ ।
ततः परञ्च कृष्णेन कुक्कुटैः क्रीड़नङ्कृतम् ।
यस्य दर्शनमात्रेण चण्डोऽपि गतिमाप्नुयात् ॥ ३५ ।
स्तम्भोच्चयं सुशिखरं सौरभैः ससुगन्धिभिः ।
भूषितं पूजितं तत्र कृष्णेनाक्लिष्टकर्म्मणा ॥ ३६ ।
तस्य प्रदक्षिणङ्कृत्वा परिपूज्य प्रयत्नतः ।
मुच्यते सर्व्वपापेभ्यो विष्णुलोकं व्रजेत्तु सः† ॥ ३७ ।
वसुदेवेन देवक्या गर्भस्य रक्षणाय च‡ ।
कृतमेकान्तशयनं महापातकनाशनम् ॥ ३८ ।
ततोनारायणस्थानं प्रविशेन्मुक्तिहेतवे ।
परिक्रम्य ततो देवान्नारायणपुरोगमान् ॥ ३९ ।
दृष्ट्वा ततः सुविज्ञाप्य गणं विधिविनायकम् ।
कुब्जिकां वामनाञ्चैव ब्राह्मणीं कृष्णपालिते ॥ ४० ।
अनुज्ञाय ततः स्थानं द्रष्टुङ्गर्त्तेश्वरं शिवम् ।
दृष्टमात्रेण तत्रैव यात्राफलमवाप्यते ॥ ४१ ।
महाविद्येश्वरी देवी आरक्षं पापकं हरेत्§ ।
रक्षणार्थं हि क्षेत्रस्य यात्रायाः सिद्धिदां नृणाम् ।
प्रभामल्लीञ्च¶ तत्रैव दृष्ट्वा कामानवाप्नुयात् ॥ ४२ ।

---

* बालक्रन्दमिति (क), (ख) । † व्रजेन्नर इति (ग) । ‡ गर्भसंरक्षणाय चेति (ग) ।
§ आरक्षं परमं हरेरिति (ग) । ¶ प्रभालक्ष्मिमिति (ग) ।

महाविद्येश्वरी देवी कृष्णरक्षार्थमुद्यता ।
नित्यं सन्निहिता तत्र सिद्धिदा पापनाशिनी ॥ ४३ ॥
कृष्णेन बलभद्रेण गोपैः कंसं जिघांसुभिः ।
सङ्केतकङ्कृतं तत्र मन्त्रनिश्चयकारकम् ॥ ४४ ।
तदा संकेतकैः सा च सिद्धा देवी प्रतिष्ठिता ।
सिद्धिप्रदा भोगदा च तेन सिद्धेश्वरी स्मृता ।
सङ्केतकेश्वरीञ्चैव दृष्ट्वा सिद्धिमवाप्नुयात् ॥ ४५ ।
तत्र कुण्डं स्वच्छजलं महापातकनाशनम् ॥ ४६ ।
ततो दृष्ट्वा महादेवं गोकर्णेश्वरनामतः ।
यस्य दर्शनमात्रेण सर्व्वपापैः प्रमुच्यते ॥ ४७ ।
सरस्वतीं नदीं दृष्ट्वा ततो भद्राणि पश्यति ।
विघ्नराजं ततो गच्छेद्गणेशं विघ्ननायकम् ।
सर्व्वसिद्धिप्रदं रम्यं दर्शनाच्च फलं लभेत् ॥ ४८ ।
गङ्गा साध्वी च तत्रैव महापातकनाशिनी ।
दृष्ट्वा स्पृष्ट्वा तथा ध्यात्वा सर्व्वकामान् समश्नुते ॥ ४९ ।
महादेवमुखाकारं नाम्ना रुद्रमहालयम् ।
क्षेत्रपन्तं परं दृष्ट्वा क्षेत्रवासफलं लभेत् ।
तस्मादुत्तरकोटिञ्च दृष्ट्वा देवङ्गणेश्वरम् ॥ ५० ।
द्यूतक्रीडा भगवता कृता गोपजनैः सह ।
नानावहासरूपेण जिता गोप्यो धनानि च ॥ ५१ ।
गोपैरानीय ताश्चैव कृष्णाय च निवेदिताः ।
गोपालकृष्णगमनं महापातकनाशनम् ॥ ५२ ।

समस्तं बालचरितं भ्रमणं च यथासुखम्।
क्षतं तत्र यथारूपं यद्रूपञ्च यथा तथा।
ऋषिभिः सेवितं ध्यातं विष्णोर्माहात्म्यमुत्तमम्॥ ५३।
ततो गच्छेन्महातीर्थं विमलं यमुनाम्भसि।
स्नात्वा पीत्वा पितॄंस्तर्प्य नाम्ना रुद्रमहालयम्।
गार्ग्यतीर्थे महापुण्ये नरस्तत्र तथा क्रमेत्* ॥ ५४।
भद्रेश्वरे महातीर्थं सोमतीर्थं तथैव च।
स्नात्वा सोमेश्वरं देवं दृष्ट्वा यात्राफलं लभेत्॥ ५५।
सरस्वत्याः सङ्गमे च देवर्षिपितृमानवान्।
सन्तर्प्य विधिवद्दत्त्वा विष्णुसायुज्यमाप्नुयात्॥ ५६।
घण्टाभरणके तद्वत्तथा गरुड़केशवे।
धारालोपनके तद्वद्वैकुण्ठे खण्डवेलके॥ ५७।
मन्दाकिन्याः संयमने असिकुण्डे तथैव च।
गोपानां तीर्थके चैव तथैव मुक्तिकेश्वरे॥ ५८।
वैलत्रगरुड़े चैव महापातकनाशने।
तीर्थान्येतानि पुण्यानि यथा विश्रान्तिसंज्ञकम्॥ ५९।
एषु तीर्थेषु क्रमितो भक्तिमांश्च जितेन्द्रियः।
देवान् पितॄन्समभ्यर्च्य ततो देवं प्रसादयेत्॥ ६०।
अविमुक्तेश देवेश सप्तर्षिभिरनुष्टुत।
मथुराक्रमणीयं मे सफलं स्यात्तवाज्ञया॥ ६१।
इत्येवं देवदेवेशं विज्ञाय चेत्रपं शिवम्।

---

* क्रामेदिति साधु।

विश्रान्तिसंज्ञके स्नानङ्कृत्वा च पितृतर्पणम् ॥ ६२ ।
गतश्रमम्परिक्रम्य स्तुत्वा दृष्ट्वा प्रणम्य च ।
सुमङ्गलां ततो गच्छेद्यात्रासिद्धिं प्रसादयेत् ॥ ६३ ।
सर्व्वमङ्गलमङ्गल्ये शिवे सर्व्वार्थसाधिके ।
यात्रेयं त्वत्प्रसादेन सफला मे भवत्विति ॥ ६४ ।
पिप्पलादेश्वरं देवं पिप्पलादेन पूजितम् ।
विश्रान्तस्तु परिक्रम्य यातस्तत्र महातपाः ॥ ६५ ।
उपलिप्य ततस्तस्य शीर्षोपरि महच्छिवम् ।
स्वनाम्ना चिह्नितं स्थाप्य* तदा यात्राफलं लभेत् ॥ ६६ ।
कर्कोटकं तथा नागं महादुष्टनिवारणम् ।
दृष्ट्वा गच्छेत्ततो देवीं या कृष्णेन विनिर्म्मिता ॥ ६७ ।
कंसभेदं प्रथमतः श्रुतं यत्र कुमन्त्रितम् ।
सुखवासञ्च वरदङ्कृष्णस्याक्लिष्टकर्म्मणः ।
सुखासीनञ्च तत्रैव स्थापितं शकुनाय वै ॥ ६८ ।
स्वानुकूलो स्वरोयत्र प्रवेशे दक्षिणः स्वनः ।
ध्याता स्वभावे कृष्णेन स्वसा सातिसुखप्रदा ॥ ६९ ।
भयार्त्तेन च कृष्णेन ध्याता देवी च चण्डिका ।
स्थापिता सिद्धिदा तत्र नाम्ना चार्त्तिहरा ततः ।
दृष्ट्वा सर्व्वार्त्तिहरणं यस्या देव्या सुखी नरः ॥ ७० ।
अथोत्तरं शुभतरं शकुनार्थञ्च याचतः ।
कृष्णस्य कंसघातार्थं सम्भूता सा तथोत्तरे ॥ ७१ ।

---

* स्थापयित्वेति साधु ।

तां दृष्ट्वा मनुजः कामान्सर्व्वानिष्टानवाप्नुते ॥ ७२ ।
वज्रानन्नं ततो ध्यात्वा कृष्णोमल्लजिघांसया ।
निहत्य मल्लान् पश्चाद्धि वज्रराननमकल्पयत् ।
वाञ्छितार्थफलञ्चक्रे कृष्णेनास्य मनोरथान् ॥ ७३ ।
यस्यै यस्यै देवतायै तस्यै तस्यै ददौ मखम् ।
उपयाचितन्तु माङ्गल्यं सर्व्वपापहरं शुभम् ॥ ७४ ।
कृष्णस्य बालचरितं महापातकनाशनम् ।
सूर्य्यं तं वरदं देवं माथुराणां कुलेश्वरम् ।
दृष्ट्वा तत्रैव दानञ्च दत्त्वा यात्रां समापयेत् ॥ ७५ ।
एवं प्रदक्षिणङ्कृत्वा नवम्यां शुक्लकौमुदे ।
सर्व्वं कुलं समादाय विष्णुलोके महीयते ॥ ७६ ।
क्रमतः पदविन्यासाद्यावन्तः सर्व्वतोदिशः ।
तावतः कुलसम्भूताः सूर्य्ये तिष्ठन्ति शाश्वते ॥ ७७ ।
ब्रह्मघ्नश्च सुरापश्च चौरा भग्नव्रताश्च ये ।
अगम्यागमने शीलाः चैत्रदारापहारकाः ।
मथुराक्रमणङ्कृत्वा विपाप्मानो भवन्ति ते ॥ ७८ ।
अन्यदेशागतो दूरात्परिभ्रमति यो नरः ।
तस्य सन्दर्शनादन्ये पूताः स्युर्विगतामयाः ॥ ७९ ।
श्रुतं यैश्च विदूरस्थैः कृतयात्रं नरं नरैः ।
सर्व्वपापविनिर्मुक्तास्ते यान्ति परमम्पदम् ॥ ८० ।

इति वराहपुराणे मथुरापरिक्रमप्रादुर्भावे
षष्ठ्यधिकशततमोऽध्यायः ।

एकषष्ठ्यधिकशततमोऽध्यायः ।

धरण्युवाच ।

ये धर्म्मविमुखा मूढाः सर्व्वज्ञानविवर्ज्जिताः ।
का गतिः कृष्ण तेषां हि विहिता नरके सुरैः ॥ १ ॥
अभुक्त्वा नारकं दुःखं सुकृतैः पुण्यदैर्नृणाम् ।
प्रयान्ति कर्म्मणा येन तमुपायं ब्रवीहि मे ॥ २ ॥

वराह उवाच ।

सर्व्वधर्म्मविहीनानां पुरुषाणां दुरात्मनाम् ।
नरकार्त्तिहरा देवी मथुरा पापघातिनी ॥ ३ ॥
मथुरावासिनो ये च तीर्थानाञ्चोपसेवकाः ।
वनानां दर्शको वाथ मथुराक्रमकोऽपि वा ॥
एषां मध्ये कृतं यैश्च एकञ्च शतमोजसा ।
न ते नरकभोक्तारः स्वर्गभाजो भवन्ति ते ॥ ४।५ ॥
प्रथमं मधुवनं नाम द्वितीयं तालमेव च ।
वनं कुन्दवनञ्चैव तृतीयं वनमुत्तमम् ॥ ६ ।
चतुर्थं काम्यकवनं वनानां वनमुत्तमम् ।
पञ्चमम्बहुवनं नाम षष्ठं भद्रवनं स्मृतम् ॥ ७ ।
सप्तमन्तु वनं भूमे खादिरं लोकविश्रुतम् ।
महावनं चाष्टमन्तु सदैव च मम प्रियम् ॥ ८ ।
लोहार्गलवनं नाम नवमं पातकापहम् ।
वनं विल्ववनं नाम दशमं देवपूजितम् ॥ ९ ।

एकादशन्तु भाण्डीरं द्वादशं वृन्दकावनम्* ।
एतानि ये प्रपश्यन्ति न ते नरकभोगिनः ॥ १० ।
यथाक्रमेण ये यात्रां वनानाञ्च जितेन्द्रियाः ।
करिष्यन्ति वरारोहे इन्द्रलोकं व्रजन्ति ते ॥ ११ ।

इति वराहपुराणे मथुरामाहात्म्ये देववनप्रभावो नाम
एकषष्ट्यधिकशततमोऽध्यायः ।

द्विषष्ट्यधिकशततमोऽध्यायः ।

वराह उवाच ।

पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
चक्रतीर्थे पुरा वृत्तं मथुरायां तथोत्तरे ॥ १ ।
महाशठहोदयं नाम जम्बूद्वीपस्य भूषणम् ।
तस्मिन् पुरवरे दिव्ये ब्राह्मणो वसते* शुभे ॥ २ ।
कन्यां सपुत्त्रमादाय ब्राह्मणो वेदपारगः ।
शालिग्रामं महापुण्यमगच्छद्ब्राह्मणोत्तमः ॥ ३ ।
तत्रासौ वासमकरोत्पुण्यसेवी जितेन्द्रियः ।
तीर्थसेवी च स्नायी च† देवतादर्शने रतः ॥ ४ ।

---

* वृन्दावनमिति (क), (ख), तत्र छन्दोदोषः ।

---

* वसतीति साधु । † तीर्थसेवी स्नानपर इति (ग) ।

तत्र सिद्धेन संवासो ब्राह्मणस्याभवत्तदा ।
स सिद्धो वसते नित्यं कल्पग्रामे च सर्व्वदा ।
गच्छते* सर्व्वकालन्तु शालिग्रामे वसुन्धरे ॥ ५ ।
स तेन सह सङ्गत्य कान्यकुब्जनिवासिना ।
कल्पग्रामविभूतिञ्च नित्यकालमवर्णयत् ॥ ६ ।
कल्पग्रामविभूतिश्च श्रुत्वा स मुनिसत्तमः ।
गमने बुद्धिरुत्पन्ना ततः सिद्धमयाचत ॥ ७ ।
मित्रत्वं वर्त्तते सिद्ध नयस्वात्मनिवेशने ।
ब्राह्मणस्य वचः श्रुत्वा सिद्धो वचनमब्रवीत् ॥ ८ ।
तत्र सिद्धा हि गच्छन्ति ते न तत्र गतिर्भवेत् ।
प्रार्थनाद्दुःखलाभन्तु शृणु वै ब्राह्मणोत्तम ॥ ९ ।
आत्मयोगबलेनैव चलिष्यामि सपुत्त्रकः ।
दक्षिणे तु करे गृह्य ब्राह्मणं वेदपारगम् ।
वामे च तु करे गृह्य तस्य पुत्त्रं महामतिम् ।
उत्पपात तदा सिद्धो गृहीत्वा ब्राह्मणोत्तमौ ॥ १० ।
कल्पग्रामे तु तौ मुक्तौ पितापुत्त्रौ वसुन्धरे ।
तत्र तौ वसतोनित्यं कल्पग्रामे द्विजोत्तमौ ॥ ११ ।
तत्र कालेन महता रुग्देहे चाभवत्तदा ।
रुजा तु पीड्यमानः स दशमीञ्च दशाङ्गतः ॥ १२ ।
मर्त्तुकामो द्विजवरो निरीक्ष्य सुतमुत्तमम् ।
उवाच पुत्त्रं धर्म्मात्मा मरणे समुपस्थिते ।

* गच्छतीति साधु ।

गङ्गातीरे च मां पुत्र नय त्वं मा विलम्बय ॥ १३ ।
तेन पुत्रेण नीतोऽसौ गङ्गातीरे महामुनिः ।
रुरोद पुत्रस्तु तदा पितृस्नेहसमन्वितः ॥ १४ ।
वेदाध्ययनशीलः स पितृभक्त्या नियन्त्रितः ।
वसतस्तस्य वै तत्र कालोजातो महामतेः ॥ १५ ।
कल्पग्रामे तदा सिद्धस्तस्य कन्या सुमध्यमा ।
वरमन्वेषयन्ती सा न प्राप्तस्तु तया मतः ॥ १६ ।
कदाचिद्दैवयोगेन कान्यकुब्जनिवासिनः ।
गृहे प्रविष्टो विप्रः स भोजनार्थं महामतिः ॥ १७ ।
पृष्टोऽसौ ब्राह्मणो भद्रे क भवांस्त्वमिहागतः ।
स सर्व्वं कथयामास यथावृत्तं दृढ़व्रतः ॥ १८ ।
दिव्यज्ञानेन तं ज्ञात्वा पूजयामास तं द्विजः ।
पूजयित्वा यथान्यायङ्कन्यां तस्मै ददौ तदा ॥ १९ ।
श्वशुरस्य गृहे नित्यं भोजनं कुरुते द्विजः ।
वसते पितृसान्निध्ये प्रतिचारी स पुत्रकः ॥ २० ।
काले भगवतस्तस्य अतिक्षीणः पिता तदा ।
तं दृष्ट्वा क्षीणतां प्राप्तं श्वशुरं पर्य्यपृच्छत ॥ २१ ।
स्वामिन्पितुर्मे मरणं भविष्यति वदस्व माम् ।
जामातृवचनं श्रुत्वा प्रहस्य श्वशुरोऽब्रवीत् ॥ २२ ।
शूद्रान्नं भक्षितं तेन नित्यकालं द्विजोत्तम ।
तस्य चाहारदोषेण मृत्युर्दूरङ्गतः पितुः ॥ २३ ।
पादयोर्विद्यते तच्च शूद्रान्नञ्च पितुस्तव ।

जान्वोरूर्द्धं न विद्येत शूद्रान्नञ्च द्विजोत्तम।
शूद्रान्नेन विहीनस्य तस्य मृत्युर्भविष्यति ॥ २४ ।
श्वशुरस्य तु वचनं पितुरग्रे न्यवेदयत् ।
तस्य पुत्रस्य वचनं श्रुत्वात्मानं विगर्हयत्* ॥ २५ ।
ततः प्रभाते विमले उदिते च दिवाकरे ।
पितुः समीपात्स गतः श्वशुरस्य निवेशनम् ॥ २६ ।
गते पुत्रे पिता तस्य रुजा अत्यन्तपीड़ितः ।
दुःखेन पीड़ितः क्षीणो मर्त्तुकामो द्विजोत्तमः ।
गङ्गातीरात्समुत्तिष्ठन्दिशः सर्वा विलोकयन् ।
सन्निधावुपलं दृष्ट्वा गृहीतं तेन तत्पदा ॥ २७।२८ ।
चूर्णयामास तौ पादौ पीड़या मोहितोद्विजः ।
ततः प्राणान् परित्यज्य गतोऽसौ कालवर्त्तनम् ॥ २९ ।
स्नात्वा भुक्ता ततोगत्वा प्रेच्य तं पितरं मृतम् ।
गतसंज्ञञ्च पितरं दृष्ट्वा स रुरुदे भृशम् ॥ ३० ।
रुदित्वा सुचिरङ्कालं शास्त्रं दृष्ट्वा व्यचिन्तयत् ।
संस्कारयोग्यता नास्ति इत्येव पुनरब्रवीत् ॥ ३१ ।
सर्पशृङ्गिहतानाञ्च दंष्ट्रिविप्रहतस्य च ।
आत्मनस्त्यागिनश्चैव आपस्तम्बोऽब्रवीदिदम् ॥ ३२ ।
आत्मघाती नरः पापो नरके पच्यते चिरम् ।
प्रायश्चित्तं विधीयीत न दद्याच्चोदकक्रियाम् ।
अहो दैवं सुबलवत्पौरुषन्तु निरर्थकम् ॥ ३३ ।

* व्यगर्हयदिति साधु ।

तस्य पुत्रो महाभागे गतः श्वशुरमन्दिरम्।
तं दृष्ट्वा श्वशुरो दीनमिदं वचनमब्रवीत्।
ब्रह्महत्या तु ते जाता गच्छ त्वञ्च यथेप्सितम्॥ ३४॥
श्वशुरस्य वचः श्रुत्वा जामाता वाक्यमब्रवीत्।
न मया ब्राह्मणवधः कदाचिदपि कारितः।
केन दोषेण मे सिद्धं ब्रह्महत्याफलं महत्॥ ३५॥
जामातुर्वचनं श्रुत्वा श्वशुरो वाक्यमब्रवीत्।
पितुस्त्वया वधोपायो विनिर्द्दिष्टस्य पुत्रक।
तेन दोषेण विप्रर्षे ब्रह्महत्याफलं तव॥ ३६॥
आसन्नशयनाच्चैनं भोजनात्कथनादिषु।
संवत्सरेण पतति पतितेन सहाचरन्।
तस्मान्मम गृहे नास्ति वासस्ते हि द्विजोत्तम॥ ३७॥
श्वशुरस्य वचः श्रुत्वा जामाता वाक्यमब्रवीत्।
किं मया वद कर्त्तव्यं त्वया त्यक्तेन सुव्रत॥ ३८॥
तस्य तद्वचनं श्रुत्वा ब्राह्मणः शंसितव्रतः।
कल्पग्राममम्परित्यज्य मथुरां याहि सुव्रत।
नान्यत्र तव संशुद्धिः कदाचित्पितृघातिनः॥ ३९॥
कल्पग्रामं परित्यज्य तत्क्षणादेव निःसृतः।
ततः कालेन महता सम्प्राप्तो मथुरां पुरीम्।
ब्राह्मणेभ्यो वहिःस्थाने नित्यन्तु वसते द्विजः॥ ४०॥
कन्यापुरनिवासी तु कुशिकोऽथ नराधिपः।
तस्य सत्रं नित्यकालं मथुरायां प्रवर्त्तते॥ ४१॥

द्वे सहस्रे तु विप्राणां तस्य सत्रे च भुञ्जते ।
ब्राह्मणानां सदोच्छिष्टं ततश्चोद्धरते तु सः ॥ ४२ ।
चक्रतीर्थं समासाद्य स्नानं स कुरुते सदा ।
न भिक्षां कुरुते तत्र भोजनार्थं न गच्छति ॥ ४३ ।
ततः कालेन महता चिन्ताभूच्छ्वशुरस्य च ।
दिव्यज्ञानेन तत्सर्व्वं ज्ञात्वा जामातृचेष्टितम् ।
स्वां सुतां चोदयामास गच्छ तां मथुरां पुरीम् ।
भोजनं गृह्य तत्रैव गच्छ त्वं भर्त्तृसन्निधौ ॥ ४४ ।
दिव्यज्ञानेन च तदा नित्यं सा भर्त्तृसन्निधौ ।
दिने दिने गच्छति सा भर्त्तुर्भोजनकारणात् ।
दिवसस्यावसाने तु भोजनं गृह्य गच्छति ॥ ४५ ।
भोजनं कुरुते नित्यं प्रियादत्तं वसुन्धरे ।
पात्रं निःक्षिप्य कुण्डे तु सत्रे वसति सर्व्वदा ॥ ४६ ।
एवं निवसतस्तस्य वर्षार्द्धन्तु गतं तदा ।
ततः कालेन महता तैः पृष्टः स द्विजोत्तमः ।
कुत्र सन्तिष्ठसे नित्यं भोजनं कुरुषे कुतः ॥ ४७ ।
कथयामास वृत्तान्तं तं सर्व्वञ्चात्मनो हि सः ।
ते श्रुत्वा ब्राह्मणाः सर्व्वे एकीभूता वसुन्धरे ।
इदमूचुस्ततो विप्राः शुद्धोऽसीति द्विजम्प्रति ॥ ४८ ।
चक्रतीर्थप्रभावेण पापान्मुक्तः सनातनः ।
अस्माकं वचनाच्चैव पुनः सिद्धोऽसि वै द्विज ॥ ४९ ।
ब्राह्मणानां वचः श्रुत्वा स द्विजो हृष्टमानसः ।

स्नानार्थन्तु ततः स्नानाच्चक्रतीर्थं समागतः ॥ ५० ।
गते तस्मिंस्तस्य भार्य्या भिक्षामादाय चागता ।
सा तु हृष्टेन मनसा भर्त्तारं वाक्यमब्रवीत् ।
भोजनं कुरु मे दत्तं हत्या लप्स्यामि ते गता ॥ ५१ ।
प्रियावचनमाकर्ण्य भर्त्ता वचनमब्रवीत् ।
पुनराभाषितं भद्रे* यदिदम्भाषितं त्वया ॥ ५२ ।
भर्त्तुर्वचनमाकर्ण्य पत्नी वचनमब्रवीत् ।
न त्वं सम्भाषितः पूर्व्वं ब्रह्महत्यासमन्वितः ।
चक्रतीर्थप्रभावेण मुक्तोऽसि द्विजसत्तम ॥ ५३ ।
उत्तिष्ठ कान्त गच्छाव कल्पग्रामं सुशोभितम् ।
तया सार्द्धं जगामाथ कल्पग्रामं द्विजोत्तमः ॥ ५४ ।
भद्रेश्वरनिमित्तं हि द्रव्यञ्च कथितं शुभम् ।
नित्यञ्च भुञ्जते यत्र पात्रं द्रव्यसमर्पितम् ।
दृष्ट्वा भद्रेश्वरे देवं चक्रतीर्थे फलं लभेत्† ॥ ५५ ।
कल्पग्रामाच्छतगुणं चक्रतीर्थं वसुन्धरे ।
अहोरात्रोपवासेन मुच्यते ब्रह्महत्यया ॥ ५६ ।
कल्पग्रामेण किं तस्य वाराणस्याञ्च वा शुभे ।
मथुरान्तु समासाद्य यः कश्चिन्म्रियते भुवि ।
अपि कीटः पतङ्गो वा जायते स चतुर्भुजः ॥ ५७ ।

इति वराहपुराणे चक्रतीर्थप्रभावो नाम
द्विषष्ट्यधिकशततमोऽध्यायः ।

---

* पुनराभाष्यतां भद्रे इति सति तु सम्यगर्थसङ्गतिर्भवति । † भवेदिति (क), (ख) ।

त्रयःषष्ट्यधिकशततमोऽध्यायः ।

वराह उवाच ।

पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
वैकुण्ठतीर्थमासाद्य यद्वृत्तं हि पुरातनम् ॥ १ ।
मिथिलायां* पुरी रम्या जनकेन च पालिता ।
मिथिलावासिनो लोकास्तीर्थयात्रां समागताः ॥ २ ।
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्चापि वसुन्धरे ।
स्नात्वा सौकरवे तीर्थे आयाता मथुरां पुरीम् ॥ ३ ।
तेषाञ्च भक्तिरुत्पन्ना मथुराम्प्रति सुन्दरि ।
वैकुण्ठतीर्थमासाद्य सर्व्वे ते मनुजाः स्थिताः ॥ ४ ।
तेषान्तु ब्राह्मणः कश्चिद्ब्रह्महत्यासु चिह्नितः ।
रुधिरस्य हि धारा च स्रवन्ती तस्य हस्ततः ॥ ५ ।
प्रत्यक्षा दृश्यते सर्व्वैर्ब्रह्महत्यास्वरूपिणी ।
सर्व्वतीर्थप्लुतस्यापि ब्राह्मणस्य हि सा तदा ॥ ६ ।
न गता पूर्व्वमेवासीद्वैकुण्ठे स्नानमाचरत् ।
न सा वै दृश्यते धारा ततस्ते विस्मयङ्गताः ॥ ७ ।
किमेतत्किमिति प्राहुर्धारां प्रति वसुन्धरे ।
देवीब्राह्मणरूपेण लोकान्सर्व्वान्हि पृच्छति ॥ ८ ।
केन कारणदोषेण धारा त्यक्त्वा गता द्विजम् ।
तत्सर्व्वं कथयामासुर्ब्राह्मणस्य विचेष्टितम् ॥ ९ ।

* मिथिला या पुरीति (ग) ।

वैकुण्ठे तु* निमग्नोऽयं ब्रह्महत्या गता ततः ।
विस्मयो नात्र कर्त्तव्यस्तीर्थस्येदं महत्फलम् ॥ १० ।
इत्युक्तस्तैर्देवदेवस्तत्रैवान्तरधीयत ।
एषः प्रभावस्तीर्थस्य वैकुण्ठस्य वसुन्धरे ॥ ११ ।
वैकुण्ठतीर्थे यः स्नाति मुच्यते सर्व्वपातकैः ।
सर्व्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ १२ ।

सूत उवाच† ।

पुनरन्यत्प्रवक्ष्यामि असिकुण्डेऽतिपुण्यदे ।
नाम्ना गन्धर्व्वकुण्डन्तु तीर्थानां तीर्थमुत्तमम् ॥ १३ ।
तत्र स्नातो नरो देवि गन्धर्व्वैः सह मोदते ।
तत्र यो मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १४ ।
विंशतिर्योजनानान्तु माथुरं मम मण्डलम् ।
इदं पद्मं महाभागे सर्व्वेषां मुक्तिदायि च ॥ १५ ।
कर्णिकायां स्थितो देवि केशवः केशनाशनः ।
कर्णिकायां मृता ये तु तेऽमरा मुक्तिभागिनः ॥ १६ ।
तत्र मध्ये मृता ये तु तेषां मुक्तिर्वसुन्धरे ॥ १७ ।
पश्चिमेन हरिन्देवं गोवर्द्धननिवासिनम् ।
दृष्ट्वा तं देवदेवेशं किं मनः परितप्यते‡ ॥ १८ ।

---

* वैकुण्ठेऽतीति (ग) । † सूत उवाचेति सार्व्वत्रिकः पाठः परमेष न सङ्गच्छते पूर्व्वतोऽविच्छिन्ने वराहवाक्प्रसङ्गे स्थिते सूतवचनस्याप्रसङ्गतत्वात्, वक्ष्यमाणानां मम लोकं स गच्छतीत्यादि वचनानामसम्बद्धत्वाच्च । अतोऽत्र वराह उवाच इति सम्यक् सम्भाव्यते ।
‡ परितप्यतीति चेत्साधु ।

उत्तरेण तु गोविन्दं दृष्ट्वा देवं परं शुभम् ।
नासौ पतति संसारे यावदाभूतसंप्लवम् ॥ १९ ।
विश्रान्तिसंज्ञके देवं पूर्व्वपक्षे व्यवस्थितम् ।
यं दृष्ट्वा तु नरो याति मुक्तिं नास्यत्र संशयः ॥ २० ।
दक्षिणेन तु मां विद्धि प्रतिमां दिव्यरूपिणीम् ।
महाकायां सुरूपाञ्च केशवाकारसन्निभाम् ।
तां दृष्ट्वा मनुजो देवि ब्रह्मणा सह मोदते ॥ २१ ।
कृते युगे तु राजासीन्मान्धाता नाम नामतः ।
तेनाहन्तोषितो देवि भक्तियुक्तेन चेतसा ॥ २२ ।
तस्य तुष्टेन हि मया प्रतिमेयं समर्पिता ।
तेनेयं पूजिता नित्यमात्ममुक्तिमभीप्सता ॥ २३ ।
यदा तु मथुराम्प्राप्य लवणोऽयं निपातितः ।
तदैव प्रतिमा दिव्या मथुरायां व्यवस्थिता ॥ २४ ।
पुण्येयं प्रतिमा दिव्या तेजसा दिव्यरूपिणी ।
कपिलो नाम विप्रर्षिर्मम भक्तिपरायणः ॥ २५ ।
मनसा निर्म्मिता तेन वाराही प्रतिमा शुभा ।
कपिलो ध्यायते* नित्यमर्च्चति स्म दिने दिने ॥ २६ ।
इन्द्रेणाराधितो देवि कपिलो मुनिसत्तमः ।
तस्य प्रीतो ददौ देवं वराहं दिव्यरूपिणम् ॥ २७ ।
देवे लब्धे तु वाराहे शक्रो हर्षसमन्वितः ।
ध्यायते† स्म सदा देवं पूजाङ्कृत्वा हि भक्तितः ।

---

* ध्यायतीति साधु । † ध्यायते स्मेति (क), (ख) ।

इन्द्रेण तु तदा प्राप्तं दिव्यं ज्ञानमनुत्तमम् ॥ २८ ।
ततः कालेन महता रावणो नाम राक्षसः ।
इन्द्रलोकङ्गतः सोऽथ स्वर्गं जेतुं महाबलः ॥ २९ ।
शक्रेण सह सङ्गम्य ततो युद्धं प्रवर्त्तितम् ।
रावणेन जिता देवाः शक्रश्चैव महाबलः* ।
बद्धा चेन्द्रं महाबाहुं शक्रस्य भवनङ्गतः ॥ ३० ।
प्रविश्य रावणस्तत्र गृहे रत्नविभूषिते ।
दृष्ट्वा कपिलवाराहं शिरसा धरणीं गतः ।
तेन सम्मोहितो देवि रावणो नाम राक्षसः ॥ ३१ ।
त्रातुमर्हसि मे देव धरणीधर माधव ।
दामोदर हृषीकेश हिरण्याक्षविदारण ॥ ३२ ।
वेदगर्भ नमस्तेऽस्तु वासुदेव नमोऽस्तु ते ।
कूर्मरूप नमस्तेऽस्तु नारायण नमोऽस्तु ते ॥ ३३ ।
मत्स्यरूपधरं देवं मधुकैटभनाशिनम् ।
निरीक्षितुं न शक्नोमि स्रष्टुञ्चैव गुणव्रत† ॥ ३४ ।
देवदेव नमस्तुभ्यं भक्तानामभयप्रद ।
मम त्वं भक्तिनम्रस्य प्रसादं कुरु सर्व्वदा ॥ ३५ ।
इति स्तुतो रावणेन देवदेवो जगत्पतिः ।
सौम्यरूपोऽभवद्देवो लोकनाथो जनार्द्दनः ॥ ३६ ।

---

* शक्रश्चैव महायलमिति बहुषु पाठः, तत्र तथाविधपराभवेण शक्रस्यापि क्लीवत्वं जातमिति च सूच्यते । † न सुव्रत इति (ग) ।

सन्निधानमनुप्राप्य पुष्पकारोहणोत्सुकः ।
तदुद्धर्त्तुं न शक्नोति रावणो विस्मयङ्गतः ॥ ३७ ।
शङ्करेण पुरा सार्द्धं कैलासस्तु मयोद्धृतः ।
देव त्वं स्वल्पकायोऽसि नाहमुद्धरणक्षमः ॥ ३८ ।
प्रसीद देवदेवेश सुरनाथ नमोऽस्तु ते ।
अहं त्वां नेतुमिच्छामि पुरीं लङ्कामनुत्तमाम् ॥ ३९ ।

वराह उवाच ।

अवैष्णवोऽसि रक्षस्त्वं कुतोभक्तिस्तवेदृशी ।
कपिलस्य वचः श्रुत्वा रावणोवाक्यमब्रवीत् ।
त्वद्दर्शनात्समुत्पन्ना भक्तिरव्यभिचारिणी ।
महात्मन्त्वां नयिष्यामि* देवदेव नमोऽस्तु ते ॥ ४०।४१ ।
भक्तिमुद्वहतस्तस्य लघुवेषोऽभवत्तदा ।
पुष्पके तु समारोप्य देवं त्रैलोक्यविश्रुतम् ।
आनयामास लङ्कायां स्थापयित्वा स्वके गृहे ।
तदा स्थितोऽहं लङ्कायां रावणेन प्रपूजितः ॥ ४२।४३ ।
अयोध्याधिपतीरामो हन्तुं राक्षसपुङ्गवम् ।
गतोऽसौ विक्रमेणैव हत्वा राक्षसपुङ्गवम् ।
विभीषणश्च लङ्काया आधिपत्येऽभिषेचितः ।
विभीषणेन रामस्य सर्व्वस्वञ्च निवेदितम् ॥ ४४।४५ ।

राम उवाच ।

अनेन नास्ति मे कार्य्यं तव रक्षो विभीषण ।

---

* नेष्यामीति साधु ।

देवो मे दीयतां रक्षः शक्रलोकाद्य आगतः।
अहन्यहनि पूजामि* देवं वाराहरूपिणम्॥ ४६।
अयोध्यायाञ्च नेष्यामि त्वया दत्तं हि राक्षस।
ततः समर्पयामास कपिलं दिव्यरूपिणन्॥
पुष्पके तु समारोप्य नीतवान्नगरीं प्रति।
अयोध्यायां स्थापयित्वा पूजयामास तं तदा॥ ४७।४८।
गतं वर्षसहस्रन्तु दशोत्तरमतःपरम्।
लवणस्य वधार्थं हि शत्रुघ्नं प्रेषयत्तदा† ।
कृतप्रणामः शत्रुघ्नो राघवाय महात्मने।
चतुरङ्गबलोपेतो जगाम मथुराम्प्रति॥ ४९।
गत्वा तु राक्षसश्रेष्ठं लवणं रौद्ररूपिणम्‡।
घातयित्वा तु शत्रुघ्नः प्रविश्य मथुरां पुरीम्।
ब्राह्मणान्स्थापयित्वा तु मया तुल्यान्महौजसः।
षड्विंशतिसहस्राणि वेदवेदाङ्गपारगान्॥ ५०।५१।
अनृचो माथुरो यत्र चतुर्वेदस्तथापरः।
एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिताः॥ ५२।
लवणस्य यथा वृत्तं कथितं ते वसुन्धरे।
लवणस्य वधं श्रुत्वा राघवो वाक्यमब्रवीत्।
वरं वरय शत्रुघ्न यत्ते मनसि रोचते॥ ५३।
राघवस्य वचः श्रुत्वा शत्रुघ्नो वाक्यमब्रवीत्।

---

† पूजयामीति साधु। † अप्रेषयदिति साधु। ‡ रुद्ररूपिणमिति (क), (ख)।

यदि तुष्टोऽसि मे देव वराहो यदि वाप्यहम् ।
दीयतां मम देवोऽयं यदि मे वरदो भवान् ॥ ५४ ।
शत्रुघ्नस्य वचः श्रुत्वा राघवोवाक्यमब्रवीत् ।
नय शत्रुघ्न देवं त्वं दिव्यं वाराहरूपिणम् ॥ ५५ ।
धन्याऽसौ मण्डली लोके धन्या सा मथुरा पुरी ।
धन्यास्ते माथुरा लोकाः कपिलं पश्यते* सदा ॥ ५६ ।
दृष्टः स्पृष्टः सदा ध्यातः स्नापितश्च दिने दिने ।
अनुलिप्तश्च शत्रुघ्न सर्व्वपापं व्यपोहति ॥ ५७ ।
पूजितः स्नापितो देवो दृष्टो यैस्तु दिने दिने ।
सर्व्वं हरति वै पापं मोक्षञ्चैव प्रयच्छति ॥ ५८ ।
इत्युक्ता राघवस्तस्मै देवमादाद्दसुन्धरे ।
देवमादाय शत्रुघ्नो जगाम मथुरां पुरीम् ॥ ५९ ।
ब्राह्मणं स्थापयित्वा तु आगच्छन्मम सन्निधौ ।
तत्र मध्ये तु संस्थाप्य पूजयामास राघवः ।
अनेन क्रमयोगेण मथुरायां स्थितः प्रभुः ॥ ६० ।
गयायां पिण्डदानेन यत्फलं ज्येष्ठपुष्करे ।
तत्फलं समवाप्नोति श्वेतं दृष्ट्वा सदा नरः ॥ ६१ ।
विश्रान्तिसंज्ञके तद्वद्गोविन्दे च तथा हरौ ।
केशवे दीर्घविष्णौ च तदेव फलमश्नुते ॥ ६२ ।
उदये मामकं तेजः सदा विश्रान्तिसंज्ञके ।

* पश्यन्तीति साधु ।

मध्याह्ने मामकं तेजो दीर्घविष्णौ व्यवस्थितम्।
केशवे मामकं तेजो दिनभागे चतुर्थके॥ ६३।
एषा विद्या पुरा देवि नित्यकालं सुगोपिता।
भक्ता त्वं मम शिष्या च कथिता ते वसुन्धरे॥ ६४।

इति वराहपुराणे कपिलवराहमाहात्म्यं नाम

त्रयःषष्ट्यधिकशततमोऽध्यायः।

चतुःषष्ट्यधिकशततमोऽध्यायः।

वराह उवाच।

अस्ति गोवर्द्धनं नाम क्षेत्रम्परमदुर्लभम्।
मथुरापश्चिमे भागे अदूराद्योजनद्वयम्॥ १।
क्षेत्रं तत्र महाभागे द्रुमगुल्मलतायुतम्।
चत्वारि तत्र तीर्थानि पुण्यानि च शुभानि च॥ २।
ऐन्द्रं पूर्व्वेण पार्श्वेन यमतीर्थन्तु दक्षिणे।
पश्चिमे वारुणं तीर्थं कौवेरञ्चोत्तरेण तु।
तेषां मध्ये स्थितो भद्रे क्रीड़यिष्ये यदृच्छया॥ ३।
तत्र वै शक्रतीर्थे तु स्नानं कुर्य्याद्दृढ़व्रतः।
मोदते शक्रलोके तु सर्व्वद्वन्द्वविवर्ज्जितः॥ ४।
दक्षिणे यमतीर्थे तु स्नानं कुर्य्याद्यथाविधि।

यमस्य भवनङ्गत्वा मोदते कृतनिश्चयः ॥ ५ ।
तत्राथ मुञ्चते प्राणान् लोभमोहविवर्ज्जितः ।
यमलोकं परित्यज्य मम लोकं स गच्छति ॥ ६ ।
तत्रैव वारुणं तीर्थमासाद्य स्नानमाचरेत् ।
वारुणं भवनङ्गत्वा मुच्यते सर्व्वकिल्विषात् ॥ ७ ।
तत्राथ मुञ्चते प्राणान्कामक्रोधविवर्ज्जितः ।
वारुणं लोकमुत्सृज्य मम लोकं स गच्छति* ॥ ८ ।
तत्र मध्ये च यः स्नाति क्रीडते स मया सह ।
अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ९ ।
अन्नकूटं† ततः प्राप्य तस्य कुर्य्यात्प्रदक्षिणम् ।
न तस्य पुनरावृत्तिर्देवि सत्यं ब्रवीमि ते ॥ १० ।
स्नात्वा मानसगङ्गायां दृष्ट्वा गोवर्द्धने हरिम् ।
अन्नकूटं परिक्रम्य किं पुनः परिशोचति ॥ ११ ।
सोमवारे त्वमायां वै‡ प्राप्य गोवर्द्धनङ्गिरिम् ।
दत्त्वा पिण्डं पितृभ्यश्च राजसूयफलं भवेत् ॥ १२ ।
गयायां पिण्डदानेन यत्फलम्प्राप्यते नरः ।
तत्फलं प्राप्यते तत्र नात्र कार्य्या विचारणा ॥ १३ ।
गोवर्द्धनम्परिक्रम्य दृष्ट्वा देवं परं हरिम् ।
राजसूयाश्वमेधानां फलम्प्राप्नोत्यसंशयम् ॥ १४ ।

---

* मम लोकञ्च गच्छतीति (ग)। † अन्न कूटमिति (ग), एवं परत्रापि। ‡ वसामिति (क), (ख)।

पृथिव्युवाच ।

परिक्रमोऽन्नकूटस्य विधिना क्रियते कथम् ।
प्रभावगुणमाहात्म्यं तद्भवान्वक्तुमर्हसि ॥ १५ ।

वराह उवाच ।

मासि भाद्रपदे या तु शुक्ला चैकादशी शुभा ।
गोवर्द्धने सोपवासः कुर्य्यात्तत्र प्रदक्षिणाम् ॥ १६ ।
स्नात्वा मानसगङ्गायां प्रभाते उदिते रवौ ।
गोवर्द्धनं प्रसाद्यैवं हरिश्चाऽचलमूर्द्धनि ।
पुण्डरीकं ततो गच्छेत्कुण्डे स्नात्वा विधानतः ॥ १७ ।
देवान् पितॄन् समभ्यर्च्य पुण्डरीकमथार्च्य* च ।
सर्व्वपापविनिर्मुक्तः प्रयाति भवनं हरेः ॥ १८ ।
कुण्डञ्चाप्सरसं नाम प्रसन्नसलिलाशयम् ।
तत्र स्नानं तर्पणञ्च कृत्वा फलमवाप्नुयात् ।
राजसूयाश्वमेधानां धूतपाप्मा न संशयः ॥ १९ ।
तीर्थं सङ्कर्षणं नाम्ना बलभद्रेण रचितम् ।
गोहत्या पूर्व्वसंलग्ना उत्तीर्णा तत्र दूरतः ।
स्नानाद्गच्छति सा क्षिप्रं नाऽत्र कार्य्या विचारणा ॥ २० ।
अन्नकूटस्य सान्निध्ये तीर्थं शक्रविनिर्म्मितम् ।
तत्र कृष्णेन पूजार्थमिन्द्रस्य विहतो मखः ॥ २१ ।
महानिन्द्रस्य† चोत्थानं भक्ष्यभोज्यसमन्वितम् ।

---

* अथार्च्यविलेति साधु । † महेन्द्रस्य अथवा महदिति उत्थानविशेषणं, ततः महदिन्द्रस्येति साधु ।

कृत्वा तुष्टिकरान्साचा*दिन्द्रेण सह सङ्गथा।
इन्द्रस्य वर्षतोऽत्यन्तं तासां पीड़ाकरञ्जलम्।
तासाञ्चवां रचणाय धृतो गिरिवरस्तदा ॥ २२।२३ ।
सोऽन्नकूट इति ख्यातः सर्व्वतः शक्रपूजितः ।
देवा देव्यस्तथा गावो ऋषिभिश्च समन्विताः ।
पूजितास्तर्पिताः श्रेष्ठाः श्रमतो विष्णुना पुरा ।
तस्मिन् स्थाने तर्पणेन शतक्रतुफलं लभेत् ॥ २४।२५ ।
ततः कदम्बखण्डाख्यं कुण्डन्तु विमलोदकम् ।
स्नात्वा पितॄन् समभ्यर्च्य ब्रह्मलोकमवाप्नुयात् ॥ २६ ।
ततो गच्छेद्देवगिरिं शतबाहुसमुच्छ्रितम् ।
यत्र स्नानाद्दर्शनाच्च वाजपेयफलं लभेत् ॥ २७ ।
महादेवं ततो दृष्ट्वा गत्वा ध्यात्वा फलं लभेत् ।
कुण्डे स्नात्वा पितॄंस्तर्प्य† कृतकृत्यो दिवं व्रजेत् ॥ २८ ।
गङ्गायाश्चोत्तरं यावद्देवदेवस्य चक्रिणः ।
अरिष्टेन समं यत्र महद्युद्धं प्रवर्त्तितम् ॥ २९ ।
घातयित्वा ततश्चेममरिष्टं वृषरूपिणम् ।
कोपेन पार्ष्णिघातेन मह्यां तीर्थं प्रवर्त्तितम् ॥ ३० ।
वृषभस्य वधाज्ज्ञेयं तीर्थं सुमहदद्भुतम् ।
स्नातस्तत्र तदा कृष्णो वृषं हत्वा महासुरम् ॥ ३१ ।
वृषहत्यासमायुक्तः कृष्णश्चिन्तान्वितोऽभवत् ।

---

* तुष्टिकरात्साचादिति (ग) । † तर्पयित्वेति साधु ।

वृषो हतो मया चायमरिष्टः पापपूरुषः ॥ ३२ ।
तत्र राधा समाश्लिष्य कृष्णमक्लिष्टकारणम् ।
स्वनाम्ना विदितं कुण्डं कृतं तीर्थमदूरतः ॥ ३३ ।
राधाकुण्डमिति ख्यातं सर्व्वपापहरं शुभम् ।
अरिष्टराधाकुण्डाभ्यां स्नानात्फलमवाप्नुयात् ।
राजसूयाश्वमेधानां नात्र कार्य्या विचारणा ।
गोहत्याब्रह्महत्यायाः* पापं क्षिप्रं विनश्यति ॥ ३४।३५ ।
तीर्थं हि मोक्षराजाख्यं नृणां मुक्तिप्रदायकम् ।
यस्य दर्शनमात्रेण सर्व्वपापैः प्रमुच्यते ॥ ३५ ।
इन्द्रध्वजोच्छ्रयं यत्र पूर्व्वस्यां दिशि वै कृतम्† ।
इन्द्रध्वजमिति ख्यातं तीर्थञ्चैवातिमुक्तिदम्‡ ।
तत्र स्नाता दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥ ३६ ।
ततो हरौ निवेद्याशु यात्राफलमनुत्तमम् ।
चक्रतीर्थे नरः स्नात्वा पञ्चतीर्थाख्यकुण्डके ।
समाप्य तीर्थयात्राञ्च रात्रौ जागरणं तथा ।
गोवर्द्धने च कर्त्तव्यं महापातकनाशनम् ॥ ॥ ३७।३८ ।
एकादश्यां तदा रात्रौ कृत्वा जागरणं शुभम् ।
द्वादश्यामुषसि स्नात्वा पिण्डं निर्वाप्य शक्तितः ।
पितॄणां मुक्तिदं तेषां य एवं कुरुते नरः ।

---

* गोहत्याब्रह्महत्ययोरिति साधु। एवं कृते तु छन्दोदोषः। † इन्द्रध्वजोच्छ्रयः कृत इति साधु। इन्द्रवज्रोच्चयमिति (क), (ख)। ‡ अथ मुक्तिदमिति (क), (ख)।

सर्व्वपापविनिर्मुक्तः परं ब्रह्माधिगच्छति ॥ ३९।४० ।
एतत्ते कथितं भद्रे अन्नकूटपरिक्रमम् ।
यथानुक्रमयोगेन तथाषाढ़ेऽपि चोच्यते ॥ ४१ ।
य एतच्छृणुयाद्भक्त्या तीर्थानुक्रमणं हरेः ।
गोवर्द्धनस्य माहात्म्यं गङ्गास्नानफलं भवेत् ॥ ४२ ।

इति वराहपुराणे गोवर्द्धनमाहात्म्ये अन्नकूटपरिक्रमप्रभावो नाम
चतुःषष्ठ्यधिकशततमोऽध्यायः ।

पञ्चषष्ठ्यधिकशततमोऽध्यायः ।

वराह उवाच ।

अतः परं प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
यथा वृत्तं प्रतिष्ठाने दक्षिणापथमण्डले ॥ १ ।
सुशीलो नाम वैश्यस्तु तस्मिन्वसति पत्तने ।
धनधान्यसमृद्धस्तु वहुपुत्रः कुटुम्बवान् ॥ २ ।
कुटुम्बभरणासक्तो नित्यकालं हि तिष्ठति ।
स्नानं दानं जपं होमं देवार्च्चां न करोति सः ॥ ३ ।
क्रयविक्रयसक्तस्य कालो दीर्घो गतस्तदा ।
कदाचिदपि पापोऽसौ न साधु गमनं गतः ॥ ४ ।
न तेन धर्म्मश्रवणं कदाचिदपि संश्रुतम् ।

देवानां ब्राह्मणानाञ्च भक्तिस्तस्य न विद्यते ॥ ५ ।
आत्मोदरनिमित्तं हि पापञ्च कुरुते सदा ।
गच्छन्तं बहुकालञ्च न तं बुध्यति पापकृत् ॥ ६ ।
न तस्य जायते बुद्धिर्दानं दातुं कदाचन ।
तस्यैवं वसतस्तत्र प्रतिष्ठाने पुरोत्तमे ॥ ७ ।
धनयुक्तोऽपि पापोऽसौ न ददाति कदाचन ।
नैवान्यमतिदातारं शक्नोति च निरीक्षितुम् ॥ ८ ।
स तु कालेन महता कुटुम्बासक्तमानसः ।
कदाचिद्दैवयोगेन साध्वीं भार्य्यां प्रियान् सुतान् ।
त्यक्त्वा जगाम निधनं प्रेतत्वं समुपागतः ॥ ९ ।
निरुदकेषु देशेषु विच्छायेषु वनेषु च ।
परिभ्रमन् क्षुधाविष्टो मरुदेशं गतोऽपि सः ॥ १० ।
तत्रैव च कृतावासो बहुकालं स वै वणिक् ।
कदाचिद्दैवयोगेन तत्र सार्थ उपागतः ॥ ११ ।
तस्य मध्ये तु वणिजो मथुरायां विःनिसृताः ।
गते सार्थे तु स वणिक्तं वृक्षं समुपाश्रितः ॥ १२ ।
तत्रैव वसति प्रेतो रौद्ररूपो भयानकः ।
दीर्घदंष्ट्रः सुविकटो ह्रस्वबाहुर्विभीषणः ।
महाहनुर्विशालाक्षो विड़ालसदृशाननः ॥ १३ ।
अथ कालेन बहुना दैवयोगेन भामिनि ।
तत्राजगाम कश्चित्तु क्रयविक्रयकारकः ॥ १४ ।
तं दृष्ट्वा दूरतः प्रेतः अतिहर्षेण संयुतः ।

तत्राजगाम नृत्यन्स इदं वचनमब्रवीत् ।
भक्ष्यभूतो ममाद्य त्वं क्व भवन् यातुमिच्छति ॥ १५ ।
प्रेतस्य वचनं श्रुत्वा सोऽतिभीतो द्रुतङ्गतः ।
गच्छन्तं तं गृहीत्वा सः प्रेतो वचनमब्रवीत्* ॥ १६ ।
मम त्वं विहितो भक्ष्यः स्वयम्प्राप्तोऽसि मानव ।
मांसन्ते भक्षयिष्यामि पिबामि तव शोणितम् ॥ १७ ।
इत्याकर्ण्य वचस्तस्य स वणिग्वाक्यमब्रवीत् ।
कुटुम्बभरणार्थाय सम्प्राप्तो दुर्गमाटवीम् ॥ १८ ।
वृद्धः पिता मम गृहे माता पत्नी पतिव्रता ।
मयि सम्भक्षिते रक्षः कुटुम्बं हि मरिष्यति ॥ १९ ।
ततो वचनमाकर्ण्य प्रेतो वचनमब्रवीत् ।
कस्मात्स्थानात्समायातः सत्यं ब्रूहि महामते ॥ २० ।

विभुरुवाच ।

गोवर्द्धनो गिरिवरो यमुना च महानदी ।
तयोर्मध्ये पुरी रम्या मथुरा लोकविश्रुता ।
तस्यां वसाम्यहं प्रेत पितृपैतामहे गृहे ॥ २१ ।
तत्र मे वसतो नित्यं यद्द्रव्यं पूर्व्वसञ्चितम् ।
तत्सर्व्वं तस्करैर्नीतं क्षीणवित्तोऽभवं तदा ॥ २२ ।
स्वल्पं वित्तं गृहीत्वाऽहं समायातो† मरुस्थलम् ।

* पञ्चदशश्लोकस्य परार्द्धं षोड़शश्लोकस्य (ग) पुस्तके न स्तः ।　　† सम्प्राप्त इति (क), (ख), तत्र छन्दोभङ्गः ।

तव दृष्टिपथं यातो यत्कार्य्यं तत्कुरुष्व मे* ॥ २३ ।

प्रेत उवाच ।

न त्वां खादितुमिच्छामि कृपा मे जायते त्वयि ।
समयेन हि मोच्यामि कुरुष्व वचनं मम ॥ ॥ २४ ।
निवृत्य गच्छ मथुरां मम कार्य्यार्थसाधकः ।
तत्र गत्वा त्वया कार्य्यं यत्कर्त्तव्यं वदामि तत् ॥ २५ ।
स्नानङ्कृत्वा तु विधिवत्कूपे चातुःसमुद्रिके ।
पिण्डदानं कुरुष्व त्वं मम नाम्ना प्रयत्नतः ।
स्नानस्य च फलं देहि ततो गच्छ यथासुखम् ॥ २६ ।
प्रेतवाक्यं ततः श्रुत्वा विभुर्वचनमब्रवीत् ।
नाहं यास्यामि मथुरां द्रव्याभावे कथञ्चन ।
भक्षयस्व शरीरं मे ततस्तृप्तिमवाप्स्यसि ॥ २७ ।

प्रेत उवाच ।

गृहे बहुधनं तेऽस्ति त्वं गच्छ मम सत्कुरु† ।
अस्ति धनमपर्य्याप्तं गच्छ त्वं मा विलम्बय ॥ ॥ २८ ।

विभुरुवाच ।

गृहे मम धनं नास्ति यत्त्वया समुदीरितम् ।
गृहशेषं मम धनं न चान्यत्तत्र विद्यते ।
पितृपैतामही कीर्त्तिरविक्रेया हि सा मया ॥ २९ ।

---

* कुरुष्व मे इति (ग) ।　　† तत्त्वं गच्छ मम सत्कुरु इति (ग, पाठेऽस्मिन्नेकाक्षराधिक्यात् छन्दोदोषः ।

प्रेतः प्रहस्य सानन्दमिदं वचनमब्रवीत् ।
अस्ति चैव धनम्प्रोक्तं यन्मया त्वद्गृहे विभो ।
सुवर्णभारो गर्त्तस्थो गृहे तिष्ठति सञ्चितः ॥ ३० ।
निवर्त्त* गच्छ सन्तुष्टः सुहृदां प्रीतिवर्द्धनः ।
एवं द्रक्ष्यामि† ते मार्गं मधुरा येन गम्यते ॥ ३१ ।

सूत उवाच‡ ।

वणिग्हृष्टमना भूत्वा पुनर्वचनमब्रवीत् ।
इमामवस्थां सम्प्राप्य कथं ज्ञानसमुद्भवः ।
ततः स कथयामास यद्वृत्तं हि पुरातनम् ॥ ३२ ।
प्रतिष्ठाने पुरवरे विष्णोरायतनं महत् ।
प्रभातसमये तत्र विष्णोरायतने शुभे ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रास्तत्र समागताः ॥ ३३ ।
वाचकः पठते तत्र कथां पौराणिकीं शुभाम् ।
मम मित्रञ्च तत्रैव नित्यकालञ्च गच्छति ॥ ३४ ।
तस्मिन् काले तु मित्रेण नीतोऽहं विष्णुमन्दिरम् ।
अत्यादरेण महता सन्तोष्य च पुनः पुनः ।
मित्रेण सह तत्रैव तस्य पार्श्वे व्यवस्थितः ॥ ३५ ।
श्रुतो मया ततः कूपः पुण्योऽयं पापनाशनः ।
समुद्राः किल तिष्ठन्ति चत्वारोऽत्र समागताः ॥ ३६ ।

---

* निवर्त्तस्व निवर्त्तयेति वा साधु । † दर्शयिष्यामि ते मार्गमिति चेत् साधु भवेत्
‡ अत्रापि वराह उवाच इति पाठः सम्यक् तस्यैव वाक्प्रसङ्गात् ।

तस्य कूपस्य माहात्म्यं श्रुतं तत्र महत्फलम्।
याचकाय ततो दानं दत्तं सर्व्वैर्महाजनैः॥ ३७।
मित्रेण प्रेरितो दाने मया मौनं समाश्रितम्।
मित्रेण च पुनः प्रोक्तं यथाशक्त्या* प्रदीयताम्।
तदा मित्रप्रसङ्गेन दत्तो वै स्वर्णमाषकः॥ ३८।
ततः कालेन महता गतो वैवस्वतक्षयम्।
वैवस्वतनियोगेन ततोऽहं पूर्व्वकर्म्मभिः।
प्रेतत्वं समनुप्राप्तो दुस्तरं दुर्गमं महत्॥ ३९।
न दत्तं न हुतञ्चापि तीर्थं नैवावगाहितम्।
न तर्पितास्तु पितरः प्राप्तोऽहं प्रेततां ततः॥ ४०।
इत्येतत्कथितं सर्व्वं यन्मान्त्वं परिपृच्छसि।
गच्छ त्वं सम्मुखस्तत्र यत्र सा मथुरा पुरी॥ ४१।
प्रेतस्य वचनं श्रुत्वा विभुर्वचनमब्रवीत्।
कथं धारयसे प्राणान्वृक्षमूलं समाश्रितः॥ ४२।

प्रेत उवाच।

कथितं हि मया पूर्व्वं यद्वृत्तं हि पुरातनम्।
याचकाय तु यद्दत्तं सुवर्णस्य च माषकम्।
तद्दानस्य प्रभावेण नित्यं तृप्तोऽस्मि वै विभो॥ ४३।
अकामेन मया दत्तन्तस्येदङ्कर्म्मणः फलम्।
प्रेतभावङ्गतस्यापि न मे ज्ञानस्य विभ्रमः॥ ४४।

---

* यथाशक्तोति साधु।

ततश्च स वणिक्श्रेष्ठ आगत्य मथुरां पुरीम्।
कृतं तेन च तत्सर्व्वं यथा प्रेतेन भाषितम्।
तेन कृत्येन प्रेतोऽसौ मुक्तिं प्राप्य दिवङ्गतः॥ ४५॥
एतत्ते कथितं भूमि माहात्म्यं मथुराभवम्।
चतुःसामुद्रिके कूपे पिण्डदाने पराङ्गतिम्॥ ४६॥
तीर्थे चैव गृहे वापि देवस्थानेऽपि चत्वरे।
यत्र तत्र मृता देवि मुक्तिं यान्ति न चान्यथा॥ ४७॥
अन्यत्र हि कृतं पापं तीर्थमासाद्य गच्छति।
तीर्थे तु यत्कृतं पापं वज्रलेपो भविष्यति॥ ४८॥
मथुरायाङ्कृतं पापं तत्रैव च विनश्यति।
एषा पुरी महापुण्या यस्यां पापं न विद्यते॥ ४९॥
कृतघ्नश्च सुरापश्च चौरो भग्नव्रतस्तथा।
मथुरां प्राप्य मनुजो मुच्यते सर्व्वकिल्बिषैः॥ ५०॥
तिष्ठेद्युगसहस्रन्तु पादेनैकेन यः पुमान्।
तस्याधिकं भवेत्पुण्यं मथुराया निवासिनः॥ ५१॥
परदाररता ये च ये नरा अजितेन्द्रियाः।
मथुरावासिनः सर्व्वे ते देवा नरविग्रहाः॥ ५२॥
बलिभिक्षाप्रदातारस्ते मृताः क्रोधवर्ज्जिताः*।
तीर्थस्नानरता ये च देवास्ते नरमूर्त्तयः॥ ५३॥
यदन्येषां सहस्रेण ब्राह्मणानां महात्मनाम्।

---

* क्रोधविवर्ज्जिता इति (क), (ख), तत्रैकाक्षराधिक्याच्छन्दोदोषः।

एकेन पूजितेन स्यान्माथुरेणाखिलं हि तत् ॥ ५४ ।
अनृग्वे माथुरो यत्र चतुर्वेदस्तथापरः ।
वेदैश्चतुर्भिर्न च स्यान्माथुरेण समः क्वचित् ॥ ५५ ।
भवन्ति सर्व्वतीर्थानि पुण्यान्यायतनानि च ।
मङ्गलानि च सर्व्वाणि यत्र तिष्ठन्ति माथुराः ॥ ५६ ।
चतुर्वेदं परित्यज्य माथुरं पूजयेत्सदा ।
सिद्धा भूतगणाः सर्व्वे ये च देवगणा भुवि ।
मथुरावासिनो लोकान् पश्यन्ति च* चतुर्भुजान् ।
मथुरायां ये वसन्ति विष्णुरूपा हि ते नराः ॥ ५७ ।
ज्ञानिनस्ता हि पश्यन्ति† अज्ञाः पश्यन्ति तान् च ॥ ५८ ।

इति वराहपुराणे मथुरामाहात्म्ये कूपप्रभावे ब्राह्मणमाहात्म्यं नाम
पञ्चषष्ठ्यधिकशततमोऽध्यायः ।

षट्पष्ठ्यधिकशततमोऽध्यायः ।

धरण्युवाच ।

श्रुतानि तु महादेव तीर्थानि विविधानि तु* ।
असिकुण्डेति संज्ञेयं तन्मे त्वं कथय प्रभो ॥ १ ।

---

* लोकांस्ते पश्यन्तीति (ग)। † तान्हि पश्यन्तीति सार्व्वत्रिकः पाठः, तान्हीति साधु ।

---

* विविधानीति (क), (ख) ।

वराह उवाच ।

सुमतिर्नाम राजासीद्धार्म्मिको लोकविश्रुतः ।
तीर्थयात्रानिमित्तेन स्वर्गलोकङ्गतः पुरा ॥ २ ॥
गते स्वर्गन्तु नृपतौ पुत्रो राज्यञ्चकार ह ।
विमतिर्नाम नाम्ना च राज्ये पैतामहे स्थितः ॥ ३ ॥
राज्यञ्च कुर्व्वतस्तस्य आगतो नारदस्तदा ।
विष्टरं पाद्यमर्घ्यञ्च तस्मै दत्तं यथोचितम् ॥ ४ ॥
प्रतिगृह्य च तत्सर्व्वं तमुवाच स नारदः ।
पितुर्ह्यनृणतां गत्वा स पुत्रो धर्म्मभाग्भवेत् ॥ ५ ॥
इत्युक्त्वा नारदस्तत्र तत्रैवान्तरधीयत ।
नारदे तु गते राजा पप्रच्छ स्वात्ममन्त्रिणः ॥ ६ ॥
तदा किमुक्तमृषिणा नारदेन पितुः कृते ।
आनृण्यमिति यद्वाक्यं मया बुद्धं न किञ्चन ॥ ७ ॥
मन्त्रिणश्च ततो ज्ञात्वा पितुर्मरणमेव च ।
तीर्थयात्रानिमित्तञ्च तस्मै राज्ञे न्यवेदयन् ॥ ८ ॥
अतएवोक्तमानृण्यं नारदेन पितुस्तव ।
श्रुत्वा वाक्यं तदा राजा तीर्थयात्राञ्चकार* ह ॥ ९ ॥
विमतेर्बुद्धिरुत्पन्ना गच्छामो मथुरां पुरीम् ।
चतुरोवार्षिकान्मासान्मथुरायां वसामहे† ॥ १० ॥
सर्व्वाणि तत्र तीर्थानि तिष्ठन्ति विविधानि च‡ ।

---

* पितुस्तथेति (क), (ख) । † वसाम इति साधु । ‡ त्रिविधानि चेति (क), (ख) ।

आगते तु नृपे तत्र तीर्थान्यूचुः परस्परम् ॥ ११ ॥
युद्धं विमतिना सार्द्धं स्वयं कर्त्तुं न शक्नुमः ।
कल्पग्रामन्तु गच्छामो वराहो यत्र तिष्ठति ॥ १२ ॥
गतानि तत्र तीर्थानि कल्पग्रामं वसुन्धरे ।
तत्र वाराहरूपेण स्थितोऽहञ्च यदृच्छया ।
यावन्निरीक्षयाम्यग्रं तावत्तिष्ठन्ति सन्निधौ ॥ १३ ॥

तीर्थान्यूचुः ।

जय विष्णो जयाचिन्त्य जय देव जयाच्युत ।
जय विश्वेश कर्त्तेश* जय देव नमोऽस्तु ते ॥ १४ ॥

वराह उवाच ।

तीर्थैः स्तुतोऽहं वसुधे वचनञ्चेदमब्रवम् ।
वरं वृणुत भद्रं वो यद्वो मनसि वर्त्तते ॥ १५ ॥

तीर्थान्यूचुः ।

वराह यदि देवेश अभयं दातुमर्हसि ।
विमतिना सुपापेन कृतस्त्रासः सुदारुणः ।
तन्नियच्छस्व† पापिष्ठं यदि पश्यसि नः सुखम् ॥ १६ ॥

वराह उवाच ।

हिताय सर्व्वतीर्थानां हनिष्यामि महारिपुम् ।
तत्र तीर्थनियोगेन आगतोमथुरां पुरीम् ॥ १७ ॥
तत्रागते तु वसुधे युद्धङ्कृत्वा तु तेन वै ।

---

* कर्त्तेश इति आर्षं, कर्त्रीश वा कर्त्तरीशेति साधु । † नियच्छेति साधु ।

तदासिना तु दिव्येन स राजा बलदर्पितः ।
सूदितो हि मया देवि अस्यग्रं निहितं भुवि ॥ १८ ।
असेरग्रेण उद्धृत्य मृत्तिकां वरवर्णिनि ।
तत्र कुण्डं महद्दिव्यं देवर्षिविधिनिर्म्मितम् ।
असिकुण्डेति संज्ञा च प्राप्ता तेन वसुन्धरे ॥ १९ ।
तत्राश्चर्य्यं प्रवक्ष्यामि मनःकर्णसुखावहम् ।
पश्यन्ति मनुजाः सिद्धाः सर्व्वपापविवर्ज्जिताः ॥ २० ।
द्वादश्याञ्च चतुर्द्दश्यां श्रद्दधाना जितेन्द्रियाः ।
फलानि तस्य पश्यन्ति लभन्ते न सुनिश्चिताः* ॥ २१ ।
तस्मिन् काले ह्यहं देवि मथुरायां समागतः ।
तत्र तिष्ठाम्यहं भद्रे पश्चिमां दिशमाश्रितः ॥ २२ ।
तत्र कृत्वा च हैरण्या मूर्त्तयश्च† चतुर्विधाः ।
तीर्थे वाराहसंज्ञे तु मथुरायां व्यवस्थिताः ।
सुदृढ़ाः सुस्पृश्यः सुश्मूर्यैः पश्यति स मुच्यते ॥ २३ ।
एका वराहसंज्ञा च तथा नारायणस्य च ।
वामनस्य तृतीया वै चतुर्थी राघवस्य च ॥ २४ ।
एताश्चतस्रो‡ यः पश्येत् स्नात्वा कुण्डेऽसिसंज्ञिते ।
चतुःसागरपर्य्यन्ता क्रान्ता तेन धरा ध्रुवम् ।
तीर्थानां माथुराणाञ्च सर्व्वेषां फलमश्नुते ॥ २५ ।

---

* लभन्ते तु सुनिश्चिता इति (क), (ख) । † मूर्त्तीरिति साधु । ‡ एताश्चतस्
साधु ।

तत्र सर्व्वेषु तीर्थेषु असिकुण्डं महत्तरम्* ।
या संख्या कथिता पूर्व्वं तीर्थानां दक्षिणोत्तरे ।
असिकुण्डं समारभ्य तीर्थानुक्रमणिका वरा† ॥ २६ ।
सुप्तोत्थितोऽपि द्वादश्यामसिकुण्डाप्लुतो नरः ।
मूर्त्तीः पश्यति यस्तासु ब्रह्मभूयाय कल्पते ।
नास्तीह पुनरावृत्तिर्भवेत्कालविपर्य्यये ॥ २७ ।

इति वराहपुराणे असिकुण्डप्रभावो नाम
षट्षष्ट्यधिकशततमोऽध्यायः ।

सप्तषष्ट्यधिकशततमोऽध्यायः ।

वराह उवाच ।
शृणु देवि यथा संज्ञा विश्रान्तेः कीर्त्तिता पुरा ।
राक्षसेन पुरा प्रोक्ता ब्राह्मणाय महात्मने ॥ १ ।

पृथिव्युवाच ।
किमर्थं राक्षसेनोक्ता संज्ञा विश्रान्तिसंज्ञिता ।
किमर्थं पृष्टवान्विप्रः सर्व्वं कथय मे प्रभो ॥ २ ।

---

* महत्तममिति साधु । † तीर्थानुक्रमणिका वरेत्यत्रैकाक्षराधिक्यम् ।

वराह उवाच ।

उज्जयिन्यामभूद्विप्रः सदाचारविवर्ज्जितः ।
न स पूजयते* देवान्न स साधून्नमस्यति ॥ ३ ।
पुण्यतीर्थं समासाद्य न च स्नानङ्करोति सः ।
देववेदाग्निरहितः परदाररतः सदा ॥ ४ ।
सन्ध्ये द्वे शयनस्थश्च नित्यङ्कालं स तिष्ठति ।
न स देवमनुष्यांश्च पितॄन् पूजयते सदा ॥ ५ ।
पापाचाररतो नित्यं पापसङ्गः सुदुर्म्मतिः ।
गार्हस्थ्यधर्म्ममाश्रित्य मोहितोवर्त्तते सदा ॥ ६ ।
गार्हस्थ्यं सर्व्वधर्म्माणां श्रेष्ठमुक्तं स्वयम्भुवा ।
यावन्ति† जन्तवः सर्व्वे यथा गोः सर्व्वतः स्थिताः ॥ ७ ।
यथा मातरमाश्रित्य सर्व्वे जीवन्ति जन्तवः ।
एवं गार्हस्थ्यमाश्रित्य‡ सर्व्वे जीवन्ति जन्तवः ॥ ८ ।
ततः स चौर्य्यतां प्राप्तः पापैः सह नराधमः ।
स च रात्रौ द्रवँल्लोकाँल्लब्धोऽसौ राजरक्षिभिः ।
पलायमानः स परमन्धकूपेऽपतत्तदा ॥ ९ ।
मृतोऽसौ पतितस्तत्र§ राक्षसत्वमुपागतः ।
अन्धकूपे स पतितो घोररूपोऽवसत्तदा ॥ १० ।

---

* पूजयतीति साधु । एवं परत्र　　† जीवन्तीति (ग) ।　‡ एवं गार्हस्थ्यमाश्रित्य सर्व्वे जीवन्ति चागमा इति क्वचित्पाठः ।　§ मृतः स पतितोऽमुत्र राक्षसत्वमुपागत- इति (ग) ।

कदाचिदथ कार्य्येषु महान् सार्थ उपागतः ।
तेषां मध्ये द्विजः कश्चिद्रक्षाङ्कृत्वा वसुन्धरे ।
रक्षोघ्नेन च मन्त्रेण सर्व्वं सार्थञ्च रक्षति ।
तत्रागत्य च रक्षस्तु ब्राह्मणं वाक्यमब्रवीत् ॥ ११।१२ ।

राक्षस उवाच ।

अहं दास्यामि ते विप्र यत्ते मनसि वर्त्तते ।
बहुकालेन सम्प्राप्तं भोजनञ्च यथेप्सितम् ॥ १३ ।
उत्तिष्ठ विप्र गच्छ त्वमन्यत्र शयनं कुरु ।
येनाहं भक्षये सार्थं यावत्तृप्तिर्भवेन्मम ॥ १४ ।
राक्षसस्य वचः श्रुत्वा विप्रो वचनमब्रवीत् ।
एकः सार्थं प्रयातोऽहं* नोत्सृजामि कथञ्चन ॥ १५ ।
तस्माद्राक्षस गच्छ त्वं सार्थं मम परिग्रहम् ।
निरीक्षितुं न शक्तोऽसि मम मन्त्रबलेन हि ॥ १६ ।

राक्षस उवाच ।

मम भक्ष्ये हते विप्र दोषस्तव भविष्यति ।
दयां कुरु त्वं विप्रर्षे भोजनं मम दीयताम् ॥ १७ ।
ततोऽपृच्छदसौ विप्रो राक्षसं दारुणं प्रति ।
केन त्वं कर्म्मदोषेण राक्षसत्वमुपागतः ॥ १८ ।
ततश्च कथयामास यथा वृत्तं पुरातनम् ।
अनाचारादिहेतोश्च राक्षसत्वमुपागतम् ॥ १९ ।

---

* एकसार्थमुपातोऽहं (उपेतोऽहम् ?) इति (ग) ।

आत्मानङ्कथयामास विप्राग्रे स यथातथम् ।
तस्य दुःखेन संयुक्तो विप्रोऽसौ वाक्यमब्रवीत् ॥ २० ॥

विप्र उवाच ।

मित्रत्वे वर्त्तसे रक्षस्तव दास्यामि किं वद ।
आत्मना चोपकारेण प्रियं किं करवाणि ते ॥ २१ ॥

राक्षस उवाच ।

ददासि यदि तद्विप्र यन्मे मनसि वर्त्तते ।
मथुरायाञ्च यत्स्नातं कृतं विश्रान्तिसंज्ञके ।
तस्य स्नानफलं देहि येन मुक्तिं व्रजाम्यहम् ।
तस्य दुःखेन संयुक्तो विप्रो वाक्यमथाब्रवीत्* ॥ २२।२३ ।

विप्र उवाच ।

कथं जानासि रक्षस्त्वं तीर्थं विश्रान्तिसंज्ञकम् ।
कथञ्च संज्ञा तस्याभूत्तत्कथयस्व राक्षस ॥ २४ ।

राक्षस उवाच ।

पुरी उज्जयिनी नाम्ना तस्यां वासो हि मे सदा ।
कस्मिंश्चिदथ कालेन† गतोऽहं विष्णुमन्दिरम् ॥ २५ ।
तस्याग्रे तिष्ठते‡ विप्रो वाचको वेदपारगः ।
विश्रान्तितीर्थमाहात्म्यं श्रावयन् स दिने दिने ॥ २६ ।
तस्य श्रवणमात्रेण मम भक्तिर्हृदि स्थिता ।

---

* एतचरणं (ग) पुस्तके नास्ति । † कस्मिंश्चिदथ कालेन इति सार्व्वत्रिकः पाठः, काले तु इति कृते साधु स्यात् । ‡ तिष्ठतीति साधु ।

सा संज्ञा च श्रुता तत्र विश्रान्तेश्च मयाऽनघ ॥ २७ ।
वासुदेवो महाबाहुर्जगत्स्वामी जनार्द्दनः ।
विश्रामं कुरुते तत्र तेन विश्रान्तिसंज्ञिता* ॥ २८ ।
राक्षसस्य† वचः श्रुत्वा विप्रो वचनमब्रवीत् ।
एकस्नानस्य हि फलं तव दत्तञ्च राक्षस ।
विप्रे इत्युक्तमात्रे च मोक्षवासमवाप सः‡ ॥ २९ ।

इति वराहपुराणे विश्रान्तिमाहात्म्यं नाम
सप्तषष्ट्यधिकशततमोऽध्यायः ।

अष्टषष्ट्यधिकशततमोऽध्यायः ।

धरण्युवाच ।
मथुरां रक्षते* कोऽसौ क्षेत्रपालोव्यवस्थितः ।
तेन दृष्टेन यत्पुण्यं कथयस्वाखिलं प्रभो ॥ १ ।
वराह उवाच ।
दृष्ट्वा भूतपतिं देवं वरदं पापनाशनम् ।
तस्य दर्शनमात्रेण मथुरायां फलं भवेत्† ॥ २ ।

---

* संज्ञका इति (ग)। † एकं स्नानस्येति (ग)। ‡ इत्युक्तमात्रे च वने ततो मोक्षमवाप स इति (ग)।

---

* रक्षतीति साधु। † लभेदिति (ग), तच्च आर्षं लभेतेति साधु।

पुरा वर्षसहस्रन्तु तपस्तप्तं सुदारुणम् ।
पूर्णे वर्षसहस्रे तु मया सन्तोषितो हरः ।
वरं वरय भद्रन्ते यस्ते मनसि वर्त्तते ॥ ३ ।

ईश्वर उवाच ।

सर्व्वगस्त्वं हि देवेश मया ज्ञातं सुनिश्चितम् ।
मथुरायाञ्च मे स्थानं सदा देव प्रदीयताम् ॥ ४ ।
देवदेववचः श्रुत्वा हरिर्वचनमब्रवीत् ।
मथुरायाञ्च देव त्वं क्षेत्रपालोभविष्यसि ॥ ५ ।
त्वयि दृष्टे महादेव मम क्षेत्रफलं भवेत्* ।
अन्यथा नाप्नुयात्सिद्धिमेवमेतन्न संशयः ॥ ६ ।
येन यद्यादृशं पुण्यङ्कृतं तीर्थे प्रयत्नतः ।
भजते मनुजः सिद्धिमात्मभावेन तादृशीम् ॥ ७ ।
मम क्षेत्रप्रवेशे च भूमिः संसारनाशिनी ।
इन्द्रस्येव पुरी रम्या यथा नाकेऽमरावती ।
जम्बूद्वीपे तथोत्कृष्टा मथुरा मम वल्लभा ॥ ८ ।
विंशतिर्योजनानां हि माथुरं मम मण्डलम् ।
पदे पदेऽश्वमेधानां फलं नात्र विचारणा ॥ ९ ।
न मया कथितं देवि ब्रह्मणश्च महात्मनः ।
रुद्रस्य न मया पूर्व्वं कथितञ्च वसुन्धरे ।
मया सुगोपितं पूर्व्वं गुह्याद्गुह्यतरं परम् ॥ १० ।

---

* लभेदिति (ग) ।

अत्र क्षेत्रे पुरी रम्या सर्व्वरत्नविभूषिता ।
तस्यां तिष्ठन्ति तीर्थानि तानि वक्ष्यामि तच्छृणु ॥ ११ ।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ।
तीर्थसंख्या च वसुधे मथुरायां मयोदिता ॥ १२ ।
गोवर्द्धनं तथाक्रूरं द्वे कोटी दक्षिणोत्तरे ।
प्रस्कन्दनञ्च भाण्डीरं कुरुक्षेत्रसमानि षट् ॥ १३ ।
पुण्यात्पुण्यतरं श्रेष्ठमेतद्विश्रान्तिसंज्ञकम् ।
असिकुण्डं सवैकुण्ठं कोटितीर्थोत्तमं स्मृतम् ॥ १४ ।
अविमुक्तं सोमतीर्थं यमनन्तिन्दुकं ततः* ।
चक्रतीर्थं तथाक्रूरं द्वादशादित्यसंज्ञितम् ॥ १५ ।
एतत्पुण्यं पवित्रञ्च महापातकनाशनम् ।
कुरुक्षेत्राच्छतगुणं मथुरायां न संशयः ॥ १६ ।
ये पठन्ति महाभागाः शृण्वन्ति च समाहिताः ।
मथुरायास्तु माहात्म्यं ते यान्ति परमम्पदम् ।
कुलानि ते तारयन्ति द्वे शते विंशयोर्द्वयोः ॥ १७ ।
एतन्मरणकाले तु यः स्मरेत्प्रयतो नरः ।
स गच्छेत्परमां सिद्धिमिह संसारनाशिनीम् ॥ १८ ।
एतत्ते कथितं देवि सर्व्वपातकनाशनम् ।
तीर्थानाञ्चैव माहात्म्यं किमन्यच्छ्रोतुमिच्छसि ॥ १९ ।

इति वराहपुराणे भगवच्छास्त्रे मथुरामाहात्म्ये
अष्टषष्ट्यधिकशततमोऽध्यायः ।

---

* तैन्दुकं तत इति (ग) ।

ऊनसप्तत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

मथुरायाः परङ्क्षेत्रं त्रैलोक्ये न च विद्यते ।
तस्यां वसाम्यहं देवि मथुरायाञ्च सर्व्वदा ॥ १ ।
सर्व्वेषामेव तीर्थानां मथुरा च परं महत् ।
कृष्णेन क्रीड़ितं तत्र तच्छुद्धं हि पदे पदे ॥ २ ।
चक्रस्थितं हि तत्सर्व्वङ्कृष्णस्यैव पदेन तु ।
तत्र मध्यन्तु तत्स्थानमर्द्धचन्द्रे प्रतिष्ठितम् ।
तत्रैव वासिनो लोका मुक्तिं यान्ति न संशयः ॥ ३ ।
कृष्णस्य दक्षिणा कोटिरुत्तरा कोटिमध्यतः* ।
तयोर्मध्ये स्थितो देव आकारात्† सोमचक्रता ॥ ४ ।
तौ देवौ क्षेत्रफलदौ स्नानदानादिकर्म्मणि ।
तस्माद्धि मरणञ्चात्र द्वे कोटी सर्व्वकर्म्मसु ॥ ५ ।
अर्द्धचन्द्रे तु यः स्नानङ्करोति नियतात्मनः ।
तेन वै चाक्षया लोकाः प्राप्ताश्चैव न संशयः ॥ ६ ।
दक्षिणस्यां समारभ्य उत्तरस्यां समापयेत् ।
यज्ञोपवीतमात्रेण तारयन्ते च कुलम्बहु ॥ ७ ।

पृथिव्युवाच ।

यज्ञोपवीतमात्राया विधानं कीदृशम्प्रभो ।

---

* उत्तराकोटिर्मध्यत इत्येवं साधु । † आकारः सोमचक्रतेति (ग) ।

यथा मानं हि कर्त्तव्यं तत्सर्व्वं वक्तुमर्हसि ॥ ८ ।

वराह उवाच ।

यज्ञोपवीतस्य विधिं शृणुष्व* वरवर्णिनि ।
दक्षिणस्यां समारभ्य उत्तरस्यां समापयेत् ॥ ९ ।
यज्ञोपवीतस्य विधिरेष एव प्रकीर्त्तितः ।
मनुजा येन विधिना मुक्तिं यान्ति न संशयः ॥ १० ।
अनेन विधिना चैव उत्तरस्यां समापयेत् ।
गृहान्निःसृत्य मौनेन यावत्स्नानं समाचरेत् ॥ ११ ।
पूजां कृष्णस्य कृत्वा वै ततो ब्रूयाद्वसुन्धरे ।
स्नाने समाप्ते विधिवद्देवदेवस्य चैव ह ॥ १२ ।
कृष्णस्य कृत्वा तु मखं स्नानादीनि यथाक्रमम् ।
गां वै पयस्विनीं दत्त्वा हिरण्यं वसुमेव च† ॥ १३ ।
ब्राह्मणान् भोजयेत्पश्चाद्विधिरेष उदाहृतः ।
तथा शयनमुद्दिश्य एवमेवन्तु कारयेत् ॥ १४ ।
न तस्य पुनरावृत्तिर्मम लोके महीयते ।
अर्द्धचन्द्रे मृता देवि मम लोकं व्रजन्ति ते ॥ १५ ।
अन्यत्र तु मृता ये च अर्द्धचन्द्रकृतक्रियाः‡ ।
तेऽपि स्वर्गङ्गमिष्यन्ति दाहादिकरणैर्युताः ॥ १६ ।
यावदस्थीन्यर्द्धचन्द्रं यस्य तिष्ठन्ति देहिनः ।
तावत्सुपुण्यकर्त्ता च स्वर्गलोके महीयते ॥ १७ ।

---

* शृणु इति साधु । † वसु एव चेति साधु । ‡ अर्द्धचन्द्राकृते क्रिया इति (ग) ।

अर्द्धचन्द्रे विशेषोऽस्ति तीर्थे विश्रान्तिसंज्ञके ।
दाहादिकरणे तत्र गर्द्दभोऽपि चतुर्भुजः ॥ १८ ।
गर्त्तेश्वरोऽथ भूतेशो द्वे कोटी तु वसुन्धरे ।
मध्ये सदैव तिष्ठामि न त्यजामि कदाचन ॥ १६ ।
माथुराणाञ्च यद्रूपं तद्रूपं मे वसुन्धरे ।
माथुरेण तु रूपेण रूपोऽहं नात्र संशयः ॥ २० ।
शृणु देवि यथा वृत्तं गरुड़स्य महात्मनः ।
मथुरामागतो योऽसौ कृष्णदर्शनकाङ्क्षया ।
मथुरायां स्थितं देवं भिन्नरूपं न पश्यति ॥ २१ ।
तदा गतोऽसौ वसुधे देवस्याग्रे विहङ्गमः ।
कृष्णस्य दर्शनार्थाय दिव्यं स्तोत्रमुदीरयन् ॥ २२ ।

गरुड़ उवाच ।

विश्वरूप जयादित्य जय विष्णो जयाच्युत ।
जय केशव ईशान जय कृष्ण नमोऽस्तु ते ॥ २३ ।
जय मूर्त्त जयाचिन्त्य जय लोमविभूषण ।
इत्येवं संस्तुतो देवो गरुड़ेन महात्मना ॥ २४ ।
गरुड़स्य पुरस्तत्र स्थितो देवः शरीरवान् ।
सान्त्वयामास गरुड़ं प्रीतिपूर्व्वमुवाच ह ॥ २५ ।
किं कुर्य्यात्स्तोत्रमेतन्मे किं वा तव चिकीर्षितम् ।
मथुरागमकृत्ये ते सर्व्वं ब्रूहि ममाग्रतः ॥ २६ ।

गरुड़ उवाच ।

मथुरामागतश्चाहं तव दर्शनकाङ्क्षया ।

आगते तु मया देव न दृष्टं तव रूपकम् ॥ २७ ।
माथुरैरेव लोकैस्तु समं दृष्टं हि रूपकम् ।
एकीभूतमहं सर्व्वं दृष्ट्वा मां मोह आविशत् ।
तस्मात् स्तुतिस्तु देवेश कृतानुग्रहकाम्यया ॥ २८ ।
गरुड़स्य वचः श्रुत्वा प्रहस्य मधुसूदनः ।
उवाच श्लक्ष्णया वाचा गरुड़ं प्रति भाविनि* ॥ २९ ।

कृष्ण उवाच ।

माथुराणाञ्च यद्रूपं तद्रूपं मे विहङ्गम ।
ये पापास्ते न पश्यन्ति मद्रूपा माथुरा द्विजाः ॥ ३० ।
एवमुक्त्वा ततः कृष्णस्तत्रैवान्तरधीयत ।
गरुड़ोऽपि ततः स्थानाद्गतो देवि यथासुखम् ॥ ३१ ।
एतत्ते कथितं देवि माथुराणान्तु रूपकम् ।
येषां पूजितमात्रेण तुष्टोऽहञ्चैव सर्व्वदा ॥ ३२ ।
मथुरायां मृता ये च मुक्तिं यान्ति न चान्यथा ।
अपि कीटः पतङ्गो वा तिर्य्यग्योनिं गतोऽपि वा ।
चतुर्भुजास्तु ते सर्व्वे भवन्तीति विनिश्चितम् ॥ ३३ ।
यः पश्येत्पद्मनाभन्तु द्वादश्यामाश्विनस्य तु ।
एकदेहधरौ देवौ शिवकेशवरूपिणौ ।
एकादश्याञ्चोपवासी कृतशौचः समाहितः ।
कालिन्द्यान्तु नरः स्नातो मुच्यते योनिसङ्कटात् ॥ ३४।३५ ।

---

* भामिनीति (ग) ।

चैत्रस्य शुक्लद्वादश्यामुपोष्य स्नानमाचरेत् ।
चिन्ताविष्णुं समभ्यर्च्य कृत्वा वै जागरं निशि ।
यः करोति स मुच्येत नात्र कार्य्या विचारणा ॥ ३६ ।
एकां संशान्ततो* देवीं यशोदां देवकीं तथा ।
महाविद्येश्वरीं देवि† मुच्यते ब्रह्महत्यया ॥ ३७ ।
या धारा धर्म्मराजस्य मथुरायाश्च पश्चिमे ।
स्नानङ्करोति तस्यान्तु ग्रहदोषैर्न लिप्यते ॥ ३८ ।
यं यं देवमभिध्यायेद्भक्तियुक्तेन चेतसा ।
विश्रान्तिसंज्ञकं दृष्ट्वा दीर्घविष्णुञ्च केशवम् ।
सर्व्वेषां दर्शनं पुण्यं पूजनात्तु फलं भवेत् ॥ ३९ ।

इति जपविधिहोमध्यानकाले स सम्यक्
सततमभिसमीच्य‡ ब्रह्मणा यत्प्रयुक्तम् ।
सकलगुणगणानामास्पदं ब्रह्मसंज्ञं
जननमरणहीनं विष्णुमेवाभियाति§ ॥ ४० ।

इति वराहपुराणे भगवच्छास्त्रे मथुरामाहात्म्ये
ऊनसप्तत्यधिकशततमोऽध्यायः ।

---

* एकां नंशां ततो देवीमिति (ग) ।　अत्र एकां पश्यन्ततो देवीमिति पाठः स
व्यते, तथा कृते एवार्थसङ्गतिर्भवति । † देवीमिति (ग) । ‡ अतिसमीच्येति (
§ अभियान्तीति (ग) ।

सप्तत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
मथुरायां पुरा वृत्तं गोकर्णस्य महात्मनः ।
वसुकर्णः पिता तस्य वैश्यो धनसमृद्धिमान् ॥ १ ।
तस्य भार्य्या सुशीला तु नाम्ना गुणसमन्विता ।
भर्त्तुः प्रियकरी साध्वी न प्रसूता वयोऽधिका ।
विललाप च सुश्रोणी एकान्ते दीनमानसा ।
सरस्वतीसङ्गमेऽथ स्त्रियो दृष्ट्वा प्रजावतीः ॥ २।३ ।
वृक्षमूले तु तत्रैव मुनिरेकः समास्थितः ।
तस्या विलपितं श्रुत्वा शनैः सकरुणं हृदि ।
जातहार्द्दः प्रियं द्रष्टं* शनैः स्त्रियमथाब्रवीत् ।
का त्वं कस्यासि सुभगे किमर्थं रोदिषि स्वयम् ॥ ४।५ ।
इति तस्य वचः श्रुत्वा सा स्त्री ऋषिमथाब्रवीत् ।
सापत्यास्तु स्त्रियो दृष्ट्वा क्रीड़न्त्यो बालकैः सह ।
मम तन्नास्ति हि मुने दुर्भगायाः प्रजासुखम् ॥ ६ ।
उवाच मुनिशार्दूलस्तां स्त्रियं पुत्त्रगर्द्धिनीम् ।
देवतायाः प्रसादेन तव पुत्त्रो भविष्यति ॥ ७ ।
शिवस्यायतनं पुण्यङ्गोकर्णेति† च विश्रुतम् ।

---

* प्रियं द्रष्टुमिति (क), (ख) । † गोकर्णमिति साधु ।

तमाराधय देवेशं पत्या सह यशस्विनि ।
स्नानदीपोपहारेण स्तोत्रैर्नानाविधैर्जपैः ॥ ८ ।
इत्युक्ता सा च सुश्रोणी प्रणिपत्य प्रसाद्य तम् ।
भर्त्रे सा कथयामास यदुक्तं मुनिना प्रियम् ॥ ९ ।
स तद्वचनमाकर्ण्य प्रीतियुक्तं सुसंयतम् ।
जगादोच्चैः प्रियां देवि भद्रं जातो मनोरथः ।
ममाप्येतन्मतं देवि यदुक्तमृषिणा ततः ॥ १० ।
इति प्रियां समाभाष्य प्रियया च तथाऽकरोत् ।
सरस्वत्याः सङ्गमे तौ स्नात्वा गोकर्णमर्चतुः* ।
पुष्पदीपोपहारन्तु चक्राते तौ दिने दिने ॥ ११ ।
एवं तयोर्दशाब्दानि† गतानि सुतहेतवे ।
ततः प्रसन्नोभगवानुमापतिरुवाच ह ।
भविष्यति युवां‡ पुत्रो रूपवान् गुणसंयुतः ॥ १२ ।
अस्यसन्ततिवद्दृश्यः सन्तानो यस्य वै बहुः ।
देवतानां प्रसादेन खलु तस्य भविष्यति ॥ १३ ।
इत्युक्तौ तौ तु देवेन स्नानङ्कृत्वा सरस्वतीम् ।
प्रभाते देवदेवाय ददौ द्रव्यमनन्तकम् ।
ब्राह्मणेभ्यो ददौ भोज्यं वस्त्राद्यं बहुदक्षिणम् ॥ १४ ।
ततस्तस्यां सुशीलायाङ्गर्भाधानमविन्दत ।
ततः प्रववृधे गर्भः शुक्लपक्षे यथा शशी ।

---

* आनर्चतुरिति साधु । † संवत्सरो वत्सरोऽब्दो हायनोऽस्त्रीति अनुशासनात् अब्दानीति क्लीवत्वमार्षम् । ‡ युवामिति आर्षं, युवयोर्वा इति वा साधु ।

सुषुवे दशमे मासि पुत्त्रम्बालशशिप्रभम् ॥ १५ ।
गोसहस्रं तदा दत्त्वा ससुवर्णं सवस्त्रकम् ।
बहुशः सर्व्ववर्णेभ्यः पुत्त्रजन्ममहोत्सवे ।
जातकर्म्म तथा चैव नामकर्म्म चकार च ।
गोकर्णं नाम तस्यैव पिता चक्रे निरूप्य च ॥ १६।१७ ।
एवमन्नप्राशनञ्च चूड़ोपनयनं तथा ।
अतः परञ्च गोदानं वैवाहिकमनुत्तमम् ॥ १८ ।
दानन्तु ददतस्तस्य देवतां पूजयिष्यतः ।
कृतानि बहुमुख्यानि मङ्गलानि यथाविधि ॥ १९ ।
ततः प्रविष्टे तारुण्ये अग्रजं वीक्ष्य पुत्त्रकम् ।
पुनर्विवाहयामास भार्यास्तस्य चतुष्टयम्* ॥ २० ।
वयोरूपगुणोपेतास्तस्य भार्य्याः† सुलोचनाः ।
अप्रजा एव ताः सर्व्वा नाभवत्पुत्त्रिणी क्वचित् ॥ २१ ।
तेनैव धर्म्म आरब्धः प्रजार्थी‡ देवसेवनम् ।
वापीकूपतड़ागानि देवतायतनानि च ।
प्रपा मालाश्च§ नित्यान्नं भोजनं वर्त्तनानि च ॥ २२ ।
अनित्यतां ततो मत्वा चञ्चलाऽस्थिरजीवितम् ।
विनियोगः कृतस्तेन सर्व्वदा सर्व्वकर्म्मसु ॥ २३ ।
गोकर्णस्य समीपे तु पश्चिमे चक्रपाणिनः ।

* चतुष्टयीरिति साधु । † सप्ती भार्य्या इति (क), (ख) । ‡ प्रजार्थमिति (ग) ।
§ प्रपा मताश्चेति (ग) ।

प्रासादङ्कारयामास पञ्चायतनकं हरेः ॥ २४ ।
आरामस्तत्र विस्तीर्णः पुष्पजात्यस्तथैव च ।
आम्रजम्बीरनारङ्गं वीजपूरः सदाड़िमः ॥ २५ ।
प्राकारङ्कारयामास परिखामण्डलीयकम्* ।
प्रावर्त्तनञ्च कूपेषु येन सिञ्चेत्मवाटिकाम् ॥ २६ ।
पुष्पाणि च विचिन्वन्ति सर्व्वास्ता वरयोषितः ।
स्नानं पूजादिकं तद्वन्मार्ज्जनं दीपकर्म्म च ।
कुर्व्वन्ति देवतागारे ताः सर्वाः शुभलोचनाः ॥ २७ ।
पतिव्रता महाभागाश्चतुरो भगिनीर्यथा ।
नित्यकालं पतेर्वाक्ये† स्थिताः कुर्व्वन्त्यहर्निशम् ॥ २८ ।
मालाकारस्तथा नित्यं विटपांश्च प्रसिञ्चति ।
पालयामास विधिवद्विधिदृष्टेन कर्म्मणा ॥ २९ ।
जाताः सुपुष्पवन्तश्च द्रुमाः फलसमन्विताः ।
नित्यकालमपर्यन्तः फलानां सुमहोत्सवम् ।
दीयते भुज्यते सर्व्वैर्यथा शक्रस्तथा सदा ॥ ३० ।
एवन्तु वसतस्तस्य मथुरायां स्थितस्य च‡ ।
धनस्य सङ्क्षयो यातः प्रत्यहं ददतः सतः ॥ ३१ ।
शेषमात्रे धने तस्य चिन्ताभून्महती तदा ।
मातापित्रोः कुटुम्बस्य भरणीयस्य भोजनम् ।

---

* परिखाः मण्डलीयकमिति (ग)। † पत्युर्वाक्ये इति साधु। ‡ स्थितस्य तु इति (ग)।

कथं ब्रूहि करिष्यामि महाकष्टमिति सोऽब्रवीत्* ॥ ३२ ।
इति निश्चित्य मनसा वणिग्भावं† हृदि स्थिरम् ।
कृत्वा सार्थमुपामन्त्र्य निर्गतः पूर्व्वमण्डलम् ॥ ३३ ।
तत्र क्रीत्वा‡ सुपण्यानि उत्तरापथगानि च ।
बहूनि बहुमौल्यानि परदेशगमानि च ।
यातायातं ततः कृत्वा लाभालाभविचक्षणः ।
क्रीत्वा क्रेयानि वस्तूनि लाभालाभं विचार्य्य च ।
उत्तरापथदेशात्तु सार्थं स बहुविस्तरम् ।
अश्वरत्नं मणिरत्नं पट्टरत्नं समर्घकम् ।
गृहीत्वा तु समागच्छन्मथुरायां गृहम्प्रति ॥ ३४।३५।३६ ।
एकदा सार्थसम्भारो विश्रान्तुं समुपक्रमे§ ।
सानौ पर्व्वतसामीप्ये प्रभूतयवसोदके ।
नद्यास्तीरे सुप्रदेशे आवासांश्च प्रचक्रिरे ॥ ३७ ।
निवेश्य भाण्डं तत्रैव अश्वानां यवसादिकम् ।
समादिश्येतिकृत्यञ्च भृत्यैः कतिपयैर्वृतः ।
समारुरोह तं शैलम्बहुकन्दरशोभितम् ॥ ३८ ।
क्रीड़ार्थं विहरंस्तत्र सोऽपश्यत् स्थानमुत्तमम् ।
प्रसन्नसलिलोपेतं नारङ्गैस्तु विभूषितम् ॥ ३९ ।
फलवन्तश्च वृक्षाश्च पुष्पाणि सुरभीणि च ।

---

* महाकष्टमिति सोऽब्रवीदित्यत्राक्षराधिक्याच्छन्दोदोषः, महाकष्टमथोऽब्रवीदिति कृते तु न दोषः। † वणिग्भागमिति (ग)। ‡ कृत्वेति (क, ख)। § विश्रान्तुमुपचक्रमे इति सम्यक्।

पाषाणसन्धौ तत्रस्थैर्मालाकारैस्तु रोपितम् ॥ ४० ।
तत्रारुह्य दरीद्वारं यावद्दृष्टिर्निपात्यते ।
तावदभ्यागतादीनि स्वागतादि शृणोति च ॥ ४१ ।
श्रुत्वाऽपि शब्दप्रभवं किमेतदिति निश्चयम् ।
करिष्यंस्तत्र चैकान्ते दृष्टः पञ्जरगः शुकः ॥ ४२ ।
तेनोक्तं भो इहागच्छ आतिथ्यं करवाणि ते ।
पाद्यं गृहाण भोः पान्थ आसनन्ते इदं शुभम् ॥ ४३ ।
फलानीमानि स्वादूनि मधुमांसोदकानि च ।
यथेष्टं यावतीच्छा च तावद्भुङ्क्ष्विमे नराः ।
आगत्य पितरौ मह्यं* विशेषे तौ करिष्यतः ॥ ४४ ।
अतिथेरागतस्येह पूजायां विमुखो भवेत् ।
गृहस्थस्तस्य पितरो वसन्ति नरके† ध्रुवम् ।
पूजिते पूजिताः स्वर्गे मोदन्ते कालमक्षयम् ॥ ४५ ।
अतिथिर्यस्य भग्नाशो गृहात्प्रव्रजति यदि ।
आत्मनो दुष्कृतं तस्मै दत्त्वा तत्सुकृतं हरेत् ॥ ४६ ।
तस्मात्सर्व्वप्रयत्नेन पूज्यो वै गृहमेधिना ।
काले प्राप्तस्त्वकाले वा यथा विष्णुस्तथैव सः ॥ ४७ ।
एवंविधाः शुभा वाचो वैश्यो धर्म्मोपदेशकात् ।
श्रुत्वा शुकात्स सर्व्वाय‡ गोकर्णो मुदितोऽब्रवीत् ॥ ४८ ।

---

* ममेत्यत्र मह्यमित्यार्षम् । † वसन्ते नरके इति (ग), तत्र वसन्ते इति आर्षम्
‡ सर्व्वस्मै इति साधु । श्रुत्वा शुकात् सर्व्वार्थार्थेति (ग) ।

कस्त्वमृषिः पुराणज्ञः किं वा देवोऽथ गुह्यकः ।
तव प्रसन्नरूपस्य यस्येयं वागमानुषी ।
कस्त्वं कथय मे सत्यमुक्ताहृद्यातिथिप्रियः ॥ ४९ ।
धन्यः स मानुषो यस्य नित्यं सन्निहितो भवान् ॥ ५० ।
इत्युक्तः स शुकः सर्व्वं शशंसात्मपुराकृतम् ।
शृणु रौद्रं यथा पूर्व्वं मया कृतमबुद्धिना ।
शुकस्य विप्रियं याहृग्महर्षेस्तु तपस्यतः ॥ ५१ ।
सुमेरोरुत्तरे पार्श्वे महर्षिगणसेविते ।
तपश्चचार विपुलं* शुको व्याससुतो महान् ॥ ५२ ।
श्रोतुकामाः पुराणानि सेतिहासानि नैगमाः ।
ऋषयस्तत्र आजग्मुरसितोदेवलस्तदा ॥ ५३ ।
मार्कण्डेयो भरद्वाजो यवक्रीतस्ततो भृगुः ।
अङ्गिरास्तैत्तिरीयेभ्यः काण्वो मेधातिथिः क्रतुः ॥ ५४ ।
तन्तुः सुतन्तुरादित्यो वसुमानेकतो द्वितः ।
वामदेवश्चाश्वशिरास्त्रिशीर्षो गौतमोदरः ॥ ५५ ।
अन्ये च सिद्धा देवाश्च पन्नगा गुह्यकास्तथा ।
शुकं सम्मुखयामासुः पप्रच्छुर्धर्म्मसंहिताम् ॥ ५६ ।
अहन्तु वामदेवस्य शिष्यो नाम्ना शुकोदरः ।
भ्रष्टः श्रद्धान्वितो बाल्यात्सुनील्यामग्रतश्चरन् ।
ऊहापोहकरम्प्रश्नं वारंवारञ्च पृष्टवान् ।

---

* विप्रीत्तमिति पाठः सभाश्यते ।

अन्यायवादिनं माञ्च गुरुर्नित्यं निषेधति ॥ ५७।५८ ।
गुरूणामग्रतो वाक्यं कथायाङ्कथतां सह ।
पूर्व्वपक्षोश्च सिद्धान्ताः परस्परजिगीषवः ।
अन्तरे चान्तराक्षेपं पुनर्नैवमवोचथाः ॥ ५९ ।
एवं निषेधितश्चाहं गुरुणा मुनिसत्तमैः ।
न कृतं यन्मया वाक्यं तेनाहं शपितस्तदा ॥ ६० ।
शुकेन कोपाच्छापो मे दत्तोऽयं जल्पको वटुः ।
यथानामा त्वयं पक्षी शुको भवति नान्यथा ॥ ६१ ।
इत्युक्तमात्रे वचने तत्रैवाहं शुकोदरः ।
शुकत्वं तत्क्षणात्प्राप्तः क्षमस्वेत्यूचुरोजसा ।
मुनयस्तं महात्मानं शुकं तत्त्वार्थवित्तमम् ॥ ६२ ।
नान्यथा नान्यथा चोक्तं कदाचित्त भविष्यति ।
आगामिकाले दास्यामि वरमस्मै शुकाय भो ॥ ६३ ।
युष्माकमुपरोधेन यथारूपो विहङ्गमः ।
अयं भविष्यति सदा सद्भावहितभावनः ॥ ६४ ।
पुराणतत्त्ववेत्ता च सर्व्वशास्त्रार्थपारगः ।
मथुरायां मृतः पश्चाद्ब्रह्मलोकङ्गमिष्यति ॥ ६५ ।
एवं शापं वरं गृह्य* तस्माद्दीनो ह्यहं द्रुतम् ।
मथुरा मथुरोच्चारं कुर्य्यान्नित्यमतन्द्रितः ॥ ६६ ।
नित्योद्विग्नस्य मे गात्रं हिमाद्रौ तु गुहां वसन् ।

---

* गृहीत्वेति साधु । एवं परत्र ।

प्राप्तोऽहं शवरेणैव येनाहं पञ्जरे कृतः॥ ६७।
शवरस्तु सभार्य्यो वै क्रीड़ते स मया सह।
मुनेः प्रसादान्मे ज्ञानं न जहाति कदाचन॥ ६८।
भुज्यते ह्यवशेनैव कृतं येन यथा च यत्।
स्वस्थो भव महाभाग मा स्म शोके मनः कृथाः॥ ६९।
इत्युक्तः स तु गोकर्णस्तदा तेन शुकेन च।
तस्य च वचनं हृद्यं शुकमोक्षप्रदायकम्॥ ७०।
या सा मुक्तिप्रदा रम्या मथुरा पापनाशिनी।
तस्यां वसाम्यहं भद्र वाणिज्यार्थमिहागतः।
पुनरिच्छामहे तत्र भाण्डं गृह्य यथासुखम्॥ ७१।
मथुरावासिनं श्रुत्वा गोकर्णं स शुकस्तदा।
पृच्छं संस्थाप्य चात्मानं गोकर्णस्य यथेप्सितम्॥ ७२।
एवञ्च वदतस्तस्य* शवरी शयनोत्थिता।
दर्पान्निःसृत्य तु वहिर्ददर्शासनसंस्थितम्।
भृत्यैः परिवृतं चारुदर्शनीयस्वरूपकम्† ॥ ७३।
निरीक्ष्य बहुशस्तत्र शुकोवचनमब्रवीत्।
प्रियातिथिञ्च सम्प्राप्तं मातः पूज्यतमं शुचिम्।
कुरु पूजां यथार्हञ्च गोकर्णस्य वरातिथेः॥ ७४।
शुकस्य वचनाद्यावत्पूजार्थमुपकल्पितम्।
न ददाति ततस्तत्र वनाच्छवर आगतः॥ ७५।

---

* ताभ्यामिति (ग)। † रुद्रदर्शनीयस्वरूपकमिति (क, ख)।

तस्याग्रे तु पुनस्तेन शुकेनातिथिपूजनम् ।
शंसितं स तथेत्युक्त्वा कृत्वा पूजां प्रणम्य च ।
फलानि मांसयुक्तानि मधूनि सुरभीणि च ।
सम्पाद्य संविदङ्कृत्वा वद किङ्करवाणि ते ॥ ७६।७७ ।
इत्युक्तः शवरेणाथ गोकर्णो वाक्यमब्रवीत् ।
अन्यत्किञ्चिदथो देयं यदि किञ्चिद्ददासि च ।
शुकोऽयं पञ्जरस्थश्च पुत्त्रार्थं मे प्रदीयताम् ।
मथुरायां गमिष्यामि कृतार्थः पितुरन्तिके ॥ ७८।७९ ।
इत्युक्तमात्रे वचने शवरो वाक्यमब्रवीत् ।
अस्माकं यमुनास्नानं सङ्गमे यमुनाम्भसः ।
सरस्वत्याश्च पतने दत्ते दास्यामि ते शुकम् ॥ ८० ।
शवरेणैवमुक्तस्तु गोकर्णः प्रत्यभाषत ।
सरस्वत्याः सङ्गमे च यत्फलं लभते नरः ।
स्नानेन किम्फलं तस्य यदि जानासि तद्वद ॥ ८१ ।

शवर उवाच ।

शुकेनानेन मे सर्व्वं मथुरायाश्च यत्फलम् ।
यत्फलं सङ्गमस्योक्तं शृणुयाद्द्वादशीव्रतम् ॥ ८२ ।
वियोनिस्थो राक्षसो वा तिर्य्यग्योनिङ्गतस्य वा* ।
यस्योद्दिश्य† व्रतं कुर्य्यात्स गच्छेत्परमाङ्गतिम् ॥ ८३ ।
सङ्गमस्य फलं तस्य दृष्ट्वा गोकर्णमीश्वरम् ।

---

* तिर्य्यग्योनिं गतोऽपि वा इति सम्यक् । † य उद्दिश्य इति कृते तु पाठे अर्थसङ्गतिः स्यात् ।

नासौ यमपुरं याति विष्णुलोकञ्च गच्छति ।
एवं मया श्रुतं तस्य सङ्गमस्य महत्फलम् ॥ ८४ ।

इति वराहपुराणे गोकर्णसरस्वतीमाहात्म्ये
सप्तत्यधिकशततमोऽध्यायः ।

एकसप्तत्यधिकशततमोऽध्यायः ।

वराह उवाच ।

शुकं गृह्य ततः स्थानात्प्रस्थितो* मथुरां पुरीम् ।
प्रविश्य गृह्य तत्पुण्यं मातापित्रोस्तदर्पितम् ।
शुकस्य चरितं सर्व्वं निवेद्य च महामतिः ॥ १ ।
एवं निवसतस्तस्य बहुवर्षाणि तत्र वै ।
सुखम्प्राप्तं मतञ्चापि व्यवहारे च पूजने ॥ २ ।
एवं निवसतस्तस्य द्रव्यशेषमजायत ।
पुनस्तत्रैव गमने वणिग्भावे मतिर्गता ॥ ३ ।
समुद्रयाने रत्नानि महामौल्यानि साधुभिः ।
रत्नपरीक्षकैः सार्द्धमानयिष्ये बहूनि च ।
एवं निश्चित्य मनसा महासार्थपुरःसरः ।
समुद्रयायिभिर्लोकैः संविदं सूच्य† निर्गतः ॥ ४।५ ।

---

* प्रतिस्थानात् प्रस्थित इति (ग) । † सूचयित्वेति साधु ।

पेयाहारसमाहारङ्कृत्वा कृत्यविदार्थकम् ।
शुकं गृहीत्वा प्रस्थानमकरोत्पुण्यवासरे ॥ ६ ।
मातापित्रोः शुभा वाचो गृहीत्वा देवतागृहे ।
भार्य्याणां देवकार्य्यञ्च वाटिकायाश्च पोषणम् ।
पितुः शुश्रूषणञ्चोक्ता सर्व्वं यूयं करिष्यथ ॥ ७ ।
यथायोगं यथाकालं यथाकृत्यं यथा च यत् ।
भवतीभिश्च कृत्यं मे करणीयं यथा तथा ।
सन्दिश्य भार्य्याः सुश्रोणीर्देवं दृष्ट्वा प्रसाद्य च ।
भार्य्याभिः समनुज्ञातो यानपात्रङ्गतस्तदा ॥ ८।९ ।
शुकेन सह सम्प्राप्तो महान्तं लवणार्णवम् ।
पोतारूढास्ततः सर्व्वे पोतवाहैरुपोहिताः* ।
अपारे दुस्तरेऽगाधे यान्ति वेगेन नित्यशः ॥ १० ।
अथ दैववशाद्वायुर्विलोमः समजायत ।
दुर्व्वातेन तदा नित्यं बलात्पोत उपोहितः ॥ ११ ।
पोतवाहास्ततः सर्व्वे विसंज्ञा मोहिताः कृशाः ।
हा कष्टं हि कथञ्चित्कुत्र गच्छामहे वयम् ॥ १२ ।
तेषान्तु वचनं श्रुत्वा ज्ञात्वा दुर्व्वातपीड़नम् ।
आक्षिपद्भिरुग्राभिरन्योन्याशङ्क्य† मूर्च्छिताः ॥ १३ ।
जल्पन्ति कोऽत्र पापिष्ठः समारूढोनिराकृतिः ।
तस्य पातकसंस्पर्शान्मृताः सर्व्वे न संशयः ॥ १४ ।

---

* पोतवाहैरुपोपिता इति (क), (ख) । † अन्योऽन्यमाशङ्क्रेति साधु ।

मम सङ्गादिमा देव्यो दशमीञ्च दशाङ्गताः ॥ ६ ।
एवं ज्ञात्वा स पप्रच्छ तासां रूपविपर्य्ययम् ।
कथयध्वं महाभागाः किमेतद्रूपव्यत्ययम् ॥ ७ ।

देव्य ऊचुः ।

अप्रष्टव्यं महाभाग दैवः सर्व्वेषु कारणम् ।
कालात्मकः स भगवान् भुज्यते* सुकृतं यतः ॥ ८ ।
स एव नित्यकालञ्च पृच्छति स्म तदुत्तरम् ।
दुःखार्त्तस्य सुदीनस्य न जल्पन्त्यतिदुःखिताः ॥ ९ ।
निश्चयार्थं पुनः सोऽथ गोकर्णस्ताः प्रणम्य च ।
पृच्छत्याग्रहरूपेण निश्चयं विन्दते यथा ॥
यदि गोप्यं ममार्त्तस्य वैरूप्यं कथयिष्यथ† ।
अगाधे दुस्तरे प्राणांस्त्यक्ष्याम्यद्य सुदुःखितः ॥
एवमुक्ते तदा तासां मध्ये एकाऽब्रवीदिदम् ।
दुःखं तस्य समाख्येयं यो विनाशयते‡ रुजम् ॥ १० ।
शृणु वत्स वदिष्येऽहं विरूपकारणं§ यथा ।
अस्माकञ्च समुत्पन्नमेकचित्तोऽवधारय ॥ ११ ।
अस्ति मधुपुरी रम्या नृणां मुक्तिप्रदायिनी ।
अयोध्याधिपतिर्वीरश्चतुरङ्गबलान्वितः ।
चातुर्मास्यं तीर्थसेवी स गतो भक्तिपूर्व्वकम् ॥ १२ ।

---

* भुङ्क्ते इति साधु । † अत्र नेति पदस्य न्यूनता । ‡ विनाशयतीति साधु ।
§ विरूपकरणमिति (ग) ।

तत्र देवस्य चागारं विष्णोः पञ्चसमन्वितम्।
आरामवाटिकाः शुभ्राः प्राकारावरवेष्टिताः।
कूपप्रावर्त्तकोपेताः पुष्पजात्यः सुवासिताः॥
फलवन्तो द्रुमास्तस्मिन् सर्व्वर्त्तुसुमनोहराः।
तस्याभ्यासे स राजर्षिश्चकारावासमुत्तमम्॥ १३।१४।१५।
सेवकैर्नाशितः सर्व्व आरामः सफलद्रुमः।
प्राकारपरिखा चैव स्थण्डिलप्रतिमा कृता॥ १६।
बहुधा वार्य्यमाणैस्तु पापबुद्धिसमाश्रितैः।
एवं तेन कृतं तच्च सोऽपि दैववशङ्गतः॥
पञ्जरस्थो यथा सिंहः कोऽस्मांस्त्राता भवेदिति*।
पिधायाञ्जलिना वक्त्रमश्रुक्लिन्नस्तनान्तरा।
ररोदोच्चैःस्वरं† दीना हा कष्टमिति जल्पती॥ १७।१८।
सर्व्वासां रुदतीनाञ्च कुररीणामिव स्वनः।
श्रूयते बहुधाकारो गोकर्णोऽप्यतिदुःखितः॥
एकैकस्यास्तु चक्रेऽसौ मूर्द्ध्ना पादाभिवन्दनाम्।
प्राञ्जलिर्दीनया वाचा सान्त्वयामास ताः शनैः॥१९।२०।
प्राप्तसंज्ञास्तु ताः सर्व्वाः गोकर्णोऽप्याह सुस्वनः।
भविता यदि तत्राहं राजानं तं निवारयम्‡।
किङ्करिष्यामि दैवेन समर्थोऽप्यवसादितः॥ २१।

* (ग) पुस्तके इतः पूर्व्वं गोकर्ण उवाच इति पाठो वर्त्तते, स तु न ...
† ररोद मुखरं दीनेति (ग)। ‡ निवारयेयमिति साधु।

Prithiráj Rásau, (Hindí) Fasc. I—VI @ /6/ each 2 4
Ditto (English) Fasc. I 0 12
Prákrita Lakshanam, (Sans.) Fasc. I 1 8
Srauta Sútra of Ápastamba, (Sans.) Fasc. I—XII @ /6/ each .. 4 8
Srauta Sútra of Áśvaláyana, (Sans.) Fasc. I—XI @ /6/ each .. 4 2
Ditto Látyáyana (Sans.) Fasc. I—IX @ /6/ each .. 3 6
Ditto Sáńkhyáyana (Sans.) Fasc. I—V @ /6/ each .. 1 14
Sáma Veda Samhitá, (Sans.) Vols I, Fasc. 1—10 ; II, 1—6 ; III, 1—7 ; IV, 1—6 ; V, 1—8. @ /6/ each Fasc. 13 14
Sáhitya Darpana, (English) Fasc. I—IV @ /6/ each 1 8
Sáńkhya Sútra Vritti (Sans.) Fasc. I and II @ /6/ each 0 12
Sánkhya Aphorisms of Kapila, (English) Fasc. I and II @ /6/ each 0 12
Súrya Siddhánta, (Sans.) Fasc. IV 0 6
Sarva Darśana Sangraha, (Sans.) Fasc. II 0 6
Sankara Vijaya, (Sans.) Fasc. II and III @ /6/ each 0 12
Sánkhya Pravachana Bháshya, (English preface only) Fasc. III .. 0 6
Sánkhya Sára, (Sans.) Fasc. I 0 6
Srí Bháshyam. Fasc. I 0 6
Suśruta Samhitá, (Eng.) Fasc. I and II @ /12/ each 1 8
Taittiríya Áranya, (Sans.) Fasc. I—XI @ /6/ each 4 2
Ditto Bráhmana, (Sans.) Fasc. I—XXIV @ /6/ each 9 0
Ditto Samhitá, (Sans.) Fasc. I—XXXIV @ /6/ each .. 12 12
Ditto Prátiśákhya, (Sans.) Fasc I—III @ /6/ each 1 2
Ditto and Aitareya Upanishads, (Sans.) Fasc. II and III @ /6/ each 0 12
Tándya Bráhmana, (Sans.) Fasc. I—XIX @ /6/ each 7 2
Tattva Chintámani, (Sans.) Vol. I, Fasc. 1—9 ; Vol. II, Fasc. 1—2 @ /6/ each 4 2
Tulsí Satsí, Fasc. I 0 6
Uttara Naishadha, (Sans.) Fasc. III—XII @ /6/ each 3 12
Uvás-agadasáo, Fasc. I—V @ /12/ each 3 12
Varáha Purána, (Sans.) Fasc. I—X @ /6/ each 3 12
Váyu Purána, (Sans.) Vol. I, Fasc. 1—6 ; Vol. II, Fasc. 1—7, @ /6/ each Fasc. 4 14
Vishnu Smriti, (Sans.) Fasc. I—II @ /6/ each 0 12
Vivádaratnákara (Sans.) Fasc. I—VII @ /6/ each 2 10
Vrihannáradíya Purána, (Sans.) Fasc. I—V @ /6/ each 1 14
Yoga Sútra of Patanjali, (Sans. & English) Fasc. I—V @ /14/ each 4 6

Tibetan Series.

Sher Phyin, Fasc. I—II @ 1/ each 2 0
*R*togs *b*rjod*d*pag*b*sam*h*khri Śiń (Tibetan & Sans.) Fasc. I .. 1 0

Arabic and Persian Series.

'Álamgírnámah, with Index, (Text) Fasc. I—XIII @ /6/ each .. 4 14
Áín-i-Akbarí, (Text) Fasc. I—XXII @ 1/ each 22 0
Ditto (English) Vol. I (Fasc. I—VII) 1/12 each 12 4
Akbarnámah, with Index, (Text) Fasc. I—XXXVII @ 1/ each .. 37 0
Bádsháhnámah, with Index, (Text) Fasc. I—XIX @ /6/ each .. 7 2
Beale's Oriental Biographical Dictionary, pp. 291, 4to., thick paper, @ 4/12 ; thin paper 8
Dictionary of Arabic Technical Terms and Appendix, Fasc. I—XXI @ 1/ each 21
Farhang-i-Rashídí (Text), Fasc. I—XIV @ 1/ each 14
Fihrist-i-Túsí, or, Túsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each 3
Futúh-ul-Shám Wáqidí, (Text) Fasc. I—IX @ /6/ each .. 3
Ditto Azádí, (Text) Fasc. I—IV @ /6/ each 1
Haft Ásmán, History of the Persian Mansawi, (Text) Fasc. I .. 0
History of the Caliphs, (English) Fasc. I—VI @ /12/ each .. 4
Iqbálnámah-i Jahángírí, (Text) Fasc I—III @ /6/ each .. 1
Isabáh, with Supplement, (Text) [illegible] sc. @ /12/ each .. 3[illegible]
Maásir-ul-Umara, Vol. I, F[illegible] ; Vol. II, 1—8 @ /6/ each ..
Maghází of Wáqidí, (Text) F[illegible] V @ /6/ each ..
Muntakhab-ul-Tawáríkh, (T[illegible] I—XV @ /6/ each
Muntakhab-ul-Tawáríkh [illegible]. II, Fasc. I—IV @ /12/
Muntakhab-ul-Lubáb, [illegible] XIX @ /6/ each ..
Ma'ásir-'Álamgírí, (T[illegible] @ /6/ each ..
Nukhbat-ul-Fikr (Te[illegible]